5914

Ganesa purana

Accn. No 15710

28.100
JI

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥ नमस्तस्मैगणेशायब्रह्मविद्याप्रदायिने ॥ यस्यागस्त्यायतेनामविघ्नसागरशोषणे १ ऋषय ऊचुः ॥ ॥ सूतसूतमहाप्राज्ञवेदशास्त्रविशारद ॥ सर्वविद्यानिधेत्वत्तोवक्तान्योनोपलभ्यते १ जन्मजन्मांतरीयंनःस्थितंपुण्यंमहत्तरम् ॥ तेनसंदर्शनंजातंसर्व ज्ञस्यसतस्तव २ वयंधन्यतमालोकेजीवितंनसुजीवितम् ॥ पितरोवेदशास्त्राणितपांस्याश्रमएवच ३ अष्टादशपुराणानिविस्तराच्छ्रावितानिनः ॥ अन्यान्यपिहि नःश्रोतुमिच्छानोवदसत्तम ४ शौनकेयमहासत्रेसक्ताद्वादशवार्षिके ॥ त्वत्कथामृतपानान्नोनान्यद्विश्रामकारणम् ५ ॥ सूतउवाच ॥ ॥ साधुपृष्टंमहाभागाभ वद्भिःपुण्यकर्मभिः ॥ साधूनांसमचित्तानांमतिर्लोकोपकारिणी ६ ममापिपरितोषोस्तिकथानांकथनेद्विजाः ॥ अतोहंसाधुवृत्तेभ्यःकथयिष्येविशेषतः ७ अ न्यान्युपपुराणानिवर्तंतेष्टादशैवच ॥ गाणेशंनारदीयंचनृसिंहादीन्यथापिच ८ गणेशस्यपुराणंयत्तत्रादौकथयाम्यहम् ॥ दुर्लभंश्रवणंयस्यमर्त्यलोकेविशेष तः ९ यस्यस्मरणमात्रेणकृतकृत्योभवेन्नरः ॥ प्रभावमस्यगदितुंनेशःशेषश्चतुर्मुखः १० संक्षेपतोब्रवीम्येतत्तथापिभवदाज्ञया ॥ बहुजन्मार्जितैःपुण्यैरस्यतु श्रवणंभवेत् ११ पाखंडिनांनास्तिकानांनभवेत्पापकर्मिणाम् ॥ नित्यत्वान्निर्गुणत्वाच्चअनादित्वाच्चतत्त्वतः १२ गणेशस्यस्वरूपंनवक्तुंकेनापिशक्यते ॥ तथाप्युपा सनासक्तैर्निर्गुणंतन्निरूप्यते १३ ॐकाररूपीभगवान्योवेदादौप्रतिष्ठितः ॥ यंसदामुनयोदेवाःस्मरंतींद्रादयोहृदि १४ यंपूजयंतिसततंब्रह्मेशानेंद्रविष्णवः ॥ यो हेतुःसर्वजगतांसर्वकारणकारणम् १५ यदाज्ञयाकँःसृजतेथविष्णुर्यदाज्ञयापालनमातनोति ॥ यदाज्ञयासंहरतेहरोपियदाज्ञयासंचरतेदिनेशः १६ यदाज्ञया वातिसमीरणोपियदाज्ञयापःप्रवहंतिदिक्षु ॥ यदाज्ञयाभानिपतंतिभूमौयदाज्ञयाग्निर्ज्वलतित्रिलोके १७ तस्यैयच्चरितंगुप्तंकस्यापिननिवेदितम् ॥ तदहंवःप्रव क्ष्यामिसादरंश्रूयतांद्विजाः १८ ब्रह्मणाकथितंपूर्वंव्यासायामिततेजसे ॥ भृगवेकथितंतेनसोमकांतायतेनच १९ व्रतैर्यज्ञैस्तपोभिश्चदानैस्तीर्थैश्चकोटयः ॥ भवंतियेषांपुण्यानांतेषांबुद्धिःप्रजायते २० गणेशाख्यपुराणस्यश्रवणेद्विजसत्तमाः ॥ मायायेषांनसंसारेनदारापत्यभूमिषु २१ मयूरेशकथायांतेसादरामुनि सत्तमाः ॥ श्रूयतामस्यमहिमासोमकांतप्रसंगतः २२ सौराष्ट्रेदेवनगरेसोमकांतोभवन्नृपः ॥ वेदशास्त्रार्थतत्त्वज्ञोधर्मशास्त्रार्थतत्परः २३ दशनागसहस्राणि हयानांद्विगुणानिच ॥ रथिनांषट्सहस्राणिप्रयांतमनुयांतिच २४ पदातयोप्यसंख्याताअग्निशस्त्रधरास्तथा ॥ कोदंडधारिणश्चान्येनिषंगद्वयधारिणः २५ बुद्ध्याबृहस्पतिंजिग्येसंपदाधनदंचयः ॥ क्षमयापृथिवींजिग्येगांभीर्येणमहोदधिम् २६ सूर्याचंद्रमसौजिग्येभासाकांत्याचयोनृपः ॥ प्रतापेनानलंजिग्येसौंदर्ये णमनोभवम् २७ यस्यामात्याःप्रबलिनःपंचासन्दृढविक्रमाः ॥ नीतिशास्त्रार्थतत्त्वज्ञाःपरराष्ट्रविमर्दिनः २८ रूपवान्प्रथमस्तत्रविद्याधीशस्तथापरः ॥ क्षेम करोज्ञानगम्यःसुबलःपंचमःस्मृतः २९ राजकार्यकरानित्यंराज्ञःप्रियतमाभृशम् ॥ एतैर्नानाविधादेशाआक्रांताःस्वपराक्रमात् ३० एतेतिसुंदरानानाभूषावस्त्रै

१ इच्छास्ति द्विजसत्तम । २ सक्तैःसगुणं तन्निरूप्यते इतिपाठान्तरम । ३ कःब्रह्मा । ४ यस्ययच्चार्हतोगुप्तमितिपाठान्तरम् । ५ मनोयषामित्यपिपाठः । ६ प्रतापेननलमितिवापाठः ।

रलंकृताः ॥ तस्यराज्ञोभवद्भार्यासुधर्मागुणशालिनी ३१ यद्रूपमवलोक्यैवरतिरंभातिलोत्तमाः ॥ लांजेतानसुखंक्वापिलोभरनचमानर ३२ अनेकरत्नखचितेता टंकेकांचनेशुभे ॥ बिभ्रतीकर्णयोःकंठेनिष्कंमुक्ताफलानिच ३३ कटौरत्नमयींकांचींतादृशेनूपुरेंघ्रिगे ॥ अंगुलीयान्युत्तमानिकरपादांगुलीषुच ३४ वासांस्यनेक वर्णानिमहार्हाणिसहस्रशः ॥ भगवद्भजनेसक्तातथाचातिथिपूजने ३५ सेवनेहर्निशंभर्तुर्वचनेचरतासदा ॥ हेमकंठइतिख्यातःपुत्रोभूदनयोःशुभः ३६ गजायुतब लोधीमान्विक्रमीशत्रुतापनः ॥ एवमासीत्सोमकांतःपृथिव्यांराजसत्तमः ३७सर्वान्राज्ञोवशेकृत्वाचक्रेराज्यंधरातले ॥ नित्यंधर्मरतोयज्वादातात्यागीद्विजोत्तमाः ३८॥ इतिश्रीगणेशपुराणेउपासनाखंडेसोमकांतवर्णनंनामप्रथमोऽध्यायः ॥ १ ॥ ॥ सूतउवाच ॥ श्रूयतामृषयःसर्वेसोमकांतस्यदुष्कृतम् ॥ अकस्मादभवत्तस्यग लत्कुष्ठोतिदुःखदः १ (धर्मशीलस्यराज्ञोथपूर्वकर्मविपाकतः ॥ शुभंवाप्यशुभंकर्मनमुंचतिनरंक्वचित् २) यस्यांयस्यामवस्थायांकृतंभवतिकर्मयत् ॥ तस्यांत स्यामवस्थायांभुज्यतेप्राणिभिर्ध्रुवम् ३ दुःखसागरमग्नोभूदप्लवोजलधौयथा ॥ वेदनामलभद्धीमुजंगेनेवदंशितः ४ नानाक्षतसमाकीर्णःस्रवद्रक्तइतस्ततः ॥ पू यशोणितवान्राजाकृमिभिर्विह्वलीकृतः ॥ अस्थिशेषोभवद्राजायक्ष्मणेवसमावृतः ५ चिंतयाव्याकुलीभूतःसर्वेंद्रियरुजान्वितः ॥ ततोमात्याञ्जगौराजामनःसंरु द्धयत्नतः ६ ॥ राजोवाच ॥ धिङ्मेराज्यंचरूपंचधिग्बलंजीवितंधनम् ॥ केनेदंकर्मबीजेनव्यसनंसमुपस्थितम् ७ कांत्यासोमोजितोयेनसोमकांतस्ततोभवम् ॥ येनमेसाधवोदीनाःश्रोत्रियाआश्रमाआपि ८ पालिताःपुत्रवज्जानपदालोकास्तथापरे ॥ येनमेनिर्जिताबाणैःशत्रवोघोररूपिणः ९ येनमेसकलापृथ्वीकृतास्ववशवर्तिनी ॥ सम्यगाराधितोदेवःपरमात्मासदाशिवः १० दुष्टसंगमहीनेनचित्तनिग्रहकारिणा ॥ येनमेवपुषापूर्वमिष्टगंधानिषेविताः ११ तदिदानींपूतिगंधमतो मेजीवितंवृथा ॥ अतोहंकाननंयास्येसर्वेषामभ्यनुज्ञया १२ हेमकंठंसुतंसर्वेबुद्धिविक्रमसंयुतम् ॥ सिंचंतुराज्यहेतोर्मेपालयंतुपराक्रमैः १३ इदानींनप्रदर्शिष्येमु खंलोकेकथंचन ॥ नमेराज्यैर्नदारैर्वाजीवितेनश्रियापिवा १४ प्रयोजनंमहामात्याःकरिष्येस्वहितंवने ॥ सूतउवाच ॥ इत्युक्त्वानिपपातोर्व्यांतरुर्वातहतोयथा ॥ १५ पूयशोणितधर्मौघैर्व्याप्तासौद्विजसत्तमाः ॥ कोलाहलोमहानासीदमात्यानांचयोषिताम् १६ हाहाकारश्चलोकानांक्षणमासीत्सुदारुणः ॥ वस्त्रप्रोंछनवाता द्यैरौषधैःक्षिप्रकारिभिः १७ मंत्रिमंत्रप्रयोगैस्तंसचेतनमकारयन् ॥ स्वस्थेजातेनृपेतस्मिन्नमात्याःप्राब्रुवन्निदम् १८॥ अमात्याऊचुः ॥ तवप्रसादादमरेंद्रतुल्यंभु क्तंसुखंसर्वजनेष्वसिद्धम् ॥ कथंत्विदानींत्वदृतेवसामःकथंचजीवेमपशुघ्नतुल्याः १९ करोतुराज्यंतवसूनुरेकःप्रभूतकोशोबलवान्नरिपुघ्नः ॥ विहायसर्वंसुखमद्यरा जन्सहैवयामस्तुवनायगंतुम् २० ॥ सूतउवाच ॥ ॥ ततःसुधर्मावचनंजगादवनेनृपंसेवितुमेकवीरा ॥ व्रजेसहानेनप्रधानवर्याप्रशिष्टराज्यंसहमेसुतेन २१ दुःखस्यभोक्तानपरोस्तिनैवसुखस्यवापूर्वकृतस्यजंतोः ॥ यथायथाकर्मफलंप्रसक्तंतदेवभोग्यंस्वयमेवतादृक् २२ मयापिनानाविधभोगवत्यासुखेनराज्यंप

१ भगवद्भजन दानेसक्ता इति पाठान्तरम् ॥ २ त्वरिता इति वा पाठः ॥ ३ नायंश्लोको लिखितपुस्तके ॥ ४ सन्तःसंन्यासिनोपिच इति पा० ॥ ५ अभिषेकं कुर्वन्तु इत्यर्थः

रिभुक्तमस्य ॥ स्त्रीणांहिभर्तागमनंसहैवपरत्रलोकेमुनिभिःप्रदिष्टम् २३ ततःपुत्रोहेमकंठोविनीतःशोकसंकुलः ॥ उवाचतस्मिन्समयेसोमकांतमिदंवचः २४ हे
मकंठउवाच ॥ नमेराज्येनदारैश्चप्राणैर्धनचयैरपि ॥ त्वांविनानृपशार्दूलकृत्यंनैवास्तियत्क्वचित् २५ यथास्नेहंविनादीपोविनाप्राणंयथातनुः ॥ वृथारा
ज्यंतथाराजंस्त्वांविनाधर्मपालक २६ ॥ सूतउवाच ॥ श्रुत्वाहृष्टमनाराजापुत्रंप्रोवाचधर्मतः ॥ अमात्यानांसुधर्मायाःपुत्रस्यवचनामृतम् २७ ॥ राजोवाच ॥
पितुर्वाक्यरतोनित्यंश्रद्धयाश्राद्धकृत्तथा ॥ पिंडदोयोगयायांतुसपुत्रःपुत्रउच्यते २८ अतोनीत्यासमायुक्तःकुरुराज्यंममाज्ञया ॥ अमात्ययुक्तःशास्त्रित्वंपु
त्रवच्चाखिलाःप्रजाः २९ धर्मशास्त्रार्थतत्त्वज्ञोनीतिज्ञोखिलतोषकृत् ॥ पितृनुद्धरतेयस्तुपुत्रवान्पुत्रउच्यते ३० अहंवनंगमिष्यामिगलत्कुष्ठोऽतिगर्हितः ॥
पत्न्यासुधर्मयासार्धमनुजानीहिसुव्रत ३१ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेद्वितीयोध्यायः ॥ २ ॥ सूतउवाच ॥ ततउत्थायराजासगृहीत्वादक्षिणेकरे ॥
पुत्रंविवेशहर्म्याग्रंयत्रमंत्रयतेसदा १ यत्रसिंहासनंदिव्यंकांचनंबहुरत्नयुक् ॥ मुक्ताप्रवालखचितंभातिशक्रपदंयथा २ तत्रासतुःपितापुत्रौभातोद्भावप्यनेक
धा ॥ प्रतिरब्लंगतौयस्मात्समुदायवृत्ताविव ३ आचारंप्रथमंप्राहनीतिंनानाविधांनृपः ॥ पुत्रायकरुणायुक्तोयशसेस्वकुलस्यच ४ ॥ सोमकांतउवाच ॥
याममात्रावशिष्टायांनिशायांजागृतःपुमान् ॥ त्यक्त्वाशय्यांशुचिस्थानेउपविश्यगुरुंस्मरेत् ५ देवतांचिंतयित्वेष्टांप्रणमेत्स्तुतिपूर्वकम् ॥ प्रार्थ्यपृथ्वींक्ष
मस्वेतिपादस्पर्शंजगन्मये ६ प्रातर्नमामिगणनाथमशेषहेतुंब्रह्मादिदेववरदंसकलागमाढ्यम् ॥ धर्मार्थकामफलदंजनमोक्षहेतुंवाचामगोचरमनादिमनंतरू
पम् ७ प्रातर्नमामिकमलापतिमुग्रवीर्यंनानावतारनिरतंनिजरक्षणाय ॥ क्षीराब्धिवासममराधिपबंधुमीशंपापापहंहरिपुहरंभवमुक्तिहेतुम् ८ प्रातर्नमामिगि
रिजापतिमिंदुमौलिंव्याघ्राजिनावृतमुदस्तदयंमनोजे ॥ नारायणेंद्रवरदंसुरसिद्धजुष्टंसर्पास्त्रिशूलडमरून्दधतंपुरारिम् ९ प्रातर्नमामिदिननाथमवापहारंगाढां
धकारहरमुत्तमलोकवंद्यम् ॥ वेदत्रयात्मकमुदस्तसुरारिमायंज्ञानैकहेतुमुरुशक्तिमुदारभावम् १० प्रातर्नमामिगिरिजांभवभूतिहेतुंसंसारसिंधुपरपारकरींत्रि
नेत्राम् ॥ तत्त्वादिकारणमुदस्तसुरारिमायांमायामयींसुरमुनींद्रनुतांसुरेशीम् ११ एवमन्यांश्चसंस्मृत्यदेवान्मुनिगणांस्तथा ॥ मानसैरुपचारैश्चपूजयित्वाक्षमाप
येत् १२ ततोगच्छेत्सोदपात्रोग्रामस्यनैर्ऋतींदिशम् ॥ मृदंगृहीत्वासुश्वेतांब्राह्मणःक्षत्रियोरुणाम् १३ वैश्यशूद्रौतथाश्यामांननदीतीरतःखनेत् ॥ नोर्वराया
नवल्मीकाद्ब्राह्मणागारतःक्वचित् १४ तृणादिनाच्छादयित्वाधरांमूत्रपुरीषयोः ॥ कृत्वोत्सर्गंदिवारात्रावुदग्दक्षिणदिङ्मुखः १५ आदौगुदंप्रमृज्यैवतृणका
ष्ठादिनानरः ॥ पंचवारंमृदाद्भिश्चक्षालयेत्तदनंतरम् १६ दशवारंवामहस्तंसप्तवारमुभौकरौ ॥ लिंगंतथैकवारंतुवामहस्तंत्रिवारतः १७ मूत्रोत्सर्गेक्षालयी
तद्वौकरौचद्विवारतः ॥ पादौसदैकवारंतुगृहस्थस्यैवमीरितम् १८ व्रतवान्द्विगुणंकुर्यात्त्रिगुणंवनगोचरः ॥ यतिश्चतुर्गुणंकुर्याद्रात्रावर्धंतुमौनवान् १९

१ गृह्णेत् इतिपाठे आर्षम् ।

अर्घपादंदिवारात्रौशौचंस्त्रीशूद्रएवच ॥ ततआचम्यकाष्ठंतुक्षीरकंटकवृक्षयोः २० गृहीत्वाप्रार्थनापूर्वंदंताञ्जिह्वांविशोधयेत् ॥ बलमोजोयशस्ते जःपशुबुद्धिधनानिच २१ मेधांब्रह्मधियंचैवत्वंमेदेहिवनस्पते ॥ ततःशीतजलैःस्नानंकृत्वामलहरंपुरा २२ ततोमंत्रैश्चगृह्योक्तैःसंध्योपास्तिंततश्चरेत् ॥ जपंहोमंचस्वाध्यायंतर्पणंदेवपूजनम् २३ वैश्वदेवंतथातिथ्यंभोजनंद्विजसाक्षिकम् ॥ पुराणश्रवणंदानंपरनिंदाविवर्जनम् २४ परोपकारंकुर्याच्चद्रव्य प्राणवचोमृतैः ॥ परापकारंनोकुर्यादात्मस्तवनमेवच २५ गुरुद्रोहंवेदनिंदांनास्तिक्यंपापसेवनम् ॥ अभक्ष्यभक्षणंचैवपरदारनिषेवणम् २६ स्वदारवर्जनंचैवकुर्याद्दुगतिंचरेत् ॥ मातापितृगुरूणांचगवांशुश्रूषणंसदा २७ दीनांधकृपणेभ्यश्चदद्यादन्नंसवस्त्रकम् ॥ प्राणात्ययेपिसत्यस्यत्यागंनैवसमाचरेत् २८ ईश्वरानुग्रहोयेषांसाधूनांचप्रपालनम् ॥ अपराधानुसारेणधर्मशास्त्रंविलोक्यच२९पृष्ट्वावापंडितान्दंडंकुर्यान्नीतिविशारदः॥ विश्वासोयस्यनैवस्यात्तत्रनोविश्व सेत्क्वचित् ३० विश्वस्तेत्यंतविश्वासोनकर्तव्योबुभूषता ॥ कृतवैरेर्थविश्वस्तेकदापिनचविश्वसेत् ३१ षड्गुणानांप्रयोगेणवर्धयेद्राष्ट्रमात्मनः ॥ दानंस्वशक्त्याकुर्वीतक्षीणतामन्यथाव्रजेत् ३२ परेर्व्याकुलितेयानमधमंपरिचक्षते ॥ चारदृष्टिर्दूतवक्त्रउद्यदंडोनृपोभवेत् ३३ दंडस्यैवभयाल्लोकाःस्वेस्वेधर्मेव्यवस्थिताः ॥ अन्यथानियमोनस्यात्पारक्यंस्वीयमित्यदः ३४ अधमोयदिनिंदेतस्तुवीतयदिवाक्वचित् ॥ नक्रुद्धेन्नचतुष्येच्चकिंतयाचिंतयापिच३५पूर्वापकारीयदिच पुनर्वाशरणंव्रजेत् ॥ पूर्वंचधनिकोयःस्यात्परिपाल्यःसदैवहि ३६ मंत्रगुप्तिःसदाकार्यातन्मूलंराज्यमुच्यते ॥ कामादिषाड्वर्गमपोहित्वाततोन्यान्विजयीतच ॥ ३७ वृत्तिच्छेदंप्रजोच्छेदंदेवतोच्छेदमेवच ॥ आरामचैत्ययोश्छेदंनकुर्यान्नृपसत्तमः ३८ पर्वकालेददेद्दानंयशसेत्यागमेवच ॥ नमित्रवंचनांकुर्यात्स्त्रीषु गोप्यंवदेन्नच ३९ ऋणतोब्राह्मणंचैवपंकतोगांसमुद्धरेत् ॥ अनृतंनवदेत्कापिसत्यंक्वापिनहापयेत् ४० अमात्यानांप्रजानांचभृत्यानांचित्तहृद्भवेत् ॥ ब्राह्मणेभ्योनमस्कुर्याद्देवताभ्यःसदैवच ४१ ॥ ॥ सूतउवाच ॥ ॥ इत्यन्यदपिशिक्षाप्यहेमकंठंसुतंनृपः ॥ आचारंसहधर्मेणनीतिशास्त्रंयथाश्रुतम् ४२ क्षेमंकरंरूपवंतंविद्याधीशंतथैवच ॥ आह्वयामासचामात्यान्सुमुहूर्तंविलोक्यच ४३ संभारानुपकल्प्यैवनानास्थानगतान्नृपः ॥ ब्राह्मणान्वेदविदुषोयज्ञकर्म सुनिष्ठितान् ४४ राज्ञोथमहतोराजपत्नीश्चसुहृदःस्वकान् ॥ आह्वयामासनृपतिःश्रेणीमुख्यांश्चनागरान् ४५ अभिषेकावलोकायपुत्रस्यरिपुघातिनः ॥ गणेशंपूजयित्वेष्टदेवतांचयथाविधि ४६ वाचयित्वास्वस्त्ययनंमातृपूजनपूर्वकम्॥ कृत्वाभ्युदयिकंश्राद्धंब्राह्मणांस्तर्प्यचांधसा ४७ कारयित्वामंत्रवोषैरभिषेकंसुतस्य सः ॥ उवाचसोमकांतस्त्रीन्मंत्रिमुख्यानिदंवचः ४८ ॥ राजोवाच ॥ ममायंसुतइत्येवममात्याबुद्धिरस्तुवः ॥ भवतामेवहस्तेषुसुतएषनिरूपितः ४९ ममानुशासनंयद्वत्कृतंनीतिविशारदैः ॥ तथास्यशासनंकार्यंश्रेणीमुख्यसमन्वितैः ५० इतिश्रीगणेशपुराणेउपासनाखंडआचारादिनिरूपणंनामतृतीयोध्यायः ॥ ३ ॥

१ कृतवैरेप्यविश्वस्ते इ०पाठान्तरम् २ परेत्याकुलितंमानमिति पाठभरम् ३ कितया किंतयापिचेतिपाठान्तरम् ४।

॥ सूतउवाच ॥ [illegible]सौचकारद्विजपूजनम् ॥ मणिमुक्काप्रवालानिददौसांगंगवायुतम् १ तोषयामाससर्वांस्तान्गजगोश्वधनांशुकैः ॥ नाना
देश्यानिवासांसिसुवांच[illegible] २ नानावर्णानिकाश्मीरदेशजानिमहांतिच ॥ राजभ्योराजपत्नीभ्योग्राममुख्येभ्यएवच ३ तद्भृत्येभ्योगुणिभ्यश्चददौरा
जायथार्हतः ॥ अमा[illegible] ॥ [illegible]ददावन्यान्ग्रामान्बहुधनान्यपि ४ ततोवनंययौराजादुःखशोकसमन्वितः ॥ पूर्वजन्मार्जितैर्दोषैरत्यंतमलिनोऽशुचिः ५ तास्मै
न्प्रयातेलोकानांहाहाकारोमहानभूत् ॥ स्वंस्वंकार्यंविहायैवप्रतिजग्मुर्जनाधिपम् ६ अमात्याराजभार्याचहेमकंठःसुहृद्वृतः ॥ उत्तिष्ठन्प्रपपाताग्रेस्खलन्या
वन्ररुदन्नपि ७ अमात्यानागरास्तंतुदुःखिताअप्यवारयन् ॥ गव्यूतिद्वितयंगत्वातस्थौराजाश्रमान्वितः ८ दृष्ट्वावापींशीतजलांनानावृक्षसमन्विताम् ॥ उवा
चनागरान्सर्वानमात्यान्स्वजनानपि ९ अपराद्धंमयायद्यच्चिरंराज्यंप्रकुर्वता ॥ तत्क्षंतव्यंनमाम्येषबद्धांजलिपुटंजनाः १० कृपाविधेयापुत्रेमेयदिदैवात्समा
गते ॥ विज्ञापयामिवःसर्वान्मयिस्नेहोनहीयताम् ११ गच्छंतुनगरंसर्वेसस्त्रीवृद्धाःसमागताः ॥ पुत्रेणपाल्यमानामेतिष्ठंतुविगतज्वराः १२ अनुजानंतुमां
सर्वेसुचिंतोयाम्यहंवनम् ॥ युष्मासुतुप्रयातेषुमनोमेनिश्चलंभवेत् १३ उपकारंमहांतंमेकुर्वंतुकृपयाखिलाः ॥ दुःखितोनिष्ठुरंवक्तुमर्तुकामोपिनोत्सहे १४ म
हत्पापंमयैवैतज्जन्मजन्मांतरार्जितम् ॥ यद्धियोगोहिराज्यस्यलोकानांहितकारिणाम् १५ परंतुकिंकरोम्येषयद्गलत्कुष्ठवानहम् ॥ सर्वोपिस्वकृतंभुंक्तेसुकृतंदुष्कृ
तंतथा १६ सूतउवाच ॥ इतिश्रुत्वावचोराज्ञोमूर्च्छिताःसुहृद्दस्तथा ॥ ध्वंतःकेचित्पाणितलैःशिरांसिभृशदुःखिताः १७ केचित्परस्परंचक्रुरभिज्ञाःपंडिताश्चये ॥
सांत्वनंपूर्वजातानांनृपाणांचरितैर्नृपे १८ अनिर्वाच्यामवस्थांतत्समीक्ष्येयुरथापरे ॥ यथास्वरूपेविज्ञातेयोगिनोज्ञानवृत्तयः १९ दुःखितंसोमकांतंतंवनंगंतुंस
मुत्सुकम् ॥ नियम्यदुःखंधैर्येणधीराःकेचिदथाब्रुवन् २० ॥ ॥ जनाऊचुः ॥ ॥ पोषयित्वापालयित्वाननस्त्वंत्यक्तुमर्हसि ॥ यथानत्यजतेशैत्यंजलमौष्ण्यंतनू
नपात् २१ मर्यादांजलधिर्वापिमूर्यःप्राकाश्यमेवच ॥ कथंवानगरंयामस्त्वांविनाजनवत्सल २२ यथोडुपतिनाहीनंव्योमतारान्वितंनृप ॥ पुरंतद्वन्नशोभेतत्वांवि
नाशत्रुकर्षण २३ सहैवयामस्तीर्थानिद्विन्नाणिवयमप्युत ॥ रूपंतेकांतिमत्कांतभवितातीर्थसेवनात् २४ ततःसहैवयास्यामोनगरंध्वजसंकुलम् ॥ हर्षेणमहतायु
क्तावाद्यबंदिपुरःसराः २५ ॥ सूतउवाच ॥ ॥ इतितद्वचनंश्रुत्वाक्रोधदुःखसमन्वितः ॥ उवाचराजातान्नत्वामैवंमैवंपुनःपुनः २६ ततोब्रवीद्धेमकंठःसामात्योव
त्सलंनृपम् ॥ स्नेहकारुण्यभावेनविनयेनसमन्वितः २७ ॥ पुत्रउवाच ॥ ॥ विनात्वांनोत्सहेगंतुंकर्तुंराज्यंचजीवितुम् ॥ नमयादृष्टपूर्वस्तेविरहस्तंसहेकथम् २८
॥ राजोवाच ॥ ॥ एतदर्थंमयापूर्वंधर्मशास्त्रंसुनीतिमत् ॥ उपदिष्टंतवशुभंनवृथाकर्तुमर्हसि २९ श्रूयतेजामदग्न्येनजननीनिहतापुरा ॥ पितृवाक्यानुरोधेननीति
ज्ञेनसुधीमता ३० रामस्तुराज्यंत्यक्त्वैववनंयातःसहानुजः ॥ अपृष्ट्वाकारणंसीतांतस्याजलक्ष्मणोवने ३१ हेमकंठपुरंशीघ्रममात्यैस्त्रीभिरन्वितः ॥ अतोममाज्ञयाग

१ उत्तिष्ठन्प्रपतन्यातः । इतिपाठभेदः । २ सुस्थिरोयाम्यहंवनम् इ०पा० । ३ यद्गलत्कुष्ठवहंवने इतिपाठान्तरम् । ४ वाद्यवादिपुरःसरा इतिपाठान्तरम् । ५ अदृष्ट्वाकारणमितिपाठान्तरम् ।

च्छकुरुराज्यंमयार्पितम् ३२ विज्ञेयथाकार्यसक्तेचित्तंतस्यपरात्मनि ॥ यथावस्थापितेवित्तेचित्तंलोकस्यवर्तते३३तथामयिवनंयातेस्वांतंमेत्वयिवर्तते ॥ दैवयो
गेनसुभगोजातोयास्येपुनर्गृहम् ३४ भविष्यतितथाधर्मोमद्वाक्यंकारिणस्तव ॥ नतथासहयातेनतस्माद्गच्छव्रजामिच ३५ ॥ ॥ सूतउवाच ॥ ॥ अमात्यानागरा
पुत्रःप्रयातुंकृतमानसाः ॥ कष्टेनमहतायुक्तानमश्चक्रुर्नृपंतदा ३६ अनुज्ञातास्ततस्तेनआशीर्भिरभिनंद्यच ॥ प्रदक्षिणीकृत्यनृपंनिवृत्तानगरंप्रति ३७ अग्रेकृ
त्वामहासेनांगजाश्वरथपत्तिनीम् ॥ छत्रध्वजयुतोमानीहेमकंठोऽगमत्पुरीम् ३८ इतिश्रीगणेशपुराणेउपासनाखंडेचतुर्थोध्यायः ॥ ४ ॥ ॥ सूतउवाच ॥
ततोमातरमभ्येत्यस्नेहकातरयाधिया ॥ तांजगादकथंमातस्त्यजसेऽनपराधिनम् १ पुत्रउवाच ॥ सहैवयातुपुत्रोयमितिवाच्यस्त्वयापिता ॥ तववाक्यानु
रोधेनयदिमांसहनेष्यति २ तदावांसेवनंकुर्यानमेराज्येमतिस्तथा ॥ किंतद्राज्यंसुखंदद्याद्भवद्भ्यांरहितस्यमे ३ ॥ ॥ सुधर्मोवाच ॥ ॥ एतावद्दुःखशोकाभ्यां
युक्तोराजानमेवच ॥ करिष्यतिमहाबाहोतस्माद्गच्छममाज्ञया ४ पातिव्रत्येनधर्मेणपरत्यस्मिबालक ॥ भर्तुरन्योनदेवोस्तियोषितांमान्यएवच ५ ॥ सू
तउवाच ॥ ॥ इत्याकर्ण्यनमश्चक्रेमातरंसमुहृत्सुतः ॥ प्रदक्षिणीकृत्यततोनुज्ञांप्राप्यपुरंययौ ६ अलंकृतैर्नागरिकैःपताकाध्वजपल्लवैः ॥ सिक्तमार्गसुगंधाढ्यं
यथेंद्रनगरंतथा ७ दत्त्वातांबूलवासांसिविसृज्यस्वजनान्नृपः ॥ प्रविवेशगृहंश्रीमद्धर्षशोकसमन्वितः ८ चकारराज्यंधर्मेणसुतवत्पालयन्प्रजाः ॥ धर्मा
र्थकाममोक्षेषुयथाशिक्षंमनोदधे ९ ॥ ॥ ऋषयऊचुः ॥ ॥ कथंराजासोमकांतःकिंवनंसमुपागतः ॥ किंसहायश्चकिंचक्रेकर्मनोवदविस्तरात् १० सूतउवाच
हतवःकथयिष्यामिसोमकांतोयथावनम् ॥ गत्वाचकारयत्कार्मंसादरंशृणुतानघाः ११ सुबलज्ञानगम्याभ्यांममाद्याभ्यांसुधर्मया ॥ धर्मपत्न्यायुतोरण्यंप्र
विवेशदुरासदम् १२ अग्रतःप्रकृतिर्यातामध्येराजाथपृष्ठतः ॥ धर्मपत्नीसुधर्मागात्सीतेवरामपृष्ठतः १३ एकाशनाश्चत्वारएकचित्तासनालयाः ॥ समदुःख
सुखाश्चापिवनाद्वनमुपाययुः १४ क्षुधातृषाश्रमैर्वापिनिम्नोन्नतगताध्वभिः ॥ अत्यंतंकर्षिताश्छायामाश्रित्योपाविशन्क्वचित् १५ पुनर्वनांतरंगत्वादद
शुस्तेसरोमहत् ॥ यत्रमातंगसदृशानक्राभांतिसकच्छपाः १६ तालास्तमालाःसरलाःप्रियालाबकुलाःशुभाः ॥ सरलाःपनसाजंबुर्निबाश्वत्थवटादयः १७
वृक्षानानालताजालैर्वेष्टिताःपरितोबभुः ॥ यत्रास्तेतिमिरंगाढंगिरिदर्युदरेयथा १८ यत्रवायुःसुखस्पर्शःपद्मकादंबगंधवान् ॥ यस्मान्नयंतिमुनय·कुसुमानि
फलानिच १९ यत्रहंसाबकाःश्येनाःशुभाःकाकाश्चकोकिलाः ॥ सारिकाश्चक्रवाकाश्चनानारावान्विकुर्वते २० नयत्रशीतोष्णकरांशुसंधिर्नानालतापुष्प
कुजाश्रितानाम् ॥ क्षुत्तृड्भयंयत्रनचैवमृत्युःस्वर्गेयथापुण्यवतांद्विजेंद्राः २१ तत्रगत्वाजलंसर्वेपपुःशीतंश्रमापहम् ॥ स्नात्वानित्यक्रियांकृत्वाफलानिबुभुजुश्चते
२२ सुष्वापचक्षणंश्वेत[illegible]च्छेकोमलवालुके ॥ धर्मपत्नीसुधर्माचपादसंवाहनेस्थिता २३ तस्यानुमतमाज्ञायद्रावमात्यावगच्छताम् ॥ आदातुंकंदमूलानिफ

१ यथावस्थापितेचित्तंते [illegible]ः इति०पा०

लानिचबिसानिच २४ ददर्शाश्चर्यमद्भुतरूपमुग्रंबालंसुधर्माप्रभयाज्वलंतम् ॥ उत्कृष्टरूपस्यकृतेस्मरंतंजातंपुराबालमितिस्ममेने २५ दृष्ट्वैवतंसाजहृषेसुधर्मा मेनेचतंसाहितकारिणंच ॥ क्षुब्धंप्रसन्नंहृदयंसमीक्ष्यापकारिणंचोपकरंहिवक्ति २६ पप्रच्छतंकश्चकुतःप्रयातःकस्यासिपुत्रोजननीचकाते ॥ वदस्वशब्दामृतधा रयामेसखेवकर्णौपरितोषयाशु २७॥ ॥ सूतउवाच ॥ इतिस्मपृष्टःसजगादबालस्तांराजपुत्रींसुधयागिरामे ॥ पिताभृगुर्भामिनिमेपुलोमामाताजलार्थीस्वगृहा दिहागाम् २८ च्यवनःखलुनाम्नाहंपितुराज्ञाकरःशुभे ॥ त्वंचकाकतमोयंतेकथंवनमिदंगतः २९ स्रवंतिकथमंगानिवर्षाकालेगिरेरिव ॥ अतिदुर्गंधताचास्य केनवावदकर्मणा ३० कृमिभारसमाकीर्णममुंवासेवसेकथम् ॥ स्वयंचारुतरांभूत्वासुकुमारीसुलोचना ३१ चारुप्रसन्नवदनाचारुसर्वांगशोभिनी ॥ कश्चित्पू र्वंनपित्रातेसुहृद्भिर्भ्रात्राभिर्द्विजैः ३२ विज्ञातोयंवरःकुष्ठीकृमिभाराकुलोपिच ॥ कथमेनवृतवतीदुर्गमंचागतावनम् ३३॥ ॥ सूतउवाच ॥ इतिपृष्टासुधर्मा सामुनिपुत्रेणधीमता ॥ व्याचष्टेसकलंतस्मैशोकहर्षसमन्विता ३४ ॥ सुधर्मोवाच ॥ सौराष्ट्रदेशेविख्यातंदेवताख्यंपुरंमहत् ॥ तत्रायंसोमकांतोमेभर्ताराज्यं चकारह ३५ अतिमानीवदान्यश्चशूरोदृढपराक्रमः ॥ असंख्यातबलोपेतोरिपुराष्ट्रविमर्दनः ३६ यज्वातिसुंदरःश्रीमान्सुहृदानंदकारकः ॥ विवेक्तासर्वकार्या णांनीतिशास्त्रविशारदः ३७ राज्यंस्वंबुभुजेराजाबहुकालंद्विजोत्तम ॥ इमामवस्थांसंप्राप्तःपूर्वकर्मविपाकतः ३८ अमात्यद्वयसंयुक्तोवनमेतत्समागतः ॥ भ्र मंतीपृष्ठलग्नास्यपुत्रेराज्यंप्रयच्छतः ३९ सुबलज्ञानगम्याभ्यांप्रकृतिभ्याभिहागता ॥ राज्ञोनुज्ञांसमादायफलार्थंतौगतौवने ४० इहास्मान्राक्षसाःप्रेताभूता निमृगपक्षिणः ॥ नानाविधाभीषयंतिकथंनोभक्षयंतिन ४१ नजानेदुःखभोगायस्थापयंत्यग्रतोपिच ॥ दुःखस्यांतंनपश्यामि कर्मणोदुष्कृतस्यच ४२ कटुतिक्ताम्ललवणमधुरस्निग्धभोजने ॥ नतथारुचिरस्याभूत्परितस्यद्विजातिभिः ४३ यथेदानींकंदमूलकषायाम्लफलादिषु ॥ दरिद्राणांमहाहारःपांकोपिभक्षित स्यच ४४ नतथाश्रीमतांशक्किरन्नेपाकएवच ॥ यःशेतेकोमलेदिव्येशयनेस्ममनोरमे ४५ इदानींयत्रकुत्रापिपश्यकालविपर्ययम् ॥ यस्यदिग्व्यापिनश्वास न्नानापरिमलाःशुभाः ४६ पूयशोणितदिग्धस्यपूतिगंधोपिसांप्रतम् ॥ यआनंदमयेसिंधौमग्नोभूत्पंडितैर्वृतः ४७ सइदानींदुःखमयेकृमिभिःपरिवारितः ॥ क थंतरेमदुःखाब्धिनजानेभृगुनंदन ४८ भवपोतइवागाधेमज्जंतंनौरिवार्णवे ४९ ॥ इतिश्रीगणेशपु०उपा०सुधर्माच्यवनसंवादोनामपंचमोध्यायः ॥ ५ ॥ ॥ सूतउवाच ॥ ॥ इतितद्वचनंश्रुत्वाच्यवनोभृगुनंदनः ॥ त्वरयास्वमुपादायकलशंजलसंभृतम् १ दुःखितःपरदुःखेनतूष्णीमेवागमद्गृहम् ॥ तंभृगुःपरिपप्रच्छ विलंबकारिणंसुतम् २ ॥ भृगुरुवाच ॥ ॥ किमपूर्वंत्वयादृष्टंलक्ष्यसेचकितोयथा ॥ विलंबश्चकथंजातोवदपुत्रममाग्रतः ३ ॥ पुत्रउवाच ॥ ॥ सौराष्ट्रदेशेवि ख्यातेदैवतेनगरेमुने ॥ सोमकांतइतिख्यातोराजाराजीवलोचनः ४ चक्रेराज्यंबहुतिथंधर्मेणपालयन्प्रजाः ॥ दुर्भगत्वंगतोदैवात्पुत्रेराज्यंनिवेश्यसः ५ प

१ वनस्थेइतिवापाठः । २ शाकरसनः इतिपाठान्तरम् ।

त्न्यासुधर्मयायुक्तोभर्तुराज्ञाभृतापितः ॥ सुबलज्ञानगम्याभ्यांप्रकृतिभ्यामिहागतः ६ गलत्कुष्ठोकृमियुतोविभ्रमन्दुर्गमंसरः ॥ सहस्रभगतामाप्तोययेंद्रोगौ
तमान्मुनेः ७ क्रमासुधर्माचार्वंगीक्रगलत्कुष्ठवान्पतिः ॥ इतिमेपृच्छतोवृत्तंतदीयंगतवान्क्षणः ८ तदीयैःकरुणावाक्यैर्मनोमेकलिलंत्वभूत् ॥ ततोहंकलशं
पूर्णंकृत्वाशीघ्रमुपागतः ९ ॥ सूतउवाच ॥ ॥ सर्वंचाकथयत्तस्मैतयायत्कथितंवचः ॥ श्रुत्वातच्चपुनःपुत्रंच्यवनंभृगुरब्रवीत् १० ॥ भृगुरुवाच ॥ सर्वानानय
तान्शीघ्रंपुत्रगच्छममाज्ञया ॥ द्रक्ष्यामिकौतुकंतेषांस्वीयंवादर्शयामितान् ११ ॥ सूतउवाच ॥ ॥ इत्थंसचोदितःपित्राच्यवनःकरुणानिधिः ॥ जगामसरसो
भूमिंसुधर्मांद्रष्टुमुत्सुकः १२ तस्मिन्नेवक्षणेमार्यौफलकंदभरान्वितौ ॥ सुबलज्ञानगम्यौतावागतौराजसंनिधिम् १३ ततऊचेसतुमुनिःसुधर्मांचारुलोचनाम् ॥
पितामेस्वाश्रमंसर्वानाकारयतिसुव्रते १४ इतितद्वचनंश्रुत्वासुधर्माशोकविह्वला ॥ तदैवसावधानाभूत्तनुःप्राणइवागते १५ सुशीलाराजपत्नीसापीत्वातद्वच
नामृतम् ॥ जगमत्सासुचार्वंगीप्रकृतिद्वयसंयुता १६ सोमकांतेनपतिनामुनिपुत्रपुरःसरा ॥ गणेशस्कंदसहिताशिवेवशिवसंयुता १७ शुशुभेमार्गमध्येसावाच
स्पतिपुरःसरा ॥ मंत्रघोषयुतंप्रापभृगोराश्रममंडलम् १८ नानापुष्पलताकीर्णंनानापक्षिविनादितम् ॥ मार्जारानकुलाःश्येनागजागावोमयूरकाः १९ भुजंगा
पक्षिणःसिंहाव्याघ्राःक्रीडंतियत्रच ॥ नचवायुर्भृशंवातिनसूर्यस्तपतेभृशम् २० नवर्षतिभृशंमेघोवर्षतेचतदिच्छया ॥ विविशुस्तेहर्षयुतामुनिपुत्रपुरःसराः २१
तत्राद्भुतंव्याघ्रमृगाजिनस्थंददर्शसूर्यप्रतिमंभृगुंतम् ॥ राजाथपत्नीप्रकृतिद्वयंचननामबद्धांजलिरब्रवीच्च २२ ॥ राजोवाच ॥ अद्याशिषोमेसफलाद्विजेंद्रदिजेरि
ताधर्मचयस्तपोपि ॥ आजन्मतोहंपरिपूतएषपितुर्जनन्याश्चसुजीवितंमे २३ भवद्दृशिःसंप्रतिहंत्यथैनःपूर्वार्जितैःपुण्यचयैःकृतापि ॥ आगामिकल्याणकरीमु
नींद्रकालत्रयेजन्मकरोतिपूतम् २४ सौराष्ट्रदेशेखलुदेवताख्येपुरेकृतंराज्यममोघदृष्टे ॥ भीतेनपापाद्विजदेवतादिपूजाकृतानीतिमतामुनींद्र २५ आकस्मिकं
मेदुरितंकिमेतत्प्रादुर्बभूवोग्रतरंदुरंतम् ॥ येनाहमीदृक्कुदशांप्रणीतोजानेनकिंचित्प्रतिकारमत्र २६ अपायतांयांतिकृताउपायायुष्मत्कृतोपायमुपायमीहे ॥
निर्वैरतांयांतिहिजातिवैरास्तवाश्रमेवांशरणंप्रपन्नः २७ ॥ सूतउवाच ॥ श्रुत्वेतिवचनंतस्यभृगुस्तुकरुणायुतः ॥ उवाचसोमकांतंतंध्यानेनालोक्यसुव्रतः२८
भृगुरुवाच ॥ उपायंवच्मिनृपतेनचिंतांकर्तुमर्हासि ॥ ममाश्रमगतादुःखंनहिविंदंतिजन्मिनः २९ जन्मांतरकृतंचैवदुरितंतेनृपोत्तम ॥ येनेमांगमितोवस्थांकथ
यिष्येतदप्यहम्३०कुर्वंतुभोजनंसर्वेचिरकालंबुभुक्षिताः ॥ वनाद्वनांतरंयाताःश्रांताःक्लांताननाभृशम् ३१॥ सूतउवाच ॥ इत्युक्त्वास्नापयामाससुतैलाभ्यं
गपूर्वकम् ॥ भोजयामासचान्नानिषड्रसानित्वनेकशः ३२ बुभुजुस्तेपिविश्रांताभृगोरमिततेजसः ॥ आज्ञयामुनिवर्यस्यसुस्नाताःसुष्ठुलंकृताः ३३ सुषुपुर्मृदु
शय्यायांहित्वाचिंतांदुरत्ययाम् ॥ मुनिनाकल्पितायांतेस्वराज्यंगमिताइव ३४ इतिश्रीग०उ०भृगोराश्रमागमनंनामषष्ठोध्यायः ॥ ६ ॥ ऋषयऊचुः॥ तत्रग

१ बहुदुःखमजापितः इतिपाठः ।

त्वाकिमकरोत्सोमकांतोनृपस्तदा ॥ उपायःकथितःकोवाभृगुणासर्ववेदिना १ कथयस्वकथामेतांशृण्वतांनोद्विजोत्तम ॥ नतृप्तिमधिगच्छामःपीत्वात्वद्वचनामृत
म् २ ॥ सूतउवाच ॥ सम्यक्पृष्टंमहाभागायूयंतुज्ञानसागराः ॥ यःकथांतंनप्रयातिश्रोतावक्ताथवाद्विजाः ३ लिख्यमानंवाचयतिपुस्तकंहरतेपिवा ॥ नपृच्छ
तिचयःशिष्योगुरुःपृष्टोनवक्तिचेत् ४ उभौतौमूकबधिरौलोकेदृष्टौद्विजोत्तमाः ॥ शृण्वंतुकथयिष्यामिसोमकांतकथामतः ५ तस्यांरात्र्यांव्यतीतायांदिननाथे
तथोदिते ॥ स्नानंसंध्यांजपंहोमंकृत्वासभृगुसत्तमः ६ स्नातायकृतजप्यायपत्नीप्रकृतिसंयुजे ॥ पूर्वजन्मकथांतस्मैराज्ञेकथितुमारभत् ७ ॥ भृगुरुवाच ॥
कोल्हारनगरेरम्येविंध्याचलसमीपतः ॥ चिद्रूपइतिविख्यातोवैश्योबहुधनोभवत् ८ तस्यभार्यातुसुभगानाम्नाख्यातासुलोचना ॥ सुशीलादानशीलाचप
तिवाक्यपरासती ९ तस्यास्त्वंपुत्रतांयातोभवेपूर्वंनृपोत्तम ॥ कामंदइतितेनामचक्रतुस्तौद्विजेरितौ १० अतिस्नेहंदिवारात्रावतिलालनमेकके ॥ वार्धक्यकाल
जेतौतुपितरौत्वयिचक्रतुः ११ विवाहंचक्रतुस्तातुधनकौतुकमंगलैः ॥ मृगाक्षीसुकुमारांगीनाम्नाख्याताकुटुंबिनी १२ अनुरक्तात्वयिसदाद्विजदेवातिथिप्रि
या ॥ बभूवयोषिद्योषित्सुरत्नभूतातिसुंदरी १३ कुटुंबिनीतिस्वंनामविदधेसार्थकंतुसा ॥ सप्तपुत्रापंचकन्यापंचबाणप्रियानुकिम् १४ ततोबहुतिथेकालेपंचत्व
मगमत्पिता ॥ मातातवसतीतेन सहदग्धादिवंगता १५ ततस्त्वंसखिवर्गैस्तद्द्रव्यंनाशितवान्बहु ॥ नीतंनष्टंक्षितंचविनाशमगमद्धनम् १६ चिंतयाधर्मपत्नीत्वां
निराकृतवतीभृशम् ॥ नगृहीतंतुतद्वाक्यंततोविक्रीतवान्गृहम् १७ गतासाबालकैःसार्धमनुज्ञातापितुर्गृहम् ॥ अपत्यपोषणकृतेऋतेत्वांवंशकंटकम् १८ ततउ
द्वृत्ततांयातउन्मत्तइवमद्यपः ॥ अन्यायकारीनगरेजातोमत्तइवद्विपः १९ परस्वहारोवनितासुजारोग्रामेषुचोरोजनतापकारः ॥ द्यूतेषुवीरोवृजिनौघसारोहिंसावि
हारोबलहीनशूरः २० येयेजनास्तेसुखसंगवृत्तास्तेभ्योगृहीत्वाबहुवित्तमादः ॥ निक्षेपतःपितृकृतात्सुहृद्भ्योमिषात्कुताश्चिन्नगरस्थितेभ्यः २१ शपथाननृतांश्चक
र्थनूनमनृतानांप्रेमदाजनेषुसाक्ष्यम् ॥ इतिसर्वजनाःसुभीतिमापुरुरगात्सद्मगतादिवोग्रवीर्यात् २२ असह्यतांतेनजनस्ययातोगोक्षूरकःपायसगोयथैव ॥ रा
ज्ञोगृहीत्वानुमतिंजनास्तेनिर्वापयामासुरतोपुरात्त्वाम् २३ वनेस्थितस्त्वंबहुजंतुघातीस्त्रीबालवृद्धान्नविनिहंसिनित्यम् ॥ महाजनंवीक्ष्यपलायसेचासिंहंनिरी
क्ष्येववृकोमृगोवा २४ मत्स्यान्बकान्सारसकुक्कुटांश्चवृकान्मृगान्वानरकोकिलांश्च ॥ हत्वात्सखड्गान्नशशकांश्चगोधामुधास्वदेहंवृजिनादपोषः २५ ॥
सिंहान्व्याघ्रांश्चजंबूकान्निःसार्यगिरिगह्वरात् ॥ नानास्थानगतांश्चोरान्मेलयित्वासुदुर्धरान् २६ काष्ठैर्लोष्टैश्चपाषाणैश्चकर्थगृहमुत्तमम् ॥ विशालंक्रोशविस्ता
रंनानाकौतुकमंडितम् २७ पित्राभीतेनपत्नीसाप्रापितावालकैःसह ॥ गुहागतंतेसदनंराजतोजनतोपिच २८ नानालंकारवसनाबालकाअपितेजसा ॥ दे
वांगनेवशुशुभेत्वंचचोरसमन्वितः २९ त्वंचमार्गेजनान्दीनान्हत्वाहत्वागुहांगतः ॥ चोरैः सबालयोषिद्भिर्भासिराजेवतद्गतः ३० कदाचिद्ब्राह्मणोविद्वान्विख्या

१ द्यूतादिकारो इतिपाठः २ त्वमदाजनेष्वितिपाठः ३ रंजितंइतिपाठः ।

तोगुणवर्धनः ॥ मध्याह्नेमार्गमध्येतुत्वयादृष्टःसएककः ३१ गृहीत्वादक्षिणंपाणिंतंविप्रंधृतवानसि ॥ सवेपमानस्त्वद्बुद्विजानन्धर्षणयातया ३२ ऊचेत्वांस्वां
तकंमत्वामूर्च्छितोजीवितेच्छया ॥ अत्यंतंकरुणावाक्यैर्बोधयं स्त्वांसहेतुकैः ३३ ॥ गुणवर्धनउवाच ॥ धनवान्सुभगोभूत्वाकथंमांहंतुमिच्छसि ॥ द्विजंनत्वो
ढाभर्तारंशांतंचानपराधिनम् ३४ दुर्बुद्धिवामनांत्यक्त्वासद्धर्मे षुमतिंकुरु ॥ प्रथमामेगताकांताप्राप्ताकांततरापरा ३५ स्वाचारापरमोदारासाध्वीसर्वगुणाकरा
पितृणामनृणार्थायधर्मसंतानवृद्धये ३६ कृतामातिप्रयत्नेन गार्हस्थंधर्ममिच्छता ॥ मद्विनाताद्विनावांहिजन्मनीभवतोवृथा ३७ पितामेहिभवत्वंचमाता
पुत्रोप्यहंतव ॥ जीवदाताभयत्रातापिताशास्त्रेनिगद्यते ३८ दस्यवोपिहिरक्षंतिद्विजंवाशरणागतम् ॥ द्विजंयोग्यंशरण्यंमामतस्त्वंमोक्तुमर्हसि ३९ नो
चेत्कल्पसहस्रंत्वंनिरयान्प्रतिपद्यसे ॥ भोक्तारःसर्वएवैतेस्त्रीपुत्राःसुहृदोजनाः ४० नपापभागिनस्त्वेतेसुखिनस्त्वत्प्रतारकाः ॥ कियद्विर्जन्मभिःपापंमोक्ष्य
सेनवितर्कये ४१ इतिश्रीगणेशपु०उपा०सोमकांतपूर्वजन्मकथनंनामसप्तमोध्यायः ॥ ७ ॥ भृगुरुवाच ॥ ॥ इतितेनोदितंवाक्यंमुहुर्ग्लानिंप्रकुर्वतः ॥ क
रुणायुतमाकर्ण्यनोद्विग्नंहृदयंतव १ वज्रात्सारतरंकिंनुब्रह्मणात्वयिनिर्मितम् ॥ हिंसनाद्बहुजंतूनांमनुष्याणांसहस्रशः २ अतिनिष्ठुरतांप्राप्तंकृतघ्नस्येव
मानसम् ॥ अवोचस्त्वंततस्तंतुकृतांतइवनिष्ठुरः ३ ॥ चोरउवाच ॥ किंतेवाक्यचयैर्विप्रवृथामयिनियोजितैः ॥ अश्रोतरिचपांडित्यंन्युंजेकुंभेयथाजलम् ४
क्केयंममतिर्मूढकोपदेशस्तवाप्ययम् ॥ तत्त्वचिंतेवमधुपेसांप्रतंमेनरोचते ५ अर्थासक्तस्यनक्कापिपितृबंधुविचारणा ॥ यथाकामातुरस्यापिनभीतिर्नीश्वावि
द्यते ६ शुद्धिःकाकेद्यूतकारेसत्यंधैर्यंनपुंसके ॥ कामशांतिस्त्रियांसर्पेक्षमादृष्टत्वयानुकिम् ७ अंतिकेत्वंनिसृष्टोसिव्यापाररहितस्यमे ॥ विधात्रादैवयोगेननत्वां
मुंचामिकर्हिचित् ८ ॥ ॥ भृगुरुवाच ॥ ॥ इत्युक्त्वानिशितंखड्गंहस्तआदायदक्षिणे ॥ चकर्तांघ्रिशिरस्तस्यबिडालइवमौषकम् ९ एवंतेब्रह्महत्यानांसंख्यां
कर्तुंनशक्यते ॥ स्त्रीबालवृद्धजंतूनांहत्यानांचविशेषतः १० संख्यातापरपापानांविभागीजायतेयतः ॥ ततोबहुतिथेकालेगतेकामंदतेजरा ११ आग
ताथकफोग्लानिःस्वेदोहिक्काथवेपथुः ॥ अमूर्त्तंद्रीचोपविष्टंप्रसुप्तनचसाभवत् १२ अनादरंचचक्रुस्तेपुत्रादास्योथसेवकाः ॥ सुहृदश्चसुताश्चापिनप्तारोथा
पिमित्रकाः १३ एकएवाभवत्तत्रदृष्टआप्तोरहस्यकृत् ॥ आनवार्यगतिर्विप्रःसचापिप्रेषितस्त्वया १४ आकारयितुंसर्वांस्तान्मुनीन्काननवासिनः ॥ तेचापित्व
द्भयादेवद्विजवाक्यात्समागताः १५ अब्रवीस्तान्नमस्कृत्यमत्तोदानानिगृह्यताम् ॥ तेब्रुवन्नचगृह्णीमोदानानिपतितस्यते १६ याजनाध्यापनाद्योनात्संबंधा
द्भाषणादपि ॥ परंसंचरतेपापंसहयानासनाशनात् १७ इतितेभाषमाणास्त्वांगत्वाचनिजमाश्रमम् ॥ सस्नुःसचैलंसर्वेपिपावमानीस्ततोजपन् १८ ततोनु
तापोमनसिजातःकामंदतेभृशम् ॥ आमयात्स्वजनैस्त्यागाद्ब्राह्मणैःपरिवर्जनात् १९ जीर्णदेवालयोद्धारेमवत्तेमतिरूर्जिता ॥ धनंस्वंविपुलंवीक्ष्यकुप्यरत्नादि
संयुतम् २० ततोनादिःपरामूर्तिर्गणेशस्यवनेशुभा ॥ जीर्णदेवालयेक्षुद्रेस्थितातेकथिताद्विजैः २१ ततोऽतिविस्तृतंदीर्घंचतुस्तोरणसंयुतम् ॥ चतुर्द्वारंसुरु

चिरंचतुःशिखरशोभितम् २२ नानास्तंभचितंनानावेदीभिःपरिवारितम् ॥ मुक्ताप्रवालरत्नाद्यैःखचितंरुचिरांगणम् २३ नानापुष्पद्रुमयुतंनानाफलद्रुमैश्चितम् चतुर्दिक्षुचास्वारिमयवापीविराजितम् २४ प्रासादंनिर्मितवतस्तद्भव्यंतेव्ययंगतम् ॥ किंचित्स्त्रियाचपुत्रैश्चसुहृद्भिर्बंधुभिर्हृतम् २५ ततोनातिचिरेकालेपंचत्वं चगतोभवान् ॥ याम्यदूतैःकशाघातैर्बद्धःसंताडितोभृशम् २६ कंटकैर्विद्धसर्वांगःशिलायांपोथितोपिच ॥ मज्जितोनरकेघोरेपूयशोणितकर्दमे २७ एवंनीत स्तुतैर्दूतैश्चित्रगुप्तयमांतिके ॥ यमेनपृष्टःकिंपुण्यमुतभोक्ष्यसिपातकम् २८ त्वमवोचःपुण्यमहंपूर्वंभोक्ष्यामिसूर्यज ॥ ततःसौराष्ट्रदेशेत्वंराजत्वेनविनिर्मितः २९ इतितेकथितंपूर्वजन्मपापकरंमया ॥ शरणागतकारुण्यात्तपोबलसमाश्रयात् ३० कांतप्रासादकरणात्सोमकांतोऽभवोनृपः ॥ कांतयाकांततरयाभासि कांत्याशशीयथा ३१ ॥ ॥ सूतउवाच ॥ ॥ भृगुणाभिहितंश्रुत्वासोमकांतोनृपाधमः ॥ तद्वाक्येसंशयापन्नआसीदश्मेवनिष्क्रियः ३२ वेदशास्त्रार्थ विदुषोभूतभाविभवद्विदः ॥ तपस्विनोभृगोर्वाक्येयतःससंशयंदधौ ३३ निरगन्क्षणमात्रेणतस्यांगात्पक्षिणोभृशम् ॥ नानावर्णाकृतिधराबभक्षुर्नृपतिंतदा ३४ उडीयोड्डीयचंच्वग्रैर्ददंशुर्नृपशुंद्दढैः ॥ उत्कृत्योत्कृत्यमांसानिजक्षुस्तेमुनिसन्निधौ ३५ ततोतिदुःखिततनुःशरणंपुनरागतः ॥ अवदद्दीनयावाचाभृगुंज्ञान तपोनिधिम् ३६ ॥ ॥ राजोवाच ॥ ॥ त्वद्भनेजातिवैराणांपरस्परभयंनहि ॥ त्वत्समक्षंकथमिमेमृतंमांमारयंतिच ३७ त्वत्पादप्रवणंदीनंसकुष्ठंशरणागतम् इदानींमोचयमुनेसर्वसत्त्वाभयंकर ३८ ॥ ॥ सूतउवाच ॥ ॥ इत्युक्तःपुनरप्याहभृगुस्तंदीनवत्सलः ॥ मद्वाक्यसंशयादित्थमनुभूतंनृपत्वया ३९ प्रतीकारं वदिष्यामिस्वस्थोभवक्षणंनृप ॥ ममहुंकारमात्रेणगमिष्यंतिद्विजाइमे ४० ॥ ॥ सूतउवाच ॥ ॥ द्विजस्यहुंकृतिंश्रुत्वाद्विजाश्चांतर्हितास्तदा ॥ तुतोषनृपतिं श्चापिपत्न्यमात्यसमन्विता ४१ इतिश्रीगणेशपु०उपासनाखंडेनानापक्षिनिवारणंनामाष्टमोध्यायः ८ ॥ ॥ सूतउवाच ॥ ॥ ततोभृगुःक्षणंध्यात्वापुनस्तं प्राहभूपतिम् ॥ अत्यंतविह्वलोदुःखंवीक्ष्यतत्पूर्वकर्मजम् १ ॥ ॥ कृपापनिकरास्तेतुक्लेपायाःकथितामया ॥ तथाप्येकंब्रवीमित्वामुपायमघनाशनम् २ गणे शस्यपुराणंत्वंश्रोष्यसेयदिसत्वरम् ॥ तदैवमोक्ष्यसेदुःखसागरान्नात्रसंशयः ३ इत्युक्त्वातंगणेशस्यनामाष्टशतमुत्तमम् ॥ जग्वाजलंमंत्रयित्वासिषेचनृपतिंतदा ४ सिक्तमात्रेजलेतेनतन्नासारंध्रतोलघुः ॥ कृष्णास्यःप्रापतद्भूमौवृश्चिकस्तत्क्षणादसौ ५ सप्ततालप्रमाणोभूद्वयादितास्योभयंकरः ॥ करालजिह्वोरक्ताक्षोदीर्घबाहु र्जटाधरः ६ मुखादुरुवमन्नग्निंक्षणाच्चपूयशोणिते ॥ नेत्राणामंधतांकुर्वन्नंधकारइवापरः ७ आलोक्यदुद्रुवुःसर्वेतदाश्रमनिवासिनः ॥ दंष्ट्रारावैर्दशादिशः पूरयंतंतमद्भुतम् ८ अपृच्छत्तंद्विजवरस्तत्समक्षंतुपूरुषम् ॥ विद्वानपीतिकोसित्वंनामतेकिंवदस्वमे ९ प्रत्युवाचमुनिंतंतुपरिपृष्टोद्विजेनसः ॥ प्राणिमात्रश रीरस्थोनाम्नाहंपापपूरुषः १० त्वन्मंत्रजलपातेननिःसृतोराजदेहतः ॥ क्षुधातुरोभक्ष्यमीहेदेहिमह्यंनचेत्तदा ११ भक्षयिष्येमुनेलोकान्सोमकांतंतवाग्रतः ॥ वद

१कृष्णास्यः प्रापतद्भुवि इ० पा०

मेवसतिंरम्यामितोनिःसारितस्यच १२ ततस्तुबहिरभ्येत्यतमुवाचमुनिःपुनः ॥ अस्मिन्नरसालेसरलेविरसेवसकोटरे १३ गलितानिचपत्राणिभक्षयस्वममाज्ञया ॥ नोचेत्त्वांभस्मसात्कुर्यांनानृतंमेवचोथम १४ ॥ सूतउवाच ॥ इतितन्मुनिवाक्यांतेशुष्कंसवृक्षमस्पृशत् ॥ भस्मसादभवद्वृक्षोद्विजास्तत्स्पर्शमात्रतः १५ मुनेःसंदर्शनाद्भीतस्तस्मिन्भस्मन्यलीयत ॥ तस्मिन्विलीनेसमुनिःसोमकांतंपुनर्जगौ १६ भृगुरुवाच ॥ पुराणश्रवणाद्यत्तेजातंपुण्यंनृपोत्तम ॥ अयंयावच्च्युततरुस्त्रचोत्तिष्ठतेपुनः १७ तावत्संपादयास्मिंस्तद्वस्मन्येवदिनेदिने ॥ विवृद्धेस्मिंस्तरौराजन्निष्पापस्त्वंभविष्यसि १८॥ राजोवाच ॥ ॥ गणेशस्यपुराणंयन्नदृष्टंनचवैश्रुतम् ॥ कुत्रतल्लभ्यतेब्रह्मन्व्याकर्तातस्यवामुने १९ ॥ मुनिरुवाच ॥ ब्रह्मणावथितंपूर्ववेदव्यासायधीमते ॥ व्यासाच्चाविदितंमह्यंपुराणंपापनाशनम् २० अहंतेचप्रवक्ष्यामितीर्थेस्नानंसमाचर ॥ श्रोष्येपुराणमितिचसंकल्पंकुरुसुव्रत २१ ॥ सूतउवाच ॥ ॥ भृगुणानोदितःस्नात्वाभृगुतीर्थेतिविश्रुते ॥ सोमकांतोमुदायुक्तस्ततःसंकल्पमाचरत् २२ गणेशस्यपुराणंयत्तच्छ्रोष्येद्यप्रभृत्यहम् ॥ संकल्पमात्रेतुकृतेबभौराजानिरामयः २३ भृगुप्रसादान्निरक्तःकृमिक्षतविसर्जितः ॥ गृहीत्वातंभृगुरगाद्विस्मितंहर्षितंनृपम् २४ उपविश्यासनेस्वीयेदापयत्तस्यचासनम् ॥ उपविष्टोबभाषेतंदिव्यकांतिर्नृपोत्तमः २५ राजोवाच ॥ भवत्प्रसादात्सकलागरिष्टासंकल्पमात्रेणगताव्यथामे ॥ आश्चर्यभूतंसकलंवदस्वपुराणमेतद्विरदाननस्य २६ ॥ ॥ भृगुरुवाच ॥ ॥ शृणुष्वावहितोभूत्वातत्पुराणंवदाम्यहम् ॥ अनंतपुण्यनिचयैर्यस्यश्रवणगोचरा २७ मतिरुत्पद्यतेपुंसांनान्यथापापकारिणाम् ॥ यस्याकर्णनमात्रेणसद्यजन्मार्जितान्यपि २८ लघुशुष्कार्द्रस्थूलानिपापानिचमहांत्यपि ॥ तत्क्षणाद्विलयंयांतिगणेशस्यप्रसादतः २९ अव्ययस्याप्रमेयस्यनिर्गुणस्यनिराकृतेः ॥ मनोवागनिरूप्यस्यकेवलानंदरूपिणः ३० यस्यस्वरूपंनविदुर्ब्रह्मेशानादयःसुराः ॥ सहस्रवदनोयस्यमहिमानंनचक्षमः ३१ यावद्विशेषविदपिप्रवक्तुंराजसत्तम ॥ मयायथाश्रुतंपूर्वंतत्पुराणंसुपुण्यदम् ३२ अतींद्रियज्ञानवतोव्यासाच्चामिततेजसः ॥ यज्ञविध्वंसशोकार्तोदक्षःश्रुत्वावमुद्गलात् ६३ यस्यभक्तिर्दृढाराजन् गणेशेसर्वसिद्धिदे ॥ सएतच्छ्रृणुयान्नित्यंनवाच्यंतादृशेतरे ३४ यदिसर्वेपिकुर्वीरन्नविघ्नराजस्यसेवनम् ॥ कृतदाविघ्ननिचयाविहरेयुर्यथासुखम् ३५ दुःखान्यनुभवेयुःकेनानाविरहजान्युत ॥ चकारेदंपुराव्यासोभूतभव्यभविष्यवित् ३६ वेदार्थज्ञानरहितान्वेदाध्ययनवर्जितान् ॥ वर्णाश्रमाचारशून्यान्जातिसंकरकारिणः ३७ कलौविलोक्यतुजनान्कुटिलान्पापकारिणः ॥ अष्टादशपुराणानिकृतवान्धर्मगुप्तये ३८ तावंत्युपपुराणानिततोर्थान्बुबुधुर्जनाः ॥ ततएवगणेशस्यरूपंजानंत्यमीजनाः ३९ इतिश्रीगणेशपु०उपासनाखंडेराजोपदेशकथनंनामनवमोध्यायः ॥ ९ ॥ ॥ ७ ॥ ॥ भृगुरुवाच ॥ ॥ नारायणाज्ञसंभूतःपाराशर्योमहामुनिः ॥ अतीतानागतज्ञानीवेदशास्त्रार्थतत्ववित् १ कृत्वावेदंचतुर्भागंतदर्थज्ञानसिद्धये ॥ सविद्यामदगर्वेणपुराणंकर्तुमारभत् २ समाप्तिसाधनंनैवकृतवान्मंगलंपुरा ॥ गणेशस्यनतिंवापिस्तुतिंवातस्यवाक्वचित् ३ ततोविघ्नाभिभूतःसन्नर्थंकंचननास्मरत् ॥ भ्रांतिरेवाभ

वत्तस्यलौकिकेऽलौकिकपथि ४ नित्येनैमित्तिकेकाम्येश्रौतेस्मार्तेचकर्मणि ॥ व्याख्यातुर्वेदशास्त्राणांसर्वज्ञस्यसतोपिहि ५ ओषधीभिश्चमंत्रैश्चभग्नवीर्यइवाहिराट् ॥ तस्तंभेस्वात्मनिभृशंतद्धेतुंनाध्यगच्छत ६ ततोगच्छत्सत्यलोकंधातारंप्रष्टुमादरात् ॥ विस्मयाक्रांतहृदयोक्षीणःपाराशरोमुनिः ७ नमस्कृत्वादेवगणान्देवर्षीन्कमलासनम् ॥ पूजितोब्रह्मणादत्तेनिषसादासनेशुभे ८ पाणिनाचास्पृशत्पादौपाराशर्योमहामुनिः ॥ प्रणयावनतोभूत्वाब्रह्माणंप्रष्टुमारभत् ॥ ९ ॥ ॥ व्यासउवाच ॥ ॥ ब्रह्मन्नद्भुतमेतद्धिकिंमेदैवादुपस्थितम् ॥ वेदार्थानिपुराणानिकर्तुंमेबुद्धिराद्दता १० आवीक्षतोखिलाँल्लोकान्ज्ञानाचारविवर्जितान् ॥ कलौकर्मजडांस्तब्धान्नास्तिकान्वेदनिंदकान् ११ विधिंचैवनिषेधंचज्ञास्यंतिममवाक्यतः ॥ मनैवतुगतंज्ञानंभ्रांतःक्षीबइवाभवम् १२ नहेतुंतत्रपश्यामिस्फूर्तिःकापिनजायते ॥ तद्धेतुंस्फूर्तिहेतुंचप्रष्टुंत्वामहमागतः १३ अन्यंकंशरणंयामिविनात्वांचतुरानन ॥ सर्वज्ञ.सर्वकर्तात्वंममभ्रांतिंनिवारय १४ वदहेतुंममभ्रांतेर्नारायणस्वरूपिणः ॥ नित्याचास्वतोब्रह्मन्सर्वज्ञस्यसतोपिच १५ ॥ सूतउवाच ॥ ॥ एवमाकर्ण्यतद्वाक्यंविचार्यकमलासनः ॥ प्रणतंमुनिमभ्याहप्रहसन्निवविस्मयन्निव १६ ॥ ब्रह्मोवाच ॥ हंततेकथयिष्यामिगतिंसूक्ष्मांहिकर्मणाम् ॥ विचार्यसम्यक्कर्तव्यंकर्मसाध्वितरच्चयत् १७ अन्यथाकुर्वतःपुंसःकृतंभवतिचान्यथा ॥ बुद्ध्यायुक्त्यार्जवेनापिगुरुणिचलघूनिच १८ कार्याणिसाधयेद्धीमान्नगर्वान्नचमत्सरात् ॥ वाहनत्वंसमापन्नोगर्वेणतु खगेश्वरः १९ मत्सरान्नाशितंसर्वमांबिकेयसुतेनच ॥ मत्सरादेवरामेणक्षत्रमुत्सादितंपुरा २० योनादिनिधनोदेवोजगत्कर्ताजगन्मयः ॥ जगद्धाताजगद्धर्ता सदसद्व्यक्तमव्ययम् २१ योकर्तुमन्यथाकर्तुंशक्तःकर्तुंचसर्वदा ॥ यस्याज्ञावशगानित्यंदेवाइंद्रपुरोगमाः २२ अहंविष्णुश्चरुद्रश्चसूर्याग्निवरुणादयः ॥ योविघ्नहर्तामक्तानांविघ्नकर्तेतरस्यच २३ तस्मिंस्त्वंकृतवान्गर्वंस्वविद्याबलसंश्रयात् ॥ सर्वज्ञताभिमानेननकृतंपूजनंत्वया २४ स्मरणंवागणेशस्यप्रारंभेन्यस्यवातथा ॥ नकृतंचत्वयाव्यासतेनभ्रांतिस्तवानघ २५ आरंभेसर्वकार्याणांप्रवेशेवापिनिर्गमे ॥ श्रौतेस्मार्तेलौकिकेयोस्मृतोविघ्नंकरोतिच २६ यमाहुःपरमानंदंयमाहुःपरमांगतिम् ॥ यमाहुःपरमंब्रह्मवेदशास्त्रार्थदर्शिनः ॥ तंगच्छशरणंवत्सद्विरदाननमादरात् २७ सचेत्प्रसन्नोभगवान्वांछितंतेकरिष्यति ॥ नोचेद्वर्षसहस्रेणनस्ववांछामवाप्स्यसि २८ ॥ व्यासउवाच ॥ ॥ कोसौगणेशःकिंचास्यरूपंवेद्यंकथंचतत् ॥ कस्यवायंप्रसन्नोभूत्पूर्वंहिचतुरानन ॥ कतिवाह्यवताराश्चकिंकिंकार्यंचवैकृतम् ॥ पूर्वंचपूजितःकेनकस्मिन्कालेस्मृतोपिच ३० ममविक्षिप्तचित्तस्यपृच्छतःप्रपितामह ॥ एतत्सर्वंसुविस्तार्यब्रूहिमेकरुणानिधे ३१ इतिश्रीगणेशपुराणेउपासनाखंडेव्यासप्रश्नवर्णनंनामदशमोध्यायः ॥ १० ॥ ॥ भृगुरुवाच ॥ ॥ जगादभूयश्चतुरानन स्तमेवंकृतप्रश्नविवक्षयाथ ॥ क्रमेणसर्वंकथयामितेहंगणेशमंत्रान्बहुधाविचार्य १ ॥ ब्रह्मोवाच ॥ अनंताहिमुनेमंत्रागणेशस्यमहात्मनः ॥ उपासनंव

१ कपीश्वरड्०पा० । २ परमात्मानमितिपाठान्तरम् ।

दिष्यामिशीघ्रंसिद्धिकरस्यते २ सप्तकोटिमहामंत्रागणेशस्यागमेस्थिताः ॥ तद्वहस्यंशिवोवेदकिंचित्किंचिदहंमुने ३ षडक्षरैकाक्षरयोःश्रेष्ठत्वंतेषुविद्यते ॥
ययोःस्मरणमात्रेणसर्वसिद्धिःकरेभवेत् ४ जीवन्मुक्ताभवंत्येवयदुपासनयामुने ॥ तएवधन्यास्तेपूज्यास्तेनमस्याःसुरैरपि ५ यदुपासनयादा
स्यंयेषांकुर्वंतिसिद्धयः ॥ इच्छाविहाराःसर्वज्ञानानारूपाभवंतिते ६ येकुर्वंतिगणेशस्यभक्तिंभावसमन्विताः ॥ नयेषांभक्तिलेशोपितेषांजन्मनिरर्थ
कम् ७ नालोकयेन्मुखंतेषांविमुखायेगजानने ॥ तेषांदर्शनमात्रेणविघ्नानिस्युःपदेपदे ८ विघ्नान्युपशमंयांतितदुपासकदर्शनात् ॥ नमस्यंतिचभूतानिस्था
वराणिचराणिच ९ अतस्तेहंप्रवक्ष्यामिमंत्रमेकाक्षरंशुभम् ॥ तदनुष्ठानमात्रेणवांछितंसमवाप्स्यसि १० अनुष्ठानंप्रवक्ष्यामियथोक्तंशंभुनाभम ॥
स्नानंकृत्वाधौतवस्त्रेपरिधायशुचिर्नरः ११ चैलाजिनंकुशैःकृत्वास्वासनंसाधकःसुधीः ॥ तस्मिन्स्थित्वाभूतशुद्धिंप्राणानांस्थापनंतथा १२ अंतर्बहि
र्मातृकाणांन्यासंकृत्वात्वतंद्रितः ॥ प्राणायामंततःकृत्वामूलमंत्रंजपन्हृदि १३ मंत्रसंध्यामुपासीतआगमोक्तांयथाविधि ॥ आपादमस्तकंदेवंध्यात्वानि
श्चलचेतसा १४ मानसैरुपचारैस्तंपूजयेत्सुसमाहितः ॥ ततोजपेद्यथाशक्तिपुरश्चरणमार्गतः १५ अनुकूलोभवेद्यावद्वरंदातुंगजाननः ॥ स्वंरूपंदर्शये
द्यावत्तावज्जपपरोभवेत् १६ ॥ भृगुरुवाच ॥ एवमुक्त्वामुनिंब्रह्माविलोक्यशुभवासरम् ॥ एकाक्षरंमंत्रराजमेकार्णंगणपस्यच १७ अशिक्षयत्तदा
सर्वंसंभ्रांतंमुनिसत्तमम् ॥ ब्रह्मोवाच ॥ सूर्यकोटिप्रतीकाशंवरदातुंसमागतम् १८ यदाद्रक्ष्यसितंदेवंतदाचित्तंस्थिरीकुरु ॥ ममैवहृदयेनित्यंस्थिरो
भवगजानन १९ वृणीष्वेतिवरंतस्माद्यतेदास्यत्यसंशयम् ॥ हृदिस्थितेतत्रदेवेदिव्यंज्ञानमवाप्स्यसि २० भूतंभाविभवच्चैवज्ञास्यसित्वमशेषतः ॥ हि
त्वाभ्रांतिंदृढांवत्सनानाग्रंथान्करिष्यसि २१ ॥ व्यासउवाच ॥ गताभ्रांतिर्ममपितरुपदेशेकृतेत्वया ॥ अनुष्ठानंकरिष्यामिपितामहतवाज्ञया २२ ॥ ब्र
ह्मोवाच ॥ एकांतेनिर्जनेदेशेव्यग्रताहेतुवर्जिते ॥ अनुष्ठानंकुरुविभोगजाननमनुस्मरन् २३ नास्तिकेनिंदकेक्रूरेनाचारेचखलेशठे ॥ नवक्तव्योमंत्रराजस्ताद्
शेशरणागते २४ दृढभक्तौश्रद्दधानेविनीतेवेदवादिनि ॥ साकांक्षेनिरनुक्रोशेशास्त्रज्ञेचप्रकाशय २५ प्रापयत्येवनरकान्दशपूर्वान्दशापरान् ॥ मंत्रराज
स्तुवक्तारमप्रकाश्येप्रकाशितः २६ योजपेद्भक्तिपूर्वंतुसलभेदीप्सितंफलम् ॥ पुत्रपौत्रसमायुक्तोधनधान्यसमन्वितः २७ एकदंतप्रभावेणलब्ध्वाज्ञा
नंसुनिर्मलम् ॥ इहभुक्त्वाखिलान्भोगानंतेमोक्षमवाप्नुयात् २८ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेमंत्रकथनंनामैकादशोध्यायः ॥ ११ ॥ ७ ॥
सूतउवाच ॥ इतिश्रुत्वातुवचनंनिर्गतंब्रह्मणोमुखात् ॥ हर्षेणमहतायुक्तोमुनिःपप्रच्छतंपुनः १ ॥ व्यासउवाच ॥ अवधानंमयाप्राप्तंपीत्वावागमृतंतव ॥
इदानींश्रोतुमिच्छामिमंत्रराजमिमंपितः २ कोजजापकथंसिद्धिमवापचगजाननात् ॥ एतंमेसंशयंछिंधित्वत्तोन्योनास्तिमेगुरुः ३ ॥ भृगुरुवाच ॥ इत्येवं

१ उपादिशन्मंत्रराजमितिपाठान्तरम् ।

मुनिनापृष्टोजगादवदतांवरः ॥ कृपयावनतंब्रह्मातंव्यासंराजसत्तम ४ ॥ ब्रह्मोवाच ॥ साधुसाधुत्वयापृष्टंपुण्यवानसिसांप्रतम् ॥ नह्यपुण्यवतांब्रह्मन्कथा
याःश्रवणेरतिः ५ उपासनामार्गमिमंसम्यक्त्वांबोधयाम्यहम् ॥ स्निग्धेप्रज्ञाधिकेशिष्येयतोगोप्यंनकिंचन ६ ॐकाररूपीभगवानुक्तस्तेगणनायकः ॥ य
थासर्वेषुकार्येषुपूज्यतेसौविनायकः ७ निर्विघ्नकामनावद्भिर्नोचेद्विघ्नंकरोतिसः ॥ तथोंकारबीजयुक्ताॐकारपल्लवान्विताः ८ मंत्राःसर्वागमेप्रोक्ताअन्येये
निष्फलाश्चते ॥ सदसद्व्यक्तमव्यक्तंसर्वंहिगणनायकः ९ एवंसर्वेदेवसिद्धमुनिराक्षसकिन्नराः ॥ गंधर्वाश्चारणानागायक्षगुह्यकमानवाः १० उपासकागणे
शस्यसर्वेलोकाश्चराचराः ॥ अतएवगणेशाद्विपरंकिंचिन्नविद्यते ॥ इदानींकथयिष्यामिकथामेकांपुरातनीम् ११ मंत्रराजजपेनायंयथातुष्टोगजाननः ॥
कदाचिद्दैवयोगेनप्रलयेसमुपस्थिते १२ वायुभिःपर्वताभिन्नाःपतिताःपरितोदिशम् ॥ तपंतिद्वादशादित्याःशोषयित्वाजलंमहत् १३ ज्वालामालीमहा
वह्निरखिलंज्वलयत्यपि ॥ संवर्त्तकामहामेघावर्षंतिपरितोजलम् १४ हस्तिहस्तोपमाभिस्तुधाराभिर्द्विजसत्तम ॥ उल्लंघयंतिमर्यादांसागराःसरितोपिच १५
एवंसर्वेविनश्यंतिआब्रह्मस्थावरादयः ॥ एवंमायामयेनष्टेविकारेसौगजाननः १६ अणुभ्योणुतरंरूपंकृत्वाक्वापिव्यवस्थितः ॥ ततःकालेबहुतरेगतेंध
तमसावृते १७ एकाक्षरंपुनर्ब्रह्मनादयुक्तमजायत ॥ वैकारिकंपुनारूपंयदानंदमयंस्थितम् १८ मायाविकारमासाद्यतदेवामूद्गजाननः ॥ ततएवच
संभूतागुणाःसत्वंरजस्तमः १९ ततस्त्रयःसमुत्पन्नाविष्णुर्ब्रह्माहरेापिच ॥ माययारचितंसर्वंत्रैलोक्यंसचराचरम् २० ततस्तन्मायया भ्रांताबभ्रमुस्ते
सुरास्त्रयः ॥ तमेवजनकंस्वस्यद्रष्टुंप्रष्टुंसमुत्सुकाः २१ किमस्माभिःकर्मकार्यामितिजिज्ञासयामुने ॥ एकविंशतिस्वर्गाणिपूर्वमूर्ध्वंविलोक्यते २२ अंतरि
क्षंतथातिर्यक्पश्चात्पातालमाययुः ॥ अदृष्ट्वापरमात्मानंतपश्चेरुस्ततोभृशम् २३ निराहाराजपपरादिव्यवर्षसहस्रकम् ॥ श्रांताःखेदमनुप्राप्तास्ततस्तेपृथि
वींपुनः २४ विचिन्वंतोययुर्द्रष्टुंवनान्युपवनानिच ॥ सरितःसागरान्शैलान्शिखराणिगुहापिच २५ ततोजलाशयंतेतुमहांतंददृशुःपुरः ॥ नानाज
लचरैर्वृक्षैःपक्षिभिर्विविधैर्युतम् २६ बलाकाभिश्चक्रवाकैर्हंसैःकारंडकैरपि ॥ नादितंनलिनीजालंबिसखंडाशनेरतैः २७ स्नात्वाविश्रम्यतत्तीरेसमुत्ती
र्यपुरोययुः ॥ नानावीचिसमायुक्तंमहांतंतंजलाशयम् २८ सुदुस्तरतरंपुंसांझषनक्रसमाकुलम् ॥ ईक्षांचक्रुःसुदुर्दर्शंप्रलयानलसन्निभम् २९ कोटिसू
र्यप्रतीकाशंतेजोराशिंपुरोमुने ॥ चिंतामापुःपरांतेतुतेजसाहृतदृष्टयः ३० ततोगगनमार्गेणतेजोमध्याद्विनिर्गताः ॥ क्षुधातृषापरिश्रांतानिश्वसंतोमुहुर्मुहुः
३१ निंदंतश्चशपंतश्चस्वात्मानंजातसाध्वसाः ॥ ततोतिकरुणाविष्टोलोकाध्यक्षोखिलार्थवित् ३२ दर्शयामासतान्रूपंमनोनयननंदनम् ॥ पादांगुलीनख
श्रीभिर्जितरक्ताब्जकेसरम् ३३ रक्तांबरप्रभावात्तुजितसंध्यार्कमंडलम् ॥ कटिसूत्रप्रभाजालैर्जितहेमाद्रिशेखरम् ३४ खड्गखेटधनुःशक्तिशोभिचारुचतुर्भुजम् ॥

१ ददृशुःसुरा इतिवापाठः ।

सुनासंपूर्णिमाचंद्रजितकांतिमुखांबुजम् ३५ अहर्निशंप्रभायुक्तंपद्मचारुसुलोचनम् ॥ अनेकसूर्यशोभाजिन्मुकुटभ्राजिमस्तकम् ३६ नानातारांकितव्योमकांतिजिदुत्तरीयकम् ॥ वराहदंष्ट्राशोभाजिदेकदंतविराजितम् ३७ ऐरावतादिदिक्पालभयकारिसुपुष्करम् ॥ दृष्ट्वैवसहसादेवंप्रणेमुस्तेमुदामुने ॥ पादांबुजमुपस्पृश्यततःस्तोतुंप्रचक्रमुः ३८ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेगजाननदर्शनंनामद्वादशोध्यायः १२ ॥ ॥ व्यासउवाच ॥ पंचास्यश्चतुरास्यश्चसहस्रमस्तकोपिच ॥ गजास्यंवरदंदेवंकथमेतेप्रतुष्टुवुः १ ॥ ब्रह्मोवाच ॥ प्रसादोन्मुखविघ्नेशकृपापांगनिरीक्षणात् ॥ प्राप्तबुद्धिप्रसादास्ते केशास्तंनुनुवुस्तदा २ ॥ ब्रह्मविष्णुमहेशाऊचुः ॥ अजंनिर्विकल्पंनिराकारमेकंनिरानंदमद्वैतमानंदपूर्णम् ॥ परंनिर्गुणंनिर्विशेषंनिरीहंपरब्रह्मरूपंगणेशंभजेम ३ गुणातीतमाद्यंचिदानंदरूपंचिदाभासकंसर्वगंज्ञानगम्यम् ॥ मुनिध्येयमाकाशरूपंपरेशंपरब्रह्मरूपंगणेशंभजेम ४ जगत्कारणंकारणज्ञानरूपंसुरादिंसुखादिंयुगादिंगणेशम् ॥ जगव्यापिनंविश्वनंद्यंसुरेशंपरब्रह्मरूपंगणेशंभजेम ५ रजोयोगतोब्रह्मरूपंश्रुतिज्ञंसदाकार्यसक्तंत्वदाचिंत्यरूपम् ॥ जगत्कारकंसर्वविद्यानिधानंपरब्रह्मरूपंगणेशंनताःस्मः ६ सदासत्त्वयोगंमुदाक्रीडमानंसुरारीन्हरंतंजगत्पालयंतम् ॥ अनेकावतारंनिजाज्ञानहारंसदाविष्णुरूपंगणेशंनमामः ७ तमोयोगिनंरुद्ररूपंत्रिनेत्रंजगद्धारकंतारकंज्ञानहेतुम् ॥ अनेकागमैःस्वंजनंबोधयंतंसदाशर्वरूपंगणेशंनमामः ८ तमस्तोमहारंजनाज्ञानहारंत्रयीवेदसारंपरब्रह्मपारम् ॥ मुनिज्ञानकारंविदूरेविकारंसदाब्रह्मरूपंगणेशंनमामः ९ निजैरोषधीस्तर्पयंतंकरौघैःसुरौघान्कलाभिःसुधास्रावि णीभिः ॥ दिनेशांशुसंतापहारंद्विजेशंशशांकस्वरूपंगणेशंनमामः १० प्रकाशस्वरूपंनभोवायुरूपंविकारादिहेतुंकलाकालभूतम् ॥ अनेकक्रियानेकशक्तिस्वरूपंसदाशक्तिरूपंगणेशंनमामः ११ प्रधानस्वरूपंमहत्तत्वरूपंधरावारिरूपंदिगीशादिरूपम् ॥ असत्सत्स्वरूपंजगद्धेतुभूतंसदाविश्वरूपंगणेशंनतास्मः १२ त्वदीयेमनःस्थापयेदंघ्रियुग्मेजनोविघ्नसंघान्नपीडांलभेत ॥ लसत्सूर्यबिंबेविशालेस्थितोयंजनोध्वांतबाधाकथंवालभेत १३ वयंभ्रामिताःसर्वथाज्ञानयोगादलब्धास्तवांघ्रिंबहून्वर्षपूगान् ॥ इदानीमवाप्तास्तवैवप्रसादात्प्रपन्नान्सदापाहिविश्वंभराद्य १४ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवंस्तुतोगणेशस्तुसंतुष्टोभून्महामुने ॥ कृपयापरयोपेतोभिधातुंतान्प्रचक्रमे १५ ॥ गणेशउवाच ॥ यदर्थंक्लेशितायूयंयदर्थमिहचागताः ॥ प्रीतोहमनयास्तुत्या वरंमत्तोवृणीततम् १६ कृतंचममयत्स्तोत्रंभवद्भिर्भावितात्मभिः ॥ स्तोत्रंराजमितिख्यातंभविष्यतिममाज्ञया १७ इदंयःपठेत्प्रातरुत्थायधीमांस्त्रिसंध्यंसदाभक्तियुक्तोविशुद्धः ॥ सपुत्रान्श्रियंसर्वकामान्लभेतपरब्रह्मरूपोभवेदंतकाले १८ ॥ ॥ ब्रह्मोवाच ॥ ॥ इतितद्वचनंश्रुत्वासंतुष्टास्तेतमब्रुवन् ॥ तदीक्षयारजःसत्त्वतमोगुणसमुद्भवाः १९ ॥ त्रयऊचुः ॥ यदितुष्टोसिदेवेशसृष्टिसंहारकारक ॥ तवांघ्रिकमलेनोस्तुभक्तिरव्यभिचारिणी २० किं

१ शोभाभिः इ०पाठान्तरम् । २ आकाशतुल्यमि पा०

चास्माभिःप्रकर्त्तव्यमाज्ञापयतुनोभवान् ॥ अयमेववरोस्माकंवांछितोद्विरदानन २१ इतिश्रुत्वावचस्तेषांपुनःप्राहगजाननः ॥ भविष्यतिमहाभागा
यिभक्तिर्दृढाहिवः २२ संकष्टानियथायूयंतरिष्यथमहांत्यपि ॥ भवद्रूप्यात्यैप्रवक्ष्यामिकार्याणिचपृथक्पृथक् २३ सृष्टिकर्त्ताभवब्रह्मन्रजोगुणसमुद्भवः ॥
पालनंकुरुविष्णोत्वंव्यापकःसत्त्वसंश्रयः २४ हरसंहरमवैत्वंतमोगुणसमुद्भवः ॥ ब्रह्मोवाच ॥ वेदशास्त्रपुराणानिसृष्टिसामर्थ्यमेवच २५ ददौगणेशोन्यांविद्यां
ब्रह्मणेमह्यमादरात् ॥ विष्णवेभगवान्प्रादाद्योगात्स्वच्छंदरूपताम् २६ एकाक्षरंषडर्णंचमंत्रंसर्वागमांस्तथा ॥ हरायभगवान्प्रादाच्छक्तिसंहरणेपिच २७ तत
श्चाहंदीनमनास्त्रैलोक्येशंजगद्गुरुम् ॥ उवाचप्रांजलिर्भूत्वावरदंतमिभाननम् २८ ॥ ब्रह्मोवाच ॥ यथागृहीतशक्तिस्तुवाच्यावाच्यंविवक्षिन ॥ तथानेक
विधांसृष्टिमदृष्ट्वाक्वापिकिंचन २९ कर्त्तुंवापिविभोराज्ञाविभेदंकथमुत्सहे ॥ इतःकूपइतोवापीत्येवंप्राप्तंमयाकथम् ३० ततोगजाननःप्राहदिव्यंचक्षुः
प्रदायतम् ॥ ब्रह्माणंवेदशास्त्रज्ञंतथाव्याकुलितंप्रभुः ३१ ॥ गजाननउवाच ॥ बहिरंतःशरीरेमेसंख्यातीतानिपद्मज ॥ ब्रह्मांडानित्वमद्यैवविभ्रमंतिविलोक
य ३२ ॥ ब्रह्मोवाच ॥ ततोगजाननेनाहंस्वोदरेश्वासवायुना ॥ नीतोददर्शधातापिब्रह्मांडानित्वनेकशः ॥ औदुंबराणीवतरौतेषुवामशकानिव ३३ भेदयामास
तत्रैकंपरमेणस्वतेजसा ॥ तदंतःसकलांसृष्टिंददर्शाथपुनःपुनः ३४ ब्रह्माणंचापरंतत्राविष्णुमिंद्रंप्रजापतिम् ॥ शंकरंभास्करंवायुंवनानिसरितोंबुपम् ३५
सागरान्यक्षगंधर्वानप्सरःकिन्नरोरगान् ॥ ऋषीन्पुण्यजनान्साध्यान्मनुष्यान्पर्वतान्द्रुमान् ३६ उद्भिज्जान्जारजान्जंतून्स्वेदजानंडजानपि ॥ पृथ्वीं
चसप्तपातालान्यद्व्ययान्येकविंशतिम् ३७ ददर्शविश्वंचाहंवैभावाभावंचराचरम् ३८ यद्यच्चाहंभेदयामासचांडंतस्मिंस्तस्मिन्सर्वमेवंददर्श ॥ दृष्ट्वाभ्रां
तिंपूर्ववत्संप्रपेदेतेषामंतंसर्वथानाध्यगच्छम् ३९ नस्थातुंनैववागंतुंशशाकमलासने ॥ उपविश्यततोब्रह्मंस्तुष्टावद्विरदाननम् ४० ॥ ब्रह्मोवाच ॥ वंदे
देवंदेवदेवंगणेशंब्रह्मांडानांनैवसंख्यायदंगे ॥ अब्धोडूनांसागरेवाश्मषाणांकःसंख्याताशर्कराणांचतीरे ४१ लज्जानमेत्रास्तिसुरेंद्रवंद्यपादारविंदंतवयद्विलोक्य ॥ भ्रांतोभवंज्ञाननिधौप्रसन्नेमोक्षोपितुच्छःकिमुतान्यवार्ता ४२ दृष्टंचनानार्थयुतंसुरेशब्रह्मांडकूटंजठरेत्वदीये ॥ स्थातुंबहिर्गंतुमपीहनेश
स्त्वदन्यदेवंशरणंनचैमि ४३ ततःप्रसन्नोभगवाननंतोवैगजाननः ॥ बहिर्निष्कासयामासतदामांखिन्नमानसम् ४४ नासिकारंध्रमार्गेणहरिंमदनुयायिन
म् ॥ तामसंचहरंदेवोविष्णुनासहसंगतम् ४५ निःसारयामासविभुःश्रुतिरंध्राद्गजाननः ॥ शयातेस्मतदंगेतावुभौहरिहरौसुखम् ४६ ॥ इतिश्रीग
णेशपुराणेउपासनाखंडेब्रह्मस्तुतिवर्णनंनामत्रयोदशोध्यायः ॥ १३ ॥ राजोवाच ॥ ततःकिमकरोद्ब्रह्मावीक्ष्यांडानिसहस्रशः ॥ कथंचसृष्टिमकरोदाज्ञां
प्राप्यगजननात् १ ॥ भृगुरुवाच ॥ अभवद्गर्वसंपन्नःस्वात्मन्येवंविचारयन् ॥ वेद्मिशास्त्राणिवेदांश्चपुराण्यागमानपि २ ज्ञानविज्ञानसंपन्नःशापानुग्रहश

१ सत्त्वसंभवइतिपाठान्तरम् २ वन्देवन्देइ०पा० ३ नोवेद्मिइ०पा०

क्तिमान् ॥ ब्रह्मांडानिचदृष्टानिसृष्टीनांरचनास्तथा ३ इदानींसृष्टिकरणेऽशक्यंमेनैवकिंचन ॥ इत्येवंसर्वसंपन्नेसृष्ट्यर्थंकमलोद्भवे ४ विघ्नानानाविधामूषप्रादुरास न्सहस्रशः ॥ तंवेष्टयित्वाब्रह्माणंस्थिताःपरमदारुणाः ५ यथामताःपुष्परसैःसरघामधुजालकम् ॥ त्रिनेत्राःपंचहस्ताश्चकूपास्याःसप्तपाणयः ६ त्र्यंघ्रयःपंचतुंडाश्चसप्ततुंडाःषडंघ्रयः ॥ दशास्याःपंचपादाश्चतालदंताबृकोदराः ७ नानारूपामहासत्वाःसंख्यातुंनचतेक्षमाः ॥ चकंपेद्रुहिणस्तेषांनानारावान्निशम्यतान् ८ केचित्तंमुष्टिभिर्जघ्नुर्नमुश्चनुनुवुःपरे ॥ चतुःशिखासुसंगृह्यदोलयामासुरादरात् ९ चत्वार्यपिमुखान्यस्यजहसुस्तंतथापरे ॥ निर्निंदुश्चप्रशंसांचचक्रुःकेचित्सिषेविरे १० मोचयामासुरपरेबबंधुरपरेपुनः ॥ मोचितंपुनरप्यन्येविचकर्षुरितस्ततः ११ आलिलिंगुश्चतंकेचिच्चुचुंबुःशिशुवत्परे ॥ अष्टश्मश्रुषुतंधृत्वाननत्तैकोष्टहस्तवान् १२ एवंसपरवान्ब्रह्माचिंताशोकसमन्वितः ॥ अखर्वंसृष्टिगर्वंतंत्यजत्पदिसंगतम् १३ जगाममहतींमूर्छांनिराशःस्वस्यजीविते ॥ मुहूर्त्तमात्रेतुगतेसस्मारमनसाविभुम् ॥ प्रार्थयामासकारुण्याद्गदन्निवगजाननम् १४ ब्रह्मोवाच ॥ नचायुष्यंस्वल्पंवेविधजननेसक्तमनसोनमेतत्त्वज्ञानंभवजलधितारंसुविमलम् ॥ जनुर्भूमौलब्ध्वातवभजनतोयामिपरमांकदाभुक्तिमुक्तिनिरुपमसुखंवाखिलगुरो १५ त्वत्कटाक्षामृतेनाक्तोभक्तःसीदतितेविभो ॥ इयंलज्जातवैवास्तांनमेमृत्युश्चिरायुषः १६ भृगुरुवाच ॥ इत्यसौप्रार्थयन्नेवशुश्रावगगनेरिताम् ॥ गिरंतपस्येतिततःप्रार्थयामासतांपुनः १७ अंतर्हिताश्चतेविघ्नाःश्रुतायांनभसोगिरि ॥ नानारूपामहावीर्यामुक्त्वातंकमलासनम् १८ समुक्तश्चितयामासपद्मयोनिर्महायशाः ॥ विनामंत्रंविनास्थानंकथंतप्स्येतपोमहत् १९ इतिव्याकुलचित्तोसौबभ्रामजलमध्यतः ॥ अनन्यमनसाध्यायन्गजाननमनामयम् २० मुकुटेनविराजंतंमुक्तारत्नयुजाशुभम् ॥ रक्तचंदनलिप्तांगंसिंदूरारुणमस्तकम् २१ मुक्तादामलसत्कंठंसर्पयज्ञोपवीतिनम् ॥ अनर्घ्यरत्नघटितबाहुभूषणभूषितम् २२ स्फुरन्मरकतभ्राजदंगुलीयकशोभितम् ॥ महाहिवेष्टितबृहन्नाभिशोभिमहोदरम् २३ विचित्ररत्नखचितकटिसूत्रविराजितम् ॥ सुवर्णसूत्रविलसद्रक्तवस्त्रसमावृतम् २४ भालचंद्रलसद्दंतशोभाराजत्करंपरम् ॥ एवंध्यायतितस्मिंस्तुपुनरेवनभोवचः २५ उदियायवटंपश्यवटंपश्येतिसुंदरम् ॥ श्रुत्वेतिवचनंब्रह्मापुनश्चितामवापसः २६ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेब्रह्मचिंतावर्णनंनामचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ भृगुरुवाच ॥ ॥ व्यासायाकथयच्चाग्रेब्रह्मालोकपितामहः ॥ सोमकांतप्रवक्ष्यामितांकथांशृणुसादरम् १ ब्रह्मोवाच ॥ ततोहंसुमहत्स्वप्नंददर्शमुनिसत्तम ॥ भ्रमताभ्रमताव्योमजलेदृष्टोवटोमहान् २ महावातातपाद्भिस्तुनष्टेस्थावरजंगमे ॥ अवशिष्टःकथमयमेकएववटोमहान् ३ एवंसंशयमापन्नस्ततपत्रेबालकंलघुम् ॥ चतुर्बाहुंसुमुकुटंकुंडलाभ्यांविराजितम् ४ मणिमुक्तामयंदामबिभ्रत्कंठेसुशोभितम् ॥ अर्धचंद्ररक्तवस्त्रंकटिसूत्रंतथैवच ५ एकदंतंनरवपुर्गजास्यंतेजसाज्वलत् ॥ दृष्ट्वैवंतर्कयामासबालकंकथमत्रवै ६ पु

१ अयंश्लोको मुद्रित पुस्तके नविद्यते परमग्रे सर्वत्र प्रथमपुरुष प्रयोग एव ।

ष्करेणचतद्बालंजलंमन्मस्तकेक्षिपत् ॥ ततोहमाजहासोच्चैश्चिंतानंदसमन्वितः ७ मय्याहसतिबालःसउत्तत्तारवटात्ततः ॥ सममांकंसमागत्यमंजुवाक्यंजगादह ॥ ८ ॥ ॥ बालउवाच ॥ ॥ लघोर्लघुतरोसित्वंवृथावृद्धोपिमूढधीः ॥ विघ्नैरभिहतोसित्वंसृष्टिचिंतासमावृतः ९ तपश्चिताप रोनित्यंविभ्रमज्जलमध्यगः ॥ सर्वचिंताहरंतेहमुपायंचतुरानन १० उपादिशामितेमंत्रमेकाक्षरमिमंमम ॥ पुरश्चरणमार्गेणदशलक्षंजपस्वतम् ११ ततःप्रत्य क्षतांयास्येदास्येसामर्थ्यमुत्तमम् ॥ दृष्ट्वैवंस्वप्नमाश्चर्यंप्रतिबुद्धोभवंह्यहम् १२ शुशोचचकदामेस्याद्दर्शनंपरमेशितुः ॥ दृष्टस्वप्नोभवंमग्न आनंदमय सागरे १३ ततःस्नात्वापरंमंत्रंजजापबहुवासरम् ॥ एकपादेनकमलेतिष्ठन्ध्यायन्गजाननम् १४ जितेंद्रियोजिताहारःकाष्ठपाषाणवत्स्थिरः ॥ दिव्यवर्षस हस्रंसतपस्तेपेपरंमहत् १५ ततोमेमुखतोज्वालाःप्रादुरासन्दुरासदाः ॥ ताभिःसर्वाणिभूतानिपीडामापुःसुदारुणाम् १६ ततोगजाननोदृष्ट्वातांनिष्ठां ममसुदृढाम् ॥ तुतोषपरयाभक्त्याप्रादुरासीत्ततःपुरः १७ कोटिसूर्यसमानश्रीर्ज्वालामालीवहव्यभुक् ॥ दहन्निवत्रिलोकींससंहरन्निवरोदसी १८ परशुक मलधारीदिव्यमायाविभूषःसकलदुरितहारीसर्वसौंदर्यकोशः ॥ करिवरमुखशोभीभक्तवांछाप्रपोषःसुरमनुजमुनीनांसर्वविघ्नैकनाशः १९ तेजोराशिमहंदृष्ट्वा कंपेव्याससन्मुने ॥ चिंतामवापपरमांव्यग्रचित्तोजपान्मुतः २० आच्छादितानीक्षणानिस्मृतिश्चविलयंगता ॥ दृष्ट्वेदृशीमवस्थांतांशीघ्रंप्राहाथविघ्नराट् २१ ॥ ॥ गणेशउवाच ॥ नभयंकुरुलोकेशसएवाहंसमागतः ॥ येनतेमंत्रआदेशिस्वप्नएकाक्षरःशुभः २२ तेनसिद्धिरनुप्राप्तावरंदातुंसमागतः ॥ सौम्य भावंप्रपन्नोस्मिवरंवरयसुव्रत २३ दास्यामितेप्रसन्नोहंयद्यत्तेत्तदिवर्त्तते ॥ मयिप्रसन्नेसर्वंतद्भवितानात्रसंशयः २४ ॥ मुनिरुवाच ॥ ॥ इत्थंनिशम्यगणना थवचोविशुद्धंब्रह्माजहर्षपरमंप्रसमीक्षमाणः ॥ नत्वाचराचरगुरुंसकलैःशिरोभिःप्राहप्रसन्नहृदयःसफलंजनुर्मे २५ ॥ ब्रह्मोवाच ॥ ॥ योवेदानांसशास्त्राणांज्ञा निनांयोगिनामपि ॥ सर्वोपनिषदांचैवगोचरोनकदाचन २६ सपुण्यनिचयैर्मेद्ययातःप्रत्यक्षतांविभुः ॥ अनादिनिधनोनंतोप्रमेयोनिर्गुणोपिच २७ यदिप्र सन्नोदेवेशविघ्नेशकरुणाकर ॥ तवभक्तिंदृढांदेहियायादुःखंननःस्पृशेत् २८ इदानींदेहिसामर्थ्यंनानानिर्माणनेमम॥ विघ्नानिचशमंयांतुयदितुष्टोसिमेप्रभो२९ स्मृतमात्रःसदामेत्वंसर्वंकार्यंसमापय ॥ अंतेमुक्तिंस्थिरांदेहिज्ञानंचविमलंमम ३० ॥ गजाननउवाच ॥ ॥ एवमस्तुकुरुष्वत्वंसृष्टिंनानाविधांबहुम् ॥ मांस्मृत्वासर्वविघ्नानिनाशंयास्यंतिसर्वतः ३१ दृढाभक्तिःशुभंज्ञानंमत्प्रसादाद्भविष्यति ॥ निःशंकंकुरुकार्याणिसर्वाणिचतुरानन ३२ ॥ मुनिरुवाच ॥ एवं लब्धवरोब्रह्मापूजयामासतंविभुम् ॥ यद्यच्चित्तेचिंतयत्सतत्तदेवोपतिष्ठते ३३ पूजार्थंदेवदेवस्यगणेशस्यप्रसादतः ॥ दक्षिणावसरेद्वेतुकन्यकेसमुपस्थिते ३४ चारुप्रसन्ननयनवदनैःसुविराजिते ॥ अनेकरत्नखचितनानालंकारशोभिते ३५ दिव्यगंधयुतेदिव्यवस्त्रमालाविभूषिते ॥ तेतस्मैदक्षिणार्थंसकल्पया

१ येनेत्यं श्लोकोधिक एकस्मिन्पुस्तके । २ त्वयितुष्टे गजानने इ०पाठान्तरम् ।

मासपद्ममूः ३६ रंभागर्भेणनीराज्यंदिव्यपुष्पांजलिंददौ ॥ सहस्रनामभिःस्तुत्वाप्रदक्षिणमथाकरोत् ३७ नमस्यप्रार्थयामासदीनानांशंकरोभव ॥ एवंसंपूजितस्तेनब्रह्मणापरमेष्ठिना ३८ ततःप्रसन्नोभगवान्विघ्नहर्तागजाननः ॥ सिद्धिबुद्धीगृहीत्वातेअंतर्धानमगाद्विभुः ३९ कंस्ततःकारयामासस्रष्टिं पूर्ववदायताम् ॥ आज्ञयापरमेशस्यप्रसादाच्चप्रसन्नधीः ४० ॥ इतिश्रीगणेशपुराणेउपासनाखंडेगजाननपूजानिरूपणंनामपंचदशोध्यायः ॥ १५ ॥ राजोवाच ॥ ॥ श्रुत्वाकथांगणेशस्यहर्षश्चेतसिजायते ॥ पुनश्चवदविप्रर्षेनतृप्यामिकथामृतात् १ अंतर्हितेभगवतिगणेशेपरमात्मनि ॥ कथंविनिर्ममेसृष्टिंब्रह्मातद्वर्णयप्रभो २ यंच्चाग्रेकथयामासव्यासायाख्यानकंविधिः ॥ तदहंविस्तरेणैवश्रोतुमिच्छामिसन्मुने ३ भृगुरुवाच ॥ सिद्धक्षेत्रस्यमाहात्म्यंव्यासायाकथयत्प्रभुः ॥ आनुपूर्व्येणतत्तेहंकथयिष्येसृजच्चयत् ४ सब्रह्मानिर्ममेपूर्वंमनसासप्तपुत्रकान् ॥ आहतान्सृष्टिसाहाय्यंसृजध्वंस्वस्वबुद्धितः ५ तेतुतद्वचनंश्रुत्वा तपसेकृतनिश्चयाः ॥ तपस्तप्त्वासुविपुलंपरंब्रह्मसमागताः ६ ततोन्यान्कल्पयामाससप्तपुत्रान्प्रजापतिः ॥ तेप्यंतज्ञानसंपन्नानचक्रुःसृष्टिमुत्तमाम् ७ ततःस्व यंसमारेभेसनकादीन्विलोक्यतान् ॥ मुखतोब्राह्मणान्अग्निमसृजत्कमलासनः ८ बाहूरुपादतोन्यांस्त्रीन्वर्णांश्चंद्रमसंत्वदः ॥ चक्षुर्भ्यांचरविंश्रोत्रान्मारुतं प्राणमेवच ९ अंतरिक्षंतथानाभेःशिरसोदिवमेवच ॥ भूमिंपद्भ्यांदिशःश्रोत्रादन्याँल्लोकानकल्पयत् १० अन्यदुच्चावचंविश्वंस्थावरंजंगमंचयत् ॥ स मुद्रान्सरितःशैलांस्तृणगुल्ममहीरुहान् ११ ततःकतिपयाहःसुगतेषुमुनिसत्तमाः ॥ निद्रितस्यमहाविष्णोःश्रोत्राज्जातौमहासुरौ १२ मधुकैटभ नामानौविख्यातौभुवनत्रये ॥ दंष्ट्राकरालवदनौपिंगाक्षौदीर्घनासिकौ १३ महाकायौमहासारावत्युच्चौपर्वतावि व ॥ वर्षामुदिरशब्दौतौगर्जंतौभृशगर्वितौ १४ वचोभिर्बहुभिर्दुष्टैधिक्कारंतस्यचक्रतुः ॥ विप्रान्देवान्ऋषीन्साधून्शास्त्राणिचनिनिंदतुः १५ तयोःशब्देनधरणीचकंपेशेषएवच ॥ उद्विग्नमासीत्सकलंब्रह्मांडंस्वनतस्तयोः १६ ततस्तौक्रोधरक्ताक्षौकंतंखादितुमुद्यतौ ॥ ततोसौवरदांदेवींविष्णुमोहनकारिणीम् १७ विष्णुनेत्रगतां निद्रांतुष्टावकमलासनः ॥ मधुकैटभनाशायप्रबोधायहरेरपि १८ गजाननप्रसादेनविष्णुहस्तात्तयोर्वधम् ॥ ज्ञात्वासम्यग्विचार्यैर्वांछितार्हर्षसमन्वि तः १९ ॥ ॥ ब्रह्मोवाच ॥ ॥ स्वाहास्वधारूपधरासुधात्वंमात्रार्धमात्रास्वररूपिणीच ॥ कर्त्रीचहर्त्रीजननीजनस्यसतोसतःशक्तिरसित्वमेव २० श्रुतिःस्मराकालरात्रिरनादिनिधनाक्षपा ॥ जगन्माताजगद्धात्रीसृष्टिस्थित्यंतकारिणी २१ सावित्रीचतथासंध्यामहामायातृषाक्षुधा ॥ सर्वेषांवस्तुजा तानांशक्तिस्त्वमसिपार्वति २२ त्रैलोक्यकर्त्तात्वन्नाथोदैत्यदानवसूदनः ॥ निद्रयाव्याप्तचित्तोसौज्ञानविज्ञानवान्हरिः २३ जगदुत्पाद्यतेयेनपाल्यतेहिय तेपिच ॥ सोपित्वयावताराणांसंकटेविनियोज्यते २४ दुष्टात्मानौमोहयैतौत्वंदैत्यौमधुकैटभौ ॥ हंतुमेतौदुराधर्षौज्ञानमस्यप्रदीयताम् २५ अहमाराधित

१ श्लोकद्वयमेतन्मुद्रितपुस्तकेन ।

श्वाभ्यांपूर्वजन्मन्यतंद्रितम् ॥ वरान्बहुविधान्प्रादामवध्यौममतावुभौ २६ तयोरुच्चावचान्शब्दानतोहमसहंबहु ॥ मामेवहंतुकामौतौस्तुतौनानाविधैःस्तवैः २७ तथापिमद्वधात्तौननिवृत्तौदुष्टभावतः ॥ अतस्त्वांप्रार्थयेदेविविष्णुबोधनहेतवे २८ इतिश्रीगणेशपुराणेउपासनाखंडेदेवीप्रार्थनंनामषोडषोऽध्यायः १६ ॥ ॥ मुनिरुवाच ॥ ॥ यावदुत्तिष्ठतेविष्णुस्तावत्ताभ्यांत्रिविष्टपम् ॥ आक्रांतमिंद्रमदनंयाम्यंकौबेरमेवच १ तौदृष्ट्वासर्वतोदेवाःपलायनपराबभुः ॥ निपेतुर्बभ्रमुःकेचिन्मुमूर्छुश्चस्खलुःपरे २ ततोदेव्याविनिर्मुक्तोनिद्रयाहरिरीश्वरः ॥ आश्वास्यसर्वदेवांस्तांस्ताभ्यांयुद्धंचकारह ३ आक्रमंसर्वदेवानांकृतंताभ्यांनिवारितुम् ॥ शेषादिसर्वनागानांमुनीनांयक्षरक्षसाम् ४ शुशुभेसहरिस्तत्रशंखचक्रगदाधरः ॥ किरीटकुंडलधरोनीलमेघघनच्छविः ५ ततःसभगवान्शंखंप्रदध्मौष्टशवेगवान् ॥ तेनशब्देनमहताक्षोभयामासरोदसी ६ पांचजन्यस्वनंश्रुत्वाबिभिदेहृदयंतयोः ॥ ततस्तौभयसंविग्नौपरस्परमथोचतुः ७ भूमंडलंचपातालंस्वर्गाणामेकविंशतिः ॥ आक्रांताःसम्यगावाभ्यांतदायंनश्रुतःस्वनः ८ वज्रसारमयंयेनचकंपेहृदयंद्वयोः ॥ तस्मादनेनयोद्धव्यंपुरुषेणबलीयसा ९ रणकंडूतिशांत्यर्थंविजयायेतरायवा ॥ रिपुमेनंहनिष्यावोगच्छावोवापुनर्भवम् १० एवंतौनिश्चयंकृत्वायुयुत्सुंहरिमूचतुः ॥ रणकंडूतिशांत्यर्थंदृष्टोसिपुरुषोत्तम ११ कथमुत्तमतांयासिआवयोर्दृष्टिगोचरः ॥ मुनिरुवाच ॥ इतिवाक्यंतयोःश्रुत्वाजगादविष्टरश्रवाः १२ ॥ हरिरुवाच ॥ सम्यगुक्तंमहादैत्यौयथेष्टंयुध्यतंमया ॥ नहिकामयतेकश्चिन्मरणंस्वयमात्मनः १३ ॥ ॥ तावूचतुः ॥ चतुर्भुजोसिदेवेशबाहुयुद्धंदस्वनौ ॥ मुनिरुवाच ॥ एवमुक्तोहरिस्ताभ्यांतथेत्याहमुदान्वितः १४ त्यक्त्वायुधानियुयुधेद्वाभ्यामेकश्चतुर्भुजः ॥ जघ्नतुस्तौशिरोमूर्ध्नाजंघाभिरथजंघयोः ॥ कूर्परैःकूर्परैःस्वीयैर्बाहूबाहुभिरेवच १५ गुल्फौगुल्फैःकटिंताभ्यांनासिकाभ्यांचनासिकाम् ॥ मुष्टिभ्यांमुष्टिदेशंचपृष्ठाभ्यांपृष्ठमेवच १६ आस्फोटनविकर्षाभ्यां बाहुभिर्मंडलैरपि ॥ एवंपरस्परंयुद्धंप्रावर्ततचिरंतदा १७ सहस्रंपंचगुणितमतिक्रांतंमहामुने ॥ वर्षाणांनतुतौजेतुंशशाकहरिरीश्वरः ॥ ततोदधाररूपंस्वंगांधर्वंगीतकोविदम् १८ गत्वावनांतरंचारुवीणागानंचकारसः ॥ हरिणाश्वापदालोकादेवगंधर्वराक्षसाः १९ स्वस्वव्यापाररहिताःसर्वेतत्परतांययुः आलापंतस्यगिरिशःकैलासेश्रुतवान्मुहुः २० निकुंभंपुष्पदंतंचजगादभगनेत्रहा ॥ एतमानयतंशीघ्रंयोसौगायतिकानने २१ तौगत्वादर्शनंतस्यगृहीत्वावैतमूचतुः ॥ तवगीतस्वनंश्रुत्वाशंकरोहर्षनिर्भरः २२ त्वांसमाह्वयतेदेवोगानंश्रोतुंतवानघ ॥ आवाभ्यांसहयाहित्वंशीघ्रंयामतदंतिकम् २३ तयोर्वाक्यमितिश्रुत्वागंधर्वोहरिभक्तिमान् ॥ ताभ्यांसहययौतत्रयत्रदेवोमहेश्वरः २४ ददर्शपार्वतीकांतंचंद्रार्धकृतशेखरम् ॥ गजचर्मपरीधानंरुंडमालाविभूषितम् २५ राजत्पिंगजटाभारंसर्पयज्ञोपवीतिनम् ॥ ननामभुविविश्वेशंप्रणतार्तिविनाशनम् २६ उत्थाप्यगिरिशःस्वेनपाणिनातमधोक्षजम् ॥ आसनंचददौतस्मैपूजयामासशंकरः २७ ततोजगादसहरिंरुद्रमेसफलंजनुः ॥ यतोवदर्शनंतेभूद्धर्मकामार्थमोक्षदम् २८ तोषयामासतंदेवंगंधर्वोगान

तत्परम् ॥ वीणास्वैःकलपदैरालापैर्विविधैरपि २९ स्कंदंगणेश्वरंदेवींपार्वतींचसुरान्मुनीन् ॥ ततोमहेश्वरःप्रीत्याालिलिंगप्रकटंहरिम् ३० शंखचक्रगदाप
द्मपीतांबरधरंशुभम् ॥ उवाचचहरेमत्तोवृणुकामानशेषतः ३१ दास्यामितवगानेनपरांमुदमुपागतः ॥ भृगुरुवाच ॥ ततऊचेस्वभूस्तंतुवृत्तांतंदैत्य
योःपरम् ३२ ॥ हरिरुवाच ॥ मायिक्षीराब्धिशयनेनिद्रितेमधुकैटभौ ॥ उत्पन्नौकर्णमलतोब्रह्माणंभक्षितुंगतौ ३३ तेननिद्रास्तुताभर्गतयाहंप्रतिबोधितः ॥ युद्धं
चकृतवांस्ताभ्यांमल्ललीलामुपागतः ३४ नास्मिशक्तोविजेतुंतौततएतत्कृतंमया ॥ इदानींतद्वधोपायंवदमेकरुणानिधे ३५ ॥ भर्गउवाच ॥ विनाय
कमनर्च्यैवगतोसिरणभूमिकाम् ॥ शक्तिहीनश्चतेनासिसुभ्रूशंक्लेशवानपि ३६ गणेशंपूजयित्वैवव्रजयुद्धायमारिष ॥ सचतौमाययामोह्यवशनांप्राप
यिष्यति ३७ मत्प्रसादेनदुष्टौतौवधिष्यसिनसंशयः ॥ ॥ हरिरुवाच ॥ ॥ कथंविनायकंदेवमुपासेभर्गतद्वद ३८ ॥ ॥ ईश्वरउवाच ॥ ॥ उक्तग
णेश्वरस्यैवमंत्राणांसप्तकोटयः ॥ तत्रापिचमहामंत्रास्तेष्वप्येकाक्षरोमहान् ३९ षडक्षरश्चभगवंस्तयोरेकंवदामिते ॥ ततएकाक्षरंत्यक्त्वासिद्धारिचक्र
योगतः ४० ऋणंधनंशोधयित्वातंजगादषडक्षरम् ॥ महामंत्रंगणेशस्यसर्वसिद्धिप्रदंशुभम् ४१ अस्यानुष्ठानमात्रेणकार्यंतेसिद्धिमेष्यति ॥ ततोज
गामसहरिरनुष्ठानायसत्वरः ४२ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेमंत्रोपदेशोनामसप्तदशोध्याययः ॥ १७ ॥ सोमकांतउवाच ॥ ॥ कथंजजापसहरिः
कुत्रवामंत्रमुत्तमम् ॥ सिद्धिंचावापसकथंवदमेतत्साविस्तरम् १ ॥ ॥ भृगुरुवाच ॥ ॥ सिद्धिक्षेत्रमितिख्यातंभुविसिद्धिकरंपरम् ॥ तत्रगत्वामहाविष्णुस्तता
पपरमंतपः २ ध्यायन्विनायकंदेवंषडक्षरविधानतः ॥ आराधयामासतदाजित्वाखानिप्रयत्नतः ३ बाणास्त्रेणतुकृत्वैवपूर्वदिग्बंधमादृतः ॥ भूतशुद्धिंवि
धायैवप्राणानांस्थापनंतथा ४ कृत्वांतर्मातृकान्यासमाधारादिक्रमेणतु ॥ बहिश्चमातृकान्यासंमस्तकादिक्रमेणच ५ प्राणानायम्यमूलेनध्यात्वादे
वंगजाननम् ॥ आवाहनादिमुद्राभिःपूजयित्वामनोमयैः ६ द्रव्यैर्नानाविधैश्चैवषोडशैश्चोपचारकैः ॥ जजापपरमंमंत्रंविष्णुर्योगेश्वरेश्वरः ७ गतेवर्षश
तेकालेपरमात्मागणाधिपः ॥ प्रत्यक्षतांययौतस्यकोटिसूर्याग्निसंनिभः ८ अतिप्रसन्नहृदयोबभाषेगरुडध्वजम् ॥ याचस्वत्वंवरान्मत्तोयांस्त्वंकामय
सेहरे ९ ददामितानहंसर्वांस्तपसानेनतोषितः ॥ पूर्वमेवार्चितःस्यांचेद्विजयस्तेध्रुवंभवेत् १० ॥ हरिरुवाच ॥ ब्रह्मेशानाविंद्रमुख्याश्चदेवायंत्वांद्रष्टुं
नैवशक्तास्तपोभिः ॥ तंत्वांनानारूपमेकस्वरूपंपश्येव्यक्ताव्यक्तरूपंगणेशम् ११ त्वंयोणुभ्योणुस्वरूपोमहद्भ्योव्योमादिभ्यस्त्वंमहान्सत्वरूपः ॥ सृष्टिंचांतं
पालनंत्वंकरोषिवारंवारंप्राणिनांदैवयोगात् १२ सर्वस्यात्मासर्वगःसर्वशक्तिःसर्वव्यापीसर्वकर्तापरेशः ॥ सर्वद्रष्टासर्वसंहारकर्त्तापाताधाताविश्वनेतापिता
पि १३ एतादृशस्यतेदेवदर्शनान्ममसिद्धयः ॥ संभविष्यंतिसर्वत्रतथाप्येकंवदामिते १४ ममैवयोगनिद्रांतेश्रुतेर्मलसमुद्भवौ ॥ मधुकैटभौमहास
त्वौकंतौसादितुमुद्यतौ १५ ताभ्यामहंततोयुद्धंकृतवानबहुवत्सरम् ॥ ततःक्षीणबलस्त्वाहंशरणंसमुपागतः ॥ अतोयथातयोर्मृत्योवधःस्यात्तद्विचार्य

तान् १६ अन्येषामपिदैत्यानांजयेनयशउत्तमम् ॥ देहिमेपरमेशान भक्तिंतेह्यनपायिनीम् १७ ययामेकीर्तिरतुलात्रैलोक्यंपावयिष्यति ॥ ॥ ग णेशउवाच ॥ ॥ यद्यत्तेप्रार्थितंविष्णोतत्तत्तेभविताध्रुवम् १८ ॥ ॥ यशोबलंपराकीर्तिरविघ्नश्चभविष्यति ॥ ॥मुनिरुवाच ॥ ॥ एवमुक्त्वामहावि ष्णुंतत्रैवांतर्दधेविभुः १९ ततआनंदपूर्णोसौमेनेतावसुरौजितौ ॥ प्रासादंनिर्ममेतत्रस्फाटिकंभूरिरत्नकम् २० लसत्कांचनशिखरंचतुर्द्वारंसुशोभन म् ॥ प्रतिमांस्थापयामासगंडकीयोपलैःकृताम् २१ देवाश्चमुनयःसिद्धविनायकइतिप्रथाम् ॥ चक्रुस्त्रयतःसिद्धिःप्राप्तेयंहरिणाशुभा २२ सिद्धक्षेत्रंत तस्तत्तुपप्रथेभुविसर्वशः ॥ ततोजगामसहरिर्यत्रतौमधुकैटभौ २३ दृष्ट्वातौहरिमायांतंजहसतुर्निनिंदतुः ॥ मेवश्यामंमुखंतेद्यदर्शितंनोकुतःपुनः २४ आवांतुतेमहामुक्तिंदास्यावोतःपुनःकिल ॥ लघुतांचप्रयातोसिकिमर्थंरणमागतः २५ ॥ ॥ हरिरुवाच ॥ सहसादहतेसर्वंलघुरेवहुताशनः ॥ लघुदीपोम हद्वात्रौयथासंहरतेतमः २६ तथावामहमद्यैवशक्तोनाशायदुर्मदौ ॥ ॥ मुनिरुवाच ॥ ॥ इतितस्यवचःश्रुत्वातिक्रुद्धौमधुकैटभौ २७ सहसाजघ्नतुर्वि ष्णुंमुष्टिभ्यांहृदयेभृशम् ॥ ततःपुनर्मल्लयुद्धंतयोस्तस्यव्यवर्द्धत २८ युद्धाबहुदिनंताभ्यांवरंदातुंसमुत्सुकः ॥ उवाचश्लक्ष्णयावाचाहरिस्तौमधुकैटभौ २९ ममप्रहारान्हियुवांसहाथेबहुलाःसमाः ॥ युवयोःपुरुषार्थेनप्रीतोहंदैत्यपुंगवौ ३० युवयोःसदृशौनैवसंभूतौनभविष्यतः ॥ तावूचतुः ॥ ॥ अ स्मत्तस्त्वंवरान्ब्रूहिदास्यवस्तान्हरेबहून् ३१ आवांहितवयुद्धेनसंतुष्टौचभृशंत्वयि ॥ ॥ मुनिरुवाच ॥ ॥ तयोर्वचनमाकर्ण्यमायामोहितयोर्हरिः ॥ ३२ श्रुत्वाबभाणदैत्यौमेवरान्ददातुंसमुद्यतौ ॥ तदामेवध्यतांयातंवरएषवृतोमया ३३ तदासर्वंजलमयंदृष्ट्वातौमधुकैटभौ ॥ ऊचतुःपरमप्रीतौतवहस्ता न्मृतिःशुभा ३४ अंतेत्वच्चिंतनात्सद्योमुक्तिंयांतिसनातनीम्॥ यत्रनोर्वीजलमयीतत्रनौजहिमाधव ३५ सर्वंत्यजावोनोसत्यंसत्येसर्वंप्रतिष्ठितम्॥ मुनिरुवाच॥ तयोरित्थंवचःश्रुत्वाजघनेतौदधारह ३६ चक्रेणक्षुरधारेणचिच्छेदशिरसीतयोः ॥ ततोदेवामुनींद्रैश्चववर्षुःकुसुमानिच ३७ गंधर्वानृतुःसर्वेजगुरप्सरसांगणाः ॥ ततस्तुविष्णुरभ्येत्यब्रह्माणंपरमेष्ठिनम् ३८ कथयामासवृत्तांतंसर्वंहर्षविनिर्भरः ॥ हरिरुवाच ॥ यदाऽशक्तोविजेतुंतौतदाहंगिरिशृंगतः ३९ शंकरेणोपदिष्टोहंषड र्णंमंत्रमुत्तमम् ॥ आराधयमहंतेनदेवंविघ्नेश्वरंविभुम् ४० तेनदत्तावरामह्यंनानाकामफलप्रदाः ॥ तत्प्रभावान्मयादुष्टौनिहतौमधुकैटभौ ४१ स्तुतःसंपूजितः सोथतंदेवांतर्दधेविभुः ॥ विज्ञातोमहिमातस्यगणेशस्यमहात्मनः ४२ शंकरस्यप्रसादेनहनिष्येदैत्यदानवान् ॥ देवाश्चमुनयःसर्वेस्तुत्वादेवंगजाननम् ४३ ब्रह्मा णंशंकरंमांचययुःस्वंस्वंनिकेतनम् ॥ यइदंशृणुयान्नित्यंमहात्म्यंपापनाशनम् ४४ कस्मादपिभयंनस्याल्लभतेसार्वकामिकम् ४५ ॥इतिश्रीगणेशपुराणेउपा सनाखंडेसिद्धक्षेत्रोत्पत्तिकथनंनामाष्टादशोऽध्यायः १८॥ भृगुरुवाच ॥ श्रुत्वाख्यानमिदंव्यासःषडर्णविधिमप्यथ ॥ पुनरूचेविधातारंनातिपूर्णाशयोयथा ॥

१ सिद्धिक्षेत्रमित्यन्यत्र ।

दिव्यदेहोभवत्तदा ११ जहर्षकमलात्यक्वासवंदुःखंनिरीक्ष्यतम् ॥ मंजुलांसुखदांवाचमुच्चरंतंमुहुर्मुहुः १२ तर्कयामासकमलामणिमंत्रमहौषधैः ॥ अ
नुष्ठानैर्महाहोभैर्नसम्यग्योबभूवह १३ सकथंमारुतस्पर्शाद्समीचीनोभवत्सुतः ॥ अथतंपुरुषंक्काहंद्रक्ष्येदुष्कर्मनाशनम् १४ इत्युक्त्वासुतमालिंग्यसातस्थौ
विगतज्वरा ॥ तमादायगताभिक्षांकर्तुंतन्नगरेपुनः १५ नागराभोजयामासुरुभावामंत्रयसादरम् ॥ नानापक्कान्नशाकाद्यैःशर्कराघृतपायसैः १६ एवंप्रतिदि
नंतौतुभुक्त्वानुदिवसंमुदा ॥ आपतुर्धनवस्त्राणिनूतनानिवराणिच १७ तमपृच्छन्नागरिकःपितुस्तेनाममेवद ॥ कोदेशःकिंपुरंज्ञातिःकाचतेवृत्तमेवच १८
इतितद्गिरमाकर्ण्यदक्षोनामतमब्रवीत् ॥ ततोमातरमागम्यपितरंनगरंकुलम् १९ वृत्तंचपरिपप्रच्छततस्तंपुनरब्रवीत् ॥ कर्नाटेभानुनगरेवल्लभोमेपितामहा
न २० क्षत्रियोबलसंपन्नःख्यातोरिपुबलार्दनः ॥ तस्येयंकमलाजायासुतोहंदक्षसंज्ञकः २१ उत्पन्नोहंयदाब्रह्मन्नंधोबधिरएवच ॥ अनेकक्षतसंपन्नोमा
तात्यकुंतदोद्यता २२ पित्रानिषेधितासाचयत्नंबहुतथाकरोत् ॥ द्वादशाब्दंतपस्तप्त्वापितापुण्यंन्यवेदयत् २३ नचमेपाटवंदेहेपश्यतिस्मपितायदा ॥ त
दाविसर्जयामासमातरंमांचनागर २४ इतिसर्वंजगौतस्मैदक्षोमातृमुखोद्गतम् ॥ अत्राहंसुभगोजातोवायुस्पर्शेनकस्यचित् २५ श्रुत्वैवंतुगतेतास्मि
न्पुरुषेपुरवासिनि ॥ दक्षोजगामत्वरितोमातरंप्रतिनंदयन् २६ ततस्तन्नगरेतौद्वावुपदिष्टौद्विजन्मना ॥ गणेशाराधनविधौकरुणायुतचेतसा २७ ततःसा
कमलादक्षोनिर्वाणंपरमास्थितौ ॥ एकांगुष्टेनतपसागणेशाराधनेरतौ २८ देवनामचतुर्थ्यंतमोंकारपल्लवान्वितम् ॥ अष्टाक्षरंपरंमंत्रंजपंतौभक्तितत्प
रौ २९ वायुभक्षौशुष्कतनूनिरीक्ष्यभगवांस्तदा ॥ आविरासीत्तयोरग्रेकरुणाब्धिर्विनायकः ३० चतुर्भुजोमहाकायोवारणास्योतिसुंदरः ॥ अनेकसूर्य
संकाशोनिशिसूर्यइवोदितः ३१ रत्नकांचनमुक्तावन्मुकुटभ्राजिमस्तकः ॥ पीतकौशेयवसनोहाटकांगदभूषणः ३१ एकजानुनिपातेनसंनिविष्टोमहा
सने ॥ कटिसूत्रंकांचनीयंमुद्रिकांरत्नसंयुताम् ३३ महाहिंजठरेबिभ्रदेकदंतंगजार्धकम् ॥ एवंरूपंददृशतुःपुनश्चद्विजरूपिणम् ३४ जगादसद्विजस्तौ
तुभवन्निर्वाणतोषितः ॥ आगतोहंवरंदातुंवृणुतंमनसीप्सितम् ३५ विश्वामित्रउवाच ॥ एवंप्रसन्नेविघ्नेशप्रत्यक्षेद्विजरूपतः ॥ ननामपरयाभक्त्याभणद्वद्धां
जलिश्चतम् ३६ ॥ दक्षउवाच ॥ ॥ पूर्वजन्मकृतंपुण्यंफलितंमेद्विजोत्तम ॥ यन्मयादर्शिरूपंतेद्विविधंपरमंमहत् ३७ वैनायकंचवैप्रंचजन्ममेजनिसा
र्थकम् ॥ कारणानांपरंत्वंचकारणंछंदसामपि ३८ परंज्ञेयंपरंब्रह्मश्रुतिमृग्यंसनातनम् ॥ त्वमेवसाक्षीसर्वस्यसर्वस्यांतर्बहिस्तथा ३९ त्वमेवकर्त्ताकार्या
णांलघुस्थूलशरीरिणाम् ॥ नानारूप्येकरूपीत्वंनिरूपश्चनिराकृतिः ४० त्वमेवशंकरोविष्णुस्त्वमेवेंद्रोनलोऽर्यमा ॥ भूवायुखस्वरूपोपिजलसोमर्क्षरूपवा
न् ४१ विश्वकर्ताविश्वपाताविश्वसंहारकारकः ॥ चराचरगुरोर्गोप्ताज्ञानविज्ञानवानपि ४२ भूतंभाविभवच्चैवत्वमेवेंद्रियदेवताः ॥ कलाकाष्ठामुहूर्ताश्च

श्रीर्धृतिःकांतिरेवच ४३ त्वमेवसांख्ययोगश्चशास्त्राणिश्रुतिरेवच ॥ पुराणानिचतुःषष्टिकलाउपनिषत्तथा ४४ त्वमेवब्राह्मणोवैश्यःक्षत्रियःशूद्रएवच ॥
देशोविदेशस्त्वंक्षेत्रंपुण्यक्षेत्राणियान्युत ४५ त्वंप्रमेयोप्रमेयश्चयोगिनांज्ञानगोचरः ॥ त्वमेवस्वर्गःपातालंवनान्युपवनानिच ४६ ओषध्योथलतावृक्ष
कंदमूलफलानिच ॥ अंडजाजारजाजीवाःस्वेदजाउद्भिजाअपि ४७ कामःक्रोधःक्षुधालोभोदंभोदर्पोदयाक्षमा ॥ निद्रातंद्रीविलासश्चहर्षःशोकस्त्वमेव
च ४८ ॥ ॥ विश्वामित्रउवाच ॥ ॥ इतिदक्षवचःश्रुत्वासुप्रसन्नोविनायकः ॥ मेघगंभीरयावाचास्मयन्निवजगादतम् ४९ गजाननउवाच ॥ प्रीतोहंतेम
हाभागस्तुत्यागंभीरयानया ॥ वरंदातुंसमुत्कंठस्तथापिनददामिते ५० यद्यहंवरदःस्यांतेक्रुध्येद्भक्तोममोपरि ॥ सएवदास्यतिवरंयदंगस्यप्रभंजनात् ५१
दिव्यदेहमनुप्राप्तश्चक्षुश्रोत्रसमन्वितः ॥ जातस्त्वंतस्यनामापिवदामिमुद्गलेतिच ५२ सध्यातमात्रोविप्रेशःस्वरूपंदर्शयिष्यति ॥ यान्यान्कामयसेका
मान्सतेसर्वान्प्रदास्यति ५३ इत्युक्त्वापरमात्मासौतत्रैवांतरधीयत ॥ तस्मिन्नंतर्हितेदक्षोरुरोदभृशदुःखितः ५४ दरिद्रेणनिधौलब्धेगतेतस्मिन्य
थैवसः ॥ गतायांगविवत्सोवारोरवीतियथाभृशम् ५५ मुंचन्नश्रूणिनेत्राभ्यांपपातधरणीतले ॥ क्वगतःक्वगतइतिमुहुर्जल्पन्विनायकः ५५ इतिश्रीगणेशपु
राणेउपासनाकांडेदक्षस्तुतिर्नामविंशतितमोऽध्यायः ॥ २० ॥ ७ ॥ विश्वामित्रउवाच ॥ इतस्ततोभ्रमन्धावन्वल्लभस्यात्मजस्तदा ॥ नाविंदगतंवस्त्रंभूषणं
चातिविह्वलः १ पप्रच्छब्राह्मणान्मार्गेवृक्षांश्चैवविनायकम् ॥ विनायकोगतःकुत्रक्वचिद्दृष्टोगदंतुमे २ सएवंभ्रांतहृदयोभ्रमच्चक्षुर्नृपोत्तम ॥ निपपातधरापृष्ठे
क्षणंविगतचेतनः ३ एतस्मिन्नंतरेस्वप्नेपश्यद्ब्राह्मणमग्रतः ॥ दत्तंतवेप्सितंबालमुद्गलेनमयाहितत् ४ यत्त्वयायाचितंपूर्वंविघ्नशाद्दृष्टिगोचरात् ॥ इत्युक्त्वा
प्रस्थितेतस्मिन्ब्राह्मणेनृपसत्तम ५ सुप्तोत्थितइवप्रायोदक्षोहृष्टमनाभवत् ॥ कस्मैचित्परिपप्रच्छत्वरितायद्विजातये ६ अस्तिकंदर्शिततेनबहुशिष्योप
शोभितम् ॥ मुद्गलस्यातिभक्तस्यगजाननरतस्यच ॥ आश्रमंपरमंदिव्यंसर्वसत्वाभयप्रदम् ७ मुद्गलंमनसाध्यायन्भ्रमन्यातस्तदाश्रमम् ॥ नानाश्चर्ययुतंरम्य
मलकानंदनातिगम् ८ ददर्शमुद्गलंतत्रपरार्ध्यासनगंद्विजम् ॥ वेदवेदांगतत्वज्ञंसर्वशास्त्रविशारदम् ९ योगाभ्यासबलैर्नानारूपिणंसूर्यतेजसम् ॥ वैनायकीं
महामूर्तिरत्नकांचननिर्मिताम् १० चतुर्भुजांत्रिनयनांनानालंकारशोभिनीम् ॥ उपचारैःषोडषभिःपूजयंतंविधानतः ११ ननामदक्षस्तंदृष्ट्वादंडवत्पृथिवी
तले ॥ मुंचन्नश्रूणिनेत्राभ्यांनिश्वसंश्चमुहुर्मुहुः १२ ॥ विश्वामित्रउवाच ॥ पप्रच्छमुद्गलस्तंतुकस्त्वंकस्मादिहागतः ॥ नुदाभिदुःखंकिंतेस्तिवदसर्वमशेषतः १३
एवंविप्रवचःश्रुत्वाकमलानंदनस्तदा ॥ सावधानमनाभूत्वाजगादद्विजपुंगवम् १४ ॥ दक्षउवाच ॥ सत्यमेववदेब्रह्मन्अभिप्रायंतवांतिके ॥ कर्णाटदेशेराजा
भून्नगरेभानुसंज्ञके १५ वल्लभोनामनीतिज्ञोज्ञानीदातादयान्वितः ॥ तस्यपत्नीतुकमलाजनयामासमांयदा १६ तदादुर्गाधिक्षतयुक्शोणितस्रावनासिकः ॥
अंधःकुब्जःकर्णहीनःशब्दहीनःश्वसन्बहु १७ अभवन्नागरादृष्ट्वात्यजेनामितिचाब्रुवन् ॥ पितामेद्वादशाब्दानिनानायत्नमथाकरोत् १८ शरीरपाटवार्थंमेना

लभत्तन्महेश्वराव ॥ उपायंसततोमांचमातरंकमलांचमे १९ बहिर्निष्कासयामासनिर्दयेनांतरात्मना ॥ ततोमेजननीखेदादटमानापुरंपुरम् २० आगत्य कौंडिन्यपुरमयासहक्षुधार्दिता ॥ भिक्षाटनेक्रियमाणेपूर्वपुण्यप्रभावतः २१ अभवद्दर्शनंतेवामंघस्येवयथादृशिः ॥ तवगात्रभवाद्वायोःस्पर्शाद्दोषागतामम २२ रघुनाथांघ्रिसंस्पर्शादहल्यायायथापुरा ॥ दिव्यदेहंसमापन्नःप्रसादात्तवसुव्रत २३ नमयाविदितंकिंचिज्जनन्यामेनिवेदितम् ॥ अहंचाविस्मितोभूत्वानिश्चयंकृतवान्हृदि २४ यदंगवायुस्पर्शेनदिव्यदेहमहंगतः ॥ तद्दर्शनंयदास्यान्मेतदादेहंधराम्यहम् २५ एवंभ्रमन्बहुदिनंततोसौकरुणानिधिः ॥ आविरासीन्मदपुरतःकोटिसूर्यसमप्रभः २६ उभयोस्तपसातुष्टोदेवदेवोगजाननः ॥ तंदृष्ट्वाकमलाकामान्संप्राप्तामनसीप्सितान् २७ ततोमामब्रवीद्देवःप्रसन्नोमंजुलांगिरम् ॥ यदर्थंनियमंकृत्वाभ्रमन्खेदमुपागतः २८ सोहंतेदर्शनंयातोमुद्गलोब्राह्मणोत्तमः ॥ श्रुत्वातद्वचनंहृष्टमभवन्मानसंमम २९ ततोगजाननमहंस्तुतवान्विविधैःस्तवैः ॥ उवाचसुप्रसन्नात्मावरंवृणुमहामते ३० अहंचाकथयंतस्मैयद्यन्मेमनसीप्सितम् ॥ ततोब्राह्मणरूपंतत्यक्त्वान्यद्रूपमादधे ३१ चतुर्भुजंमहाकायं मुकुटाटोपमस्तकम् ॥ परशुंकमलंमालांमोदकानावहत्करैः ३२ दिव्यांबरधरंभ्राजद्विषाणकरपुष्करम् ॥ कुंडलेप्रावहच्छ्रुत्योःसूर्यबिंबइवापरे ३३ दिव्यालंकारसंयुक्तंभुजंगवलयोदरम् ॥ देवर्षिगंधर्वगणैःकिन्नरैरुपशोभितम् ३४ ततआनंदपूर्णोहंदृष्ट्वारूपंतथाभवम् ॥ पूर्णचंद्रंयथादृष्ट्वापूर्णोभवतिवारिधिः ॥ तेनोक्तंमुद्गलःसर्वान्कामांस्तेपरिपूर्यति ३५ तदंतर्हितंरूपंदृष्ट्यावन्नसादरम् ॥ यथास्वप्नगतंसर्वंजागरेनैवदृश्यते ३६ ततोहंनितरांखिन्नोन्यपतंभुविमूर्छितः ॥ प्रतिलभ्यततःसंज्ञांवरंवृण्वितिसंस्मरन् ३७ ययाचेदेवदेवेशंसर्वव्यापिनमीश्वरम् ॥ गृहेमेसुस्थिरालक्ष्मीर्भक्तिर्मेतादृशीतव ३८ दृष्टश्चेत्पूर्वपुण्येनद्वयमेतत्प्रदीयताम्॥ततोहंश्रुतवान्दत्तामितिवाचंनभोगताम् ३८ ततोहृष्टमनाविप्रतवसान्निध्यमागतः॥मुद्गलस्त्वंद्विपास्योसौद्विपास्यस्त्वंसमुद्गलः४१इतिमेमनासिस्पष्टंभातिसर्वंगजाननः ॥ भृगुरुवाच ॥ इतितद्वचनंश्रुत्वामुद्गलोवाक्यमब्रवीत् ४१ सभाग्यःकृतकृत्योसिभक्तिमान्कमलासुत ॥ महिमातवभक्तेर्हिवक्तुंशक्योनकेनचित् ४२ तपामिसुदृढंचाहंदशवर्षशतंतपः ॥ नमएतादृशोदेवोदृष्टआसीत्कदाचन ४३ यःसर्वजगतांनाथश्चराचरगुरोर्गुरुः ॥ योरजःसत्वतमसांनेतानित्यंगुणाश्रयः ४४ योब्रह्मशिवविष्णूनांशरीराणिकरोतिहि ॥ भूतानांचविभूतीनांमात्रेंद्रियधियामपि ४५ यंनदेवाविदुःसम्यङ्नवेदानर्षयोपिच॥एवंगजाननंत्वंहिप्रत्यक्षंदृष्टवान्स्फुटम् ४२ अहंत्वच्चरणौवंदेयतस्त्वंभक्तिमान्परः॥ततःपरस्परंतौतुनेमतुश्चालिंलिंगतुः ४७ गुरुबंधूचिरंकालमेकचित्तौसमागतौ॥ततएकाक्षरंमंत्रंसजपध्यानपूर्वकम् ४८ मुद्गलोराजपुत्रायनम्रायोपदिदेशह ॥ उवाचचैनंभूयोपिमंत्रस्यास्यदिनेदिने ४९ अनुष्ठानंकुरुष्वत्वंप्रसन्नस्तेभविष्यति ॥ गजाननोददेवकामान्मनसावांछितान्त्वया ५० एनंचेत्त्यजसेमंत्रंसर्वशोनाशमेष्यसि ॥ यद्यस्यभक्तिंसुचिरंलोकेस्मिन्विचरिष्यसि ५१ इंद्रादिलोकपालानांगणोवश्यत्वमेष्यति ॥ इहभुक्त्वाखिलान्भोगानंतेमोक्षमवाप्स्यसि ५२ इतिश्रीगणेशपुराणेउपासनाखंडेमंत्रोपदेशवर्णनंनामैकविंशतितमोध्यायः ॥२१॥

राजोवाच ॥ ॥ आश्चर्यभूतंकथितंदक्षपुत्रस्यचेष्टितम् ॥ विस्मयोमेमहांस्तत्रसंजातोमुनिसत्तम १ बंधःकुब्जःस्रवद्रक्तःपूतिगंधसमन्वितः ॥ वाचाविहीनोमेध्यश्चश्वासमात्रावशेषितः २ कथंमुद्गलदेहोत्थवायुनादिव्यदेहभाक् ॥ संजातःकेनपुण्येनमुक्तोवापातकात्कुतः ३ दिव्यवर्षसहस्रंयस्तपापपरमंतपः ॥ कथंतस्याभवद्ब्रह्मंस्तादृशंदर्शनंदेवकांक्षितम् ४ कथंवल्लभपुत्रायदेवदेवइभाननः ॥ प्रत्यक्षोभूद्विनाक्लेशैःसचकःपूर्वजन्मनि ५ एतत्संशयजातंमेनुदसर्वज्ञतेनमः ॥ नतृप्यामिपिबन्नित्यंगजाननकथामृतम् ६ ॥ ॥ विश्वामित्रउवाच ॥ ॥ सम्यक्पृष्टंत्वयाराजन्संशयच्छेदनायते ॥ वदामिनिखिलंसम्यक्शृणुष्वैकमनानृप ७ सिंधुदेशेतिविख्यातापल्लीनाम्नाभवत्पुरी ॥ तस्यामासीद्धनीवैश्यःश्रेष्ठःकल्याणसंज्ञकः ८ वदान्यःकुशलोधीमान्द्विजदेवपरायणः ॥ इंदुमतीतिविख्यातापत्नीतस्यशुभानना ९ पतिव्रतापतिप्राणापतिवाक्यपरायणा ॥ तयोःकालेनसंजातोगुणवान्पुत्रउत्तमः १० कल्याणःप्रददौधेनूर्वस्त्रालंकरणानिच ॥ ब्राह्मणेभ्योथरत्नानिकांचनंभूरिदक्षिणाम् ११ ज्योतिर्विद्भिर्निगदितंनामचक्रेसुतस्यसः ॥ बल्लालइतिविख्यातंबलवत्त्वाच्छुभंतदा १२ सचकालेनमहतावयस्यैश्चसमन्वितः ॥ देवपूजारतोनित्यंग्रामाद्बहिरयान्मुदा १३ एकदातेवनंयाताबल्लालप्रमुखाःसुताः ॥ नानाक्रीडारताःस्नाताउपलंस्थाप्यसुंदरम् १४ गणेशबुद्ध्यासंपूज्यदूर्वांकुरसुपल्लवैः ॥ केचिद्ध्यानरतास्तस्यनामजाप्यंप्रचक्रिरे १५ केचिच्चनृतुस्तत्रयथेष्टंदेवभक्तितः ॥ केचिच्चगानकुशलाजगुर्देवस्यतुष्टये १६ केचित्काष्ठैःपल्लवैश्चमंडपंचक्रुरोजसा ॥ केचिद्वित्तिपरीवेषंकेचिद्प्रासादमुत्तमम् १७ केचिन्मानसपूजाभिःकेचित्पुष्पलताादिभिः ॥ धूपंदीपंचनैवेद्यंफलतांबूलदक्षिणाः १८ निवेद्यपुपुजुस्तस्मैमुदापरमयायुताः ॥ केचिच्चपंडिताभूत्वापुराणान्यबुवंस्तथा १९ व्याचक्रुर्धर्मशास्त्राणिग्रंथानन्यांश्चकेचन ॥ एवंदेवरताःसर्वेनिन्युर्वैदिवसान्बहून् २० नक्षुधांनतृषांकोपिजानन्देवस्यभक्तितः ॥ एकदाजनकास्तेषांकल्याणवैश्यमन्वयुः ॥ २१ अब्रुवन्रोषिताःसर्वेस्वबल्लालंनिवारय ॥ शिशून्सर्वान्समाहूयवनंयातिदिनेदिने २२ नायांतिप्रातराशायनमध्यान्हेनिशामुखे ॥ क्रुशानोबालकाजाताःस्वसुतंशिक्षयाधुना २३ नोचेद्वयंनिबद्ध्वैनंताडयामइतःपरम् ॥ पुरांधिपमथाभ्येत्यत्वांबाहिःकरवामहि २४ इतितेषांवचःश्रुत्वाश्रुतपूर्वंकदाचन ॥ रोषावेशात्सकल्याणोजपाकुसुमलोचनः २५ महांतंदंडमादायताडनार्थंसुनंययौ ॥ दंडाघातेनगत्वैवमंडपंप्रबभंजह २६ बालकाश्चततःसर्वेजग्मुर्दशदिशोनृप ॥ एकएवसबल्लालोदृढभक्त्यास्थिरोभवत् २७ दृढमुष्ट्यासतंधृत्वादंडेनाताडयद्भृशम् ॥ यथासर्वशरीरात्तुधाराःशोणितसंभवाः २८ प्रादुरासन्गारिधारावर्षाकालेयथागिरेः ॥ चिक्षेपदूरतःपश्चाद्देवंसिंदूरसुंदरम् २९बबंधतंसुतंवृक्षेवल्लीपाशशतैर्दृढम्॥ पुत्रस्नेहंपरित्यज्ययमदूतइवापरः ३०मुक्तोदंतैर्नहस्ताभ्यांपादाभ्यांसयथाभवेत् ॥ उवाचपश्चात्तंपुत्रंदेवस्त्वांमोचयिष्यति ३१ सदाताभोजनंपानगोपनंचकरिष्यति ॥ यदिचेद्गृहमायासितदासत्यंमरिष्यसि ॥

१ सर्वानुपाहृत्य इतिपाठान्तरम् ।

३२ ॥ ॥ मुनिरुवाच ॥ ॥ विभज्यदेवालयमाशुयातःकल्याणवैश्योतिरुषानिविष्टः ॥ स्वमंदिरंबध्यवनेस्वपुत्रंदैवस्ययोगादभवत्सुदुष्टः ३३ तस्मिन्प्र
यातेसचवैश्यपुत्रःशुशोचदेवंमनसाविचिंत्य ॥ विघ्नारिरित्येवकथंनुदेवनामाभवत्सर्वजनेषुगीतम् ॥ ३४ ॥ दुष्टांश्चविघ्नाननाशयेस्त्वंदुष्टांतकत्वेनकथंप्र
सिद्धः ॥ शेषोवन्निवासवितायदीप्तिंचंद्रोमृतंवन्हिरथोष्णतांच ३५ त्यजेत्स्वभक्तान्नचसत्यजेथावेदेषुशास्त्रेषुकथंप्रसिद्धिः ॥ एवंविलप्यायनिजंशशापक
ल्याणसंज्ञांपितरंसुदुष्टम् ३७ येनेदंममविध्वस्तंदेवालयमनुत्तमम् ॥ गणेशमूर्त्तिंविक्षेपंताडनंचममाकरोत् ३७ सचांधोबधिरःकुब्जोमूकोभवातिनि
श्चितम् ॥ यदिमेसुदृढाभक्तिर्द्विरदाननउत्तमा ३८ तदोक्तंममसत्यंस्यात्तस्यसर्वंमयोदितम् ॥ नबद्धेभक्तिमनसीशक्तोसौदेहबंधने ३९ अनन्यबुद्ध्यापरि
चिंत्यदेवंत्यजामिदेहंविजनेवनेस्मिन् ॥ पलायनंनैवकृतंयदैवतदैवदेहोर्पितएषदेवे ४० तस्यैवंनिश्चयंबुद्ध्वाप्रादुरासीद्गजाननः ॥ ब्राह्मणस्यस्वरूपेणब
ल्लालस्यप्रभावतः ४१ यथानिशातमोपायेश्रीसूर्यउदयाचले ॥ तथैवबंधनान्यस्यतेजसाशिथिलानिच ४२ जातानिततएनंसनमश्चक्रेथदंडवत् ॥ देह
स्यचारुताजातानक्षतंनचशोणितम् ४३ ज्ञानंचनिर्मलंजातंदेवदेवस्यदर्शनात् ॥ तुष्टावविविधैर्वाक्यैर्यथामतिगजाननम् ४४ ॥ ॥ बल्लालउवाच ॥
त्वमेवमातासिपितासिबंधुस्त्वमेवकर्त्तासिचराचरस्य ॥ निर्मासिदुष्टांश्चखलांश्चसाधून्योनौवियोनौविनियुंक्ष्यथापि ४५ त्वमेवदिक्चक्रनभोधराब्धिगि
रींद्रकालानलवायुरूपः ॥ खींदुताराग्रहलोकपालवर्णेंद्रियार्थौषधिधातुरूपः ४६ ॥ ॥ मुनिरुवाच ॥ ॥ इतिस्तुतिंसमाकर्ण्यसुप्रसन्नोगजाननः ॥ आ
लिंग्यनिजभक्तंतमुवाचघननिस्वनः ४७ ॥ ॥ गजाननउवाच ॥ ॥ प्रासादोयेनभग्नोमेनरकेसपतिष्यति ॥ तवशापोपितस्यैवंभविष्यतिममाज्ञया ४८
अंधोथबधिरःकुब्जोमूकोसृक्स्रावसंयुतः ॥ ममशापंसमासाद्यभविष्यतिनसंशयः ४९ पितासमातृकंचैनंकरिष्यतिगृहाद्बहिः ॥ अन्यत्तेवांछितंब्रूहि
दुष्प्रापमपितेदद्दे ५० ॥ ॥ मुनिरुवाच ॥ ॥ बल्लालोथाब्रवीद्देवंत्वयिभक्तिर्दृढास्तुमे ॥ अस्मिन्क्षेत्रेस्थिरोभूत्वालोकान्रक्षस्वविघ्नत. ५१ गणेशउवाच ॥
त्वन्नामपूर्वंमन्नामभविष्यतिजनेशुभम् ॥ बल्लविनायकेतिनगरेसुप्रतिष्ठितम् ५२ मयिचित्तंस्थिरंतेस्याद्भक्तिरव्यभिचारिणी ॥ यात्रांममकरिष्यंतिन
गरेपल्लिसंज्ञके ५३ भाद्रशुक्लचतुर्थ्यांयेतेषांकामान्ददाम्यहम् ५४ भृगुरुवाच ॥ इतिदत्वावरंदेवस्तत्रैवांतरधीयत ॥ ततोविनायकंस्थाप्यबल्लालोब्राह्मणैः
सह ५५ प्रासादंकारयामासनानाशोभासमन्वितम् ॥ ॥ विश्वामित्रउवाच ॥ ॥ बल्लालविनायकेतिकथितंतेकथानकम् ५६ यच्छ्रुत्वासर्वपापेभ्योमुक्तः
कामानवाप्नुयात् ५७ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेबल्लालविनायककथनंनामद्वाविंशोध्यायः ॥ २२ ॥ ॥ भृगुरुवाच ॥ ॥ विश्वामित्रवचः
श्रुत्वाभीमःपप्रच्छतंपुनः ॥ वैश्याचरितवार्तायाःश्रवणेपरमोत्सुकः १ सोमकान्तनृपश्रेष्ठकथयामिशृणुष्वतत् ॥ ॥ भीमउवाच ॥ ॥ श्रुतंदक्षस्यचरितं
विश्रांतंममानसम् २ कथंकल्याणवैश्यस्यगतिरासीद्वदस्वताम् ॥ ॥ विश्वामित्रउवाच ॥ शृणुष्वैकमनाभीमकथामेतांवदामिते ३ बल्लालशापा

त्कल्याणदेहात्सुस्रावशाणतम् ॥ असंख्यक्षतसंयुक्तःस्रावोबाधिर्यमंधता ४ मूकतापूतिगंधित्वंजाततंस्यदुरात्मनः ॥ ददर्शेंदुमतीतस्यदशामाकस्मिकीं ततः ५ किमिदंकिमिदंकस्माज्जातमेवंशुशोचतम् ॥ ज्ञानिनोस्यवदान्यस्यदेवद्विजरतस्यच ६ धर्मशास्त्रार्थनिष्ठस्यस्वदारपरितोषिणः ॥ अवस्थेयं कथंजाताममभर्तुर्निरेनसः ७ ॥ मुनिरुवाच ॥ एवंविलप्यबहुधानिश्वसंतीपुनःपुनः ८ तेनबद्धंवनेपुत्रंनिशम्यरुदतीमुहुः ॥ पौरैःसहययौतत्र यत्रबद्धोवनेसुतः ९ तत्रदेवालयंदेवंददर्शगणनायकम् १० चतुर्भुजंत्रिनयनंसिंदूरारुणविग्रहम् ॥ बल्लालंचसुतंतत्रपूजयंतंगजाननम् ११ मुक्तं निर्व्रणमव्यंगंनिरीक्ष्यपुरवासिनः ॥ उवाचेंदुमतीक्रुद्धाभर्त्सयंतीपुनःपुनः १२ कथंप्रतारितातथ्यवादिभिर्भर्तृसन्निधौ ॥ तादृशंतंपरित्यज्यपुत्रस्नेहादिहागता १३ पश्यंतुदेवभक्तिंमेपुत्रंकुर्वंतमीदृशीम् ॥ ॥ मुनिरुवाच ॥ ॥ विस्मिताःसर्वएवैतेनकिंचित्प्रोचुरण्वपि १४ केचिदूचुर्महाभक्तेर्महिमाकेनगम्यते ॥ वीक्ष्यसिंदूररक्तांगंरक्तचंदनचर्चितम् १५ रक्तांबररक्तपुष्पमालाभिरुपशोभितम् ॥ निर्ममंनिरहंकारमशुंडमिवविघ्नपम् १६ निरीक्ष्यतादृशंपुत्रंत्यक्त्वाशोकंननंदसा ॥ आलिलिंगतदातंतुस्नेहस्नुतपयोधरा १७ आहतंस्वगृहंयावःपितुस्तेव्यसनंमहत् ॥ उत्थितंतत्रकिंचित्तंकुरूपायंमहामते १८ आवांधन्यतमौलोकेययोःपुत्रस्त्वमीदृशः ॥ सर्वांगक्षतवान्रक्तस्राववान्पूतिगंधवान् १९ श्यामास्यःकृशतायुक्तोबधिरोथांधएव च ॥ एवंविधःपितातेस्तितंनिवेदितुमागता २० पितृधर्मेणतेनत्वंताडितोनर्थकृद्यदि ॥ तत्रापराधोनैवास्तिश्रुतिस्मृतिपुराणतः २१ पुत्रधर्मान्निरीक्षस्वकुर्वारोग्यविचारणम् ॥ त्वयाश्लाघ्यतमोलोकेपितातेपितृवत्सल २२ मातापितृवचःकार्यंसत्पुत्रेणयशस्विना ॥ पूजनंचतयोःकार्यंपोषणंपालनंतथा २३ औषधान्मंत्रतश्चापिदेवताप्रार्थनादपि ॥ उपायंकुरुपुत्रत्वंमायिदृष्टिंनिवेशय २४ यशस्तेभवितालोकेसौभाग्यंममबालक ॥ इतितस्यावचःश्रुत्वाबल्लालोवाक्यमब्रवीत् २५ ॥ बल्लालउवाच ॥ ॥ कस्यमातापिताकस्यकस्यपुत्रोथवासुत्वद् ॥ विघ्नराजकृतंसर्वमानुपंग्यखिलंस्मृतम् ॥ २६ तस्मान्ममपिताभद्रेमातादेवोविनायकः ॥ योयथाकुरुतेकर्मसतथाफलमश्नुते २७ मयासमर्पितोजीवोदेवदेवेगजानने ॥ तेनजीवस्तथाज्ञानंममदत्तंसुभक्तितः २७ प्रासादभंजनाद्देवक्षेपणात्ताडनान्मम ॥ विनायकातिभक्तस्यतथाप्राप्तंफलंशुभे २८ विचार्यमाणेनत्वंमेमातावासपितापिच ॥ सर्वस्यहिपितादेवोमातादेवोगजाननः २९ सएवज्ञानदस्त्रातासंहर्त्ताकालरूपवान् ॥ सर्वस्वरूपोदेवेंद्रोब्रह्मविष्णुशिवात्मकः ३० वृथामेयेनदुष्टेनताडनंनिर्घृणेनच ॥ कृतंदेवस्यविक्षेपःप्रासादस्यापिभंजनम् ३१ तस्यास्यदर्शनेदोषःपतितस्यमहान्भवेत् ॥ स्नेहंत्यक्त्वामदीयंत्वंपतिंस्वंपरिषेवय ३२ ॥ विश्वामित्रउवाच ॥ इतिपुत्रवचःश्रुत्वासातंपुनरथाब्रवीत् ॥ मातोवाच ॥ कृपयानुग्रहात्स्नेहादुच्छापंवक्तुमर्हसि ३३ ॥ पुत्रउवाच ॥ भवांतरेस्यजननीभवितासिवरार्थिनी ॥ अयमे

१ पुत्रोतिभक्तिमान् इ०पाठान्तरम् ।

तादृशःपुत्रोभवितातवसुव्रते ३४ कल्याणनामाभवितावल्लभःक्षत्रियर्षभः ॥ कमलेतिचविख्यातानाम्नात्वंचभविष्यसि ३५ दक्षइत्येवपुत्रस्यनामख्यातंभविष्यति ॥ ततोद्वादशवर्षाणिवल्लभस्तप्स्यतेतपः ३६ अंधतांबधिरत्वंचक्षतानिमूकतांतथा ॥ व्यपनेतुंतुदक्षस्यपरंनियममास्थितः ३७ अलब्ध्वासफलंतस्मा त्सपुत्रांत्वांशुभानने ॥ निराकरिष्यतेगेहाद्विदेशस्थाभविष्यसि ३८ कस्यचिद्द्विजवर्यस्यद्विरदाननचेतसः ॥ दैवात्स्पर्शेनगद्रेतेसम्यक्पुत्रोभविष्यति ३९ तत्रैवगणनाथस्यदर्शनंचभविष्यति ॥ तदासदिव्यदेहत्वंप्राप्स्यतेद्विरदाननात् ४० इतिसर्वंसमाख्यातमुच्छापकारणंशुभे ॥ भविष्यंकथितंतेद्ययथेष्टंगम्यतांत्वया ४१ ॥ विश्वामित्रउवाच ॥ एवंनिराकृतातेनजननीनिरगात्ततः ॥ दुःखशोकसमायुक्तार्किंचिद्धर्षयुतापिच ४२ सचारुरोहतद्दिव्यंविमानं भक्तिभावितम् ॥ गजाननेनविहितंबल्लालोथागमद्दिवम् ४३ इतितेसर्वमाख्यातंयत्पृष्टोहमिहत्वया ॥ यागतिस्तेनवैश्येनसंप्राप्ताजन्मनोर्द्वयोः ४४ यथाजगादबल्लालःसर्वंतदभवत्तदा ॥ साजज्ञेकमलाभूत्वासोभवत्क्षत्रियर्षभः ॥ ४५ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेभविष्यकथनंनामत्रयोविंशोध्यायः ॥ २३ ॥ ॥ भीमउवाच ॥ ॥ दक्षेणमुनिशार्दूलराजपुत्रेणधीमता ॥ अनुष्ठानंकृतंकुत्रकथंवाकस्यवामुने १ एतद्विस्तार्यब्रूहित्वंशृण्वंस्तृप्याम्यहंनच ॥ विश्वामित्रउवाच ॥ अविदूरेपुरस्तस्याःकौंडिन्यस्यमहावनम् २ रम्यंनानावृक्षयुतंनानाश्वापदसंकुलम् ॥ नानापक्षिगणैर्युक्तंलताजालविराजितम् ३ सन्मनोनिर्मलपयःसरोवापीविराजितम् ॥ जीर्णप्रासादमध्यस्थगजाननविराजितम् ४ तत्रस्थित्वातपश्चक्रेगजाननसुतोषकम् ॥ मुद्गलेनोपदिष्टनमंत्रेणैकाक्षरेणसः ५ तोषयामासतंदेववर्षैर्द्वादशसंमितैः ॥ स्नानैर्वस्त्रैःसुगंधैश्चमाल्यैर्धूपैश्चदीपकैः ६ नैवेद्यंकंदमूलैश्चभक्षणीयैरकल्पयत् ॥ मनसाकल्पयामासदक्षिणांक्षत्रियर्षभ· ७ एवंतस्यागमन्भूपदिनानित्वेकविंशतिः ॥ ततःप्रभातसमयेस्वयमेवंददर्शसः ८ एकंमहामतंगंचसिंदूराक्तंसुशोभितम् ॥ मदस्राविसुगंडाभ्यांसुंदरंगिरिसन्निभम् ९ चारुप्रसन्नवदनंदंतशोभिमहत्करम् ॥ भ्रमरालिसमाकीर्णंगजाननमिवापरम् ॥ तेनतत्कंठदेशेतुरत्नमालासमर्पिता १० ततउत्थाप्यतंस्कंधेस्थापयामासदंतिराट् ॥ सदंतीनगरंयातःपताकाध्वजशोभितम् ११ ततःसप्रतिबुद्धःसन्नपप्रच्छजननींनिजां ॥ कमलेवदमातस्त्वमस्याभिप्रायमद्यमे १२ आरोहणंगजस्कंधेशुभंवायदिवाशुभम् ॥ ॥ कमलोवाच ॥ धन्यस्त्वमसिदृष्टोयंगजरूपीविनायकः १३ आरोहणफलंराज्यप्राप्तिरेवनसंशयः ॥ ॥ दक्षउवाच ॥ यदिराज्यस्यप्राप्तिःस्यात्तदातुभ्यंददाम्यहम् १४ नरयानंतथाग्रामान्दीपिकांमौक्तिकस्रजम् ॥ धर्मंचकारयिष्यामिगवाष्टापददानतः १५ व्रतानिनियमांश्चैवदानान्यन्यान्यनेकशः ॥ ॥ मुनिरुवाच ॥ श्रुत्वेत्थंकमलाहृष्टाजगादतनयंप्रति १६ त्वयिराज्यस्थितेपुत्रपरमानंदतामम ॥ सद्धर्मेरमतांचेतःसतःसारभृतस्तव ॥ आयुष्यंविपुलंतेस्तुद्विजदेवार्चनेरतिः १७ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेस्व

१ गच्छेदिति महाभक्त्या परंनियममास्थिताः इ० पाठान्तरम् ।

प्रकथनंनामचतुर्विंशोध्यायः २४ ॥ ॥ विश्वामित्रउवाच ॥ शृणुराजन्महाश्चर्यंयदैवकालकृतंशुभम् ॥ कौंडिन्येनगरेराजाचंद्रसेनोमहामतिः १ स्वकर्मप
रिपाकेननिधनंकालयोगतः ॥ अगमद्दिव्ययानेनधर्मबाहुल्यतोदिवम् २ तच्चनागरिकाःश्रुत्वाहाहाकारंप्रचक्रिरे ॥ धावमानाययुस्तत्रत्यक्त्वाकार्याण्यनेक
शः ३ शिरांसिचविनिघ्नंतःपाणिभिःशोककर्षिताः ॥ चस्खलुश्चपतंतश्चदद्दशुःप्रेतभूपतिम् ४ नेमुःपादौप्रगृह्यैवदुःखमोहवशंगताः ॥ केचिद्धस्तंगृहीत्वै
वस्वस्वमूर्ध्निन्यवेशयन् ५ रुरुदुःसुस्वरंकेचित्पाणिपृष्ठमुखस्वनाः ॥ मृताइवनिपेतुश्चस्नेहातिशयतोपरे ६ तस्यपत्नीतुसुलभारुरोदकरुणस्वरा ॥ पाणि
भ्यांनिघ्नतीस्वीयंहृदयंभृशदुःखिता ७ विकीर्णभूषणामूर्छामागतापतिताभुवि ॥ समानव्यसनाभिःसापुरस्त्रीभिर्धृतातदा ८ विललापतदाकांताचंद्र
सेनस्यसुंदरी ॥ निर्लज्जानिरनुक्रोशानाथनाथेतिजल्पती ९ रेधातर्नदयातोस्तिबालवच्चरितंतव ॥ युनंक्षिस्नेहभावेनाविनियुंक्ष्यकृतार्थकम् १० राज
न्नपृच्छाक्कगतोवदमांकरुणानिधे ॥ दिनेदिनेवदस्येवंयामिभद्रासनंप्रिये ११ अद्यनिष्ठुरतांकेनगमितोस्यागसामम ॥ तत्क्षमस्वनमाम्येषाजनमध्येगतत्र
पा १२ नयमांयत्रयातोसिप्रियांतोप्रियकारिणीम् ॥ त्रिलोकींपश्यतींशून्यामपुत्रांपतिनाविना १३ ॥ ॥ मुनिरुवाच ॥ ॥ सुमंतुःप्रकृतिस्तस्यम
नोरंजनएवच ॥ द्वावप्यवोदितांतत्रकिंराज्यस्यभविष्यति १४ आवाभ्यामविचार्यैवक्कगतोनृपसत्तम ॥ कस्मान्नवदसेराजन्किमर्थंमौनमास्थितः १५
नपश्यसिप्रियांभार्यामनाथामिवविह्वलाम् ॥ सहैवयावोनृपतेत्यक्त्वासर्वंगृहाश्रमम् १६ अनाथंनगरंतेवराष्ट्रंवाकोथपास्यति १७ ॥ ॥ मुनिरुवाच
एतस्मिन्नंतरेतत्रबभाणब्राह्मणःसुधीः १८ वेदशास्त्रार्थतत्वज्ञःप्रस्तुतंनिष्ठुरंवचः ॥ सर्वेस्वार्थपरायूयंनाप्तःकश्चनविद्यते १९ सुहृदांरोदनाश्रूणिमु
खेप्रेतस्ययांतिहि ॥ पृथिव्यांभारतांयातिप्राणहीनंकलेवरम् २० ब्रह्मांडगोलकेकोनुमृतमन्योनुगच्छति ॥ इयंचसुलभाराज्ञीरोदतेजीविताशया २१
यस्यामनोनुगत्यर्थंनसारोदितिकर्हिचिद् ॥ यूयंसर्वेनागरिकाःस्वकार्यगमनाकुलाः २२ सूर्यवंश्याःसोमवंश्यायेराजानोमृतानकिम् ॥ तस्मादुत्था
यसर्वेपिराज्ञःकुर्वंतुसंस्कृतिम् २३ मृतसंस्कारकारीयःसएवाप्तोनचापरः ॥ एतदर्थंहिलोकस्यज्यायसीपुत्रगृध्नुता २४ तस्मादानीयतांधर्मपुत्रो
वाप्यन्यएवच ॥ साहिक्रियांमारभतुसर्वैर्देयस्तिलांजलिः २५ ॥ ॥ मुनिरुवाच ॥ ॥ ततस्तेनागराःसर्वेद्भावमात्यौस्त्रियश्चताः ॥
प्रबोधिताब्राह्मणेनचक्रुस्तस्यौर्ध्वदेहिकम् २६ सुमंतुनाकृतंसर्वंसर्वैर्दत्तास्तिलांजालिः ॥ पुनःस्नात्वातुतेसर्वेनगरंविविशुश्चिराद् २७ अश्रांतिपिचुमं
दस्यपत्रंनत्वेश्वरंजनाः ॥ सांत्वयित्वातुसुलभांययुःस्वंस्वंनिकेतनम् २८ त्रयोदशाहेनिर्वृत्तेराज्ञ्यैदत्वांबराणिते ॥ चक्रुस्तेभोजनंप्रीत्याप्रत्यहं
बहुवासरम् २९ एकदानागराःसर्वेद्भावमात्यौनृपप्रिया ॥ सर्वेसंशयिताआसन्प्रजापालनकर्मणि ३० एतस्मिन्नंतरेतत्रमुद्गलोमुनिरायथौ ॥

१ सहक्रियामारभन्तु इतिपाठान्तरम् ।

उवाचसर्वांशयविदस्यराज्ञोमहागजः ३१ गहनोनामगृह्णातुमालांपुष्करनिर्मिताम् ॥ समाजेयस्यकंठेतांनिक्षिपेत्सनृपोभवेत् ३२ तथेतिचत
दासर्वेसाधुसाध्वित्यपूजयन् ॥ अतींद्रियज्ञानवतोवचोमुद्गलशर्मणः ३३ इतिश्रीगणेशपुराणेउपासनाखंडेपंचविंशोऽध्यायः ॥ २५ ॥ ॥ विश्वा
मित्रउवाच ॥ ॥ एकस्मिन्नदिवसेशुभग्रहयुतेलग्नेशुभेवासरेयोगेचारुफलेजनेचनगरेनानाविधेमेलिते ॥ मालांरत्नमयींददौनरपतेराज्ञीकरे
णोःकरेसंप्रार्थ्यद्विरदंकुरुष्वनृपतिंलोकेषुयस्तेमतः १ तामाज्ञांप्रतिगृह्यवारणपतिःसंरंजितोधातुभिर्बभ्रामाद्विजबांदिचारणगणैराशासितःसर्वतः ॥ नाना
वाद्यकरैर्वृतोनृपभटैराज्यार्थिभिःपूरुषैर्जिघ्रन्सर्वजनंसभापरिगतंयातोबहिःपत्तनात् २ नार्यस्तन्नगरेशिशूनथपतीन्कृत्वापुरोवस्थितान्राज्यार्थंविविधान
राश्चबहुधाश्रेणीमुखाश्चस्थिताः ॥ तेसर्वेविमनस्कतांपरिगताःस्वंस्वंगृहंचागतायातेस्मिन्गहनेकरिण्यथपुरोयाताबहिश्चापरे ३ गजस्तुयातःकमला
सुतंतंसंपूजयंतांद्विरदाननंतम् ॥ दृष्ट्वैवतस्मिन्विदधेसमालांपश्यत्सुलोकेषुसुरेषुनाके ४ वस्त्राणिमाल्यानिचभूषणानिदक्षायदत्तानितदैवलोकैः ॥ ज्ञा
त्वामतंपौरजनस्यराजाराज्ञःप्रकृत्योरुभयोस्तदैव ५ ववदुर्वाद्यसंघाश्चदिव्याभौमाअनेकशः ॥ मुमुचुःपुष्पवर्षंतेदेवाहर्षयुताःशुभम् ६ उपविष्टास्त
दालोकायथास्थानंयथाक्रमम् ॥ नेमुश्चतंदक्षनृपममात्यद्वयसंयुतम् ७ तांबूलानिचवस्त्राणिजनेभ्यःप्रददौनृपः ॥ ब्राह्मणान्पूजयित्वैवदत्वादाना
न्यनेकशः ८ संपूज्यमातरंतांतुवस्त्रालंकरणादिभिः ॥ दापयामासदानानिब्राह्मणेभ्योयथाविधि ९ नरयानेसमारोप्यस्वयमारुरुहेगजम् ॥ अलंकृतं
सिक्तमार्गेपताकाध्वजसंयुतम् १० अश्वारूढावमात्यौतौपुरस्कृत्ययथौपुरम् ॥ स्तुवंतिबंदिनःपौरानृत्यंत्यप्सरसःपुरः ॥ गंधर्वागाननिष्णाताधावि
त्वायांत्यमुंपुरः ११ जयशब्दैर्नमश्शब्दोवाद्यशब्दोगमद्दिवम् ॥ नृपद्वारंसमासाद्यनत्वाकेचिद्गृहंययुः १२ सभायांविविशुःसर्वेसंख्यातीतानृपास्तदा ॥
नृयानंप्रेषयामासमुद्गलायमहामतिः १३ छत्रंध्वजंचामरंचसुमंतुंप्रकृतिंतथा ॥ आयांतंमुद्गलंदृष्ट्वास्वामनात्पुरतोययौ १४ सकिरीटेनशिरसापादयोः
प्रणनामतम् ॥ न्यवेशयत्स्वासनेतंतेनाज्ञप्तोन्यआसने १५ उपविष्टोराजसंघैःपूजयामासतंमुनिम् ॥ गांचापिप्रददौतत्रब्राह्मणायमहामतिः १६ उवा
चतंनृपोदक्षोभोमुद्गलमहामुने ॥ अद्यतेमहिमाज्ञातोलोकैस्तैर्महानयम् १७ शरीरेचारुताराज्यप्राप्तिश्चत्वत्प्रसादतः ॥ कृसावस्थापूर्वतनोःकेदृक्राज्यंमहा
मुने १८ विनायकमहंजानेत्वामेवमुनिसत्तम ॥ पुनर्मेमस्तकेब्रह्मन्निधेहिकरपंकजम् १९ येनाहंसर्वकामानांभाजनंस्यांचिरंमुने ॥ विश्वामित्रउवाच ॥ आ
कर्ण्यवचनंतस्यमुद्गलोथाब्रवीच्चतम् २० नतेभयंरिपुकृतंभविष्यतिकदाचन ॥ यंयंकामयसेकामंसर्वंतस्तेभविष्यति २१ततस्तस्मैददौग्रामान्वासोरत्नधना
दिकम् ॥ अन्येषांब्राह्मणानांचगोधनान्यंशुकानिच २२ आशीर्भिरभिनंद्याथ ययुस्तेब्राह्मणागृहम् ॥ अमात्याभ्यांगृहेभ्यश्चददौग्रामाननेकशः २३ प्रासादं
कारयामासगणेशस्यबृहत्तरम् ॥ कुण्डिनेनगरेतस्मिन्प्राक्तनंसंस्थितंलघु ॥ विसर्जयामाससभांप्रविवेशगृहंनृपः २४ आययौवल्लभस्तत्रश्रुत्वावार्तांजने

रताम् ॥ वीरसेनानरपतिःस्वासुतापतिमिच्छतीम् २५ ददौतस्मैस्वप्रगतगणेशस्याज्ञयाशुभम् ॥ दक्षायराज्ञेमहतेत्रिलोकश्रुतकीर्तये २६ तस्मा
त्तस्यांभवत्पुत्रोबृहद्भानुरितिश्रुतः ॥ ततोभवत्खड्गधरःसुलभस्तत्सुतोभवत् २७ पद्माकरस्तत्तनयोवपुर्दीप्तस्तुतत्सुतः ॥ चित्रसेनस्तत्सुतोभूच्चित्रसेनात्त्वमेव
हि ॥ २८ ॥ ॥ ब्रह्मोवाच ॥ ॥ विश्वामित्रमुखात्सर्वंश्रुत्वावंशपरंपराम् ॥ ततःसनरशार्दूलोभीमोनाममहीपतिः २९ संतोष्यतंमुनिंप्रार्थ्यपप्रच्छ
द्विजपुंगवम् ॥ ॥ भीमउवाच ॥ ॥ विनायकःकदामेस्यात्सुप्रसन्नोमहामुने ३० तमुपायंवदविप्रोयेनमेतदनुग्रहः ॥ कदाहंकृतकृत्यः
स्यांदृष्ट्वादेवंगजाननम् ३१ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेपरंपरावर्णनंनामषड्विंशोऽध्यायः ॥ ॥ २६ ॥ ॥ ७ ॥ व्यासउ
वाच ॥ कउपायस्तुमुनिनाविश्वामित्रेणधीमता ॥ कृपावतातुभीमायकथितस्तंवदस्वमेऽमन्मनोमोहपटलंमृत्योरिवविनिःसृतम् ॥ तत्कथामृतपानेनपिताम
हमृतायथा २ ब्रह्मोवाच ॥ भीमायकथितस्तेनयउपायःशृणुष्वतम् ॥ एकाक्षरंमहामंत्रंभीमायाकथयन्मुनिः २ पाराशर्यमुनिश्रेष्ठकथयामिशृणुष्वतम् ॥ उ
वाचतंप्रसन्नात्माविश्वामित्रःसुधर्मवित् ३ ॥ विश्वामित्रउवाच ॥ अनेनाराधयविभुंदैवतंगणनायकम् ॥ अनुष्ठानंकुरुष्वत्वंप्रासादेदक्षनिर्मिते ॥ विनायकःप्र
सन्नस्तेसर्वान्कामान्प्रदास्यति ४ धर्ममर्थंतथाकामंमोक्षमन्यदपेक्षितम् ॥ गच्छवास्वपुरंभीमचिंतांकामपिमाकुरु ५ ॥ ब्रह्मोवाच ॥ इत्युक्तःसतदातेनतंप्रण
म्यययौनृपः ॥ सपत्नीकोददर्शाथपत्तनंस्वंजहर्षच ६ अमात्यौसेनयासार्द्धंनागैररीयतुर्नृपम् ॥ आलिलिंगुर्नृपंकेचिन्नमुर्दूरात्तथांतिके ७ प्रविवेशपुरंराजा
सर्वैःसाकंध्वजालिमत् ॥ सिक्तमार्गंचारुगंधंनानावादित्रशब्दितम् ८ ऊचुःपरस्परंलोकाःपुरीयंशोभतेधुना ॥ यथानारीपतिंप्राप्ययथांधोवापिसदृशम् ॥
९ इतिशृण्वन्नृयानस्थस्तथासाचारुहासिनी ॥ वस्त्रालंकारशोभाढ्यौस्तूयमानौमुदान्वितौ १० उभौविविशतूरम्यंपुरंनानार्द्धिसंकुलम् ॥ विसृज्यसर्वलोकंतौ
वस्त्रालंकारमौक्तिकैः ११ तांबूलैस्तेषुयातेषुभवनंस्वमगच्छताम् ॥ ततःशुभेदिनेराजादक्षप्रासादमागमत् १२ यत्कौण्डिन्यपुरेकारिपुरादक्षेणधीमता ॥
तत्रार्चयामासविभुंसर्वदातंविनायकम् ॥ उपवासपरोनित्यंतन्मंत्रमवलोडयन् १३ भोजनेशयनेयानेवचनेश्वसनेपिच ॥ तमेवचिंतयन्नित्यमनन्यमन
सानृपः १४ जलेस्थलेनभोमार्गेस्वर्गेदेवेनरद्रुमे ॥ भक्ष्येपेयेनृपोऽपश्यद्विनायकमनुत्तमम् १५ यंयंपश्यतितंनौतिदृढालिंगनतत्परः ॥ नग
रेतंजनाःसर्वेपिशाचइतिमेनिरे १६ ततोविनायकोभ्येत्यधृत्वापाणितलेनृपम् ॥ आहतंनृपमुकोसिकिंत्वांछसिवदस्वतत् १७ तमुवाचनृपोनान्यंजाने
त्वच्चरणांबुजात् ॥ ततोविनायकःप्राहपुत्रस्तेचारुदर्शनः १८ भवितामत्प्रसादेनगुणीस्वर्णतनुर्नृपः ॥ व्रजस्वंभवनंदेवद्विजपूजापरोभव १९ सगत्वाभव
नंराजातच्चकारतथैवच ॥ देवानांब्राह्मणानांचपूजनंतर्पणंतथा २० अकरोत्सर्वभावेनगणेशःप्रीयतामिति ॥ अल्पेनैवतुकालेनपुत्रस्तस्याभवच्छुभः २१
ददौदानान्यनेकानिपुत्रजन्मनिमित्ततः ॥ रुक्मांगदेतिनामास्यचक्रेद्विजवरोदितम् २२ वर्द्धेबालकोनित्यंशुक्लपक्षेयथाशशी ॥ चकारगुरुसात्तंसाशि

र्थंनृपतिःसुतम् २३ सचश्रवणमात्रेणजग्राहगुरुणोदितम् ॥ सर्वविद्यानिधानेनदत्तंयत्कपिलेनच २४ सोपिविद्यानिधिरभूद्गजकर्णइवापरः ॥ रुक्मांग
दोतिबलवान्सर्वशास्त्रविशारदः २५ तस्मैपट्टाभिषेकंसचकारगुणराशये ॥ ददौचद्विजमुख्येभ्योवासोरत्नधनानिच २६ ततोधिकांमहाभक्तिंसोपिचक्रेविं
नायके ॥ जजापैकाक्षरंमंत्रंपितुःप्राप्तंदिनेदिने २७ एकस्मिन्दिवसेरण्ययुवराजाविवेशह ॥ मृगयांव्यचरद्धरिजघानगवयान्मृगान् २८ अतिश्रांतोददर्शा
थमुनेःकस्यचिदाश्रमम् ॥ नानावृक्षलताजालंत्यक्तवैरमृगान्वितम् २९ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेरुक्मांगदाभिषेकवर्णनंनामसप्तविंशोध्या
यः ॥ २७ ॥ ॥ ब्रह्मोवाच ॥ ॥ ततोरुक्मांगदोपश्यद्दर्षिंवाचक्रविंशुभम् ॥ मुकुंदांतस्यपत्नींचस्निग्धमंजुलभाषिणीम् १ अतिश्रांतोनरपतिर्नमश्चक्रउ
भावपि ॥ तस्मिन्मुनौगतेस्नातुंययाचेनृपसत्तमः २ मातर्मुकुंदेमेदेहिशीतलंजलमुत्तमम् ॥ विनाजलंममप्राणागमिष्यंतियमक्षयम् ३ आकर्ण्यतस्यवा
चंसाजगादमदनातुरा ॥ त्वादृशंपुरुषंक्वापिमारादप्यतिसुंदरम् ४ नदेवेषुननागेषुयक्षगंधर्वपुंजयोः ॥ पश्यामिचारुसर्वांगमतेमेहृदयंत्वयि ५ अत्या
सक्तंत्वदधरामृतपानेचदेहितत् ॥ नारदउवाच ॥ ॥ व्यलीकंसतुश्रुत्वैवश्रांतत्वात्भृशदुःखितः ६ तिलोत्तमोत्तमांतांसजितेंद्रियतयाजगौ ॥ त्यजमौढिंन
मेचित्तंपारदार्येविगर्हिते ७ विनायकप्रभावेणसक्तंनैवात्रकर्हिचित् ॥ नजलंपातुमिच्छामित्वयादत्तंसुदुष्टया ८ ऋषेराश्रमइत्येवंयातोयास्यइतोशुभे ॥
तंगंतुमुद्यतंपाणिंधृत्वावीवददातुरा ९ ॥ ॥ मुकुंदोवाच ॥ ॥ बलात्कारेणयोन्यस्यास्त्रियंधर्षितुमिच्छति ॥ सएवनरकंयातिनस्वयंयातितामपि १० कृतेत्रे
तायुतेब्रह्मास्त्रीणांस्वातंत्र्यमभ्यधात् ॥ नकरोषियदावाक्यंतदाभस्मभविष्यसि ११ अथवाराज्यविभ्रष्टंकरिष्येवनचारिणम् ॥ नारदउवाच ॥ इत्युक्त्वाधाव
मानासाकाममार्गणपीडिता १२ रभसालिंगयामासचुचुंबेवदनंहठात् ॥ ततोरुक्मांगदस्तांतुबलाद्विक्षेपदूरतः १३ मूर्छितापतिताभूमौरंभेवमरुताहता ॥
उत्थितांतांतदाप्राहपरदारविरक्तधीः १४ रुक्मांगदोमहाभागेमुनिपत्न्याविवेकिनि ॥ परपुंसिमनोयस्याःसावैनिरयभाग्भवेत् १५ नमेमनश्चलेत्क्वापिय
दिशुष्येन्महोदधिः ॥ एवंनिराकृतातेनतंशशापरुषान्विता १६ यथाहंकष्टमगमंतथात्वंकुष्ठभाग्भव ॥ यतस्तेहृदयंवज्रात्सारभूतंनचद्रुतम् १७ इत्थंवदंतीं
तांराजानिर्भर्त्स्यबहुधातदः ॥ त्वरयानिर्गतस्तस्मादाश्रमाद्भृशदुःखितः १८ स्वंददर्शशरीरंस्वंश्वेतंबकशरीरवत् ॥ कुष्ठरोगयुतंकांत्याहीनंचभ्रशकुत्सितम् १९ चिंतार्णवेतदामग्नइदमाहगजाननम् ॥ किमपराद्धंमयातेद्यकथमत्रागतोप्यहम् २० प्राप्तःकथंनुदुष्टायामुनिपत्न्याःसमागमम् ॥ त्वयानूनंसिद्धि
पतेदुष्टाःसंवर्द्धिताभृशम् २१ अवतारांश्चसाधूनांरक्षणायबिभर्षिहि ॥ इथंननाशितादुष्टास्वैरिणीरूपगर्विता २२ कथंममशरीरंतत्कांचनस्पर्द्धिसुंदरम् ॥
इमामवस्थांसंप्राप्तःकेनवादुष्टकर्मणा २३ तवभक्तियथापूर्वंसदाकुर्वेयथाविधि ॥ त्वदन्यंनैवशरणंयामिनाथगजानन २४ नेदंशरीरंवक्रंवादर्शयिष्येजनं
प्रति ॥ प्रायोपवेशनेनेदंशोषयिष्येकलेवरम् २५ निश्चित्यैवंनरपतिरासन्यग्रोधसन्निधौ ॥ भृत्याइतस्ततोधावन्नेक्षंतेस्मचतंनृपम् २६ प्रवृत्तायांनिशायां

चजग्मुःस्वंस्वंनिकेतनम् ॥ स्वामिसेवकयोर्जातागतिश्चक्राब्धयोरिव २७ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेप्रायोपवेशनंनामाष्टाविंशतितमोध्यायः ॥ २८ ॥
॥ ॥ मुनिरुवाच ॥ ॥ तस्मिन्वटेसमासीनःक्वस्मिंश्चिद्दिवसेनृपः ॥ दूराद्ददर्शदेवर्षिंनारदंमुनिपुंगवम् १ ननामप्रार्थयामासक्षणंविश्राम्यतामिति ॥ उत्त
तारनभोमार्गान्नारदःकरुणानिधिः २ पूजयित्वायथाशक्तिपप्रच्छमुनिमादरात् ॥ अहंरुक्मांगदोनामभीमपुत्रोमहाबलः ३ मृगयांव्यचरन्वाचक्रवेरा
श्रममागतः ॥ जलयाञ्चाकृतात्रवृषितेनमयानघ ४ तस्यपत्नीभृशंनष्टाकामार्तामामचुंबत ॥ तस्मिन्मुनौगतेस्नातुंदुष्टभावेनचेतसा ५ उवाचमांभज
स्वेतिकामबाणप्रपीडिता ॥ जितेंद्रियतयादेवप्रसादात्सानिराकृता ६ अशपद्दुःखितात्यंतंसामांनिष्ठुरचेतसा ॥ कुष्ठीभवमहादुष्टसकामांत्यजसेयतः ७ ॥ ब्रह्मोवा
च ॥ ॥ श्रुत्वैवंदुष्टवचनंनिर्गतोहंतदाश्रमात् ॥ श्वेतकुष्ठीतदाजातोवदमेनिष्कृतिंमुने ८ वियोगान्ममभीमोपिमग्नःस्याद्दुःखसागरे ॥ श्रुत्वेत्थंवचनंतस्यनारदःप्रा
हविश्वावित् ९ उपायंतस्यकुष्ठस्यनाशायकरुणायुतः ॥ नारदउवाच ॥ ॥ आगच्छतामयामार्गेदृष्टमाश्चर्यमुत्तमम् १० विदर्भेनगरंख्यातंकदंबमितिसंज्ञया ॥
तत्प्रासादेमयादृष्टामूर्तिर्वैनायकीशुभा ११ चिंतामणिरितिख्यातासर्वेषांसर्वकामदा ॥ तस्याऽग्रतोमहाकुंडंगणेशपदपूर्वकम् १२ कश्चिच्छूद्रोमहाकुष्ठीजराजर्ज
रितोनृप ॥ तीर्थयात्राप्रसंगेनकदंबपुरमागतः १३ गणेशकुंडेस्नात्वैवदिव्यदेहमवापसः ॥ विनायकस्वरूपैस्तुगणैरानीतमंबरात् १४ विमानवरमारुह्यसग
तःस्थानमुत्तमम् ॥ यत्रगत्वानशोचंतिनपतंतिपुनःक्वचित् १५ दृष्टोमयैवराजेंद्रतत्रस्नानायसांप्रतम् ॥ स्नात्वादेवंसमभ्यर्च्यचिंतितार्थप्रदंविभुम् १६ देहि
दानानिर्विघ्नेभ्यःसद्यःपूतोभविष्यसि ॥ जीर्णंत्वचंपरित्यज्यसुरूपीभुजगोयथा १७ ॥ ब्रह्मोवाच ॥ इतिवाणींनारदोक्तांनिशम्यनृपसत्तमः ॥ नकिंचिदुक्त
वान्वाक्यंमग्नआनंदसागरे १८ गंतुंसमुद्यतेतस्मिन्नारदेमुनिपुंगवे ॥ प्रणिपत्यततोपृच्छत्प्रपूज्यचमुनिंपुनः १९ ॥ रुक्मांगदउवाच ॥ ॥ तस्मिन्क्षेत्रे
पुराकेनसिद्धिःप्राप्ताशुभानघ २० मूर्तिश्चस्थापिताकेनमणिरत्नमयीशुभा ॥ वैनायकीतिमेशंसपरंकौतूहलंमुने २१ भवादृशानांसाधूनांपरोपकरणेमतिः ॥
अन्यथाभ्रमणेकृत्यंनलोकेषुप्रदृश्यते २२ लोकेषुवर्षतेमेघःशेषेणाध्रियतेधरा ॥ उपकारायसूर्योपिभ्रमतेहर्निशंद्विज २३ समस्यसर्वभूतेषुसर्वज्ञस्यतवाग्रतः ॥
अनभिज्ञेनमूढेनकिंवक्तव्यंदयानिधे २४ पृच्छेतथापिदेवर्षेसंशयच्छेदनायवै ॥ ॥ नारदउवाच ॥ ॥ साधुपृष्टंत्वयाभूपलोकानुग्रहकारक २५ तृप्तोहंत
ववाक्येनसंप्रतिकथयामिते २६ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेनारदागमनंनामैकोनत्रिंशोध्यायः ॥ २९ ॥ ॥ नारदउवाच ॥ ॥ कदाचिदमरा
वत्यांशक्रंद्रष्टुंगतोस्म्यहम् ॥ समांसंपूज्यविधिवदुवाचावनतोभृशम् १ ॥ इंद्रउवाच ॥ किंचिदाश्चर्यभूतंमेसंतोषायमुनेवद ॥ भ्रमसेसर्वलोकांस्त्वंविदित
सर्वमस्तिते २ ॥ नारदउवाच ॥ मृत्युलोकेमयादृष्टोगौतमस्याश्रमोमहान् ॥ नानावृक्षलताजालैर्नानापक्षिगणैर्युतः ३ अहल्यासहितंतत्रगौतमंदृष्टवानहम् ॥
रूपंविलोक्यतस्यास्तुजातोहंकामविह्वलः ४ यस्यारूपेणसावित्रीशचीलक्ष्मीर्गिरींद्रजा ॥ उर्वशीमेनकारंभालोकेख्यातातिलोत्तमा ५ केशाबालायायाका

रिसाऽनसूयाप्यरुंधतीं ॥ छायासंज्ञारवेर्भार्याकश्यपस्यचयादितिः ६ सदृशीनैवकापिस्यान्नागपत्नीषुवाक्वचित् ॥ नचमेरोचतेगानंनपूजानचभोजनम् ७
ब्रह्मचर्यंचमेस्वीयंनिद्रांचनलभेक्वचित् ॥ त्वरावानहमायातोद्रष्टुंसाध्वमरावतीम् ८ तुच्छांपश्यइमांदेवींविनातांममरावतीम् ॥ ॥ नारदउवाच ॥ इतिश
क्रंवज्रंतार्हितोहंनृपतेवर ९ अंतर्हितेमयितदामद्वाक्यंमनसास्मरन् ॥ जंभभेदीमत्स्यकेतुविद्वोमूर्च्छामवापसः १० पश्येकदामुनेर्भार्यांगौतमस्येत्यचिंत
यत् ॥ कदाधरामृतंप्राप्यमुच्येयंमदनानलात् ११ जीवितुंनैवपश्येन्यंतदाश्लेषंविनाशुभम् ॥ एवंनिश्चित्यसंकल्पंगौतमोभूत्सजंभहा १२ चिंतयन्नेवतांमा
र्गेमुनेराश्रममाययौ ॥ ददर्शतामहल्यांतुस्नातुंयातेसगौतमे १३ अभ्यंतरगतःप्रोचेप्रियेशय्यांशुभांकुरु ॥ साचोवाचजपंत्यक्त्वाकथमद्यागतोगृहम् १४ दि
वैवसुरतेच्छांकिंकुरुषेतिविगर्हिताम् ॥ ॥ गौतमउवाच ॥ ॥ अहंस्नातुंगतोयावत्तावदेवावराप्सराः १५ तत्रैवस्नातुमायाताजातानग्नाक्षिगोचरा ॥ बिंबाधरा
सुचारुवेंगीचारुपीनपयोधरा १६ नलग्नंमेमनोदेविजपेकामास्त्रपीडितम् ॥ ततोहमाश्रमंयातोरतिंदेहिप्रियेधुना १७ नोचेत्कामाग्निनादग्धंमृतंमां
क्कनुपश्यसि ॥ शपेत्वांप्रव्रजिष्येवानिग्रहीष्येमनोभृशम् १८ ॥ अहल्योवाच ॥ ॥ स्वाध्यायंदेवपूजांचत्यक्त्वाकिंप्रार्थ्यतेरतिः ॥ नोचितंतवब्रह्म
र्षेतथाप्याज्ञांकरोम्यहम् १९ भर्तुःशुश्रूषणादन्योधर्मोनास्तिस्त्रियाःक्वचित् ॥ नारदउवाच ॥ स्वराकृतिस्वभावैःसाज्ञात्वातंस्वामिनंनिजम् २० विवेशशय
नेरंतुमहल्यासहवज्रिणा ॥ निःशंकंचुंबनाश्लेषनीवीविस्रंसनादिभिः २१ आकृत्यागौतमस्यैवंचिक्रीडेजंभहातया ॥ दिव्यान्गंधानुपाघ्रायचकिताशंकिताभृ
शम् २२ तर्कयामासमनसिकिमयंकूटरूपवान् ॥ कलंकोयंममभृशंचंद्रस्येवभवेन्नुकिम् २३ उभेकुलेमेनष्टेकिंदुष्टस्यास्यतुसंगमात् ॥ दर्शयिष्येकथं
लोकेऽयशःश्यामंमुखंत्विदम् २४ नयिष्यतिगतिंकांमेप्रियोभर्त्तातुमांमुनिः ॥ पप्रच्छतंशठंकोपात्कोसित्वंकूटरूपधृक् २५ विश्वस्तास्वामिरूपेणवदनो
चेच्छपामिते ॥ इत्युक्तःशापभीतोसावाविश्चक्रेनिजंवपुः २६ दिव्याभरणसंयुक्तंकिरीटकटकान्वितम् ॥ कुंडलाद्भुतदीप्तीभिर्विलसन्मुखपंकजम् २७ उ
वाचसततस्तांतुविद्धिमांत्वंशचीपतिम् ॥ लावण्यदर्शनात्तेहंविह्वलोमदनाग्निना २८ नलेभेकुत्रचिच्छर्मततइत्थंकृतंमया ॥ इतोपिमांभजस्वत्वंत्रैलोक्येश्वर
मादरात् २९ श्रुत्वेत्थंवचनंतस्यमुनिपत्नीरुषान्विता ॥ वमंतीवमुखाज्ज्वालांजगादत्रिदशाधिपम् ३० अस्यतेवपुषोमूढमद्भर्तरिसमागते ॥ अवस्थाका
भवेन्मंदनजानेहंशतक्रतो ३१ पातिव्रत्यंत्वयाभग्नंदुष्टपापीयसामम ॥ कामवस्थांगमिष्यामिशापाद्गौतमवाग्भवात् ३२ ॥ इतिश्रीगणेशपुराणेउपास
नाखंडेअहल्याधर्षणंनामत्रिंशतितमोध्यायः ३० रुक्मांगदउवाच ॥ ॥ आगतेगौतमेकोवाटत्तांतोभून्महामुने ॥ वदमेसकलंतंतुजिज्ञासामहतीमम १
नारदउवाच ॥ नित्यकर्मसमाप्यैवस्वाश्रमंगौतमोययौ ॥ आकार्यनिजपत्नीतांदेहिपादोदकंमम २ किमर्थंनागताद्यत्वंसंमुखंममपूर्ववत् ॥ नानीतमास

१ रुक्मांगदाभिविशेषः ।

नंकस्मात्कथंचाद्यनभाषसे ३ श्रुत्वेत्थंवचनंतस्यवेपमानालतेवसा ॥ अधोमुखीविनिर्गम्यमुहूर्त्तान्मुनिमाययौ ४ साष्टांगंपतितामूर्ध्नातत्पादोपरिमस्तका ॥ विह्वलाशापभीतासाशनैरथजगौमुनिम् ५ उषसित्वंप्रयातोसिस्नानंकर्तुंनिजंविधिम् ॥ तवरूपधरोदुष्टोदेवेंद्रोमामुवाचह ६ दृष्टवराप्सरोभ्योपिसुंदरीकामिनीमया ॥ नमेमनोजपेदैवेविधौनित्येस्थिरंभवेत् ॥ परावृत्यागतस्तस्माद्रतिंमेदेहिशोभने ७ त्वमेवेतिमयाभ्रांत्याकृतंवाक्यंतथैवतत् ॥ दिव्यगंधानुपाघ्रायविकल्पोमेभवत्पुनः ८ दुरात्मन्कोसिनोब्रूहिनोचेद्वस्मभविष्यसि ॥ इतिशापभयाज्जातःप्रकटोबलसूदनः ९ तावदेवभवद्वाक्यं श्रुतंतुमुनिसत्तम ॥ लज्जयानागताशीघ्रमपराधंक्षमस्वमे १० स्वयंनिवेदनेदोषोदोषोपरानिवेदने ॥ मंत्रायुर्गृहरंध्रंश्रीरतयश्चौषधानिच ११ मानापमानदानानिप्रकटानिनकारयेत् ॥ इत्थंनिशम्यसमुनिःकोपव्याकुलितेंद्रियः १२ शशापवनितांस्वीयांदुःशीलेत्वंशिलाभव ॥ नाज्ञासीर्मेस्वरूपंतंस्वभावंचेष्टितानिच १३ परेपुंसिनिमग्नंतेयतश्चेतोतिकामुके ॥ यदादाशरथीरामोभ्रमद्राजावनेवने १४ तस्यांघ्रिस्पर्शनादेवस्वंरूपंप्रतिपत्स्यसे ॥ ॥ नारद उवाच ॥ ॥ तदैवसाशिलाजातातपोनिधिवचोबलात् १५ तस्याःशापंसमाकर्ण्यचकंपेपाकशासनः ॥ प्रकंपनस्यसंयोगाद्धिमवत्पर्वतोयथा १६ तर्कयामासमनसिकथंकार्यंमयाधुना ॥ समुद्रमध्येकूपेवातडागेकमलेथवा १७ लीनोभूत्वायदास्थास्येतदाज्ञास्यतिमांमुनिः ॥ अतोबिडालरूपेणविचचारसवज्रभृत् १८ गौतमस्तमचक्षाणोगृहेद्वारितथाश्रमे ॥ क्रगतोदानवारिपुर्योमेभार्याविदूषकः १९ ध्यानेनबुबुधेतंदुक्षणेनमुनिसत्तमः ॥ नतेभस्मकरिष्यामिदेवेंद्रोसियतःखलः २० शपामित्वांशचीभर्त्तःसहस्रभगवान्भव ॥ श्रुतवान्वचनंयावद्रोषेणमुनिनेरितम् २१ तावद्ददर्शस्वंदेहंसहस्रभगचिह्नितम् ॥ ततोदुःखार्णवेमग्नःशुशोचबलवृत्रहा २२ ॥ ॥ इंद्रउवाच ॥ ॥ अहंशिक्षापितोवृद्धैर्नानाधर्माननेकशः ॥ वृद्धानांवचनंयन्मेनाविचारितमादरात् २३ स्वबुद्धिर्हितकृत्सर्वाविनाशायपरेरिता ॥ गुरोर्गरीयसीबुद्धिःक्षयदाकामिनीमतिः २४ कुतोनारदवाक्येनयातोहंतामनिंदिताम् ॥ देवराजोभवन्नास्यं लोकानांदर्शयेकथम् २५ दिव्यदेहोगतःक्वाद्यनिजभार्यांवदेनुकिम् ॥ धिङ्मांचधिक्स्मरंयेनप्रापितोगर्हितांदशाम् २६ प्राणिभिर्भुज्यतेकर्मशुभंवायदिवाशुभम् ॥ तिर्यग्योनिंसमासाद्यक्षपयिष्येऽघमात्मनः २७ नलिनीकुड्मलेतिष्ठन्द्विरेफोपकरूपधृक् २८ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडे शक्रशापवर्णनंनामैकत्रिंशत्तितमोध्यायः ॥ ३१ ॥ ॥ नारदउवाच ॥ शक्रेतुनलिनींयातेतत्पुरंत्वहमागतः ॥ बृहस्पतिपुरोगांस्तांस्तत्रापश्यंस्थितान्सुरान् १ तेभ्योह्यकथयंसर्वमुभयोःशापकारणम् ॥ अहल्यायामहेंद्रस्यसंयोगंचविरूपताम् २ सहस्रभगतांयातःशक्रोगौतमशापतः ॥ अहल्याधर्षणाद्देवास्तत्संगात्साशिलाभवत् ३ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रुत्वातेनारदोक्तंतत्सर्वेदेवाःशुचान्विताः ॥ अतिदुःखाद्रुदंतस्तेनिश्वासोच्छ्वासविभ्रमैः ४ ॥

१ अहामित्यर्धं क्वचित्पुस्तकेन ।

देवाऊचुः ॥ ॥ येनाकारिशतंयज्ञादानवायेननिर्जिताः ॥ त्रैलोक्यंपालितंयेनभुक्तमैंद्रंपदंशुभम् ५ पूजिताबहवोदेवाब्राह्मणाब्रह्मवित्तमाः ॥ भुक्ताना
नाविधाभोगाअन्येषामतिदुर्लभाः ॥ कुत्रस्थास्यत्यसौदेवोभोक्ष्यतेस्वप्स्यतेकथम् ॥ कमद्यशरणंयामःस्वकृतेतत्कृतेपिवा ७ पालयिष्यतिकोस्मान्वै
पदमैंद्रंशचींतथा ॥ कथंप्रसन्नतांयायाद्गौतमोमुनिसत्तमः ८ स्वीयभार्यावियुक्तःसंस्तत्कृतागःस्मरन्रुषा ॥ अन्योपायंनपश्यामोगौतमस्यप्रसाद
तः ९ तस्मान्नारदयास्यामोगौतमंसांत्वितुंमुनिम् ॥ एवंतेनिर्ययुर्देवानारदेनसमन्विताः १० गौतमंतेसमासाद्यबद्धांजलिपुटामुनिम् ॥ तुष्टुवुर्विविधै
र्वाक्यैस्तमेवशरणंगताः ११ ॥ ॥ देवाऊचुः ॥ ॥ तवप्रभावंवक्तुंनोमुनेशक्तिर्नविद्यते ॥ गरिमाणंवदेत्कोनुमेरोर्हिमवतोपिच ॥ वृष्टिधारारजोभूमेर्गंगायाः
सिकताअपि १२ कमंबुधेर्गुणान्विष्णोर्गणयेत्कोनुमूढधीः ॥ प्रातरेवोप्तबीजानांमध्यान्हेसस्यसंपदः १३ संपादितास्त्वयापूर्वमविताऋषिसत्तमाः ॥
वालखिल्यैर्यजिंकृत्वापरइंद्रोविनिर्मितः १४ ब्रह्मादिभिःप्रार्थितास्तेपक्षिणांतमकल्पयन् ॥ पयसांनिधिरेकेनप्राशितश्चुलकेनयत् १५ अपरामृष्टि
रारब्धागाधिपुत्रेणधीमता ॥ स्तंभितोभुजइंद्रस्यच्यवनेनमहात्मना १६ तस्मात्सर्वात्मनापुंसांभवतांसेवनंनतिः ॥ दर्शनंभाषणंपूजास्पर्शनंपापनाशन
म् १७ उपकारेरतानांचदीनानुग्रहकारिणाम् ॥ इंद्रार्थेशरणंयातानकृपांकर्तुंत्वमर्हसि १८ ॥ ॥ गौतमउवाच ॥ ॥ भवतांदर्शनंचर्मचक्षुषानैवजायते ॥
ममपुण्येनजातंतत्कामसंपादनंनृणाम् १९ जन्माश्रमतपोदानंदेहआत्मावतानिच ॥ सार्थकानीक्षणेनैवजातानिभवतांखलु २० इदानींप्रार्थितंकिंवस्तन्निरू
प्यंममाग्रतः ॥ शक्यंचेत्तत्करिष्येहंभवत्स्मृतिबलेनतत् २१ ॥ ॥ मुनिरुवाच ॥ ॥ इतितद्वचनंश्रुत्वाजहृषुस्तेदिवौकसः ॥ चंद्रोदयेयथाहर्षंप्राप्नोति
जलधिःस्फुटम् २२ यथावाबालभाषाभिःपितरौमुदमीयतुः ॥ प्रार्थनांचक्रिरेसर्वेगौतमंतंमहामुनिं २३ ॥ देवाऊचुः ॥ ॥ ईश्वरस्यापराधेनकामोभस्म
त्वमागतः ॥ आगस्कारित्वयाशक्रोनचप्राणैर्वियोजितः २४ इदानींसयथास्थानंस्वकीयंप्राप्नुयान्मुने ॥ क्षमित्वातस्यचागांसिसर्वेषांवचनाद्विनः ॥
२५ कृतेतस्मिन्प्रसादेतुसर्वेषांवांछितंभवेत् ॥ ॥ नारदउवाच ॥ ॥ श्रुत्वादेवसमूहस्यवचनानिसगौतमः २६ प्रहस्यप्रत्युवाचेदंसर्वान्देवगणान्प्रति ॥
॥ गौतमउवाच ॥ ॥ नामापितस्यनग्रात्र्यंपतितस्यकृतागसः २७ कपटस्यशठस्यापिदुष्टस्याप्यविवेकिनः ॥ अनुतापविहीनस्यनिष्कृतिर्नैवविद्यते २८
तथापिभवतांवाक्यात्करिष्येतत्प्रियंसुराः ॥ भवंतोपियदारुष्टास्तदाशापःपतेन्मयि २९ पूतोभवतिजंतुर्हिबहुभिर्योनुगृह्यते ॥ अतएकंवदेमंत्रंतस्मैतंप्र
दिशंतुच ३० सर्वकर्त्तासर्वहर्त्तासर्वपाताकृपानिधिः ॥ विनायकोदेवदेवोब्रह्मविष्णुशिवात्मकः ३१ षडक्षरस्तस्यमंत्रोमहासिद्धिप्रदायकः ॥ उपदेशो
कृतेतस्यदिव्यदेहोभवेत्तुसः ३२ भगानितस्ययावंतितावन्नेत्रोभविष्यति ॥ स्वराज्यंप्राप्स्यतेशक्रइतिसत्यंवदामिवः ३३ अभिधायसुरानित्थंतूष्णीमासी

१ मुनिर्नारदः

त्सगौत्तमः ॥ तंचतेपूजयित्वातुनमश्चक्रुर्मुदान्विताः ३४ प्रदक्षिणीकृत्यपुनःप्राप्यानुज्ञांययुःसुराः ॥ प्रशंसंतोमुनिंतत्रयत्रास्तेबलवृत्रहा ३५ गौतमा
ज्ज्ञानसंपन्नात्सात्त्विकोन्योनवर्तते ३६ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेमंत्रकथनंनामद्वात्रिंशोध्यायः ३२ ॥ ॥ नारदउवाच ॥ ऊचुर्देवावृत्रहणं
बहिर्याहिशतक्रतो ॥ वयंहिसहितास्तत्रनारदेनसुरर्षिणा १ तंगत्वागौतममुनिंप्रसाद्यत्वामिहागताः ॥ उपायस्तेनकथितोवरोदत्तस्तवापिच २ दो
षेजातेस्वयंसंतःख्यापयंतिजनेषुतम् ॥ तत्रप्रतिविधिंसम्यक्कुर्वंतितन्निरर्थकम् ३ आच्छादनेदोषवृद्धिःख्यापनेतुलयोभवेत् ॥ तस्मात्त्वमापदेवेंद्रबहिरा
गत्यतंवद ४ देवर्षिंप्रतितंब्रूहिकुरूपायंमुनीरितम् ॥ वैनायकंमहामंत्रंगृहाणत्वंषडक्षरम् ५ ब्रह्माददर्शचांगुष्ठंविवाहेगिरिजेशयोः ॥ चस्कंदसतदारेतो
लज्जितोवाङ्मुखोगतः ६ ज्ञात्वामहेशःकृतवान्निदोंषंतमुपायतः ॥ इतिवाणींसश्रुत्वैवदेवर्षिगणनिर्मिताम् ७ आजगामबहिःशक्रोनलिनीकोशतोनृप ॥
सर्वेषांतत्रदेवानांश्रुत्वावाक्यानिसादरम् ॥ ८ ॥ पूयशोणितदिग्धांगोमलिनःपूतिगंधवान् ॥ दृष्ट्वातथाविधंदेवानेमुःसर्वेसुरेश्वरम् ९ आच्छाद्यवा
णरंध्राणिवस्त्राग्रैर्नृपसत्तम ॥ सुस्नातंपुनराचांतंतमिंद्रंवाक्पतिस्तदा १० षडक्षरंमहामंत्रंगणेशस्योपदिष्टवान् ॥ उपदेशकृतेतेनदिव्यदेहोभवच्चसः ॥
॥ ११ ॥ सहस्रनयनःश्रीमान्बभौसूर्यइवापरः ॥ ततोवाद्यनिनादैश्चजयशब्दैर्दिवौकसाम् १२ गंधर्वाणांगानरवैर्नादितादिदिशोदिशः ॥ मुमुचुःपुष्प
वर्षाणिसर्वेदेवामुदान्विताः १३ आशिषोथददुःसर्वेमुनयोनारदादयः ॥ आलिलिंगुर्मुदादेवास्तुष्टुवुश्चापरेचतम् १४ केप्यूचुस्तंसुमनसःसनाथाहिवयंत्वया ॥
विनात्वांनैवशोभामोविनाचंद्रंनभोयथा ॥ १५ ॥ विनास्वापितरौबालानसुखंयांतिसर्वथा ॥ तथाविनावयंत्वांहिलभामःशर्मनक्वचित् १६ ॥ ॥ मुनि
रुवाच ॥ ॥ श्रुत्वेत्थंदेववचनंजहर्षचशतक्रतुः ॥ उवाचचप्रसन्नात्मातथ्यंवाक्यंसुरान्प्रति १७ ॥ इंद्रउवाच ॥ ॥ मयाकृतंकर्मसुदुष्करंयद्देवर्षिवाक्येनावि
मोहितेन ॥ लब्धंफलंदुःसहमद्यसर्वैरुद्धारितोहंदुरितप्रकोपात् ॥ १८ ॥ नमामिसर्वानमरप्रवर्हानृषींश्चसर्वान्सुगुरुप्रभावान् ॥ उद्धर्तुमात्मानमतोखिला
मांसंत्रातुमर्हाःशरणंप्रपन्नम् १९ कथंप्रयत्नोरचितोभवद्भिःप्रसादनायास्यहिगौतमस्य ॥ कथंनुमंत्रंपरमंमदर्थेसउक्तवांस्तत्कथयंतुसर्वे ॥ २० ॥ ॥ देवा
ऊचुः ॥ ॥ मुनिंपुरस्कृत्यगुरुंवयंचगतामुनिंतंप्रणिपत्यसम्यक् ॥ प्रसादितोवागमृतैर्विचित्रैःसयाच्यमानोप्यवदत्स्वमंत्रम् २१ यस्योपदेशेनसहस्रने
त्रोजातोभवान्सर्वसुखायदेव ॥ प्रयाहिदेवत्वमरावतींस्वांप्रशाधिसर्वान्त्रिदिवौकसोन्यान् २२ इंद्रउवाच ॥ ॥ नाहंप्रयास्येस्वपुरींप्रसादंविनागणे
शस्यसुरर्षिवर्याः ॥ व्रजंतुयूयंकृतसाधुकृत्याधामानिदिव्यानिमुदारमंतः २३ एतावतालंप्रकटीकृतोहंलज्जाविलीनोबहुदुर्गतिश्च ॥ प्रसादितोयन्मुनि
रुग्रतेजाभवत्प्रसादाद्बहुनेत्रतामे २४ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेत्रयस्त्रिंशतितमोऽध्यायः ३३ ॥ ॥ नारदउवाच ॥ ॥ कदंबवृक्षस्यत

१ कृतकार्यं सारा इतिपाठान्तरम् ।

लेनिधायनासाग्रदृष्टिंपरमासनेसः ॥ मनोनिरुंध्याथजजापमंत्रंषडक्षरंजंभरिपुर्नरेंद्र १ सहस्रवर्षाणिगतानितस्यमरुत्पतेर्मारुतभक्षणस्य ॥ वल्मी
कगुल्मानिशरीरदेशेजातानिवैभूधरवत्स्थिरस्य २ ततःप्रसन्नोभगवान्गणेशोयःसर्वगःसर्वविदुग्रतेजाः ॥ स्वतेजसावह्निशशीनतेजांस्याच्छादयन्
सर्वविलोचनानि ३ चतुर्भुजोरत्नकिरीटमालीचार्वंगदःकुंडलमंडिगंडः ॥ मुक्तामयंदामचनूपुरेचबिभ्रन्महार्घैकटिसूत्रमुच्चैः ४ यःपुष्करांक्षःपृथु
पुष्करोपिबृहत्करःपुष्करशालिमालः ॥ आविर्बभूवारिवलदेवमूर्तिःसिंदूरशालीपुरतोमघोनः ५ तंदृष्ट्वाभयभीतोभूत्किमिदंकिमिवागतम् ॥ कथंचजी
वितंमेस्यादस्थिप्राणमयस्यच ६ विघ्नोयंकिंमहानद्यनजानेकेननिर्मितः ॥ स्वेदस्रावशरीरंमेकंपतेबोधिपत्रवत् ७ इत्थंविक्लवितंतस्यबुबुधेखिल
दृग्विभुः ॥ विनायकोमहेंद्रंतमुवाचमंजुलंवचः ८ ॥ ॥ विनायकउवाच ॥ ॥ माभयंकुरुदेवेशमांनवेत्सिकथंसुर ॥ यन्निर्गुणंनिर्विकारंचिदानंदंसनातन
म् ९ कारणातीतमव्यक्तंजगत्कारणकारणम् ॥ यंध्यायसिसदादेवंमंत्रेणानेननिश्चलः १० श्रांतोसिबहुकालंत्वमितिप्रत्यक्षतांगतः ॥ तपसानेनतुष्टो
हंवरंदातुमिहागतः ११ ब्रह्मांडानामनंतानामुत्पत्तिप्रलयावनम् ॥ मत्तएवेतिविद्धित्वंवृणुयद्वांछसेनघ १२ नारदउवाच ॥ ॥ श्रुत्वातस्यवचोरम्यंबुबुधेब
लभेदनः ॥ भगवंतंमहाकायंदेवदेवंविनायकम् १३ ननामपरयाभक्त्यातततउत्थायसत्वरः॥ अवीवदच्छचीकांतःप्रत्यक्षंब्रह्मरूपिणम् १४ ॥ ॥ इंद्रउवाच ॥
ब्रह्मादयोपिनोदेवाविदुस्त्वांसदिगीश्वराः ॥ गुणांस्तवमहाबाहोसृष्टिस्थित्यंतकारिणः १५ पदंतुकृत्रिमंमर्त्यंशतयज्ञसमुद्भवम् ॥ दत्तंतत्राप्यंतरायाभवंति
बहुधामम १६ मयाकथंतुविज्ञेयोमहिमातेगजानन ॥ यस्यतेनुग्रहःपूर्णोभविष्यतिमहेश्वर १७ सएवमहिमानंतेजानीयाद्विघ्नकारण ॥ तस्यतेगुण
रूपाणिवक्तुंशक्तिर्भविष्यति १८ निराधारोखिलाधारोनित्यज्ञानोऽजरोमरः ॥ नित्यानंदेनसंपूर्णोमायावीक्षरएवच १९ अक्षरःपरमात्माचविश्वरूपो
खिलेश्वरः ॥ उग्रैस्तपोभिस्त्वांज्ञात्वानिवृत्ताःसनकादयः २० षडक्षरप्रभावेनदृष्टोसिपरमेश्वर ॥ पुरायंब्रह्मणादिष्टोमंत्रोमेनुग्रहेणवै २१ उक्तवांश्चैव
मांब्रह्मायदामुंविस्मरिष्यसि ॥ तदैवभ्रश्यसेस्थानाद्दुर्दशांचैवयास्यसि २२ ततोमयातिलुब्धेनदुर्भाग्यवशगेनतु ॥ धर्षितामुनिपत्नीसाततोदुर्गतिमाप्त
वान् २३ पुनश्चधिषणोक्तेनतेनमंत्रेणदृष्टवान् ॥ स्वरूपंतवदेवेशसहस्रनयनोधुना २४ अन्यमेकंवरंयाचेयतस्त्वांचिंतितार्थदः ॥ इदंकदंबनगरंचिंता
मणिपुरंत्विति २५ अनुष्ठानफलंप्राप्तंयत्तेदृढपदांबुजम् ॥ इदानींतुवरंयाचेयंतमेदेहिविघ्नप २६ तवविस्मरणंदेवनभवेन्मेतथाकुरु ॥ मनोमेरमतांनि
त्यंतवपादांबुजेविभो २७ अद्यप्रभृतिलोकेस्मिन्रूढ्यार्तियातुगजानन ॥ चिंतामणीतितीर्थंतुसरश्चप्रथताभिदम् २८ अस्मिन्स्नानेनदानेनधर्मकामा
र्थमुक्तयः ॥ जनानांसिद्धयःसंतुप्रसादात्तेजगद्गुरो २९ ॥ मुनिरुवाच ॥ ॥ आकर्ण्यवचनंशक्रंमेघगंभीरनिस्वनः ॥ उवाचश्लक्ष्णयावाचाविघ्नेशो
जगतांपतिः ३० ॥ विनायकउवाच ॥ ॥ इदंसंपत्स्यतेसर्वंयत्त्वयाप्रार्थितंविभो ॥ अन्यएकोवरस्तेस्तुस्वपदेत्वंस्थिरोभव ३१ अविस्मृतिश्चसततंम

मतेस्तुसुरेश्वर ॥ यदाचसंकटंतेस्यात्तदामांस्मरवासव ३२ आविर्भावेनतेकार्यंसर्वंसंपादयेनिशम् ॥ इदंचिंतामणिपुरंख्यातंभुविभविष्यति ३३ कदंबपुरमित्येतत्तीर्थंचिंतामणीतिच ॥ अत्रस्नानेनसर्वेषांसिद्धयोपिकरेस्थिताः ३४ चिंतितंचप्रदास्यामिचिंतामणिविनायकः ॥ ॥ नारदउवाच ॥ ॥ एवंव रंततोलब्ध्वास्वःसिंधुमानयद्धरिः ३५ कृत्वाभिषेकंतद्धारापूजयामासतंविभुम् ॥ गजाननंमहाभागंपरिवारसमन्वितम् ३६ पूजितःसुरनाथेनतत्रैवांतर्दधेविभुः ॥ स्थापयामासशक्रोपिस्फाटिकांमूर्त्तिमादरात् ३७ वैनायकींशुभांदिव्यांसर्वावयवसुंदराम् ॥ कारयामासविपुलंप्रासादंरत्नकांचनैः ३८ न त्वाप्रदक्षिणीकृत्यशक्रःस्वंपदमभ्यगात् ॥ तदेतद्भुविविख्यातंचिंतामणिसरोमहत् ३९ अद्यापिसाशुभजलागंगाशक्रस्यशासनात् ॥ कृत्वाभिषेकंतत्र म्मूर्त्तौयातिस्वंधामसर्वदा ४० एवंतेक्षेत्रमहिमाकथितोद्भुतदर्शनः ॥ सर्वदोषहरःश्रीमान्सर्वकामप्रदःशुभः ४१ तत्रगत्वामहीपालस्नानंकुरुयथाविधि ॥ सर्वदोषविनिर्मुक्तोभविष्यसिनसंशयः ४२ ॥ ब्रह्मोवाच ॥ ततोययौमुनिःशीघ्रमनुपृच्छ्यचतंनृपम् ॥ आशीर्भिरभिनंद्यैवसरुक्मागदमादरात् ४३ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेचिंतामणितीर्थवर्णनंनामचतुस्त्रिंशोध्यायः ॥ ३४ ॥ व्यासउवाच ॥ देवर्षौतुगतेतस्मिन्नृपःकिमकरोत्तदा ॥ रुक्मांगदोमेकथयकथामेतांमनोरमाम् १ ॥ ब्रह्मोवाच ॥ कृत्वोपदेशंसुमहांतमेवंगतेमुनौनारदनाम्निपुत्र ॥ रुक्मांगदोहर्षयुतोददर्शसेनांस्वकीयांचतुरंगिणींताम् २ तयापिदृष्टोनृपतिर्विरूपोयःस्वर्णकांतीरतिभर्तृरूपः ॥ आसीत्पुरेत्थंकथमेषजातःसंशय्यपप्रच्छनृपंनिमित्तम् ३ ॥ ॥ सेनान्यऊचुः ॥ ॥ गिरिन्विना निसरितोभ्रांत्वाचवयमागताः ॥ क्षुत्तृट्परीतारार्जेंद्रत्वद्दर्शनसमुत्सुकाः ४ पदेपदेप्रपश्यंतःसंप्राप्तास्तेपदांबुजम् ॥ इमामवस्थांदृष्ट्वातेदुःखाद्दुःखतरंगताः ५ किंनिमित्तमभूत्तन्नःकथयस्वनृपोत्तम ॥ ॥ नृपउवाच ॥ ॥ अहमग्रेसमायातस्तृषितःक्षुधितश्चह ६ अपश्यंपुरतःशीघ्रंवाचक्रविगृहाश्रमम् ॥ तत्रगत्वामयादृष्टातस्यपत्नीशुभानना ७ नाम्नापुकुंदेतिशुभायाचितासाजलंमया ॥ सातुदुष्टास्वैरिणीचमामुवाचाशुभंवचः ८ रतिंकुरुमयासार्द्धंनोचेच्छापंददामिते ॥ निराकृतामयासातुबलाच्छुद्धेनचेतसा ९ तद्भर्तरिगतेस्नातुंसामांदुष्टाशपद्रुषा ॥ ततस्तुवृक्षमूलेहमुपविष्टोहिदुःखितः १० प्रभावात्पूर्वपुण्यस्यदृष्टवान्नारदंमुनिम् ॥ तेनमेकथितोरिष्टनाशकोविधिरुत्तमः ११ चिंतामणिक्षेत्रगतोगणेशतीर्थसंश्रितः ॥ माहिमाकथितस्तेनतस्य तीर्थस्यविस्तरात् १२ तत्रस्नानंसमाख्यातंमुनिनादिव्यचक्षुषा ॥ अतःस्नातुंगमिष्यामिस्वदोषस्यापनुत्तये १३ यांतुसर्वेमयासार्द्धंतत्रस्नातुंयदीच्छत ॥ स्नात्वादत्वायथाशक्तिसंपूज्यचविनायकम् १४ पूतास्तयोःप्रभावेणयास्यामःस्वपुरंततः ॥ ॥ कउवाच ॥ ॥ इतितेनिश्चयंबुद्ध्वाजग्मूराजपुरःसराः ॥ दृष्ट्वातीर्थंगणेशाख्यंदिव्यदेहोबभौनृपः १५ तप्तकांचनवर्णाभोयथापूर्वंमुनीश्वर ॥ ततोरुक्मांगदोमेनेनारदोक्तमृतंवचः १६ तत्रस्ना

१ तीर्थदेव प्रसादेन पूतायामःस्वकंपुरम् । २ तयोःतीर्थदेवयोः ।

त्वाददौदानान्यनेकानिनृपस्तदा ॥ रुक्मांगदोब्राह्मणेभ्योमुदापरमयायुतः १७ विनायकंपूजयित्वातेजोराशिंददर्शसः ॥ विमानमर्कप्रतिमंब्राह्मणाःसेवकाश्चते १८ विनायकगणैर्जुष्टमप्सरःकिन्नरैर्युतम् ॥ नत्वानृपस्तान्पप्रच्छकेयूयंकुतआगताः १९ दूताःकस्यकिमत्रास्तिकार्यंतद्ब्रूतसादरम् ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रुत्वानृपतिवाक्यानिमंजुलानिविमानगाः २० दूताविनायकस्योचुर्न्योसिनृपसत्तम ॥ येनतेसर्वभावेनध्याताश्चिंतामणिःप्रभुः २१ तीर्थयात्राकृतासम्यक्दानंदत्वायथाविधि ॥ चिंतामणिःपूजितश्चकृतकृत्योसिसांप्रतम् २२ चिंतितस्यप्रदानाद्धिचिंतामणिरयंस्मृतः ॥ वयंचकृतकृत्याःस्मोदर्शनात्तवसुव्रत २३ महिमानंनजानीमस्तवमर्कर्नृपोत्तम ॥ कायेनवचसाबुद्ध्याजीवस्याप्यर्पणेनच २४ आराधितस्त्वयादेवःसर्वब्रह्मांडनायकः ॥ विनायकस्तस्यदूतास्तेनचप्रेषितानृप २५ उत्सुकःसउवाचास्मान्मद्भक्तंशीघ्रयायिनः ॥ रुक्मांगदंविमानेनआनयंतुममांतिकम् २३ इतिश्रुत्वावयंयाताआरोहस्वनभोगमम् ॥ याहिशीघ्रतरंदेवंसहास्माभिर्विनायकम् २७ ॥ ॥ ब्रह्मोवाच ॥ ॥ इतिश्रुत्वावचस्तेषांआहरुक्मांगदोनृपः ॥ क्काहंमंदमतिर्दूताःक्वचाखंडितविग्रहः २८ अप्रमेयोप्रतर्क्यश्चचिन्मात्रोविभुरव्ययः ॥ सर्गस्थित्यप्ययानांयःकारणंकारणातिगः २९ तस्यादरोमयिकथंनजानेतीर्थजंफलम् ॥ जन्मांतरगतंकिंमेफलितंपुण्यमुत्तमम् ३० तेनवोदर्शनंजातमग्रेतिफलदंशुभम् ॥ यूयंधन्यतरायेषांप्रत्यक्षोहर्निशंविभुः ३१ इत्युक्त्वापूजयामास नत्वाचरणपंकजम् ॥ प्रार्थयामाससर्वांस्तान्नृपतिर्मन्नृपोत्तमः ॥ ब्रह्मण्यःसत्यवादीचभीमोभीमपराक्रमः ३२ विनातंकथमायामिमातरंचारुहासिनीम् ॥ तयाप्याराधितोदेवोदेवदेवोविनायकः ३३ जन्मावधिनचान्यंसामन्यतेदेवतांतरम् ३४ ॥ ॥ दूतउवाच ॥ ॥ एवंचेत्तर्हितीर्थेस्मिन्कुरुस्नानंतयोरपि ॥ श्रेयस्तस्मैचतस्यैचपित्रेमात्रेप्रदीयताम् ३५ ततस्तावपिनेष्यामोविमानवरमास्थितौ ३६ ॥ ॥ ब्रह्मोवाच ॥ ॥ इतितद्वचनंश्रुत्वाकृत्वाप्रतिष्ठांतं कुशैः ॥ कुशोसिकुशपुत्रोसिब्रह्मणानिर्मितःपुरा ३७ त्वयिस्नातेतुमस्नातोयस्येदंभविबंधनम् ॥ एवंभंक्त्वमुच्चार्यसर्वेषामानुपूर्वशः ३८ ग्राम्याणांसर्वलोकानांचक्रेस्नानविधिंनृपः ॥ चिंतामणिक्षेत्रगतेतीर्थेगणेशसंज्ञके ३९ ततोरुक्मांगदोराजासबलोदूतवाक्यतः ॥ विमानवरमारुह्यकौंडिन्यंपुरमाययौ ॥ ४० वाद्यघोषैर्ब्रह्मघोषैर्गंधर्वाप्सरसांरवैः ॥ नादितंगगनंतेनविमानेनदिशोदश ४१ मातापितृभ्यांप्रददौश्रेयोरुक्मांगदोनृपः ॥ सर्वेषामेवलोकानांस्नानश्रेयोविनायके ४२ दत्तमात्रेतुकौशेयस्नानजेश्रेयसिध्रुवम् ॥ विनायकाज्ञयान्यानिविमानानिसमाययुः ४३ प्रत्येकंतेसमारूढाएकैकंगगनेचरम् ॥ एवंरुक्मांगदोभीमरतन्माताचारुहासिनी ४४ सर्वेलोकाययुस्तत्रयत्रदेवोविनायकः ॥ एवंतन्नगरंसर्वमाबालश्वपचावधि ४५ पुण्याद्गणेशतीर्थस्यस्नानजात्स्वर्गतिंगतम् ॥ ॥ कउवाच ॥ ॥ इतितेकथितंसर्वंयद्यद्दृष्टंत्वयामुने ४६ चिंतामणिक्षेत्रगतंमाहात्म्यंतीर्थसंभवम् ॥ यःशृणोतिनरोभक्त्यासोपितद्गतिमाप्नुयात् ४७ इतिश्रीगणेशपुराणेउपासनाखंडेकादंबपुरगतवर्णनंनामपंचत्रिंशोत्तमोध्यायः ३५ ॥ ॥ व्यासउवाच ॥ ॥ श्रुतंगणेशती

र्थस्यमहात्म्यंकमलासन ॥ रुक्मांगदस्यचरितंकौंडिन्यपुरवासिनाम् १ तथापिब्रूहिमेब्रह्मन्मुकुंदाचरितंशुभम् ॥ ॥ ब्रह्मोवाच ॥ ॥ गतेरुक्मांगदेसा तुजज्वालमदनाग्निना २ दावाग्निनायथाग्रीष्मेमहावनस्थलीसुत ॥ मुकुंदानालअच्छर्मवनेशीतलमारुते ३ लतापुष्पमयेस्थानेचंद्रचंदनतोपिच ॥ तस्या नरोचतेहास्यंगीतंनृत्यंकथांतरम् ४ अन्नंजलंविह्वलायास्तच्चित्तायामुनीश्वर ॥ क्षुत्तृट्श्रमेणतस्यास्तुक्षणंनिद्रासमाययौ ५ तामिंद्रोबुबुधेकांतांप्र सुप्तांविजनेवने ॥ कामातुरांविह्वलांचरुक्मांगदकृतेसुत ६ धृत्वारौक्मांगदंरूपंबुभुजेकामुकांतुताम् ॥ आलिलिंगमुदाशक्रोमुकंदाजहृषेभृशम् ७ सापिरुक्मांगदंतंतुचुचुंबेसुभृशंसुत ॥ सोपितस्याःकुचौपीनौममर्ददृढमुष्टिना ८ व्यंशुकांव्यंशुकोरेमेनिःशंकंसतयासह ॥ ततःसालज्जमानेवस्व गृहंप्रत्यपद्यत ९ इंद्रोरुक्मांगदोभूतस्तत्रैवांतर्दधेसुत ॥ मेनेरुक्मांगदोभुक्तस्ततोगर्भंदधौतुसा १० सुषुवेनवमेमासिसुवेलायांसुतंशुभम् ॥ चा रुसर्वांनवद्यांगंरूपेणमदनातिगम् ११ तस्यशब्देनमहताधरण्यांपतितस्यतु ॥ सनादंदशदिग्व्रंदमभूत्खंभूरसातलम् १२ पक्षिणोबभ्रमुःसर्वेउड्डीयो ड्डीयसर्वतः ॥ वाचक्नविःसमायातस्त्यक्त्वास्वंनित्यकर्मच १३ मुकुंदाचरितंतेननैवबुद्धंकदाचन ॥ जातकर्मादिकंसर्वंचकारभृशहर्षितः १४ ददौ दानंयथाशक्तिब्राह्मणेभ्योयथार्हतः ॥ दशाहेतुव्यतीतेसनामकर्माकरोन्मुनिः १५ गृत्समदेत्यनुज्ञातोज्योतिःशास्त्रपरैर्द्विजैः ॥ ततस्तुपंचमेब्देस्यव्रतबं धंचकारह १६ वेदव्रतानिचत्वारिचकारबटुकस्यसः ॥ सकृन्निगदमात्रेणगृण्हातिब्रह्मतेजसा १७ वेदशास्त्रनिधिर्जातःस्वकर्मकुशलोपिच ॥ कदाचित्सुमुहूर्त्तेतुपितावाचक्नविःसुतम् १८ गणानांत्वेतिऋङ्मंत्रंमहांतमुपदिष्टवान् ॥ उवाचचमहामंत्रोवैदिकोखिलसिद्धिदः १९ आगमो क्तेषुमंत्रेषुसर्वेषुश्रेष्ठएवच ॥ ध्यात्वागजाननंदेवंजपैनंस्थिरमानसः २० परांसिद्धिंसमाप्स्यैवख्यातिंलोकेगमिष्यसि ॥ ततोगृत्समदोविप्रोमंत्रंप्रा प्यपितुर्मुखाद् २१ अनुष्ठानरतोभूत्वाजपध्यानपरोभवत् ॥ एवंबहुतिथेकालेगतेतुमुनिपुंगवे ॥ तस्मिन्मगधदेशेयोराजामगधसंज्ञितः २२ चारु रूपोमहामानीदानशूरोरिमर्दनः ॥ नानालंकारशोभाढ्योमहार्हासनसंश्रितः २३ सुधर्मासनगोधीरःपुरुहूतइवापरः ॥ चतुरंगबलोपेतोज्ञानीपंडितमा नदः २४ आमात्यौद्वौज्ञाननिधीवाचस्पत्यधिकौगुणैः ॥ अंबिकानामभार्यास्यचारुरूपागुणाधिका २५ पतिव्रतामहाभागाशापानुग्रहणेक्षमा ॥ त स्यराज्ञःपितुःश्राद्धेसमाजग्मुर्महर्षयः २५ राज्ञाहूतावसिष्ठात्रिप्रमुखाश्रुतिपारगाः ॥ आकारितोगृत्समदस्तपस्वीशुचिमानसः २७ ततःशास्त्रप्रसं गेनप्रौढिंगृत्समदोवदत् ॥ तमात्रिर्वीक्ष्यिगिरयेवमब्रवीन्मुनिसंनिधौ २८ तपस्वीतिभवान्मान्योनमुनिस्त्वंयजस्तव ॥ जन्मरुक्मांगदाज्जातंराजपु त्रंद्विचारय २९ नास्मत्समक्षंपूजार्हइतोगच्छस्वमाश्रमम् ॥ इत्यत्रिवचनंश्रुत्वाक्रोधदीप्तइवज्वलन् ३० दहन्निवत्रिलोकींसभक्षयन्निवतान्मुनीन् ॥

१ विचारयमहत्समते इ०पाठान्तरंसम्यक् ।

अपरेत्वपलायंतसिंहदृष्ट्वायथामृगाः ३१ उवाचतत्रसदसिवसिष्ठादीन्मुनीन्प्रति ॥ ॥ गृत्समदउवाच ॥ ॥ यर्हिरुक्मांगदस्याहंनभवेयंमुनीश्वराः ॥ तदाशापाग्निनायुष्मान्कुर्यांभस्मावशेषितान् ३२ ॥ ॥ ब्रह्मोवाच ॥ ॥ इत्युक्त्वातान्मुनीन्सर्वान्प्रययौमातरंप्रति ॥ पप्रच्छतांगृत्समदोवद दुष्टेतिकामुके ३३ मुकुंदेवदमेतातंनोचेद्भस्मभविष्यसि ॥ आकर्ण्यैवंवचस्तस्यचकंपेभृशविह्वला ३४ मुकुंदामारुतेनेवकदलीकुड्मलान्विता ॥ उवाचदीनयावाचाबद्धांजलिपुटासती ३५ ॥ ॥ मुकुंदोवाच ॥ ॥ मृगयासक्तचित्तोभूद्भ्रष्टसार्थोनृपोत्तमः ॥ त्रैलोक्यसुभगोदृष्टोमयारुक्मांगदःशुभः ३६ अनुष्ठानरतेवाचक्रवौमेभर्त्तरिप्रिये ॥ अनिवार्याःस्त्रियइतिस्मृत्वावाक्यंविधारितम् ३७ तस्मिन्नृपेसक्तमनाजातोस्मिसापिता तव ॥ श्रुत्वेत्थंवचनंतस्यामौनवान्सययौमुनिः ३८ लज्जयाधोमुखःशापमभ्यधाज्जननींप्रति ॥ ॥ पुत्रउवाच ॥ ॥ दुष्टेमूढेपापरतेकाननेकंट कीभव ३९ असंख्येयफलासर्वैःप्राणिभिःपरिवर्जिता ॥ सापिशापंददौतस्मैक्रोधाविष्टासुतायहि ४० जननीत्वमनादृत्ययतःशप्तासलुत्वया ॥ अ तःशपामित्वांपुत्रत्वत्तःपुत्रोतिदारुणः ४१ त्रैलोक्यभयदोदैत्योभविष्यतिमहाबलः ॥ एवंशशपतुस्तौतुमातापुत्रौपरस्परम् ४२ ॥ ॥ कउवाच ॥ ॥ सातदैवशरीरंतत्त्यक्त्वाभूद्बदरीवने ॥ वर्जितापाक्षिसंघातैर्जारजैरंडजैरपि ४३ ततोंतरिक्षेवागासीद्दिव्यागृत्समदोह्यभूत् ॥ सतुगृत्समदोब्रह्मन्ननुष्ठानायज गिमवान् ४४ इदंगृत्समदाख्यानंयःशृणोतिनरोत्तमः ॥ नससंकटमाप्नोतिवांछितंलभतेखिलम् ४५ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेगृत्समदोपा ख्यानंनामषट्त्रिंशत्तमोध्यायः ॥ ३६ ॥ ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ भ्रमन्मुनिर्ददर्शाग्रेवनंपुष्पकसंज्ञितम् ॥ नानाद्रुमलताकीर्णंपुष्पप्रकरशोभितम् १ शोभितंनिर्झरजलैर्निर्जरैर्मुनिसत्तमैः ॥ ननामतान्गृत्समदोन्यवसच्चतदाज्ञया २ तत्रस्नात्वाजपंचक्रेपादांगुष्ठाग्रधिष्ठितः ॥ स्थिरेणमनसाध्यायन्देवंवि घ्नेश्वरंविभुम् ॥ ३ ॥ नासाग्रन्यस्तदृष्टिःसन्निरीक्षन्नदिशोदश ॥ जितेंद्रियोजितश्वासोजितात्मामारुताशनः ॥ ४ ॥ दिव्यवर्षसहस्रंसतपस्तेपेसुदा रुणम् ॥ उन्मील्यनयनंपश्यद्यदागृत्समदोमुनिः ५ तदानेत्रोद्भवोवन्हिस्त्रिदशान्पर्यतापयत् ॥ शशंकिरेतदादेवाःकस्यायंपदमाप्नुयात् ६ अपरं गलितंपत्रंभक्षयन्नेकमेवच ॥ यत्नमास्थायपरमंस्थाणुभूतोतिनिश्चलः ७ दशपंचसहस्राणितेपेनिश्चलमानसः ॥ ततोविनायकोदक्षात्पनंतस्यदु र्घटम् ८ अनुग्रहायतस्याथप्रादुरासीत्सुदीप्तिमान् ॥ यथाधेनुर्वत्सरवंश्रुत्वाधावतिसत्वरम् ९ तथाविनायकोदेवःशीघ्रंगृत्समदंययौ ॥ भासयंस्तेजसाविश्वंसहस्ररविसन्निभः ॥ १० ॥ चलत्कर्णतालोद्भूतहृद्वातिलोलमुदाचारुखेलोल्लसच्चंद्रभालः ॥ बृहत्पद्ममालोज्जगत्कार्यमूलःकरेकंजनालोनम त्सेविमेलः ११ सिंहारूढोदशभुजोव्यालयज्ञोपवीतवान् ॥ कुंकुमागरुकस्तूरीचारुचंदनचर्चितः १२ सिद्धिबुद्धियुतःश्रीमान्कोटिसूर्याधिकद्युतिः ॥

१ तत इतिपद्यं नैकास्मिन्पुस्तकेलिखिते ।

अनिर्वाच्यस्वरूपोपिलीलयासीत्पुरोमुनेः १३ तत्तेजसात्तदंतेजोमुनेस्तस्यमहात्मनः ॥ ब्रह्मस्थतेजसायद्वन्नाक्षत्रंचांद्रजंमहः १४ निमील्यनयने सोथचकंपेभृशंविह्वलः ॥ पपातमूर्छितोभूमौविस्मृतध्यानमंगलः १५ पुनश्चमनसाध्यायन्गजाननमनामयम् ॥ मनसातर्कयन्विघ्ननिमित्तंव्याकुलोमुनिः ॥ १६ किमेतत्क्षोभजननंसहसाससमुपस्थितम् ॥ अद्यप्रभृतियत्तप्तंतत्कथंमेवृथागतम् १७ पाहिदेवेशसर्वात्मन्विघ्नादस्माद्भयानकात् ॥ त्वामृतेशरणं यामिकमन्यंजगदीश्वरम् १८ महद्दुःखंसदादेवप्राप्तंकेनचहेतुना ॥ नास्मत्पंक्तौपूजनीयइतियद्धृतेमनः १९ ॥ ॥ ब्रह्मोवाच ॥ ॥ इतितद्भदितं श्रुत्वाजगादसविनायकः ॥ ॥ गणेशउवाच ॥ ॥ अनुग्रहायसंप्राप्तंविद्धिमांगणनायकम् २० सनकादिभिरप्राप्यंचिरंनियममास्थितैः ॥ त्यक्त्वाभ यंब्रूहियत्तेवांछितंमुनिसत्तम २१ एकांगुष्ठेनतपसातोषितोहंत्वयानिशम् ॥ ॥ ब्रह्मोवाच ॥ ॥ निशम्येत्थंवचस्तस्यदेवदेवस्यशोभनम् २२ दंडवत्प्र णनामैनंनिजानंदपरिप्लुतः ॥ उवाचपरमप्रीतोवरदंतंविनायकम् २३ ॥ ॥ गृत्समदउवाच ॥ ॥ अद्यमेसफलंजन्मतपसोनियमस्यच ॥ अखंडानं दरूपोयोब्रह्मभूयोनिराकृतिः २४ मुंचन्नश्रूणिनेत्राभ्यामानंदेननन्नर्त्तच ॥ चिदानंदघनोवेदशास्त्राणामप्यगोचरः २५ सद्योदृष्टोमयासाक्षादतः किंप्रार्थयेविभो ॥ तवाज्ञयातथाप्येकंप्रार्थयेद्विरदानन २६ चतुराशीतिलक्षासुयोनिषुश्रेष्ठतासुच ॥ मनुष्याणांमहाभागवर्णास्तत्रमहत्तराः २७ तत्रापिब्राह्मणाःश्रेष्ठास्तत्रापिज्ञानिनःपराः ॥ ज्ञानिष्वनुष्ठानपरास्तेषुचब्रह्मवेदिनः २८ ब्रह्मज्ञानंतथाज्ञानंदेहिमेजगदीश्वर ॥ त्वयिभक्तिंच सुदृढामविस्मरणमेवच २९ तवभक्तेषुसर्वेषुश्रेष्ठतांचगजानन ॥ अन्यंचैकंवरंयाचेतंचमेदेहिशंकर ३० तवभक्त्यैकानिलयंत्रैलोक्याकर्षणक्षमम् ॥ विख्यातंत्रिषुलोकेषुनमस्यंसुरमानुषैः ३१ एवंमांकुरुविघ्नेशयदितुष्टोखिलार्थकृत् ॥ वनंचपुष्पकंनाम्नाख्यातियातुसुरेश्वर ३२ अस्मिन्स्थित्वाच भक्तानांकामान्पूरयनित्यदा ॥ इदंचपुष्पकपुरंचतुर्दिक्षुविशेषतः ३३ गणेशपुरमित्येवंप्रथांयातुगजानन ॥ ॥ ब्रह्मोवाच ॥ ॥ इतितद्वचनंश्रुत्वा जगादद्विरदाननः ॥ ॥ गणेशउवाच ॥ ॥ साधुसाधुमहाबाहोप्रसन्नेमयिदुर्लभम् ॥ भक्तानांत्रिषुलोकेषुनकिंचिन्मुनिपुंगव ३५ त्वयायत्प्रार्थितंविप्रत त्तेसर्वंभविष्यति ॥ विप्रत्वंदुर्लभतरंप्रसन्नेनमयार्पितम् ३६ गणानांत्वेतिमंत्रस्यवैदिकस्ययतस्त्वया ॥ जपःकृतोमुनेऽतस्त्वमृषिरस्यभविष्यसि ३७ ब्रह्मादिषुचदेवेषुवसिष्ठादिमुनिष्वपि ॥ ख्यातिंयास्यसिसर्वत्रपरंश्रैष्ठ्यमुपागतः ३८ सर्वेष्वारब्धकार्येषुपूर्वंतेममचापरम् ॥ स्मरणंयेकरिष्यंतितेषांसिद्धि र्भविष्यति ३९ ऋतेज्ञानाद्दैवतर्षिछंदसांकर्मनिष्फलम् ॥ पुत्रश्चबलवान्सर्वदेवानांसुभयंकरः ४० भविष्यतिमहाख्यातिंत्रिषुलोकेषुयास्यति ॥ अ जेयःसर्वदेवानांविनारुद्रंभविष्यति ४१ मद्भक्तोमद्गतप्राणोमन्निष्ठोमत्परायणः ॥ इदंवनगरंदेवयुगेपुष्पकसंज्ञितम् ४२ त्रेतायांमणिपूरंचभान कंद्वापरेपिच ॥ कलौतुभद्रकंनामख्यातंलोकेभविष्यति ४३ अत्रस्नानेनदानेनसर्वान्कामानवाप्नुयात् ॥ ॥ ब्रह्मोवाच ॥ ॥ एवंदत्त्वावरांस्तस्मैतत्रैवां

तदंधेविभुः ४४ तस्मिन्नंतर्हितेतत्रस्थापयामासवैमुनिः ॥ गणेशमूर्तिंप्रासादंकारयामाससुंदरम् ४५ वरदेतिचतन्नामस्थापयामासशाश्वतम् ॥ सिद्धिस्था
नंचतत्रासीद्गणेशस्यप्रसादतः ४६ कामान्पुष्णातिसर्वेषांपुष्पकंक्षेत्रमित्यपि ॥ पूजनात्सर्वसिद्धीनां [illegible]मन्वितः ४७ इमांकथांयःशृणुयान्मु
नींद्रश्रीविघ्नराजस्यवरप्रकाशम् ॥ लभेतकामानखिलान्गणेशभक्तिंदृढांसंहरतेऽपमृत्युम् ४८ ॥ इतिश्रीमद्गणेशपुराणेउपासनाखंडेवरदाख्यानंनामसप्त
त्रिंशत्तमोध्यायः ॥ ३७ ॥ ॥ ७ ॥ ॥ व्यासउवाच ॥ ॥ ततोगृत्समदस्यासीत्कथंवृत्तिःसुरेश्वर ॥ तन्ममाचक्ष्वयत्नेनश्रद्धानस्यपद्मज १ ॥ ब्रह्मोवाच ॥
ततःसर्वेमुनिगणामानयामासुरादरात् ॥ ब्रह्मन्मुनिवरश्रेष्ठनेमुर्गृत्समदंचतम् २ वरदानाद्गणेशस्यवत्रुस्तंयज्ञकर्मणि ॥ सर्वारंभेगणेशस्यपूजनादौचस
स्मरुः ३ एवंविख्यातिमगमत्समुनिर्गणनायके ॥ भक्तिंपरमिकांचक्रेजपन्मंत्रंसुनिश्चलः ४ कदाचित्समुनिर्व्यासचुक्षुभेबलसुत्तरम् ॥ दिशोन
भश्चपृथिवींनादयन्गिरिगह्वरान् ५ अपश्यत्पुरतोयावत्तावद्बालंभयंकरम् ॥ रक्तवर्णंमहानादंजपाकुसुमसन्निभम् ६ तेजोराशिंचमुष्णंतंनेत्रालोकपथंयु
हुः ॥ दृष्ट्वासतादृशंबालंचकंपेभयविह्वलः ७ तर्कयामासमनसाविघ्नःकोयमिहागतः ॥ नजानेगणनाथेनदत्तःपुत्रोममाद्भुतः ८ पश्यतिस्मपुनःसो
मुंचारुवक्त्रंसुलोचनम् ॥ चारुरुक्मांगदंचारुमुकुटंचारुनूपुरम् ९ चारुणाकटिसूत्रेणराजत्कटितटंसुतम् ॥ प्रपच्छतंमुनिःकोसिकस्यासिकिंचिकीर्षसि १०
क्वचतेपितरौस्थानंवदतेजोनिधेर्भक ॥ ॥ ॥ कउवाच ॥ ॥ श्रुत्वेत्थंवचनंतस्यजगादबालकोमुनिम् ११ ॥ ॥ बालकउवाच ॥ ॥
भूतभाविभवज्ज्ञानीकिंमांत्वंपरिपृच्छसि ॥ तथाप्याज्ञावशोवच्मिक्षुतात्तवजानिर्मम १२ त्वमेवजनकोमाताकृपांकुरुममोपरि ॥ पालयस्वपितर्मां
त्वंदीनानिकतिचिन्मुने १३ त्रैलोक्याक्रमणेशक्तोदेवेंद्रंवशवर्तिनम् ॥ करिष्यामिन्नसंदेहोवीक्ष्यसेपौरुषंमम १४ ॥ ब्रह्मोवाच ॥ ॥ इत्याकर्ण्यब
चस्तस्यभयहर्षसमन्वितः ॥ उवाचश्लक्ष्णयावाचामुनिर्गृत्समदोवचः १५ यद्ययंजातमात्रोपिशक्तस्त्रैलोक्यकर्षणे ॥ तस्मादस्यप्रदास्यामिस्वंमंत्र
स्वात्मजस्यहि १६ येनास्यवांछितंदेवःपरितुष्टोविनायकः ॥ प्रदास्यतिजगन्नाथोममकीर्तिर्भविष्यति १७ एवंसंचिंत्यमनसातस्मैस्वंमंत्रमादिशत् ॥
गणानांत्वेतितंचाहकुर्वनुष्ठानमादरात् १८ जपस्वैदंदिकंमंत्रंचित्तंस्थाप्यगजानने ॥ संतुष्टस्तेयदापुत्रसर्वान्कामान्प्रदास्यति १९ एवंप्राप्तमहामंत्रो
जगामतपसेवनम् ॥ एकांगुष्ठनावतस्थेनिराहारोजितेंद्रियः २० ध्यायन्गजाननंदेवंमनसानिश्चलेनसः ॥ जपतस्तस्यवर्षाणिसार्धायुतमितानिच ॥
२१ गतानितस्यमुखतोबभूवाग्निर्दिशोज्वलन् ॥ भयंबभूवदेवानांदैत्यानांतलवासिनाम् २२ ततस्तत्तपसातुष्टआविरासीद्गजाननः ॥ दिशोविति
मिराःकुर्वंश्छादयन्भानुमंडलम् २३ भ्रामयन्पुष्करंचारुशुविषाणंमुदायुतः ॥ तद्धितरवंश्रुत्वाबालकोविह्वलन्निव २४ उन्मील्यनेत्रेसोपश्यद्दे
वंतंपुरतःस्थितम् ॥ चतुर्भुजंमहाकायंनानाभूषाविभूषितम् २५ परशुंकमलंमालांमोदकान्बिभ्रतंकरैः ॥ तेजसाधर्षितस्तस्यधैर्यंकृत्वाननामसः २६

बद्धांजलिपुटोभूत्वाप्रार्थयामासतंविभुम् ॥ ॥ बालकउवाच ॥ ॥ किमांधर्षयसेदेवभक्तंत्वांशरणागतम् २७ भवसौम्यतरोदेवदेहि मेखिलवांछितम् ॥ ॥ ब्रह्मोवाच ॥ ॥ इत्याकर्ण्यवचस्तस्यसंजहारस्वकंमहः २८ उवाचपरमप्रीतोसावधानोभवार्भक ॥ यंध्यायासिदिवा रात्रौसोहंतेवरदोधुना २९ ममेदंपरमंरूपंस्वप्रकाशंजगन्मयम् ॥ नविदुर्ब्रह्मरुद्राद्याःकुतोवेत्स्यंतिमानवाः ३० देवाश्चमुनयःसर्वेनचराजर्षयो परे ॥ नासुराःसिद्धगंधर्वानागानचदानवाः ३१ सोहंतवतपोबद्धोवरंदातुमिहागतः ॥ वरयस्ववराम्मत्तोयान्यांस्त्वंमनसेच्छसि ३२ सउवाच ततोबालोधन्योहंतवदर्शनात् ॥ पिताधन्यतरोमेद्यसार्थकंजन्ममेतपः ३३ स्तुतिंकर्तुंनजानामिबालभावात्सुरेश्वर ॥ यतस्त्वंसर्वजगतांकर्तापाताप हारकः ३४ त्वद्भासाभासयत्येषरविरग्निश्चचंद्रमाः ॥ चराचरंचेतयसेस्वमाहात्म्यान्महामते ३५ महिमानंमहांतंतेकेशाअपिनवैविदुः ॥ यदिने वरदोसित्वंतन्मेदेहिगजानन ३६ त्रैलोक्याकर्षणेशक्तिंविशिष्टांदेहिमेविभो ॥ देवदानवगंधर्वमनुष्योरगराक्षसाः ३७ वश्याममसदासंतुमुनि किन्नरचारणाः ॥ मनसाचिंतितंयन्मेत्तत्तत्सिध्यतुसर्वदा ३८ इंद्रादयोलोकपालाःसेवांकुर्वंतुमेसदा ॥ इहभोगाननेकान्मेमुक्तिंचांतेप्रयच्छच ३९ अन्यं चेतवरंयाचेपुरमेतत्तवाज्ञया ॥ प्रथांयातुयतश्चात्रतप्तमुग्रंतपोमया ४० गणेशपुरमितिचख्यातिंयातुजनेष्टदम् ॥ ॥ गणेशउवाच ॥ ॥ त्रया णामपिलोकानामाक्रमंत्वंकरिष्यसि ४१ सर्वेभ्योनभयंतेस्तिसर्ववश्याश्चतेसदा ॥ आयसंक्रांचनंरौप्यंमयादत्तंपुरत्रयम् ४२ अभेद्यंसर्वदेवानांकाम गंशंकरंविना ॥ त्रिपुरेतिचतेनामख्यातिंलोकेगमिष्यति ४३ यदैकेनचबाणेनशिवोभेत्स्यतितेपुरम् ॥ तदैवयास्यमेमृत्युर्नात्रकार्याविचारणा ४४ अन्यत्तेवांछितंसर्वंमत्प्रसादाद्भविष्यति ॥ ॥ ब्रह्मोवाच ॥ ॥ दत्त्वेत्थंसवरान्देवस्तत्रैवांतर्दधेविभुः ॥ विषादमगमद्देवियोगात्त्रिपुरासुरः ॥ ४५ हर्षंचविपुलंलेभेवरान्प्राप्ययथेप्सितान् ॥ त्रैलोक्यविजयंकर्तुंयततेस्मततोबलात् ४६ !! ॥ इतिश्रीगणेशपुराणेउपासनाखंडेवरप्रदानं नामाष्टत्रिंशत्तमोध्यायः ॥ ३८ ॥ ॥ व्यासउवाच ॥ ॥ ततःकिमकरोद्ब्रह्मन्त्रिपुरोवरदर्पितः ॥ तत्सर्वंकौतुकंमह्यंवक्तुमर्हस्यशेषतः १ ॥ ॥ ब्र ह्मोवाच ॥ ॥ ततःकाश्मीरपाषाणभवांमूर्तिंगजाननीम् ॥ स्थापयामासविधिवद्ब्राह्मणैर्मंत्रकोविदैः २ महांतंकांचनंदिव्यंमणिमुक्ताविभूषितम् ॥ गणेशपुरमध्येसप्रासादंकृतवान्शुभम् ३ उपचारैःषोडशभिःपूजयामासतंविभुम् ॥ नमस्कारैरसंख्यातैःस्तुतिभिःप्रार्थनैरपि ४ क्षमाप्यदेवदेवेश मनुज्ञाप्यययौबहिः ॥ ददौदानान्यनेकानिब्राह्मणेभ्योयथार्हतः ५ ततस्तदभवत्स्थानंबंगालेत्रिपुरस्यह ॥ गणेशपुरमित्येवंसर्वेषांसर्वासिद्धिदम् ६ ततःसत्रि पुरोदैत्योगजाननवरोद्धतः ॥ नृलोकान्पालयामासदेवानामाक्रमेरतः ७ पदातयस्तुरंगाश्चगजाश्चरथिनस्तथा ॥ दशदिग्भ्योययुस्तंतुसेवार्थंबलवत्तराः ८ राजानःसेवकाजाताआनुकूल्येनतस्यह ॥ प्रतिकूलागतामृत्युंयुद्धंकर्तुमनीश्वराः ९ एवमाक्रम्यभूखंडंततोगादमरावतीम् ॥ ततइंद्रोदेवगणैर्नानाशुद्धकरैर्वृ

तः १० ऐरावतसमारूढोययौयुद्धायदंशितः ॥ सोपिसेनांत्रिधाचक्रेचतुरंगांमहाबलः ११ भीमकायंमहादैत्यंवज्रदंष्ट्रंचदानवम् ॥ धनुर्युद्धेगदायुद्धेशस्त्रयुद्धे चकोविदम् १२ अस्त्रयुद्धेमल्लयुद्धेनिष्णातंदैत्यपुंगवम् ॥ भीमकायंमवोचत्सनृलोकस्याधिपोभव १३ कालकूटंवज्रदंष्ट्रंजगादत्रिपुरोबली ॥ त्रिभागयान यायाहिसेनयात्वंरसातलम् १४ शेषमुख्यान्सर्वनागान्वशान्कुरुममाज्ञया ॥ अहंत्रिभागयाशक्रमाक्रमिष्येखिलान्सुरान् १५ भीमकायोवज्रदंष्ट्रोयथाज्ञ मौप्रतस्थतुः ॥ चतुरंगबलैर्युक्तःस्वयंनंदनमाययौ १६ दिव्यान्वृक्षान्बभंजुस्तेवार्यमाणास्तुसैनिकाः ॥ तत्रस्थित्वादैत्यराजोदूतानशक्रायप्राहिणोत् १७ अत्रानयंतुतंशक्रंदर्शनायत्वरान्विताः ॥ वदंतुममवाक्यंवामृत्युलोकंव्रजाधुना १८ तत्रत्वांपालयिष्यामिसाम्रादेह्यमरावतीम् ॥ यदियुद्धेचतेबुद्धिस्तदाशी घ्रंप्रयाहिमाम् १९ तेगत्वाशक्रमाचख्युस्त्रिपुरासुरचेष्टितम् ॥ श्रुत्वेत्थंवचनंतेषांवज्राहतइवाचलः २० चकंपेचाचलरिपुर्वायुनेवयथातरुः ॥ चिंतयाव्याकु लीसूतःकिमेतदितिचिंतयन् २१ क्रोधानलेनजज्वालसंरक्ताखिललोचनः ॥ कुर्वन्भस्मेवलोकानांशोषयन्निववारिधीन् २२ उवाचदूतान्गच्छंतुयांतुयुद्धा यसत्वराः ॥ स्वयमैरावतारूढोजगर्जसुरशत्रुहा २३ तेननादेनमहताक्षोभयन्भुवनत्रयम् ॥ श्रुत्वातद्वचनंतेतुगतादूतायथागतम् २४ विबुधाश्चापिसन्नद्धा नानाशस्त्रासिपाणयः ॥ भिंडिपालकराःकेचित्केचिच्छक्तर्यृष्टिपाणयः २५ मुद्गरासिधराःकेचिद्धनुर्बाणकराःपरे ॥ गदाखेटकराःकेचित्केचित्तुदंडपाणयः २६ एवंदेवगणैर्युक्तोवज्रभृन्निर्ययौबहिः ॥ कृतस्वस्त्ययनोविप्रैर्नानावादित्रनिस्वनैः २७ त्रिपुरोदूतवाक्येनज्ञात्वायुद्धोद्यमंतुतम् ॥ सन्नद्धामकरोत्सेनांप्रहृष्टांचतु रंगिणीम् २८ असंख्यातांसमादायहयारूढोभिनिर्ययौ ॥ परस्परंददृशतुस्तेसेनेवीरभूषणे २९ कोलाहलोमहानासीद्बृंहितैर्हेषितैरपि ॥ क्ष्वेडितैरथ घोषैश्चवाद्यघोषैरनेकधा ३० ततोहुंकारमात्रेणनोदितास्त्रिपुरेणते ॥ वीरायुयुधिरेदेवैःससंमर्दोमहानभूत् ३१ नाभूत्स्वपरबोधोपिजघ्नुरेवपरस्प परम् ॥ एवंसुतुमुलेजग्ध्येमृतास्तेदानवाबहु ३२ सुमनसोपिपतितादैत्यशस्त्रप्रपीडिताः ॥ बभुस्तेसैनिकास्तत्रपुष्पिताइवकिंशुकाः ३३ अ शय्याःशयिताःकेचिदंघ्रिहीनास्तथापरे ॥ क्रमेलकागजाध्यक्षारथाश्वाश्वपदातिनः ३४ ततःपलायनपरादैत्यायातादिशोदश ॥ सिंहंदृष्ट्वैवस हसामृगाजीवनकांक्षिणः ३५ ततोनिवार्यतत्सैन्यंवृंदारकरिपुःस्वयम् ॥ क्रोधानलमहाज्वालोगर्जन्मेघइवापरः ३६ शक्रसान्निध्यमगमद्भक्षयन्नि वरोदसी ॥ स्वस्वडेनाहनत्तीव्रंहस्तंवज्रधरंहरेः ३७ वज्रंपपाततद्धस्तात्तदद्भुतमिवाभवत् ॥ तदादायाहनद्दैत्यस्तेनैवैरावतंगजम् ३८ ऐरा वतःप्रहारेणपलायनपरोययौ ॥ ततोजघानसहरिर्मुष्टिनादैत्यपुंगवम् ३९ सक्षणंपतितोभूमौततउथायवेगवान् ॥ जघानमुष्टिनाशक्रंधर ण्यांतमपातयत् ॥ ४० ॥ ततउत्थायमघवादैत्यंप्राहरुषान्वितः ॥ इदानींमल्लयुद्धायसज्जीभवासुरेश्वर ॥ ॥ ४१ ॥ ततःसविस्मयाविष्टउवाचबलगर्वि

१ वीरयोधेषीवकायंसेतिपाठः ।

तः ॥ किमर्थंत्वंनिजप्राणेनिर्दयोसिसुरेश्वर ४२ कृमिकीटपतंगानांप्राणोतीवप्रियोमतः ॥ गच्छदेवधरण्यांतेस्थानंदत्तंमयाशुभम् ॥ ४३ ॥ ॥ ब्रह्मो
वाच ॥ ॥ इतितद्वचनंश्रुत्वाजगादबलवृत्रहा ॥ यद्यहंजीवितास्त्वांहिमोचयामिनचेद्विपो ४४ तदाहंधरणींयामित्वदाज्ञावशगोधम ॥ त्वमेवहतमू
र्धाद्यधरणींयास्यसेखल ४५ वदत्येवंतुदेवेंद्रेदैत्येंद्रोनिजघानतम् ॥ मुष्टिनाहृदयेदुष्टस्ततोयुद्धमभूत्तयोः ४६ चाणूरकृष्णयोर्यद्वत्परस्परजयैषिणोः ॥ हृद
यंहृदयेनैवहस्तंहस्तेनजघ्नतुः ४७ जानुभ्यांजानुनीचोरुताभ्यांतौचनिजघ्नतुः ॥ मस्तकंमस्तकेनैवकूर्परंकूर्परेणतु ४८ पृष्ठंपृष्ठेनपादाभ्यांपादौतावभिजघ्नतुः॥
पादौगृहीत्वादैत्योऽस्यभ्रामयित्वामुहुर्मुहुः ४९ तत्याजदूरतःशक्रंयथानज्ञायतेक्वचित् ॥ आरुरोहस्वयंतंतुचतुर्दंतंगजेश्वरम् ५० ततोदेवगणाःसर्वेहिमवद्गिरि
गह्वरम् ॥ ययुःशक्रंविचिन्वंतोदैत्यसंत्रासतापिताः ५२ कुत्रवापतितोदेवोद्रक्ष्यामोवाकथंविभुम् ॥ एवंसंचिंतयंतस्तेभ्रमंतोदद्दशुश्चतम् ५२ अधोमुखंसमा
यांतंदेवेंद्रंतंततोदैवह ॥ प्रणेमुर्देवसंघास्तमालिलिंगुस्तथापरे५३पूजयामासुरपरेवीजयामासकश्चन ॥ पादसंवाहनंचास्यचक्रुःकेचनभक्तितः ५४ तत्रैवन्यवसन्सर्वे
गुप्तरूपाःसुरास्तदा ॥ दैत्यस्त्वैरावतारूढोययौतामरावतीम् ५५ देवस्थानानिदैत्यानामिंद्रासनगतःस्वयम् ॥ ददौविभज्यप्रत्येकंमानपूर्वंसुरद्विषाम् ५६
दिव्यवादित्रनिर्घोषैःशृण्वन्गांधर्वनिस्वनान् ॥ किन्नरैःसेव्यमानस्तुरेमेचाप्सरसांगणैः५७ ॥इतिश्रीगणेशपुराणेउपासनाखंडेइंद्रपराजयोनामैकोनचत्वारिंशो
ध्यायः ॥ ३९ ॥ ब्रह्मोवाच ॥ आक्रम्यदेवधिष्ण्यानिदैत्योगाद्ब्रह्मणःपदम् ॥ पराक्रमंदैत्यकृतंश्रुत्वादेवमुखात्पुरा १ ब्रह्मायययौनाभिपद्मंविष्णुःक्षीरनिधिंय
यौ ॥ दैत्यस्यमानसौपुत्रौप्रचंडश्चंडएवच २ प्रचंडंस्थापयामासब्रह्मलोकेधिनायकम् ॥ ततश्चंडंचवैकुंठेचकारस्वामिनंस्वयम् ३ ततःकैलासमगमत्तंचदोर्भ्यां
मचालयत् ॥ भयभीताचगिरिजालिलिंगेशंकरंभृशम् ४ ततःकैलासमगमद्युद्धाकांक्षीमहासुरः॥ तेनतुष्टोमहादेवोदैत्यस्यपौरुषेणच ५ बहिर्ययौवरंदातुंनिजभ
क्तसुखप्रदः ॥ ददर्शत्रिपुरंदैत्यंवरवृष्णित्यथाब्रवीत् ६ सवव्रेयदितुष्टोसिदेहिकैलासमद्यमे ॥ गच्छमंदारशिखरंयावन्मममनोरथः ७ शंकरोपिददौतस्मैकैलासं
स्वस्पकालिने ॥ स्वयंजगामागिरिशोमंदराद्रिंगणैर्वृतः ८ कैलासशिखरारूढोजहर्षत्रिपुरासुरः ॥ एवंदेवान्वशेकृत्वापुनरायाद्रसातलम् ९ भीमकायोपिबलवान्
भूमंडलगतोबलात् ॥ वशेचकारनृपतीनृषीन्सर्वान्बबंधच १० अग्निकुंडानिसर्वाणिदेवतृप्तिकराणिच ॥ आश्रमांश्चबभंजाशुतीर्थानिचविशेषतः ११ तापसां
स्त्रासयामासकारागारसमाश्रयात् ॥ स्वाहास्वधावषट्कारान्वेदस्याभ्यसनानिच १२ सदाचारान्सदाद्वेष्टिसर्वगर्वसमन्वितः ॥ वज्रदंष्ट्रोथसप्तापिपातालानिवशे
नयत् १३ शेषंचवासुकिंचैवतक्षकंसर्वभोगिनः ॥ निर्विषान्सविषांश्चैवचकारवशवर्तिनः १४ वज्रदंष्ट्रोरत्नजातंबुभुजेप्रेषयच्चतम् ॥ नागांगनाभिश्चकुतूहलेनरमे
सदासौसमदोतिहर्षात् ॥ भोगान्विभुंजन्विविधानिरत्नान्यादाययातस्त्रिपुरांतिकेसः १५ पातालवश्यतांशंसन्लेभेमानंततोधिकम् १६ वस्त्राणिचमहार्हा
णिग्रामान्दासाननेकशः ॥ एवंत्रिलोकान्वशगानकृत्वादैत्योननंदह १७ देवाःसर्वेगुहावासाश्चिंतयामासुरन्वहम् ॥ कथमस्यवधःकस्मिन्कालेवापिभविष्य

ति १८ कस्माद्वेतिनजानीमोलब्धोनेनवरःकुतः ॥ एवंव्याकुलचित्तेषुसुरेषुमुनिसत्तम १९ आययौनारदस्तत्रत्रैलोक्यचरइच्छया ॥ ददर्शदीनान्देवांस्तानुत
तारनभःपथाद् २० दृष्ट्वासर्वेनारदंतमुत्तस्थुःसहसादराद् ॥ आलिलिंगुश्चनेमुश्चपुपूजुश्चयथाक्रमम् २१ विश्रांतंपरिपप्रच्छुस्त्रिपुरस्यवरादिकम् ॥ ॥
॥ देवाऊचुः ॥ त्रिपुरेणसमाक्रांतंत्रैलोक्यंसचराचरम् २२ स्थानानिनोगृहीतानिकेशास्तेनापिनिर्जिताः ॥ शरणंकंत्रजामोद्यकथंतस्यवधोभवेद् २३ वरा
श्चकेनदत्तानोवदास्यत्रिपुरस्यप्रभोः ॥ ॥ नारदउवाच ॥ कथयामिसमासेनदैत्यस्यचेष्टितंमहद् २४ दिव्यंवर्षसहस्रंसततापपरमंतपः ॥ प्रसादयामासविभुंग
णेशंदेवनायकम् २५ तेनास्मैदुर्धरादत्तावराःसर्वभयंकराः ॥ देवर्षिपितृभूतेभ्योयक्षरक्षःपिशाचतः २६ ननागेभ्योभयंदत्तंविनैकंशंकरंविभुम् ॥ प्रसादयंतुदेवेशं
द्विरदाननमादराद् २७ आराधयंतुसर्वेपिविघ्नेशंसर्वसिद्धिदम् ॥ देवाऊचुः ॥ कथमाराधनंतस्येदवदेवस्यधीमतः २८ कर्त्तव्यंमुनिशार्दूलकृपयातद्वदस्वनः ॥
नारदउवाच ॥ अहमेकाक्षरंमंत्रंकथयाम्यखिलान्प्रति २९ तेनमंत्रेणतेसर्वेमयादत्तेनभक्तितः ॥ अनुष्ठानंप्रकुर्वंतुसर्वेपिस्थिरमानसाः ३० यावत्प्रत्यक्षतामेति
देवोसौगणनायकः ॥ सएवतद्वधोपायंवदिष्यत्यखिलान्प्रति ३१ नान्योपायंप्रपश्यामितस्मात्कुर्वंतुमेवचः ॥ ॥ ब्रह्मोवाच ॥ ॥ इत्युक्त्वानारदःसर्वानुप
दिश्यमनुंचतम् ३२ जगामतत्क्षणादेववीणागानरतोमुनिः ॥ ततःसर्वेसुरवरागणेशध्यानतत्पराः ३३ एकपादस्थिताःकेचित्केचित्पद्मासनस्थिताः ॥
केचिद्वीरासनयुताःकेचिन्मीलितलोचनाः ॥ निराहाराजितश्वासाजेपुर्मंत्रंमुनीरितम् ३४ ततोबहुगतेकालेकरुणाब्धिर्गजाननः ॥ अनुष्ठानंनिरीक्ष्यैषांदे
वानांचिरकालजम् ३५ आविर्बभूवगणपस्तेषामग्रेवरप्रदः ॥ उल्लसत्स्वर्णमुकुटश्चारुकुंडलमंडितः ३६ दंतन्यस्तकरोराजवत्कटिसूत्रवरांगदः ॥ पाशं
सृणिंचपरशुंकमलंचभुजैर्दधत् ३७ रक्तचंदनकस्तूरीसिंदूरशशिभूषणः ॥ विद्युत्तेजोलसत्कांतिःकोटिसूर्यसमप्रभः ३८ दृष्ट्वैवंसहसादेवंविना
यकमनामयम् ॥ तेजसाधर्षिताःसर्वेभयमापुश्चकेचन ३९ प्रणेमुःसहसाकेचिद्देवास्तंद्विरदाननं ॥ पूजयामासुरपरेहर्षगद्गदभाषिणः ४० स्वसंकष्ट
विनाशायतुष्टुवुःकेपितंविभुम् ॥ प्रसादसुमुखंदेवंसुमुखंसंकटापहम् ४१ ॥ ॥ देवाऊचुः ॥ ॥ नमोनमस्तेपरमार्थरूपनमोनमस्तेखिलकारणा
य ॥ नमोनमस्तेखिलकारकायसर्वेंद्रियाणामधिवासिनेपि ४२ नमोनमोभूतमयायतेस्तुनमोनमोभूतकृतेसुरेश ॥ नमोनमःसर्वधियांप्रबोधनमोन
मोविश्वलयोद्भवाय ४३ नमोनमोविश्वभृतेखिलेशनमोनमःकारणकारणाय ॥ नमोनमोवेदविदामदृश्यनमोनमःसर्ववरप्रदाय ४४ नमोनमोवाग
विचारभूतनमोनमोविघ्ननिवारणाय ॥ नमोनमोऽभक्तमनोरथघ्ननमोनमोभक्तमनोरथज्ञ ४५ नमोनमोभक्तमनोरथेशनमोनमोविश्वविधानदक्ष ॥
नमोनमोदैत्यविनाशहेतोनमोनमःसंकटनाशकाय ४६ नमोनमःकारुणिकोत्तमायनमोनमोज्ञानमयायतेस्तु ॥ नमोनमोज्ञानविनाशनायनमो
नमोभक्तविभूतिदाय ४७ नमोनमोऽभक्तविभूतिहंत्रेनमोनमोभक्तविमोचनाय ॥ नमोनमोभक्तविबंधनायनमोनमस्तेप्रविभक्तमूर्ते ४८ नमोनमस्त

त्वविबोधकायनमोनमस्तत्त्वविदुत्तमाय ॥ नमोनमस्तेखिलकर्मसाक्षिणेनमोनमस्तेगुणनायकाय ४९ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवंस्तुतःसुरैर्देवो द्विरदाननईश्वरः ॥ उवाचपरमप्रीतोहर्षयन्सुरसत्तमान् ५० ॥ ॥ गणेशउवाच ॥ ॥ स्तोत्रेणतपसाचैवसुराःसंतुष्टिमागतः ॥ ददामिसकलाभीष्टं तद्भृणुध्वंसुरेश्वराः ५१ ॥ ॥ देवाऊचुः ॥ ॥ यदितुष्टोसिदेवेशत्रिपुरंजहिदानवम् ॥ सर्वेषामधिकारान्नोगृहीत्वायस्तुतिष्ठति ५२ त्वयैवास्या भयंदत्तंसर्वामरसमूहतः ॥ अतःस्मसंकटंप्राप्ताःसंकटान्मोचयाशुनः ५३ त्वामेवशरणंप्राप्ताएषएववरोहिनः ॥ ॥ गणेशउवाच ॥ ॥ वारयिष्येभयं सर्वंतस्मात्घोरतराद्विवः ५४ भवत्कृतमिदंस्तोत्रमतिप्रीतिकरंमम ॥ संकष्टनाशनमितिविख्यातंचभविष्यति ५५ पठतांशृण्वतांचैवसर्वकाम प्रदंनृणाम् ॥ त्रिसंध्यंयःपठेदेतत्संकष्टंनाप्नुयात्क्वचित् ५६ ॥ ॥ ब्रह्मोवाच ॥ ॥ इतिदत्त्वावरंतेषांसुराणांजगदीश्वरः ॥ पश्यतांमुनिदेवानां तत्रैवान्तर्दधेविभुः ५७ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेस्तोत्रनिरूपणंनामचत्वारिंशोध्यायः ॥ ४० ॥ ॥ ७ ॥ ॥ व्यासउवाच ॥ वरदेनगणेशेनप्रभुणासर्वकारिणा ॥ किंकृतंतन्ममाचक्ष्वपृच्छतेचतुरानन ॥ ॥ ब्रह्मोवाच ॥ ॥ ततोगजाननोविप्ररूपेणत्रिपुरंययौ ॥ म हार्हासनसंविष्टंददर्शाद्विजसत्तमः २ सउत्थायनमस्कृत्यस्वासनेचोपवेशयत् ॥ संपूज्यपरिपप्रच्छकुतआगम्यतेद्विज ३ काविद्याकिंचतेनामपृ च्छतेब्रूहिमेद्विज ॥ प्रयोजनंचकिंतेस्तिशक्तिश्चेत्करवामहे ४ ॥ ॥ द्विजउवाच ॥ ॥ सायंगृहावयंदैत्यसर्वज्ञाःसर्ववेदिनः ॥ इच्छाविहारालोकानां भ्रमामोहितकाम्यया ५ कलाधरेत्येवनाम्नाविख्याताभुवनत्रये ॥ द्रष्टुकामावैभवंतेसंप्राप्ताभवनंतव ६ अखिलाःसंपदस्तेतुदृष्ट्वात्माःस्मसांप्रतम् ॥ नकैलासेनवैकुंठेब्रह्मलोकेपिनेदृशी ७ पदेशक्रेनवैसंपद्यादृशीदृश्यतेतव ॥ ॥ दैत्यउवाच ॥ ॥ नाममात्रंकलाधारःकिंवाजानासितांद्विज ॥ ८ ॥ संपदःसर्वलोकेषुयाभ्यएतांप्रशंससि ॥ जानासिचेद्दर्शयमेतासांमध्येमहोत्कटाम् ९ दृष्ट्वादास्येवांछितंतेप्रियंप्राणमपिद्विज ॥ नस्मरेपरिहासेपेवितथं भाषितंमुने १० ॥ ॥ कलाधरउवाच ॥ ॥ परेषांसंपदंदृष्ट्वाकिंस्यात्तवसुरद्विष ॥ विनयात्तेप्रसन्नोहंकलयातेददामिवै ११ कांचनंराजतंलोहांत्रिपुरंश रसंस्थितम् ॥ रमतत्रस्थिरोदैत्याचिरकालंयथासुखम् ॥ १२ ॥ अभेद्यंदेवगंधर्वैर्नानुषैरुरगैरपि ॥ कल्पितार्थप्रदंनत्तेकामगंकामदंशुभम् १३ यदैकेनबाणेनकस्मिंश्चित्कालपर्यये ॥ भेत्स्यतेतद्धरोदैत्यतदानाशमवैष्यति १४ ॥ ॥ ब्रह्मोवाच ॥ ॥ इत्युक्त्वाधनुरादायसंस्तभ्यशरमंतरा ॥ पुरत्रयंनि र्ममेसौभुवनत्रयसन्निभम् १५ विचित्रैर्भवनैरम्यैर्दीर्घिकारामसंयुतैः ॥ नानापक्षिगणैर्जुष्टंसर्वकामप्रदंखगम् ॥ १६ ॥ माययामोहितोदैत्यस्तत्रस्थो जत्दृषेभृशम् ॥ जगर्जघनवद्दैत्योलोकत्रयविकंपनः ॥ १७ ॥ नमत्तःश्रेष्ठइत्येवंगर्वदर्पसमन्वितः ॥ त्रैलोक्यंक्षोभयामासब्राह्मणंतमथाब्रवीत् ॥ १८ ॥

---

१ अकस्मात्कदनंप्राप्ताः इतिपाठान्तरम् ॥ २ ब्रह्मेत्यारभ्यपद्यंमुद्रितपुस्तकेन ॥

याचस्वदुर्लभतरंतत्तेदास्येद्विजोत्तम ॥ इत्युक्त्वासद्विजःप्राहतंदैत्यंनिस्पृहोपिसन् १९ ॥ ॥ द्विजउवाच ॥ ॥ अहंकैलासमगमंदृष्टवान्मूर्त्तिमुत्तमाम् ॥ शिवेनपूजितांसम्यग्गाणेशींचिंतितार्थदाम् २० तामानयत्वंमेदेहिशक्तिर्यद्यसुरेश्वर ॥ नैतादृशीमयामूर्तिर्दृयैलोक्यंचरतेक्षिता ॥ २१ ॥ अतोममनस्तस्यामासक्तंदैत्यसत्तम ॥ तांप्राप्यकृतकृत्योहंभविष्याम्यसुरेश्वर २२ कीर्तिंतेप्रथयिष्यामित्रैलोक्येसचराचरे ॥ नदातात्रिपुराच्छ्रेष्ठोवांछितंयःप्रयच्छति २३ ॥ ॥ दैत्यउवाच ॥ ॥ शंकरंकिंकरंमन्येगणयेनचदेवताः ॥ आनयित्वाप्रदास्यामितांमूर्त्तिंद्विजपुंगव २४ ॥ ॥ ब्रह्मोवाच ॥ ॥ इत्युक्त्वा पूजयामासतंकलाधरमादरात् ॥ ददौतस्मैदशग्रामान्गोवस्त्रभूषणानिच २५ मुक्ताफलानिभूरीणिमहार्हाणीजराणिच ॥ रत्नानिचप्रवालानिरांकवास्तरणानिच २६ दासीदासशतंनानाभूषायुक्तंददेसुरः ॥ सदश्वान्सवरूथांश्चस्वर्णाक्षान्राजतान्रथान् २७ प्रगृह्यैतद्बलाद्दत्तंप्रययौसकलाधरः ॥ स्वाश्रमंहर्षयन्पत्नींसर्वानाश्रमवासिनः २८ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवंचसर्ववृत्तांतंनारदेकथयत्सुरान् ॥ तेपिकालंप्रतीक्षंतोदिवसानतिचक्रमुः २९ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेनारदागमनोनामैकचत्वारिंशत्तमोध्यायः ४१ ॥ ॥ व्यासउवाच ॥ ॥ कृतवान्किमुदैत्यःसगतेतस्मिन्कलाधरे ॥ कथमानीयदत्तास्मैमूर्तिंश्चिंतामणेःशुभा १ एतत्कथयमेसर्वंविस्तार्यचतुरानन ॥ लीलागजाननीःशृण्वन्नतृप्यामिसमासतः ॥ २ ॥ ॥ ब्रह्मोवाच ॥ ॥ तस्मिन्गतेयदकरोत्सदैत्योमुनिसत्तम ॥ तत्सर्वंकथयिष्यामिशृणुष्वावहितोमुने ३ दूतौसंप्रेषयामासमंदराद्रिस्थितंशिवम् ॥ आशिक्षयच्छिवंगत्वाब्रूतंमद्वाक्यमादरात् ४ मूर्त्तिश्चिंतामणेस्तेस्तिगृहेसर्वार्थदाशुभा ॥ देहितांदैत्यराजायसाम्नैवगिरिजापते ॥ ५ ॥ पातालेस्वर्गलोकेवामर्त्ये वापुनरद्भुतम् ॥ तत्सर्वंतेनदैत्येनह्यानीतंस्वगृहेबलात् ६ शीघ्रमानीयतांदेवयावोदैत्यंमहाबलम् ॥ नदास्यसेयदासाम्नातदादैत्यःपराक्रमी ॥ ७ ॥ ग्रहीष्यतिबलात्तांतुततोदुःखमवाप्स्यसि ॥ इतिदैत्यवचःश्रुत्वाजग्मतुःस्तौशिवंप्रति ८ आहतुस्तौमहादेवंदैत्यराजेनशिक्षितम् ॥ इत्थंदूतवचःश्रुत्वात्रिनेत्रःक्रोधमूर्छितः ९ उवाचदूतौदूतौवामितिकृत्वाक्षमेवचः ॥ कामस्येवभवेद्भस्मनोचेद्वांनात्रसंशयः १० किंकार्यंतेनदैत्येनतृणीभूतेनमेविभोः ॥ आयातुयुद्धमेवास्तुमर्त्तुकामोममांतिकम् ११ नेयंमूर्त्तिस्तेनशक्याप्राप्तुंजन्मशतैरपि ॥ प्रलयाग्निःपतंगेनकिंशांतिमधिगच्छति १२ मेरोःपातोमूषकेनशक्यःकर्त्तुंकिमोजसा ॥ असंख्यजलनिष्काशाच्छुष्कःस्यात्किमहोदधिः १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ श्रुत्वातुशांकरींवाणींदैत्यौयातौयथागतम् ॥ अब्रूतांस्वामिनंवाक्यंशंभुनायदुदीरितम् १४ तदाकर्ण्यप्रजज्वालदैत्योवाक्यार्थकोविदः ॥ क्रोधानलेनदीप्तोसौत्रैलोक्यंप्रदहन्निव १५ आज्ञापयच्चयुद्धायस्वसेनांचतुरंगिणीम् ॥ निर्गतासहसासेनामंदराचलसंमुखा १६ भूतलंछादयामासनिर्मर्यादोयथांबुधिः ॥ अनेकसूर्यसंकाशाविकोशैःशस्त्रसंचयैः १७ गर्जंतीघनवद्घोरंमृत्योर्मानसकंपिनी ॥ दैत्यश्चत्रिपुरमारुह्यविमानसदृशंमहत् १८ मनोवेगंततःपश्चाज्जिघांसुःशंभुमाययौ ॥

बृहन्मणिमयंचारुकवचंकुंडलेगदे १९ मुक्तामालांमुद्रिकाश्चकटिसूत्रंचकांचनम् ॥ मुकुटंरत्नखचितंमहावीर्यबिभ्रदुल्लसत् २० यस्यशब्देनम
हताचकंपेहरमानसम् ॥ तद्धनुःसनिषंगंचकौमोंखेटमसिंदृढम् २१ शुशुभेशक्तिकादिव्यावहन्यांदैत्यपुंगवः ॥ गायमानानर्तमानागंधर्वाप्सरसांगणाः
२२ बंदिनश्चारणाश्चापियय्युरस्याग्रतोमुदा ॥ शंकरोदूतवाक्येनश्रुत्वादैत्यंसगागतम् २३ असंख्यबलसंयुक्तंयुयुत्सुंकालकर्षितम् ॥ शूलपाणिरपि
तदासंपूज्यद्विरदाननम् २४ प्रणम्यतंपरिक्रम्यपुरस्कृत्यबलंबलात् ॥ आययौक्रोधदीप्ताक्षःस्वस्थलाद्रणमंडलम् २५ तेवीरावीरशब्देननादयंतोदि
शोदश ॥ अभिजग्मुःप्रहरणैःपरस्परवधेप्सवः २६ अभूतांमीलितेसैनेरजस्तामिरसंकुले ॥ स्वपरज्ञानरहितेजघ्नतूरणमूर्द्धनि २७ अभवत्तुमु
लंयुद्धंनप्राज्ञायतकिंचन ॥ गजाश्वरथवीराणांहतानांशोणितोक्षिते २८ शांतेरजस्ययुद्ध्यंतवीरावीरैःपृथक्पृथक् ॥ केचित्प्रासैःकेपिखड्गैःकेचिद्बाणैः
शिलाशितैः २९ ऋष्टिभिर्मुष्टिभिःकेचित्केचित्परशुतोमरैः ॥ हतानांतत्रवीराणांहयानांचपदातिनाम् ३० असृक्नदीसमभवत्केशशैवलवाहि
नी ॥ खेटकूर्माखड्गमत्स्याशिरःकमलभूषणा ३१ छत्रावर्त्ताघोरतरकबंधवृक्षवाहिनी ॥ वीरसंतोषजननीगृध्रगोमायुहर्षकृत् ३२ दृष्ट्वानदींतुगिरि
शोययौदैत्यांतिकंबली ॥ दैत्योपित्रिपुरारूढोययौतस्यपुरःपुरः ३३ नायकौसंगतौदृष्ट्वाद्वंद्वशोन्येपरस्परम् ॥ अव्याकुलंयुयुधिरेदैतेयाःशांभवास्तदा ३४
नानाप्रहरणैर्दिव्यैःशस्त्रैरस्त्रैर्द्रुमैरपि ॥ तेषांयुद्धानिनामानिकथयिष्येसमासतः ३५ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेयुद्धवर्णनंनामाद्विचत्वारिंशत्तमो
ध्यायः ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ॥ अयुध्येतांद्वंद्वशोथगिरिशासुरनायकौ ॥ षण्मुखेनप्रचंडश्चनंदिनाचंडएवच १ युयुधेपुष्पदंतोपिभीमकाये
नवीर्यवान् ॥ भृशुंडीकालकूटेनविषवत्प्राणहारिणा २ अयुध्येतांवीरभद्रवज्रदंष्ट्रौमहाबलौ ॥ इंद्रोपियुयुधेतत्रदैत्यामात्येनवीर्यवान् ३ दैत्ययुत्रेण
बलिनाजयंतोयुद्धदुर्मदः ॥ काव्येनयुयुधेतत्रसुराचार्योस्त्रवित्तमः ४ देवानांचैवदैत्यानामेवंद्वंद्वान्यनेकशः ॥ वर्णितुंनैवशक्यानिमयावर्षशतैरपि ५
रथिनोरथिभिःसार्धंगजिनोगजिभिःसह ॥ अश्वारोहाःस्वसदृशैःपदाताश्चपदातिभिः ६ युयुधुःसंयुगेवीरेनानावाद्यनिनादिते ॥ हेषितैर्बृंहितैःश्वेडै
र्नामिनादैश्चशब्दिते ७ केचिन्मल्लयुद्धेनयुयुधुर्विविधेनतु ॥ जघ्नुरंगानिचांगेषुत्यक्त्वाशस्त्राग्निसंयुगे ८ ततःप्रचंडोनवभिस्ताडयामासषण्मुखम् ॥
आकर्णकर्षनिस्तैर्दृढैर्बाणैःशिलाशितैः ९ अप्राप्तानेवताञ्छित्वाशरैःसन्नतपर्वभिः ॥ कार्त्तिकेयःपंचभिस्तंताडयामाससायकैः १० संमूर्छितोपतद्भू
मौप्रचंडोभ्रांतमानसः ॥ नंदिनापिहतश्चंडःपंचभिर्निशितैःशरैः ११ मूर्छामवापसहसापतितोधरणीतले ॥ भीमकायःपुष्पदंतमविध्यद्दशभिःशरैः ॥
१२ छेदयामाससमरेस्वशरैर्निशितैःसतान् ॥ त्रिभिरेवाहनत्तंचसोपिभूतलमाश्रितः १३ कालकूटंभृशुंडिस्तुपातयामासपंचभिः ॥ शरैर्महाबल
स्तत्रवीरभद्रोरुषायुतः १४ वज्रदंष्ट्रंततोजघ्नेचतुर्भिर्निशितैःशरैः ॥ तानिवार्यस्वयंजघ्नेवीरभद्रंत्रिभिःशरैः ॥ १५ ॥ तानापततएवाशुवीरभद्रोच्छिन

त्रिभिः ॥ पातयामासवेगेनवज्रदंष्ट्रैस्त्रिभिःशरैः १६ इंद्रोपिवज्रपातेनदैत्यामात्यंन्यपातयत् ॥ उद्यम्यनिशितंखड्गंदैत्यपुत्रःसमाययौ १७ हंतुकामो जयंतंतंवीरेषुपतितेषुच ॥ तंनिरीक्ष्यतथायांतंखड्गंचिच्छेदपत्रिणा १८ जयंतोभ्यहनच्छीघ्रंदैत्यसूनुंत्रिभिःशरैः ॥ तैराहतोवमन्रक्तंन्यपतन्मोहसंयुतः १९ एवंसर्वेषुसैन्येषुप्रभग्नेषुसमंततः ॥ दृष्ट्वापलायनपरान्दैत्यान्देवगणार्दितान् २० अधावन्पृष्ठतःकेचित्प्रमथाजयशालिनः ॥ एवंजयत्सुदेवेषुस्वसैन्येविद्रुतेपिच २१ आययौस्वयमेवेशंत्रिपुराधिष्ठितोसुरः ॥ शस्त्रयुद्धंपुराकृत्वायुध्येतामस्त्रतोद्भुतौ ॥ २२ ॥ वारुणास्त्रंजहौदैत्योवृष्टिर्घोरतराभवत् ॥ नीहारबहुलेयुद्धेनप्राज्ञायतकिंचन २३ क्वचिद्विद्युत्प्रकाशेनस्वपरज्ञानकारिणा ॥ युद्धमासीत्तुतुमुलंघोररूपंदुरासदम् २४ विलोक्यसैन्यंतत्सर्ववृष्टिवातप्रपीडितम् ॥ शिलापातभयाद्यातेस्वसैन्येतुदिशोदश २५ वायव्यमस्त्रंगिरिशोमोचयामाससत्वरम् ॥ महावातान्महामेघाविशीर्णाःखंडशोंबरे २६ वातेनघूर्णितासेनादैत्यानांसर्वतोदिशम् ॥ जगलुःपक्षिपिच्छानिवीरोष्णीषाणिदूरतः २७ पतिताश्चूर्णिताःकेचिद्रथाश्वगजपत्तयः ॥ उन्मूलितालतावृक्षाश्छादयंतिस्मसैनिकान् २८ पन्नगास्त्रेणतंवायुंतथादैत्योन्यवारयत् ॥ आकर्णंधनुराकृष्यतूणाद्बाणंप्रगृह्यच ॥ २९ ॥ मंत्रयन्नलास्त्रेणशिवसैन्येन्यपातयत् ॥ अंगारवृष्टिःसहसापतितासर्वदाहिनी ३० प्रलयंमेनिरेसर्वेज्वालामालाभिरर्दिताः ॥ ज्वालाभ्योदीप्यमानाभ्योमहाभीतिकरःपुमान् ३१ आविरासीन्महाकायोलिखन्मूर्ध्नानभस्तलम् ॥ दंष्ट्राकरालवदनोमहारावःक्षुधातुरः ३२ लालयन्रसनांघोरांशतयोजनविस्तृताम् ॥ नासापवनवेगेनभ्रामयन्कुंजरान्रणे ३३ भक्षयामासतांसेनांउरगानिवपक्षिराट् ॥ अपीपलद्भर्गसेनातेनपुंसाप्रपीडिता ३४ शिवपृष्ठंसमासाद्यरक्षरक्षेतिचाब्रवीत् ॥ मागैष्टेत्यभयंतस्यैदत्वावह्निंन्यवारयत् ३५ पर्जन्यास्त्रप्रपातेनतद्क्षणाद्विरिजापतिः ॥ बाणेनैकेनतंघोरंपुरुषंसन्यपातयत् ३६ ततउत्थायपुरुषोबभक्षशिवसैनिकान् ॥ ययुःपलायनपराःप्रमथाभयविह्वलाः ३७ स्खलंतोनिपतंतश्चनिश्वसंतश्चकंपिरे ॥ शिवोपिनिःसहायत्वादरीमेवान्वपद्यत ३८ षडाननादयोवीराअनुसस्रुस्तमेवहि ॥ जिघृक्षुर्गिरिजादैत्योविचिंत्यैकाकिनींगिरौ ३९ विहायरणभूमिंतुययौकैलासमेवसः ॥ दूराद्दृष्ट्वात मायांतंचकंपेगिरिजातदा ४० उवाचपितरंगत्वादैत्योमांकिंनुनेष्यति ॥ तस्यास्तद्वचनंश्रुत्वानीत्वातांदुर्गमांगुहाम् ४१ अविज्ञातांस्वेतरेणस्थापयामासनिर्भयाम् ॥ सोपिदैत्यस्ततोहैमंगिरिंतद्वहणेच्छया ४२ आगतोनददर्शाथगिरिजांक्वापिसत्तम ॥ भ्रमन्ददर्शतत्रैकांमूर्तिंचिंतामणेःशुभाम् ४३ सहस्रसूर्यसंकाशांनानालंकारशोभिनीम् ॥ त्रैलोक्यसुंदरांसद्योगृहीत्वास्वस्थलंययौ ४४ नानावादित्रनिर्घोषैःस्तुवद्भिर्बंदिभिर्वृतः ॥ ततःपातालमगमत्सर्वत्रविजयीबली ॥ ४५ गच्छतस्तस्यदैत्यस्यहस्तेप्यंतर्हितातदा ॥ मूर्तिश्चिंतामणेःसातुतदद्भुतमिवाभवत् ४६ तमेवाशकुनंमत्वातत्पुरंपुनराविशत् ॥ जयंतंविमनाश्चिंतांदुरंतांसमुपागतः ४७ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेत्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥ ॥ व्यासउवाच ॥ ॥ ततःकिमकरोच्छंभुस्त्रिपुरेणपराजि

तः ॥ कथंतमजयद्दैत्यंत्रिपुरंजयशालिनम् १ ॥ ब्रह्मोवाच ॥ ॥ ततःशंभुःपरांचिंतामापेदेमनसासकृत् ॥ स्वाहास्वधाविहीनंतुभूतलंपरिचिंतयन् २ कदास्वस्थानगादेवाभविष्यंतिगतज्वराः ॥ केनोपायेनवासःस्याद्दुर्जयस्यपराजयः ३ एवंचिंतातुरेतस्मिन्नारदोमुनिसत्तमः ॥ आययौशंकरंद्रष्टुंदेवान्सर्वान्यदृच्छया ४ तंदृष्ट्वाजहृषेदेवोमर्त्यःप्राप्ययथामृतम् ॥ पूजयामासविधिवत्कृतासनपरिग्रहम् ५ आलिंग्यतमुवाचेत्थंशिवश्चिंतातुरोभृशम् ॥ देवानांहितमन्विच्छन्दैत्यस्यवधमेवच ६ शिवउवाच ॥ दैत्येनसर्वदेवानांकदनंकृतमोजसा ॥ तद्रणेभग्नसंकल्पाःसर्वेदेवाःपलायिताः ७ यातादृशादिशोब्रह्मन्नकःकुत्रास्तेन वेद्म्यहम् ॥ ममाप्यस्त्राणितेनास्त्रैःप्रभग्नानिसहस्रशः ८ ॥ ब्रह्मोवाच ॥ श्रुत्वाशिववचःसोमुमवादीन्मुनिसत्तम ॥ मन्वानःपरमाश्चर्यंत्रैलोक्येशपराभवम् ९ ॥ नारदउवाच ॥ सर्वज्ञेसर्वविद्येशेसर्वेशेसर्वकर्त्तरि ॥ सर्वावनेसर्वहरेसर्वस्यापिनियंतरि १० शक्तेकर्त्तुमकर्त्तुवान्यथाकर्तुमपिप्रभो ॥ अणिमादिगुणोपेतेषडैश्वर्यविलासिनि ११ किंवक्तव्यंमयादेवसर्ववक्तृवरेत्वयि ॥ मुनिनागानसक्तेनात्रिलोकींभ्रमतानिशम् १२ तववाक्यानुरोधेनविचार्यप्रब्रवीम्यहम् ॥ एवमुक्त्वाक्षणंध्यात्वापुनःप्राहशिवंमुनिः १३ ॥ मुनिरुवाच ॥ युद्धायगंतुकामेननार्चितोगणपस्त्वया ॥ अतःपराभवंप्राप्तोवह्निनेत्रःपिनाकधृक् १४ इदानीमर्चयपुराविघ्नेशंविघ्नवारणम् ॥ प्रसाद्यतद्बलंलब्ध्वायाहियुद्धायसादरम् १५ पराजेष्यसितंदैत्यंनात्रकार्याविचारणा ॥ ब्रह्मोवाच ॥ तेनापितपसादेवोमहतारधितःपुरा १६ तेनतस्मैवरोदत्तोखिलविघ्नौघहारिणा ॥ महेश्वरंविनामृत्युर्नकेनापिभवेत्तव १७ तस्माद्गिरिशतस्येदंकामगंतुपुरत्रयम् ॥ एकेषुणादारयस्वजयोपायोयमीरितः १८ प्रहर्षमतुलंलेभेश्रुत्वोपायंमुनेःशिवः ॥ श्रुत्वागजाननगिरंपूर्वोक्तांप्राहतंमुनिम् १९ ॥ शिवउवाच ॥ सत्यमुक्तंत्वयाब्रह्मंस्त्वद्वाक्येनस्मृतंमया ॥ उपदिष्टौपूर्वमेवमंत्रौतेनमुनेमम २० षडक्षरैकाक्षरौतौसर्वसंकटहारकौ ॥ युद्धेव्यासक्तचित्तेननजप्तौनचसंस्मृतौ २१ सर्वविघ्नहरोदेवोनस्मृतोहिगजाननः ॥ सर्वेषांकारणंकर्त्तापाताहर्त्ताविनायकः २२ ॥ मुनिरुवाच ॥ तंतोषयमहादेवमाहादेवंगजाननम् ॥ ब्रह्मोवाच ॥ विसर्ज्य नारदंदेवोजगामतपसेशिवः २३ दंडकारण्यदेशेतुपद्मासनस्थितोजपन् ॥ प्रणिधायबलात्स्वानिनियम्यध्यानतत्परः २४ सोतपत्तपउग्रंतुशतवर्षाणिशंकरः ॥ ततस्तस्यमुखांभोजान्निर्गतस्तुपुमान्परः २५ पंचवक्त्रोदशभुजोललाटेंदुःशशिप्रभः ॥ मुंडमालःसर्पभूषोमुकुटांगदभूषणः २६ अग्न्यर्कशशिनोभाभिस्तिरस्कुर्वन्दशायुधः ॥ तद्भासाधर्षितोदेवोपश्यदुग्रंपुरःस्थितम् २७ विनायकंपंचमुखंपंचास्यमपरंशिवम् ॥ तंदृष्ट्वातर्कयद्देवःकिमहंद्वित्रिधोभवम् २८ किंवाममैवरूपेणत्रिपुरोयमिहागतः ॥ त्रयस्त्रिंशत्कोटिदेवेष्वपरःपंचवक्त्रवान् २९ अथवास्वप्नएवायंदृष्टोदीर्घतरोमया ॥ अथवामे वरंदातुमागतोयंगजाननः ३० सर्वविघ्नहरंदेवंयंध्यायामिदिवानिशम् ॥ ॥ ब्रह्मोवाच ॥ ॥ एवमाकर्ण्यतद्वाक्यमुवाचद्विरदाननः ३१ अंतर्यस्तर्कितोदेवःसोयंविघ्नहरोविभुः ॥ नमेस्वरूपंजानंतिदेवर्षिचतुराननाः ३२ नवेदाःसोपनिषदःकुतःषट्शास्त्रवेदिनः ॥ अशेषभुवनस्याहंकर्त्तापाता

पहारकः ३३ ब्रह्मादिस्थावरचरत्रिगुणानामहंप्रभुः ॥ तपसानेनतुष्टोहंवरंदातुमिहागतः ३४ वरान्वृणुमहादेवयावतोमत्तइच्छसि ३५ ॥ ॥ इ
तिश्रीगणेशपुराणेउपासनाखंडेतपोवर्णनंनामचतुश्चत्वारिंशोऽध्यायः ४४ ॥ मुनिरुवाच ॥ ॥ ततःप्रसन्नेविघ्नेशेदेवेशेविघ्नहारिणि ॥ वरान्ददत्सति
शर्वायकिंकिंवव्रेसदाशिवः १ ॥ ॥ ब्रह्मोवाच ॥ ॥ गणेशवचनंश्रुत्वाशिवोवाक्यमथाब्रवीत् ॥ स्मृत्वागजाननंतंतुस्वस्वरूपंवरप्रदम् २ ॥ ॥ शिवउ
वाच ॥ दशापिनेत्राणिममाद्यधन्यान्यथोभुजाःपूजनतस्तवाद्य ॥ तवानतेःपंचशिरांसिधन्यान्यथस्तुतेःपंचमुखानिदेव ३ पृथ्वीजलंवायुरथोदिशश्चतेजश्च
कालःकलनात्मकोपि ॥ नभोरसोरूपमथापिगंधःस्पर्शश्चशब्दोमनइंद्रियाणि ४ गंधर्वयक्षाःपितरोमनुष्यादेवर्षयोदेवगणाश्चसर्वे ॥ ब्रह्मेंद्ररुद्रा
वसवोथसाध्यास्त्वत्तःप्रसूताःसचराचराश्च ॥ ५ ॥ सृजस्यदोविश्वमनन्यबुद्धेरजोगुणात्पासिसमस्तमेतत् ॥ तमोगुणात्संहरसेगुणेशनित्योनिरीहा
खिलकर्मसाक्षी ६ ॥ ॥ ब्रह्मोवाच ॥ ॥ ततोहमब्रुवंदेवंगणेशंतंशिवाज्ञया ॥ नामचाकरवंतस्ययत्तच्छृणुमहामते ७ त्वन्नामबीजंप्रथमंमा
तृकाणामोंकाररूपंश्रुतिमूलभूतम् ॥ यतोगणानांत्वमसीहईशोगणेशइत्येवतवास्तुनाम ॥ ८ ॥ ओमित्यथोक्तगणनायकेनतुतोषशर्वःप्रददौवरां
श्च ॥ यःसर्वकार्येषुतवेशकुर्यात्स्मृतिंतदंतंसलभेदविघ्नम् ९ विनास्मृतिंतेनलभेच्चकोपिवांछार्थसिद्धिंकृमिकीटकोपि ॥ शैवैस्त्वदीयैरथवैष्णवै
श्चशाक्तैश्चसौरैरथसर्वकार्ये १० शुभाशुभेवैदिकलौकिकेवात्वमर्चनीयःप्रथमंप्रयत्नात् ॥ यन्मंगलंसर्वजनेषुदेवसयक्षविद्याधरपन्नगेषु ११
तस्येश्वरोमंगलमूर्त्तितांत्वंयतोयतोमंगलकृत्स्वभक्ते ॥ अहंपुरानर्चयतस्तवेशत्वय्यस्मृतेदैत्यवरस्ययुद्धे १२ अवंदनाच्चापपराभवंततस्तवांघ्रिंशरणंप्रप
न्नः ॥ क्षमापराधंममसर्वशक्तेजयंप्रयच्छाखिलजन्यकाले १३ येसर्वथात्वांनभजंतिदेवजडादरिद्राःप्रभवंतुतेपि ॥ भजंतितेभक्तियुतामनुष्याःप्राप्नुर्यांति
सिद्धिंनिरिवलार्थदात्रीम् १४ ॥ ॥ कउवाच ॥ इत्थंनिशम्याखिलवाक्यसारवेत्तावदद्वाक्यमिदंगिरीशम् ॥ यदायदामेस्मरणंविदध्यास्तदांतिकंतेहमिया
मुमेश १५ मन्नामबीजेननिमंत्रयैकंबाणंतुतेनैवपुरत्रयंतत् ॥ निपातयास्मन्महसामहेशकृत्वासदैत्यंखलुभस्मसात्त्वम् १६ ततःस्वनाम्नामवदत्सहस्रं
गणाधिपोस्मैप्रणतायसम्यक् ॥ शिवायभक्त्यापरितुष्टचित्तोजयप्रदंकामकरंजनानाम् १७ उवाचचैनंरणकालएतत्पठस्वदैत्यान्विनिहंसिशीघ्रम् ॥
त्रिसंध्यमेतस्यजपान्नराणांसिद्ध्यंतिकामाःसकलाअभीष्टाः १८ श्रुत्वातुवाक्यंद्विरदाननस्यतंपूज्यसम्यक्शिवउज्जहर्ष ॥ संस्थापयामासमहागणेशंप्रासादमुच्चै
र्दृढमाशुचक्रे १९ संतर्प्यदेवान्मुनिसिद्धसंघान्दानानिदत्वाद्विजपुंगवेभ्यः ॥ पुनश्चसंपूज्यनमश्चकारदेवंगिरीशोवरदंगणेशम् २० उवाचसर्वान्मागिपू
रियंतुविख्यातिमागच्छतुसर्वलोके ॥ देवेनसर्वैश्चतथोदितैस्तैरंतर्दधुस्तेगणनाथमुख्याः२१ अंतर्हितेमुनिगणेससुरेगणेशेशर्वोप्यगात्स्वनिलयंस्वगणैरुपेतः॥
गंधर्वयक्षनिवहैरमरांगनाभिर्वृत्तांनिजंपरमुदागिरिजासुवाच २२ श्रुत्वातदामृतवचःसकलंगिरीशाद्देवेश्वरासुमुदिरेमुनयःसदाराः ॥ योगीश्वराश्चनिहतांत्रि

पुरस्वधिष्ण्यममंसताप्याधिगतांगिरिशप्रसादात् २३ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेशिवस्यवरदानंनामपंचचत्वारिंशोध्यायः ४५ ॥ ॥ व्यास उवाच ॥ ॥ कथंनाम्नांसहस्रंस्वंगणेशउपदिष्टवान् ॥ शिवायैतन्ममाचक्ष्वलोकानुग्रहतत्पर १ ॥ ॥ ब्रह्मोवाच ॥ ॥ देवएवंपुरारातिःपुरत्रयजयोद्यमे ॥ अनर्चनाद्गणेशस्यजातोविघ्नाकुलःकिल २ मनसासविनिर्धार्यततस्तद्विघ्नकारणम् ॥ महागणपतिंभक्त्यासमभ्यर्च्ययथाविधि ३ विघ्नप्रशमनोपायमपृच्छ दपराजितः ॥ संतुष्टःपूजयाशंभोर्महागणपतिःस्वयम् ४ सर्वविघ्नैकहरणंसर्वकामफलप्रदम् ॥ ततस्तस्मैस्वकंनाम्नांसहस्रमिदमब्रवीत् ५ अस्यश्रीमहाग णपतिसहस्रनामस्तोत्रमालामंत्रस्य ॥ गणेशऋषिः ॥ महागणपतिर्देवता ॥ नानाविधानिच्छंदांसि ॥ गौमितिबीजम् ॥ तुंडमितिशक्तिः ॥ स्वाहाकील कम् ॥ सकलविघ्ननाशनद्वारामहागणपतिप्रीत्यर्थंजपेविनियोगः ॥ ॥ महागणपतिरुवाच ॥ ॥ ॐगणेश्वरोगणक्रीडोगणनाथोगणाधिपः ॥ एकदंष्ट्रोव क्रतुंडोगजवक्त्रोमहोदरः६लंबोदरोधूम्रवर्णोविकटोविघ्ननायकः ॥ सुमुखोदुर्मुखोबुद्धोविघ्नराजोविनाशनः७भीमःप्रमोदआमोदःसुरानंदोमदोत्कटः॥ हेरंबःशब रःशंभुर्लंबकर्णोमहाबलः ८ नंदनोलंपटोभीरुर्मेघनादोगणंजयः ॥ विनायकोविरूपाक्षोधीरशूरोवरप्रदः ९ महागणपतिर्बुद्धिप्रियःक्षिप्रप्रसादनः ॥ रुद्रप्रियोग णाध्यक्षउमापुत्रोघनाशनः १० कुमारगुरुरीशानपुत्रोमूषकवाहनः ॥ सिद्धिप्रियःसिद्धिपतिःसिद्धःसिद्धिविनायकः ११ अविघ्नस्तुंबरुःसिंहवाहनोमोहिनी प्रियः ॥ कटंकटोराजपुत्रःशाकलःसंमितोमितः १२ कूष्मांडसामसंभूतिर्दुर्जयोधूर्जयोजयः ॥ भूपतिर्भुवनपतिर्भूतानांपतिरव्ययः १३ विश्वकर्त्ताविश्वमु खोविश्वरूपोनिधिर्घृणिः ॥ कविःकवीनामृषभोब्रह्मण्योब्रह्मणस्पतिः १४ ज्येष्ठराजोनिधिपतिर्निधिप्रियपतिप्रियः ॥ हिरण्मयपुरांतस्थःसूर्यमंडलम ध्यगः १५ कराहतिध्वस्तसिंधुसलिलःपूषदंताभित् ॥ उमांकेलिकुतुकीसुक्तिदःकुलपालनः १६ किरीटीकुंडलीहारीवनमालीमनोमयः ॥ वैमुख्यहतदै त्यश्रीःपादाहतिजितक्षितिः १७ सद्योजातःस्वर्णमुंजमेखलीदुर्निमित्तहृत् ॥ दुःस्वप्नहृत्प्रसहनोगुणीनादप्रतिष्ठितः १८ सुरूपःसर्वनेत्राधिवासोवीरा सनाश्रयः ॥ पीतांबरःखंडरदःखंडेंदुकृतशेखरः १९ चित्रांकःश्यामदशनोभालचंद्रश्चतुर्भुजः ॥ योगाधिपस्तारकस्थःपुरुषोगजकर्णकः २० गणाधिरा जोविजयास्थिरोगजपतिर्ध्वजी ॥ देवदेवस्मरप्राणोदीपकोवायुकीलकः ॥ २१ ॥ विपश्चिद्वरदोनादोनादभिन्नबलाहकः ॥ वराहरदनोमृत्युंजयो व्याघ्राजिनांबरः २२ इच्छाशक्तिधरोदेवत्रातादैत्यविमर्दनः ॥ शंभुवक्त्रोद्भवःशंभुकोपहाशंभुहास्यभूः २३ शंभुतेजाःशिवाशोकहारीगौरीसुखाव हः ॥ उमांगमलजोगौरीतेजोभूःस्वर्धुनीभवः २४ यज्ञकायोमहानादोगिरिवर्ष्माशुमाननः ॥ सर्वात्मासर्वदेवात्मब्रह्ममूर्द्धाककुप्श्रुतिः २५ ब्रह्मांडकुंभश्चि द्व्योमभालःसत्यशिरोरुहः ॥ जगज्जन्मलयोन्मेषनिमेषोऽर्कसोमदृक् २६ गिरींद्रैकरदोधर्मोधर्मिष्ठःसामबृंहितः ॥ ग्रहर्क्षदशनोवाणीजिह्वोवासवनासिकः

१ हुमितिबीजं एवं लिखितपुस्तके २ नन्दनःश्रीप्रदोभीमोमेघनादोगणंजयःइतिपाठान्तरम । ३ शाकलःइतिलिखिते ४ विभ्राजनूपुरइ०पा० ५ हविर्भुजःइ०पा० ६ नादभिन्नोमहांबरः इ०पा०

२७ भ्रूमध्यसंस्थितकरोब्रह्मविद्यामदोत्कटः ॥ कुलाचलांसःसोमार्कघंटोरुद्राशिरोधरः २८ नदीनदभुजःसर्पांगुलीकस्तारकानखः ॥ व्योमनाभिः श्रीहृदयोमेरुपृष्ठोर्णवोदरः २९ कुक्षिस्थयक्षगंधर्वरक्षःकिन्नरमानुषः ॥ पृथ्वीकटिःसृष्टिलिंगःशैलोरुर्दस्रजानुकः ३० पातालजंघोमुनिपात्कालांगुष्ठस्त्रयी तनुः ॥ ज्योतिर्मंडललांगुलोहृदयालाननिश्चलः ३१ हृत्पद्मकर्णिकाशालिवियत्केलिसरोवरः ॥ सद्भक्तध्याननिगडःपूजावारिनिवारितः ३२ प्रतापी कश्यपसुतोगणपोविष्टपीबली ॥ यशस्वीधार्मिकःस्वोजाःप्रथमःप्रथमेश्वरः ३३ चिंतामणिद्वीपपतिःकल्पद्रुमवनालयः ॥ रत्नमंडपमध्यस्थोरत्नसिं हासनाश्रयः ३४ तीव्राशिरोधृतपदोज्वालिनीमौलिलालितः ॥ नंदानंदितपीठश्रीर्भोगदाभूषितासनः ३५ सकामदायिनीपीठःस्फुरद्ग्रासनाश्रयः ॥ तेजोवतीशिरोरत्नंसत्यानित्यावतंसितः ३६ सविघ्ननाशिनीपीठःसर्वशक्त्यंबुजाश्रयः ॥ लिपिपद्मासनाधारोवाह्निधामत्रयाश्रयः ३७ उन्नतप्रपदोगूढगु ल्फःसंवृतपार्ष्णिकः ॥ पीनजंघःश्लिष्टजानुःस्थूलोरुःप्रोन्नमत्कटिः ३८ निम्ननाभिःस्थूलकुक्षिःपीनवक्षाबृहद्भुजः ॥ पीनस्कंधःकंबुकंठोलंबोष्ठोलंबना सिकः ३९ भग्नवामरदस्तुंगसव्यदंतोमहाहनुः ॥ ह्रस्वनेत्रत्रयःशूर्पकर्णोनिबिडमस्तकः ४० स्तबकाकारकुंभाग्ररत्नमौलिर्निरंकुशः ॥ सर्पहारक टीसूत्रःसर्पयज्ञोपवीतवान् ४१ सर्पकोटीरकटकःसर्पग्रैवेयकांगदः ॥ सर्पकक्ष्योदरबंधःसर्पराजोत्तरीयकः ४२ रक्तोरक्तांबरधरोरक्तमाल्यविभूषणः ॥ रक्तेक्षणोरक्तकरोरक्ततालोष्ठपल्लवः ४३ श्वेतःश्वेतांबरधरःश्वेतमाल्यविभूषणः ॥ श्वेतातपत्ररुचिरःश्वेतचामरवीजितः ४४ सर्वावयवसंपूर्णःसर्वलक्षण लक्षितः ॥ सर्वाभरणशोभाढ्यःसर्वशोभासमन्वितः ४५ सर्वमंगलमांगल्यःसर्वकारणकारणम् ॥ सर्वदैककरःशार्ङ्गीबीजपूरीगदाधरः ४६ शुक्लांगो लोकसुखदःसुतन्तुस्तन्तुवर्धनः ॥ किरीटीकुंडलीहारीवनमालीशुभांगदः ॥ ४७ इक्षुचापधरःशूलीचक्रपाणिःसरोजभृत् ॥ पाशीधृतोत्पलःशालीमं जरीभृत्स्वदंतभृत् ४८ कल्पवल्लीधरोविश्वाभयदैककरोवशी ॥ अक्षमालाधरोज्ञानमुद्रावान्मुद्गरायुधः ४९ पूर्णपात्रीकंबुधरोविधृतालिसमूहकः ॥ मातु लिंगधरश्चूतकलिकाभृत्कुठारवान् ५० पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः ॥ भारतीसुंदरीनाथोविनायकरतिप्रियः ५१ महालक्ष्मीप्रियतमःसिद्धलक्ष्मी मनोरमः ॥ रमारमेशपूर्वांगोदक्षिणोमामहेश्वरः ५२ महीवराहवामांगोरतिकंदर्पपश्चिमः ॥ आमोदमोदजननःसप्रमोदप्रमोदनः५३समेधितसमृद्धिश्रीर्ऋद्धिसि द्धिप्रवर्तकः ॥ दत्तसौमुख्यसुमुखःकांतिकंदलिताश्रयः ५४ मदनावत्याश्रितांघ्रिःकृतदौर्मुख्यदुर्मुखः ॥ विघ्नसंपल्लवोपघ्नःसर्वोन्निद्रमदद्रवः ५५ विघ्नकृन्नि घ्नचरणोद्राविणीशक्तिसत्कृतः ॥ तीव्राप्रसन्ननयनोज्वालिनीपालितैकदृक् ॥ ५६ ॥ मोहिनीमोहनोभोगदायिनीकांतिमंडितः ॥ कामिनीकांतवक्त्रश्रीराधि ष्ठितवसुंधरः ५७ वसुंधरामदोन्नद्धमहाशंखनिधिप्रभुः ॥ नमद्वसुमतीमौलीमहापद्मनिधिप्रभुः ५८ सर्वसद्गुरुसंसेव्यःशोचिष्केशहृदाश्रयः ॥ ईशानमूर्धा

१ करस्थाम्रधर इ०पा० ।

देवेंद्रशिखःपवननंदनः ५९ अग्रप्रत्यग्रनयनोदिव्यास्त्राणांप्रयोगवित् ॥ ऐरावतादिसर्वाशावारणावरणप्रियः ६० वज्राद्यस्त्रपरिवारोगणचंडसमाश्रयः ॥ जयाजयपरीवारोविजयाविजयावहः ६१ अजिताजितपादाब्जोनित्यानित्यावतंसितः ॥ विलासिनीकृतोल्लासःशौंडोसौंदर्यमंडितः ६२ अनंतानंतसुखदः सुमंगलसुमंगलः ॥ इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिनिषेवितः ६३ सुभगासंश्रितपदोललितालालिताश्रयः ॥ कामिनीकामनःकाममालिनीकोलिलालितः ६४ सरस्वत्याश्रयोगौरीनंदनःश्रीनिकेतनः ॥ गुरुगुप्तपदोवाचासिद्धोवागीश्वरीपतिः ६५ नलिनीकामुकोवामारामोज्येष्ठामनोरमः ॥ रौद्रीमुद्रितपादाब्जो हुंबीजस्तुंगशक्तिकः ६६ विश्वादिजननत्राणःस्वाहाशक्तिःसकीलकः ॥ अमृताब्धिकृतावासोमदघूर्णितलोचनः ६७ उच्छिष्टगणउच्छिष्टगणेशोगणनायकः॥ सार्वकालिकसंसिद्धिर्नित्यशैवोदिगंबरः ६८ अनपायोनंतदृष्टिरप्रमेयोजरामरः ॥ अनाविलोप्रतिरथोह्यच्युतोमृतमक्षरम् ६९ अप्रतर्क्योक्षयोजय्योनाधारो नामयोमलः ॥ अमोघसिद्धिरद्वैतमघोरोप्रमितानन: ७० अनाकारोब्धिभूम्यग्निबलघ्नोव्यक्तलक्षणः ॥ आधारपीठआधारआधाराधेयवर्जितः ७१ आखु केतनआशापूरकआखुमहारथः ॥ इक्षुसागरमध्यस्थइक्षुभक्षणलालसः ७२ इक्षुचातिरेकश्रीरिक्षुचापनिषेवितः ७३ इंद्रगोपसमानश्रीरिंद्रनीलसमद्युतिः ॥ इंदीवरदलश्यामइंदुमंडलानिर्मलः७४इध्मप्रियइडाभागइडाधामेंदिराप्रियः ॥ इक्ष्वाकुविघ्नविध्वंसीइतिकर्त्तव्यतेप्सितः ७५ ईशानमौलिरीशानईशानसुतईतिहा ॥ ईषणात्रयकल्पांतईहामात्रविवर्जितः ७६ उपेंद्रउडुभृन्मौलिरुंडेरकबलिप्रियः ॥ उन्नताननउत्तुंगउदारत्रिदशाग्रणीः ७७ ऊर्जस्वनूष्मलमदऊहापो हदुरासदः ॥ ऋग्यजुःसामसंभूतिर्ऋद्धिसिद्धिप्रवर्त्तकः ७८ ऋजुचित्तैकसुलभऋणत्रयविमोचकः ॥ लुप्तविघ्नःस्वभक्तानांलुप्तशक्तिःसुरद्विषाम् ७९ लुप्तश्रीर्विमु खार्चानांलूतताविस्फोटनाशनः ॥ एकारपीठमध्यस्थएकपादकृतासनः ८० एजिताखिलदैत्यश्रीरेजिताखिलसंश्रयः ॥ ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः ८१ ऐरंमदसमोन्मेषऐरावतनिभाननः ॥ ॐकारवाच्यओंकारओजस्वानोषधीपतिः ८२ औदार्यनिधिरौद्धत्यधुर्यऔन्नत्यनिःस्वनः ॥ अंकुशःसुरनागानामंकुशः सुरविद्विषाम् ८३ अःसमस्तविसर्गाणांपदेषुपरिकीर्त्तितः ॥ कमंडलुधरःकल्पःकपर्दीकलभाननः८४ कर्मसाक्षीकर्मकर्त्ताकर्माकर्मफलप्रदः॥ कदंबगोलकाकारःकू ष्मांडगणनायकः ८५ कारुण्यदेहःकपिलःकथकःकटिसूत्रभृत् ॥ खर्वःखड्गप्रियःखड्गखातांतस्थःखनिर्मलः ८६ खल्वाटशृंगनिलयःखट्वांगीखदुरासदः ॥ गुगा ढ्योगहनोगस्थोगद्यपद्यसुधार्णवः ८७ गद्यगानप्रियोगर्जोगीतगीर्वाणपूर्वजः॥ गुह्याचाररतोगुह्योगुह्यागमनिरूपितः८८ गुहाशयोगुहाब्धिस्थोगुरुगम्योगुरोर्गु रुः ॥ घंटाघर्घरिकामालीवटकुंभोघटोदरः ८९ङकारवाच्योङकारोङकाराकारशुंडभृत् ॥ चंडश्चंडेश्वरःसुहृच्चंडेशश्चंडविक्रमः९०चराचरपतिश्चिंतामणिश्चर्वणला लसः॥छंदश्छंदोवपुश्छंदोदुर्लक्ष्यश्छंदविग्रहः९१ जगद्योनिर्जगत्साक्षीजगदीशोजगन्मयः॥जपोजपपरोजप्योजित्वासिंहासनप्रभुः९२झलज्झल्लोल्लसद्दानझंकारि भ्रमराकुलः ॥ टंकारस्फारसंरावष्टंकारिर्माणिनूपुरः ९३ ठद्वयीपल्लवांतस्थःसर्वमंत्रैकसिद्धिदः ॥ डिंडिमुंडोडाकिनीशोडामरोडिंडिमप्रियः ९४ ढक्कानिनादमुदि

तोढौंकोदुंढिविनायकः ९५ तत्त्वानांपरमंतत्त्वंतत्त्वंपदनिरूपितः ॥ तारकांतरसंस्थानस्तारकस्तारकांतकः ९६ स्थाणुःस्थाणुप्रियःस्थातास्थावरंजंगमंजगत्, ॥ दक्षयज्ञप्रमथनोदातादानवमोहनः ९७ दयावान्दिव्यविभवोदंडभृद्दंडनायकः ॥ दंतप्रभिन्नाभ्रमालोदैत्यवारणदारणः ९८ दंष्ट्रालग्नद्विपघटोदेवार्थनृगजाकृतिः ॥ धनंधनपतिर्धन्योधनदोधरणीधरः ९९ ध्यानैकप्रकटोध्येयोध्यानंध्यानपरायणः १०० नंद्योनंदिप्रियोनादोनादमध्येप्रतिष्ठितः ॥ निष्कलोनिर्मलोनित्योनित्यानित्योनिरामयः १ परंव्योमपरंधामपरमात्मापरंपदम् ॥ परात्परःपशुपतिःपशुपाशविमोचकः २ पूर्णानंदःपरानंदःपुराणपुरुषोत्तमः ॥ पद्मप्रसन्ननयनःप्रणताज्ञानमोचनः ३ प्रमाणप्रत्ययातीतःप्रणतार्तिनिवारणः ॥ फलहस्तःफणिपतिःफेत्कारःफाणितप्रियः ४ बाणार्चितांघ्रियुगुलोबालकेलिकुतूहली ॥ ब्रह्मब्रह्मार्चितपदोब्रह्मचारीबृहस्पतिः ५ बृहत्तमोब्रह्मपरोब्रह्मण्योब्रह्मवित्प्रियः ॥ बृहन्नादाम्यचीत्कारोब्रह्मांडावलिमेखलः ६ भ्रूक्षेपदत्तलक्ष्माकोभर्गोभद्रोभयापहः ॥ भगवान्भक्तिसुलभोभूतिदोभूतिभूषणः ७ भव्योभूतालयोभोगदाताभूमध्यगोचरः ॥ मंत्रोमंत्रपतिर्मंत्रीमदमत्तमनोरमः ८ मेखलावान्मंदगतिर्मतिमत्कमलेक्षणः ॥ महाबलोमहावीर्योमहाप्राणोमहामनाः ९ यज्ञोयज्ञपतिर्यज्ञगोमायज्ञफलप्रदः ॥ यशस्करोयोगगम्योयाज्ञिकोयाजकप्रियः १०० रसोरसप्रियोरस्योरंजकोरावणार्चितः ॥ रक्षोरक्षाकरोरत्नगर्भोराज्यसुखप्रदः ११ लक्ष्यंलक्षप्रदोलक्ष्योलयस्थोलड्डुकप्रियः ॥ लानप्रियोलास्यपरोलाभकृल्लोकविश्रुतः १२ वरेण्योवह्निवदनोवंद्योवेदांतगोचरः ॥ विकर्त्ताविश्वतश्चक्षुर्विधाताविश्वतोमुखः १३ वामदेवोविश्वनेतावज्रिवज्रनिवारणः ॥ विश्वबंधनविष्कंभाधारोविश्वेश्वरःप्रभुः १४ शब्दब्रह्मशमप्राप्यःशंभुशक्तिगणेश्वरः ॥ शास्ताशिखाग्रनिलयःशरण्यःशिखरीश्वरः १५ षड्ऋतुकुसुमस्रग्वीषडाधारःषडक्षरः ॥ संसारवैद्यःसर्वज्ञःसर्वभेषजभेषजम् १६ सृष्टिस्थितिलयक्रीडःसुरकुंजरभेदनः ॥ सिंदूरितमहाकुंभःसदसद्व्यक्तिदायकः १७ साक्षीसमुद्रमथनःस्वसंवेद्यःस्वदक्षिणः ॥ स्वतंत्रःसत्यसंकल्पःसामगानरतःसुखी १८ हंसोहस्तिपिशाचीशोहवनंहव्य कव्यभुक् ॥ हव्यंहुतप्रियोहर्षोहृल्लेखामंत्रमध्यगः १९ क्षेत्राधिपःक्षमाभर्त्ताक्षमापरपरायणम् ॥ क्षिप्रक्षेमकरःक्षेमानंदःक्षोणीसुरद्रुमः १२० धर्मप्रदोर्थदःकामदातासौभाग्यवर्द्धनः ॥ विद्याप्रदोविभवदोमुक्तिमुक्तिप्रदायकः २१ आभिरूप्यकरोवीरश्रीप्रदोविजयप्रदः ॥ सर्ववश्यकरोगर्भदोषहापुत्रपौत्रदः २२ मेधादःकीर्तिदःशोकहारीदौर्भाग्यनाशनः ॥ श्रीशोकहारीदौर्भाग्यनाशनःसर्वशक्तिभृत् २३ प्रतिवादिमुखस्तंभोरुष्टचित्तप्रसादनः ॥ पराभिचारशमनोदुःखभंजनकारकः २४ लवत्रुटिःकलाकाष्ठानिमेषस्तत्परःक्षणः ॥ घटीमुहूर्तःप्रहरोदिवानक्तमहर्निशम् २५ पक्षोमासोयनंवर्षंयुगं कल्पोमहालयः ॥ राशिस्तारातिथिर्योगोवारःकरणमंशकम् २६ लग्नंहोराकालचक्रंमेरुःसप्तर्षयोध्रुवः ॥ राहुर्मंदःकविर्जीवोबुधोभौमःशशीरविः २७ कालःसृष्टिःस्थितिर्विश्वंस्थावरंजंगमंचयत् ॥ मूरापोग्निर्मरुद्व्योमाहंकृतिःप्रकृतिःपुमान् २८ ब्रह्माविष्णुःशिवोरुद्रईशःशक्तिःसदाशिवः ॥ त्रिदशाःपितरःसिद्धायक्षारक्षांसिकिन्नराः २९ साध्याविद्याधराभूतामनुष्याःपशवःस

गाः ॥ समुद्राःसरितःशैलाभूतंभव्यंभवोद्भवः १३० सांख्यंपातंजलंयोगःपुराणानिश्रुतिःस्मृतिः ॥ वेदांगानिसदाचारोमीमांसान्यायविस्तरः ३१ आयुर्वेदो धनुर्वेदोगांधर्वंकाव्यनाटकम् ॥ वैखानसंभागवतंसात्वतंपांचरात्रकम् ३२ शैवंपाशुपतंकालमुखंभैरवशासनम् ॥ शाक्तंसौरंजैनमार्हतसंहिता ३३ सदसद्व्यक्तमव्यक्तंसचेतनमचेतनम् ॥ बंधोमोक्षःसुखंभोगोऽयोगःसत्यमणुर्महान् ३४ स्वस्तिहुंफट्स्वधास्वाहाश्रौषड्वौषड्वषण्नमः ॥ ज्ञानंविज्ञानमानंदोबोधःसंविच्छमोयमः ३५ एकएकाक्षराधारएकाक्षरपरायणः ॥ एकाग्रधीरेववीरएकानेकस्वरूपधृक् ३६ द्विरूपोद्विभुजोद्व्यक्षोद्विरदोद्वीपरक्षकः ॥ द्वैमातुरोद्विवदनोद्वंद्वातीतोद्वयातिगः ३७ त्रिधामात्रिकरस्त्रेतात्रिवर्गफलदायकः ॥ त्रिगुणात्मात्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः १३८ चतुर्बाहुश्चतु र्दंतश्चतुरात्माचतुर्मुखः ॥ चतुर्विधोपायमयश्चतुर्वर्णाश्रमाश्रयः ३९ चतुर्विधवचोवृत्तिपरिवर्तप्रवर्त्तकः ॥ चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसंभवः ४० पंचाक्ष रात्मापंचात्मापंचास्यःपंचकृत्यकृत् ॥ पंचाधारःपंचवर्णःपंचाक्षरपरायणः ४१ पंचतालःपंचकरःपंचप्रणवभावितः ॥ पंचब्रह्ममयस्फूर्तिःपंचवारणवा रितः ४२ पंचभक्ष्यप्रियःपंचबाणःपंचशिवात्मकः ॥ षट्कोणपीठःषट्चक्रधामाषड्ग्रंथिभेदकः ४३ षडध्वध्वांतविध्वंसीषडंगुलमहाह्रदः ॥ षण्मुखः षण्मुखभ्रातापट्शक्तिपरिवारितः ४४ षड्वैरिवर्गविध्वंसीषड्ऊर्मिभयभंजनः ॥ षट्तर्कदूरःषट्कर्मनिरतःषड्रसाश्रयः ४५ सप्तपातालचरणःसप्तद्वीपो रुमंडलः ॥ सप्तस्वर्लोकमुकुटःसप्तसप्तिवरप्रदः ४६ सप्तांगराज्यसुखदःसप्तर्षिगणमंडितः ॥ सप्तछंदोनिधिःसप्तहोतासप्तस्वराश्रयः ४७ सप्ताब्धिकेलिकासार सप्तमातृनिषेवितः ॥ सप्तच्छंदोमोदमदःसप्तछंदोमखप्रभुः ४८ अष्टमूर्तिध्येयमूर्तिरष्टप्रकृतिकारणम् ॥ अष्टांगयोगफलभूरष्टपत्रांबुजासनः ४९ अष्टशक्तिसमृद्ध श्रीरष्टैश्वर्यप्रदायकः ॥ अष्टपीठोपपीठश्रीरष्टमातृसमावृतः १५० अष्टभैरवसेव्योष्टवसुवंद्योष्टमूर्त्तिभृत् ॥ अष्टचक्रस्फुरन्मूर्त्तिरष्टद्रव्यहविःप्रियः ५१ नवना गासनाध्यासीनवनिध्यनुशासिता ॥ नवद्वारपुराधारोनवद्वारनिकेतनः ५२ नवनारायणस्तुत्योनवदुर्गानिषेवितः ॥ नवनाथमहानाथोनवनागविभूषणः ५३ नवरत्नविचित्रांगोनवशक्तिशिरोधृतः ॥ दशात्मकोदशभुजोदशदिक्पतिवंदितः ५४ दशाध्यायोदशप्राणोदशेंद्रियनियामकः ॥ दशाक्षरमहामंत्रोदशाशा व्यापिविग्रहः ५५ एकादशमहारुद्रैस्तुतएकादशाक्षरः ॥ द्वादशोद्दंडदोर्दंडोद्वादशांतनिकेतनः ॥ त्रयोदशाभिदाभिन्नविश्वेदेवाधिदैवतम् ॥ चतुर्दशेंद्रवरद श्चतुर्दशमनुप्रभुः ५७ चतुर्दशादिविद्याढ्यश्चतुर्दशजगत्प्रभुः ॥ सामपंचदशःपंचदशीशीतांशुनिर्मलः ५८ षोडशाधारनिलयःषोडशस्वरमातृकः ॥ षोडशांतपदावासःषोडशेंदुकलात्मकः ५९ कलासप्तदशीसप्तदशःसप्तदशाक्षरः ॥ अष्टादशद्वीपपतिरष्टादशपुराणकृत् १६० अष्टादशौषधीसृष्टीरष्टादशविधि स्मृतः ॥ अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः ६१ एकविंश·पुमानेकविंशत्यंगुलिपल्लवः ॥ चतुर्विंशतितत्त्वात्मापंचविंशाख्यपूरुषः ६२ सप्तविंशतिता रेशःसप्तविंशतियोगकृत् ॥ द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः ६३ षट्त्रिंशत्तत्त्वसंभूतिरष्टात्रिंशत्कलातनुः ॥ नमदेकोनपंचाशन्मरुद्वर्गोनिरर्गलः ६४

पंचाशदक्षरश्रेणीःपंचाशद्रुद्रविग्रहः ॥ पंचाशद्विष्णुशक्तीशःपंचाशन्मातृकालयः ६५ द्विपंचाशद्वपुःश्रेणीत्रिषष्ट्यक्षरसंश्रयः ॥ चतुःषष्ट्यर्णनिर्णेताचतुःषष्टिकलानिधिः ६६ चतुःषष्टिमहासिद्धयोगिनीवृंदवंदितः ॥ अष्टषष्टिमहातीर्थक्षेत्रभैरवभावनः ६७ चतुर्नवतिमंत्रात्मा षण्णवत्यधिकःप्रभुः ॥ शतानंदः शतधृतिःशतपत्रायतेक्षणः ६८ शतानीकःशतमखःशतधारवरायुधः ॥ सहस्रपत्रनिलयःसहस्रफणभूषणः ६९ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सहस्रनामसंस्तुत्यःसहस्राक्षबलापहः १७० दशसाहस्रफणिभृत्फणिराजकृतासनः ॥ अष्टाशीतिसहस्रौघमहर्षिस्तोत्रयंत्रितः ७१ लक्षाधीशप्रियाधारोलक्षाधीशमनोमयः ॥ चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः ७२ चतुराशीतिलक्षाणांजीवानांदेहसंस्थितः ॥ कोटिसूर्यप्रतीकाशःकोटिचंद्रांशुनिर्मलः ७३ शिवाभवाध्युष्टकोटिविनायकधुरंधरः ॥ सप्तकोटिमहामंत्रमंत्रितावयवद्युतिः ७४ त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ॥ अनंतदेवतासेव्योह्यनंतमुनिसंस्तुतः ७५ अनंतनामानंतश्रीरनंतानंतसौख्यदः ॥ ॐइतिवैनायकंनाम्नांसहस्रमिदमीरितम् ७६ इदंब्राह्मेमुहूर्तेवैयःपठेत्प्रत्यहंनरः ॥ करस्थंतस्यसकलमैहिकामुष्मिकंसुखम् ७७ आयुरारोग्यमैश्वर्यंधर्मःशौर्यंबलंयशः ॥ मेधाप्रज्ञाधृतेःकांतिःसौभाग्यमतिरूपता ७८ सत्यंदयाक्षमाशांतिर्दाक्षिण्यंधर्मशीलता ॥ जगत्संयमनंविश्वसंवादोवादपाटवम् ७९ सभापांडित्यमौदार्यंगांभीर्यंब्रह्मवर्चसम् ॥ औन्नत्यंचकुलंशीलंप्रतापोवीर्यमार्यता १८० ज्ञानंविज्ञानमास्तिक्यंधैर्यंविश्वातिशायिता ॥ धनधान्याभिवृद्धिश्चसकृदस्यजपाद्भवेत् ८१ वश्यंचतुर्विधंनृणांजपादस्यप्रजायते ॥ राज्ञोराजकलत्रस्यराजपुत्रस्यमंत्रिणः ८२ जप्यतेयस्यवश्यार्थेसदासस्तस्यजायते ॥ धर्मार्थकाममोक्षणामनायासेनसाधनम् ८३ शाकिनीडाकिनीरक्षोयक्षोरगभयापहम् ॥ साम्राज्यसुखदंचैवसमस्तरिपुमर्दनम् ८४ समस्तकलहध्वंसिदग्धबीजप्ररोहणम् ॥ दुःस्वप्नशमनंक्रुद्धस्वामिचित्तप्रसादनम् ८६ षट्कर्माष्टमहासिद्धित्रिकालज्ञानसाधनम् ॥ परकृत्योपशमनंपरचक्रविमर्दनम् ८६ संग्रामरंगेसर्वेषामिदमेकंजयावहम् ॥ सर्ववंध्यात्वदोषघ्नंगर्भरक्षैककारणम् ८७ पठ्यतेप्रत्यहंयत्रस्तोत्रंगणपतेरिदम् ॥ देशेतत्रनदुर्भिक्षमीतयोदुरितानिच ८८ नतद्गेहंजहातिश्रीर्यत्रायंजप्यतेस्तवः ॥ क्षयकुष्ठप्रमेहार्शोभगंदरविषूचिकाः ८९ गुल्मप्लीहानमंद्यमानमतिसारंमहोदरम् ॥ कासंश्वासमुदावर्त्तंशूलंशोफादिसंभवम् १९० शिरोरोगंवर्त्मिंहिक्कांगंडमालामरोचकम् ॥ वातपित्तकफद्वंद्वत्रिदोषजनितज्वरम् ९१ आगंतुविषमंशीतमुष्णंचैकाहिकादिकम् ॥ इत्याद्युक्तमनुक्तंवारोगंदोषादिसंभवम् ९२ सर्वंप्रशमयत्याशुस्तोत्रस्यास्यसकृज्जपः ॥ प्राप्यतेस्यजपात्सिद्धिःस्त्रीशूद्रपतितैःसकृत् ९३सहस्रनाममंत्रोयंजप्तव्यस्तुशुभार्थिये ॥ महागणपतेःस्तोत्रंसकामःप्रजपन्निदम् ९४ इच्छयासकलान्भोगानुपभुज्येहपार्थिवान् ॥ मनोरथफलैर्दिव्यैर्योमयानैर्मनोरमैः ९५ चंद्रेंद्रभास्करोपेंद्रब्रह्मरुद्रादिसंस्तुतः ॥ कामरूपःकामगतिःकामतोविचरन्निह ९६भुक्त्वायथेप्सितान्भोगानभीष्टैःसहबंधुभिः ॥ गणेशा

१ वल्मीकम् इ० पा० । २ काम ईश्वर इ० पा० ।

नुचरोभूत्वामहागणपतेःप्रियः ९७ नंदीश्वरादिसानंदीनंदितःसकलैर्गणैः ॥ शिवाभ्यांकृपयापुत्रानिर्विशेषंचलालितः ९८ शिवभक्तःपूर्णकामोगणेश्वरवरात्
पुनः ॥ जातिस्मरोधर्मपरःसार्वभौमोभिजायते ९९ निष्कामस्तुजपान्नित्यंभक्त्याविघ्नेशतत्परः ॥ योगसिद्धिंपरांप्राप्यज्ञानवैराग्यसंस्थितः २०० निरंतरोदि
तानंदेपरमानंदसंविदि ॥ विश्वोत्तीर्णेपरेपारेपुनरावृत्तिवर्जिते १ लीनोवैनायकेधाम्निरमतेनित्यनिर्वृतः ॥ योनामभिर्हुनेदैतैरर्चयेत्पूजयेन्नरः २ राजानोवश्य
तांयांतिरिपवोयांतिदासताम् ॥ मंत्राःसिद्ध्यंतिसर्वेपिसुलभास्तस्यासिद्धयः २०३ मूलमंत्रादपिस्तोत्रमिदंप्रियतरंमम ॥ नभस्येमासिशुक्लायांचतु
र्थ्यांममजन्मनि २०४ दूर्वाभिर्नामभिःपूजांतर्पणंविधिवच्चरेत् ॥ अष्टद्रव्यैर्विशेषेणजुहुयाद्भक्तिसंयुतः २०५ तस्येप्सितानिसर्वाणिसिद्ध्यंत्यत्रनसंशयः ॥
इदंप्रजप्तंपठितंपाठितंश्रावितंश्रुतम् २०६ व्याकृतंचर्चितंध्यातंविमृष्टमभिनंदितम् ॥ इहामुत्रचसर्वेषांविश्वैश्वर्यप्रदायकम् २०७ स्वच्छंदचारिणाप्येषये
नसंधार्यतेस्तवः ॥ संरक्ष्यतेशिवोद्भूतैर्गणैरध्युष्टकोटिभिः २०८ पुस्तकेलिखितंस्तोत्रंमंत्रभूतंप्रपूजयेत् ॥ तत्रसर्वोत्तमालक्ष्मीःसन्निधत्तेनिरंतरम् २०९ दानै
रशेषैरखिलैर्व्रतैश्चतीर्थैरशेषैःसकलैर्मखैश्च ॥ नतत्फलंविंदतियद्गणेशसहस्रनाम्नांस्मरणेनसद्यः २१० एतन्नाम्नांसहस्रंपठतिदिनमणौप्रयहंप्रोज्झिहानेसायंम
ध्यंदिनेवात्रिषवणमथवासंततंवाजनोयः ॥ तस्यादैश्वर्यधुर्यःप्रभवतिवचसांकीर्तिमुच्चैस्तनोतिप्रेत्यूहंहंतिविश्वंवशयतिसुचिरंवर्धतेपुत्रपौत्रैः ११ अकिंचनोप्ये
कचित्तोनियतोनियताशनः ॥ जपेच्चुचतुरोमासान्गणेशार्चनतत्परः १२ दरिद्रतांसमुन्मूल्यसप्तजन्मानुगामपि ॥ लभतेमहतींलक्ष्मीमित्याज्ञापारमेश्वरी १३
आयुष्यंवीतरोगंकुलमतिविमलंसंपदश्चार्त्तदानाःकीर्तिर्नित्यावदाताभणतिरभिनवाकांतिरव्याजभव्या ॥ पुत्राःसंतःकलत्रंगुणवदभिमतंयद्यदेतच्चसत्यंनि
त्यंयःस्तोत्रमेतत्पठतिगणपतेस्तस्यहस्तेसमस्तम् १४ ॐगणंजयोगणपतिर्हेरंबोधरणीधरः ॥ महागणपतिर्लक्षप्रदःक्षिप्रप्रसादनः १५ अमोघसिद्धिरमि
तोमंत्रश्चिंतामणिर्निधिः ॥ सुमंगलोबीजमाशापूरकोवरदःशिवः १६ काश्यपोनंदनोवाचासिद्धोढुंढिर्विनायकः ॥ मोदकैरभिरत्नैकविंशत्यानामभिःपुमा
न् १९ उपायनंददेद्भक्त्यामत्प्रसादंचिकीर्षति ॥ वत्सरंविघ्नराजस्यतथ्यमिष्टार्थसिद्धये १८ यःस्तौतिमद्व्रतमनाममाराधनतत्परः ॥ स्तुतोनाम्नांसहस्रेणते
नाहंनात्रसंशयः १८ नमोनमःसुरवरपूजितांघ्रयेनमोनमोनिरुपममंगलात्मने ॥ नमोनमोविपुलकरैकसिद्धयेनमोनमःकरिकलभाननायते २० गणपाजेश
हेरंबद्वैमातुरगजानन ॥ भालेंदोधूमकेतोनोलंबोदरविनायक २१ ब्रह्मैकदन्तविघ्नेशविष्णोकपिलनिर्गुण ॥ कालाद्यसिद्धिदानंतत्राहिमांभवसागरात्२२किंकि
णीगणरणितस्तवचरणःप्रकटितगुरुमितिचात्रिगणः ॥ मदजललहरीकरितकपोलःशमयतुदुरितंगणपतिनृपनामा २३ ॥ ॥ इतिश्रीमदादिगणेशपुराणे
उपासनाखंडेईश्वरगणेशसंवादेगणेशसहस्रनामकथनंनामषट्चत्वारिंशोध्यायः ४६ ॥ व्यासउवाच ॥ नाम्नांसहस्रेसंप्राप्तेप्रसन्नेचगजानने ॥ ततःकिम

---

१ दारिद्र्यंहंतिविश्वम् इतिपाठान्तरम् । २ कलइतिपाठान्तरम् ।

करोतब्रह्मन्हरस्तत्कथयस्वमे १ ॥ ॥ ब्रह्मोवाच ॥ ॥ गणेशवरदानेननाम्नांचैवोपदेशतः ॥ प्रहृष्टःशंकरोनृत्यञ्जगर्जचमहास्वनः २ आहूयस्व
गणान्देवान्युद्धावसरमादिशत् ॥ तेचहर्षेणमहतायय्रुर्देवाःशिवांतिकम् ३ ब्रह्माकुबेरोथपुरंदरोग्निर्वायुश्चसोमोवरुणोर्यमाच ॥ गंधर्वयक्षाग्र
हकिन्नराश्चसर्वेनमस्कृत्यशिवंस्तुवंतः ४ ॥ ॥ देवाऊचुः ॥ ॥ महादेवजगन्नाथजगदानंददायक ॥ त्वयाहतंमहादैत्यंकदाद्रक्ष्यामहेवयम् ५ स्था
नभ्रष्टावयंतेनकृताविश्वविघातिना ॥ ॥ ब्रह्मोवाच ॥ ॥ एवंदेववचःश्रुत्वापिनाकीनिर्ययौमुदा ६ गणेशंमनसाध्यायन्युद्धायकृतनिश्चयः ॥ वेगेनभ
वनंप्राप्यदेवगंधर्वसंयुतः ७ तावच्चदैत्यंचारैस्तुवृत्तांतःसन्निरूपितः ॥ आगतःसुरसैन्येनयुद्धायागिरिजापतिः ८ तस्यसैन्यान्यनद्यंतशस्त्रैरस्त्रैश्चकंचुकैः ॥ सचदै
त्योमहानादोयुद्धभूषणभूषितः ९ वीरानानंदयामासवासःस्रग्भूषणैर्धनैः ॥ अनेकयानसंस्थेषुयोद्धृषुत्रिपुरंस्वयम् ॥ आरुरोहमहादैत्योनादयन्दिशोदिशः ॥
ततोयुद्धंसमभवत्सेनयोरुभयोर्महत् ११ शस्त्रैर्नानाविधैर्बाणैर्मर्ममर्भेदिभिरायसैः ॥ अस्रद्वन्दीप्रवाहोभून्मार्गरोधनकारकः १२ शस्त्राहताबभुर्योधाःपुष्पि
ताःकिंशुकाइव ॥ केचिच्चदृढवैरेणजीवग्राहममारयन् १३ केचित्कचेषुधृत्वैवशिरांसिचिच्छिदुर्बलात् ॥ धावतांरथिवीराणामश्वानांकरिणामपि १४ अं
घ्रिपातभवोरेणुर्व्यानशेरोदसीक्षणात् ॥ अंधकोरघोरतरेनप्राज्ञायतकिंचन १५ चक्रुरेवंतदायुद्धंवीरानानाविधाभृशम् ॥ जीविताशांपरित्यज्यमर्त्तव्येकृतनि
श्चयाः १६ अदृश्यंतमृतादेवागतेरजसिवायुना ॥ विद्रुतेसुरसैन्येचदैत्यसैन्येचहर्षिते १७ आययौसमरश्लाघीवज्रहस्तःपुरंदरः ॥ शतकोटिनिरीक्ष्यै
वदुद्रुवुर्दैत्यदानवाः १८ सवज्रपातैरसुरांश्चूर्णयामासवज्रभृत् ॥ तत्त्यजुर्जीवितंतेतुचंडवज्रप्रहारतः १९ केचिच्चभग्नचरणाःकेचिद्भग्नशिरोधराः ॥ केचिद्विदीर्ण
जठराश्छिन्नस्कंधभुजाःपरे २० छिन्नाश्वानांचवीराणांवाजिनांरथिनांतथा ॥ केषांचिदुरवोभिन्नाजंघासुचहताःपरे २१ छिन्नगुल्फाःपरेपेतुर्मिषात्पेतुरथापरे ॥
निहतानामसृक्पातैर्जज्ञिरेनिम्नगाबहु २२ उत्साहवर्द्धनास्तेषांवीराणांजयकांक्षिणाम् ॥ ततःशनैर्गर्जमानोददर्शत्रिपुरासुरः २३ निहतंबहुधासैन्यंशक्रंयोद्धु
मथाययौ ॥ बभाणशक्रंदृष्ट्वैवकिमर्थंमर्त्तुमिच्छसि २४ अपैहियुद्धाज्जीवंस्त्वंनपृष्ठंहन्मिवासव ॥ कातेशक्तिर्मयायुद्धंकर्तुंतवशचीपते २५ अजःसिंहेनाकिंयुद्ध
करिष्यतिवदस्वमे ॥ एहियुध्यस्वशक्तिश्चेन्नोचेद्गच्छयथासुखम् २६ एवमुक्तेस्थितेशक्रेववर्षसायकान्बहून् ॥ सज्यंकृत्वाधनुर्दैत्योदेवसेनामताडयत् २७
एकस्मान्मंत्रिताद्बाणादसंख्याताययुःशराः ॥ मृद्नंतोदेवगंधर्वान्रोदसीसमपूरयन् २८ अंधकारंपुनरभूत्बाणजालैर्निरंतरम् ॥ तद्बाणैरर्पितेदेवाव्यंगाःपेतुर्ध
रातले २९ बलहान्यपतद्भूमौप्रहारवरपीडित ॥ सर्वेषुदेववर्येषुमूर्छितेषुमहेश्वरः ३० श्लाघंतंबहुगर्जंतंयुध्यंतंनाभ्यरोचयत् ॥ मनसापूजयच्छंभुस्तस्यदैत्यस्य
पौरुषम् ३१ एतस्मिन्नंतरेतत्रनारदोद्रष्टुमाययौ ॥ पूजितःप्रावदच्छंभुंशृणुष्वनीललोहित ३२ ॥ ॥ नारदउवाच ॥ ॥ त्वयाचिंतानकर्त्तव्यात्रिपुरस्यवधं
प्रति ॥ वक्ष्येतस्यवधोपायंतंकुरुष्वमहेश्वर ३३ तेनपूर्वंतपोकारिदुष्करंब्रह्मणोपिहि ॥ आराधितोगणपतिःसतस्मैसर्ववांछितम् ३४ यद्यत्तेनवृ

तंदेवोदत्तवानविचारतम् ॥ पुरत्रयंकामगममेकबाणाश्रितंमहत् ३५ मरुद्गतिविहीनंतदभेद्यंसर्वनिर्जरैः ॥ सएवमुक्त्वानुह्यशरेणैकेनयस्तव ३६ पुरत्रयंभस्त्यतेतेतस्मान्मृत्युमवाप्स्यसि ॥ एवमुक्त्वागतेतस्मिन्नारदेमुनिसत्तमे ३७ मूर्छितान्विबुधान्शर्वःसावधानमथाकरोत् ॥ सस्मारेमंमुखंवाक्यंस्मारितोनारदेनतु ॥ ३८ ॥ महाप्रयत्नमारेभेदैत्यराजवधायसः ॥ तेजसासर्वनाशायशक्तोदेवोनिजेच्छया ॥ ३९ ॥ रथंकुरूपंशशिसूर्यचक्रंयं तारमिंदीवरजंचकार ॥ धनुर्गिरींद्रंशरमच्युतंसधुर्याश्विनेयावयुनद्विरीशः ४० आचम्यदेवंमनसाविचिंत्यतेनोपदिष्टंचजजापनाम्नाम् ॥ सहस्रमेकाक्षरमंत्रयुक्तममंत्रयत्तेनपिनाकमुग्रम् ४१ अमंत्रयन्महाबाणंविष्णुरूपंयदाशिवः ॥ चकंपेधरणीशेषोवनानिगिरयोपिच ४२ बभ्रमुःखगणाःसर्वेचुक्रुशुश्चमहारवान् ॥ शब्देनाजगवस्यापिविभ्रांताःसुरमानुषाः ४३ अभुंचत्तंयदाबाणंतदादग्धंनभस्तलम् ॥ भूमंडलंसपातालंज्वालामालाभिरंजसा ४४ दृष्ट्वापपालदैत्येंद्रःससैन्यःपुरसंश्रयः ॥ जवेनागाच्छरःसोप्यदहद्दैत्यंपुरत्रयम् ४५ दैत्यदेहगतंतेजोभर्गदेहेलयंययौ ॥ पश्यतांसर्वसैन्यानांदैत्यदानवरक्षसाम् ४६ ततोंतरिक्षेवागासीन्मुक्तोदैत्यःशिवाहतः ॥ ततस्तेतुष्टुवुर्देवामुनयोपित्रिलोचनम् ४७ जगुर्गंधर्वनिचयाश्चारणाःश्रुतितत्पराः ॥ ननृतुश्चाप्सरःसंघाःकिन्नरावाद्यवादकाः ४८ मुमुचुःपुष्पवर्षाणिनारदाद्याःसुरर्षयः ॥ ययुःशिवाज्ञयादेवाःस्वंस्वंस्थानंनिराधयः ४९ नमस्कृत्यमहेशानंत्रिपुरासुरघातिनम् ॥ मुनयोपिनिरुद्वेगाःस्वस्वानुष्ठानतत्पराः ५० आसंस्तस्मिन्हतेदैत्येवेदवेदांगशालिनः ॥ अग्निहोत्राणियज्ञांश्चदानानिचव्रतानिच ५१ चक्रुःसर्वजनाभूमौपुनरुत्साहसंयुताः ॥ शैलादिगणपस्कंदैःसर्वैःपारिषदैरपि५२कृतावनामरुग्यक्षोपिविभज्यतंमहारथम् ॥ जयशब्दैःस्तूर्यशब्दैर्दैवदुंदुभिनिस्वनैः५३अलंकृतंशैलराजंकैलासंमुदितोययौ ॥ त्रिपुरारिरितिस्पष्टंततोनामास्यपप्रथे ५४ एवंमहागणपतेर्मंत्रसामर्थ्यमीरितम् ॥ सहस्रनाम्नामपिचप्रभावोयंनिरूपितः ५५ नविज्ञातोमदन्येनकस्यापिनानिवेदितः ॥ पठनाच्छ्रवणादस्यसर्वकामफलंलभेत् ५६ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेशिवविजयोनामसप्तचत्वारिंशत्तमोध्यायः ४७ ॥ व्यासउवाच ॥ श्रुतंमयामहाख्यानंत्रिपुरस्यवधाश्रयम् ॥ तथापिश्रोतुमिच्छामिकस्थिताजगदंबिका १ कथमाविर्बभूवैषातिथौदग्धःकदैत्यराट् ॥ एतत्सर्वंसविस्तारंकथयस्वपितामह २ ॥ ब्रह्मोवाच ॥ बाहुलेपौर्णमास्यांसमायंदग्धोमहासुरः ॥ दिवायुद्धंमहाघोरंप्रागेववर्णितंहितत् ॥ ३ यतोर्चितःसुरैःसर्वैर्जयशालीसुरारिहा ॥ अतस्तस्यांदीपदानंकुर्वीतिभुविमानवाः ४ तस्यांस्नानंचदानंचजपहोमादिकंचयत् ॥ बहुलंजायतेयस्मात्तस्मात्साबाहुलीस्मृता ५ तस्यांयेतुनकुर्वंतित्रिपुरारिमहोत्सवम् ॥ नलभंतेजयंक्वापिदग्धपुण्याभवंतिते ६ अतस्तस्यांपौर्णमास्यांप्रातरर्चंतियेशिवम् ॥ निशियत्तैःकृतंपापंविलयंप्रतिपद्यते ७ आजन्मतःकृतंपापंमध्याह्नार्चनतस्तथा ॥ सप्तजन्मार्जितंपापंप्रदोषार्चनतोमुने ८ आविर्भावंशिवायास्त्वंकथ्यमानंमयाशृणु ॥ तस्यमृत्युंशिवाज्ज्ञात्वाभयादंतर्हितांशिवा ९ आविरासीज्जगन्माताहिमाचलगुहामुखात् ॥ द

दर्शपर्वतंघोरंसिंहव्याघ्रमृगाकुलम् १० अपश्यंतीशिवंसातुविरहाकुलमानसा ॥ विललापभृशंभीताहातातहाशिवेतिच ११ कथंमांनाविजानीषेसर्वज्ञःसन्सदाशिव ॥ वनएकाकिनींघोरेक्रंदंतींकुररीमिव १२ कदामेदर्शनंतेस्याद्यदिमांविस्मृतवानसि ॥ शक्तानजीवितंयत्नैसोढुंवांविरहंहर १३ तावत्त्वमपिकुत्रासिनमेशोकंशृणोषिकिम् ॥ त्वांविनाशरणंकंवायामिकिंवाकरोम्यहम् १४ योजयस्वपुनर्मात्वंशिवेनचाशेवेनच ॥ इदानींपुनरुत्पन्नांजानीहिजठरात्तव १५ वरंतमेवशीघ्रंमेगवेषयसदाशिवम् ॥ नोचेद्देहपरित्यागंभृगोरस्मात्करोम्यहम् १६ ॥ कउवाच ॥ एवंरुदंत्यास्तस्यास्तुश्रुत्वातांगिरमुत्तमाम् ॥ न्यवेदयद्धिमवतेकश्चिदागत्यधीवरः १७ ॥ ॥ धीवरउवाच ॥ काचिन्नितंबिनीबालासर्वाभरणभूषिता ॥ तादृंकेबिभ्रतीश्रुत्योर्मंडलेइवभास्वतः १८ नानारत्नलसद्दीप्तिमुकुटंमस्तकेभृशम् ॥ ललाटेतुचतुष्कोणंमुक्तापोडशशोभितम् १९ पुष्पंकांचनरत्नाढ्यंमुक्तादामविलंबितम् ॥ सीमंतांतर्गतंचारुनासिकेस्वर्णमौक्तिकम् २० अंगदेचारुणीबाह्वोर्हस्तयोर्वलयानिच ॥ लसत्कांचनरत्नाढ्यंप्रत्येकमंगुलीयकम् २१ मुक्ताफलमयींमालांलसत्कंचुकसंश्रिताम् ॥ हेमरत्नमयींकांचींकटीक्षौमावृतेशुभाम् २२ गुल्फयोःशृंखलेहैमेसिंजच्चारुनूपुरे ॥ पादांगुलीष्वपिपृथक्तत्तद्भूषणमुत्तमं २३ एवंसर्वानवद्यांगीरुदंतीविह्वलाभृशम् ॥ दृष्टापृष्टानमांवक्तिगृण्हातिसातवाभिधाम् २४ ॥ ॥ ब्रह्मोवाच ॥ ॥ इत्थंनिशम्यहिमवांस्त्वरितस्तांसुतांययौ ॥ सांत्वयन्हेतुगर्भाभिर्वाग्भिस्तामवदत्सुधीः २५ ॥ ॥ हिमवानुवाच ॥ ॥ किमर्थंशोचसेसुभ्रूसृष्टिस्थित्यंतहेतुके ॥ सर्वलक्षणसंपूर्णेसर्वशक्तियुतेनघे २६ अकर्त्तुमन्यथाकर्त्तुंकर्त्तुमीशेमहेश्वरि ॥ अवाप्तसर्वकामेचसर्वप्राप्यंतरंगते २७ नवियुक्ताशिवेनत्वंसर्वांतर्यामिणीशुभे ॥ अथापियोजयिष्येत्वांशिवेनशिवकारिणा २८ उत्तिष्ठेतिगृहीत्वातामाययौनिजमंदिरम् ॥ ननंदपार्वतीतत्रदृष्ट्वामेनांसुतान्विताम् २९ निश्वासपरमाप्यासीच्छिवंद्रष्टुंसमुत्सुका ॥ उवाचापतरंतत्वासाधूपायंवदस्वमे ३० व्रतंदानंतपोवापिदुष्करंशिवलब्धये ॥ करिष्येतमहंतातपूर्ववत्तपउत्तमं ३१ ॥ ॥ ब्रह्मोवाच ॥ ॥ अवदज्जनकस्तांतुविचार्यमनसासकृत् ॥ कार्यसिद्धिकरंशीघ्रमुपायंशृणुतंमुने ३२ ॥ ॥ हिमवानुवाच ॥ शृणुपार्वतिवक्ष्यामिसाधूपायंशिवाप्तये ॥ उपास्तिंविघ्नराजस्यधर्मार्थकाममोक्षदाम् ३३ अनुष्ठितांमहेंद्राद्यैर्देवैश्चनारदादिभिः ॥ प्राप्ताश्चसिद्धयस्तास्ताःशक्रादिपदलक्षणाः ३४ ब्रह्मणःसृष्टिसामर्थ्यंदत्तंतेनमहात्मना ॥ विष्णोश्चपालनसामर्थ्यंदत्तंसर्वेश्वरेणह ३५ शिवस्यापिचतेनैवसामर्थ्यंसंहृतौदृढम् ॥ शेषस्यापिचतेनैवसर्वविघ्नहरेणच ३६ धराधरणसामर्थ्यंदत्तंसर्वेश्वरेणह ॥ यस्यस्वरूपंनविदुर्ब्रह्माद्यामुनयोपिच ३७ वाचामगोचरोयोसौमनसोथाप्यगोचरः ॥ गजाननस्वरूपेणपरिदृश्योयमीश्वरः ३८ अतस्तेनैवरूपेणसर्वारंभेषुपूज्यते ॥ तमुपासस्वसर्वेशंमयाप्रोक्तेनवर्त्मना ३९ ॥ इतिश्रीग०पु०उपा०अंबाविर्भाव०अष्टचत्वारिंशत्तमोध्यायः ॥ ४८ ॥ ॥ पार्व

त्युवाच ॥ ॥ दयानिधेगिरींद्रत्वंपितर्मेवदसत्वरम् ॥ उपासनांगणेशस्यसर्वेशस्यजगद्गुरोः १ ययाशिवंसमभ्येत्यशिवंप्राप्स्यामिशाश्वतं ॥ मर्त्यलोकेपि लोकानामुपकारोभविष्यति ॥ २ ॥ ॥ हिमवानुवाच ॥ ॥ तवस्नेहवशाद्देविरहस्यंपरमंशुभं ॥ लोकानांचोपकारायवक्ष्येशृण्वेकचेतसा ॥ ३ प्रत्यूषकालउत्थायनैर्ऋतींदिशमाव्रजेत् ॥ आच्छाद्यधरणींपूर्वंतृणकाष्ठदलैरपि ४ उर्वरांवर्जयेत्तिष्ठन्नुत्सर्पन्नचबुद्धिमान् ॥ त्यक्त्वामूत्रपुरीषेतुयथोक्तंशौचमाचरेत् ५ दंतजिह्वाविशुद्धिंचकृत्वास्नातुंततोव्रजेत् ॥ नदींतडागंवापींवासरःकूपमथापिवा ६ कृत्वापूर्वंमलस्नानंमंत्रस्नानंततश्चरेत् ॥ मृदावाचंदनेनापितिलकंकुंकुमेनवा ७ कुर्याद्धौतेवाससीवापरिधायशुभासने ॥ उपविश्यैकचित्तस्तुसर्वंनित्यंसमाप्यच ८ मृत्तिकांसुंदरां स्निग्धांक्षुद्रपाषाणवर्जिताम् ॥ सुविशुद्धामवल्मीकांजलसिक्तांविमर्दयेत् ९ कृत्वाचारुतरांमूर्तिंगणेशस्यशुभांस्वयम् ॥ सर्वावयवसंपूर्णांचतुर्भुजविराजिताम् १० परश्वादिस्वायुधानिदधतींसुंदरांघनाम् ॥ स्थाप्यपीठेततःपाणीप्रक्षाल्यमेलयेत्सुधीः ११ पूजाद्रव्याणिसर्वाणिजलादीनिप्रयत्नतः ॥ अष्टगंधानक्षतांश्चरक्तपुष्पाणिगुग्गुलम् १२ त्रिपंचसप्तभिःपत्रैर्युतान्दूर्वांकुरांच्छुभान् ॥ अष्टोत्तरशतंनीलान्श्वेतानानीयसुंदरान् १३ घृतदीपंतैलदीपंनैवेद्यंविविधंशुभम् ॥ मोदकापूपलड्डूकान्पायसंशर्करायुतम् १४ सूक्ष्मंचतंदुलान्नंचव्यंजनानिबहूनिच ॥ सचंद्रपूगचूर्णाढ्यंखाद्यखादिरसंयुतं १५ एलालवंगसंमिश्रंतांबूलंकेसरान्वितम् ॥ जंब्वाम्रपनसादीनिद्राक्षारंभाफलानिच १६ तत्तद्दत्तुमवानीशेनालिकेराणिचानयेत् ॥ बहुप्रकारमार्तिक्यंकांचनींदक्षिणांतथा १७ एवंसंभृतसंभारएकांतस्थलमास्थितः ॥ चैलाजिनेकुशमयेआसनेचकृतासनः १८ भूतशुद्धिंप्रकुर्वीतप्राणानांस्थापनंतथा ॥ दिग्बंधपूर्वंदेवांश्चगणेशादीन्नमेत्पुरा १९ अंतर्बहिर्मातृकाश्चन्यसेदागममार्गतः ॥ सन्निधानादिकामुद्रादर्शयेद्गुरुमार्गतः ॥ मंत्रन्यासंततःकृत्वाषडंगन्यासमेवच २० पूजाद्रव्याणिसंशोध्यततोध्यायेद्गजाननम् ॥ एकदंतंशूर्पकर्णंगजवक्त्रंचतुर्भुजम् २१ पाशांकुशधरंदेवंमोदकान्बिभ्रतंकरैः ॥ रक्तपुष्पमयींमालांकंठेहस्तेपरांशुभाम् २२ भक्तानांवरदंसिद्धिबुद्धिभ्यांसेवितंसदा ॥ सिद्धिबुद्धिप्रदंनॄणांधर्मार्थकाममोक्षदम् ॥ ब्रह्मरुद्रहरींद्राद्यैःसंस्तुतंपरमर्षिभिः २३ आगच्छजगदाधारसुरासुरवरार्चित ॥ अनाथनाथसर्वज्ञगीर्वाणपरिपूजित २४ स्वर्णसिंहासनंदिव्यंनानारत्नसमन्वितम् ॥ समर्पितंमयादेवतत्रत्वंसमुपाविश २५ देवदेवेशसर्वेशसर्वतीर्थाहृतंजलम् ॥ पाद्यंगृहाणगणपगंधपुष्पाक्षतैर्युतम् २६ प्रवालमुक्ताफलपूगरत्नतांबूलजांबूनदमष्टगंधम् ॥ पुष्पाक्षतायुक्तममोघशक्तेदत्तंमयाऽर्घ्यंसफलीकुरुष्व २७ गंगादिसर्वतीर्थेभ्यःप्रार्थितंतोयमुत्तमम् ॥ कर्पूरैलालवंगादिवासितंस्वीकुरुप्रभो २८ चंपकाशोकबकुलमालतीमोगरादिभिः ॥ वासितंस्निग्धताहेतुतैलंचारुमगृह्यतां २९ कामधेनुसमद्भूतंसर्वेषांजीवनंपरम् ॥ पावनंयज्ञहेतुस्तेपयःस्नानार्थमर्पितम् ३० धेनुदुग्धसमुद्भूतंशुद्धंसर्वजनप्रियम् ॥ मयानीतंदधिवरंस्नानार्थंप्रतिगृह्यतां ३१ नवनीतसमुत्पन्नंसर्वसंतोषकारणम् ॥ यज्ञांगंदेवताहारोद्धृतंस्नातुंसमर्पितम् ३२ पुष्पसारघसंभूतंसर्वतेजोविवर्धनम् ॥ सर्वपुष्टिकरंदेवमधुस्नानार्थमर्पितम् ३३

इक्षुसारसमुद्भूतांशर्करांसुमनोहरां ॥ मलापहारिणींस्नातुंगृहाणत्वंमयार्पितां ३४ सर्वमाधुर्यताहेतुःस्वादुःसर्वप्रियंकरः॥ पुष्टिकृत्स्नातुमानतिइक्षुसारभवोगुडः
३५ कांस्येकांस्येनापिहितोदधिमध्याज्यपूरितः ॥ मधुपर्कोमयानीतःपूजार्थंप्रतिगृह्यतां ३६ सर्वतीर्थाहृतंतोयंमयाप्रार्थनयाविभो ॥ सुवासितंगृहाणेदंसम्य
क्स्नातुंसुरेश्वर ३७ रक्तवस्त्रयुगंदेवलोकलज्जानिवारणम् ॥ अनर्घ्यंजातिसूक्ष्मंचगृहाणेदंमयार्पितम् ३८ राजतंब्रह्मसूत्रंचकांचनंरत्नसंयुतम् ॥ भक्त्योपपा
दितंदेवगृहाणपरमेश्वर ३९ अनेकरत्नयुक्तानिभूषणानिबहूनिच ॥ तत्तदंगेकांचनानियोजयामितवाज्ञया ४० अष्टगंधसमायुक्तंरक्तचंदनमुत्तमम् ॥ द्वादशां
गेषुतेदेवलेपयामिकृपांकुरु ४१ रक्तचंदनसंमिश्रांस्तंदुलांस्तिलकोपरि ॥ शोभायैसंप्रदास्यामिगृहाणजगदीश्वर ४२ पाटलंकर्णिकारंचबंधूकंरक्तपंकजम्॥
मोगरंमालतीपुष्पंगृह्यतांपरमेश्वर ४३ नानापंकजपुष्पैश्चग्रथितांपल्लवैरपि ॥ बिल्वपत्रयुतांमालांगृहाणसुमनोहराम् ४४ दशांगंगुग्गुलंधूपंसर्वसौगंध्य
कारकम् ॥ सर्वपापक्षयकरंत्वंगृहाणमयार्पितम् ४५ सर्वज्ञसर्वलोकेशतर्पणाशनमुत्तमम् ॥ गृहाणमंगलंदीपंदेवदेवनमोस्तुते ४६ नानापक्वान्नसंयुक्तंपाय
संशर्करान्वितम् ॥ नानाव्यंजनशोभाढ्यंशाल्योदनमनुत्तमम् ४७ दधिदुग्धघृतैर्युक्तंलवंगैलासमन्वितम् ॥ मरीचिचूर्णसहितंकथिकावटकान्वितम् ४८
राजिकाधान्यसंयुक्तंमेथीपिष्टंसतक्रकम् ॥ हिंगुजीरककूष्मांडमरीचिमाषपिष्टकैः ४९ संपादितैःसुपक्वैश्चभर्जितैर्वटकैर्युतम् ॥ मोदकापूपलड्डूकशष्कुलीमंड
कादिभिः ५० पर्पटैरपिसंयुक्तंनैवेद्यममृतान्वितम् ॥ हरिद्राहिंगुलवणसहितंसूपमुत्तमम् ५१ ससामुद्रंगृहाणेदंभोजनंकुरुसादरम् ॥ तृप्तिकारकंतोयंसुगं
धंचपिबेच्छया ५२ त्वयितृप्तेजगत्तृप्तंनित्यतृप्तेमहात्मनि ॥ उत्तरापोशनार्थंतेदत्तंतोयंसुवासितम् ५३ मुखपाणिविशुद्ध्यर्थंपुनस्तोयंददामिते ॥ दाडिमंमधु
रंनिंबुजंब्वाम्रपनसादिकम् ५४ द्राक्षारंभाफलंपक्वकर्कंधूःखार्जुरंफलम् ॥ नारिकेलंचनारिंगमांजिरंजंबिरंतथा ५५ उर्वारुकंचदेवेशफलान्येतानिगृह्यतां ॥
मुखपाणिविशुद्ध्यर्थंपुनस्तोयंददामिते ५६ गृहाणचंदनंचारुकरांगोद्वर्तनंशुभम् ॥ नानापरिमलद्रव्यैर्निर्मितंचूर्णमुत्तमम् ५७ सुगंधिनामकंपुण्यगंधिचारुप
गृह्यतां ॥ चारुशालूरसंभूतंवंशसारसमुद्भवम् ५८ सीमंतभूषणंचूर्णंलाक्षारंजितमस्तुते ॥ सचंद्रपूगचूर्णाढ्यंखाद्यखादिरसंयुतम् ५९ एलालवंगसंमिश्रं
तांबूलंकेसरान्वितम् ॥ न्यूनातिरिक्तपूजायाःसंपूर्णफलहेतवे ६० दक्षिणांकांचनींदेवस्थापयामितवाग्रतः ॥ सितपीतैस्तथारक्तैर्जलजैःकुसुमैःशुभैः ॥
६१ ग्रथितांसुंदरांमालांगृहाणपरमेश्वर ॥ हरिताःश्वेतवर्णावापंचत्रिपत्रसंयुताः ६२ दूर्वांकुरामयादत्ताएकविंशतिसंमिताः ॥ एकविंशतिसंख्या
काःकुर्यादेवप्रदक्षिणाः ६३ पदेपदेतेदेवेशनश्यंतुपातकानिमे ॥ औदुंबरेराजतेवाकांस्येकांचनसंभवे ६४ पात्रेप्रकल्पितान्दीपान्गृहाणचक्षुषांपका
न् ॥ पंचारार्तिंपंचदीपैर्दीपितांपरमेश्वर ६५ चारुचंद्रनिभंदीपंगृहाणवीचिवारणम् ॥ यथास्यनेक्ष्यतेभस्मतथापापंविनाशय ६६ स्तोत्रैर्नानाविधैः
सूक्तैःसहस्रनामभिस्ततः ॥ उपविश्यस्तुवीतैनंकृत्वास्थिरतरंमनः ६७ दीनाधीशदयानिधेसुरगणैःसंसेव्यमानद्विजब्रह्मेशानमहेंद्रशेषगिरिजागंधर्व

द ३० ततःसुहृज्जनयुतःस्वयंभुंजीतसादरम् ॥ अपरस्मिन्दिनेमूर्तिंनृयानेस्थापयेन्मुदा ३१ छत्रध्वजपताकाभिश्चामरैरुपशोभिताम् ॥ किशोरैर्दंडयुद्धेनयुध्यद्भि श्चपुरःसरम् ३२ महाजलाशयंगत्वाविसृज्यनिनयेज्जले ॥ वाद्यगीतध्वनियुतोनिजमंदिरमाव्रजेत् ३३ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेहिमवद्गिरिजासं वादेचतुर्थीव्रतकथनंनामपंचाशत्तमोध्यायः ॥ ५० ॥ पार्वत्युवाच ॥ तववाक्यामृतेनाहंपितःप्रीतास्मिसांप्रम् ॥ परंतुसंशयोमेस्तितंनुदस्वाहिमालय १ केनकेनकृतंपूर्वंव्रतमेतन्महीधर ॥ आख्यातंकेनवाकस्मैकःकांसिद्धिमितोगमत् २ एतत्सविस्तरंब्रूहिसंशयच्छेदनायमे ॥ यश्चपृच्छतियोवक्तिगजा ननकथाःशुभाः ३ शृणोत्यन्योपियोमर्त्यश्चयस्तेपुण्यभागिनः ॥ जीवितंसफलंतेषांजन्मज्ञानंचकर्मच ४ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवंतयाकृतप्रश्नो हिमवानभ्यभाषत ॥ वरदस्यगणेशस्यनानाजनकृतंव्रतम् ५ ॥ ॥ हिमवानुवाच ॥ ॥ शृणुपार्वतिवक्ष्यामिसंवादंतेपुरातनम् ॥ सेतिहासंव्रतस्यास्यसर्व सिद्धिकरस्यह ६ कैलासेगिरिवर्येतुसुखासीनंजगद्गुरुम् ॥ क्रीडमानंमुदादेवैर्गंधर्वैःपरमर्षिभिः ७ नत्वास्तुत्वामहातेजाःपरिपप्रच्छषण्मुखः ८ ॥ स्कंदउ वाच ॥ देवदेवजगन्नाथभक्तानामभयंकर ॥ नानाख्यानानिदिव्यानिश्रुतानित्वत्प्रसादतः ९ तृप्तिंनातनगच्छामिपायंपायंसुधामिव ॥ अधुनाब्रूहिमेदेव व्रतंसर्वार्थसिद्धिदम् १० अनुष्ठाननेनयस्याथकरस्थाःसिद्धयोनृणाम् ॥ जायंतेसाधकानांतुवरदस्यप्रसादतः ११ ॥ ॥ शिवउवाच ॥ ॥ साधुपृष्टंत्वयास्कंद सर्वेषांहितकारकम् ॥ कथयामितवप्रीत्यामहासिद्धिप्रदंभुवि १२ विनायकप्रियंतातव्रतानामुत्तमंव्रतम् ॥ सर्वेषांपुरुषार्थानांसाधकंकृत्तिकात्मज १३ विनायज्ञैस्तथादानैर्जपहोमादिभिर्विना ॥ सर्वसिद्धिकरंस्कंदपुत्रपौत्रप्रवर्धनम् १४ राजानंराजपुत्रंवातन्मंत्रिणमथापिवा ॥ वशमानयतिक्षिप्रंव्रतमेतन्म हत्तमम् १५ महापापोपपापैश्चबहुजन्मसुसंचितैः ॥ व्रतस्यास्यप्रभावेणतैःपुमान्मुच्यतेक्षणात् १६ भाजनंसर्वसिद्धीनांजायतेमानवोभुवि ॥ प्रीतिदंतुगुणेशस्यनानेनसदृशंक्षितौ १७ ॥ ॥ स्कंदउवाच ॥ ॥ तातकस्मिन्नभवेन्मासिव्रतमेतन्महोत्तमम् ॥ विधानंकीदृशंचास्यकेनवाचरितंपुरा १८ स र्वमेतन्ममाचक्ष्वयद्यस्तिकरुणामयि ॥ ॥ शिवउवाच ॥ ॥ नभःशुक्लचतुर्थ्यांतुस्नात्वागुरुगृहंव्रजेत् ॥ प्रणम्यतंगुरुंपश्चात्पूजयित्वायथाविधि १९ पाद्या चमनवस्त्राद्यैर्भूषणैश्चमहत्तरैः ॥ तोषयित्वातुतंसम्यगाज्ञयाप्रारभेद्व्रतम् २० सर्वसिद्धिकरंतातव्रतंगाणेश्वरंगुरो ॥ त्वमेवश्रीगणेशोसिदिशकामप्रदंप्रभो २१ उपदिष्टेव्रतेतेनसार्धंगंगातटंव्रजेत् ॥ तडागंवादेवखातंतत्रस्नायाद्यथाविधि २२ श्वेतसर्षपयुक्तेनतिलकल्केनषण्मुख ॥ स्नात्वाधात्रीयुतेनेह कृत्वानित्यंगृहंव्रजेत् २३ उपविश्यासनेशुद्धेपूजयित्वागणाधिपम् ॥ गुरूपदिष्टमार्गेणव्रतंपश्चात्समारभेत् २४ मृदामूर्तिंगणेशस्यचतुर्थ्यांश्रावणस्य तु ॥ प्रत्यहंपूजयेत्कृत्वायावद्भाद्रचतुर्थिका २५ ब्रह्मचर्यव्रतेस्थित्वाकर्तव्यंव्रतमुत्तमं ॥ उपवासैकभक्ताभ्यांनक्तेनायाचितेनवा २६ चतुर्थकाले भुंजीतहविष्यान्नंसमाहितः ॥ अक्षारंमधुरंभुंजन्भक्तिमानाचरेद्व्रतम् २७ जपन्गणेश्वरींविद्यांषडाननषडक्षरीं ॥ द्विचतुरक्षरांवापितथैवैकाक्षरा

सिद्धैःस्तुत ॥ सर्वारिष्टनिवारणैकनिपुणत्रैलोक्यनाथप्रभोभक्तिंमेसफलांकुरुष्वसकलांक्षांत्वापराधान्मम ६८ इतिमूर्तिंसमभ्यर्च्यदंडवत्प्रणिपत्यच ॥ जपेन्मंत्रंततोदेविसर्वसिद्धिप्रदायक ६९ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेगणेशपार्थिवपूजानिरूपणंनामैकोनपंचाशत्तमोध्यायः ॥ ४९ ॥ ॥ ध्र ॥ पार्वत्युवाच ॥ ॥ अहंमंत्रंनजानामिगिरींद्रमेवदस्वयं ॥ अनुग्रहंगणेशस्ययामियामिशिवंशिवं १ ॥ ॥ हिमवानुवाच ॥ ॥ मंत्रानानाविधादेविनाना सिद्धिप्रदायकाः ॥ असंख्यातागणेशस्यकांश्चित्तेषुवदामिते २ कृत्वापद्मासनंसम्यक्नियम्यखानिसर्वशः ॥ कृतन्यासविधिःपश्चाज्जपंकुर्यान्निजे च्छया ३ एकाक्षरस्यमंत्रस्यलक्षंलक्षार्धमेवच ॥ षडक्षरस्यमंत्रस्यनियुतंचायुतंतथा ४ तथापंचाक्षरस्यापिदशाष्टाक्षरयोरपि ॥ अष्टाविंशद्व र्णमंत्रोजप्तव्योयुतसंख्यया ५ एवंनानाविधान्मंत्रान्नजपंतिस्वेष्टसिद्धये ॥ त्वंतुपार्वतिमेवाक्यंशृणुष्वैकाग्रमानसा ६ एकाक्षरंषडर्णंचगृहा णमंत्रमुत्तमं ॥ नभःशुक्लचतुर्थ्यांत्वमारंभंकुरुसुव्रते ७ अनुष्ठानंमासमात्रंकुरुकार्यंभविष्यति ॥ शिवंप्राप्स्यासिसुव्यक्तमन्यद्यद्वापिवांछितं ८ पा र्थिवीपूजितामूर्तिःस्त्रियावापुरुषेणवा ॥ एकादद्यातिसाकाम्यंधनपुत्रपशूनपि ९ असाध्यंसाधयेन्मर्त्योमूर्तिद्वयप्रपूजनात् ॥ त्रिमूर्तिपूजनाद्राज्यंरत्ना निसर्वसंपदः १० चतुर्मूर्तेःपूजयेद्योधर्मार्थकाममोक्षभाक् ॥ सार्वभौमोभवेद्राजापंचमूर्तिप्रपूजनात् ११ षण्मूर्तिपूजयासृष्टिस्थितिप्रलयकृद्भवेत् ॥ सप्ताष्ट नवमूर्तीनांपूजयासर्वविद्भवेत् १२ भूतंभव्यंभविष्यंचवेत्तिदेवप्रसादतः ॥ त्रयस्त्रिंशत्कोटिदेवावह्नींद्रशिवविष्णवः १३ सनकाद्यामुनिगणाःसेवंतेदशपूजना त् ॥ एकादशार्चनादेवदशरुद्राधिपोभवेत् १४ द्वादशादित्यराज्यंचलभेच्चद्वादशार्चनात् ॥ अतिसंकटवेलासुकुर्याद्दृढचाप्रपूजनं १५ अष्टोत्तरशतंयावत्तावत्तद वाप्नुयात् ॥ महामुक्तिमवाप्नोतिलक्षपूजनतोन्वहं १६ कारागृहान्मुक्तिकामःकारयेन्मूर्तिपंचकं ॥ त्रिःसप्तरात्रान्मुच्येतगणेशानुग्रहान्मुने १७ सप्तमूर्तीःप्र कुर्वीतप्रत्यहंपंचवत्सरं ॥ महापापात्प्रमुच्येतगणेशेभक्तिमान्नरः १८ आजन्ममरणादेकांपूजयेत्पार्थिवींनरः ॥ गणेशःसतुविज्ञेयोदर्शनाद्विघ्ननाशनः १९ तमेवसर्वकामेषुपूजयेन्नगणाधिपं ॥ तस्यैवपूजयाप्रीतोनदेवःस्यात्तथास्वयं २० सर्वरोगप्रपीडासुमूर्तीनांत्रयमुत्तमम् ॥ नवाहंपूजयेद्यस्तुसर्वपीडांव्यपोह ति २१ सौवर्णीराजतीताम्रीरीतिकांस्यसमुद्भवा ॥ मौक्तिकीचप्रवालीचसर्वमेतत्प्रयच्छति २२ एवंकृतेव्रतेदेविसर्वान्कामानवाप्स्यसि ॥ यावद्भाद्रपदेमा सिचतुर्थीपरिलभ्यते २३ तस्यांमहोत्सवःकार्योयथाविभवमादरात् ॥ रात्रौजागरणंकार्यंतत्कथावाद्यगायनैः २४ प्रभातेविमलेस्नात्वापूर्ववत्पूजयेद्विभुं ॥ गणेशंवरदंदेवंततोहोमंसमारभेत् २५ कुंडेसांगेस्थंडिलेवाहूयाज्यपदशांशतः ॥ पूर्णाहुतिंततःकुर्याद्बलिदानपुरःसरम् २६ आचार्यंपूजयेत्पश्चाद्धोमूवासोधनादि भिः ॥ ब्राह्मणांस्तोषयेत्पश्चाद्धोमशेषंसमापयेत् २७ तर्पयेत्तद्दशांशेनतद्दशांशेनभोजयेत् ॥ ब्राह्मणान्वेदविदुषःसपत्नीकांश्चकांश्चन २८ तेभ्योभूषणवासां सिदद्याच्छक्त्याचदक्षिणां ॥ दद्यात्स्त्रीणामलंकारान्योषिद्भ्यश्चसकंचुकान् २९ तुष्टयेगणनाथस्यसिद्धबुद्धियुतस्यह ॥ वित्तशाठ्यंनकुर्वीतयथाविभवमाचरे

मपि २८ दशाक्षरामथस्कंदद्वादशार्णामथापिवा ॥ नियुतंवायुतंवापिप्रत्यहंजपइष्यते २९ तदर्धंवातदर्धंवादशांशंहोममाचरेत् ॥ ध्यायन्गजाननंदेवमहोरात्रमतंद्रितः ३० प्राप्तेप्रोष्ठपदेमासिचतुर्थ्यांतुगजाननं ॥ सौवर्णेपलमानेनतदर्धार्धेनवापुनः ३१ मयूरवाहनंकुर्यादथवाखुगतंशुभं ॥ कृवामंडपित्कांतत्रधान्यराशिंप्रकल्पयेत् ३२ सौवर्णेराजतंताम्रंकलशंस्थापयेत्ततः ॥ तस्योपरिन्यसेत्पात्रंरुक्मराजतताम्रकं ३३ वस्त्रयुग्मेनसंवेष्ट्यसपात्रंकलशंततः ॥ पंचपल्लवसंयुक्तंपंचरत्नसमन्वितं ३४ पीठपूजांपुराकृत्वास्थापयेत्तत्रतंविभुं ॥ मूलमंत्रैश्चवेदोक्तैःपूर्वोक्तैरपिषण्मुख ३५ ध्यात्वागजाननंदेवमावाह्यपरयामुदा ॥ आसनंचतथापाद्यंदद्यादाचमनीयकं ३६ अर्घ्यंरत्नयुतंस्कंदस्नानंपंचामृतैःशुभं ॥ सुवासिताभिरद्भिश्चस्नापयत्परमेश्वरम् ॥ रक्तवस्त्रयुगंदद्यादुपवीतं तथोत्तमं ३७ नानाविधैराभरणैर्भूषयेत्परमेश्वरं ॥ गंधाक्षतैर्धूपदीपैर्नैवेद्यैर्विविधैरपि ३८ वटकापूपलड्डूकशाल्यन्नपायसादिभिः ॥ पंचामृतैर्व्यंजनैश्चभोजयेत्परमेश्वरं ३९ उद्वर्तनंकरेदद्यात्फलंतांबूलमेवच ॥ कांचनींदक्षिणांदद्याच्छत्रंव्यजनचामरे ४० नीराजनंमंत्रपुष्पंदत्वास्तोत्राण्युदीरयेत् ॥ सहस्रनामभिःस्तुत्वाब्राह्मणान्पूजयेत्ततः ४१ रात्रौजागरणंकृत्वागीतनृत्यादिमंगलैः ॥ प्रभातेविमलेस्नात्वानित्यंकृत्वायथाविधि ४२ पूजयेत्पूर्ववद्देवततोहोमंसमाचरेत् ॥ द्रव्यैर्नानाविधैर्हुत्वाकुर्यादाचार्यपूजनं ४३ गोभूतिलहिण्याद्यंगुरवेतन्निवेदयेत् ॥ अन्येभ्योब्राह्मणेभ्यश्चप्रदद्याद्दूरिदक्षिणां ४४ ब्राह्मणान्भोजयेत्पश्चाच्छतमष्टोत्तरंतथा ॥ अधिकान्यदिशक्तिश्चेदथवाप्येकविंशतिं ४५ दीनांधकृपणेभ्यश्चदद्यादन्नंसपायसं ॥ पुनश्च दक्षिणांदद्यात्प्रगृह्याशिषमुत्तमां ४६ सुहृद्बंधुयुतोमौनीस्वयंभुंजीतसादरं ४७ ॥ ॥ शिवउवाच ॥ ॥ एवंतेकथितंस्कंदवरदस्यव्रतंशुभं ॥ भुक्तिमुक्तिप्रदंनृणांसर्वकामफलप्रदं ४८ पुरातनमितिहासमस्मिन्नर्थेवदामिते ॥ महाधर्मपरोराजापुराभूत्कर्दमाभिधः ४९ पालयामासवसुधांसागरांतांस्वतेजसा ॥ गुणैर्यस्यहृतादेवानित्यंयत्सदसिस्थिताः ५० कदाचिद्दैवयोगेनभृगुस्तस्यगृहंययौ ॥ ततउत्थायराजासबहुमानपुरःसरं ५१ उपविश्यासनेश्रेष्ठेपूजितोगुरुवत्ततः ॥ सुक्त्वास्थितंमुनिवरंराजावचनमब्रवीत् ५२ ॥ ॥ राजोवाच ॥ ॥ भगवन्सर्वतत्वज्ञकिंचित्पृच्छामितद्वद ॥ पूर्वजन्मनिकश्चाहंकिंमयासुकृतंकृतं ५३ येनेदृशंमयाराज्यंप्राप्तंनिहतकंटकं ॥ प्राप्तंनैवनृपैरन्यैर्नचप्राप्स्यंतिचापरे ५४ देवानामपिपूज्योहंगंधर्वोरगरक्षसां ॥ कुबेरसंपदातुल्यांसंपदंपश्यमेमुने ५५ त्रिलोक्यांरत्नभूतंयत्तदानीतंस्वतेजसा ॥ यंयंपदार्थमिच्छामितंतंपश्यामिवेश्मनि ५६ केनेत्थंकर्मणाप्राप्तंतद्वद त्वममप्रभो ॥ कामयेतत्पुनःकर्तुंपुण्यंपुण्यवतांवर ५७ ॥ ॥ भृगुरुवाच ॥ ॥ कथयामिनृपश्रेष्ठप्रणिधानबलादहं ॥ त्वमासीःपूर्वजन्मनिक्षत्रियोदुर्बलःशुचिः ५८ कुटुंबभरणार्थंत्वंनानाकर्माण्यथाकरोः ॥ क्रियमाणंचतत्कर्मनचासीत्फलदंतव ५९ अत्यंतनिष्ठुरैर्वाक्यैर्दारापत्यैश्चपीडितः ॥ अपृष्ट्वापुत्रदारांस्त्वगतवान्गहनंवनम् ६० विभ्रमन्दिक्षुसर्वासुदृष्टवानसिसौभरिं ॥ सिद्धासनेसमासीनंसेवितंमुनिपुंगवैः ६१ कथयंतंमहाविद्यांशिष्ये

म्योदुःखनाशिनीं ॥ दृष्ट्वातंसौभरिंदिव्यमन्यांश्चर्षिगणान्नृप ६२ दंडवत्पतितोसित्वंभुवितैश्चाभिनंदितः ॥ उपविष्टःस्वासनेचमुनिनातेनदर्शिते ६३
पृष्टवानसितंदिव्यंलब्ध्वावसरमादृतः ॥ ॥ क्षत्रियउवाच ॥ ॥ स्वामिन्संसारदुःखेनबहुधाक्लेशितोमुने ६४ दारापत्यसुहृद्भिश्चवाग्बाणैर्भृशताडितः ॥
नवैराग्यंमनोयातिनिष्ठुरेषुसुहृत्सुच ६५ शीतोष्णक्षुत्पिपासाभिःपीडितोपिभृशंमुने ॥ उपायंवदमेकिंचिद्दुःखसागरतारकम् ६६ ॥ ॥ शिवउवाच ॥
इतिश्रुत्वावचस्तस्यसौभरिःकृपयायुतः ॥ उपायंचिंतयामासनृपदुःखविनाशनम् ६७ ततस्तंक्षत्रियंप्राहसर्वपापाविमोचनम् ॥ ॥ ऋषिरुवाच ॥ ॥
व्रतंयत्कथयिष्यामिकुरुनिश्चितमानसः ६८ यस्यानुष्ठानमात्रेणसर्वदुःखलयोभवेत् ॥ ब्राह्मणैःक्षत्रियैर्वैश्यैस्तथान्यैर्ब्रह्मर्षिभिःकृतम् ६९ मुक्तास्तेसर्वदुःखे
भ्यःप्राप्ताःसिद्धिमनुत्तमां ॥ वरदस्यगणेशस्यधर्मार्थकाममोक्षकृत् ७० ॥ ॥ क्षत्रियउवाच ॥ ॥ कोसौगणेशःकिंशीलःकिंरूपःकिंस्वभाववान् ॥
किंकर्माकथमुत्पन्नस्तत्सर्वंकथयस्वमे ॥ यदिमेश्रवणायालंयद्यनुग्राह्यतामयि ७१ ॥ ॥ ऋषिरुवाच ॥ ॥ यद्ब्रह्मनित्यंविरजंविशोकंज्ञानस्वरूपंपरमार्थभूतम् ॥ अनादिमध्यांतमनंतपारंगणाधिपंतंप्रवदंतिसंतः ७२ यस्मादोंकारसंभूतिर्यतोवेदायतोजगत् ॥ येनसर्वमिदंव्याप्तंतंविद्धिगणनायकम् ७३ जगत्सर्जनका
मेनब्रह्मणायस्यतुष्टये ॥ अब्दानांतुशतंपूर्णंतपस्तप्तंसुदुष्करम् ७४ ततोत्दृष्टमनावेधाःप्रसन्नंतमपूजयत् ॥ नानाविधोपचारैश्चदिव्यरत्नैःफलैस्तथा ७५ सिद्धिबु
द्धीउभेकन्येमनसाकल्पितेददौ ॥ तुष्टोदेवोददौतस्मैविद्यामेकाक्षरींविभुः ७६ ततोलब्धवरोब्रह्माचकारसकलंजगत् ॥ षडक्षरेणमंत्रेणविष्णुनातोषितःपुरा ७७
कृत्वामूर्तिंगणेशस्यपूर्वोक्तविधिनाव्रतम् ॥ अब्दंगंधर्षमेकंतुनियमान्कृतवान्हरिः ७८ वरंलब्ध्वागणेशात्तुपालयामासवैजगत् ॥ एवंविधंविजानीहिगणेशं
भुविसंस्तुतम् ७९ विश्वरूपमनादिंचसर्वकारणकारणम् ॥ तमाराधययत्नेनसर्वदुःखाद्विमुंक्ष्यसे ८० ॥ ॥ क्षत्रियउवाच ॥ ॥ कस्मिन्कालेप्रकर्तव्यमेतद्व्र
तमनुत्तमम् ॥ विधिनाकेनमेब्रूहिसांप्रतंमुनिसत्तम ॥ करिष्येवचनात्तेहंसर्वदुःखप्रशांतये ८१ ॥ ॥ मुनिरुवाच ॥ ॥ श्रावणेऽबहुलेपक्षेचतुर्थ्यां
मारभेद्व्रतम् ॥ कुर्वीतपरयाभक्त्यायावद्वाद्रचतुर्थिका ॥ उपारैःषोडशाभिःपार्थिवंगणनायकम् ॥ प्रत्यहंपूजयेद्भक्त्याब्राह्मणान्भोजयेत्ततः ८२
त्वमेतत्कुरुभूपालसर्वान्कामानवाप्स्यसि ॥ इतिश्रुत्वाव्रतंतस्मात्कृतवानसिसुव्रत ८३ समाप्तेतुव्रतेतत्रसौभर्याश्रममंडले ॥ तावत्तस्यगृहंदिव्यंगणेशस्यप्र
सादतः ८४ दिव्यनारीनरयुतंदासीदाससमन्वितम् ॥ वेदघोषसमायुक्तंजातंगोधनसंकुलम् ८५ दिव्यवस्त्रसमायुक्तानानालंकारसंयुता ॥ अपत्यैस्ताद्दशैर्यु
क्ताविस्मितासीत्प्रतीक्षती ८६ आयास्यतिकदाभर्तेत्येवंचिंतापराभवत् ॥ तावत्त्वंमुनिमामंत्र्यगतोसिनिजमालयम् ८७ दिव्यंतच्छरणंहित्वास्वगृहंपरिमा
र्गयन् ॥ तावद्भार्याप्रेषितास्त्वांनिन्युस्तद्भवनंनराः ८८ ततस्त्वयापिविज्ञातःप्रभावोवरदस्यसः ॥ तद्व्रतस्यप्रभावेणराज्यभागिहजन्मनि ८९ ॥ शिवउवाच ॥
इतिश्रुत्वाभृगोर्वाक्यंकर्दमोहर्षनिर्भरः ॥ चकारसकलंराजाभृगुणायत्समीरितम् ९० व्रतस्यास्यप्रभावेणज्ञानवैराग्यवान्नृपः ॥ भुक्त्वाभोगान्यथाकामंस्थाप्य

पुत्रान्निजेपदे ९१ गतोगाणेश्वरंधामयतोनावर्ततेपुनः ॥ सर्वार्थसाधकंस्कंदव्रतानांव्रतमुत्तमम् ९२ नैतादृशंवतंदानंश्रुतमन्यत्कदाचन ॥ सर्वार्थसाधकंस्कंद व्रतंकुरुयदीच्छसि ९३ देवदानवगंधर्वैर्ऋषिभिर्मनुजैःकृतम् ॥ नलेनइंदुमत्याचराज्ञाचंद्रांगदेनच ९४ संप्राप्ताःसर्वकामांस्तेगतागाणेश्वरंपदम् ॥ ॥ गि रिरुवाच॥ ॥ इतितेकथितंसर्वंसेतिहासंव्रतंमहत् ॥ कुरुत्वंमनसाध्यात्वावरदंगणनायकम् ९५ व्रतमेतन्महाभागेशंकरंप्राप्स्यसेततः ॥ स्नेहेनकथितंते द्यप्रकाशंकुरुमाव्रतम् ९६ ॥ इतिश्रीगणेशपु०हिमवत्पार्वतीसंवादोनामएकपंचाशत्तमोऽध्यायः ॥५१ ॥ पार्वत्युवाच ॥ नलेनेदंकृतंकस्मात्कोनलोवद मोपितः ॥ मनोविश्रांतिमायातिशृण्वंत्यामेकथानकम् १ ॥ हिमवानुवाच ॥ निषधेषुमहाराजोनलोनामाभवत्पुरा ॥ ब्रह्मण्योवेदविच्छूरोदानीमानीधनीमु निः २ रथीखड्गीशरीचापीनिषंगीकवचीबली ॥ कृतास्त्रोदेवपूज्यश्चत्रिलोकीगमनःशुचिः ३ शेषोपिमूकतांयातिवर्णितुंयद्गुणानपि ॥ नसंख्याविद्यतेऽश्वानां गजानांरथिनांतथा ४ धानुष्काणांशस्त्रभृतांजग्निशस्त्रभृतामपि ॥ चकंपुर्यद्भयाद्देवाइंद्राद्याःसदिगीश्वराः ५ दमयंतीतिभार्यासीद्यस्यसौंदर्यमंदिरम् ॥ दमयित्वाखिलान्ब्रह्मासारंसारंप्रगृह्यच ६ दमयंतीतिविख्यातायतस्तेनेतिनिर्मिता ॥ दमयंत्यैत्रिलोकस्थनारीणांचारुतामदात् ७ नानालंकारसं युक्तानानामणिविभूषिता ॥ मुक्ताहारलसत्कंठासद्गुणाढ्यासुशोभना ८ यस्यामात्योमहानासीत्पद्महस्तःपराक्रमी ॥ बुद्ध्याबृहस्पतिसमोनयेचागिर सासमः ९ तुंगत्वेमेरुसदृशोगांभीर्येचोदधेःसमः ॥ कदाचिदुपविष्टोसौनलोराजामहामनाः १० निषसादसभागेहेनृपमंडलमध्यगः ॥ नृत्यंत्यप्सर सस्तस्यपुरतश्चारुदर्शनाः ११ स्तुवंतिबंदिनस्तंचब्रह्मर्षिगणसंयुतम् ॥ एतस्मिन्नेवकालेतुगौतमोनृपतिंययौ १२ उत्थायसादरंराज्ञास्वासनेविनिवेशि तः ॥ पूजितःपरयाभक्त्यातताःपप्रच्छतंनलः १३ ॥ नलउवाच ॥ स्वामिन्ननुगृहीतस्तेदर्शनेनमहामुने ॥ जन्मराज्यंपितामाताकुलंजीवितमद्यमे १४ सफलं स्वागमेहेतुंवदतूर्णंमहामुने ॥ गौतमउवाच ॥ ममासीन्महतीवांच्छाद्रष्टुंतेवैभवंनृप १५ स्तुवंतिदेवाःस्वर्गस्थाब्रह्मेंद्रहरिशूलिनः ॥ धन्योसिमर्त्यलोकस्थो मर्त्यैर्देवैश्चशस्यसे १६ नित्यतृप्तोप्यहंतृप्तःपूजांदृष्ट्वाचवैभवम् ॥ इदानीमनुजानीहिगमिष्येस्वाश्रमंप्रति १७ ॥ नृपउवाच ॥ ॥ वेदवेदांगविद्ब्रह्मन्सर्व शास्त्रप्रवर्त्तक ॥ दयानिधेक्षणंस्थित्वाछिंधिमेसंशयंमुने १८ ॥ ॥ मुनिरुवाच ॥ ॥ साधुपृष्टंमहाराजास्थितोहंस्नेहभावतः ॥ नागानृपाश्चदेवाश्चय त्तेनाज्ञाविलंघिनः १९ ॥ ॥ नृपउवाच ॥ ॥ ममैवविस्मयोब्रह्मन्निरीक्ष्यवैभवंस्वकम् ॥ इत्थंममाभवत्केनपुण्येनतपसापिवा २० वदतत्त्वेनकश्चाहमभवंपूर्व जन्मनि ॥ ॥ मुनिरुवाच ॥ गौडदेशात्परेदेशेपुरेपिप्पलसंज्ञके २१ त्वमासीःक्षत्रियःपूर्वंदरिद्रोज्ञानवान्शुचिः ॥ जायापत्यैःसुहृद्भिश्चवाक्शरैस्ताडितो भृशम् २२ रात्रावपृष्ट्वासर्वांस्त्वंनिर्वेदाद्गहनंवनम् ॥ गतवान्वृक्षवल्लीभिःसिंहव्याघ्रगजैर्मृगैः २३ सेवितंशीतलजलैःसरोभिर्जलजादिभिः ॥ आ श्रमोथत्वयादर्शिभ्रमताभ्रमतावने २४ तपोनिधेःकौशिकस्यवेदघोषनिनादितः ॥ तत्रगत्वामुनिंतंत्वंप्रणतोभक्तिभावतः २५ उत्थापितःकौशिकेन

दीनानाथदयावता ॥ दुःखितंत्वांविदित्वामआशीर्वादमवीवदत् २६ गजाननोमेदेवेशोभवितातेशुभंकरः ॥ श्रुत्वातदाशिषंसौम्यांप्राप्तोसिपरमांमुदम् २७
पृष्टवानसितंविप्रमुपायंसर्वकामदम् ॥ दारिद्र्यनाशकंराजन्मुक्तिमुक्तिप्रदंशिवम् २८ गणेशाराधनंतुभ्यंकथयामासकौशिकः ॥ ॥ कौशिकउवाच ॥ ॥ व्रतं
कुरुगणेशस्यमासमात्रंनराधिप २९ कुरुमूर्तिंगणेशस्यमृन्मयींचारुदर्शनाम् ॥ पूर्वोक्तविधिनापूजांकुरुशृणुकथानकम् ३० दिनेदिनेमासमात्रंततःसिद्धिम
वाप्स्यसि ॥ ॥ मुनिरुवाच ॥ ॥ इतिश्रुत्वाकौशिकंतंपप्रच्छभूमिपःपुनः ३१ ॥ ॥ नृपउवाच ॥ ॥ गजाननंनजानामितत्स्वरूपंवदस्वमे ॥ ज्ञात्वा
तंदेवदेवेशंकरिष्येव्रतमुत्तमम् ३२ ॥ ॥ मुनिरुवाच ॥ ॥ इतितेनकृतेप्रश्नेजगादमुनिसत्तमः ॥ अनिर्वाच्यस्वरूपस्यपरब्रह्मस्वरूपिणः ३३ वैकारिकस्व
रूपाणिगजाननकृतानितम् ३४ कौशिकउवाच ॥ यःकर्त्तासर्वलोकानांपितामाताजगद्गुरुः ॥ ब्रह्मेंद्रशिवविष्णूनांध्येयोयःसगजाननः ३५ ॥ मुनिरुवाच ॥
इतिश्रुत्वातुतद्वाक्यंप्रणिपत्यमुनीश्वरम् ॥ अनुज्ञातस्ततस्तेनगतोसिनिजमंदिरम् ३६ आरभ्यश्रावणेशुद्धेचतुर्थ्यांव्रतमुत्तमम् ॥ अकरोन्मृन्मयींमूर्त्तिंगणे
शस्ययथोदिताम् ३७ स्थानेचवचनेमौनेगमनेशयनेभुजि ॥ ध्यायन्गजाननंदेवंप्रायाःसिद्धिमनुत्तमाम् ३८ नानागजरथाश्वाद्यैर्गोधनैर्धनसंचितैः ॥
दासीदासयुतःश्रीमान्जातोव्रतप्रभावतः ३९ दत्तवानसिदानानिसर्वाणिदेवतुष्टये ॥ गणेशस्यमहामौल्यंप्रासादंकृतवान्मुदा ४० भुक्त्वाभोगान्यथ
थाकामंकालेननिधनंगतः ॥ जातोसिनिषधेदेशेनृपस्त्वंनलनामकः ४१ अतस्त्वय्यचलालक्ष्मीस्त्रिलोकीजनवंदिते ॥ इदानीमनुजानीहियत्पृष्टंत
न्निरूपितम् ४२ ॥ ॥ हिमवानुवाच ॥ ॥ एवंगतेगौतमेतुव्रतंचक्रेनलोनृपः ॥ तद्वाक्याज्जातविश्वासोमूर्तिंकृत्वासुशोभनाम् ४३ श्रुत्वाकथांगणेशस्य
प्रत्यहंपूज्यभक्तितः ॥ अलभत्सर्वकामान्सव्रतस्यास्यप्रभावतः ४४ ॥ इतितेकथितंकन्येनलेनेत्थंकृतंव्रतम् ॥ उपदिष्टंगौतमेनपूर्वजन्मकृतंव्रतम् ४५ यस्यप्र
भावःसंपूर्णोवक्तुंकेनापिनेष्यते ४६ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेनलव्रतनिरूपणंनामद्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ ७ ॥ ॥ हिम
वानुवाच ॥ ॥ इदानींकथयिष्यामिराज्ञाचंद्रांगदेनच ॥ तत्पत्न्याचकृतंव्रतंदिदुमत्याशुभानने १ मालवेविषयेख्यातंनगरंकर्णनामकम् ॥ तत्रचं
द्रांगदोराजाबभूवातिपराक्रमी २ अणिमादिगुणोपेतःसर्वशास्त्रार्थतत्ववित् ॥ यज्वादानीमहाज्ञानीवेदवेदांगपारगः ३ अतिक्रांतासभार्यास्यसुधर्माम
तिमानुषीम् ॥ मुष्णातिचक्षुषस्तेजोरविकांतमरीचिभिः ४ अतिस्वच्छानिवासांसिरत्नस्तंभाश्रयात्सुते ॥ नीललोहितपीतत्वाच्चित्रतांयांतिकानिचि
त् ५ अतिसाध्वीमहाभागापतिशुश्रूषणेरता ॥ धर्मशीलाव्रतपराश्वश्रूश्वशुरसेविनी ६ गृहकृत्येषुचान्यग्रादेवतातिथिपूजिका ॥ नाम्नाचेंदुमतीख्या
तासर्वावयवसुंदरा ॥ धर्मशीलोपिनृपतिरमात्यैःप्रार्थितोभृशम् ॥ जीवहिंसांमहाघोरांपापर्द्धिपरिवर्जय ७ कदाचिद्दैवयोगेनमृगयांक्रीडितुंययौ ॥
तरक्षुरुरुवाराहमृगपक्षियुतंवनम् ८ नीलकंचुकसंवीतोनीलोष्णीषोत्तरच्छदः ॥ बद्धगोधांगुलित्राणःशास्त्रिकाखड्गखेटवान् ९ जवेनाश्वसमारूढोशरचा

॥ पार्वत्युवाच ॥ तस्यांतुमूर्छितायांतुकिमकुर्वन्जनास्तदा ॥ तन्मेविस्तरतोब्रूहिहृदयानंदनंपितः १ ॥ हिमवानुवाच ॥ तदासर्वेनागरिकानानावाक्यवि
शारदाः ॥ प्रमृज्यस्वानिचाश्रूणिसमादध्युर्नृपस्त्रियम् २ ॥ जनाऊचुः ॥ मातरुत्तिष्ठमाशोकंकुरुपुत्रेमनःकथाः ॥ प्रेतंदहतिशोकाश्रुतस्माद्भद्रंहितंकुरु ३
मर्त्येषुनहिदृष्टोस्तिचिरजीवीशुभानने ॥ यथाजीर्णंपरित्यज्यवासोन्यद्गृह्यतेजनैः ४ वर्ष्मापिदेहिनातद्वत्त्यक्त्वान्यद्गृह्यतेशुभम् ॥ अत्याश्चर्यमिदंम
द्रेस्वयंमृत्युमुखेस्थितः ५ शोचतेमृतमपरंस्वयंमरणधर्मवान् ॥ स्वदेहेनवियोगंचनवेत्तिभाविनंजनः ६ मदीयंमन्यतेसर्वंदैवकालवशेस्थितम् ॥ ब्रह्मा
दिस्थावरांतंयद्विश्वंसाब्धिचराचरम् ७ ज्ञात्वातंनश्वरंशोकंत्यक्त्वोत्तिष्ठसुपुत्रिणि ॥ धर्मवान्पुण्यशीलस्तेभर्त्तामुक्तिंगतोभवेत् ८ जीवन्यदिभवेत्स्व
र्गेतदायास्यतिकर्हिचित् ॥ अतिपुण्यान्मानवोपियातिस्वर्गंगतःपुनः ॥ अथवापरिपृच्छामोमुनिंकंचिदिहागतम् ९ अतीतानागतविदंकथयिष्यतिसो
खिलं ॥ अनंतरंहियत्कार्यंतत्सर्वंविदधामहे १० ॥ हिमवानुवाच ॥ ॥ एवंप्रबोधितालोकैःक्षणमिंदुमतीतदा ॥ आश्वस्तासर्ववाक्येनप्रमृज्याश्रूणिवास
सा ११ विसर्जयामासतदालोकान्सर्वान्समागतान् ॥ त्यक्त्वासौभाग्यचिह्नानिप्रपेदेकृशतांभृशम् १२ रुदतीशोचतीतस्थौश्वसतीमूर्छितामुहुः ॥ ततो
द्वादशवर्षांतेनारदोदिव्यदर्शनः १३ आजगामगृहंतस्यायदृच्छाविचरन्मुनिः ॥ दृष्ट्वातंविललापाशुवदंतीभर्तृचेष्टितं १४ दुःखंचाकथयत्तस्मैजातंद्वाद
शवार्षिकं ॥ निशम्यरुदितंतस्याहर्षयन्मुनिरब्रवीत् १५ ॥ ॥ नारदउवाच ॥ ॥ क्वापितिष्ठतितेभर्त्तानतंशोचितुमर्हसि ॥ शिरश्छादयनीलेनवा
ससाकर्णभूषणे १६ कर्णयोःकुरुभालेत्वंबिभर्तीकुंकुमंशुभम् ॥ वलयानिचकरयोःकंठेमंगलसूत्रकम् १७ ॥ ॥ हिमवानुवाच ॥ सर्वज्ञस्यमुनेर्वाक्या
द्विश्वस्तासत्यवादिनः ॥ तत्कालंसर्वमानाय्यहर्षितासातथाकरोत् १८ आकार्यब्राह्मणान्सर्वान्संपूज्यनारदंपुरा ॥ संपूज्यसकलांस्तांस्तुददौदानान्यने
कशः १९ वादयामासवाद्यानिशर्करांचगृहेगृहे ॥ प्रेषयामासचतदाहर्षादिंदुमतीशुभा २० वस्त्रतांबूलदानेनददावाज्ञांजनस्यसा ॥ प्रणिपत्यपुनर्देवमु
निंनारदमादरात् २१ स्वभर्तृप्राप्तयेपृच्छदुपायंराजकन्यका ॥ ॥ इंदुमत्युवाच ॥ ॥ कुत्रतिष्ठतिमेभर्त्ताकथंतिष्ठतिवामुने २२ केनोपायेनवेदज्ञदर्शनंत
स्येमभवेत् ॥ अनुग्रहंकुरुमुनेतमुपायंवदस्वमे ॥ व्रतंदानंतपोवापिदुःसाध्यमपियद्भवेत् २३ नारदउवाच ॥ व्रतंतुपरमंतेहंकथयामिसमासतः ॥ नभःशु
क्लचतुर्थ्यांतदारभेत्परयामुदा २४ नद्यांतडागेवाप्यांवादंतधावनपूर्वकं ॥ स्नानंप्रभातसमयेकुरुसंकल्पपूर्वकम् २५ शुक्लवासागृहंगत्वामृन्मयींमूर्तिमु
त्तमाम् ॥ कुर्याच्चतुर्भुजांसम्यग्गणेशस्यमनोरमाम् २६ उपचारैःषोडशभिःपूजयेत्स्थिरचेतसा ॥ एकान्नमेकभक्तंवास्वयंकुर्याद्प्रयत्नतः ॥ उपोषणंवाकुर्वी
तयावद्भाद्रचतुर्थिका २७ गीतवादित्रनृत्याद्यैर्ब्राह्मणानांचभोजनैः ॥ महोत्सवंप्रकुर्वीतविभवेसतिशोभने २८ एवंव्रतंकुरुशुभेभर्त्रासहसमेष्यसि ॥ पाता
लेनागकन्याभीरुद्धेनजीविताशुभे २९ सत्यंब्रवीमितेसत्येनान्यथाममभाषितं ॥ हिमवानुवाच ॥ ॥ इत्युक्तातेनमुनिनाव्रतंप्रारभदादरात् ३० गतेमु

पकरोबली ॥ तादृशैर्वीरनिकरैरमात्यैःसेवकैर्वृतः १० निघ्नन्मृगान्वराहांश्चप्रेषयन्नगरंप्रति ॥ भ्रममाणोवनेराजादृष्टोराक्षसपुंगवैः ११ चकंपेराक्षसान्दृष्ट्वाशीतज्वरयुतोयथा ॥ दरीमुखान्गर्तनेत्रान्व्यादितास्यान्नभस्पृशः १२ दृष्ट्वातान्विद्रुताःसर्वेवीराःसेविजनाअपि ॥ केचिद्यमक्षयंयातामूर्छिताःकेपि मूगताः १३ तत्रैकाराक्षसीक्रूरादृष्ट्वाकामातिसुंदरम् ॥ तंनृपंपरिरभ्यैवचुचुंबेकाममोहिता १४ तस्यामात्यान्भगेकृत्वाभक्षयामाससेवकान् ॥ एतस्मिन्नंतरेराजापलायनपरोययौ १५ कासारमध्येमग्नोभून्नाद्राक्षीद्राक्षसीचतम् ॥ सधृतोनागकन्याभिर्नीतःपातालमंदिरम् १६ भूषितोनागकन्याभिर्वस्त्रालंकारभूषणैः ॥ पप्रच्छुर्नागकन्यास्तंकुतआगमनंतव १७ कोसिकस्यासिकिंनामवदसत्यंनरोत्तम ॥ इतितद्वचनंश्रुत्वातांजगादनराधिपः १८ अहंचंद्रांगदोनामहेमांगदसुतोबली ॥ मालवेविषयेकर्णनगरेवसतिर्मम १९ राक्षसीभयविस्त्रस्तःप्रविष्टःसलिलंमहत् ॥ भवतीभिरिहानीतोयद्वृष्टंतन्निवेदितं २० भक्षिताःसर्वलोकामेमृगयाभिरतस्यह ॥ सरोजलप्रसादेनजीवंस्तिष्ठामिसांप्रतम् २१ इतिवावचनंश्रुत्वापुनरूचुर्नृपंतदा २२ ॥ ॥ ताऊचुः ॥ ॥ भवास्माकंपतिरिहसर्वंसेत्स्यतितेप्रियम् ॥ अस्माकंनागकन्यानांभोगश्चातीवदुर्लभः २३ तासामितिवचःश्रुत्वाप्रोवाचनृपसत्तमः ॥ एकपत्नीव्रतंमेस्तिमातरस्तत्कथंत्यजे २४ सोमवंशप्रसूतानांराज्ञांधर्मान्ब्रवीमिवः ॥ परद्रव्यंपरद्रोहंपरदारांस्तथैवच २५ परनिंदांचनेच्छंतिनृपाःसौम्याश्चसाधवः ॥ अधीतिर्यजनंदानंशरणागतपालनम् २६ निषिद्धाचरणंनैवविध्यर्थप्रतिपालनम् ॥ एतेधर्मास्त्रिवर्णानांयाजनादित्रयंद्विजे २७ अधिकंसर्ववर्णानामातिथ्यपरमंमतम् ॥ इतिश्रुत्वानृपवचोखिलानागकुमारिकाः २८ प्रशेषुस्तंवियुक्तःस्त्वंबहुधास्वस्त्रियाभव ॥ बबंधुर्निगडैस्तंतादुःखिताःकामविह्वलाः २९ राक्षसीतुजलंप्राश्यतदर्थेतत्सरोगतम् ॥ भक्षयित्वाजलचरान्नातृप्यत्परमंतदा ३० इमंवृत्तांतमशृणोद्राज्ञीराजीवलोचना ॥ पर्यंकस्थास्वदूतात्साराक्षसीतोवशेषितात् ३१ मग्नंनिशम्यनृपतिंदुःखितापतिताभुवि ॥ मूर्छामवापमहतींसखीभिःपरिवीजिता ३२ सिक्ताशीतलतोयेनरुदंतीभिर्मुहुर्मुहुः ॥ उपविष्टाप्ररुदतीघ्नतीवक्षःशिरोमुखम् ३३ शुशोचपरमालापैर्भर्त्तःकांतेतिजल्पती ॥ क्वगतःप्राणनाथोमेहित्वामांप्रियवादिनीम् ३४ सर्वावयवसंपूर्णांप्रणतांप्रियकारिणीम् ॥ भर्तृकार्यरतांनित्यंनित्यंचातिथिपूजिकाम् ३५ कुत्रभोक्ष्यतिमेनाथोनिद्रांवाकुत्रयास्यति ॥ कांचनंशयनंहित्वापरार्घ्यास्तरणैर्वृतम् ३६ कथंस्मास्यतिकांतोमेहित्वातैलंसुगंधिकम् ॥ लोकानांपालनंकोद्यविनातेनकरिष्यति ३७ प्रजानांसर्वलोकानांबाणानांरंजनंचकः ॥ अस्तंयातोगुणनिधिःप्रतापनिधिरद्यकिम् ३८ दिशःशून्याःप्रपश्यामिविनातेनमहात्मना ॥ क्वाहंसुखंप्रपश्यामिक्वसुखंसोपियास्यति ३९ इहलोकेपरेवापिनसुखंकुलयोषिताम् ॥ हीनानांस्वामिनादेवयदेतत्स्वामिनासह ४० शरणागतगुप्तिश्चदीनानांकःकरिष्यति ॥ एवंबहुविधंदीनारुदतीभृशविह्वला ४१ तत्याजत्रोटयित्वासाभूषणानिचदूरतः ॥ कंकणानिचसर्वाणिबभंजचमुमूर्छच ४२ ॥ इतिश्रीगणेशपु०उपा०चंद्रांगदोपाख्यानेत्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥

नौनभोमासिदिनैःकतिभिरागते ॥ द्विरदाननमूर्तिंसाचकारपार्थिवींशुभां ३१ पूर्वोक्तविधिनापूजांचकारसुमनोहरां ॥ दिव्यगंधैर्दिव्यवस्त्रैर्दिव्यैश्चकुसुमैरपि ३२ दिव्यैर्नानाविधैश्चैवनैवेद्यैःफलकांचनैः ॥ दीपैःपुष्पांजलीभिश्चप्रक्रमैर्नतिभिःस्तवैः ३३ तन्नामस्मरणैर्ध्यानैस्तोषयामासतंविभुम् ॥ गीतवादित्रनृत्याद्यैर्ब्राह्मणानांचभोजनैः ३४ पलमात्रंपयोभुक्त्वाचकारव्रतमुत्तमं ॥ नभःशुक्लचतुर्थ्यादिचिरनष्टप्रियाप्तये ३५ नारदस्यमुनेर्वाक्याद्यावद्वाद्रचतुर्थिका ३६ ॥ ॥ इतिश्रीगणेशपु०उपा० इंदुमतीनारदसंवादेचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ हिमवानुवाच ॥ समाप्तेतुव्रतेतस्यागणेशस्यप्रसादतः ॥ पातालेनागकन्यानामन्यथाभून्मतिस्तदा १ मोचयामासूराजानंपुपूजुश्चयथाविधि ॥ वस्त्रैराभरणैश्चैवनानारत्नमहाधनैः २ अश्वंमनोजवंदत्वाविससर्जुर्नृपंतदा ॥ कासाराद्बहिरागत्यबध्वाचाश्वंमहाद्रुमे ३ स्नातियावन्नागरिकैर्दृष्टःकतिपयैर्नृपः ॥ अपरेप्रणिपत्यैनंपप्रच्छुःकोभवानिति ४ कुत्यःकुतआयतःकिंनामावदनःप्रभो ॥ इतितेषांवचःश्रुत्वापप्रच्छनृपसत्तमः ५ इंदुमत्याःकुमारस्यकुशलंखेदसंयुतः ॥ ततोबुबुधिरेतेतमालिलिंगुर्मुदाजनाः ६ ऊचुश्चनृपतेर्भार्यास्नात्वेदानींगताग्रहम् ॥ उपवासव्रतवतीकृशाधमनिसंयुता ७ कुमारेजीवमास्थायजीवमात्रावशेषिता ॥ केचिच्च नगरंगत्वाशुभांवार्तामघोषयन् ८ अत्याप्तजनवाक्येनश्रुत्वासानृपमागतम् ॥ आनंदाब्धौनिमग्नाभूद्ब्रह्मज्ञानीवयोगवित् ९ ततोमात्यान्पुरस्कृत्यसैन्यान्यप्रेषयच्चतम् ॥ चित्रध्वजपताकाभिरशोभयतसापुरम् १० वीथीरासिंचयामाससभाःसंपाद्ययत्नतः ॥ स्वात्मानंभूषयामासवासोलंकारभूषणैः ११ गोभूहिरण्यदानाद्यैस्तोषयित्वाद्विजान्बहून् ॥ आरार्त्तिक्यंकरेदत्वापतिवत्स्त्रीजनस्यसा १२ गीतवादित्रघोषेणपुरात्सरउपागमत् ॥ अमात्यास्तुपुरोगत्वाप्रणम्यनृपपुंगवम् १३ आलिलिंगुर्मुदासर्वेप्रणेमुश्चयथाक्रमम् ॥ उपविष्टेतुनृपतौउपविष्टास्तदाज्ञया १४ सर्वान्कुशलप्रश्नाद्यैस्तोषयित्वायथाक्रमम् ॥ मानयित्वातथालोकान्दत्वातांबूलवाससी १५ स्वयंजगामशिबिरमिंदुमत्यानृपोत्तमः ॥ कारयामाससविधिंद्वादशाब्ददशोद्विजैः १६ पुण्याहवाचनंकृत्वागणेशार्चनपूर्वकम् ॥ संपूज्यशंकरंसम्यक्द्विजांश्चदक्षिणादिभिः १७ बभंजश्रीफलंत्यक्त्वाततस्तत्पुरतोययौ ॥ ददर्शतत्रेंदुमतीभिंदोःशेषांकलामिव १८ नीराजयित्वाराजानंयुवतीभिःसभर्तृभिः ॥ लाजपुष्पमयींवृष्टिंताभिःसाकारयत्तदा १९ प्रमृज्यनयनेसम्यगानंदाश्रुपरिप्लुते ॥ हर्षशोकान्वितौतौतुपरस्परमथोचतुः २० परस्परवियोगार्धिंकथयामासतुःशुचा ॥ अनिवार्यप्रकृतिभिःसांत्वितौबहुलोक्तिभिः २१ आनयित्वातुराजानंसमारोह्यमहागजे ॥ नानालंकारसंयुक्तेपताकाछत्रसंयुते २२ पादरक्ष्यैःपरिवृतेचतुर्घंटाविराजिते ॥ शतंयष्टिधरास्तस्यवारयंतोययुःपुरः २३ अग्निशस्त्रधराश्चाश्वरथारोहाअनेकशः ॥ सव्यदक्षिणतोराज्ञोगजलक्षंययुर्लघु २४ नटानृत्यांगनावाद्यवादकाबंदिनःपुरः ॥ ततःपश्चाद्गजानीकाःपुरंविविशुरादरात् २५ सैन्येनरजसाव्याप्तेदिननाथेहतप्रभे ॥ अलंकृतेपुरेतस्मिन्नप्राज्ञायतकिंचन २६ ततःपरस्परंनत्वाजग्मुःस्वंस्वंनिवेशनम् ॥ मुख्याराजगृहंनीताःपुनाराज्ञाप्रपूजिताः २७ वस्त्रतांबूलदानेनतेनाज्ञा

तागृहंययुः ॥ राजाथब्राह्मणान्भोज्यबुभुजेज्ञातिभिःसह २८ ततोरात्रौसुषुपतुःपर्यंकेचारुनिर्मिते ॥ पराध्यास्तरणोपेतेपरिच्छदुपधान्विते २९ ऊचतुःस्व
स्वदुःखंतौशोचंतौचपुनःपुनः ॥ पुरोधसासांत्वितौतौशयातेस्मसुखंततः ३० श्रुत्वाविनायकव्रतमहिमानंनृपोत्तमः ॥ पत्न्यानुभूतसकलंस्वयंकर्तुंमनोदधे
३१ आगतेश्रावणेमासिराजाचंद्रांगदस्तदा ॥ महोत्सवेनकृतवान्व्रतमेतच्छुभानने ३२ ॥ ॥ ऋषिरुवाच ॥ ॥ एवंपितृवचःश्रुत्वापार्वतीभृशहर्षिता ॥
नभोमासंसमासाद्यचकारव्रतमादरात् ३३ यथोक्तविधिनामूर्तिंकृत्वापूजांचयत्नतः ॥ भक्षयंतीपयोमात्रंध्यायंतीद्विरदाननम् ३४ ततश्चंचलतांयातंशंकरस्या
पिमानसम् ॥ आससादाश्रमंतस्याःपार्वत्याःशूलभृत्स्वयम् ३५ गणेशस्यचतुर्थ्यांतुसंपूर्णेतद्व्रतेशुभे ॥ पश्यतिस्महरंदेवीवृषारूढंनिजाश्रमे ३६ उत्थायप्रणना
मास्यपादांबुजयुगंमुदा ॥ पूजयामासविधिवच्छंकरंलोकशंकरम् ३७ उवाचचमहादेवंपार्वतीप्रेमविह्वला ॥ देव्युवाच ॥ कथंमांत्यज्यगतवान्किंमांविस्मृतवान
सि ३८ त्वद्वियोगान्निमेषोपिकल्पकल्पोभवद्विभो ॥ गणेशस्यव्रतमिदंपित्रादिष्टंकृतंमया ३९ वरदस्यप्रसादेनसंप्राप्तंदर्शनंतव ४० ॥ ब्रह्मोवाच ॥ ॥ एतस्मिन्ने
वकालेतुहिमवानुपजग्मिवान् ॥ सत्याःकरंकरेतस्यन्यवेदयतसादरम् ४१ ततोदेवाःसगंधर्वाद्विरदाननमादरात् ॥ पूजयामासुरथतौशिवौशिवकरौसतां ४२
देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातह ॥ सर्वेगजाननंनत्वास्तुत्वाचविविधैःस्तवैः ४३ जयशब्दैःशंकरोपितुष्टावद्विरदाननम् ॥ अर्द्धांगेपार्वतींकृत्वावृषमा
रुह्यसत्वरः ४४ ययौकैलासाशिखरंसर्वैस्वंस्वंपदंययुः ४५ ॥ ॥ ब्रह्मोवाच ॥ ॥ इतितेकथितंसर्वंव्यासपृष्टंत्वयातुयत् ॥ महात्म्यंगणनाथस्यव्रतस्य
चमहामुने ४६ इदानींपुनरन्यत्तेकथयामिकथानकम् ॥ यच्छ्रुत्वासर्वपापेभ्योमुक्तःकामाँल्लभेन्नरः ४७ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेशिव
पार्वतीसंयोगोनामपंचपंचाशत्तमोध्यायः ॥ ५५ ॥ ॥ ७ ॥ ॥ भृगुरुवाच ॥ ॥ एवंतेकथितंराजन्माहात्म्यंसकलंमया ॥ पुनश्चशृणुव्यासेनयच्छ्रु
तंब्रह्मणोमुखात् १ ॥ सोमकांतउवाच ॥ कथंश्रुतंब्रह्ममुखाद्व्यासेनामितबुद्धिना ॥ नतृप्तिमधिगच्छामितन्मेवदमहामुने २ ॥ भृगुरुवाच ॥ एवंश्रुत्वाकथां
व्यासोपृच्छब्रह्माणमादरात् ॥ सचापिकथयामाससादरंपृच्छतेनघ ३ ॥ व्यासउवाच ॥ पुनःकथयमेब्रह्मन्गणनाथकथांपराम् ॥ तृष्णामेवर्धतेभूयःश्रो
तुंविघ्नेशसत्कथाम् ४ ॥ ब्रह्मोवाच ॥ अपरांशृणुमेव्यासकथांकौतुकसंयुताम् ॥ शूरसेनप्रभृतिभिरनुभूतांगजाननीं ५ मध्यदेशेभवद्राजाशूरसेनोमहाब
ली ॥ सहस्राख्यपुरेरम्येवेदवेदांगपारगः ६ धनवान्रूपवान्दाताहोतापाताजनस्यह ॥ शक्तित्रययुतोमानीषाड्गुण्यपरिनिष्ठितः ७ उपायानांचतुर्णांच
चालनेचतुरोरिहा ॥ चतुर्विधबलोपेतोद्विजदेवेषुभक्तिमान् ८ पृथिवीमंडलंयस्यवशवर्त्यभवत्सदा ॥ नगरंशक्रनगराद्विशिष्टंभातिभूतले ९ यस्यपत्नी
पुण्यशीलानाम्नाभूत्पुण्यशालिनी ॥ यस्यारूपेणसदृशीनासीत्त्रैलोक्यमंडले १० पातिव्रत्यगुणैर्यस्यालज्जांप्राप्ताप्यरुंधती ॥ असूयात्यागयोगेनाप्यनसूया
भवल्लघुः ११ सकदाचिन्नृपोमात्यैःसंवृतोवीरसत्तमैः ॥ उपविष्टोनृपसभांददृशेगगनेचरम् १२ विमानंवह्निसदृशंनेत्रतेजोहरंपरम् ॥ गानश्रवणस

क्तास्तेराज्ञासहसभासदः १३ विह्वलास्तेकिंकिमितिज्ञातुंदूतानचोदयन् ॥ तेदूताःप्रागमन्द्रष्टुंविमानंसूर्यसन्निभम् १४ कस्यचिद्वैश्यपुत्रस्यराज
दूतस्यकुष्ठिनः ॥ पतितंदृष्टिपातेनतद्विमानंमहीतले १५ ततोदूताःसमागम्यशशंसुर्नृपतेंतदा ॥ तद्विमानंमहाराजपुण्यकृद्देवसंयुतम् १६ देदीप्य
मानंपतितंदुष्टदृष्ट्यामहीतले ॥ ततोतिहर्षितोराजाप्रकृतिद्वयसंयुतः १७ अश्वारूढोययौतत्रविमानंद्रष्टुमुत्सुकः ॥ मन्यमानोमहाभाग्यंस्वजनैःपरि
वारितः १८ अनेकवाद्यनिर्घोषैर्विमानस्यांतिकंययौ ॥ ददृशुस्तत्रशक्रेतेनमुरुत्तीर्ययानतः १९ नानालंकारसंयुक्तंसर्वदेवगणैर्युतम् ॥ बद्धांजलिपुटो
राजाप्रोवाचबलसूदनम् २० धन्येयमद्यधरणीधन्यंजन्मचसंपदः ॥ पूर्वजाःसर्वचक्षूंषिधन्यान्यद्यशचीपते २१ यद्दर्शनंमृत्युलोकेभवतांसानुगस्य
मे ॥ यस्यतेवशगालोकाब्रह्मेशानादयःसुराः २२ शताश्वमेधतोदृश्योनान्यथाजायतेक्वचित् ॥ नजानेकेनपुण्येनसोद्यदृष्टोखिलैर्जनैः २३ इदंचते
विमानंयत्कथंनिपतितंभुवि ॥ एतन्मेसंशयंदेवच्छेत्तुमर्हसिसांप्रतम् २४ गतवान्कुत्रचभवान्गंतावाशंममेप्रभो ॥ ॥ शक्रउवाच ॥ ॥ राजञ्छृणुमहाश्च
र्यंकथितंनारदेनमे २५ तदहंकथयिष्येत्वांशृणुष्वैकमनानृप ॥ नारदउवाच ॥ मृत्युलोकंगतःशक्रश्चुंडेराश्रमंप्रति ॥ गणेशस्यस्वरूपेणतिष्ठतोजपतो
निशम् २६ तद्ध्यानात्तत्स्वरूपस्यदृष्ट्वाकौतुकमद्भुतम् ॥ पूजितस्तेनमुनिनागजाननस्वरूपिणा २७ नत्वातंमुनिमापृच्छ्यदर्शनार्थंतवागतः ॥ भूमौसारूप्य
तानैवदृष्टान्यत्रशतक्रतो २८ ॥ शक्रउवाच ॥ अहंचनारदंपूज्यविसृज्यचक्षणेनतम् ॥ अत्युत्सुकतयायातोमुनिंद्रष्टुंतथाविधम् २९ विमानवरमास्थायमनोम
रुतवेगवत् ॥ मुनिंदृष्ट्वाचसंपूज्यद्विरदाननरूपिणम् ३० भुशुंडिप्रणिपत्याथतस्यपूजांप्रगृह्यच ॥ चलितःसपरीवारोगंतुकामोमरावतीं ३१ यावत्तेनगरा
भ्याशेविमानमिदमागतम् ॥ तावद्भूतस्यतेदृष्ट्वाकुष्ठिनःपापकारिणः ३२ पतितंभूमिभागेस्मिन्सर्वंतेकथितंनृप ॥ शूरसेनउवाच ॥ तपसाकेनवाशक्रगजान
नस्वरूपता ३३ प्राप्ताभुशुंडिनातेनतद्वदस्वममप्रभो ॥ नैहिमेतृप्तिरस्तीहशृण्वतस्तत्कथामृतम् ३४ ॥ इतिश्रीगणे०उ०षट्पंचाशत्तमोध्यायः ॥ ५६ ॥
॥ शक्रउवाच ॥ हंततेकथयिष्यामिकथामेतांपुरातनीं ॥ यथातेनापिसाद्दश्यंगणनाथस्यभक्तितः १ दंडकारण्यदेशेषुनगरेनंदुराभिधे ॥ एकःकैवर्त्तकोदु
ष्टोनाम्नानामैवविश्रुतः २ आबाल्याच्चौर्यनिरतोयौवनेजारकर्मकृत् ॥ प्रत्यक्षंदृष्टिविगमाद्धरतेचशपत्यपि ३ शपथान्कुरुतेमिथ्यापरद्रव्यैदकारकान् ॥
ततोनिःसारितोग्रामाद्द्यूतमद्यरतोयतः ४ लोकैर्बहिर्दूरतरंगिरिकंदरकानने ॥ स्थितःकांतायुतोमार्गेजघानपथिकान्बहून् ५ एवंबहुधनोजातोनाना
लंकरणैःस्त्रियम् ॥ भूषयामाससंसुतांतोषयामासमायया ६ शस्त्रंखड्गंचखेटंचपाशान्धनुरनुत्तमम् ॥ दंडंचोभयतोलोहंवहन्पूर्णैर्महेषुधी ॥ वृक्षाग्रेकोट
रेवापिस्थितोमारयतेबहून् ७ नानाविधानिवस्तूनिवासांस्याभरणानिच ॥ गृहेसंचयतेनीत्वाविक्रीणातिपुरांतरे ८ यथेष्टंभजतेनित्यंविषयान्मंदिरेनिजे ॥

१ कुष्टिदृष्ट्या इ० पाठान्तरम् । २ महान्मेविस्मयश्चित्ते जायते च पुनःपुनः इतिपाठान्तरम् ३ लोकैः इ०पा० ।

एवंपापसमाचारोहंत्यरण्येपशूनपि ९ एकदाकस्यचित्पृष्ठेधावितोयोजनावधि ॥ सतुतस्माद्भतोदूरंस्खलित्वापतितोभुवि १० ततउत्थायकष्टेनशनैः शनैर्ययौखलः ॥ अपश्यत्पथिगच्छन्सतीर्थंगाणेश्वरंशुभम् ११ अकरोन्मज्जनंतत्रश्रममेवव्यपोहितुम् ॥ ततोगच्छन्सविषयंददर्शपथिमुद्गलम् १२जपंतंगणनाथस्यमंत्रंनामसमन्वितम् ॥ खड्गमुद्यम्यनिष्कोशंमुद्गलस्यांतिकंययौ १३ कैवर्तकोनामनामाहंतुंकृतमतिस्तदा ॥ जगलुस्तस्यशस्त्राणिखड्गोपि दृढमुष्टितः १४ अन्यथाचाभवद्बुद्धिस्तस्यदुष्टस्यतत्क्षणात् ॥ द्विरदाननभक्तस्यमुद्गलस्यप्रभावतः १५ जहासमुनिमुख्योसौदृष्ट्वातंतुतथाविधम् ॥ पप्रच्छसंयतःकस्माच्छस्त्राणिगलितानिते १६ बद्धान्यपिचसर्वाणिपतितानिकुतोवद ॥ ॥ कैवर्त्तकउवाच ॥ ॥ गणेशतीर्थस्नानेनमुनेरालोकनेन च ॥ ज्ञानवैराग्ययुक्तोसावब्रवीन्मुद्गलंवचः १७ आश्चर्यंपरमंमन्येकुंडस्नानेनमेमतिः ॥ विपरीताभवद्ब्रह्मन्विशेषादर्शनेनते १८ बाल्यात्प्रभृतिमे दुष्टाबुद्धिःपापरताभवत् ॥ असंख्यातानिपापानिकृतान्यद्यावधिप्रभो १९ इदानीमेवनिर्विण्णामतिर्मेत्वत्प्रसादतः ॥ नादास्येपुनरेतानिशस्त्राणिपतितानिमे २० कुरुमेनुग्रहंपूर्णमुद्धरस्वभवार्णवात् ॥ साधवोह्यनुगृण्हंतिदीनान्दुष्कृतिनोपिच २१ नसाधुसंगमःक्वापिवृथादृष्टोमहामुने ॥ यथा शेवधिसंपर्कोनधातुषुवृथाभवेत् २२ ॥ शक्रउवाच ॥ एवमुक्तोमुद्गलोसौतंजगादकृपान्वितः ॥ शरणागतसंत्यागेस्मरन्दोषंविशेषतः २३ मुद्गलउवाच ॥ विधिप्रयुक्तेदानादौनाधिकारोस्तिकुत्रचित् ॥ तथापितेनामजपंकथयामिप्रसादतः २४गजाननस्यपरमंसर्वसिद्धिकरंनृणाम् ॥ ततःप्रणाममकरोत्कैवर्तोमुद्गलंमुनिं २५सकरंस्थापयामासतस्यमूर्ध्वमयंकरं ॥ गणेशायनमइतिनाममंत्रमुपादिशत् २६ स्वयंष्टिरोपयामासपुरस्तस्यधरातले ॥ उवाचचैनंसंप्रीत्यायावदागमनंमम २७ तावज्जपस्वनामेदंयावद्यष्टिश्चसांकुरा ॥ एकासनगतोवायुभक्षएकाग्रमानसः २८ सायंप्रातर्जलंदेहियष्टिमूलेनिरंतरम् २९ ॥ शक्रउवाच ॥ उपदिष्टोमुद्गलेननामकैवर्त्तकस्तदा ॥ निराशोजीवितेतस्थौतस्मिन्नंतर्हितेमुनौ ३० एकासनगतोरण्येजजापनाममंत्रकम् ॥ पुरोधायमुनेर्यष्टिंवृक्षच्छायांसमाश्रितः ३१ निराहारोनिरीहश्चजितेंद्रियगणोवशी ॥ एवंसहस्रवर्षांतेसायष्टिःसांकुराभवत् ३२ ततःप्रतीक्षामकरोन्मुनेरागमनस्यसः ॥ वल्मीकवेष्टिततनुर्लताजालसमन्वितः ३३ ततोमुनिर्मुद्गलोपिदैवात्तंदेशमाययौ ॥ स्मरस्मारचतदायष्टिंतंचकैवर्त्तकंयदा ३४ ददर्शभ्रममाणःससांकुरांयष्टिमुत्तमां ॥ वल्मीकाक्रांतदेहंचतंचकैवर्त्तकंमुनिः ३५ दुश्चरंमुनिभिःसर्वैरास्थितंतपउत्तमं ॥ लक्षितंनेत्रमात्रेणयततामुनिनातदा ३६ उत्साद्यतस्यदेहस्थंवल्मीकंमुनिसत्तमः ॥ मंत्रितेनजलेनास्यसिषेचांगंचसर्वशः ३७ तदैवदिव्यदेहंतंजगादमुनिसत्तमः ॥ प्राप्तवंतंगणेशस्यसारूप्यंकरयोगतः ३८ द्विकरंप्रजपंतंचनामवैनायकंशुभं ॥ उन्मीलितेतदानेत्रेमुनिनाबोधितस्तुसः ३९ तस्यनेत्रोद्भवोवह्निर्विद्युद्वद्गगनंगतः ॥ त्रिलोकीमुद्यतोदग्धुंमुनिनावारितोयतः ४० सोपितंमुनिमानम्यस्वगुरुंकरुणायुतं ॥ आलिलिंगमुदायुक्तस्तनयःपितरंयथा ४१ उपदिष्टोमुद्गलेननामकैवर्त्तकस्तदा ॥ वाल्मीकावपु

नरुत्पन्नंमानयामासतंसुतम् ४२ चकारनामकर्मास्यमुद्गलोमुनिरादरात् ॥ भ्रूमध्यान्निर्गताशुंडाभ्रुशुंडीतिततोनृप ४३ एकाक्षरंचमंत्रंचतस्मैप्राहा
थमुद्गलः ४४ वरानस्मैददौपश्चाद्भवत्त्वंमुनिसत्तमः ॥ इंद्रादिदेवगंधर्वैःसिद्धैरर्च्यतमोभव ४५ यथागजाननोदेवोध्यातोदृष्टोघनाशनः ॥ तथाहित्व
मपिमुनेभ्रुशुंडिःप्रथितोभव ४६ यस्यतेदर्शनंस्यात्सकृतकृत्योभवेन्नरः ॥ आयुश्चकल्पलक्षंतेभवितामभवाक्यतः ४७ एवंबहुविधातस्मैवरान्
यच्छतिमुद्गले ॥ ययुर्विद्रादयोद्रष्टुंमुनयोनारदादयः ४८ उचुस्तंप्रणिपत्यैवभ्रुशुंडेतवदर्शनात् ॥ सार्थकंजन्मनोविद्यापितरौचतपोयशः ४९ त्वमेव
गणनाथोसिपूजनीयोसिनोमुने ॥ सतुसंपूज्यतान्सर्वान्प्रणम्यचविमृज्यच ५० पुनःपद्मासनगतोजजापैकाक्षरंमनुम् ॥ पुरोमूर्तिंप्रतिष्ठाप्यगणेशस्य
मनोहराम् ५१ उपचारैःषोडशभिरपूपुजद्दिनेदिने ॥ आश्रमश्चबभौवापीसरोवृक्षलतादिभिः ५२ त्यक्तवैरैःसिंहमृगैर्नकुलैर्भुजगोत्तमैः ॥ ततोवर्षशत
स्यांतेप्रसन्नोभूद्गजाननः ५३ उवाचमत्स्वरूपस्त्वंकिमर्थंतपसेतपः ॥ कृतकृत्योसिसायुज्यंआयुषांतेचलप्स्यसे ५४ इदंक्षेत्रंसुविख्यातंनामलेतिभविष्यति ॥
अनुष्ठानकृतामत्रनानासिद्धिप्रदंनृणाम् ५५ मन्मूर्तिदर्शनादत्रनपुनर्जन्मभाग्भवेत् ॥ अपुत्रश्चलभेत्पुत्रान्विद्यार्थीज्ञानमाप्नुयात् ५६ ॥ शक्रउवाच ॥ इतितेक
थितंसर्वंशूरसेननृपोत्तम ॥ यत्त्वयापरिपृष्टंमेकिमन्यच्छ्रोतुमिच्छसि ५७ इतिश्रीग०भ्रुशुंड्युपाख्यानंनामसप्तपंचाशत्तमोध्यायः ५७ ॥ ब्रह्मोवाच ॥ एवंश्रु
त्वाशूरसेनोमरुत्वद्वाक्यमुत्तमम् ॥ पुनःपप्रच्छतंव्यासःप्रीतःश्रुत्वाकथामृतम् १ ॥ शूरसेनउवाच ॥ केनोपायेनदेवेशयानंतेगगनंव्रजेत् ॥ तमुपायंकुरुविभो
वदवाकिंकरोमिते २ ॥ ब्रह्मोवाच ॥ एवंपुनःकृतप्रश्नंनृपंप्राहसुरारिहा ॥ शृण्वतांसर्वलोकानांस्मयमानइदंवचः ३ ॥ इंद्रउवाच॥ कश्चित्स्यादिहसंकष्टचतुर्थीव्र
तकारकः ॥ विप्रोवाक्षत्रियोवापिनगरेतेनृपोत्तम ४ तस्याब्दकृतपुण्येनसम्यग्दत्तेनभूभुज ॥ इदानींप्रचलेदेतन्नान्यथायुतपूरुषैः ५ नृपउवाच ॥ कथंव्रतंतु
संकष्टचतुर्थ्यावदमेमुने ॥ किंपुण्यंकिंफलंतस्यकोविधिःकस्यपूजनम् ६ पुराकेनकृतंचात्रसिद्धिर्यस्मिन्कृतेभवत् ॥ एतत्सर्वंशुनासरिंछ्रपयावदविस्तरात् ७
॥ शक्रउवाच ॥ अत्राप्युदाहरंतीमामितिहासंपुरातनम् ॥ कृतवीर्यस्यसंवादंनारदेनमहात्मना ८ बभूवबलवान्राजाकृतवीर्योमहीतले ॥ सत्यशीलोवदान्य
श्चयज्वामानीमहारथः ९ जितेंद्रियोमिताहारोदेवद्विजनिषेवकः ॥ यस्याश्वगजयोधानांरथिनांसर्वधन्विनां १० नसंख्याविद्यतेराजन्सह्याद्रिविषयासिनां ॥
मंदिरेयस्यसौवर्णाःपर्यंकाभाजनानिच ११ नासीदौदुंबरंपात्रंपाकार्थमपिसर्वदा ॥ यस्यद्वादशसाहस्राब्राह्मणाःपंक्तिभोजिनः ॥ १२ ॥ सुगंधानामयस्या
सीत्पत्नीधर्मपरायणा ॥ पतिव्रतापतिप्राणात्रैलोक्येतिमनोरमा १३ नानालंकारसुभगाद्विजदेवातिथिप्रिया ॥ एवंतौदंपतीराजन्नपुत्रौसंबभूवतुः ॥ १४ ॥
पुत्रार्थंसर्वदानानिव्रतानिचतपांसिच ॥ चक्रतुर्नियमानन्यान्यज्ञांश्चबहुदक्षिणान् १५ नानातीर्थानिक्षेत्राणिजग्मतुःपुत्रलिप्सया ॥ तथापिनाभवत्पुत्रो

१ वर्षसहस्रांते इति वा पाठः ।

जन्मांतरकृतैनसोः १६ एकदादुःखितोराजासमाहूयसमंत्रिणः ॥ राज्यंमुद्रांचकोशंचजनान्जनपदास्तथा १७ तेभ्योनिवेद्यसंवैतौजग्मतुर्वनमुत्तमम् ॥
वल्कलाजिनसंवीतौदंपतीतपआस्थितौ १८ जितेंद्रियौजिताहारौजीर्णपर्णानिलाशिनौ ॥ चक्षुर्मात्रेणलक्ष्यौतौदृष्ट्वाथनारदोमुनिः १९ जनकंकृतवीर्य
स्यपितृलोकस्थमब्रवीत् ॥ अपुत्रत्वात्प्रायगतोविद्यतेतनयस्तव २० कृतवीर्योमृत्युलोकेश्वःपरश्वोमरिष्यति ॥ यदितस्यभवेत्पुत्रोनाकलोकप्रदर्शकः ॥
२१ कृतवीर्यस्तदाजीवेन्मृतोवास्वर्गमाप्नुयात् ॥ इत्युक्त्वानारदोयातःपश्यतिस्माद्भुतंभुवि २२ भुशुंडेःपितरौपुत्रौतस्यपत्नींसकन्यकाम् ॥ अग्निज्वालाकुले
घोरेकुंभीपाकेह्यधोमुखान् २३ याम्यदूतैस्ताड्यमानान्क्रंदतोविविधान्रवान् ॥ तेषामाक्रंदितंश्रुत्वानारदःकरुणानिधिः २४ आगयकथयामासते
षांदुःखंभुशुंडये ॥ नारदउवाच ॥ शक्रादयोदेवगणामुनयःकपिलादयः २५ यस्यतेदर्शनंकर्त्तुंयांतिहेरंबरूपिणः ॥ तत्कथंपितरौपत्नीपुत्राःपुत्र्यश्चकिंकराः
२६ यमलोकेकुंभिपाकेपच्यंतेतवदोषतः ॥ त्वंचापिज्ञानसंपन्नःकथंतन्नावबुध्यसे २७ पूर्वजानांत्वमुद्धारेयत्नंकुरुमहामुने ॥ शक्रउवाच ॥ भुशुंडिरितिसं
तप्तोवाक्यंश्रुत्वामुनीरितम् २८ दुःखितःपितृदुःखेनभृशंजज्वालवह्निवत् ॥ उपायंचिंतयामासतेषामुद्धारकारकम् ॥ ददौश्रेयःससंकष्टचतुर्थीव्रतजंतदा २९
विलोक्यप्रणिधानेनभुशुंडीसपरोक्षवित् ॥ ध्यात्वागजाननंदेवंकरेधृत्वाशुभंपयः ३१ उवाचपितॄनुद्दिश्ययाचन्देवंगजाननम् ॥ भुशुंडिरुवाच ॥ यदिभक्त्याऽ
तंमेस्तिगणनाथव्रतंतव ३१ तदातस्यप्रभावेनशीघ्रमुद्धरपूर्वजान् ॥ एवमुक्त्वातुतत्तोयंगजाननकरेक्षिपत् ३२ क्षिप्तमात्रेतदातोयेगजाननप्रसादतः ॥ वि
मानानिसमारुह्यसर्वेतेदेवरूपिणः ३३ सेव्यमानाअप्सरोभिःस्तूयमानाश्चचारणैः ॥ गंधर्वैर्गीयमानास्तेगणेशस्थानमाप्नुवन् ३४ अन्येपिकुंभिपाकेचन
रादुष्कृतिनोभवन् ॥ तेपिसर्वेविमानस्थाःपदंगाणेश्वरंययुः ३५ एवंव्रतस्यमहिमामयातेपरिकीर्तितः ॥ यदेकदिनपुण्येनसर्वेतेसद्गतिंगताः ३६ जन्मावधि
कृतंयेनसंकष्टंव्रतमादरात् ॥ शेषोपितस्यपुण्यस्यसंख्यांकर्त्तुनवैक्षमः ३७ अतस्तस्यप्रभावेनविमानंप्रचलेन्मम ३८ ॥ इतिश्रीग०उपा०संकष्टचतुर्थीव्रत
कथनंनामाध्यायः ५८ ॥ राजोवाच ॥ ॥ कुंभीपाकाद्विनिःसृत्यतेषुयातेषुवैदिवम् ॥ कमुपायंसकृतवान्कृतवीर्योपितातदा १ ॥ शक्रउवाच ॥ ब्रह्मशो
कंजगामाशुददर्शकमलासनम् ॥ दुःखितोनारदाच्छ्रुत्वावंशविच्छेदमात्मनः २ प्रणम्यतमपृच्छत्सवंशविच्छेदकारणम् ॥ ममपुत्रोतिधर्मात्मावदान्योयज्ञ
कारकः ३ देवतातिथिभक्तश्चमान्यमानयिताभृशम् ॥ नानाविधप्रयत्नैसपुत्रार्थंकृतवान्विधे ४ तथापिनामपत्कस्मात्तस्यपुत्रःसुरेश्वर ॥ राज्यंप्रकृतिसात्कृ
त्वावायुभक्षःस्थितोवने ५ अस्थिमात्रावशेषोसावद्यश्वोवामरिष्यति ॥ जन्मांतरीयंतस्यैनोयेनगच्छेल्लयंप्रभो ६ तमुपायंदयांकृत्वावदमेकमलासन ॥ तंप्राप
यिष्येतत्राहंस्ववंशस्यविवृद्धये ७ एवंसुललितांवाणींश्रुत्वोवाचतथाविधिः ॥ श्रूयतांतवपुत्रस्यपूर्वजन्ममयेरितम् ८ सामनाम्नाभवत्पूर्वंतत्रैवनगरेत्यजः ॥
दुष्कर्मातितरांयस्यदर्शनंपुण्यनाशकृत् ९ एकदातेनवित्तस्यलोभेनपथिघातिताः ॥ द्वादशब्राह्मणाःशांतास्त्यक्तास्तेनगुहांतरे १० सर्वंतदीयमादायन्निशि

स्वगृहमागतः ॥ माघकृष्णचतुर्थ्यांसउदयेशशिनोनृप ११ गणेशेतिगणेशेतिपुत्रमाहूयसत्वरम् ॥ अलब्धान्नजलस्तेनसहैवबुभुजेमुदा १२ कालेनतस्य पुत्रोसौपंचत्वमगमन्निशि ॥ चंद्रोदयेचतुर्थ्यांतुकृष्णायामेवभूभुज १३ अज्ञानकृतसंकष्टचतुर्थीव्रतसंभवात् ॥ पुण्याद्गैनायकंधामजगामसुखदंतुसः १४ विमानवरमारूढोवीक्ष्यमाणोप्सरोगणैः ॥ वैमानिकैःस्तूयमानोदिव्यपुष्पैरथार्चितः १५ तेनैवपुण्यशेषेणकृतवीर्याभिधोनृपः ॥ तवपुत्रःसमापेदेपुत्रत्वमधुनाभुवि १६ तदधौघक्षयात्तस्यपुत्रउत्पत्स्यतेनघ ॥ इतिब्रह्मवचःश्रुत्वाचकंपेसनृपोत्तमः १७ पप्रच्छपुनरेवासावुपायंपापनाशनम् ॥ कृतवीर्यपिताउवाच ॥ ब्रह्महत्याकृतंतस्यपापंनश्येत्कथंविधे १८ तद्वदस्वदयासिंधोयद्यपिस्यात्सुदुष्करम् ॥ ॥ ब्रह्मोवाच ॥ ॥ सचेद्व्रतंतुसंकष्टचतुर्थीसंज्ञकंतव १९ सुतः करिष्यतेसम्यक्कृतदापापात्प्रमोक्ष्यते ॥ ॥ राजोवाच ॥ कथंतत्क्रियतेब्रह्मन्कस्मिन्मासेवतंशुभे २० तत्सर्ववदमेस्वामिन्येनपापंलयंव्रजेत् ॥ ॥ ब्रह्मोवाच ॥ चतुर्थीभौमवारेतुमाघेकृष्णेभवेद्यदि २१ शुभेमुहूर्तेचंद्रेचकुर्यात्प्रारंभमस्यह ॥ दंतधावनपूर्वाणिस्नानानिचैकविंशतिं २२ कुर्वीतानित्यकर्माणिजपेन्मंत्रंततःपरम् ॥ निराहारोभवेन्मौनीपरनिंदाविवर्जितः २३ दुष्टकर्मचतांबूलंवर्जयेन्नियमेनच ॥ वर्जयेज्जलपानंचपरद्रोहंचपैशुनम् २४ तिलामलककल्केनदिनांतेस्नानमाचरेत् ॥ एकाक्षरंषडर्णंवाजपेद्वावैदिकंमनुम् २५ गणेशप्रीतयेतस्यनाममंत्रंयथाविधि ॥ ध्यायेत्स्थिरेणमनसादेवदेवंगजाननम् २६ मुहुर्तमात्रेणततःपूजयेद्गणनायकम् ॥ उपचारैःषोडशभिर्नैवेद्यैर्विविधैरपि २७ मोदकापूपशष्कूलीलड्डुकैर्वटकैरपि ॥ पायसैर्विविधैरन्नैर्व्यंजनैर्लेह्यचोष्यकैः २८ फलैर्नानाविधैःपूगतांबूलैर्दक्षिणादिभिः ॥ एकविंशतिदूर्वाभिर्दीपैश्चकुसुमैरपि २९ चंद्रोदयेऽर्घ्यदानेनतिथयेमंत्रपूर्वकम् ॥ गजाननायपश्चात्तु चंद्रायचततःपरम् ३० निवेद्यपूजनंनत्वाक्षमाप्यचततःपुनः ॥ ब्राह्मणान्भोजयेद्भक्त्याशक्त्यावाचैकविंशतिम् ३१ दशद्वादशवाशक्तोदक्षिणाभिःसुतोषयेत् ॥ कथांश्रुत्वाततःसम्यक्स्वयंभुंजीतवाग्यतः ३२ गीतवादित्रघोषेणशेषांरात्रिंततोनयेत् ॥ एवंव्रतंचैकवर्षंकृतंचेद्यत्नतोनृप ३३ सर्वपापक्षयात्तस्यभवितापुत्रउत्तमः ॥ अन्यंवाचिंतयेत्कामंयंयंतंप्राप्नुयान्नरः ३४ सर्वसंकष्टनाशःस्यात्परचक्राद्भयंनहि ॥ शमीमूलेजपांस्तिष्ठन्नुपवासपरायणः ३५ आचद्रोदयपर्यंतंव्रतमेतत्समाचरेत् ॥ अंधोमूकोजडःपंगुस्तदीप्सितमवाप्नुयात् ३६ दारान्पुत्रान्धनंराज्यंलभतेनात्रसंशयः ॥ श्रावणादिषुमासेषुघृतलड्वादिकंपृथक् ३७ भक्षयेद्वर्षपर्यंतंतस्यासिद्धिरनुत्तमा ॥ श्रावणेसप्तलड्डूकान्नभस्येदधिभक्षणम् ३८ आश्विनेचोपवासंचकार्तिकेदुग्धपानकम् ॥ मार्गशीर्षेनिराहारंपौषेगोमूत्रपानकम् ३९ तिलांश्चभक्षयेन्माघेफाल्गुनेघृतशर्कराम् ॥ चैत्रमासेपंचगव्यंवैशाखेशतपत्रिकाम् ४० घृतस्यभोजनंज्येष्ठेआषाढेमधुभक्षणम् ॥ ॥ कृतवीर्यपिताउवाच ॥ अंगारकचतुर्थ्यांतुविशेषोभिहितःकुतः ४१ वदस्वकृपयाब्रह्मन्प्रश्रयावनतायमे ॥ शृण्वतोनचमेतृप्तिर्गजाननकथांशुभां ४२ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेचतुर्थीव्रतकथनंनामैकोनषष्टितमोऽध्यायः ५९ ॥ ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ अंगारकचतु

र्य्यास्तुमहिमानंमहीपते ॥ शृणुष्वावहितोभूत्वाकथयामिसमासतः १ अवंतीनगरेराजन्भारद्वाजोमहामुनिः ॥ वेदवेदांगवित्प्राज्ञःसर्वशास्त्रविशारदः २ अग्निहोत्ररतोनित्यंशिष्याध्ययनतत्परः ॥ नदीतीरगतेस्तिष्ठन्ननुष्ठानरतोमुनिः ३ एकस्मिन्नेवसमयेदृष्ट्वातेनाप्सरोवरा ॥ तांदृष्ट्वाचकमेभोक्तुंभारद्वाजोमहामुनिः ४ अकस्मात्कामिनींदृष्ट्वाकामासक्तोभवन्मुनिः ॥ कामबाणाभिभूतःसन्निपपातमहीतले ५ अतिविह्वलगात्रस्यतस्यरेतःप्रचस्खले ॥ प्रविष्टंतस्यतद्रेतः पृथिवीबिलमध्यतः ६ ततएकःकुमारोभूज्जपाकुसुमसन्निभः ॥ तंधरित्रीस्नेहवशात्पालयामाससादरम् ७ जनुःस्वंतेनधन्यंसामनुतेपितरौकुलम् ॥ ततःसस प्तवर्षस्तांपप्रच्छजननींनिजां ८ मयिलोहितिमाकस्मान्मानुषंदेहमास्थिते ॥ कश्चमेजनकोमातस्तन्ममाचक्ष्वसांप्रतम् ९ ॥ धरण्युवाच ॥ भारद्वाजमुनेरे तःस्खलितंमयिसंगतम् ॥ ततोजातोसिरेपुत्रवर्धितोसिमयाशुभम् १० ॥ सउवाच ॥ तर्हितंमेमुनिंमातर्दर्शयस्वतपोनिधिं ॥ ब्रह्मोवाच ॥ तमादायतदादे वीभारद्वाजंजगामकुः ११ उवाचप्रणिपत्यैनंत्वद्वीर्यप्रसवंसुतम् ॥ वर्धितंतंपुरोधार्यस्वीकुरुष्वमुनेधुना १२ तदाज्ञययथौधात्रींस्वधामरुचिरंतदा ॥ भारद्वा जःसुतंलब्ध्वामुमुदेचालिलिंगतम् १३ आघ्रायशिरउत्संगेस्थापयामासतंमुदा ॥ सुमुहूर्तेशुभेलग्नेचकारोपनयंमुनिः १४ वेदशास्त्राण्युपादिश्यगणेशस्य मनुंशुभम् ॥ उवाचकुर्वनुष्ठानंगणेशप्रीतयेचिरम् १५ संतुष्टोदास्यतेकामान्सर्वांस्तवमनोगतान् ॥ ततःसनर्मदातीरेपद्मासनगतोमुनिः १६ संनियम्येंद्रि याण्याशुध्यायन्हेरंबमंतरा ॥ जजापपरमंमंत्रंवायुभक्षोभ्रशंकशः १७ एवंवर्षसहस्रंसतपस्तेपेसुदारुणम् ॥ माघकृष्णचतुर्थ्यांतमुदयेशशिनोमले १८ द दर्शयामासरूपंस्वंगणनाथोथदिग्भुजम् ॥ दिव्यांबरंभालचंद्रंनानायुधलसत्करम् १९ चारुशुंडंलसद्दंतंशूर्पकर्णंसकुंडलम् ॥ सूर्यकोटिप्रतीकाशंनानालंकार मंडितम् २० ददर्शरूपंदेवस्यसबालःपुरतःस्थितम् ॥ उत्थायप्रणिपत्यैनंतुष्टावजगदीश्वरम् २१ ॥ भौमउवाच ॥ नमस्तेविघ्ननाशायनमस्तेविघ्नकारिणे ॥ सुरासुराणामीशायसर्वशक्त्युपबृंहिणे २२ निरामयायनित्यायनिर्गुणायगुणच्छिदे ॥ नमोब्रह्मविदांश्रेष्ठस्थितिसंहारकारिणे २३ नमस्तेजगदाधारनमस्ते लोक्यपालक ॥ ब्रह्मादयेब्रह्मविदेब्रह्मणेब्रह्मरूपिणे २४ लक्ष्यालक्ष्यस्वरूपायदुर्लक्षणमिदेनमः ॥ नमःश्रीगणनाथायपरेशायनमोनमः ॥ इतिस्तुतःप्रसन्ना त्मापरमात्मागजाननः २५ उवाचश्लक्ष्णयावाचाबालकंसंप्रहर्षयन् ॥ गजाननउवाच ॥ तवोग्रतपसातुष्टोभक्त्यास्तुत्यानयापिच २६ बालभावेपिधैर्यात्तेद दामिवांछितान्वरान् ॥ एवमुक्तोभूमिपुत्रोवचऊचेगजाननम् २७ ॥ भौमउवाच ॥ धन्याद्यदृष्टिर्जननमपिमेदर्शनात्तेसुरेशधन्यंज्ञानंकुलमपिविभोभूःसशैलाद्य धन्या ॥ धन्यंचैतत्सकलमपितपोयेनदृष्टोखिलेशोधन्यावाणीवसतिरपिययासंस्तुतोमूढभावात् २८ यदितुष्टोसिदेवेशस्वर्गेभवतुमेस्थितिः ॥ अमृतंपा तुमिच्छामिदेवैःसहगजानन २९ कल्याणकारिमेनामख्यातिमेतुजगत्त्रये ॥ दर्शनंमेचतुर्थ्यांतेजातपुण्यप्रदंविभो ३० अतःसापुण्यदानित्यंसर्वसंकष्टहारि णी ॥ कामदाव्रतकर्तॄणांत्वत्प्रसादात्सदास्तुच ३१ ॥ गणेशउवाच ॥ अमृतंपास्यसेसम्यग्देवैःसहधरासुत ॥ मंगलेतिचनाम्नात्वंलोकेख्यातिंगमिष्यसि

३२ अंगारकेतिरक्तत्वाद्वसुमत्यायतःसुतः ॥ अंगारकचतुर्थीयेकरिष्यंतिनराभुवि ३३ तेषामब्दसमंपुण्यंसंकष्टीव्रतसंभवम् ॥ निर्विघ्नतासर्वकार्येभविष्य तिनसंशयः ६४ अवंतीनगरेराजाभविष्यसिपरंतप ॥ व्रतानामुत्तमंयस्मात्कृतंतेव्रतमुत्तमम् ३५ यस्यसंकीर्त्तनान्मर्त्यःसर्वान्कामानवाप्नुयात् ॥ ब्र ह्मोवाच ॥ ॥ इतिदत्वावसेदेवःपिदधेद्विरदाननः ३६ ततस्तुमंगलोदेवंस्थापयामासभक्तितः ॥ शुंडामुखंदशभुजंसर्वावयवसुंदरम् ३७ प्रासादंकारया मासगजाननमुदावहम् ॥ संज्ञांमंगलमूर्तीतिदेवदेवस्यसोकरोत् ३८ ततोभवत्कामदादृक्षेत्रंसर्वजनस्यतत् ॥ अनुष्ठानात्पूजनाच्चदर्शनात्सर्वमोक्षदम् ३९ ततोविनायकोदेवोविमानवरमुत्तमम् ॥ प्रेषयामासस्वगणैर्भौममानेतुमंतिकम्४०तेगत्वातेनदेहेनतंभौममानयन्बलात् ॥ गणेशस्यांतिकंराजंस्तदद्भुतमिवाभ वत् ४१ ततोभौमोभवत्ख्यातस्त्रैलोक्येसचराचरे ॥ यतोभौमेनसंकष्टचतुर्थीभौमसंयुता ४२ कृताप्राप्तंचस्वर्गेचामृतपानंसुरैःसह ॥ अतश्चांगारकयुताच तुर्थीप्रथिताभुवि ४३ चिंतितार्थप्रदानेनचिंतामणि रितिप्रथाम् ॥ प्रयातोमंगलमूर्त्तिःसर्वानुग्रहकारकः४३ पारिनेरात्तुनगरात्पश्चिमेप्रथितोभवत् ॥ चिं तामणिरितिख्यातःसर्वविघ्ननिवारणः ४४ अधुनासिद्धगंधर्वैःपूज्यतेसविधूदये ॥ ददातिवांछितानर्थान्पुत्रपौत्रादिसंपदः ४५ इतिश्रीगणेशपुराणेउपासनाखं डेअंगारकचतुर्थीव्रतोपाख्यानेषष्टितमोध्यायः ॥ ६० ॥ ॥ ब्रह्मोवाच ॥ ॥ एकदाहंगतोराजन्कैलासंगिरिशालयम् ॥ उपविष्टःसमामध्येपश्यन्नारदमा गतम् १ तेनापूर्वंफलंचैकंशंकरायनिवेदितम् ॥ ययाचेगणपस्तत्तुकुमारोपिचशंभवे २ कस्मैदेयंफलमिदंअपृच्छच्छंकरोपिमाम् ॥ अहंप्रोवाचबा लायकुमारायेतितंतदा ३ दत्तंशिवेनतस्मैतच्चुक्रोधचगजाननः ॥ ततोब्रह्मास्वभवनंगत्वास्रष्टुमियेषसः ४ तत्रविघ्नकरोविघ्नंचकारपरमाद्भुतम् ॥ उ ग्ररूपंसमास्थायभीषयामासमांतदा ५ मयिभ्रांतेथसविधुर्दृष्ट्वाक्रूरतरंतुतम् ॥ अहसत्परमंचन्द्रःस्वगणैर्द्विरदाननम् ६ ततःपरमकुद्धोसावशपत्तंविधुंत दा ॥ अदर्शनीयस्त्रैलोक्येमद्वाक्यात्त्वंभविष्यसि ७ कदाचित्केनदृष्टःसमहापातकवान्भवेत् ॥ एवंशप्त्वागतोदेवोनिजधामगणैर्वृतः ८ चंद्रस्तुम लिनोदीनोलीनश्चितामयेन्हदे ॥ अणिमादिगुणोपेतेजगत्कारणकारणे ९ कथमाचरितंदौष्ट्यमज्ञानाद्बालवन्मया ॥ अदर्शनीयःसर्वेषांविवर्णोमलि नोभवम् १० कथंसुरूपोवंद्यश्चकलाभिःसुरतोषकः ॥ एतस्मिन्नंतरेदेवैःश्रुतःशापोमहान्विधोः ११ तत्रेयुर्वह्निशक्राद्यायत्रास्तेसौगजाननः ॥ विजिज्ञपुःसुरौघास्तेविघ्नकारणकारिणे १२ ॥ ॥ देवाऊचुः ॥ ॥ त्वंदेवदेवजगतामसिवंदनीयस्त्वंपासिहंसिविदधासियथेष्टमीश ॥ त्वं निर्गुणोपिगुणकृत्गुणिनांत्र्यधीशत्वामेवदेवशरणंवयमद्ययाताः १३ पाहीशनोखिलजगत्तवशापभीतंचंद्रेपराधिनिकथंपतितंसुकष्टम् ॥ तस्माद्वयंचजगदी शजगच्चचंद्रःशर्माप्नुयामभुवनेशतथाविधेहि १४ कष्टेनिपतितंविश्वंअदृश्येशाशिनिप्रभो ॥ अनुग्रहंचचंद्रेस्मिन्त्रैलोक्येकर्त्तुमर्हसि १५ नाज्ञासीद्यस्यतेरूपंम हिमानंश्रुतित्रयम् ॥ सकस्यस्तवनीयःस्यात्तथापिस्तूयसेखिलैः १६ कृतकृत्यावयंतेद्यदर्शनाद्भाषणादपि ॥ शरणंतेप्रपन्नाःस्मःप्रपन्नार्त्तिहराव्यय १७ इ

तितद्वचनंश्रुत्वाजगादद्विरदाननः ॥ सुप्रसन्नःस्तवैस्तेषांधर्मकामार्थमोक्षदः १८ ॥ ॥ विकटउवाच ॥ ॥ प्रसन्नोहंसुराःस्तुत्याव्रृणुध्वंवाञ्छितंमहत् ॥ असाध्यमपिवोदद्यांत्रिषुलोकेषुयद्भवेत् ॥ १९ ॥ ॥ देवाऊचुः ॥ ॥ सुधाकरेनुग्रहंतेसर्वईहामहेवयम् ॥ अनुगृहीतेतस्मिंस्तुसर्वेषांनोग्रहोभवेत् २० ॥ ॥ गणेशउवाच ॥ ॥ एकाऽब्दंवातदर्धंवातदर्धार्धमथापिवा ॥ अदर्शनीयोस्तुशशीव्रतान्त्यंवावरंसुराः २१ ततस्तेदंडवत्सर्वेप्रणेमुर्द्विरदाननम् ॥ उवाचप्रणतांस्तांस्तुविकटोभावपूर्वकम् २२ अप्रमाणंकथमहोवचनंकर्तुमुद्यताः ॥ शरणंचप्रपन्नानांनत्यागंकर्तुमुत्सहे २३ मेरुश्चलेत्पतेत्सूर्योवह्निःशीतोभवेद्यदि ॥ मर्यादामुत्सृजेद्वासिंधुर्वचोमेनानृतंभवेत् २४ अथापिगदतोवाक्यंशृणुध्वंसुरसत्तमाः ॥ भाद्रशुक्लचतुर्थ्यांयोज्ञानतोज्ञानतोपिवा २५ अभिशापीभवेच्चंद्रदर्शनाद्दुःखभाक् ॥ इतितद्वचनंश्रुत्वादेवामुमुदिरेखिलाः २६ ओमितिप्रणिपत्योचुःपुष्पवृष्टिंचचिक्षिपुः ॥ तदनुज्ञांगृहीत्वेयुर्देवाश्चंद्रमसंप्रति २७ तमूचुस्त्वंमूढतरोयोहसद्विरदाननम् ॥ त्रैलोक्यंसंकटेक्षिप्तंत्वयाश्रेष्ठापराधिना २८ त्रैलोक्यनायकेदेवेजगत्त्रयविधायिनि ॥ अव्ययेनिर्गुणेनित्येपरब्रह्मस्वरूपिणि २९ गजाननेखिलगुरावपराधंयतोचरः ॥ एवंनियमितंतेनसर्वलोकाहितेप्सुना ३० अस्माभिःपरमक्लेशात्प्रसन्नोसौकृतोविभुः ॥ भाद्रपदचतुर्थ्यांत्वंनद्रष्टव्यःकदाचन ३१ त्वंचापिशरणंयाहिदेवदेवंगजाननं ॥ तवप्रसादाच्छुद्धतनुःपरांख्यातिमवाप्स्यसि ३२ इतिचन्द्रोवचःश्रुत्वादेवानांहितमात्मनः ॥ जगामशरणंदेवंशरणागतवत्सलम् ३३ गजाननंसुरेशानंमहेशानादिवंदितम् ॥ जजापपरमंमंत्रमेकाक्षरमवापहम् ३४ विधुरिंद्रोपदिष्टंपरमेणसमाधिना ॥ दशद्वादशवर्षाणितपस्तेपेसुदारुणम् ३५ गंगायादक्षिणेतीरेसर्वसिद्धिप्रदायिनि ॥ ततःप्रसन्नोभगवान्पुरोयातोगजाननः ३६ रक्तमाल्यांबरधरोरक्तचंदनचर्चितः ॥ चतुर्भुजोमहाकायःसिंदूरारुणविग्रहः ३७ प्रभयाभासयँल्लोकान्कोटिसूर्याधिकप्रभः ॥ तेजःसमूहंदृष्ट्वातंप्रचकंपेभृशंशशी ३८ परमंधैर्यमास्थायकृतांजलिपुटःपुरः ॥ तर्कयामासमनसाप्रायोयंद्विरदाननः ३९ वरंदातुमिहायातइतिमत्वाननामतम् ॥ तुष्टावपरयाभक्त्यादेवदेवंगजाननम् ४० ॥ चंद्रउवाच ॥ नमामिदेवंद्विरदाननंतंयःसर्वविघ्नंहरतेजनानाम् ॥ धर्मार्थकामांस्तनुतेखिलानांतस्मैनमोविघ्नविनाशनाय ४१ कृपानिधेब्रह्ममयायदेवविश्वात्मनेविश्वविधानदक्ष ॥ विश्वस्यबीजायजगन्मयायत्रैलोक्यसंहारकृतेनमस्ते ४२ त्रयीमयायाखिलबुद्धिदात्रेबुद्धिप्रदीपायसुराधिपाय ॥ नित्यायसत्यायचनित्यबुद्धेनित्यंनिरीहायनमोस्तुनित्यम् ४३ अज्ञानदोषेणकृतोपराधस्तंक्षंतुमर्हांसिदयाकरत्वम् ॥ तवापिदोषःशरणागतस्यत्यागेमहात्मन्कुरुमेनुकंपाम् ४४ ॥ ब्रह्मोवाच ॥ इतितद्वचनंश्रुत्वासुप्रसन्नोगजाननः ॥ तस्मैवरान्ददौदेवःस्तुत्यानत्यासुतोषितः ४५ यथापूर्वंस्थितंरूपंतथातत्तेभविष्यति ॥ भाद्रशुक्लचतुर्थ्यांत्वांयोनरःसंप्रपश्यति ४६ तस्याभिशापोनूनंस्याद्पापंहानिश्चमूर्खता ॥ तस्यामदर्शनीयोसियदुक्तंमेसुरैःसह ४७ कृष्णपक्षेचतुर्थ्यांतुव्रतंयत्क्रियतेनरैः ॥ तवोदये ४४

१ मत्पूजनानन्तरंत्वंपूजनीयइतिपाठान्तरम् ।

हंपूज्यस्त्वंपूजनीयःप्रयत्नतः ४८ दर्शनीयःप्रयत्नेनविपरीतेव्रतंह्यथा ॥ ललाटेकलयातिष्ठममप्रीतिकरःशशिन् ४९ प्रतिमासंद्वितीयायांनमस्य श्चभविष्यसि ॥ एवंलब्धवरश्चंद्रोयथापूर्वोभवत्तदा ॥ ५० ॥ स्थापयामासवरदमूर्तिंदेवर्षिभिःसह ॥ भालचंद्रेतिनामास्यचक्रुस्तेमुनयःसुराः ॥ ५१ प्रासादंकारयामासकांचनंरत्नसंयुतं ॥ उपचारैःषोडशभिःपूजयामाससादरं ५२ पूजायित्वासुराःसर्वेमुनयश्चवरान्ददुः ॥ सिद्धिक्षेत्रमिदंलोके विख्यातंतुभविष्यति ५३ अनुष्ठानवतामत्रसर्वासिद्धिकरंभवेत् ॥ ततस्तेदेवमुनयोनत्वातंद्विरदाननम् ५४ ययुःप्रसन्नमनसःस्वंस्वंस्थानंमुदायुताः ॥ यातेषुदेवमुनिषुदेवोपिपिदधेवपुः ५५ अंतर्हितेभालचंद्रेचंद्रोत्दृष्टमनाइव ॥ स्वंधामप्रतिपद्यैवस्वंधामप्रययौतदा ५६ ॥ इतिश्रीगणेशपुराणेउपा० चंद्रशापानुग्रहवर्णनंनामैकषष्टितमोध्यायः ॥ ६१ ॥ ॥ कृतवीर्यपिताउवाच ॥ ॥ चतुर्थ्यांकृष्णपक्षेतुभुक्तिश्चंद्रोदयेयतः ॥ क्रियतेतन्निमित्तंयत्पृष्टं तन्मेनिरूपितम् १ दूर्वांकुरार्पणस्यापिश्रोतुमिच्छामिकारणम् ॥ किमर्थंगणनाथस्यप्रियादूर्वांकुरावद २ ॥ ब्रह्मोवाच ॥ हंततेकथयिष्यामिदूर्वांकुरसमर्पणे ॥ यत्फलंगणनाथस्यश्रूयतांतन्नृपोत्तम ३ जांबवतिनगरीख्यातादेशेदक्षिणतोभवत् ॥ क्षात्रियःसुलभोस्यांतुगुणीदानीधनीबली ४ विवेक्यासन्मान्यमानोशमीदमपरायणः ॥ सर्वशास्त्रार्थतत्वज्ञःसर्ववेदार्थतत्त्ववित् ५ विकटेभक्तिमान्नित्यंस्तुतिस्तोत्रपरायणः ॥ तस्यभार्यासुमुद्रासीन्नाम्नापरमविश्रुता ६ अत्यंतसुंदरीसाध्वीस्वरूपाद्विकृताप्सराः ॥ देवविप्रातिथिपरापत्युश्चित्तानुवर्तिनी ७ पतिव्रतानांसर्वासांमान्याश्रेष्ठतमानृप ॥ एकस्मिन्दिवसेतौतुदम्प तीस्नाननिर्मलौ ८ उपविष्टौपुराणार्थंपरस्परमनोनुगौ ॥ यावत्तावत्समायातोब्राह्मणोमधुसूदनः ॥ भिक्षाभिलाषीसततंपरमेश्वरचिंतकः ९ कुचैलश्चदरिद्रत्वात्सांबरोपिदिगंबरः ॥ सुलभस्तंतुदृष्ट्वैवप्रणनाममुदायुतः १० जहासचैनंसहसामोहाविष्टोद्विजोत्तमम् ॥ सउवाचततःशापं प्रतिक्षुब्धोमहामुनिः ११ क्रोधसंरक्तनयनश्चैलोक्यंप्रदहन्निव ॥ हलकर्षणकोनित्यंनित्यंदुःखसमन्वितः १२ वृषोभवकुबुद्धेत्वंयोहसद्विद्वतैर्द्विजैः ॥ भर्तुःशापंपरिश्रुत्यसुमुद्राक्रोधमूर्छिता १३ अशपत्तंद्विजंरुष्टासर्पिणीवपदाहता ॥ यतस्त्वयाविवेकेनशापोदत्तःपतेर्मम १४ अतस्त्वंचक्रिवान्मूत्वाविष्ठाशीभवकुद्विज ॥ सोपितामशपत्क्रूरंश्रुत्वाशापंतदीरितम् १५ स्त्रीत्वात्त्वमशपोयस्मात्त्वंचांडालीभविष्यसि ॥ दरिद्रादोषबहुलाविण्मूत्रा दाशुभंकरी १६ एवंपरस्परंशप्त्वात्यक्त्वादेहान्सुदुर्लभान् ॥ सुलभोवृषभोजातोहलकर्षणवान्भवत् १७ नविश्रांतिःक्षणंतस्यविप्रशापात्तदाभवत् ॥ द्विजोपिरासभेयोनौजातोसौमधुसूदनः १८ जातासुमुद्राचांडालीदुष्टाप्राणिविहिंसिका ॥ दरिद्रापैशाचवतीविण्मूत्राशनतत्परा १९ अतिशुष्कशरीरा सादंतुराविकटानना ॥ कदाचिदटमानासादक्षिणेनगरस्यतु २० प्रासादंगणनाथस्यददर्शपरमाद्भुतं ॥ नानावृक्षलताजालैर्नानापक्षिगणैर्युतं २१ यत्रयो

१ चन्द्रोपिविमनाइव इ०पा० । २ अवन्तीनगरीतिपाठान्तरम् ।

गीश्वराःकेचिदनुष्ठानरताःसदा ॥ उपासकागणेशस्यनियमस्थावसंतिहि २२ केचित्कामार्थिनःकेचित्पुत्रमोक्षधनार्थिनः ॥ कदाचिद्भाद्रमासस्यचतुर्थ्यांतुगृहेगृहे २३ तस्मिन्पुरेसंप्रवृत्तोगणनाथमहोत्सवः ॥ अतिवृष्टिःप्रवृत्ताचमहाप्रलयसूचिका २४ चांडालीवृष्टिभीतासायातियद्यन्निवेशनं ॥ ततस्ततोखिलजनैर्निरस्ताताडनादिभिः २५ ततोदेवालयंयातापाषाणाग्निप्रगृह्यसा ॥ तत्राप्यताडयन्केचिद्योगिभिस्तैर्निराकृता २६ प्रज्वाल्यसातृणैराग्निमुष्णान्यंगानिकुर्वती ॥ अकस्माद्वायुनाप्रागादेकोदूर्वांकुरस्तदा २७ पतितोगणनाथस्यमस्तकेदैवयोगतः ॥ सरासभःशीतभीतोयातोदेवालयंतदा २८ तदावृषोलांगलाच्चमुक्तोदैवात्समाययौ ॥ प्रासादंगणनाथस्यभाविनोर्थस्यगौरवात् २९ उभावपितृणंतस्याश्चांडाल्यास्तौबभक्षतुः ॥ परिसुप्रजनेतत्रतयोर्युद्धमवर्त्तत ३० लत्ताभ्यांचैवशृंगाभ्यांगजाननसमीपतः ॥ तयोरास्यान्निपतितौशुंडायांचपदेतदा ३१ दूर्वांकुरौगणेशस्यतुतोषचगजाननः ॥ ततःसायष्टिमादायदेवांतिकमुपागमत् ३२ अहनत्तौखरवृषौस्वयंपूजांबभक्षच ॥ खुरशब्दंतयोःश्रुत्वाबुबुधेनिद्रितोजनः ३३ बहिश्चकारदंडेनमुष्टिकूर्परघाततः ॥ पलायनपरासापिताडिताशर्करादिभिः ३४ चांडाल्यारासभस्यापिस्पर्शशंकाकुलैर्जनैः ॥ स्नापितस्तीर्थतोयेनमंत्रितेनगजाननः ३५ पूजितःपरयाभक्त्यानानाद्रव्यैरनेकशः ॥ वृषरासभचांडालीरातिदुष्टाजनाःपुनः ३६ ताडयामासुरव्यग्रालगुडैर्जानुभिस्तलैः ॥ देवद्वारेचापिहितेगतिस्तेषांनविद्यते ३७ भ्रमतांक्रंदतांतेषांत्रयाणां दारुणैःस्वरैः ॥ मनस्तुदेवदेवस्यविकटस्यतदाहृतम् ३७ एतेषांतुप्रसंगेनपुनःपूजाममाभवत् ॥ एतैश्चपूजितश्चाहमेकदूर्वांकुरादिभिः ३८ प्रदक्षिणाबहुतराकृताद्रुष्टेषुसत्स्वपि ॥ भाद्रशुक्लचतुर्थ्यांमेदूर्वामेकांसमर्पयेत् ३९ समेमान्यश्चपूज्यश्चयश्चकुर्यात्प्रदक्षिणां ॥ तस्मादेतान्विमानेनस्वधामप्रापयाम्यहम् ४० एवंविमानमप्रैषीत्स्वगणैरुपलक्षितम् ॥ स्वरूपधारिभिर्देवोगंधर्वाप्सरमांगणैः ४१ युतंवादित्रनिचयैःपुष्पैःपरिमलैरपिः ॥ दिव्यभोगसमायुक्तंपताकाध्वजमंडितम् ४२ तानादायगणास्तेतुगजाननस्वरूपिणः ॥ तास्मिन्विमानेनिक्षिप्यादिव्यदेहान्मुदायुतान् ४३ गजाननाज्ञयातस्यधामसंप्रापयन्नजवात् ॥ पश्यतांसर्वलोकानामाश्चर्यमभवद्भृदि ४४ एतेषांपूर्वपुण्येनगतिरेषेतिचाब्रुवन् ॥ ततोयोगीश्वराःकेचित्स्यक्त्वाध्यानंगतागणान् ४५ पप्रच्छुःकथमेतेषांब्रूत पुण्यागतिर्ध्रुवा ॥ अतिपातकिनामेषांपुण्यलेशोनविद्यते ४६ गतिःसुदुर्लभाकस्मात्प्राप्तानोगदतानघाः ॥ तदेवाशुचरिष्यामस्त्यक्त्वानुष्ठानमात्मनः ॥ ४७ असंख्यातोगतःकालोनदेवोदृक्पथंगतः ॥ विरक्तानांवायुभुजांअनुष्ठानवतांसदा ४८ धामप्राप्तिःकदानःस्याद्गणेशस्यवदंतुनः ४९ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेदूर्वोपाख्यानंनामद्विषष्टितमोध्यायः ६२ ॥ ॥ ७ ॥ ॥ गणाऊचुः ॥ शृणुध्वंयोगिनःसर्वेस्थिरीकृत्यमनश्चलम् ॥ यन्नशेषोभवेद्वक्तुंसमर्थश्चतुराननः १ तद्वक्तुंकःसमर्थःस्याद्यथाशक्तिवदामच ॥ कुर्वंतिस्तवनंयस्यसर्वदाजशिवादयः २ तस्यकोगणनाथस्यमहिमानंवदेत्स्फुटम् ॥ इत्थंतदीयांलीलांवातथापिशृणुतानघाः ३ दूर्वांकुराणांमहिमानज्ञातोमुनिभिःसुरैः ॥ यज्ञैर्दानैस्तपोभिश्चव्रतैर्होमैर्नवाप्यते ४ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ वा

सवस्यचसंवादंनारदस्यमहात्मनः ५ एकदानारदोगच्छद्वासवंद्रष्टुमुत्सुकः ॥ पूजितःपरयाभक्त्याकृतासनपरिग्रहम् ६ मुनिंपप्रच्छबलहादूर्वामाहात्म्यमादराव् ॥ इंद्रउवाच ॥ किमर्थंदेवदेवस्यगणेशस्यमहात्मनः ॥ विशेषतःप्रियाब्रह्मन्महादूर्वांकुरामुने ७ ॥ मुनिरुवाच ॥ कथयामियथाज्ञातंदूर्वामाहात्म्यमुत्तमम् ॥ स्थावरेनगरेपूर्वंकौंडिन्योभून्महामुनिः ८ उपासकोगणेशस्यतपोबलसमन्वितः ॥ रमणीयतरस्तस्यग्रामदक्षिणभागतः ९ आश्रमःसुमहानासीलताद्रुक्षसमन्वितः ॥ सरांसिफुल्लपद्मानियत्रासन्सुमहांतिच १० भ्रमरैरुपजुष्टानिहंसकारंडकैरपि ॥ चक्रवाकैर्बकैश्चैवकच्छपैर्जलकुक्कुटैः ११ सतुध्यानरतस्तत्रप्रारभत्तपउत्कटम् ॥ पुरःस्थाप्यमहामूर्तिंगणेशस्यचतुर्भुजाम् १२ सुप्रसन्नांसुवरदांदूर्वायुक्तांसुपूजिताम् ॥ जजापपरममंत्रंषडर्णंदेवतोषकम् १३ पप्रच्छसंशयाविष्टापत्नीनाम्नाश्रयास्यतम् ॥ आश्रयोवाच ॥ स्वामिन्गजाननेदेवेदूर्वाभारंदिनेदिने १४ समर्पयसिकस्मात्त्वंतृणैःकोपिनतुष्यति ॥ अस्तिचेत्पुण्यमेतेनतन्मेत्वंकृपयावद १५ कौंडिन्यउवाच ॥ शृणुप्रियेप्रवक्ष्यामिदूर्वामाहात्म्यमुत्तमम् ॥ धर्मस्यनगरेपूर्वमासीदुत्सवउत्तमः १६ सर्वेदेवाःसगंधर्वाआहूताश्चाप्सरोगणाः ॥ सिद्धचारणनागाश्चमुनयोयक्षराक्षसाः १७ तिलोत्तमायानृत्यंत्याःप्रावारोन्यपतद्भुवि ॥ ददर्शतस्याःसयमःकुचौचारूबृहत्तमौ १८ अभवत्कामसंतप्तोविश्रांतोनिरपत्रपः ॥ इयेषालिंगितुंतस्याश्चुंबितुंचतदाननम् १९ सदसोनिर्गतस्तस्माल्लज्जयाधोमुखोयमः ॥ गच्छतस्तस्यरेतश्चस्खलितंपतितंभुवि २० ज्वालामाल्यभवत्तस्मात्पुरुषोविकृताननः ॥ कुर्वन्दंष्ट्रारवंक्रूरंत्रासयन्भुवनत्रयम् २१ ददाहपृथिवींसर्वांजटाभिर्गगनंस्पृशत् ॥ चकंपेतस्यशब्देनत्रिलोकीमानसंभ्रमम् २२ तदैवविष्णुमगमंस्तेतुसर्वेसभासदः ॥ स्तुतिंनानाविधांकृत्वानानास्तोत्रैर्यथामति २३ प्रार्थयामासुरव्यग्राःसर्वलोकहितायतम् ॥ सतैःसर्वैःसमगमद्गजाननमनामयम् २४ तस्यनाशंततोज्ञात्वातुष्टुवुःसर्वएवतम् ॥ देवामुनयश्चोचुः ॥ नमोविघ्नस्वरूपायनमस्तेविघ्नहारिणे २५ नमस्तेसर्वरूपायसर्वसाक्षिन्नमोस्तुते ॥ नमोदेवायमहतेनमस्तेजगदादये २६ नमःकृपानिधेतुभ्यंजगत्पालनहेतवे ॥ नमस्तेपूर्णतमसेसर्वसंहारकारिणे २७ नमस्तेभक्तवरदसर्वदात्रेनमोनमः ॥ नमस्तेनन्यशरणसर्वकामप्रपूरक २८ नमस्तेवेदविदुषेनमस्तेवेदकारिणे ॥ कमन्यंशरणंयामःकोनुनःस्याद्गयापहः २९ अकालएवप्रलयःकथंलब्धोजनैरयम् ॥ हागजाननदेवेशहाहाविघ्नहराव्यय ३० सर्वेषांमरणेप्राप्तेकथमस्मानुपेक्षसे ॥ इतितद्वचनंश्रुत्वाकरुणाब्धिर्गजाननः ३१ आविरासीत्पुरस्तेषांशिशुरूपोरिभीतिहा ॥ बिभत्कमलनयनेशतचंद्रनिभाननम् ३२ कोटिसूर्यप्रभाजालःकोटिकंदर्पजिद्वपुः ॥ कुंदकुड्मलशोभाजिद्दशनोधरबिंबजित् ३३ उन्नसोभ्रूकुटीचारुनयनःकंबुकंठयुक् ॥ विशालवक्षाजानुस्पृग्भुजद्वययुतोबली ३४ गंभीरनाभिविलसदुदरोतिलसत्कटिः ॥ रंभाशोभापरिस्पर्द्धिगुरूरुश्चारुजानुयुक् ३५ सुचारुजंघागुल्फश्रीविलसत्पादपद्मकः ॥ नानालंकारशोभाढ्योमहार्घवसनावृतः ३६ एवंदेवंनिरीक्ष्यैवनगरस्यपुरोभुवि ॥ उत्तस्थुर्दंडवद्भूमौशक्रंदेवगणायथा ॥ देवाऋषयऊचुः ॥ कोभ

वान्कुतआयातःकिंकार्यंवदनोविभो ३८ वयमेवंविजानीमोब्रह्मैवबालरूपधृक् ॥ अनलासुरसंत्रासात्त्यक्त्वाकर्माणिसंस्थितान् ३९ आविर्भूतंतुनस्त्रातुंदुष्टसंहारकारकम् ॥ इतितद्वचनंश्रुत्वाशिशुरूपीगजाननः ४० बभाषेहास्यवदनःसर्वान्देवमुनीन्प्रति ॥ बालउवाच ॥ भवंतोज्ञानसंपन्नायदुक्तंसत्यमेवतत्४१ अहंतस्यवधायैवदुष्टस्यपरपीडिनः ॥ निजेच्छयाबालरूपीवेगेनागांसुरर्षयः४२उपायंवच्मिवस्तस्यवधेतंकुरुतानघाः॥ सर्वैर्भवद्भिस्तंदृष्ट्वानोदनीयोबलादहम् ४३ द्रष्टव्यंकौतुकंतस्यममचैवमहत्तरम् ॥ एवंश्रुत्वाकृपावाक्यंसर्वेतेहर्षनिर्भराः ४४ ऊचुःपरस्परंसर्वेनजानीमोस्यपौरुषम् ॥ ईश्वरोबालरूपेणकर्तुमस्यव धंनुकिम् ४५ अवतीर्णोभवेन्नातुंपीडितंभुवनत्रयम् ॥ इत्थमुक्त्वातुतेसर्वेप्रणेमुःसादरंचतम् ४६ एतस्मिन्नेवकालेतुकालानलस्वरूपधृक् ॥ दहन्दशदिशोभक्ष न्नरलोकंसमाययौ ४७ कोलाहलोमहानासील्लोकानांक्रंदतांतदा ॥ दृष्ट्वंसर्वेमुनयःपलायनपरायणाः ४८ तंचतेमुनयःप्रोचुःशीघ्रंकुरुपलायनम् ॥ नोचेद्भिंसि ष्यतेत्वाद्यसुमहाननलोध्रुवम् ४९ तिमिंगिलोयथामीनानुरगान्गरुडोयथा ॥ इतितद्वचनंश्रुत्वापरमात्मागजाननः ५० बालरूपधरोतिष्ठत्पर्वतोहिमवा निव ॥ सुरर्षयोययुर्दूरात्त्यक्त्वातत्रैवबालकम् ५१ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेदूर्वामाहात्म्येत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥ ६४ ॥ आ श्रयोवाच ॥ देवर्षिषुप्रयातेषुबालेचाचलवत्स्थिते ॥ किमासीत्कौतुकंतत्रबालकालानलोद्भवम् १ तत्सर्वंविस्तरान्मह्यंकथयाशुमहामुने ॥ ॥ नारदउवाच ॥ एवंतयाकृतप्रश्नःकौंडिन्योमुनिसत्तमः २ यदब्रवीच्छचीभर्तस्तत्त्वंशृणुमयोदितम् ॥ ॥ कौंडिन्यउवाच ॥ अचलेचलवद्बालेस्थितेतस्मिन्गजानने ३ कालानलइवाक्षोभ्यआययौसोऽनलासुरः ॥ तस्मिन्क्षणेचलावापिचचालाचलसंयुता ४ नभोदध्वानसदृशघनगर्जितनिस्वनैः ॥ निपेतुर्वृक्षशाखाभ्यःपक्षि वृंदानिभूतले ५ निर्वारिर्वारिधिर्जातोवृक्षाउन्मूलितास्तदा ॥ प्रकंपनेनमहतानप्राज्ञायतकिंचन ६ तस्मिन्नेवक्षणेदेवोबालरूपीगजाननः ॥ दधारानलरू पंतंदैत्यंमायाबलेनाहि ७ प्राशत्सर्वेषुपश्यत्सुजलधिंकुंभजोयथा ॥ ततःसोचिंतयद्देवोयद्ययंजठरेगतः ८ दहेत्त्रिभुवनंकुक्षौदृष्टमाश्चर्यमुत्कटम् ॥ ततःशक्रो ददौचंद्रंतस्यवह्नेः प्रशांतये ९ भालचंद्रेतितंदेवास्तुष्टुवुर्मुनयोपिच ॥ तथापिनचशांतोभूदनलःकंठमध्यगः १० ततोब्रह्माददौसिद्धबुद्धीमानसकन्यके ॥ रं भोरूपद्मनयनेकेशशैवलसंयुते ११ चंद्रवक्त्रेमृतागिरौकूपनाभीसरिद्वली ॥ मृणालमध्येप्रवालहस्तेशैत्यस्यकारणे १२ उवाचेमेसमालिंग्यतवशांतोनलो भवेत् ॥ तयोरालिंगनेशांतःकिंचिदेवहुताशनः १३ ददौसुकोमलंतस्मैकमलंकमलापतिः ॥ पद्मपाणिरितिप्रोचुस्तंसर्वेसुरमानुषाः १४ अशांते ग्नौतुवरुणःसिषेचशीतलैर्जलैः ॥ सहस्रफणिनंनागंगिरिशोस्मैददावथ १५ तेनबद्धोदरोयस्माद्व्यालबद्धोदरोभवत् ॥ तथापिशैत्यंनापेदेकंठेस्थानल संयुतः १६ अष्टाशीतिसहस्राणिमुनयस्तंप्रपेदिरे ॥ अमृताइवदूर्वास्तेप्रत्येकंसेकविंशतिं १७ आरोपयन्मस्तकेस्यततःशांतोनलोभवत् ॥ तुतोषपरमात्मा सौदूर्वांकुरभरार्चितः १८ एवंज्ञात्वातुतेसर्वेपुपूजुस्तंगजाननम् ॥ दूर्वांकुरैरनेकैस्तैर्जहर्षासौगजाननः १९ उवाचचमुनीन्देवान्मत्पूजाभक्तिनिर्मिता ॥ मह

तीस्वल्पकावापिवृथादूर्वांकुरैर्विना २० विनादूर्वांकुरैःपूजाफलंकेनापिनाप्यते ॥ तस्मादुषसिमद्भक्तैरेकावाप्येकविंशति २१ भक्त्यासमर्पितादूर्वादददाति यत्फलंमहत् ॥ नतत्क्रतुशतैर्दानैर्व्रतानुष्ठानसंचयैः २२ तपोभिरुग्रैर्नियमैःकोटिजन्मार्जितैरपि ॥ प्राप्यतेमुनयोदेवायद्दूर्वाभिरवाप्यते २३ ॥ कौंडिन्य उवाच ॥ इतितद्वचनंश्रुत्वादेवादूर्वांकुरैःपुनः ॥ आनर्चुःपरमात्मानंदेवदेवंगजाननम् २४ जगर्जानंदयुक्तोसौनादयन्रोदसीभृशम् ॥ हृष्टानांसर्वदेवानांमुनी नांचनृणामपि २५ अनेकशोवराम्दत्वापिदधेबालरूपधृक् ॥ कालानलप्रशमनइतितंतेसमूचिरे २६ प्रासादेनिर्मितेसर्वैस्थाप्यमूर्तिंगजाननीम् ॥ विघ्नहरो यमित्यस्याभिधांचक्रुर्मुदासुराः २७ अत्रस्नानंतथादानंतपोनुष्ठानमेवच ॥ अनंतंजायतेविघ्नहरस्यास्यप्रसादतः २८ जयःप्राप्तोयतस्तेनपुरंचाविजयाभिधम् ॥ सर्वेषांचहृताविघ्नाविघ्नहर्तेतिसोभवत् २९ ॥ कौंडिन्यउवाच ॥ इतितेकथितंसर्वंदूर्वामाहात्म्यमुत्तमम् ॥ श्रवणात्पठनाच्चास्यसर्वपापक्षयोभवेत् ३० पुरातन मितिहासंशृणुमेगदतःप्रिये ३१ इतिश्रीगणेशपुराणेउ०दूर्वामा०चतुःषष्टितमोऽध्यायः ६४ ॥ कौंडिन्यउवाच ॥ कस्मिंश्चित्समयेदेविसुखासीनंगजाननम्॥नार दोमुनिरभ्यागाद्द्रष्टुंबहुवासरैः १ साष्टांगंप्रणिपत्यैनंप्राहनःसार्थकंजनुः ॥ यत्पुण्यनिचयैर्जातंदर्शनंतेगजानन २ इत्युक्त्वास्वांजलिंबध्वातस्थौतत्पुरतोमु निः ॥ धृत्वाकरेणतत्पाणिमुपवेशयदासने ३ गजाननोमहाभागोमहाभागंमहामुनिम् ॥ नारदोभगवांस्तेनसंतुष्टोमुनिपुंगवः ४ उवाचतंगणाधीशमाश्चर्यंहृदिमे स्तियत् ॥ तन्निवेदितुमायातोनत्वात्वांपुनरात्रजे ५ ॥ गजाननउवाच ॥ किमाश्चर्यंत्वयादृष्टंहृदिकिंतेभिवर्त्तते ॥ वदसर्वंविशेषेणततोव्रजनिजाश्रमम् ६ ॥ नारद उवाच ॥ मैथिलेविषयेदेवजनकोराजसत्तमः॥अतिमानीवदान्यश्चवेदवेदांगपारगः७अन्नदानरतोनित्यंब्राह्मणान्पूजयत्यसौ ॥ नानालंकारवासोभिर्दक्षिणाभिरने कशः ८ दीनांधकृपणेभ्यश्चबहुद्रव्यंददात्यसौ ॥ याचकैर्याच्यतेयद्यत्तत्तत्तेनप्रदीयते ९ तथापिनव्ययंयातिद्रव्यंतस्यमहात्मनः ॥ गजाननस्यसंतुष्ट्याद्रव्यंतद्वर्ध तेनुकिं १० इत्याश्चर्यंमहद्द्रष्टुंप्रयातस्तद्गृहानहं ॥ ब्रह्मज्ञानाभिमानेनउपहासंममाकरोत् ११ अहंचतमुवाचेत्थंधन्योसिनृपसत्तम ॥ चिंतितंतेपिभक्त्यायं प्रयच्छतिगजाननः १२ सतुगर्वादुवाचेत्थमहमीशोजगत्त्रये ॥ अहंदाताचभोक्ताचपातादापयितातथा १३ मत्स्वरूपंविनानान्यद्विद्यतेभुवनत्रये ॥ कर्त्ताच कारणंचाहंकरणंमुनिसत्तम १४ ॥ नारदउवाच ॥ इतितद्वचनंश्रुत्वाक्रोधेनाहंजगादतम् ॥ ईश्वराज्जगतःकर्त्तानान्यःकश्चनविद्यते १५ त्वंतुधर्ममिमंराज नूदंभेनैवकरोषिकिम् ॥ दर्शयिष्येसाक्ष्यमस्यस्वल्पकालेनतेनघ १६ इत्युक्त्वातमहंयातस्त्वदंतिकमिभानन ॥ कौंडिन्यउवाच ॥ आकर्ण्यैत्थंमुनेर्वाक्यंपूज यामासतंविभुः १७ अर्घ्यादिभिरलंकारैर्दिव्यैःपुष्पैःसचंदनैः ॥ मुनिराज्ञांप्रगृह्यैववैकुंठेविष्णुमभ्यगात् १८ गजाननोपिमिथिलांराजभक्तिंपरीक्षितुम् ॥ कु त्सितंवेषमादायसर्वज्ञोपिसमाययौ १९ अनेकक्षतसंयुक्तंस्रवद्रक्तममंगलम् ॥ मक्षिकानिचयाक्रांतंरदहीनमिवातुरम् २० गच्छंतंतादृशंदृष्ट्वानरानासानिरोध नम् ॥ कुर्वंतिवाससाकेचिद्दृष्टीवनंचयथातथा २१ स्खलन्मूर्छन्पतन्गच्छन्नर्भकावलिसंयुतः ॥ नृपद्वारंसमागम्यद्वारपालानुवाचसः ॥ राज्ञेनिवेद्यतांदूताअ

तिथिंमांसमागतम् ॥ ब्राह्मणंक्षुधितंवृद्धंइच्छाभोजनकांक्षिणम् २३तेतद्वाक्यंतथाचख्युर्गत्वातंजनकंनृपम् ॥ आनीयतामितिप्राहदूतादृष्ट्वातुकौतुकम् २४ तेदूता प्रापयामासुःकुचैलंमलिनंनृपम् ॥ ददर्शदूराज्जनकोकम्पंतंमक्षिकावृतम् २५ असृक्कुल्लवंतंवृद्धंतंब्राह्मणंश्रमवारिणम् ॥ तर्कयामासजनकईश्वरोरूपधृक्नुकिं २६ छलितुंमांसमायातोयदिपुण्यंभवेन्मम ॥ समाधास्येमनोह्यस्यभविष्यंनान्यथाभवेत् २७ इत्येवंचिंतयत्येवजनकेनृपसत्तमे ॥ प्रवेशितोद्वारपालैर्ब्राह्मणः पर्यदृश्यत २८ ॥ ब्राह्मणउवाच ॥ चंद्राशुधवलांकीर्तिंश्रुत्वातेहंसमागतः ॥ देहिमेभोजनंराजन्क्षुधितस्याचिरात्भृशम् २९ ममतृप्तिर्भवेद्यावत्तावदन्नंप्रदीयता म् ॥ तवक्रतुशतंपुण्यंभविष्यतिनरेश्वर ३० ॥ कौंडिन्यउवाच ॥ ॥ इतिवाचंनिशम्यासौगृहमध्येनिनायतम् ॥ संपूज्यविधिवच्चैनंस्वाद्वन्नमुपवेषयत् ३१ ए कग्रासेनसर्वंसजग्रासाद्द्विजसत्तमः ॥ अथाचदन्नमन्यत्सनृपोदात्पर्वतोपमम् ३२ तदप्येकेनजग्रासकवलेनाद्विजोत्तमः ॥ यावदन्नंस्थितंसिद्धंपर्याप्तमयुत स्ययत् ३३ तद्दत्तंपुरतस्तस्यबभक्षतत्क्षणेनसः ॥ असंख्यातेषुपात्रेषुपक्वंक्षिप्ताःसुतंदुलाः ३४ दीयतेपुरतस्तस्ययःसिद्धश्चोदनोभवत् ॥ सभक्षयति सर्वंततऊचेजनोनृपम् ३५ राक्षसोयंभवेत्प्रायःकिमर्थंदीयतेबहु ॥ राक्षसेभ्यःप्रदानेननकिंचित्पुण्यमाप्यते ३६ केचिद्वुःस्त्रिभुवनेभक्षितेष्वस्यनोभ वेत् ॥ तृप्तिःपरमिकाराजन्धान्यमस्मैप्रदीयताम् ३७ ततोधान्यानिसर्वाणिगृहेभूमौस्थितानिच ॥ आनीयाचिक्षिपुस्तस्यपुरग्रामगतानिच ३८ पुंसोस्याद्विज रूपस्यसर्वभक्षस्यचातिथेः ॥ नतृप्तिमगमत्सोथभक्षितेषुचतेषुच ३९ ततोदूतानृपंप्रोचुर्धान्यंक्वापिनलभ्यते ॥ इतिदूतवचःश्रुत्वाजनकेधोमुखेस्थिते ४० स्वस्तीत्युक्त्वागमद्विप्रोनतृप्तोसौगृहंगृहम् ॥ दीयतामन्नमित्याहतेजनास्तंजगुस्तदा ४१ सर्वेषांगृहगंधान्यंसर्वंराज्ञासमाहृतम् ॥ जग्धंत्वयाखिलंब्रह्मन्नगम्य तांयत्नतेरुचिः ४२ ॥ ॥ द्विजउवाच ॥ ॥ कीर्तिरस्यश्रुतालोकान्नदाताजनकात्परः ॥ तृप्तिकामःसमायातोह्यतृप्तोहंकथंव्रजे ४३ तूष्णींभूतेषुलोके षुबभ्रमन्सददर्शह ॥ विरोचनत्रिशिरसोर्मंदिरंद्विजयोर्वरम् ४४ तन्मध्यंप्राविशत्सोहिगृहस्वामीवसतया ॥ सर्वोपस्काररहितंधातुपात्रविवर्जितम् ४५ इति श्रीगणेशपुराणेउपासनाखंडेपंचषष्टितमोऽध्यायः ६५ ॥ ॥ कौंडिन्यउवाच ॥ धरामात्रासनौतौतुनभःपावारसंयुतौ ॥ दिगंबरौसर्वधातुसंस्पर्शवर्जिता वुभौ १ अयाचितभुजौनित्यंजलेनैवाखिलाःक्रियाः ॥ द्विजरूपधरोपश्यत्कुर्वाणौसत्वशुद्धये २ गृहंचमक्षिकापुंजैर्मशकैरभितोवृतम् ॥ मूर्त्तिंचगणनाथस्य पूजितांपुष्पपल्लवैः ३ अनन्यभक्त्यातास्यांचतत्पराभ्यांददर्शसः ॥ तावूचेश्रूयतांवाक्यंयन्मयाप्रोच्यतेनघौ ४ मिथिलाधिपतेःकीर्त्तिंश्रुत्वाहंक्षुधितोभृश म् ॥ तृप्तिकामःसमायातोनसतृप्तिंसमाकरोत् ५ कर्मणादांभिकेनैवसत्त्वंनपरिरक्ष्यते ॥ ममतृप्तिकरंकिंचिद्गृहेचेदस्तिदीयतां ६ ॥ दंपतीऊचतुः ॥ चक्रवर्त्ती नृपोयोसौतेनतृप्तिर्नतेकृता ॥ आवाभ्यांतुदरिद्राभ्यांकिंदेयंतृप्तिकारकम् ७ नदीनदजलैरब्धिरसंस्थैर्योनपूर्यते ॥ बिंदुमात्रेणपयसासकथंपूर्यतेवद ८ ॥ द्वि जउवाच ॥ भक्त्यादत्तंस्वल्पमपिबहुतृप्तिकरंमम ॥ अभक्त्यावाथदंभेनबहुदत्तंवृथाभवेत् ९ ॥ तावूचतुः ॥ आवयोर्नगृहेकिंचिच्छपथस्तेद्विजोत्तम ॥ पूजा

यैर्गणनाथस्यप्रातर्दूर्वांकुराहृताः १० पूजितोगणनाथस्तैस्ततएकोवशिष्यते ॥ द्विजउवाच ॥ ॥ भक्त्यादत्तःसएकोपितृभ्योस्यात्प्रदीयतां ११ ॥ कौंडि
न्यउवाच ॥ विरोचनाददौतस्मैश्रुत्वावाक्यंतदीरितम् ॥ एकंदूर्वांकुरंभक्त्यातेनतृप्तोभवद्द्विजः १२ शाल्यन्नंपायसान्नंचनानापक्वान्नमेवच ॥ व्यंजनानिचस
र्वाणिलेह्यचोष्यान्यनेकधा १३ विरोचनाददौकल्प्यतस्मिन्दुर्वांकुरेचतम् ॥ गृहीत्वाब्राह्मणस्तत्तुबभक्षपरयामुदा १४ तस्मिन्दूर्वांकुरेभक्त्यादत्तेतेनाथभ
क्तितः ॥ प्रशशामद्विजस्यास्यतत्क्षणाज्जठरानलः ॥ १५ ॥ तृप्तिश्चपरमातेनप्राप्ततत्क्षणमात्रतः ॥ आलिलिंगात्रिशिरसंतृप्तोहर्षाद्द्विजस्तदा ॥
१६ तत्याजकुत्सितंरूपंप्रकटोभूद्गजाननः ॥ चतुर्भुजोरविंदाक्षःशुंडादंडविराजितः १७ कमलंपरशुंमालांदंतंकरतलैर्दधत् ॥ महार्हमुकुटोराजत्कर्णकुंडलमं
डितः १८ दिव्यवस्त्रपरीधानोदिव्यगंधानुलेपनः ॥ उवाचतौप्रसन्नात्मादंपतीसगजाननः ॥ १९ ॥ वृणीतंवरंशीघ्रंमनसायंयमिच्छथः ॥ ॥ तौ
ऊचतुः ॥ ॥ जन्मनीयत्रनौस्यातांतत्रतेदृढभक्तिता २० मुक्तिर्वादीयतांदेवदुस्तराद्भवसागरात् ॥ नचावांचित्तयोरन्यन्नापेक्षितमिभानन ॥ २१ ॥
॥ ॥ कौंडिन्यउवाच ॥ ॥ इतितद्वाक्यमाकर्ण्यतथेत्युक्त्वागजाननः ॥ पुनरालिंग्यपिदधेभकांत्रिशिरसंमुदा २२ एतस्मात्कारणाद्दूर्वाभारोस्मैदीयतेम
या ॥ असंख्यभक्षणाद्योनतृप्तिंदेवःसमाययौ ॥ २ ३॥ दूर्वांकुरेणचैकेनसतृप्तिंपरमांययौ ॥ इतितेकथितःसम्यगाश्रयेमहिमाशुभः ॥ दूर्वासमर्पणभवः
श्रवणात्सर्वकामदः २४ इतिहासमिमंभक्त्याशृणुतेश्रावयेच्चयः ॥ सपुत्रधनकामाढ्यःपत्रेहचमोदते २५ गजाननेलभेद्भक्तिंनिष्कामोमुक्तिमाप्नुयात् ॥
॥ ॥ गणाऊचुः ॥ ॥ श्रुत्वापीत्थमितीहासमाश्रयासंशयंपुनः ॥ २६ ॥ प्रपेदेतद्दितंज्ञात्वाकौंडिन्यःपुनरब्रवीत् ॥ आश्रयेशृणुमेवाक्यंसंशयस्या
पनुत्तये २७ यद्ब्रवीमिहृदिस्थस्यमयाज्ञातस्यतेनघे ॥ एकंदूर्वांकुरंगृह्यगच्छशीघ्रंबिडौजसं २८ वदाशीर्वचनंपूर्वंपश्चाद्याचस्वकांचनं ॥ दूर्वांकूरेणतुलि
तंगृहीत्वातादिहानय २९ नन्यूनंनाधिकंग्राह्यंतस्यभाराच्छुभानने ३० ॥ गणावूचुः ॥ इतिवाणींतस्यश्रुत्वागृहीत्वैकंतदाश्रया ॥ दूर्वांकुरंययौशक्रंभर्तृ
वाक्यपरायणा ३१ इतिश्रीगणेशपुराणेउपासनाखंडेषट्षष्टितमोध्यायः ॥ ६६ ॥ गणाऊचुः ॥ आज्ञप्तातेनमुनिनास्वाभिप्रेतार्थसिद्धये ॥ एकंदूर्वांकुरंगृह्य
शक्रसन्निधिमाययौ १ तमुवाचाश्रयाशक्रदेहिमेकांचनंशुभम् ॥ याचितुंत्वांसमायाताभर्तृवाक्यात्सुरेश्वर २ ॥ इंद्रउवाच ॥ किमर्थंत्वमिहायाताद्याज्ञा
प्रेषिताभवेत् ॥ मयासंप्रेषितंस्यात्तेजातरूपंस्वशक्तितः ३ आश्रयोवाच ॥ दूर्वांकुरस्यतुलयाद्यद्भवेत्कांचनंसुर ॥ तद्गृहीष्येशचीभर्त्तर्न्यूनंनचवाधिकम् ४
शक्रउवाच ॥ दूतैनांनयशीघ्रंत्वंकुबेरभवनंप्रति ॥ सदास्यतिसुवर्णंचदूर्वांकुरमितंशुभम् ५ गणाऊचूः ॥ आज्ञयादेवराजस्यदेवदूतस्तयासह ॥ प्रायात्कुबेर
भवनंशक्रस्यवचनात्तदा ६ अस्यैदूर्वांकुरमितंजातरूपंप्रदीयतां ॥ इंद्रेणप्रेषितासाध्वीमुनिपत्नीमयासह ॥ प्रापितामवनंतेद्ययामिदेवनमोस्तुते ७ कुबेरउ
वाच ॥ अत्याश्चर्यमहंमन्येमुनिःशक्रस्तथाश्रया ॥ मोहाविष्टानजानंतिदूर्वांकुरमितंकियत् ८ कांचनंतेनकिंवास्यात्बहुलंकिंनयाचितं ॥ गणाऊचूः ॥ एवमे

वददौतस्यैबहुलंकांचनंसह ९ नजग्राहभयाद्भर्तुर्न्यूनाधिकविशंकया ॥ स्वर्णकारतुलायांतंदूर्वांकुरमधारयत् १० नाभवत्तुलयातस्यपर्याप्तंतत्सुहाटकम् ॥ वणिक्तुलासमानीतातत्रापिनाभवत्समं ११ तैलकारतुलायांतुदूर्वांकुरसमंनच ॥ घटोबद्धस्ततस्तत्रहाटकंदत्तमेकतः १२ दूर्वांकुरोपरत्रापियातिपत्रमधस्तदा ॥ अन्यदन्यद्दधौतत्रकुबेरःकांचनंबहु १३ तच्चापिनाभवत्तेनसमंदूर्वांकुरेणच ॥ सर्वंकोशगतंद्रव्यंदत्तंतेनगिरींद्रवत् १४ तथापिनाभवत्साम्यंतेनदूर्वांकुरेणतत् ॥ पत्नीमाहूयतांप्राहकुबेरःकौतुकान्वितः १५ कुरुमद्वाक्यतःसुभ्रुघटारोहणमग्रतः ॥ नसमंचेत्समारोक्ष्येनिजसत्वरिरक्षया १६ पतिव्रताज्ञयातस्य घटमारुरुहेतदा ॥ नसमासापितेनासीत्ततःसर्वांपुरींददौ १७ घटमध्येकुबेरोसौनचोर्ध्वंजायतेंकुरः ॥ श्रुत्वादूतमुखादींद्रोगजारूढःसमाययौ १८ स्वकीयद्रव्यसहितोघटमारुरुहेस्वयं ॥ दूर्वांकुरोनचोर्ध्वंसतथापिसमजायत १९ अधोमुखोगतश्चिंतांकिमेतदितिचिंतयन् ॥ विष्णुंहरंचसस्मारतत्रारोहणकाम्यया २० तत्रागतौसनगरौघटमारुहतांतदा ॥ तथापिनोर्ध्वमगमत्तदादूर्वांकुरःस्फुटं २१ ततस्तेततउत्तेरुःशिवविष्णुधनेश्वराः ॥ वरुणेंद्राग्निमरुतःकौंडिन्यमभितोययुः २२ देवादेवर्षयश्चैवासिद्धविद्याधरोरगाः ॥ दिनांतेसमनुप्राप्तेस्वंनीडमिवपक्षिणः २३ नमस्कृत्यमुनिंसर्वेप्रोचुरुद्विग्नचेतसः ॥ सर्वऊचुः ॥ द्विजनंविलयंयातंदर्शनात्तवभोमुने २४ पूर्वपुण्यभवादग्रेकल्याणंनोभविष्यति ॥ तवपत्न्याहृतंसत्वंसर्वेषामद्यनःस्फुटं २५ महिमानंनजानीमोदूर्वांकुरसमुद्भवं ॥ एकदूर्वांकुरतुलांत्रैलोक्यमपिनालभत् २६ गजाननशिरस्थस्यत्वयाभक्त्यार्पितस्यच ॥ जानीयान्महिमानंकःसम्यक्दूर्वांकुरस्यह ॥ यज्ञदानव्रततपःस्वाध्यायोपिनतत्समः २७ गजाननैकभक्तस्यजपतस्तपतोनिशं ॥ तवापिमहिमानंकोजानीयात्सर्वदेहिनः २८ एवमुक्त्वामुनिंसर्वेपूर्वंपूज्यगजाननं ॥ सर्वेसभार्यापुपुजुस्तुष्टुवुर्ननृतुर्जगुः २९ नब्रह्मानहरिःशिवेंद्रमरुतोनाग्निर्विवस्वान्यमःशेषोशेषकलानिधिश्चवरुणोनोचंद्रमानाश्विनौ ॥ नोवाचामधिपोनचैवगरुडोनोयक्षराट्नागिरामाहात्म्यंपरिवेददेवनिगमैरज्ञातरूपस्यते ३० एवंसंतोष्यसर्वेतेदेवदेवंगजाननम् ॥ मुनिंचसमनुज्ञाप्यययुःस्वंस्वंनिकेतनम् ३१ अश्रयापिततोज्ञात्वादूर्वामाहात्म्यमुत्तमम् ॥ विश्वस्तामर्तृवाक्येसादूर्वाभिःप्रत्यपूजयत् ३२ विघ्नेश्वरंसर्वदेवंसर्वैर्दूर्वाभिरर्चितम् ॥ प्रणनामचकौंडिन्यंभर्तारंसत्यवादिनम् ३३ उवाचसुप्रसन्नासास्वात्मानंनिंदतीभृशम् ॥ आश्रयोवाच ॥ मादृशीनैवदुष्टास्तियातेवाक्येससंशया ३४ विशेषविदुषास्वामिन्विशेषविदुषात्वया ॥ सम्यक्कृतंममविभोसर्वभूतदयावता ३५ तत्क्षमस्वापराधंमेत्वामहंशरणागता ॥ ततःप्रातःसमुत्थायदूर्वाआदायसत्वरौ ३६ स्नात्वादेवंसमभ्यर्च्यदूर्वांपणमकुर्वताम् ॥ अनन्यभक्त्याज्ञात्वातौदूर्वामाहात्म्यमुत्तमम् ३७ सायंप्रातर्देवदेवंपूजयंतौनिरंतरम् ॥ त्यक्त्वायज्ञव्रतंदानंज्ञात्वादेवोगजाननः ३८ कृपयापरयाविष्टःस्वधामप्रत्यपादयत् ॥ गणाऊचुः ॥ अगाधंवर्णितंदूर्वामाहात्म्यमिदमुत्तमम् ३९ अशेषवर्णनेशेषोनेशोनैशौहरीश्वरौ ॥ त्रैलोक्यंतुलयायस्याःपत्रेणैवाभवत्समम् ४० दूर्वेतिस्मरणात्पापंत्रिविधंविलयंव्रजेत् ॥ तत्स्मृतौस्मर्यतेदेवोयतःसोपिगजाननः ४१ इतिचिंतामणिक्षेत्रमहिमावर्णितःस्फुटम् ॥ श्रवणात्कीर्तनाद्ध्याना

भक्तिमुक्तिफलप्रदः ४२ एतस्मात्कारणाद्यानंत्रयाणांप्रेषितंशुभम् ॥ रासभस्यमुखाद्दूर्वागतादेवेषुपस्यच ४३ चांडाल्याशीतनाशायत्वानतिदृगभारतः ॥
वायुनाप्रबलेनापिगत ।गजानने ४४ यतस्तस्यप्रियादूर्वासंतुष्टोसौविनायकः ॥ निष्पापत्वात्त्रयाणांससान्निध्यंदत्तवान्निजम् ४५ गंधमात्रेणदूर्वायाःसं
तुष्टोजायतेविभुः ॥ प्रसंगेनतुभक्त्यावार्किंपुनर्मस्तकार्पणात् ४६ ॥ ब्रह्मोवाच ॥ इतिदूतमुखाद्राज्ञासश्रुतोमहिमातदा ॥ दूर्वायामुनिभिःसर्वैर्नदृष्टोनच
संश्रुतः ४७ स्नात्वादूर्वांकुरान्गृह्यपुपूजुस्तेविनायकम् ॥ सेवकाश्चापिदूर्वाभिरानर्चुःश्रीगजाननम् ४८ आसन्सर्वेदिव्यदेहास्तेजसासूर्यवर्चसः ॥ शृण्वंतोदेव
वाद्यानांनानारावान्समंततः ४९ विमानवरमारूढादिव्यवस्त्रानुलेपिनः ॥ यातावैनायकंधामकेचित्तद्रूपधारिणः ५० नरानागरिकाःकेचिदागतास्तंमहोत्स
वम् ॥ द्रष्टुंदूर्वाभिरानर्चुरेकविंशतिभिःपृथक् ५१ भुक्त्वाभोगांश्चतेसर्वेगाणेशंस्थानमागमन् ॥ विमानंचापिचलितमूर्ध्वंतत्पुण्यपुंजतः ५२ तस्माद्गणेशभ
क्तेनकार्यंदूर्वाभिरर्चनम् ॥ नकरोतिनरोयस्तुप्रमादात्ताभिरर्चनम् ५३ सचांडालस्तुविज्ञेयोनरकान्प्राप्नुयाद्बहून् ॥ नतन्मुखंनिरीक्षेतकदाचिदपिमानवः ५४
यस्तुदूर्वाभिरर्चेत्तंदेवदेवंगजाननम् ॥ तस्यदर्शनतोन्योपिपापीशुद्धिमवाप्नुयात् ५५ अलाभेबहुदूर्वाणामेकयैवाभिपूजयेत् ॥ तेनापिकोटिगुणिताकृतापूजान
संशयः ५६ ॥ ब्रह्मोवाच ॥ इतिनानाविधोराजन्महिमाकथितस्तव ॥ सेतिहासस्तुदूर्वाणांश्रवणात्पापनाशनः ५७ नाख्येयोदुष्टबुद्धेस्तुप्रियेपुत्रेनिवेदयेत् ॥
इंद्रउवाच ॥ इतिब्रह्ममुखाच्छ्रुत्वापरमाख्यानमुत्तमम् ५८ ननंदपरमप्रीतोननामकमलासनम् ॥ तदाज्ञयाययौस्थानंस्वकीयंविस्मयान्वितः ५९ ॥ इतिश्रीगणे
शपुराणेउपा०दूर्वामाहात्म्येसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ७ ॥ ॥ शूरसेनउवाच ॥ अन्यांकथयशक्रत्वंगणनाथकथांपुनः ॥ कृतवीर्यस्यजनकःकिंच
कारततःपरम् १ ॥ ॥ इंद्रउवाच ॥ श्रुत्वाख्यानंतुसंकष्टचतुर्थ्याराजसत्तमः ॥ दूर्वाख्यानंतुसंश्रुत्वाचिंताविष्टोनृपोभवत् २ अपुत्रस्यगतिर्नास्तिपुत्रोमे
भविताकथम् ॥ स्वप्नेददर्शपितरंकार्त्तवीर्यस्तथाविधः ३ सगद्गदाभ्यांकंठाभ्यांनोचतुस्तौपरस्परं ॥ आलिंगतुरन्योन्यंप्रेमविह्वलचेतसा ४ ततःपुत्रं
करेधृत्वापयंकेस्थापयत्पिता ॥ उवाचचत्वयापुत्रपुत्रार्थंबहुधाश्रमः ५ क्रियतेचाहमप्येकमुपायंवच्मितेनघ ॥ मृत्युलोकादागतेनकथितंनारदेनमे ६
तदैवाहंगतःपुत्रब्रह्मणःसदनंप्रति ७ पप्रच्छाहंनमस्कृत्यब्रह्माणंसर्ववेदिनं ॥ कथंमेभवितापुत्रसंततिःकमलासन ८ कथितंतेनसंकष्टचतुर्थीव्रतमुत्तमम् ॥ क
उवाच ॥ आस्मिन्व्रतेकृतेपापक्षयेजातेनृपोत्तम ९ संततिस्तवपुत्रस्यभविष्यतिनसंशयः ॥ पितोवाच ॥ तदातथैवलिखितंब्रह्मणाकथितंयथा १० गृहाण
पुस्तकंचैतद्यथावत्कुरुचव्रतम् ॥ यावदब्दंसमाप्येततावत्सिद्धिविनायकः ११ प्रसन्नोभवितादेवःसर्वसंकष्टहारकः ॥ तस्मिन्प्रसन्नेपुत्रस्तेभवितानात्रसंशयः १२
इत्युक्त्वांतर्हितस्तस्यपुत्रस्यजनकोनृप ॥ जजागारततोराजाकृतवीर्यस्तुवैबली १३ ददर्शपुस्तकंहस्तेस्वप्नार्थान्परिसस्मरे १४ मुमोचाश्रूणिनेत्राभ्यांशो
कानंदपरिप्लुतः ॥ पितुर्वियोगाच्छोकार्त्तःपुस्तकाप्तेश्चहर्षितः १५ तावत्तस्यागतामात्याःपरिवार्यान्नुवन्नृपम् ॥ ॥ अमात्याऊचुः ॥ ॥ जहिप्रमादंराजंस्त्वं

सावधानमनाभव १६ त्यजशोकंवदास्मान्किंकारणंशोककारकम् ॥ अस्मानपिसमाविष्टस्त्वच्छोकाच्छोकउत्कटः १७ ॥ ॥ इंद्रउवाच ॥ ॥ श्रुत्वा वाक्यममात्यानांकार्तवीर्योजगादतान् ॥ मयास्वप्नेपितादृष्टस्तेनमेविह्वलंमनः १८ पुस्तकंचैवसंकष्टचतुर्थीव्रतबोधकं ॥ दत्तंममकरेतेनपिदधेतत्क्षणाच्च सः १९ तद्वियोगेनशोचामिगतार्थेनिर्धनोयथा ॥ उक्तंचतेनमेवाक्यंपुत्रार्थेकुर्विदंव्रतं २० प्रबुद्धोहंयदामात्याहस्तेदृष्टंचपुस्तकम् ॥ आश्चर्यहर्षशोकैश्चाप्यश्रुमुंचामिनान्यथा २१ अमात्याऊचुः । यःपितासर्वलोकानांमनुष्योरगरक्षसां ॥ सएवपितृरूपेणपरितुष्टोगजाननः २२ उपायमवदत्तेससंतत्यैराजसत्तम ॥ अन्यथापुस्तकंकृत्यंस्वप्रार्थःक्वप्रमाभवेत् २३ विनाप्रसादंस्वप्नोपिविपर्ययमुदाहृतः ॥ इंद्रउवाच ॥ इत्यमात्यवचःश्रुत्वासावधानमनानृपः २४ आहूय परिपप्रच्छपंडितान्सुहृदोपिच ॥ वदंतुपुस्तकस्यार्थंप्रसादात्तस्यभोद्विजाः२५ तऊचुःपुस्तकंदृष्ट्वातस्यार्थंसर्वसंसदि ॥ द्विजाऊचुः ॥ ब्रह्मणःकृतवीर्यस्यसंवादोत्रमहानृप २६ चतुर्थीसर्वसंकष्टनाशिन्यत्रनिरूपिता ॥ चंद्रोदयेगणेशस्यपूजाप्रोक्तासविस्तरा २७ अंगारकचतुर्थ्यांस्तुमहिमाबहुशोपिच ॥ तिथिदेवविधूनांचअर्घ्यदानंसमंत्रकं २८ एकविंशतिविप्राणांभोजनंचैवपूजनम् ॥ नानादानानितेभ्यश्चदेयानीतिनिरूपितं २९ दूर्वासमर्पणफलंश्वेतदूर्वाफलंपृथक् ॥ एतद्व्रतंमहाभागभाग्यात्प्राप्तंत्वयानघ ३० नदृष्टंनश्रुतंलोकेभविष्यत्युपकारकं ॥ श्रवणात्स्मरणाच्चापिसंकष्टहरणंनृणां ३१ इंद्रउवाच ॥ श्रुत्वातत्पंडितमुखाद्राजासर्वजनश्चह ॥ आश्चर्यानंदसंयुक्तःपुपूजेसद्विजोत्तमान् ३२ वस्त्रालंकाररत्नानिधनंधान्यंददौबहु ॥ अत्रिमाहूयराजापिगुरुंनिजकुलस्यच ३३ सुमुहूर्तेततोगृण्हात्परिपूज्ययथाविधि ॥ देवंविनायकंतंचविद्यामेकाक्षरांशुभां ३४ जजापमंत्रंतमनन्यभक्त्याध्यायन्गणेशंविजितेंद्रियःसः ॥ व्रतंचचक्रेगणनाथतुष्ट्यैसुताप्तयेसंकटनाशनंतत् ३५ इतिगणेशपुराणेउपासनाखंडेव्रतनिरूपणंनामाष्टषष्टितमोऽध्यायः ६८ ॥ ॥ ७ ॥ ॥ शूरसेनउवाच ॥ ब्रह्मणाकथमादिष्टंकृतवीर्यायसिद्धिदम् ॥ तन्ममाचक्ष्वसंकष्टचतुर्थीव्रतमुत्तमं १ इंद्रउवाच ॥ सत्यलोकेसुखासीनंसर्वज्ञंचतुराननम् ॥ कृतवीर्यपितागत्वापप्रच्छप्रणतोनृपः २ कृतवीर्यउवाच ॥ ॥ देवदेवजगद्धातःप्रणतार्तिनिवारण ॥ वर्त्ततेहृदयेयन्मेपृच्छामित्वांवदस्वतत् ३ आपत्सुवर्तमानानांनृणांव्याकुलचेतसां ॥ चिंतयाव्यग्रमनसांवियोगेसुहृदांतथा ४ दुर्लभप्राप्तयेनृणांकार्यसिद्धिःकथंभवेत् ॥ अर्थसिद्धिःकथंनित्यंपुत्रसौभाग्यसंपदः ५ सर्वसंकष्टनाशार्थंकार्यंकिंमानवैःप्रभो ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणुराजन्प्रवक्ष्यामिसर्वसिद्धिप्रदंव्रतम् ६ यस्यानुष्ठानमात्रेणचिंतितंप्राप्नुयान्नरः ॥ ओषधीभिःशुक्लतिलैर्दिवास्नायात्प्रसन्नधीः ७ संकल्पंकारयेत्सम्यग्ध्यात्वादेवंगजाननम् ॥ गणेशंपूजयेद्भक्त्यामंत्रैरागमसंभवैः ८ कृष्णपक्षेचतुर्थ्यांचनिशिचंद्रोदयेपिच ॥ ॥ नृपउवाच कथंसंपूजयेद्ब्रह्मन्देवदेवंगजाननम् ९ विस्तरेणममब्रूहिप्रणयात्परिपृच्छते ॥ ॥ ब्रह्मोवाच ॥ ॥ नित्यकर्मसमाप्याथनिशायामुदयेविधोः १० शुचौदेशे गोमयेनलिप्तेमंडपिकान्विते ॥ तत्रपीठंगणेशस्यपूजयेत्कुंकुमाक्षतैः ११ स्थापयेत्कलशंतत्रपंचरत्नसमन्वितम् ॥ तस्योपरिन्यसेत्पात्रंसौवर्णंकलशान्वित

मू १२तदभावेतुरौप्यंवाताम्रंवैणवमेवच ॥ तस्योपरिन्यसेद्वस्त्रंक्षौमंवाशक्तिसंयुतः १३ तस्योपरिलिखेद्यंत्रंआगमोक्तविधानतः ॥ तत्रमूर्त्तिंगणेशस्यसौवर्णी लक्षणान्वितां १४ एकदंतंमहाकायंतप्तकांचनसंनिभम् ॥ लंबोदरंविशालाक्षंज्वलत्पावकलोचनम् १५ आखुपृष्ठसमारूढंचामरैर्वीजितंगणैः॥ शेषयज्ञोपवीतंचचिंतयेत्तंगजाननम् १६ ध्यानम् ॥ आगच्छदेवदेवेशसंकटान्मांनिवारय ॥ यावद्व्रतंसमाप्येतत्तावत्त्वंसन्निधौभव १७सहस्रशीर्षेत्यावाहनम्॥ गणाधीशनमस्तेस्तुसर्वसिद्धिप्रदायक ॥ आसनंगृह्यतांदेवसंकटान्मांनिवारय १८पुरुषएवे०आसनम् ॥ उमापुत्रनमस्तेस्तुनमस्तेमोदकप्रिय ॥ पाद्यंगृहाणदेवेशसंकटंमेनिवारय १९ एतावानस्य०पाद्यम् ॥ लंबोदरनमस्तेस्तुरत्नयुक्तंफलान्वितम् ॥ अर्घ्यंगृहाणदेवेशसंकटंमेनिवारय ॥ त्रिपादूर्ध्वेत्यर्घ्यम् ॥ २० गंगादिसर्वतीर्थेभ्य आत्दृतंतोयमुत्तमम् ॥ गृहाणाचमनीयार्थंसंकटंमेनिवारय ॥ तस्माद्विराळ०आचमनीयम् २१ पयोदधिघृतंचैवशर्करामधुसंयुतम् ॥ पंचामृतंगृहाणेदंसंकटं मेनिवारय २२ मंत्रैःपंचामृतम् ॥ नर्मदाचंद्रभागाचगंगासंगमजैर्जलैः ॥ स्नापितोसिमयाभक्त्यासंकटंमेनिवारय ॥ यत्पुरुषेणेतिस्नानम् २३ इभवक्त्रनमस्तुभ्यंगृहाणपरमेश्वर ॥ वस्त्रयुग्मंगणाध्यक्षसंकटंमेनिवारय ॥ तंयज्ञमितिवस्त्रम् २४विनायकनमस्तुभ्यंनमःपरशुधारिणे ॥उपवीतंगृहाणेदंसंकटान्मेनिवारय ॥ तस्मा० यज्ञोपवीतम् २५ ईशपुत्रनमस्तुभ्यंनमोमूषकवाहन ॥ चंदनंगृह्यतांदेवसंकटंमेनिवारय॥ तस्माद्यज्ञादितिचन्दनम् २६ घृतकुंकुमसंयुक्तास्तंदुलाःसुमनोहराः ॥ अक्षतास्तेनमस्तुभ्यंसंकटंमेनिवारय ॥ अक्षताः २७ चंपकंमल्लिकादूर्वापुष्पजातीरनेकशः ॥ गृहाणत्वंगणाध्यक्षसंकटंमेनिवारय ॥ तस्मादश्वेतिपुष्पम् २८ लंबोदरमहाकायधूम्रकेतोसुवासितम् ॥ धूपंगृहाणदेवेशसंकटंमेनिवारय ॥ यत्पुरुषमितिधूपः २९ विघ्नांधकारसंहारकारकत्रिदशाधिप ॥ दीपंगृहाणदेवेशसंकटंमेनिवारय ॥ ब्राह्मणोस्येतिदीपः३० मोदकापूपलड्डुकपायसशर्करान्वितम् ॥ पक्वान्नंसघृतंदेवनैवेद्यंप्रतिगृह्यतां ॥चन्द्रमामनसइतिनैवेद्यम् ३१ नारीकेलफलंद्राक्षांरसालंदाडिमंशुभम् ॥ फलंगृहाणदेवेशसंकटान्मेनिवारय॥नाभ्याआसीदितिफलम् ३२ क्रमुकैलालवंगादिनागवल्लिदलानिच ॥ तांबूलंगृह्यतांदेवसंकटंमेविनाशय ॥ इतिताम्बूलम्३३सर्वप्रीतिकरंदेवहिरण्यंसर्वसिद्धिदम् ॥ दक्षिणार्थंगृहाणेदंसंकटंमेविनाशय॥समास्यासन्नितिदक्षिणां३४ ततोदूर्वांकुरान्गृह्यविंशत्येकंचभक्तितः ॥ एभिर्नामपदैर्देवमर्चयेत्सुसमाहितः ३५ ॥ गणाधिपायनमः ॥ १ ॥ उमापुत्रायनमः ॥ २ ॥ अघनाशनायनमः ॥ ॥ ३ ॥ एकदंतायनमः ॥ ४ ॥ इभवक्त्रायनमः ॥ ५ ॥ मूषकवाहनायनमः ॥ ६ ॥ विनायकायनमः ॥ ७ ॥ ईशपुत्रायनमः ॥ ८ ॥ सर्वसिद्धिप्रदायनमः ॥ ९ ॥ लंबोदरायनमः ॥ १० ॥ वक्रतुंडायनमः ॥ ११ ॥ मोदकप्रियायनमः ॥ १२ ॥ विघ्नविध्वंसकर्त्रेनमः ॥ १३ ॥ विश्ववंद्यायनमः ॥ ॥ १४ ॥ अमरेशायनमः ॥ १५ ॥ गजकर्णायनमः ॥ १६ ॥ नागयज्ञोपवीतिनेनमः ॥ १७ ॥ बालचंद्रायनमः ॥ १८ ॥ परशुधारिणे नमः ॥ १९ ॥ विघ्नाधिपायनमः ॥ २० ॥ विद्याप्रदायनमः ॥ २१ ॥ कर्पूरानलसंयुक्तंशेषाघौघविनाशनम् ॥ नीराजनंगृहाणेशसंकटान्मांविमोचय ॥

नीराजनम् ३६ चंपकाशोकबकुलपारिजातभवैःशुभैः ॥ पुष्पाजलिंगृहाणेमांसंकटान्मांविमोचय ॥ यज्ञेनोतिपुष्पांजलिः ३७ त्वमेवाविश्वंसृजसीभवक्रत्वमे
वविश्वंपरिपासिदेव ॥ त्वमेवविश्वंहरसेखिलेशत्वमेवविश्वात्मकजाविभासि ३८ इतिस्तुतिः ॥ नमामिदेवंगणनाथमीशंविघ्नेश्वरंविघ्नविनाशदक्षम् ॥ भक्ता
र्तिहंभक्तिविमोक्षदक्षंविद्याप्रदंवेदनिधानमाद्यम् ३९ नमस्काराः॥एवंस्तुवीतविधिवत्प्रणमेतपुनःपुनः ॥ प्रदक्षिणांप्रकुर्वीतयथाशक्त्यैकविंशतिम् ४० येत्वाम
संपूज्यगणेशनूनंवांछंतिमूढाविहितार्थसिद्धिम् ॥ तएवनष्टानियतंहिलोकेज्ञातोमयातेसकलःप्रभावः ४१ प्रार्थना ॥ आचार्यस्त्वंद्विजाध्यक्षसर्वसिद्धिप्रदायक ॥
वायनंगृह्यतांब्रह्मन्संकटान्मांनिवारय ४२ फलपुष्पाक्षतैर्युक्तंजलंतेदक्षिणान्वितम् ॥ विशेषार्घ्यंमयादत्तंसंकटान्मांनिवारय ४३ इतिषोडशोपचारैर्मंत्रेणानेन
पूजयेत् ॥ ॐनमोहेरंबमदमोदितममसंकटंनिवारयस्वाहा ॥ इंद्रादिलोकपालांश्चसमंतात्पूजयेत्सुधीः ४४ पक्वमुद्गतिलैर्युक्तान्मोदकान्घृतपाचितान् ॥ भ
क्ष्यान्यन्यानितांबूलंयथाशक्तिप्रकल्पयेत् ४५ ततोदूर्वांकुरान्गृह्यविंशत्येकंचभक्तितः ॥ एभिर्नामपदैर्देवमर्चयेत्सुसमाहितः ४६ गणाधिपनमस्तुभ्य
मुमापुत्राभयप्रद ॥ एकदंतेभवक्त्रेतितथामूषकवाहन ४७ विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक ॥ लंबोदरनमस्तुभ्यंवक्रतुंडाघनाशन ४८ विघ्नविध्वंसकर्त्रे
तिविश्ववंद्यामरेश्वर ॥ गजवक्त्रनमस्तुभ्यंनागयज्ञोपवीतिने ४९ भालचंद्रनमस्तुभ्यंनमःपरशुधारिणे ॥ विघ्नाधिपनमस्तुभ्यंसर्वविद्याप्रदायक ५० एवंसं
पूजयेद्देवंदूर्वाभिश्चपृथक्पृथक् ॥ यदुद्दिश्यकृतंसम्यग्यथाशक्तिप्रपूजनम् ५१ तेनतुष्टोभवाशुत्वंहृत्स्थान्कामान्प्रपूरय ॥ विघ्नान्नाशयमेसर्वान्दुष्टांश्चसमुप
स्थितान् ५२ त्वत्प्रसादेनसर्वाणिकार्याणीहकरोम्यम् ॥ शत्रूणांबुद्धिनाशंचमित्राणामुदयंकुरु ५३ ॥ इतिविज्ञाप्यदेवेशंप्रणिपत्यपुनःपुनः ॥ ततोहोमं
प्रकुर्वीतशतमष्टोत्तरंव्रती ५४ मोदकैर्वाणकंकायैर्व्रतसंपूर्णहेतवे ॥ लड्डुकैर्वटकाद्यैर्वात्रिसप्तफलसंयुतम् ५५ रक्तवस्त्रेणसंछाद्यस्वाचार्यायनिवेदयेत् ॥ गणा
धिपनमस्तुभ्यंसर्वसंकल्पसिद्धिद ५६ वायनस्यप्रदानेनसंकटान्मांनिवारय ॥ इतिवायनमंत्रः ॥ कथांश्रुत्वाततःपुण्यांदद्याद्दक्ष्यंसमाहितः ५७ तिथीनामुत्तमे
देविगणेशप्रियवल्लभे ॥ संकटंहरमेदेविगृहाणार्घ्यंनमोस्तुते ५८ ॥ इतितिथ्यर्घः ॥ लंबोदरनमस्तुभ्यंसततंमोदकप्रिय ॥ संकटंहरमेदेवगृहणार्घ्यंनमोस्तुते
५९ इतिदेवार्घः ॥ चंद्रायसप्तवारंतुमंत्रेणानेनपार्थिव ॥ क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भव ॥ गृहाणार्घ्यंमयादत्तंरोहिण्यासहितःशशिन् ६० चन्द्रार्घमंत्रः ॥ ततः
क्षमापयेद्देवंततोविप्रांश्चभोजयेत् ॥ स्वयंभुंजीततच्छेषंब्राह्मणेभ्योयदर्पितम् ६१ सप्तग्रासान्मौनयुक्तोयथाशक्त्यायथासुखम् ॥ इत्थंकुर्यात्तुमासेषुचतुर्ष्वपि
विधानतः ६२ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेएकोनसप्ततितमोध्यायः ॥ ६९ ॥ ॥ राजोवाच ॥ ॥ व्रतंपुराकृतंकेनभुविकेनप्रकाशितम् ॥ किंपुण्यं
किंफलंचास्यकरणाद्वदमेप्रभो १ ॥ ब्रह्मोवाच ॥ पुरास्कंदेगतेचैवपार्वत्यैवकृतंव्रतम् ॥ चतुर्ष्वपिचमासेषुशिववाक्येनपार्थिव २ पंचमेमासिदृष्टस्तुकार्त्तिके
योह्यपर्णया ॥ अगस्त्येनकृतंपूर्वंसमुद्रंपातुमिच्छता ३ त्रिषुमासेषुविघ्नेशप्रसादात्पीतवानमुम् ॥ षण्मासावधिराजेंद्रदमयंत्यापुराकृतम् ४ नलमन्वेषयंत्य

ततोदृष्टोनलस्तया ॥ प्रद्युम्नस्यसुतंराजंश्चित्रलेखानयत्पुरा ५ क्वगतःकेननीतोवाइतिशोचंतमाकुलम् ॥ प्रद्युम्नंपुत्रशोकार्त्तंरुक्मिणीप्रत्यभाषत ६ शृणुपुत्रप्रवक्ष्यामियद्व्रतंस्वस्यमंदिरे ॥ शंबरेणपुरानीतेबालकेत्वयिषट्दिने ७ त्वद्वियोगजदुःखेनहृदयंमेव्यदूयत ॥ कदाद्रक्ष्याम्यहंपुत्रमपूर्वमतिसुंदरम् ८ अन्यस्त्रीणांसुतंदृष्ट्वाममचेतसिजायते ॥ ममापिपुत्रोभवितासांवनेनप्रमाणतः ९ इतिचिंताकुलायामेगतान्यब्दानिभूरिशः ॥ ततोमेदैवयोगात्तुलोमशोमुनिरागतः १०तेनोपदिष्टंसकंष्टचतुर्थीव्रतमुत्तमम् ॥ सर्वचिंताहरंपुत्रचतुर्वारंकृतंमया ११ तत्प्रसादात्स्वमायातोहत्वाशंबरमाहवे ॥ त्वमप्येतत्कुरुव्रतंततोज्ञास्यसितं सुतम् १२ ॥ ब्रह्मोवाच ॥ प्रद्युम्नेनकृतंपूर्वंगणनाथसुतोषकं ॥ श्रुतोबाणासुरपुरेनिरुद्धोनारदात्पुरा १३ उद्धवस्याज्ञयाकृष्णःकृतवान्व्रतमुत्तमम् ॥ भीतईश्वरसंग्रामादेकवारंयथाविधि १४ गत्वासशोणितपुरंजित्वाबाणासुरंमृधे ॥ आनीतउषयासार्द्धमनिरुद्धःक्षणान्नृप १५ मयापिसृष्टिकामेनकृतमेतन्नृपोत्तम ॥ कृतानानाविधासृष्टिर्व्रतस्यास्यप्रभावतः १६अन्यैर्देवासुरनरैःकृतंविघ्नोपशांतये ॥ ऋषिभिर्दानवैर्यक्षैःकिन्नरोरगराक्षसैः १७आपद्यपिचकष्टायांकुर्यात्तच्छांतयेव्रतं ॥ नानेनसदृशंलोकेसर्वसिद्धिकरंव्रतं १८ तपोदानंजपस्तीर्थंमंत्रोविद्यानचक्वचित् ॥ इमांश्रुत्वाकथांराजन्स्वयंभुंजीतवाग्यतः १९ जानुमध्येकरंकृत्वागणेशंहृदि चिंतयेत् ॥ द्विजातीनांचयच्छेषंभोक्तव्यंसहबांधवैः २० कार्यंबह्वल्पमासैस्तुसिद्ध्यतेनात्रसंशयः ॥ बहुनात्रकिमुक्तेननान्यत्स्याच्छ्रेष्ठसिद्धिदं २१ नोपदेश्यम भक्तायनास्तिकायशठायच ॥ देयंपुत्रायशिष्यायभक्तियुक्तायसाधवे २२ ममप्रियोसिराजेंद्रधर्मिष्ठःक्षत्रियर्षभः॥ कार्यकर्त्तासिलोकानांउपदिष्टमथोव्रतं २३ तस्मात्सर्वव्रतेष्वेतत्कर्त्तव्यंप्रथमंत्वया ॥ सिद्धियास्यंतिकार्याणिनान्यथाभाषितंमया २४ यदायदापश्यतिकार्यमुद्यतंनारीनरोवाविदधातुसद्व्रतं ॥ सिद्ध्यंतिकार्याणिमनीषितानिकिंदुर्लभंविघ्नहरेप्रसन्ने २५ ॥ सूतउवाच ॥ इत्थंसश्रुत्वाविधिवन्नृपोत्तमोव्रतंचकाराखिलदुःखशांतये ॥ व्रतप्रभावाज्जितवान्सवैरिणोबुभोज राज्यंससुतैरकंटकम् २६ ॥ इतिश्रीग०उ०चतुर्थीव्रतोपाख्यानेकृतवीर्य०नामसप्ततितमोध्यायः ॥ ७० ॥ ॥ उद्यापनंकथंकार्यंव्रतस्यास्यमहामते ॥ तन्मेविस्तरतोब्रूहिलोकानांहितकाम्यया १ ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रथमेमासिकर्त्तव्यंपंचमेसप्तमेथवा ॥ उद्यापनंमनुष्येंद्रव्रतसंपूर्णहेतवे २ पूर्वोक्तेनविधानेनपूजयेद्भक्तिमान्नरः ॥ पुष्पमंडपिकांकृत्वानानावस्त्रविचित्रितां ३ कृत्वातुसर्वतोभद्रंनानारंगविचित्रितं ॥ पूजयेत्तत्रदेवेशंकलशोपरिपूर्ववत् ४ चंदनेनसुगंधेनपुष्पैर्नानाविधैरपि ॥ नारीकेलफलैर्नैवद्यादर्घ्यंसमाहितः ५ तिथीनामुत्तमेदेविगणेशप्रियवल्लभे ॥ संकटंहरमेदेविगृहाणार्घ्यंनमोस्तुते ६ लंबोदरनमस्तुभ्यंसततंमोदकप्रिय ॥ संकष्टंहरमेदेवगृहाणार्घ्यंनमोस्तुते ७ क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भव ॥ गृहाणार्घ्यंमयादत्तंरोहिण्यासहितःशशिन् ८ भोज्यंभक्ष्यंचलेह्यंचपेयंचोष्यंनिवेदयेत् ॥ फलैरन्यैश्चबहुभिस्तोषयेद्गणनायकं ९ आचार्यंवरयेत्तत्रऋत्विजश्चैकविंशतिं ॥ गणानांत्वेतिमंत्रेणजुहु

१ शम्बरेण विनाशितः इतिपाठान्तरम् ।

तंहोममाचरेत् १० अथवामूलमंत्रेणसहस्रंवातदर्धकं ॥ अष्टोत्तरशतंचापिबलिदानंततश्चरेत् ११ पूर्णाहुतिंहुनेत्पश्चाद्वसोर्धारांचपातयेत् ॥ होमशे षंसमाप्यैवंब्राह्मणान्भोजयेत्ततः १२ वस्त्रयुग्मंचकलशान्दक्षिणासनसंयुतान् ॥ तेभ्योदद्याद्यथाशक्तिवित्तशाठ्यंनकारयेत् १३ आचार्यंपूजयेत्पश्चाद् वस्त्रालंकरणादिभिः ॥ तस्मैभुक्तवतेदद्याद्घृतनंफलसंयुतम् १४ शूर्पेपायससंपूर्णंरक्तवस्त्रेणवेष्टितम् ॥ सौवर्णंतंगणाधीशंतस्मैदद्यात्सदक्षिणम् १५ ति लानामाढकंदद्याद्व्रतसंपूर्णहेतवे ॥ ततोगांकपिलांदद्यात्सवत्सांमविभूषणाम् १६ ततःक्षमापयेद्विप्रान्विघ्नेशःप्रीयतामिति ॥ व्रतस्योद्यापनंकृत्वाहय मेधफलंलभेत् १७ ॥ पितोवाच ॥ एवंमेब्रह्मणादिष्टंव्रतंलोकोपकारतः ॥ तदेतत्कथितंतेद्यकुरुपुत्रार्थमादरात् १८ ॥ ॥ इंद्रउवाच ॥ ॥ यथाययाम मादिष्टंपित्रातेनमहाव्रतम् ॥ तथातथाकृतंतेनकार्तवीर्येणधीमता १९ व्याख्यायकथितंसम्यक्पंडितैर्व्रतमुत्तमम् ॥ सिद्धिबुद्धियुतांमूर्तिंस्थाप्यकांचननिर्मि ताम् २० महामंडपिकामध्येब्राह्मणैःपठ्यतेक्वचित् ॥ क्वचिद्पुराणंपांडित्यंक्वचिद्गायननर्तने २१ नानाविधानांवाद्यानांध्वनयोनिर्गतादिवम् ॥ विवदंतेजनाः क्वापिमध्यस्थाःकेचनाभवन् २२ सतुराजामहाधीमान्जजापपरमंमनुम् ॥ जग्वाहुत्वापूजयित्वाभोजयित्वाद्विजान्बहून् ॥ २३ ॥ ॥ गाददावयुतंते भ्योलंकृतेभ्योह्यलंकृताः ॥ दीनांधकृपणेभ्योन्नंदृदौदानान्यनेकशः २४ संतुष्टानांससर्वेषांपुत्राशीर्जगृहेनृपः ॥ तेषांद्विजानांतपतांसर्वदासत्यवादिनाम् ॥ २५ आशीर्भिःस्वल्पकालेनससत्वाभून्नृपांगना ॥ सुषुवेशुभवेलायांपुत्रंलक्षणसंयुतम् २६ ददौदानान्यनेकानिपुत्रजन्मप्रहर्षितः ॥ व्रतबंधंविवाहंचकालेत स्याकरोन्नृपः २७ ज्ञानविज्ञानसंपन्नंपुत्रंराज्येभिषिच्यच ॥ सत्पुत्रोभोगसंपन्नोजगामांतेपदंविभोः २८ ॥ ऋत्विग्भ्यःपंडितैःसार्धंप्रेक्षकैःसकलैरपि ॥ त स्यपुण्येनतेसर्वेगाणेशंधामचागमन् ॥ २९ ॥ इति०गणे०उपासनाखंण्डेएकसप्ततितमोऽध्यायः ॥ ७१ ॥ शूरसेनउवाच ॥ व्रतेजातेकथमभूत्तयोःपुत्रःशतक्र तो ॥ तत्सर्वंमेवदविभोविस्तरात्परिपृच्छतः १ इंद्रउवाच ॥ किंकिंनजायतेराजन्परितुष्टेगजानने ॥ प्रसादात्तस्यसाराज्ञीगर्भंदध्रेनृपस्ययत् २ प्रसूतानवमे मासिमंगलंपुत्रमैक्षत ॥ द्विस्कंधंचारुवदनंबाहुहस्तविवर्जितम् ३ सुनासंपद्मनयनंऊरुजानुविवर्जितम् ॥ जंघापादविहीनंतंदृष्ट्वामातारुरोदह ४ सोवाच ॥ दुर्भगायाःकथमभूदीदृशोबालकोमम ॥ करपादविहीनोयंकथंदत्तोगजानन ५ आसंशुभाहंवंध्यैवकिमीदृक्पुत्रवत्यहं ॥ कथंनजातोनाशोमेपूर्वजन्मकृतैनसः ६ कथंप्रसादःफलितस्तवापिद्विरदानन ॥ कथंब्राह्मणवाक्यानिनिष्फलानीदृशानिमे ७ पाणिभ्यांनिघ्नतीवक्षोललाटंचमुहुर्मुहुः ॥ तस्यांरुदत्यांसर्वास्ता रुरुदुस्तत्रयास्थिताः ८ तासांकोलाहलंश्रुत्वानृपोपितत्रचागमत् ॥ तस्यापिरुदितंश्रुत्वाप्रधानाअपिचागमन् ९ तेषांचरुदितंश्रुत्वानागरारुरुदुस्तदा १० राजोवाच ॥ ॥ कथंदीनानुकंपित्वंतवदेवगजानन ॥ कथंदयाकृतातेद्यमय्यमेवंप्रदर्शिता ११ कथंस्मरणमात्रेणपापानिहरसेनव ॥ जपस्तपः स्मृतिर्दानंपूजनंद्विजतर्पणं १२ अनुष्ठानंतथाहोमःसर्वंव्यर्थंगतंमम ॥ तस्माद्दैवंहिबलवत्प्रयत्नस्तुनिरर्थकः १३ नज्ञायतेकर्मगतिःकदाकिंवाभविष्यति ॥ मू

षकःप्राप्यतेयद्वत्पर्वतस्यविदारणात् १४ तथामेजानिपुत्रोयमाजन्मकृतयत्नतः ॥ ततऊचुःप्रकृतयोनृपंशोकाकुलंतदा ॥ १५ ॥ ॥ प्रधानाऊचुः ॥ ॥ अलंशोकेनभूपालकथंभाव्यन्यथाभवेत् ॥ रामःकिंनमृगंवेदतत्पृष्ठंगतएवसः १६ धर्मराजोनकिंवेदनिषिद्धंद्यूतकर्मतत् ॥ तथापिसगतोरंतुंसर्वंहित्वावनं गतः १७ चारुतानभवेदस्यभ्रशमाक्रंदितेसति ॥ अदृष्टंचेद्भवेत्सम्यगग्रेचारुरयंभवेत् १८ पुष्पंफलंवाकालेनयथायातिमहीरुहां ॥ तथाकालेनभवितासम्यक् चपृथिवीपतिः १९ ॥ ॥ इंद्रउवाच ॥ ॥ इत्यमात्यवचःश्रुत्वासावधानोभवन्नृपः ॥ उवाचनृपपत्नीतामुत्तिष्ठोत्तिष्ठमाशुचः २० स्वयंचसुमनाराजा समाहूयद्विजोत्तमान् ॥ गणेशपूजनंचक्रेस्वस्तिवाचनमेवच २१ कृत्वाभ्युदयिकंश्राद्धंददौदानान्यनेकशः ॥ माल्यालंकारवासांसिगावोरत्नान्यनेकशः २२ सुहृत्संबंधिभृत्येभ्योवस्त्राणिविविधानिसः ॥ नानावादित्रजीवेभ्योददौराजायथार्हतः २३ बंदिचारणदीनांधकृपणेभ्यश्चसर्वशः ॥ गृहेगृहेचतांबूलशर्करा दापयच्चसः २४ कार्तवीर्योतिनामास्यचकारैकादशेहनि ॥ भोजयामासनगरंमहोत्साहपुरःसरम् २५ ततोद्वादशवर्षाणिव्यतीतानिसुतस्यह ॥ आययौस्वेच्छ यातस्यदत्तात्रेयस्तदागृहम् २६ पादयोःस्वशिरःस्थाप्यकृतवीर्योननामतम् ॥ आलिलिंगमुनिस्तंसउत्थायनृपसत्तमम् २७ उपविश्यासनेरम्येपूजयामासमा दरम् ॥ विष्टरंपाद्यमर्घ्यंचगांचवस्त्रोपवीतकम् २८ ददौधूपंचदीपंचनैवेद्यंविविधंफलम् ॥ उद्वर्तनंचतांबूलंरत्नकांचनदक्षिणाम् २९ सुप्रसन्नंसुखासीनंपा दसंवाहनादिभिः ॥ उवाचराजासम्यक्तंदत्तात्रेयंमहामुनिम् ३० जन्मजन्मांतरंयंमेपुण्यंफलितमद्यवै ॥ यच्चर्मचक्षुषांजातंसाक्षात्तेदर्शनंमुने ३१ अद्येशुभ तरंभाविप्रसादात्तवसुव्रत ॥ यतोभवादृशांनैवदर्शनंपापकर्मणाम् ३२ कृतवीर्यवचःश्रुत्वादत्तात्रेयस्तमब्रवीत् ॥ अपूर्वंतनयंतेयद्द्रष्टुकामोहमागतः ३३ ततआनंदयुक्तोसौनृपःप्राहमुनिंपुनः ॥ नृपउवाच ॥ अनुष्ठानंतपोदानंवृथाममगतंव्रतम् ३४ जगदीशेनदत्तोयंपुत्रोहृच्छल्यएवसः ॥ अनेनादर्शनीयेनगतश्चादर्शनीयताम् ३५ ॥ इंद्रउवाच ॥ आनीयबालकंतस्मैमुनयेदर्शयन्नृपः ॥ आच्छादयन्नेत्रकंजेतत्सुतंवीक्ष्यसन्मुनिः ३६ ज्ञात्वाध्यानेनतत्कर्ममुनिस्तं पुनरब्रवीत् ॥ अयमेवसुतोराजन्कर्त्तासर्वान्विजित्यह ३७ नाचातोसिविजृंभ्यत्वंसंकष्टीव्रतजागरे ॥ निंदितोव्रतराजस्तुसर्वसंकष्टनाशनः ३८ अंगहीनःसुतोजातउपायात्सांगतामियात् ॥ ॥ राजोवाच ॥ ऋतमुक्तंत्वयास्वामिन्कृपांकृत्वाददस्वमे ३९ येनोपायेनसांगोमेत्वत्प्रसादात्सुतोभवेत् ॥ ॥ इंद्रउ वाच ॥ मुनिःसकृपयाविष्टस्तत्सुतायतदाब्रवीत् ४० मंत्रमेकाक्षरंसांगंततऊचेपुनश्चतम् ॥ आराधनंगणेशस्यमंत्रेणानेनभक्तितः ४१ उपवासैकभक्तानांनि यमान्कुरुसुव्रत ॥ द्वादशाब्दंततस्तुभ्यंदर्शनंसचदास्यति ४२ तद्दृष्टिपातमात्रेणदिव्यदेहोभविष्यसि ॥ इत्युक्त्वानृपमामंत्र्यपिदधेमुनिपुंगवः ४३ गतेमुनौ ततःपुत्रःपादहीनोमहामनाः ॥ जगादकृतवीर्यंसगहनंप्रापयस्वमाम् ४४ गजाननप्रसादार्थमनुष्ठानंकरोम्यहं ॥ रुदित्वापितरौतस्यश्रुत्वावाणींतदीरिताम् ४५ अप्रेषयद्वनचारुनरयानेनतंपिता ॥ भृत्याःपर्णकुटीमध्येसंस्थाप्यनगरंययुः ४६ तस्थौतत्रस्वयंसम्यक्कृतपसेकृतनिश्चयः ४७ ॥ इतिश्रीगणेशपुराणेउपास

नाखंण्डेद्विसप्ततितमोऽध्यायः ७२ ॥ इंद्रउवाच ॥ गुरूपदिष्टंमंत्रंजजापनियमेनसः ॥ ध्यायन्गजाननंदेवंनिष्ठामास्थायनैष्ठिकीम् १ वायुभक्षोनिराहारोलो
ष्ठपाषाणसन्निभः ॥ एवंद्वादशवर्षाणिव्यतीतानितपस्यतः २ हस्तपादविहीनस्यबालकस्यमहात्मनः ॥ निर्वाणंतस्यतद्दृष्ट्वाद्वादशाब्दंगजाननः ३ तडागम
ध्यादुत्तस्थौप्रवालमयमूर्त्तिगः ॥ उवाचसंमुखोभूत्वानिष्ठाभक्तिसुतोषितः ४ ॥ गणेशउवाच ॥ निर्जनेस्मिन्वनेयस्मात्सिंहव्याघ्रनिषेविते ॥ निकुंजबहुलेति
ष्ठत्वतोद्वादशवार्षिकम् ५ अतस्तेहंवरंदास्येशृणुयत्तेमनोगतम् ॥ श्रुत्वावाणींतदुदितामास्थितोदेहभावनाम् ६ कृतवीर्यसुतोनत्वाप्रोवाचद्विरदाननम् ॥ शृण्व
त्सुमर्वमुनिषुविमानस्थेषुभूरिशः ७ ॥ पुत्रउवाच ॥ त्वत्पादयुगलेदेवभक्तिरव्यभिचारिणी ॥ अस्तुमेसततंनान्यदुत्साहोमेप्रयाचितुम् ८ तथापियाचेदेवेश
पित्रोःसंतोषहेतवे ॥ शरीरेचारुतांदेहिसर्वसंतोषकारिणीं ९ ॥ इंद्रउवाच ॥ ॥ श्रुत्वावाक्यंतदीयंतुमायावीसगजाननः ॥ अणिमानंसमास्थायाविवेशोदर
मादराद् १० तस्मिन्प्रविष्टेपुत्रोसौदिव्यदेहोभवन्नृप ॥ सहस्रभुजवान्जातःकृतवीर्यात्मजस्तदा ११ ऋजुपादद्वययुतःस्थितःपर्वतसन्निभः ॥ ववर्षुःपुष्प
वर्षाणिदेवादेवर्षयोपिच १२ तुष्टुवुस्तंचदेवंचगीतवादित्रनिस्वनैः ॥ जगर्जकार्तवीर्योसौसहस्रभुजमंडितः १३ तस्यशब्दंसमाकर्ण्यवनगर्जितसन्नि
भं ॥ समवर्तीभ्दशंत्रस्तःपरेषांगणनाकुतः १४ पृथिव्यांसर्वराजानःसमकंपंततद्भयात् ॥ अयंपंचशतंबाणान्संग्रामेमोचयेदिति १५ ब्रह्मादयस्ततोयानादु
त्तीर्याथतमब्रुवन् ॥ स्मरणात्तवदेवानांप्राप्तिःस्याद्भतवस्तुनः १६ त्वदिदंस्थंसर्वलोकानामामयंत्वंविनेष्यसि ॥ यतःसाक्षाद्विष्णुरूपःसहस्रार्जुनसंज्ञया १७ त्रि
षुलोकेषुविख्यातोयावत्कल्पंभविष्यसि ॥ साधुत्राणेचनिरतःशरणागतपालकः १८ विजेतासर्वशत्रूणांपृथिवीमंडलाधिपः ॥ इतिनानावरान्दत्वापिदधुर्दे
वतागणाः १९ हस्त्यश्वनरयानानिछत्रचामरदीपिकाः ॥ रथानुपायनान्यन्यान्याजह्रुरखिलानृपाः २० ततःसंस्थापयामासमहाप्रासादमध्यगां ॥ प्रावा
लींगणनाथस्यमूर्त्तिंद्विजपुरःसरः २१ प्रवालगणपश्चेतिस्यनामदधुर्द्विजाः ॥ ददौग्रामान्ब्राह्मणेभ्यःपूजायैस्थापिताश्चये २२ प्रवालक्षेत्रमितितत्पप्रथेभुवि
सिद्धिदं ॥ तत्रशेषोधरांधर्त्तुमनुष्ठानपरोभवत् २३ प्रापतस्माद्गणेशात्तुवरान्बहुतरानपि ॥ धराधरणसामर्थ्यंसर्वज्ञत्वंतथैवच २४ मूर्ध्नांसहस्रंश्रेष्ठयंचनव
नागकुलेष्वपि ॥ अतिसंतुष्टमनसातेनयत्स्थापितंपुरा २५ धरणीधरइत्येवंद्वितीयंनामपप्रथे ॥ स्मरतांशृण्वतांचापिसर्वकामफलप्रदं २६ संपूज्यसर्वान्द्वि
जपुंगवांस्तान्नराज्ञश्चसर्वाननुपृच्छ्यचैतान् ॥ सहस्रबाहुर्नगरंस्वकीयंद्रष्टुंस्वमातापितरावथागात् २७ जहर्षतुस्तौतंदृष्ट्वानगरंचतथाविधं ॥ ददतुर्द्विजमु
ख्येभ्योनानादानानिसर्वशः २८ इंद्रउवाच ॥ ॥ अभ्यधायितुसंकष्टचतुर्थीमहिमाद्भुतः ॥ कृतवीर्यसुताद्यायंमृत्युलोकंगतःशुभः २९ अनुभूतःसुरगणैश्चं
द्रसेनादिभिर्नृपैः ॥ अतिपुण्यतमश्चायंस्मरणादपिसिद्धिदः ३० एतत्प्रसादात्संप्राप्तारावणेनाखिलज्ञता ॥ एतत्प्रसादात्संप्राप्तंपुराराज्यंचपांडवैः ३१ एतद्व
तस्ययत्पुण्यंहस्तेमेदीयतेयदि ॥ तदैवतद्विमानंतुप्रचलेदमरावतीं ३२ कउवाच ॥ इतिशक्रमुखात्तस्यव्रतस्यमहिमाश्रुतः ॥ शूरसेनेनभूपेनस्वानंदाब्धौनि

मज्जता ३३ वंदितेपादकमलेशक्रस्यप्रतिगर्जिता ॥ तमुवाचततःप्रीतःशूरसेनोनृपोत्तमः ॥ श्रुत्वाकथांदिव्यरूपांचतुर्थीव्रतसंभवां ॥ ॥ सउवाच ॥ फालते पूर्वपुण्यंमेयेनाश्रावीदृशंव्रतं ३५ नह्येतस्मात्पुण्यतरंत्रिषुलोकेषुकिंचन ॥ इत्युक्त्वाशक्रमारेभेव्रतंकर्तुंस्वयंततः ३६ इतिश्रीग०उपा०चतुर्थीव्रतमाहात्म्यं नामत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥ व्यासउवाच ॥ ब्रह्मन्कथंकृतंतेनशूरसेनेनभूभुजा ॥ सेतिहासंशक्रमुखात्श्रुत्वासादरमुत्तमं १ ब्रह्मोवाच ॥ ततः स्वदूतान्प्राहेदंगच्छंतुनगरंप्रति ॥ सआनेयस्तुसंकष्टचतुर्थीव्रतकारकः २ तेदूतास्त्वरयायाताःपप्रच्छुस्तेगृहंगृहम् ॥ ददृशुर्भ्रममाणास्तेविमानंसुंदरंशुभ म् ३ याभवद्दुष्टचांडालीगलत्कुष्ठास्रवन्मुखा ॥ मक्षिकाकृमिभारेणदुर्गंधेनसमावृता ४ शुष्कोदरीदीर्घकेशाशुष्कदंताक्षिनासिका ॥ अत्यंतमलिनादीर्घश्रोत्रं ध्राघनस्वना ५ नेतुंतामीदृशींदूतैरानीतांगणपस्यहि ॥ अत्याश्चर्यामिदंमतिराजदूताःप्रणम्यताम् ६ ऊचुस्तेदेवदूतांस्तान्गणनाथस्यकिंकरान् ॥ अत्यंतंकु त्सिताजात्याहीनेयंस्वर्गगाकथम् ७ केयमासीत्पुरादूताःकथमीदृग्बभूवच ॥ केनपुण्येनयुष्माभिःस्वर्गंतुनीयतेकथम् ८ एतद्वदंतुसर्वंनोयादेवकुं क्षसंभवेत् ॥ ॥ देवदूताऊचुः ॥ ॥ आसीत्बंगालविषयेसारंगधरनामतः ९ क्षत्रियस्तस्यकन्येयंसुंदरानामसुंदरी ॥ पिककंठाशशिमुखीरतिलावण्यजित्व रा १० यद्दास्यकरणेनार्हाःप्रसिद्धाअष्टनायिकाः ॥ योगिनामपियाचेतःकटाक्षैर्विमोहयेत् ११ युवानोमुमुचुःशुक्रंकेचित्तद्रूपवीक्षणात् ॥ जारमार्गेषु निरतासाभवद्विश्वमोहिनी १२ महार्हवस्त्रालंकारानानाविषयभोगिनी ॥ बंगालनगरेख्यातोवश्यवासीद्गतत्रपा १३ भर्त्तारंचित्रनामानंवंचयत्येवसर्वदा ॥ व्ययादसंख्यद्रव्यस्यपित्रासंपादितंपुरा १४ कदाचिच्छयनेतंसाहित्वासुंदरवेषभृत् ॥ निशीथेचलितातेनहस्तेधारिरुषावशात् १५ उवाचभर्त्सयंस्तां चचित्रनामापतिस्तदा ॥ धिक्त्वांपापसमाचारेयाजारेनिरतांनिशम् १६ तद्वाक्यमित्थमाकर्ण्यशांतकोपाभवत्तदा ॥ अभक्ष्यभक्षणेनासौमत्ताबल वतीभृशम् १७ अंधेतमसिसंगृह्यशास्त्रिकांदक्षहस्ततः ॥ तयातदुदरंभित्वाचित्रनामपतेस्तदा १८ गतातंपुरुषंरंतुंयोजारोमनसिस्थितः ॥ यावत्सार मतेतत्रतावत्पर्यंतवासिना १९ जाग्रताचरितंतस्याज्ञात्वाराज्ञेनिवेदितम् ॥ तद्दूतास्तमासिस्थित्वातावत्मागृहमागता २० दधुस्तांराजदूतास्तेनिन्यूरा जसमीपतः ॥ निजघ्नुस्तांबहिर्नीत्वादूताराजाज्ञयातदा २१ सानीतानरकेघोरेयमदूतैस्तदाज्ञया ॥ अधोमुखीस्थितातत्रसंदष्टाकृमिभिर्भृशम् २२ अत्यंतंबु भुजेदुःखंस्मरंतीपूर्वचेष्टितम् ॥ कल्पांतेमृत्युलोकेभूच्चांडालीदुर्भगाभृशम् २३ एकदामादिरांपीत्वामत्तासुप्तादिवैवसा ॥ निशायांप्रथमेयामेप्रबुद्धाक्षुधिताभृ शम् २४ तदैवभिक्षितुंयातागृहंसाव्रतकारिणः ॥ तेनान्नमस्यैदत्तंयत्तयाभुक्तंविधूदये २५ गणेशेतिचजल्पंत्यास्वेच्छयादैवयोगतः ॥ तदैवगणनाथेनविमानं प्रेषितंशुभम् २६ ॥ ब्रह्मोवाच ॥ ॥ देवदूतवचःश्रुत्वापुनरूचुर्नमस्यते ॥ राजदूताऊचुः ॥ इदमत्यद्भुतंदृष्टमस्माभिःकार्यकारिभिः २७ राज्ञायदुपदिष्टं

१ प्रत्यपद्यतभूतले इ० पा० ।

नोवाक्यमेतन्निबोधत ॥ शक्रोगृत्समदंद्रष्टुंविमानवरमास्थितः २८ भृशुंडिमाययौदेवैर्दृष्ट्वानत्वाप्रपूज्यतम् ॥ तदनुज्ञांचपूजांचगृहीत्वास्वांपुरींययौ २९
गच्छतस्तस्ययानंतच्छूरसेनपुरेपतत् ॥ कुष्ठिनोवैश्यपुत्रस्यदृष्टिपातेनतत्क्षणात् ३० शूरसेनोगतस्तत्रनमस्कृत्यप्रपूज्यतम् ॥ विमानपतनेपृच्छदुपायंगम
नेपिच ३१ इंद्रेणोक्तंतुसंकष्टचतुर्थीव्रतसंभवात् ॥ पुण्यात्प्रस्थास्यतेयानंतदर्थंयत्नमाचर ३२ वयंतदाज्ञयादूतास्तंगवेषितुमागताः ॥ अनयाचेद्धृतमिदंदे
वदूताःकृतंयदि ३३ तर्हीयंनीयतांशूरसेनंभूमिपतिंप्रति ॥ श्रेयोदास्यतिचांडालीसंकष्टीव्रतसंभवम् ३४ पुनर्द्विगुणपुण्येयंविमानंप्रतियास्यति ॥ विमानम
पिशक्रस्यस्वपुरीमागमिष्यति ३५ युष्माकमस्याअस्माकंकार्यंराज्ञःशचीपतेः ॥ एवंकृतेतुभविता क्रियतांयदिरोचते ३६ इतितद्वचनंश्रुत्वाभिदधुर्देवसेवकाः ॥
आज्ञानोनोगणेशस्यास्तीमांदातुंपरस्यहि ३७ इत्युक्त्वातांसमुत्थायविमानेनिदधुस्त्वरा ॥ तैर्दैवसादिव्यकांतिर्दिव्यवस्त्रांगभूषणा ३८ देवदूतैस्तुसानीतादि
व्यवादित्रनिस्वनैः ॥ गजाननसमीपेसाराजदूतायथागतम् ३९ ययुस्तेशूरसेनंतंवृत्तांतंसमनुब्रुवन् ॥ब्रुवत्सुतेषुतद्यानंचांडाल्यासहसंव्रजत् ४०ददृशुस्तेदीप्यमा
नंभासयत्प्रदिशोदिश ॥ तस्यादृष्टिर्निपतितातस्मिन्यानेशचीपतेः ४१ विमानवायुसंस्पर्शाद्विमानमूर्ध्वमाययौ ॥ पश्यत्सुसर्वलोकेषुविस्मितेषुसुरर्षिषु ४२
स्वंस्वंस्थानंययुःसर्वेशक्रेयातेमरावतीम् ॥ सापिवैनायकंधामसंप्राप्तादिव्यदेहभाक् ४३ पापंहित्वातुसंकष्टचतुर्थीव्रतपुण्यतः ॥ इदंयःशृणुयात्सम्यक्श्राव
येद्वाप्रयत्नतः ४४ प्राप्नुयात्सकलान्कामान्संकष्टनाशनंनरः ४५ इतिश्रीगणेशपुराणेउ॰चतुःसप्ततमोध्यायः ७४ ॥ ऋउवाच ॥ श्रुत्वादृष्ट्वाशूरसेनोमहिमा
नंव्रतोद्भवम् ॥ स्वयंकर्तुमनाःप्राहवसिष्ठंमुनिपुंगवम् १ राजोवाच ॥ मुहूर्त्तंवदसंकष्टचतुर्थीव्रतहेतवे ॥ व्रतंकर्तुमिहेच्छामिसद्यःप्रत्ययकारकम् २ वासिष्ठउवाच ॥
माघेकृष्णेभौमवारेकुरुष्वव्रतमुत्तमम् ॥ सर्वसिद्धिकरंसर्वकामदंराजसत्तम ३ ब्रह्मोवाच ॥ राजासंभृतसंभारःसपत्नीकोतिभक्तिमान् ॥ अचिरेणैवसंप्राप्तेवसिष्ठे
क्तदिनेशुभे ४ प्रारीप्समानःसंकष्टचतुर्थीव्रतमुत्तमम् ॥ प्रातःस्नानंविधायाथनित्यकर्मसमाप्यच ५ गणेशंपूजयित्वैवस्वस्तिवाच्यद्विजर्षभान् ॥ पूजयित्वाव
सिष्ठंततोनुज्ञांसमाप्यच ६ गणेशमनआधायतन्नामजपतत्परः ॥ एकांगुष्ठस्थितस्तावद्यावदस्तमियाद्रविः ७ पुनःस्नानंचकाराशुसायंसंध्यामुपास्यच ॥
प्रारभत्पूजनंसम्यग्वसिष्ठेनसमन्वितः ८ महामंडपिकांकृत्वाकदलीस्तंभमंडिताम् ॥ नानालंकारवस्त्राढ्यांछत्रचामरशोभिताम् ९ आदर्शपंक्तिरुचिरां
पुष्पमालाविभूषिताम् ॥ नानामणिप्रभायुक्तांदीपमालाविराजिताम् १० तन्मध्येस्वर्णकलशंस्थापयित्वागजाननीम् ॥ सौवर्णींप्रतिमांचारुसर्वावयवसुंद
राम् ११ नानालंकाररुचिरांनानारत्नविभूषिताम् ॥ पठत्सुद्विजमुख्येषुगायत्सुगायकेषुच १२ नदत्सुसर्वतूर्येषुनृत्यत्सुनर्तकेषुच ॥ वैदिकैश्चैवपौराणै
स्तांमूर्तिंसमपूजयत् १३ उपचारैःषोडशभिःपंचामृतपुरःसरम् ॥ मोदकापूपलड्डूकपायसान्नंससर्करम् १४ नानाव्यंजनशोभाढ्यंपंचामृतसमन्वितम् ॥ नै

१ सशुंडमाययौदेवैःइ॰ पा॰ ।

वेद्यंपुरतःस्थाप्यजलंचचारुगंधयुक् १५ समर्पयामासनृपोगजाननमुतुष्टये ॥ फलानिपूगतांबूलंदक्षिणांरत्नकांचनीम् १६ दूर्वानीराजनंमंत्रपुष्पांजलीननै
कधा ॥ तिथयेगणनाथायचंद्रयार्घ्यंददावथ १७ ब्राह्मणान्पूजयामाससादरंचाप्यबूभुजत् ॥ अथुतंगाददौतेभ्योवस्त्रालंकारदक्षिणाः १८ततःसुहृद्भंधुयुतःस्व
यंचबुभुजेनृपः ॥ रात्रौजागरणंचक्रेगीतवाद्यकथादिभिः १९ प्रभातेविमलेस्नात्वापुनःसंपूज्यपूर्ववत् ॥ मूर्तितांगणनाथस्यवसिष्ठायसदक्षिणाम् २०
सोपस्करांददौराजाततस्तुष्टोगजाननः ॥ विमानंप्रेषयामाससर्वसंपद्विराजितम् २१ तद्दूतैःस्थापितस्तत्रगजाननस्वरूपवान् ॥ पश्यतांसर्वलोकानांमनआ
नंदयन्मुहुः २२ चलितोदेवलोकायराजापुण्यप्रभावतः ॥ तमूचुर्देवदूतास्तेगजाननस्वरूपिणः २३ नानालंकारशोभाढ्यामुकुटाक्रांतमस्तकाः ॥ विनायके
नतुष्टेनविमानंप्रेषितंतव २४ त्वद्दर्शनौत्सुक्यवतातोवयमुपागताः ॥ इतितद्वचनंश्रुत्वामुमोचाश्रूणिभूमिपः २५ जगादगद्गदगिरारोमांचांचितविग्रहः ॥
तानुवाचततोराजाशूरसेनःस्मयान्नव २६ अव्यक्तस्याप्रमेयस्यनित्यस्यजगदीशितुः ॥ वाङ्मनोगोचरस्यापिनहेतुर्ममदर्शने २७ नसमर्थाश्रयंवेदाःशास्त्रा
णिचनिरूपितुम् ॥ यंचस्मरंतिसततंकेशाद्यादेवतागणाः २८ तेनाहंचेत्स्मृतोदूतास्तर्हिभाग्यंमहन्मम ॥ इत्याकर्ण्यतुतद्वाक्यंदूताऊचुःपुनर्नृपम् २९ न
जानीमोवयंराजन्भक्तानांमहिमाकथम् ॥ निर्गुणंयन्निराकारंयेनसाकारतांमियात् ३० ॥ राजोवाच ॥ एकामेमहतीवांछातुष्टदेवेनवत्सव ॥ तुष्टेषुनगरीहि
त्वाकथंयायांगजाननम् ३१ नभक्षितंविनाप्येतैर्भयाहालाहलंक्वचित् ॥ सकथंपरमानंदंभोक्ष्यएतैर्विनाघवाः ३२ पुनरूचुश्चतेदूतास्त्वदिच्छापरिपूर्यताम् ॥
नचेद्गजाननःक्रोधात्ताडयिष्यतिनोखिलान् ३३ ॥ ब्रह्मोवाच ॥ ततःसर्वजनंनेतुंविमानेनिदधुःक्षणात् ॥ चतुराकरजात्रह्मन्निक्षिप्ताःसर्वजंतवः ३४ सर्वेदि
व्यांबरादिव्यवस्त्रालंकारशोभिनः ॥ ऊचुःपरस्परंसर्वेकिमेतदद्भुतंमहत् ३५ अस्माभिर्नकृतंपुण्यंविमानंकथमीदृशम् ॥ अपरेचाब्रुवंस्तत्रराजपुण्यबलादिद
म् ३६ यथानिधिबलाद्धातुमात्रस्यहाटकंभवेत् ॥ अतिपापोयथासाधुवचसासिद्धिमाप्नुयात् ३७ तथैवराजपुण्येनवयंसर्वेसमुद्धृताः ॥ ततोवैनायकादू
तागतिमूर्ध्वामकल्पयत् ३८ जडीभूतंविमानंतन्नोदतिष्ठन्महीतलात् ॥ ततःसंशयितंसर्वेकथमेतद्दिवंव्रजेत् ३९ ऊचुःपरस्परंलोकानिर्दैवस्यनिधिःकुतः ॥
आरुरुक्षेत्कथंभिक्षापात्रंशिक्ष्यंमहत्तरम् ४० ददृशुःसर्वतःकेचित्कुष्ठीदाष्टिपथंगतः ॥ उवाचकश्चिद्राजानंकुष्ठिनंत्वमिमंत्यज ४१ अस्मिन्नधोगतेयानमूर्ध्व
मेतद्भविष्यति ॥ शूरसेनउवाचैतान्दूतांस्तंत्यक्तुमिच्छतः ४२ अहंपापसमाचारस्त्याज्योनेयाइमेखिलाः ॥ अथवाकथ्यतामस्यपूर्वपापंचजन्मच ४३ मत्से
हात्सर्ववेत्तृत्वादुपायंकृपयापिच ॥ दूताऊचुः ॥ नकार्यानृपतेर्चिंतावादिष्यामोवयंतव ४४ जन्मपापमुपायंचकुष्ठिनोदुष्टकर्मच ४५ ॥ इतिश्रीगणे०उपासना
खण्डेपंचसप्ततितमोध्यायः ७५ ॥ ॥ दूताऊचुः ॥ गौडेतुविषयेगौडनगरेभूत्पुराद्विजः ॥ तपस्वीज्ञानवान्प्राज्ञोदेवब्राह्मणपूजकः ॥ तस्यपुत्रोयमजनिजनन्यांचा

---

१ शुद्धिमाप्नुयात् इ० पाठांन्तरम् ।

स्यशाकिनी १ तस्यपत्नीतुसाविन्त्रीसावित्रीवपतिव्रता ॥ एकपुत्रस्नेहवशादलंकारैरलंकृतः २ अत्यंतसुंदरतरोरतिमर्त्यैर्वशोभते ॥ तन्मातापितरौतस्यावियोगंनेच्छतःक्षणम् ३ सतुयौवनमापन्नोनिजभार्यांविहायतां ॥ परदारस्तोनित्यंपरनिंदापरायणः ४ अभवत्पापनिष्ठश्चपितृवाक्यावमर्दनः ॥ एकदानगरेतस्मिन्वेश्यानरविमोहिनी ५ आगतातद्व्रतमनायच्चक्रेसौशृणुष्वतत् ॥ स्वालंकारान्पेटिकायांनिष्कास्यास्थापयत्बलात् ६ मातापित्रोःसमक्षंचपश्चाच्चौर्यंपुनश्चता न् ॥ वेश्यायैप्रतिपाद्यैतांश्चिक्रीडसुभृशंतया ७ हित्वेंद्रियार्थान्समकलानसुगंधद्रव्यसंयुतः ॥ तदेकनिष्ठःसंजातोयोगीब्रह्मपरोयथा ८ कामाग्निविह्वलश्चा सीत्क्षीबोमद्यबलाद्यथा ॥ पितातुखेदसंपन्नःक्षुत्तृड्भ्यांपरिवर्जितः ९ विलोकयामाससुतंनगरेप्रतिमंदिरम् ॥ अलब्धदर्शनस्तस्यश्वासोच्छ्वासपराय णः १० निशीथेस्वप्रियांप्राहबुधःपुत्रोगतःक्वनु ॥ विनातेनवृथागेहंविनादीपंयथानिशी ११ विनाजलंवृथावापीविनापत्यंयथाबला ॥ कदानुदर्शनंतस्यभ वितात्राणरक्षकम् १२ शाकिन्युवाच ॥ ॥ क्षुधातृषापरिश्रांतार्चिंताशोकसमन्विता ॥ तिष्ठामिनाथनोजानेक्वगतःप्रियबालकः १३ यदिमेदर्शनंतस्यस्या ज्जीवामिनचान्यथा ॥ पुनश्चचालदूर्वःसयष्टिमादायमुष्टिना १४ यंयंपश्यतिमार्गेस्मिंस्तंतंपृच्छतिचात्मजम् ॥ यदाश्रांतःक्षुधाक्रांतस्तदाभ्रांतश्चसोभवत् १५ अतिवृद्धोमहाभीमोनाम्नाभीमोत्यवर्णजः ॥ सतेनपृष्टस्तनयंतेनाप्युक्तंपरंस्फुटम् १६ ॥ भीमउवाच ॥ वेश्यागृहेतेतनयोबुधोसौबुधःसुखंक्रीडतिकामसक्तः ॥ क स्यात्मजोवाजननीपितावावृथैवखेदंकुरुषेद्विजेंद्र १७ दूर्वउवाच ॥ कथंममसुतोजातोवेश्यायांनिरतोबुधः ॥ तस्यागृहंजगामाशुदृष्ट्वांस्तत्रतंसुतम् १८ उन्मत्तंम दिरारक्तनयनंमदविह्वलं ॥ पितादधारतंहस्तेरुषाशिक्षापयत्सुतम् ॥ कथंममकुलेजातोविधावंकोयथाधमः १९ त्वत्तःकंटकवृक्षोयंपाषाणोवामतोधिकः ॥ कथंन त्यजसेप्राणान्किंस्यात्तेजीवितंखल २० ब्रह्मोवाच ॥ पितृवाक्यंसमाकर्ण्यरोषाविष्टोबुधःसुतः ॥ तलप्रहारंतुंडेस्यदत्तवान्पितुरेवसः २१ उक्तवान्कृमिकीटा दिसाधारणमुखेकथं ॥ कृतवानसिमेविघ्नंक्रीडाकालेनराधम २२ अकस्मात्काकत्यशकृत्पतितंमयिवाकथं ॥ पुनर्लत्ताप्रहारेणप्राणांस्तस्यगृहीतवान् २३ पित्राप्रा णेषुत्यक्तेषुहरेश्वरेतिसोवदत् ॥ ननंदससुतःपादेबध्वातंदूरतोक्षिपत् २४ मधुपीत्वापुनारेमेवेश्ययासयथेच्छकं ॥ प्रातर्जगामस्वगृहंददर्शजननीचतं २५ आलि लिंगसुतंहर्षाविस्नेहस्नुतपयोधरा ॥ बभाणकगतश्चासिकस्थितःकिंकृतंत्वया २७ वदमेविस्तराद्वत्सपितातेदुःखितोभृशं ॥ अहंचापिनिराहारानिर्जलानिशिजाग्र ती २७ प्रतीक्षमाणावत्सत्वांपितान्वेष्टुंगताश्चिरात् ॥ गच्छत्वंपितरंद्रष्टुंइत्युवाचपुनःपुनः २८ तयाज्ञप्तमितिक्रोधाच्छुष्ककाष्ठेनतांसुतः ॥ ताडयामाससिरसिप तितासाधरातले २९ निश्चेतनांपरिज्ञायबद्ध्वापादेक्षिपत्बहिः ॥ स्वयंवेश्यागृहंगत्वाचिक्रीडभृशहर्षितः ३० ददहुस्तेजनाःसंतोदंपतीस्वस्वकाष्ठतः ॥ नशास्ति राजादंड्यंतंब्राह्मणत्वाद्विजाधमम् ३१ पुनर्गृहागतंतंतुपत्नीवाक्यंशनैर्जगौ ॥ सावित्र्युवाच ॥ प्राणनाथवदाम्येकंतच्छृणुष्वमहामते ३२ अतिख्यातेतिविमले

१ विमला इतिपाठान्तरम् ।

वर्णेजन्मभवाद्दशाम् ॥ आचारश्चान्यथादुष्टस्त्यक्तव्यःसविवेकतः ३३ इहलोकेतुतत्कार्यंयेनसौख्यंपरेभवेत् ॥ पूर्ववयसितत्कार्यंयेनशंवार्धकेभवेत् ३४ अ
ष्टमासेषुतद्वत्कुर्याद्येनवर्षासुशंभवेत् ॥ दिवसेकर्मतत्कार्ययेनरात्रौसुखंभवेत् ३५ पितुःप्रियत्वाद्राजापिब्राह्मणत्वात्क्षमत्यसौ ॥ सर्वावयवसंपूर्णांसुंदराम
नुसारिणीम् ३६ त्यक्त्वामांधर्मपत्नीत्ववेश्यायांनिरतःकथम् ॥ लोकोनिंदतिसर्वत्रभयात्त्वांनवदत्यसौ ३७ समांजनःप्रतिब्रूतेपतिस्तेकीदृशःशुभे ॥ लज्जया
धोमुखीप्राणांस्त्यक्तुमीहेतदैवच ३८ यथेष्टंचेन्मयासार्द्धंरमसेहर्निशंपते ॥ नकोपिकिंचिद्ब्रूयात्त्वांदोषोवानभवेन्महान् ३९ हितंचेत्कुरुमद्वाक्यंत्यक्त्वातां
स्वविवेकतः ॥ अज्ञानाद्वाप्रमादाद्वाकृतंकर्मत्यजेद्बुधः ४० इदंकृतंममैवस्यादिष्टंनैवकृतंयदि ॥ अनिष्टंसर्वथामेस्यात्तन्नकार्यंविनिश्चयात् ४१ अन्यथाकु
र्वतःपुंसइहलोकोनवापरः ॥ इतिस्त्रियावाक्यबाणैर्बुधोविद्धोहिमर्मसु ४२ रोषाविष्टोमहाक्रूरोजगादप्रज्वलन्निव ॥ बुधउवाच ॥ निर्लज्जेनिष्ठुरेप्रौढेदुष्टे
रुष्टेमयिस्फुटम् ४३ गमिष्यसिगतिंतांत्वंयथातौपितरौगतौ ॥ सावित्र्युवाच ॥ येनपित्रोर्नमर्यादाशिक्षित्रोश्चस्वतंत्रयोः ४४ रक्षितातद्विपरीतांसमांत्राता
कथंभवेत् ॥ भर्तृहस्तान्मृतिःश्रेयःपरत्रेहचसद्स्त्रियाः ४५ ॥ ब्रह्मोवाच ॥ एवंब्रुवंत्यांपत्न्यांसधर्म्मिलंसहसाग्रहीत् ॥ काष्ठैर्लोष्टैर्मुष्टिभिश्चपाषाणैस्ता
मताडयत् ४६ सारामंभर्तृरूपेणसस्मारपूर्वपुण्यतः ॥ प्राणांस्तत्याजसहसाभिन्नामर्मसुतेनह ४७ स्वर्गंगत्वादिव्यदेहाबुभुजेपरमंसुखम् ॥ आकृष्यचरणेतांस
चिक्षेपदूरतोनिशि ४८ निरंकुशोहर्षयुतोरमेवेश्यासमन्वितः ॥ त्वदर्थंनाशिताःसर्वेबुधस्तामितिसोब्रवीत् ४९ ततोबहुगतेकालेबुधोगात्कालभर्तृहम् ॥ तस्मि
न्स्नातुंगतेदुष्टेभार्यांतस्याग्रहीत्कचे ५० अत्यंतंसुंदरतरामालिलिंगचुचुंबच ॥ निःशंकंशयनेनीत्वामर्दकुचमंडलीम् ५१ रेमेतयायथेष्टंततःसातंशशापह
सुलभोवाच ॥ कथंनामकृतंदुष्टंपितृभ्यांसुलभेतिमे ५२ अहंतेसुलभाजातादुष्टबुद्धेनराधम ॥ स्नातुंगतेभर्त्तरिमेकालभौमुनिपुंगवे ५३ बलात्कारोमयिकृतो
दुष्टःकुष्ठीमविष्यसि ॥ जन्मांतरेतेनामापिनगृण्हीयाज्जनःक्वचित् ५४ ब्रह्मोवाच ॥ ततोभीतोययौवेश्यागृहमेवबुधःपुनः ॥ रेमेतयासुरांपीत्वानाकिंचिद
पिचिंतयन् ५५ एवंदुष्टानिकर्माणिवक्तव्यानिकथंमया ॥ पुण्यक्षयोभवेत्तस्यपरदोषंयईरयेत् ५६ सकालान्निधनंप्राप्तोदूतैर्नीतोयमालयम् ॥ यमेनोक्तं
किमानीतोनीयतांनरकेष्वयम् ५७ यमवाक्यंसमाकर्ण्यदूतानिन्युस्तदैवतम् ॥ चिक्षिपुर्नरकेतावद्यावदाभूतसंप्लवम् ५८ भुक्तभोगःसवैश्यस्यगृहेज
न्मसमाप्तवान् ॥ ऋषिपत्न्याःसशापेनकुष्ठीजातोभृशंतदा ५९ पितृहामातृहास्त्रीहामद्यपीगुरुतल्पगः ॥ तस्यसंस्पर्शनादेवसचैलंस्नानमाचरेत् ६०
नामाप्येतस्यनग्राह्यंमहादोषकरंयतः ॥ एतादृशोयंदुष्टात्मायदात्यक्तइतस्तदा ६१ विमानंयास्यतेचोर्ध्वंनूनंनास्त्यत्रसंशयः ६२ ॥ ॥ ब्रह्मोवाच
श्रुत्वेत्थंवचनंतेषांदूतानांभृशकंपितः ६३ शूरसेनउवाचैतान्नमयाज्ञायिदुष्कृतं ॥ पुनरुत्थायराजासौप्रणनामभृशातुरः ६४ प्राहतान्देवदूतान्सकृपां
कृत्वावदंतुमे ॥ उपायमस्यदुष्टस्यसर्वदोषापनुत्तये ६५ ॥ दूताऊचुः ॥ उत्तिष्ठोत्तिष्ठनृपतेब्रूमोदोषापनुत्तये ॥ उपायंराजशार्दूलशृणुष्वैकमनाभव ६६ ग

णेशस्यभवन्नामयत्ख्यातंचतुरक्षरं ॥ जपतत्कर्णरंध्रेस्यसर्वदोषक्षयोभवेत् ६७ उदयेदिननाथस्ययथासर्वतमःक्षयः ॥ नान्योपायेधिकारोस्ययतोनामैवजप्य
तां ६८ ब्रह्मोवाच ॥ शूरसेनोदूतवाक्याज्जयपूर्वंजजापह ॥ त्रिवारंवैश्यकर्णेतुनामयच्चतुरक्षरं ६९ गजाननेतिश्रुत्वैवादित्यदेहोभवच्चसः ॥ भासयंस्तेजसास
र्वमरुणोभुवनंयथा ७० सर्वपापक्षयेजातेनामश्रवणमात्रतः ॥ दीपयन्सर्वदिग्देशान्विमानंचाध्यरोहत ७१ तद्विमानंक्षणाद्भूतैःसर्वलोकसमन्वितम् ॥ नीतं
वैनायकंधामविघ्नराजस्यशासनात् ७२ इतिसर्वंसमाख्यातंयद्यत्पृष्टंत्वयानघ ७३ महापुण्यंचसंकष्टचतुर्थीव्रतमुत्तमं ॥ धन्यंयशस्यमायुष्यंश्रवणात्सर्वसि
द्धिदं ७४ सर्वपीडाप्रशमनंसर्वविघ्नविनाशनं ॥ दूर्वानामप्रभावश्चकिमन्यच्छ्रोतुमिच्छसि ७५ इतिश्रीगणे०उपासनाखंडेषट्सप्ततितमोऽध्यायः ॥७६॥ व्या
सउवाच ॥ अन्येनाकारिकेनेदंवदतत्कौतुकंमहत् ॥ ब्रह्मोवाच ॥ जामदग्न्येनरामेणवतमेतत्पुराकृतम् १ सोपिकीर्तिंजयंज्ञानंआयुर्दीर्घंचलब्धवान् ॥ व्यास
उवाच ॥ रामःकथंसमुत्पन्नःकस्मात्कस्यांपितामह २ एतत्सर्वंसुविस्तार्यब्रूहित्वंममपृच्छतः ॥ ब्रह्मोवाच ॥ श्वेतद्वीपेतिविख्यातोजमदग्निर्महामुनिः ३ मन
सासृष्टिसंहारान्निग्रहानुग्रहानपि ॥ यःकरोतित्रिकालज्ञस्ततोदेवाश्चकंपिरे ४ यस्यासीत्पत्न्यपितथारेणुकानामनामतः ॥ यस्यालावण्यगुंजापिपत्न्याःका
मस्यनाभवत् ५ रतिरित्येवलोकेषुविख्याताभूत्ततस्तुसा ॥ ययासंमोह्यतेसर्वंक्षमस्तद्वर्णनेतुकः ६ यन्नेत्रशोभासंप्राप्यैचकोराजलवासिनः ॥ हरिणाश्च
तपश्चेरुर्वनेछंदतृणाशिनः ७ यदास्यशोभासंप्राप्यैसेवतेचंद्रईश्वरम् ॥ अनादिनिधनादेवीमूलप्रकृतिरीश्वरी ८ तस्यामजनिरामोसौविष्णुर्योगेश्वरो
यथा ॥ जमदग्नेर्महाभागात्साक्षादीश्वररूपिणः ९ अतिसुंदरगात्रोसौसाक्षान्मन्मथमन्मथः ॥ मातापितृवचःकर्त्ताविख्यातबलपौरुषः १० देवाद्विजगुरु
प्राज्ञगोवोधिपूजनेरतः ॥ वेदवेदांगशास्त्राणांस्मृतीनामपिपाठकः ११ वाक्येबृहस्पतिसमःक्षमयापृथिवीसमः ॥ गांभीर्येंब्धिसमोयस्तुपित्रोर्वाक्यपरा
यणः १२ पित्रोराज्ञांगृहीत्वासनिमेषारण्यमाययौ ॥ अनेकविद्याभ्यसनेमतिंकृत्वापरांस्थिराम् १३ तस्मिन्गतेतदाराजाकार्तवीर्योमहाबलः ॥ यस्यप्रता
पादभवद्भश्यंभूमंडलंसदा १४ यस्मिन्लक्ष्मीःस्थिराविष्णोरंशभूतेखिलार्थदे ॥ आजौपंचशतंबाणान्सृजतोरिपुघातकान् १५ इंद्रादिदृदंसेव्योसौविख्यातब
लपौरुषः ॥ असंख्यातागजायस्यरथवाजिपदातयः १६ यस्यनिर्गमनेसैन्याश्छादयंतिमहीतलम् ॥ वर्षाकालेयथामेघाधाराभिर्व्योममंडलम् १७ यस्यकं
बुस्वनंश्रुत्वाद्विषोयांतिदिशोदश ॥ यथासिंहरवंश्रुत्वामत्तमातंगकोटयः १८ यदातालीपंचशतंस्वेच्छयाकुरुतेनृपः ॥ तदासनादंब्रह्मांडकंपतेमुनिसत्तम १९
असौयदृच्छयायत्तश्चतुरंगबलान्वितः ॥ नीलवस्त्रधरोनीलछत्रस्तादृशसैनिकः २० वनानिसरितोदुर्गान्पर्वतांश्चविलोडयन् ॥ नानामृगगणान्वीक्ष्यविनि
घ्नन्नपिकांश्चन २१ ततःसह्याद्रिशिखरेपश्यदाश्रममुत्तमम् ॥ यथाकैलासशिखरेगिरिशालयमुत्तमम् २२ अपृच्छत्सेवकान्राजाकस्येदमुत्तमंस्थलम् २३ भृ

१ वनवासिन इतिपाठो वा ।

त्यउवाच ॥ जमदग्निरितिख्यातःसाक्षात्सूर्यइवापरः ॥ मुनिरास्तेमहाभागशापानुग्रहकारकः २४ यस्यदर्शनतःपापकोटयोयांतिसंक्षयम् ॥ इच्छाचेत्तत्र
गंतव्यंदर्शनंतेभविष्यति २५ तवप्रसादात्सर्वेषामुपकारोभविष्यति ॥ ॥ ब्रह्मोवाच ॥ इतितद्वचनंश्रुत्वागमनायोद्यतोनृपः २६ न्यषेधयत्सर्वबलंश्रेष्ठा
नादायततक्षणात् ॥ ययौतंमुनिशार्दूलंजमदग्निंतपोनिधिं २७ ददर्शतंकुशासीनंज्वलंतमिवपावकं ॥ प्रणनामससाष्टांगंतेसर्वैसहयायिनः २८ नाविशा
लशालासुकुंजवृक्षावलीषुच ॥ निषेदुःसैनिकास्तेतुराजातस्थौमुनेःपुरः २९ आसनेमुनिनादिष्टेचतुर्भिःपरिवारितः॥ निषसादततोराजाकृतवीर्यसुतोबली ३०
अपूजयततान्सर्वान्पाद्यार्घ्यविष्टरादिभिः ॥ समुनिःप्रददौगाश्चशिष्यैःसर्वानपूजयत् ३१ नानासरोवरजलेनिर्मलेचारुशीतले ॥ अमज्जंततदासर्वेसैनिकाम्ल
गयार्दिताः ३२ शृण्वन्वेदनिनादांश्चशास्त्रशब्दांश्चपुष्कलान् ॥ अभितोवादशब्दांश्चतच्छिष्यैःसमुदीरितान् ३३ अब्रवीन्मुनिमुख्यंतंराजाराजीवलोचनः ॥
अद्यमेपितरोधन्यौजन्मज्ञानंतथातपः ३४ पुण्यवृक्षोद्यफलितोयज्जातंतवदर्शनम् ॥ अद्यमेसंपदोधन्याःकुलंधन्यंयशोपिमे ३५ परब्रह्मेतियत्प्रोक्तंतदैवत्वं
नसंशयः ॥ आतिथ्यंतवदृष्ट्वैवंपरितुष्टमनोमम ३६ इतिश्रुत्वातुतद्ब्राह्मींस्मयन्निवप्रसन्नधीः ॥ कोसिकस्यासिकिंनामकिंकार्यंतववर्तते ३७ इतितंपरिपप्र
च्छजानन्नपिमुनिस्तदा ॥ राजोवाच ॥ राज्ञांस्वकार्यकर्तृणांभवादृशनिरीक्षणात् ३८ नान्यत्प्रयोजनमुरुश्रेयसाजनितत्स्फुटं ॥ कृतवीर्यसुतोहंचकार्त
वीर्यइतिश्रुतः ३९ अनुज्ञातोगमिष्यामिततोहंनगरंप्रति ॥ मुनिरुवाच ॥ मयाश्राविमहाकीर्तिस्तवराजन्यसत्तम ४० आसीत्त्वद्दर्शनाकांक्षाजातापुण्येन
सत्फला ॥ देहआत्मातपोज्ञानमाश्रमोममसांप्रतम् ४१ अभूत्त्वदागमाद्राजन्सार्थकाःसर्वसंपदः ॥ अकृत्वाभोजनंकिंचित्कथंत्वंगंतुमर्हसि ४२ ममश्लाघा
भवेल्लोकेन्यूनंकिंतवविद्यते ॥ किंचिदभुक्त्वाव्रजविभोसनाथंकुरुमांप्रभो ४३ ॥ ॥ राजोवाच ॥ ॥ सत्यंभोजनकालोस्तिभोक्तव्यंचतवाज्ञया ॥ अ
न्नाभावेश्रोत्रियाणांजलंयाच्यपिवेदपि ४४ तथाप्येतान्विहायाहंसैनिकान्गणनातिगान् ॥ जलंपातुंनशक्नोमिकथंभोक्तुंसमुत्सहे ४५ जानेहंमनसाब्रह्मन्
नशक्तिःसर्वभोजने ॥ भवद्दर्शनमात्रेणकृतकृत्योव्रजेधुना ४६ ॥ मुनिरुवाच ॥ ॥ चिंतांमाकुरुराजर्षेभोजयिष्येससैनिकम् ॥ चतुर्विधेनचान्नेनकिमसाध्यं
तपस्विनां ४७ गृहेतेवाहिनीयास्यात्तामप्याकारयप्रभो ॥ क्षणंविश्राम्यतांतीरेनद्याश्चारुतरेशुभे ४८ यावत्सिद्धंभवेदन्नंपश्चाद्द्रक्ष्यसिकौतुकं ॥ ॥ कउ
वाच ॥ ॥ अंतःसविस्मयाविष्टोजगामकृतवीर्यजः ४९ वाक्यमाकर्ण्यतुमुनेर्नदीतीरंसुशोभनम् ॥ मुनिःपत्नींसमाहूयवृत्तांतंतंजगादताम् ५० आहूय
कामधेनुंतौपुपूजतुःक्षणेनताम् ॥ प्रार्थयामासतुरुभौलज्जांनौरक्षधेनुके ५१ असंख्यातबलोराजाभोजनायनिमंत्रितः ॥ यथारुचिभवेत्तस्यससैन्यस्यभुजिः
शुभे ५२ तथाकुरुक्षणेनत्वंनोचेत्सत्यंलयंव्रजेत् ॥ अकीर्त्तिश्चभवेल्लोकेयथेच्छसितथाकुरु ५३ एवंसंप्रार्थितताभ्यांकामधेनुर्महापुरम् ॥ निर्मायस्वप्रभावे
ननानामंदिरसुंदरं ५४ नानारत्नमयस्तंभशोभिनानासभागृहम् ॥ नानापुष्पलताचारुवाटिकाराममंडितं ५५ नानाध्वजपताकाढ्यंनानावादित्रनिस्वनम् ॥

अष्टापदानांभाडानांनानापंक्तिविराजितम् ५६ चतुर्विधान्नसंपन्ननानाभाजनपंक्तिमत् ॥ महातोरणशोभाढ्यंपरिखावलयांकितम् ५७ अनेकदासदासीभिर्विल
सच्चारुवेदिकम् ॥ निवारयंतिलोकांश्चयत्रतत्रस्थितानराः ५८ पुरोगंतुंनचाज्ञास्तिजमदग्निमुनेरिति ॥ परिविष्टेषुपात्रेषुसंख्यातीतेषुसर्वतः ५९ दीपप्रभा
भासुरेषुनानाव्यंजनशालिषु ॥ सूपपायसपक्वान्नपंचामृतयुतेषुच ६० सस्वाद्यलेह्यचोष्यादिपेयपंक्तिविराजिषु ॥ सामुद्रपक्वनिंबाम्रामृतबिल्वादिशालिषु
चंद्रैलाहिंगुमारीचक्वथिकापात्रशालिषु ६१ सिद्धेषुपात्रेषुमुनिस्तदासावाकारयच्छिष्यगणंतदानीम् ॥ श्रीकामधेनोःपरिपूर्णतोषाद्भोक्तुंससैन्यंकृतवीर्यपुत्रम्
६२ इतिश्रीगणेशपुराणेउपासनाखण्डेसप्तसप्ततितमोध्यायः ॥ ७७ ॥ कउवाच ॥ ततोमुनिःशिष्यगणमुवाचत्वरयाव्रज ॥ आकारयितुंनृपतिंनदीतीरनिवासि
नं १ तेशिष्यास्तंनृपंगत्वागृह्यतत्प्रणतिंपुरा ॥ दत्वाशीर्वर्चनंतस्मैमुनेराज्ञांतथाब्रुवन् २ चलराजन्नवहितोभोजनायससैनिकः ॥ पात्राणिपरिविष्टानिसंख्या
तीतानिषड्रसैः ३ ॥ ॥ कउवाच ॥ ततउत्थायराजासौसमाहूयससैनिकान् ॥ सुस्नातःसर्वसैन्येनकार्तवीर्योनृपोययौ ४ मुनिवेश्मततोपश्यन्नदृष्टंनचवैश्रुतं ॥
एतादृशंत्रिलोकेषुगृहतोरणमापसः ५ सनिषिद्धोवेत्रधरैर्मुनिसंकेतकामुकैः ॥ तेनिषिद्धाःशिष्यगणैस्ततोगाद्भोजनालयम् ६ स्थित्वामध्येपश्यतिस्मराजासौ
संपदंमुनेः ॥ अमन्यततदास्वांतेनेदृशीश्रीर्हरौहरे ७ पालकेऽपालकेसृष्ट्यांपित्रह्मणिनेदृशी ॥ ततोमुनिःपुरोभूत्वाप्रतिपात्रेन्यवेशयत् ८ राजानुमतिमाज्ञा
यपंक्तौपंक्तौससैनिकान् ॥ दापयामासपात्राणियेदहिर्भोजिनश्चतान् ९ उपविष्टेषुसर्वेषुराजानमुपवेशयत् ॥ बुभुजुस्तेतदावाद्येवादितेसर्वएवहि १० अदृष्टपू
र्वाण्यन्नानिस्वादुमूलफलानिच ॥ परस्परंचपप्रच्छुःकिमिदंकिमिदंत्विति ११ आश्चर्यमेनिरेसर्वेयामेनेत्थंकथंकृतम् ॥ यथेष्टंभुंजतेसर्वेतृप्ताश्चान्नानितत्यजुः १२
तेप्रक्षालनपात्राणिप्रतिपात्रेन्यवेदयन् ॥ मुनिशिष्याजलंचापिशलाकाअपिचारवः १३ गजाश्ववृषवृंदेभ्यःशिष्याःशेषान्नमर्पयन् ॥ ततोन्यस्मिन्गृहेसर्वेविस्तो
र्णेकृतसंस्तरे १४ इक्षुद्राक्षाम्रपनसदाडिमानिबभक्षिरे ॥ एलालवंगकर्पूरचूर्णखादिरपूगकान् १५ जगृहुर्मुनिदत्तांस्तेनागवल्लीदलैर्युतान् ॥ ततोददावलंकारान्ग
सांसिचमुदामुनिः १६ तेभ्योयथार्हंसर्वेभ्योराज्ञेनर्घ्यतराणिच ॥ मुनिरुवाच ॥ किंमथाभोजनंदेयंमुनिनावन्यवृत्तिना १७ अवाप्तसर्वकामायराज्ञेतोविष्णुरूपि
णे ॥ यशोकारित्रिलोकेमेत्वयामद्वाक्यकारिणा १८ जमदग्नेर्गृहेराज्ञासैन्येनभुजिःकृता ॥ अतिपुण्यवतोलोकेसाधुशब्दःप्रयुज्यते १९ महान्क्षुद्रस्यवाक्यंचेद्
कुरुतेसोपिसाधुतां ॥ प्राप्नोतिसर्वलोकेषुकीर्तिंस्फीतांसमुत्कटाम् २० मद्वाक्यकरणेतेपिदूरेरिष्टंगतंमहत् ॥ ब्रह्मोवाच ॥ इतिवाणींसमाकर्ण्यजमदग्निसमीरि
तां २१ पप्रच्छराजातंतत्रविस्मयाविष्टमानसः ॥ राजोवाच ॥ नादर्शिप्रथमंकिंचिदिदंकिंमायया कृतम् २२ तपःप्रभावाद्वाकारिसत्यंभवदसुव्रत ॥ मुनिरुवाच
अनृतंनोक्तपूर्वंमेपरिहासेपिवानृप २३ अतःसत्यंब्रवीमित्वांकामधेन्वाखिलंकृतम् ॥ ब्रह्मोवाच ॥ कुमतिस्तस्यभवतियस्यदैवमदक्षिणम् २४ अनिष्टंबलवद्वा
विदुष्टग्रहकृतंमुने ॥ भुक्त्वातृप्तोपिराजासौसम्यक्ससबलवाहनः २५ आदानेकामधेनोःसमतिंचक्रेब्रवीदिदम् ॥ राजोवाच ॥ मुनीनांशांतचित्तानांकंदमूल

फलाशिनाम् २६ मनसासृष्टिसंहारकर्तृणामस्पृहावताम् ॥ जितेंद्रियाणांविज्ञानांनेक्षेधेन्वाप्रयोजनम् २७ वन्यमारुतभक्ष्याणांमोक्षसाधनकारिणां ॥ वेदाभ्यसन
शीलानांसंपदाकिंप्रयोजनम् २८ शास्त्रपाठनशीलानांधर्मशास्त्रार्थवेदिनां ॥ योगाभ्यासरतानांचकामधेनोःप्रयोजनं २९ कार्यायमहतेस्यात्तुमहद्वस्तुमहद्व्रतम् ॥
अरण्यवासिनेतुभ्यंमहद्धनंचनोचितम् ३० तस्माद्देयाकामधेनुर्ममब्रह्मन्मुदात्वया ॥ मयिस्थितातवैवास्तिचेतसित्वितिधार्यताम् ३१ मर्यादांरक्षतांब्रह्मन्नु क्रमे
वंपुरस्तव ॥ नोचेद्वाज्ञांकिमग्राह्यंलोकेषुबलशालिनां ३२ स्वराष्ट्रेपरराष्ट्रेवाचतुरंगबलैःसह ॥ ब्रह्मोवाच ॥ श्रुत्वैवंवचनंतस्यकार्तवीर्यस्यदुर्मतेः ३३ प्रतिज
ज्वालरोषेणजमदग्निर्महामुनिः ॥ सर्पिषाविहुलेनैवजातवेदायथाद्विजः ३४ उवाचरक्तनयनःशिक्षयन्निवभूमिपम् ॥ मुनिरुवाच ॥ साधुःशुद्धोमहान्राजाप्रार्थि
तोभोजनायाहि ३५ कौटिल्यंतवनज्ञातंबकस्येवहृदिस्थितम् ॥ यथावाकोकिलाकाकबालंपुष्णातिमायया ३६ अंतेतत्काकभावेनभक्ष्याभक्ष्यैरतिंव्रजेत् ॥ अ
हमेवामवंभ्रांतोयइमांराजमित्रतां ३७ नदृष्टंनश्रुतंलोकेनानुभूतांचकेनचित् ३८ ॥ इतिश्रीम०उ०खंडेकार्तवीर्योपाख्यानंनामाष्टसप्ततितमोऽध्यायः ७८ ॥
॥ मुनिरुवाच ॥ उपकारस्त्वयारंभिसाधुवृत्तानुसारिणा ॥ आत्मघातंपुरस्कृत्वाकामधेनुंत्वमिच्छसि १ भ्रांतोसिनृपसत्यंत्वमप्राप्यंयोभिवांछसि ॥ त्रैलोक्य
नाशजंपापंतवमूर्ध्निपतिष्यति २ ब्रह्मोवाच ॥ इतिवाक्यशरविद्धोसौप्रलयानलसन्निभः ॥ राजाबभूवरोषेणमुखादनलमुद्वमन् ३ उवाचपरमक्रुद्धोजमदग्निर्मुनिं
तदा ॥ राजोवाच ॥ नमयादुष्टवचनंकस्यापिश्रूयतेशठ ४ किंकरोमिद्विजोसित्वमितिक्षांतंवचःक्रुधा ॥ ॥ कउवाच ॥ ॥ ततउत्थायराजासौदूतानाज्ञा
प्यसत्वरम् ५ मुक्ताकीलात्कामधेनुंशीघ्रंयांतुममांतिकम् ॥ आवेष्टयंस्तदादूताःकामधेनुंतदाज्ञया ६ फूत्कारेणैवतस्यास्तेत्यक्त्वाप्राणान्नदिवंययुः ॥ अन्या
न्क्रोधानलेनासौराजदूतान्ददाहच७ श्वासमारुतवेगेनव्योम्निवीराःपरेभ्रमन् ॥ आच्छाद्यमंडलंभानोर्नप्राज्ञायतकिंचन ८ दिशःसतिमिराजाताव्योमापिनच
भासते ॥ धराकंपःसमभवद्वृक्षाःपेतुःप्रकंपिताः ९ सैनिकाश्चततोभीतायांतिसर्वादिशोदश ॥ केनचित्ताडितासागौःकशाघातेनदूरतः १० उड्डीयोड्डीयसाधे
नुरधावत्सैन्यमेवतत् ॥ गजवृंदंयथासिंहोगरुत्मानुरगानिव ११ हाहाकारोमहानासीद्वीराणांतत्रधावताम् ॥ तानुवाचनभीःकार्याकार्त्तवीर्योमहाबली १२
मयाध्मातेमुदाशंखेभीतायास्यतिमंदिरम् ॥ कामधेनुःकियच्चास्तिपश्यंतुकौतुकंमम १३ ततोदध्मौमहाशंखंत्रैलोक्यंपूरयन्रवैः ॥ नबिभ्यत्कामधेनुस्तां
ताडयामासुरोजसा १४ यष्टिभिर्लोहनिचयैःसर्वेतेराजसेवकाः ॥ यत्रयत्रप्रहारोस्याःशरीरेजायतेततः १५ सन्नद्धाःसर्वशस्त्राढ्यानानावीराविनिःसृताः ॥ श
काश्चबर्बराजासंस्तस्याःकेशसमुद्भवाः १६ पटच्चराःपाददेशादेवंसर्वेप्रजज्ञिरे ॥ नानायवनजातीयानानावीरास्तथापरे १७ वाजिवारणसंघाश्चरथिनोबल
वत्तराः ॥ तैश्चैवयुयुधुस्तत्रकार्त्तवीर्यस्यसैनिकैः १८ न्यपतन्कार्तवीर्यस्यसैनिकास्तैःप्रहारिताः ॥ अपरेमिलितास्तत्रनिशितक्षेपनंगवत्र १९

१ रतंभवोदितिपाठः

परस्परघातहतानिपेतुःशतशोनराः ॥ भंक्त्वाशस्त्रैश्चशस्त्राणिमल्लयुद्धंप्रचक्रिरे २० एवंसुतुमलेजन्येशस्त्रेष्वनिपतत्सुच ॥ स्वीयोवापरकीयोवानप्राज्ञायतकिंचन २१ रजसाच्छादितेसूर्येजघ्नुरेवंपरस्परम् ॥ कोलाहलोमहानासीद्धन्यतांहन्यतामिति २२ हेषितैर्बृंहितैःक्ष्वेडैर्निर्विडोरथनेमिभिः ॥ मृदंगतालवेणूनांभेरीणांनिनदैरपि २३ एवंगव्यैःकार्त्तवीर्यैरश्यश्वगजपत्तिभिः ॥ अभवत्सुमहद्युद्धंभूतराक्षसभीतिदम् २४ पक्षिजंबूकसुखदंवीरपत्नीभयप्रदम् ॥ केषांचिज्जानुनीभग्नेकेषांचच्चशिरांसिच २५ खड्गखेटकभल्लानांशराणांधनुषामपि ॥ भग्नानांनचसंख्यास्तिवीराणांरथिनामपि २६ प्रपेतुःकार्त्तवीर्यस्यशेषायेसैनिकास्तदा ॥ पृष्ठलग्नायुर्गव्याहसंतोनचजघ्निरे २७ निर्निंदुर्मुनिनार्किंवोनिष्टंकृतमितीहते ॥ पूर्वदोषप्रसंगेनराज्ञोजातासुदुर्मतिः २८ एवंप्रभग्नेसैन्येसउत्तस्थौकृतवीर्यजः ॥ हस्तयोर्जगृहेपंचशतंबाणान्धनूंषिच २९ दत्वाभ्रूभौवामजानुंधनूंष्याकृष्यवेगवान् ॥ चिक्षेपशरजालंसगव्येसैन्येमहाभुजः ३० फलहीनमभूत्तस्यशरजालंनृपस्यतत् ॥ जनीतेश्चरितंतद्वद्वंध्यायाःसुरतंयथा ३१ पुनःपुनर्जहौबाणांस्तावतोराजसत्तमः ॥ कामधेनोर्नचैकोपिवीरोभग्नोभवत्तदा ३२ शरजालेवृथायातेसंतप्तोभून्नृपस्तदा ॥ क्वगतंममसामर्थ्यमितिचिंतातुरोभवत् ३३ व्याकुलेनप्रहर्त्तव्यमितिसर्वंययुर्दिवम् ॥ कामधेनुर्मुदायुक्ताकिंयुद्धंलघुनासह ३४ गतायांकामधेनौसकार्त्तवीर्योमुनिंययौ ॥ रोषेणोवाचतेब्रह्मन्कापट्यंविदितंमया ३५ नसविप्रोभिमंतव्योयस्यस्यात्कपटंहृदि ॥ इत्येकंबाणमादायविव्याधद्विजपुंगवम् ३६ लग्नेहृदिमहाबाणेप्राणत्यागंचकारसः ॥ रेणुकातंनृपंप्राहब्रह्महत्यावृथाकृता ३७ सऊचेरक्तनयनःक्रोधाविष्टोनृपस्तुताम् ॥ तूष्णींतिष्ठनचेद्वह्मित्वामपीहमुनिप्रिये ३८ एकविंशतिबाणैस्तांदुष्टोराजाहनद्रुषा ॥ सस्मारमनसासापिजमदग्निंमुनिंतदा ३९ पश्चादुवाचनृपतिंदुष्टचांडालकिंकृतम् ॥ अपराधंविनाकस्मादावांनिहतवानसि ४० तवापिभविताशोभुजानांनात्रसंशयः श्रुत्वेत्थंवचनंतस्यास्ततोयातोनृपस्तदा ४१ अल्पावशिष्टसैन्येनचिंताक्रांतोययौपुरीम् ॥ विनिंदन्हृदिचात्मानंशोचंश्चमृतसैनिकान् ४२ निरुत्साहोनिरुद्योगोविवेशनिजमंदिरम् ४३ ॥ इतिश्रीगणेशपुराणेउपा०कार्त्तवीर्योपाख्यानेएकोनाशीतितमोऽध्यायः ॥ ७९ ॥ ॥ कउवाच ॥ रेणुकातुगतेतस्मिन्शुशोचभृशविह्वला ॥ क्वगतामम्पुत्रास्तेसंहारेस्मिन्नुपस्थिते १ मृतेभर्त्तरिकिंकुर्यांबाणजालसमावृता ॥ क्वगतोसौमहाक्रोधीरामोमेप्रियबालकः २ तस्मिन्नष्टेममप्राणागमिष्यंतिसुरालयम् ॥ स्मृतमात्रस्तयारामोययौमातुस्तदांतिकम् ३ बाणजालचितांतांचपितरंमृतमैक्षत ॥ कार्त्तवीर्येणदुष्टेनदृढबाणहतंहृदि ४ पपातमूर्छयाभूमौवातभग्नइवद्रुमः ॥ पितरंमातरंचैवरुरोदभृशदुःखितः ५ ॥ रामउवाच ॥ अद्यांधकारःसर्वत्रअद्यशून्यादिशोदश ॥ मेरुहीनायथापृथ्वीशक्रहीनाऽमरावती ६ नाश्रमःशोभतेतद्वत्पित्राहीनोयमद्यमे ॥ त्रिलोकीगंगयाहीनातद्वदाश्रममंडली ७ नशोभतेरेणुकयाहीनाप्याश्रमंडली ॥ गतंभयंतुदेवानांमुनयोद्यनिरीश्वराः ॥ यदासीत्तपसाचास्यकिमयंवागृहीष्यति ८ एवंबहुविधाकारंचक्रेआक्रंदनंतुसः ॥ अचेष्टतभृशंरामोमत्स्योनीरंविनायथा ९ ततःपुनर्मातरंसरु

दन्नेवसमाययौ ॥ निष्काशयामासशरानंकेकृत्वाशिरोधराम् १० चक्रंदचपुनारामोमातृदुःखेनदुःखितः ॥ त्रैलोक्यंभस्मसात्कर्तुंयाक्षमाजननीमम ११ साक थंपतिताभूमौदुष्टबाणप्रपीडिता ॥ नविस्मरसिमांनित्यंक्षणंक्रीडागतंपुरा १२ त्यक्त्वामांकथमद्यत्वंकुत्रवागंतुमुद्यता ॥ ददासिमेपयोभूरिवस्त्राण्यन्ना निशोभने १३ फलमूलानिचारूणियासित्यक्त्वाकथंनुसा ॥ मातापितृभ्यांहीनस्यधिङ्मेजीवितमद्यमे १४ ॥ ब्रह्मोवाच ॥ ॥ इतिपुत्रवचःश्रुत्वारेणुका भृशदुःखिता ॥ प्रमृज्याश्रूणिपुत्रस्यजगादभृशविह्वला १५ अहंतेनिकटेस्थास्येनशोकंकर्तुमर्हसि ॥ शृणुवार्तांपुरावृत्तांराजासौकृतवीर्यजः १६ मध्याह्ने सहसैन्येनप्राप्तआश्रममंडलम् ॥ पित्रातेमानितःसम्यग्भोजितोबलसंयुतः १७ कामधेनोःप्रसादेनभुक्त्वायाचतधेनुकाम् ॥ तूष्णींभूतेमुनौकोपाद्का मधेनुंमुमोचसः १८ स्रष्टमात्राचसाधेनुःससर्जबलमुत्कटम् ॥ चतुरंगंततोयुद्धमभवद्राजसैनिकैः १९ भग्नास्तेप्यपलन्सर्वेराजायुद्धमथाकरोत् ॥ सचपंचश तंबाणान्वारंवारमथासृजत् २० सोपिभग्नोगृहंयातःकामधेनुर्दिवंगता ॥ पुनरागत्यदुष्टोसौबाणेनैकेनवक्षसि २१ जघानपितरंकोपादेकविंशतिसायकैः ॥ अपराधंविनामांचताडयित्वागतःखलः २२ तस्मात्त्वयाद्यदुष्टस्यनाशःशीघ्रंविधीयताम् ॥ एकविंशतिवारंचकुरुनिःक्षत्रियांधराम् २३ एकविंशतिबाणा मेदेहेतेनयतोर्पिताः ॥ अन्यदेकंवदेपुत्रततत्कुरुष्ववचोमम २४ संस्कारंकुरुनौतत्रयत्रकोपिनदाहितः ॥ दत्तात्रेयंमुनिवरमाकार्यसर्ववेदिनम् २५ कुरुकर्मांत रंनौत्वंत्रयोदशदिनावधि ॥ तदैवगतिमाप्स्यावोनान्योवक्तास्तितादृशः २६ इत्युक्त्वारेणुकादेहंत्यक्त्वाधामापदुर्गमम् ॥ रामस्तत्सर्वमकरोत्तयादिष्टंमहा मनाः २७ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेरामोपाख्यानेअशीतितमोऽध्यायः ॥ ८० ॥ ॥ ६ ॥ ॥ ॥ कउवाच ॥ ॥ रामस्तुवपनंकृत्वा स्नात्वासम्यग्विधानतः ॥ उत्थानश्राद्धमकरोद्ब्राह्मणैःकथितंयथा १ विश्रांतिश्राद्धमारभ्यमंत्राग्निमुभयोरदात् ॥ तदैवप्रययौतंतुदत्तात्रेयंमुनिंप्रति २ कुत्रे षंशिष्यसहितंस्वहस्तंमलिनंकृशम् ॥ ध्यानेनालोक्यतंरामोननाममुनिपुंगवम् ३ बद्धांजलिपुटोतिष्ठद्यामाद्वैतत्पुरोद्विजः ॥ दत्तात्रेयोपिसर्वज्ञोवु ध्वातस्याशयंमुनिः ४ उवाचराममामंत्र्यज्ञातंतवप्रयोजनम् ॥ अथापिपृच्छेविज्ञातुंकिमर्थंत्वमिहागतः ५ ॥ कउवाच ॥ सउवाचततोरामोवृत्तां तमादितःस्फुटम् ॥ रामउवाच ॥ कृतवीर्यात्मजोराजापितुराश्रममागतः ६ भोजितःपरमान्नेननानापक्वान्नशालिना ॥ भुक्तःससेनयासार्द्धंकामधेनुमया चत ७ यदानदत्तापित्रामेबलान्नेतुंमनोदधे ॥ साताडिताथसुषुवेसैनिकानांगणान्बहून् ८ तैर्भग्नोबलिभीराजाससैन्योगान्निजालयम् ॥ कामधेनुर्गतास्वर्गंत तोराजारुषान्वितः ९ जमदग्नेर्हृदिशरमहनद्दृढमोजसा ॥ एकविंशतिकान्बाणान्मातुरंगेहनद्रुषा १० नाहंतत्रस्थितोब्रह्मन्पश्चादागत्यदृष्टवान् ॥ मंत्राग्निनातुद ग्धौतौमातुर्वाक्यादिहागतः ११ दत्तात्रेयंविनानान्योवक्ताकार्योत्रकर्मणि ॥ कृतेकर्मणिसर्वस्मिंस्त्रयोदशदिनावधि १२ पश्चाद्राजानिहंतव्यःकृतवीर्यात्मजो बली ॥ एकविंशतिवारंचकार्यानिःक्षत्रियामही १३ इत्थमाज्ञापयन्मह्यंजननीरेणुकामम ॥ इत्यर्थमिहसंप्राप्तस्तस्मात्कुरुकृपांमयि १४ ॥ ब्रह्मोवाच ॥

॥ इतिरामवचःश्रुत्वारेणुकायाःसखामुनिः ॥ शोकसंविग्नहृदयोराममूचइदंवचः १५ ॥ दत्तात्रेयउवाच ॥ यद्गृहेभुक्तमत्यंततेननेशाविरोधिता ॥ यदिदुष्टेनसाकारिद्रष्टातत्फलमंतिकात् १६ इदानींतुतयोःसम्यगौर्ध्वदेहिकमाचर ॥ ब्रह्मोवाच ॥ ततआश्रममागत्यदत्तात्रेययुतस्तुसः १७ रामश्चकारभक्त्यैवपित्रोरुत्तरकर्मतत् ॥ दत्तात्रेयोक्तमंत्रैःसद्वितीयदिवसावधि १८ समाप्तेकर्मणिमुनिर्गंतुंकोल्हापुरंमनः ॥ चक्रेतदाब्रवीद्रामःकदायातिभवान्पुनः १९ मुनिःप्रोचेयदात्वंमेस्मरणंवैकरिष्यसि ॥ एहिदत्तात्रेयइतितदामांद्रक्ष्यसेनघ २० कृत्वाकर्मव्रजत्येवभिक्षितुंसदिनेदिने ॥ अशौचिनोनभोक्तव्यमन्नमित्याभिचिंतयन् २१ पंचमेदिवसेकर्मसमाप्यमुनिपुंगवः ॥ गृहीत्वाज्ञांगतोयावत्तावद्ब्याघ्रःसमाययौ २२ मातर्मातःक्वयास्यद्येत्येवंचुक्रोशतद्भयात् ॥ आविराभूत्तदामातारेणुकारामवाक्यतः २३ असंपूर्णशिरोमात्रापुत्रस्नेहवशेनहि ॥ यदिद्वादशरात्रात्साहूतास्याद्भार्गवेणतु २४ आगतास्यात्सासंपूर्णासर्वावयवशोभिनी ॥ उवाचतंकिमाहूतावदबालप्रयोजनम् २५ आलिलिंगतदास्नेहाद्रामंस्नुतपयोधरा ॥ दत्तात्रेयःपुनरगात्षष्ठेथदिवसेमुनिः २६ अपश्यद्रेणुकांतत्रतादृशींराममब्रवीत् ॥ मध्यएवकिमाहूतान्यूनदेहासमागता २७ सपिंडीकरणादूर्ध्वंयद्याहूतातदाखिला ॥ आगतास्याद्रेणुकेयंतवस्नेहाद्द्विजर्षभ २८ रामउवाच ॥ ॥ बालभावाद्ब्रह्मन्स्वभावान्मातरित्यहम् ॥ उक्तवान्मुनिशार्दूलदृष्टवानीदृशीमिमाम् २९ वृषोत्सर्गंचकृतवानेकादशदिनेद्विजः ॥ सपिंडीकरणंचैवद्वादशेकृतवान्द्वयोः ३० ततःपरेह्निपाथेयंश्राद्धंपुण्याहवाचनम् ॥ ददौदानान्यनेकानिब्राह्मणेभ्योयथार्हतः ३१ जमदग्निर्दिव्यदेहोब्रह्मलोकमथागमत् ॥ तस्थौसारेणुकाभूमौस्थानेस्थानेचतादृशी ३२ पूरयत्यखिलान्कामान्जनानांभक्तिकारिणाम् ॥ माहात्म्यंविस्तृतंतस्याःस्कांदेप्रोक्तंविशेषतः ३३ अतिविस्तरभीत्यात्रनप्रोक्तंमुनिसत्तम ३४ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडरामोपाख्यानेएकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ ७ ॥ ॥ व्यासउवाच ॥ ॥ कथंरामोबालएवकृतवीर्यसुतेनह ॥ एकाकीबहुसैन्येनसहस्रभुजशालिना १ अजयत्तंमहावीरंतन्मेकथयविस्तरात् ॥ ॥ कउवाच ॥ ॥ एकस्मिन्नदिवसेरामोमातरंपरिपृष्टवान् २ ॥ ॥ रामउवाच ॥ ॥ यस्माद्दिंद्रादयोदेवाबिभ्यतित्रासकंपिताः ॥ अनंतयस्यसैन्यंतच्चतुरंगसमन्वितम् ३ कथंविजेष्येतंमातरुपायंमेखिलंवद ॥ एकविंशतिवारंचकथंनिःक्षत्रियांधराम् ४ करिष्येवदतत्सर्वंत्वत्प्रसादाज्जयोभवेत् ॥ अतुलाममकीर्तिश्चसर्वलोकेषुविश्रुता ५ ॥ ॥ मातोवाच ॥ ॥ विजयस्तेभवेत्पुत्रशंकराराधनंकुरु ॥ तुष्टेतस्मिन्महादेवेसर्वंसेत्स्यतिवांछितम् ६ इतितद्वचनंश्रुत्वारामःकैलासमाययौ ॥ प्रणम्यमातृचरणौआशिषंप्रतिगृह्यच ७ तत्रापश्यन्महादेवंरत्नसिंहासनेस्थितम् ॥ बद्धांजलिपुटोरामोनत्वातुष्टावतंतदा ८ ॥ रामउवाच ॥ नमोदेवदेवेशगौरीशशंभोनमोविश्वकर्त्रेनमोविश्वभर्त्रे ॥ नमोविश्वहर्त्रेनमोविश्वमूर्त्तेनमोविश्वयाम्नेनमश्चंद्रधाम्ने ९ नमोनिर्गुणायामलज्ञानहेतोनिराकारसाकारनित्यायतेस्तु ॥ नमोवेदवेदांतशास्त्रातिगायनमोव्यक्तव्यक्तात्मनेसत्स्वरूप १० गुणत्रयप्रबोधायगुणातीतायतेनमः ॥ नमःप्रपंचविदुषेप्रपंचरहितायते ११ ॥ कउवाच ॥

इतिस्तोत्रंसमाकर्ण्यपरितुष्टोमहेश्वरः ॥ उवाचराममामंत्र्यवृत्तांतोवाक्यामृतेनते १२वरंवृणीष्वमत्तस्त्वंयंयंकामयसेहृदि ॥ जानामिजामदग्न्यंत्वांरेणुकातनयंद्विज १३ ॥ रामउवाच ॥ कार्त्तवीर्येणदुष्टेनकामधेनुमपेक्षता ॥ जमदग्निर्हतोरोषादपराधंविनाप्रभो १४ रेणुकाताडिताबाणैःसमंताज्जननीमम ॥ एकविंशतिसंख्याकै र्मुक्त्वापिसेनयासह १५ जहितंदुष्टनृपतिमितिमात्रानियोजितः ॥ त्वामहंशरणंयातउपायंवदतद्वधे १६ त्रिःसप्तवारंतेनैवकुर्यांनिःक्षत्रियांमहीम् ॥ कउवाच ॥ एवंविदिततत्त्वार्थोमहादेवोजगादतम् १७ आलोक्यप्रणिधा नेनजयोपायंसुखावहम् ॥ षडक्षरंमहामंत्रंद्विरदाननतोषकम् १८ कथयामासरामायजपंकुरुप्रयत्न तः ॥ लक्षमात्रंचहोमंचदशांशेनसमाचर १९ तर्पणंतद्दशांशेनतद्दशांशेनभोजनम् ॥ ब्राह्मणानांमहाभक्त्याप्रसन्नोभविताभुवि २० गजाननोदेवदेवःसर्वकार्यक रिष्यति ॥ इतितद्वचनंश्रुत्वाप्रणम्यभवमादरात् २१ आज्ञांगृहीत्वारामोसावचलायांभ्रमन्भ्रमन् ॥ कृष्णायाउत्तरेदेशेपश्यत्स्थानमनुत्तमम् २२ नानावृक्षल ताजालैरभिरामंसुसिद्धिदम् ॥ तत्राकरोदनुष्ठानंयथोक्तंतेनशंभुना २३ इंद्रियाणांचमनसोवृत्तिंस्थाप्यगजानने ॥ आवर्त्तयन्महामंत्रमेकांगुष्ठस्थितोद्विजः २४ जुहावतर्पयामासभोजयामासवैद्विजान् ॥ दशांशेनदशांशेनदशांशेनयथाक्रमम् २५ ततःप्रसन्नोभगवानाविरासीद्गजाननः ॥ चतुर्भुजोमहाकायोमहामायोतिसुं दरः २६ नागयज्ञोपवीतीचनानालंकारशोभितः ॥ मुकुटीकुंडलीभ्राजच्चारुगंडोलसन्मुखः २७ मुक्ताप्रवालमालाभिर्भ्राजद्वक्षामहाभुजः ॥ परशुंकमलंद तंमोदकांश्चदधद्गुजैः २८ पुष्करंपुष्करेधृत्वाभ्रामयन्स्वेच्छयाविभुः ॥ प्रभयाभासयन्सर्वादिशोविदिशएवच २९ ददर्शरामोकस्मात्तंन्यमीलयतचाक्षिणी ॥ तत्तेजसाप्रतिहतेततस्तुष्टावतंद्विजः ३० ॥ रामउवाच ॥ सहस्रादित्यसंकाशनमस्तेजगदीश्वर ॥ नमस्तेसर्वविद्येशसर्वसिद्धिप्रदायक ३१ विघ्नानांपतयेतु भ्यंनमोविघ्ननिवारण ॥ सर्वांतर्यामिणेतुभ्यंनमःसर्वप्रियंकर ३२ भक्तप्रियायदेवायनमोज्ञानस्वरूपिणे ॥ नमोविश्वस्यकर्त्रेतेनमस्तत्पालकायच ३३ निवारयमहाविघ्नंतपोनाशकरंमम ॥ कउवाच ॥ इतिस्तुतिंसमाकर्ण्यसौम्यतेजागजाननः ३४ उवाचरामंसंभ्रांतंस्वस्यैवातिग्मतेजसा ॥ गणेशउवाच ॥ यंध्यायसिदिवारात्रौमंत्रंजस्वाषडक्षरम् ३५ वरंदातुंसमायातःसोहंरामतवाधुना ॥ वरंवृणीष्वमत्तस्त्वंयद्यद्वांछसिचेतसा ३६ ब्रह्मांडानामनेकानांसृष्टापाता पहारकः ॥ नैवजानंतिमेरूपंब्रह्माद्यामुनयोपिच ३७ राजर्षयश्चसर्वेपिसोहंतेदर्शनंगतः ॥ रामउवाच ॥ योप्रमेयोखिलाधारःसृष्टिसंहारकारकः ३८ योन वेदैर्नतपसानयज्ञैर्व्रतसंचयैः ॥ नदानैर्नैवयोगैश्चजनानांदृष्टिगोचरः ३९ सोहंत्वांहिमयादृष्टोनुग्रहात्तवविघ्नपः ॥ किमन्यद्वरयेदेवभक्तिंदेहिनिजांदृढाम् ४० ग णेशउवाच ॥ ॥ भविताममभक्तिस्तेदृढारामद्विजोत्तम ॥ प्रलोभितस्यापिवरैर्नतेबुद्धिःसुविह्वला ४१ परशुंमेगृहाणत्वंसर्वशत्रुनिबर्हणम् ॥ नामतेपरशुरा मेतित्रैलोक्येख्यातिमेष्यति ४२ ॥ कउवाच ॥ एवंतस्मैवरंदत्वापरशुंचगजाननः ॥ पश्यतांसर्वलोकानामंतर्धानंययौतदा ४३ रामोपिस्थापयामासमहा गणपतिंतदा ॥ ब्राह्मणैर्वेदवेदांगशास्त्रविद्भिःसमंमुदा ॥ ब्राह्मणान्भोजयामासदत्वादानान्यनेकशः ४४ प्रासादंकारयामासरत्नस्तंभयुतंदृढम् ॥ संपूज्यतंपरि

क्रम्यप्रणिपत्यगजाननम् ४५ रामःप्रसन्नमनसाप्रययौनिजमंदिरम् ॥ ततोरामोजुहावोच्चैःकार्तवीर्यधरापतिं ॥ ४६ ॥ युद्धेतुशातयामासराज्ञोबाहुसह
स्रकम् ॥ निःक्षत्रियांचपृथिवींचक्रेत्रिःसप्तवारतः ४७ ब्राह्मणेभ्योददौपृथ्वींयज्ञंकृत्वासदक्षिणम् ॥ पुपूजुस्तंतदालोकाज्ञात्वाविष्णुंतमीश्वरम् ४८ दक्षाप
राक्रमंतस्यसर्वदेवातिगंदृढम् ॥ एवंनानाविधोब्रह्मन्महिमातेनिरूपितः ४९ गजाननस्यदेवस्यसंक्षेपेणमयासुत ॥ निखिलेननशेषोपिक्षमोवक्तुंमुनी
श्वर ५० उपासनाखंडमिदंशृणुयान्मानवोभुवि ॥ सर्वान्कामनवाप्नोतिगणेशंधामचाप्नुयात् ५१ यथेष्टंरमतेत्रयावदाभूतसंप्लवम् ५२ इतिश्रीगणेशपुरा
णेउपासनाखंडेरामवरदानंनामद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ ॥ ॥ ध ॥ ॥ मुनिरुवाच ॥ ॥ कस्मिन्स्थानेतपोकारिरामेणपरमाद्भुतम् ॥
तन्मेकथयलोकेशतृप्तिर्मेनास्तिशृण्वतः १ ॥ ॥ कउवाच ॥ ॥ मयूरेश्वरनाम्नायत्क्षेत्रंख्यातंचतुर्युगे ॥ यत्रावतीर्णोदेवेशोमयूरारूढएवसः २ कमला
सुरनामानमहनद्दैत्यपुंगवम् ॥ यस्मान्मयूरमारूढोमयूरेशइतिस्फुटम् ३ संस्तुतोदेवमुनिभिर्लोकेतांख्यातिमागमत् ॥ तत्रानुष्ठानमकरोदवापपरशुंततः ४
स्वयंपरशुरामोभून्नाम्नाख्यातस्त्रिविष्टपे ॥ इतिहासंप्रवक्ष्यामिशृणुतंमुनिसत्तम ५ तारकोनामदैत्योभून्महाबलपराक्रमः ॥ दिव्यवर्षसहस्रंसतपस्तेपेसुदारु
णम् ६ ततःप्रसन्नोब्रह्मास्मैददौसर्वाभयंद्विज ॥ देवर्षियक्षगंधर्वोरगराक्षसहस्ततः ७ तच्छस्त्रास्त्रगणान्मृत्युर्नतेकापिभवेदिति ॥ उत्पत्स्यतेयदास्कंदस्ततस्ते
मरणंभवेत् ८ इतितद्वरमाकर्ण्यबलगर्वसमायुतः ॥ तारकोपीडयल्लोकांस्त्रैलोक्येवसतोमुने ९ वेदाध्ययननिष्ठांश्चतपोनुष्ठानकारिणः ॥ अग्निहोत्रतानन्या
न्कारागारेक्षिपद्द्विजान् १० सर्वान्राज्ञोथनागांश्चवशेकृत्वादिवंययौ ॥ इंद्रादयस्तदादेवाहिमाचलगुहांगताः ११तद्भयान्नाभवत्कापियजनंपूजनंतथा ॥ अह
मेवेश्वरोदेवोब्राह्मणःकुलदेवता १२ अहंनमस्यःपूज्यश्चनान्योजगतिवर्त्तते ॥ यश्चान्यान्प्रणमेत्क्वापिपूजयेद्वाकदाचन १३ सदंड्यस्ताडनीयःस्याद्रच्छेद्वायम
सादनं ॥ एवंसर्वेषुलोकेषुख्यापयामासदूततः १४ ततःसर्वेजनास्त्यक्ताजाताःसज्जनवर्जिताः ॥ निःस्वाध्यायवषट्काारायज्ञदानविवर्जिताः १५ उच्छिन्नकुलधर्मा
श्चस्वाचाररहिताःखलाः ॥ मुनयःसाधवःसर्वेगिरिगह्वरमाश्रिताः १६ देवंतेप्रार्थयामासुःकथंदैत्योविवर्द्धितः ॥ विनात्वांशरणंशंभोयामःकंजगदीश्वरम् १७
निर्मातारक्षिताधातासंहर्त्ताजगतांविभो ॥ दावानलोवनमिवदहतेस्मान्सदर्पतः १८ यदितेसंजिहीर्षास्यात्संहरस्वस्वयंजगत् ॥ नोचेत्संहरदैत्यंत्वंतारकंसर्वपी
डकं १९ एवंसंप्रार्थ्यतेपुस्तेदुष्करंतपउत्तमं ॥ पत्रभक्ष्यावायुभक्ष्यानिराहाराजलाशिनः२०एवंस्थितेषुमुनिषुतेनाज्ञातेषुदैत्यराट् ॥ ऐंद्रंपदंसमास्थायब्रह्माणंसम
ताडयत् २१ विष्णुस्ततोगमत्क्षीरसागरंनिद्रितुंमुने ॥ त्यक्त्वाकैलासमगमच्छंकरोपिगुहांतरम् २२ दिक्पालादिग्गजाश्चापिनानागह्वरमाश्रिताः ॥ तेषां
स्थानेस्थापयत्सदैत्यानन्यांश्चदैत्यराट् २३ अचलामचलस्तिष्ठन्पालयामासवैप्रजाः ॥ गर्जतेस्वस्वभावेनकंपतेथत्रिविष्टपं २४ ततइंद्रादयोदेवास्तुष्टुवुर्गि
रिगह्वरे ॥ गिरिशंगिरिजानाथंगिरागंभीरयामुदा २५ ॥ देवाऊचुः ॥ देवाधिभूमिगगनेनशशिस्वरूपवाय्वग्निरूपयजमानजलस्वरूप ॥ त्वंस्थावरानथचरा

न्सृजसेऽवसीशत्वंसर्वमेवहरसेनिजयेच्छयेश २६ तन्नोचितंत्वयिपरेपरदुःखहारिन्स्वीयंयशःपरगतंबहुधाविधकर्तुं ॥ तन्नाशयैनमथवासकलान्मुनींश्च
दत्वान्द्वयेाश्चभजेनपीरीवष्टचित्तान् २७ कंवाव्रजेमशरणंत्वदृतेगिरीशकंवाभजेमभगवंस्त्वदृतेमहेश ॥ कंवावदेमट्टजिनार्दनपार्वतीशकोवाविभुंप्रभवति
त्वदृतेखिलेश २८ ॥ ॥ कउवाच ॥ एवंतेतुष्टुवुर्यावच्छुश्रुवुस्तावदेवहि ॥ नभोवाणींसर्वदेवाहरपुत्रोयदाभवेत् २९ तदास्यनाशोभवितायत्नंकुरुततत्रवै ॥ नभो
वाणींसमाकर्ण्यसर्वेहर्षसमन्विताः ३० कैलासंदेवनिलयमापुरिंद्रादयःसुराः ॥ नापश्यच्छंकरंतत्रददृशुःपुरतोमराः ३१ मूलप्रकृतिरूपांतामुमांसर्वेविजिज्ञपुः ॥
तारकेतारकज्ञानप्रदेतारयतारकात् ३२ त्रैलोक्यपीडकाद्दुष्टात्पदभ्रष्टान्मुनीन्सुरान् ॥ तथाविचिंत्यतांमातस्तस्यनाशोभवेद्यथा ३३ मातस्त्वां
प्रणमामदेवजननींत्रैलोक्यरक्षाकरेशर्वाणित्रिपुरेपरात्परकलेब्रह्मादिभिःसंस्तुते ॥ त्वंवेदैरनिरूपितेकुरुजगत्कल्याणमीशप्रियेस्वेच्छोपात्तसुविग्रहेसुरहरे
वैश्वादिभूतेनघे ३४ ॥ ॥ कउवाच ॥ ॥ एवंसंप्रार्थितादेवीविश्वमाताजगादतान् ॥ नभोवाणीमयाज्ञाताशंकरःशंकरिष्यति ३५ सहैवयांतुसर्वेपि
मयायत्रसशंकरः ॥ परंनियममास्थायकुरुतेपरमंतपः ३६ इत्युक्त्वासर्वदेवान्साभिलीवेषमधारयत् ॥ यांदृष्ट्वापरमोयोगीकामबाणार्दितोभवेत् ३७ देवा
अपितदाकेचिज्जातामदनविह्वलाः ॥ उर्वशीमेनकारंभापूर्वचित्तीरतिस्तथा ३८ लज्जितातांनिरीक्ष्यैवसर्वावयवसुंदरां ॥ तेदेवाःसाचगिरिजाप्राप्ताब्रह्मनशि
वांतिकम् ३९ स्थाणुंतंस्थाणुभूतंचध्याननिश्चललोचनं ॥ ध्यायंतंमनसाब्रह्मजपंतंनिष्परिग्रहं ४० ददृशुःसर्वदेवास्तेभिलीचापित्रिलोचनं ॥ ततऊचेखि
लान्देवानुमोपायंसुखावहम् ४१ देहातीतइवास्तेसौतपोनिष्ठःसदाशिवः ॥ एतस्यदेहभावार्थंकामंविज्ञापयंतुच ४२ तेनेषुणायदाविद्धएकनिष्ठःसदाशिवः ॥
यास्यतेदेहभावंसतदाकार्यंभविष्यति ४३ ततोदेवाःसर्वएवकामंसस्मरुरुत्कटं ॥ समागतंतमूचुस्तेस्वकार्यकृतनिश्चयाः ४४ प्रार्थयामासुरपरेस्वकार्यायम
नोभवम् ॥ विभुस्त्वमसिलोकानांचरेषुस्थावरेषुच ४५ त्वयैवजायतेसृष्टिस्त्वयाव्याप्तमिदंजगत् ॥ अबलाःकामिनःसर्वेत्वयैवबलवत्तराः ४६ त्वयाविना
वृथासर्वंजगत्स्थावरजंगमम् ॥ अतस्त्वयैवकर्त्तव्यंसर्वेषांकार्यमुत्कटम् ४७ ॥ कामउवाच ॥ यद्यप्यहंविसामाग्निस्तथायुष्मत्प्रसादतः ॥ करिष्यामिवचः
कार्यमादेहपतनावधि[1] ४८ सुमंधनुर्मरालाज्येषुःकाटाक्षोथयोषितः ॥ विजेष्येऽथापिसकलानमराञ्छंकरावधि ४९ वसंतंप्रतिलभ्यैवसहायंसकलंसुराः ॥
कउवाच ॥ एवमुक्त्वागतःकामोयत्रास्तेसौसदाशिवः ५० मोहितुंशंकरंदेवदेवानांकार्यसिद्धये ५१ इतिश्रीगउपासनाखण्डेऽयशीतितमोऽध्यायः ॥ ८३ ॥
॥ कउवाच ॥ एवमुक्त्वागतःकामःसुरकार्यार्थसिद्धये ॥ अपश्यच्छांकरंस्थानंवृक्षवल्लीसमाकुलम् १ सिंहशार्दूलजुष्टंचपक्षिश्वापदसंयुतम् ॥ स्वयंच
निर्ममेमायावाटिकांतद्वक्षणेनसः २ सरोवराणिभूरीणिसुधारूपजलानिच ॥ अनेककुसुमान्वृक्षानागव्यूतिसुगंधिभीः ३ जंब्वाम्रबदरीवृक्षान्सुपक्वफलशा

१ पतनादपि इतिपाठान्तरम्

लिनः ॥ तथैवरंभापनसानारिकेलीःसखर्जुरीः ४ एलालवंगमारीचवृक्षानन्याननेकशः ॥ अगृह्यमाणोगंधोसौहरनासापुटंययौ ५ उषःकालेहरोपश्यज्ज्यो
त्स्नाजलमनोहरं ॥ अनेकफलपुष्पाढ्यंकामकाननमद्भुतम् ६ तदैवभेदयामासमानसंशूलिनस्तुसः ॥ स्वीयामशोकवनिकांधिक्चक्रेमनसाशिवः ७ देहभा
वंगतोदेवश्चिंतयामासकारणम् ॥ कृतंकेनतपोविघ्नंकृतमेतद्वनंशुभम् ८ अकस्माद्रचितंकेनदुष्टेनेदंगतायुषा ॥ आबद्धभ्रुकुटीरोषादारक्तनयनोदरः ९ का
मस्तुभयसंत्रस्तोलीनःक्वापिनगृह्यते ॥ इंद्रादीनांससस्मारस्मृतास्तेनात्रतेययुः १० विमानानिसमारूढाःकार्यसिद्धीच्छयासुराः ॥ शिवेनदृष्टेतावन्मदनो
तिलघुःकृशः ११ उद्घाटयंस्तृतीयंसनेत्रंदग्धंमनोभवम् ॥ चकंपेपृथिवीसर्वास्वर्गःपातालमेवच १२ माजहीतिब्रुवन्देवायावत्तावत्सनेत्रजः ॥ चकारभस्म
सात्कामंभस्ममात्रावशेषितम् १३ ततोभिलीमहेशानंप्रार्थयामाससादरम् ॥ नमस्कृत्वांजलिंबद्ध्वात्रैलोक्यहितकाम्यया १४ त्रैलोक्यदाहकंवह्निमुपसंह
रशंकर ॥ ब्रह्मलब्धवरोदैत्यस्तारकोतिमहाबली १५ आक्रांतंतेनत्रैलोक्यंनिःस्वाध्यायंनिराहुति ॥ स्थानच्युताःसुराःसर्वेत्वांदृष्ट्वातपसिस्थितम् १६ त्वर
याकाममामंत्र्यदेहभावायतेनव ॥ अप्रेषयन्सर्वेभस्मजातःश्रेष्ठापराधतः १७ इदानींदेवरक्षास्मांस्त्वामेवशरणंगतान् ॥ विख्यातस्त्रिषुलोकेषुशरणागतपा
लकः १८ क्षमस्वकृपणानांत्वंदेवानांशरणैषिणां ॥ अपराधंमहादेवकरुणाकरशंकर १९ ॥ ॥ कउवाच ॥ ॥ इतितस्यावचःश्रुत्वास्वांघ्रिस्थशिरसो
मुने ॥ जगादहास्यवदनोवह्निसंहृत्यशंकरः २० उत्तिष्ठोत्तिष्ठदेवानांरक्षणंकृतमद्यमे ॥ पादयोःपतितायास्तेवचसाप्रणयेनच २१ ततआलिंग्यसहसाभिली
मंकमथानयत् ॥ वृषमारुह्यचतयासार्द्धंकैलासमागमत् ॥ २२ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखण्डेकामदहनोनामचतुरशीतितमोऽध्यायः ॥ ८४ ॥
॥ कउवाच ॥ ॥ शिवस्यालिंगनाद्विल्लीमदनानलदीपिता ॥ नापक्वापिसुखंदेवीनिर्जलेशफरीयथा १ पतिताजलमध्येसाशीतलोशीरशालिनी ॥ न
शर्मलेभेतत्रापिस्थलेनिद्रांनचालभत् २ कर्पूरचंदनंतस्याजधिकंतापमादधे ॥ नशीतलपदार्थोस्याःकोपिसंतोषमादधे ३ एवंबहुतिथेकालेसास्थिचर्मावशे
षिता ॥ ततोगिरिशमागम्यगिरिजागिरमब्रवीत् ४ नत्वंमृशसिमांदेवकामवस्थांगतास्मिह ॥ दग्धोपिमदनोमह्यमत्यंतंपीडयत्यहो ५ नानोपायाःकृतास्त
स्यशांतयेनचसाभवत् ॥ येनोपायेनशांतिःस्यात्सतंकुरुममप्रभो ६ इतिवाक्यंसमाकर्ण्यप्रियायाःप्रियकृद्वरः ॥ रहस्येतांकरेकृत्वापर्यंकेपर्यवेशयत् ७
रेमेतयायथेष्टंसमदेननवशीकृतः ॥ मृतेनापिकृतंतेनमहत्कार्यंसुरेरितम् ८ अनंगेनसमोनैवधन्वीतियशआप्तवान् ॥ तयोस्तुक्रीडतोयाताःषष्टिसाहस्रव
त्सराः ९ भ्रष्टस्थानामुनिसुराःश्रुत्वामदनचेष्टितम् ॥ कैलासंपुनरायातास्तत्रक्रीडारतंहरम् १० ज्ञात्वातूष्णींस्थितास्तत्रचिंताव्याकुलचेतसः ॥ तारकासुरभी
तास्तेपुनर्गह्वरमागताः ११ कदावधोभवेदस्यकदास्थानानियामच ॥ करिष्यतिकदाशंभुरस्माकंदुःखनाशनम् १२ इतिचिंतार्णवेमग्नायावद्ब्रह्मादयःसुराः ॥ ता
वदूचेसुराचार्योवाक्यंमेशृणुतानघाः १३ प्रेषयंत्वखिलावह्निंरूपांतरधरंहरम् ॥ सहरंबोधयित्वाशुभवत्कार्यंभविष्यति १४ ततस्तेवह्निमाकार्यतुष्टुवुर्विविधै

तः २ शुचौमंडपिकांकृत्वाकदलीस्तंभमंडिताम् ॥ इक्षुचामरपुष्पाढ्यामादर्शावलिशोभिताम् ३ तन्मध्येकलशंस्थाप्यवस्त्रयुग्मेनवेष्टितम् ॥ तत्रचाष्टद
लंपद्मंकारयेच्चंदनेनतु ४ गुरोराज्ञांगृहीत्वाचपूजाद्रव्याणिप्रोक्षयेत् ॥ उपचारैःषोडशभिःपूजयेद्गणनायकम् ५ कांचनंराजतंवापिस्वस्वशक्त्याविनिर्मित
म् ॥ एकविंशतिपक्वान्नैरेकविंशतिसंख्यकैः ६ गजाननायदेवायनैवेद्यंपरिकल्पयेत् ॥ एकविंशतिमुद्रास्तुदक्षिणार्थंनिवेदयेत् ७ सौवर्णीराजतीवापिवित्तशा
ठ्यविवर्जितः ॥ एकविंशतिदूर्वाश्चश्वेतावाहरिताअपि ८ अर्पयेद्देवदेवायमंत्रपुष्पांजलिंतथा ॥ ब्राह्मणान्वेदविदुषःपूजयेदेकविंशतिम् ॥ भोजयेत्तादृशान्ने
नतावद्दानानिदापयेत् ॥ नमेत्क्षमापयेत्पश्चादच्छिद्रमितिवाचयेत् १० पार्थिवस्यगणेशस्यविधानंकथितंपुरा ॥ पूजाप्रकारःसोप्यत्रसर्वएवउदाहृतः ११
कथांतामेवशृणुयात्पश्चाद्बंधुयुतःस्वयम् ॥ ध्यायन्गणेशंभुंजीतमौनेनोपवसेतवा १२ एवंमासव्रतंकुर्याद्यावद्वाद्रचतुर्थिका ॥ तस्यांमहोत्सवःकार्योयथा
विभवमादरात् १३ पूर्वोक्तेनविधानेनपूजयेद्गणनायकम् ॥ रात्रौजागरणंकार्यंगीतवादित्रनिःस्वनैः १४ पुराणश्रवणैरन्यैर्नानाख्यानवरैरपि ॥ सहस्रनाममं
त्रेणस्तुवीताद्विरदाननम् ॥ प्रभातेविमलेस्नात्वापूजयेद्विरदाननम् १५ ब्राह्मणान्भोजयेद्भक्त्याशतंचैवैकविंशतिम् ॥ गोभूकांचनवस्त्राणिभूषणानिधनानि
च १६ तेभ्योदद्याद्यथाशक्तिदीनांधकृपणेषुच ॥ अशक्तौभोजयेदेकविंशत्येकंतुवाडवान् १७ ब्राह्मणायप्रदातव्यामूर्त्तिश्चेद्धातुनिर्मिता ॥ अन्यथापरमोत्सा
हैर्जलमध्येविसर्जयेत् १८ दिव्यवादित्रनिर्घोषैर्नरयानस्थितांचताम् ॥ छत्रध्वजपताकाभिर्वेदगीतादिनिस्वनैः १९ बालानांदंडयुद्धैश्चतांविसृज्यगृहंव्रजेत् ॥
व्रतमेवंतुयःकुर्यादेकवारंषडानन २० सर्वान्कामानवाप्यैवगाणेशंपदमाप्नुयात् ॥ ब्रह्मणाकारिसृष्ट्यर्थंएकार्णंजपतामनुम् ॥ प्रत्यक्षोविकटस्तस्यसामर्थ्यंवि
विधंददौ २१ विष्णुनाप्रापिशक्तिश्चपालनेकुर्वताव्रतम् ॥ षडक्षरंमहामंत्रंजपतापरमाद्भुतम् २२ स्वेच्छावतारसामर्थ्यंततःप्राप्तंषडानन ॥ मयाप्यकारिपुत्रै
तज्जपताष्टाक्षरंमनुम् २३ वृत्रंचशंबरंदैत्यंशक्रेणमदनेनच ॥ जिघांसताकारिव्रतंतौतौजेतुंचशेकतुः २४ नानासामर्थ्यवानस्मिसंहरामिजगत्त्रयम् ॥ यक्षगंध
र्वमुनिभिःकिन्नरोरगराक्षसैः ॥ अकारिस्वेष्टसिद्ध्यर्थंसिद्धचारणमानवैः २५ एतत्त्वंस्कंदवरदचतुर्थीव्रतमाचर ॥ भविष्यसिरणेऽजेयोविख्यातोभुवनत्रये ॥
षडक्षरंचमंत्रंतेददामिवरदस्यह ॥ ॥ ब्रह्मोवाच ॥ ॥ मुहूर्त्तेददौतस्मैशिवोदीक्षांषडक्षरीं २७ तदैवसययौस्कंदस्तपस्तप्तुंद्विजोत्तम ॥ सुनि
र्मलतरेदेशेवृक्षवल्लीसमाकुले २८ बहुमूलफलेरम्येसरोवापीसुशोभिते ॥ एकपादस्थितःस्कंदस्तपस्तेपेसुदारुणम् २९ व्रतंचकारविधिवद्यथोक्तंशंभुनापुरा॥
अनुष्ठानाच्चमंत्रस्यव्रतस्यास्यप्रभावतः ३० प्रसन्नोभूत्तदैवास्यपरमात्मागजाननः ॥ दर्शयामाससेनान्येयोगिध्येयमनुत्तमम् ३१ निजंरूपंमहातेजाश्चतुर्भु
जविराजितम् ॥ महामुकुटसंशोभिकुंडलांगदशोभितम् ३२ एकदंतंशालचंद्रंशुंडादंडविराजितम् ॥ पाशांकुशकरंमालाद्यंतरंशुभोभनम् ३३ मुक्तामणि
गणोपेतंसर्पराजयुतोदरम् ॥ दिव्यवस्त्रपरीधानंदिव्यगंधानुलेपनम् ३४ अनेकसूर्यसंकाशतेजोज्वालासुदीपितम् ॥ ददर्शपुरुषस्तत्रविस्मयोत्फुल्ललोचनः ३५

व्याकुलीभूतचित्तोसौकिमेतादित्यचिंतयत् ॥ मयायच्चिंत्यतेन्यद्धातद्धाविद्यांनचाप्यहम् ३६ततःपप्रच्छतूष्णींसकोभवार्नाकंचनामते ॥ गजाननउवाच ॥ चिंत्य
तेयोदिवारात्रौत्वयैकाग्रेणचेतसा ३७ सोहंप्राप्तोवरंदातुंवदतेत्ददिवांछितम् ॥ ददामितुष्टस्तपसाषडाननगजाननः ३८ ॥ स्कंदउवाच ॥ विदुर्नदेवानचशा
स्त्रकाराब्रह्मादयःशेषमुखाश्चनागाः ॥ तवस्वरूपंजगदीशसम्यगदर्शितन्मोद्विरदाननाद्य ३९ तेनैवजातःपरिपूर्णकामस्तथापियाचेतवदेववाक्यात् ॥ प
राजयोमेनकदापिभूयात्प्रत्यक्षतामोहिविचिंत्यमानः ४० अविस्मृतिःस्यात्तवपादपद्मेसर्वेषुदेवेषुवरिष्ठताच ४१ अलक्ष्योलक्षतांयातस्ततोलक्षविनायकः ॥
नम्नाख्यातोभवान्त्रत्वंभक्तकामसुरद्रुमः ॥ ॥ लक्षउवाच ॥ ॥ सर्वंतद्भवितास्कंदयद्यत्प्रार्थितमद्यमे ४२ अविस्मृतिश्चसांनिध्यंचिंत्यमानस्यमेभवेत् ॥
पराजयोरिपूणांतेदेवश्रैष्ठ्यंभविष्यति ४३ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवंवरान्ददौदेवोमयूरंनिजवाहनम् ॥ ददौस्कंदायसुप्रीतोविनयाच्चतपोबलात् ४४ म
यूरध्वजइत्येवंनामख्यातंततोभवत् ॥ गजाननउवाच ॥ मृतिंयास्यंतिहस्तात्तेतारकाद्यामहासुराः ४५ लक्षविनायकइतिनाम्नाहंभक्तवत्सलः ॥ भविष्या
मिचिरादत्रक्षेत्रेत्वद्वाक्यतोनघ ४६ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवमुक्त्वातुविकटस्तत्रैवांर्हितोभवत् ॥ ततःस्कंदोमहामूर्तिंकृत्वास्थाप्यद्विजैःसह ४७ लक्षवि
नायकइतिनामचक्रेशुभंतदा ॥ मोदकैर्लक्षसंख्याकैःपुष्पैर्दूर्वांकुरैरपि ४८ पूजयामासतांमूर्त्तिंअन्यैर्द्रव्यैस्तथाविधैः ॥ ब्राह्मणान्भोजयामासतावत्संख्यायु
तान्द्विजान् ४९ स्तुत्वानत्वाययौस्कंदःशंकरंलोकशंकरं ॥ मयूरमारुह्यततःसर्वंचाकथयन्नतं ५० मयूरध्वजइतिचनामदेवकृतंजगौ ॥ तारकासुरनाशायय
यौस्कंदःशिवाज्ञया ५१ स्मृत्वागजाननंदेवंपरिगृह्याशिवाशिषः ॥ देवसेनापतित्वेसावभिषिक्तःसुरर्षिभिः ५२ सेनानीस्तारकंदक्षायुद्धंचक्रेमहाबलः ॥
लक्षवर्षांतरेतंसमारयामासशक्तितः ५३ युद्धंतद्वर्णितुंशक्तिःशेषस्यापिनवैभवेत् ॥ तारकेनिहतेदैत्येननंदुःसर्वदेवताः ५४ मुनयोलोकपालाश्चनागाश्च
मानवास्तथा ॥ मुमुचुःपुष्पवर्षाणिस्कंदस्योपरिनिर्वृताः ५५ सर्वदेवाश्चलोकाश्चस्वंस्वंस्थानंययुस्तदा ॥ स्वाहास्वधावषट्कारान्ययापूर्वंचचक्रिरे ५६ ॥
ब्रह्मोवाच ॥ ॥ एवंप्रभावोदेवोसौकथितस्तेगजाननः ॥ व्रतप्रभावोपिमयायथावत्तेनिरूपितः ५७ त्रयस्त्रिंशत्कोटिसुरैरवध्योसौमहासुरः ॥
स्कंदेनानिहतःसंख्येदेवव्रतप्रभावतः ५८ इंद्रादिदेवतावृंदैःपूजनीयोभवच्चसः ॥ ॥ व्यासउवाच ॥ ॥ अनुष्ठानंकृतंतेनकस्मिन्स्थानेसमाधिना ५९ प
रमेणविशाखेनतन्मेब्रूहिप्रजापते ॥ ब्रह्मोवाच ॥ अनुष्ठानंकृतंतेनयत्रास्तेघुंसृणेश्वरः[1] ॥ प्रसिद्धोवर्ततेनाम्नाआसीत्लक्षविनायकः ॥ एलोभूत्तन्नगरेपश्चा
द्राजाभिविश्रुतः ॥तन्नाम्नानगरंख्यातंततस्तदभवन्मुने ६१ इतिश्रीगणेशपुराणेउपासनाखंडेतारकवधोनामाऽध्यायः ८७ ॥ ॥ मुनिरुवाच ॥ ॥ श्रुतमा
ख्यानकंब्रह्मन्गजाननव्रताश्रयं ॥ दग्धश्चेन्मदनस्तेनशंकरेणरुषाग्निना १ दृश्यतेसर्वलोकेषुमदनोद्यापितत्कथं ॥ एतत्कथयमेसर्वंविस्तराच्चतुरानन २ ॥

१ घृष्णेश्वर इतिपाठान्तरम् ।

स्तवैः ॥ ॥ देवाऊचुः ॥ ॥ त्वत्तोयज्ञक्रियाब्रह्मन्संस्काराःसर्वएवहि १५ अपांत्वमसिहेतुश्चदेवानांमुखमेवच ॥ अग्निहोत्रप्रणेतात्वंगार्हपत्यादिनाम
भिः ॥ १६ ॥ त्वमेवपिबसीशाब्धिवारिनित्यंमहत्तरम् ॥ त्वमेवपचसेन्नृणांजठरेषड्रसानपि १७ त्वमेवसर्वजंतूनांसंधौसंधौविचेष्टसे ॥ त्वयात्यक्तंप्रेत
संज्ञांलभतेदह्यतेत्वया १८ हेतुस्त्वमसिदेवेशजंतूनांप्राणधारणे ॥ त्वयाद्भिश्चविनानान्नंपक्तुंशक्यंनचक्वचित् ॥ त्वमेवब्रह्मारुद्रश्चसूर्यश्चानेकरूपधृक् १९
त्वमेवजायसेमूलंक्रोधस्यजगदीश्वर ॥ यत्रयत्रभवेत्तेजस्तत्तद्रूपंतवैवच ॥ २० ॥ अतस्त्वांप्रार्थयामोद्यत्रिलोक्याउपकारक ॥ त्रैलोक्याक्रमणं
तेनतारकेणकृतंविभो २१ जानासितांनभोवाणींकामस्यापिचतांगतिं ॥ पार्वतीहरयोर्बोधंचिरंक्रीडानिमग्नयोः २२ कुरुगत्वान्यरूपेणभिक्षांयाचस्वतत्रवै
एवंकृतेजगत्कार्यंअस्माकंचभविष्यति ॥ २३ ॥ ॥ ब्रह्मोवाच ॥ ॥ इतिदेववचःश्रुत्वाकाषायवसनोद्विजः ॥ भूत्वाशुष्मायथौतत्रयत्रास्तांपार्व
तीश्वरौ २४ क्रीडासक्तौबहिःस्थित्वाभिक्षांदेहीत्युवाचसः ॥ त्रिवारंश्रुतशब्देनद्वाभ्यामपिश्रुतःस्वनः २५ ऊचतुर्विस्मितौतौतुपरस्परमुभौवचः ॥ परिध
त्तांशुकेस्वेस्वेकुतोत्रायंसमागतः २६ किमस्मैचप्रदातव्यमितिचिंतांचचक्रतुः ॥ उमांजलावधाद्वीर्यमशक्तास्यधारणे २७ जानतीभाविनंचार्थंदंदौसाभि
क्षुकायतत् ॥ भूमौत्यक्तंदहेदेतत्त्रैलोक्यंसचराचरम् २८ हरवीर्यमित्यपिबद्वह्निःशापभयात्तयोः ॥ गर्भवाननलोजातोलज्जावानपितापवान् २९ यत्र
यत्रययौवह्निःशर्मलेभेनतत्रवै ॥ उषस्युत्थायगंगायांतुलासंस्थेदिवाकरे ३० स्नातुंयावत्समशौचादिकुरुतेतावदेवह ॥ आगताःषड्स्त्रियस्तत्रस्नातुमूर्जे
समाहिताः ३१ अग्निनायत्समुत्सृष्टंगंगेयंचहरप्रिया ॥ धारयिष्यतिशक्ताचेज्जलरूपासुशीतला ॥ ३२ ॥ शितवीर्यंचतत्ताभिःप्राशितंषड्विभागतः ॥
तास्मिन्नेवक्षणेसोग्निरंतर्द्विसमपद्यत ॥ ३३ ॥ अंशुकानिचयातानिदूरदेशंगतेनले ॥ परिधायस्ववस्त्रंतास्ततोयातानिजंगृहम् ॥ ३४ ॥ ददृशुःपतयस्ता
सांमुखान्यत्युज्ज्वलानिच ॥ गर्भिण्यइतितेज्ञात्वाज्ञानदृष्ट्यामुनीश्वराः ३५ बहिश्चक्रुर्गृहात्सर्वानप्रदर्श्यंमुखंत्विदम् ॥ ताःसमेत्यपुनर्गंगांतीरेशरमुशोभि
ते ३६ मुमुचुःस्वस्वगर्भंताःशुद्धाःस्नातागृहान्ययुः ॥ षट्सुतासुप्रयातासुस्वंस्वंगर्भंविमुच्यवै ३७ षण्मुखोद्वादशभुजोबालस्तत्रव्यजायत ॥ तस्यहुं
कारमात्रेणनिपेतुर्भानिखाद्भुवि ३८ चकंपेधरणीसर्वाशेषःपातालमेवच ॥ द्रुमाउन्मीलिताःसूर्योनीहाराच्छादितोभवत् ३९ एतस्मिन्नंतरेतत्रनारदोदिव्य
दर्शनः ॥ कैलासंगिरिशंद्रष्टुंगच्छन्मार्गेददर्शतं ४० अतिदीप्ततरंबालंदुर्दर्शंबलवत्तरं ॥ प्रणिधानेनतंज्ञात्वातूष्णींकैलासमाययौ ४१ उवाचपार्वतीशंभुं
त्तांतंसर्वमेवच ॥ जहर्षपृथिवीसर्वाज्ञात्वातंगिरिशात्मजम् ४२ देवदुंदुभयोनेदुर्गंधर्वाजगुरुद्भुतं ॥ ॥ नारदउवाच ॥ ॥ आगच्छतामयादृष्टोगौरिमार्गेत
वात्मजः ४३ षण्मुखोद्वादशभुजोसूर्यकोटिसमप्रभः ॥ गंगातीरेनिपतितस्त्यक्तस्तेषण्मुखोनुकिं ४४ कोटिकंदर्पशोभाढ्योगर्जितक्षोभिताखिलः ॥
कथंनिष्ठुरताकारिगौरिसुंदरबालके ४५ ॥ ॥ कउवाच ॥ ॥ इत्युक्त्वांतर्हितेतस्मिन्गौरीबालकमभ्यगात् ४६ इतिश्रीगणेशपुराणेउपासनाखण्डेस्कंदो

पाख्यानंनामषड्ढाशीतितमोऽध्यायः ॥ ८५ ॥ ऋषयऊचुः ॥ इत्युक्तासातादृशंबालंस्नेहस्नुतपयोधरा ॥ आलिलिंगमुदाबालंतद्वस्तहृदयासती १ तामूचेममबालो
यंगंगागंभीरनिस्वना ॥ ममायमितितांप्राहवह्निर्बालोगिरेःसुतां २ कृत्तिकाद्याश्चतांप्राहुरस्मज्जातोयमर्भकः ॥ अस्माकमेवबालोयमितिचुक्रुशुरातुराः ३
एवंविवदमानास्तायातावह्निपुरोगमाः ॥ कैलासंदेवनिलयेगिरिशंचंद्रशेखरं ४ गौरीविवेशप्रथमंकटिन्यस्तस्वबालका ॥ शिवोगृहीत्वातंस्वांकेशिरस्या
घ्रायमंत्रतः ५ रमयामासपरयामुदादेवस्त्रिलोचनः ॥ गंगावह्निःषट्स्त्रियस्तागृहंजग्मुर्यथागतम् ६ तन्नामकरणार्थायब्रह्माणंचबृहस्पतिम् ॥ आहूयशिव
ऊचेतौनामास्यक्रियतामिति ७ ब्रह्माबृहस्पतीऊचतुः ॥ कार्त्तिकेमासिजातोयंकार्त्तिकेयइतिस्फुटं ॥ नामास्यप्रथमंदेवपार्वतीनंदनोपिच ८ शरद्वीपेयमुत्प
न्नःशरजन्मातितोपिच ॥ कृत्तिकाभ्योपिजातत्वात्कार्त्तिकेयइतिस्मृतः ९ यतोस्यमातरःषट्ताःसषाण्मातुरइत्यपि ॥ अयंपुत्रस्तारकजित्तारकंचविजेष्यति १०
देवसेनापतिर्भावीसेनानीरितिशब्दितः ॥ ततएवमहासेनःषण्मुखत्वात्षडाननः ११ स्कन्नंत्रिवाररेतोयत्तेनस्कंदोयमुच्यते ॥ तयोस्तुवदतोरेवंशक्राद्याआययुः
सुराः १२ आननंदुश्चनेमुस्तंपपूजुस्तुष्टुवुर्जगुः ॥ व्यानशेरोदसीदिव्यवाद्यशब्दोरसातलं १३ ततस्तेप्रार्थयामासुःसेनान्यंप्रणिपत्यच ॥ त्रैलोक्यकंटकंदेव
जहित्वंतारकासुरं १४ नानाभिषेकसंभारैःसेनापत्येभिषिच्यतं ॥ वैदिकैस्तांत्रिकैर्मंत्रैर्नानामुनिसमीरितैः १५ ततोनुज्ञांगृहीत्वानेदेवाःस्वस्थानमागमन् ॥
ऋषयोपिनिरुद्योगास्तपस्तेपुर्यथापुरा १६ सेनान्यांविद्यमानेनोनभयंविद्यतेक्वचित् ॥ सबालोवर्द्धतेयंतंशुक्लपक्षेयथाशशी १७ एकदाबालभावात्सउड्डीयश
शिनंययौ ॥ गृहीतुंब्रह्मणावारिनेदृशंसाहसंकुरु १८ बुद्ध्याबृहस्पतिंशक्त्याजिगायेंद्रंचसोर्भकः ॥ एकदासुखमासीनंपार्वत्यासहितंशिवं १९ प्रणम्यपरिप
प्रच्छसर्वकामार्थसिद्धये ॥ स्कंदउवाच ॥ पितर्मयाश्राविमहाकथानानाविधाःशुभाः२० सर्वसिद्धिकरंदेवपुत्रसंपत्प्रवर्द्धनं ॥ सर्वपापहरंचैवधर्मार्थकाममोक्षदं
२१ त्रैलोक्यस्यगुरोस्त्वत्तस्तृप्तिर्नास्तितथापिमे ॥ वदमेसर्वशत्रूणांजयकारित्रतंशुभम् २२ ईश्वरउवाच ॥ सम्यक्पृष्टंत्वयास्कंदसर्वलोकोपकारकं ॥ व्रतंतेहंप
वक्ष्यामिसर्वसिद्धिकरंनृणां २३ सर्वपापक्षयकरंधर्मार्थकाममोक्षदं ॥ सर्वशत्रुक्षयकरंपुत्रसंपत्प्रवर्द्धन २४ अलक्ष्मीसंकटहरंगणनाथस्यतोषकृत् ॥
यःकरोतिनरोभक्त्यासपूज्यस्त्रिदशैरपि २५ इच्छाविहारीभवतिसृष्टिस्थित्यंतकृच्चसः ॥ दर्शनात्तस्यचान्येषांमहापापंलयंव्रजेत् २६ नान्येषांस्कंदव
रदचतुर्थीव्रतसाम्यता ॥ एवमाकर्ण्यवचनंसेनानीःशंकरेरितम् २७ पुनःपप्रच्छपितरंमहिमानंव्रतस्यसः ॥ स्कंदउवाच ॥ विस्तरेणममब्रूहिमाहात्म्यंव्रतसं
भवम् २८ कस्मिन्मासिदिनेचास्यप्रारंभःक्रियतेहर ॥ कोविधिःकिंफलंचास्यकस्यामूत्प्रत्ययोस्यच २९ एतन्मेसकलंब्रूहियदितुष्टोसिशंकर ॥ सर्वलोको
पकारायव्रतस्यास्यप्रसिद्धये ३० ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखण्डेस्कंदोपाख्यानेषडशीतितमोऽध्यायः ८६ ॥ ॥ शंकरउवाच ॥ ॥ अहंतेकथ
यिष्यामिव्रतस्यास्यविधिंपरम् ॥ श्रावणेतुसितेपक्षेचतुर्थ्यामारभेद्व्रतम् १ तिलामलककल्केनप्रातःस्नानंविधायच ॥ नित्यनैमित्तिकंसर्वंसमाप्यक्रोधवर्जि

॥ ब्रह्मोवाच ॥ तृतीयंतुयदानेत्ररुषोद्घाटितवान्हरः ॥ अपराधंतुविज्ञायमदनस्यरतिस्तदा ३ आक्रंदतीभृतंकामंहरांतिकमुपागमत् ॥ साष्टांगंप्रणिपत्यै
नंतुष्टावचयथामति ४ रतिरुवाच ॥ नमामिदेवंगिरिजासहायंवृषध्वजंभालविलोचनंच ॥ यःपातिलोकान्खलुसत्वयुक्तोनिर्मातिलोकान्रजसागुणेन ५
यःस्वेच्छयासंहरतेखिलेशोजगत्तमोविष्टतनुर्महेशः ॥ योनुःकपालंवहतेजनानांभिक्षाशनःपूरयतेखिलार्थान् ॥ ६ ॥ दीनानुकंपीभगवान्महेशोगतापि
यायाःशरणंममास्तां ॥ कर्त्तुंतथाकर्त्तुमदीनसत्वःशक्तोन्यथाकर्त्तुमपीहदेवः ७ समेविधत्तांशरणंगतायाःसौभाग्यमुच्चैर्मृतजीवनेन॥ नोचेदहंप्राणविसर्जनेनय
शःकरिष्येविपरीतमीश ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवंतयास्तुतःशंभुःप्रसन्नस्तामथाब्रवीत् ॥ ॥ शंभुरुवाच ॥ ॥ वरंवृणुमहाभागेकामपत्नि शु
भानने ९ ददामितुष्टस्तोत्रेणसर्वान्कामान्तदादिस्थितान्॥ इत्थंशिववचःश्रुत्वारतिर्दृष्टाप्रणम्यतम् १० सौभाग्यकामातंदेवंनिजगादभृशातुरा ॥ ॥ रतिरु
वाच ॥ ॥ स्वामिन्यदिप्रसन्नश्चेच्छृणुमेपरमंवचः ११ रसायांदिविभूमौवाकांताःस्युःकामिनीगुणाः ॥ ममलावण्यलेशोनतेषुकापित्रिलोचन १२ मांदृक्षा
मुमुचुःशक्रमुख्यावीर्यमपत्रपाः ॥ ततोमेमहतीलज्जाजातामेतामपाकुरु १३ लावण्यंचवृथाजातंविनाकामेनशंकर॥ अयशोदहतेमह्यंरतिःसाविधवेतिच १४
भर्त्तुर्दाननेनदेवेशमांजीवयदयानिधे॥ एवंतयाप्रार्थितोसौशंकरोलोकशंकरः १५ उवाचश्लक्ष्णयावाचाहर्षयन्कामयोषितम् ॥ शिवउवाच ॥ चिंतांमाकुरुरु
ल्याणिनलज्जांकर्त्तुमर्हसि १६ स्मृतमात्रस्त्वयाबालेकामःस्याद्दृष्टिगोचरः ॥ मनसाचिंतितोवापिमनोभूरितिसंज्ञितः १७ पूरयिष्यतितेकामान्मान्यात्वंव
भविष्यसि ॥ विष्णोःसकाशादुत्पत्तिंरमायांप्राप्स्यतेयदा १८ भर्तातवजनेख्यातोनाम्नाप्रद्युम्नसंज्ञितः ॥ भविष्यतिमहाभागेगच्छेदानींनिजालयं १९ साग
ताशिववाक्येनमंदिरंभृशसुंदरं ॥ सस्मारतंपतिंमातुपुरोनंगःसमाययौ २० ईश्वरेच्छावशात्तस्याःप्रत्यक्षंसमजायत ॥ रतिश्चाश्चर्ययुक्तासाजत्द्वेषपतिनासह
२१ततोनंगोययौशंभुंप्रणम्याभिदधेवचः ॥ अनंगउवाच ॥ विनापराधंदेवेशगमितोनंगतांकथम् २२ इंद्रादिदेवतावृंदैस्तारकासुरपीडितैः ॥ मुनिभिश्चविशा
खस्यत्वत्तउत्पत्तिवेदिभिः २३ प्रार्थितस्तवनिष्ठायाभंगंकर्त्तुमहंविभो ॥ उपकारायसर्वेषामकार्षंकर्मतादृशम् २४ उपकारसमंपुण्यंनचास्तिभुवनत्रये ॥ विपरी
तंतुतज्जातंममदैवात्सुरेश्वर२५त्रयस्त्रिंशत्कोटिदेवेष्वहंचारुतरःपुरा ॥ उपमाचारुपुरुषेममवैदीयतेखिलैः२६कथंतिष्ठामिदेवेशस्वांगहीनःपरेतवत् ॥ अतोमयि
महादेवकृपयानुग्रहंकुरु२७ ॥ ब्रह्मोवाच ॥ ततएकाक्षरंमंत्रंगणेशस्यददौशिवः ॥ अनंगायप्रणमतेनुष्ठानंचादिशच्चतं२८ततोनंगोययौरम्यंजनस्थानंसुसिद्धिदं ॥
तत्रानुष्ठानमकरोदनंगःशंकराज्ञया २९ संवत्सरशतंपूर्णंततापसतपोमहत् ॥ एकाक्षरंजपन्मंत्रंगणेशध्याननत्परः ३० वायुभक्षोनिराहारोनिर्ममोनिरुपद्रवान् ॥
ततःप्रसन्नोभगवान्देवदेवोगजाननः ३१ आविरासीद्दशभुजोमहामुकुटशोभितः ॥ ज्वलद्रत्नप्रभाचारुकुंडलांगदमंडितः ३२ कोटिसूर्यप्रतीकाशोनानाभरणभूषितः
लविभूषितः ॥ दिव्यमाल्यांबरधरोदिव्यगंधानुलेपनः ३३ सिंदूरारुणशुंडास्योदशायुधलसत्करः ॥ शेषालंकृतनाभिश्चनानालंकारराजितः ३४ सिंहस्कंधो

महाश्रीमांश्चीत्कारत्रासिताखिलः ॥ इंद्रादयोपिमुनयआविर्भूतेगजानने ३५ आययुरप्सरोभिश्चयक्षगंधर्वकिन्नरैः ॥ दिव्यवाद्यनिर्घोषैःपुपूजुस्तेगजानन
म् ३६ उपचारैःषोडशभिर्भक्त्यादेवंपृथक्पृथक् ॥ कामोपिततउत्थायप्रणिपत्याखिलान्सुरान् ६७ ववंदेदेवचरणौपूर्वंनत्वामुनीनपि ॥ प्रशशंसतदादेवंवि
कटंकरुणाकरम् ३८ ॥ कामउवाच ॥ धन्यस्त्वमसिदेवेषुपरब्रह्मस्वरूपवान् ॥ निराकारोपिसाकारोजातोसिभक्तवत्सल ३९ अद्यधन्यंममजनुस्तपोधन्य
तरंचमे ॥ यत्त्वांध्रियुगंदृष्टंसर्वदुःखविमोचनम् ४० कारणंसर्वसिद्धीनांधर्मार्थकाममोक्षदम् ॥ धन्येनेत्रयुगेमेद्ययाभ्यांदृष्टःपरःपुमान् ४१ यंनजानंतिवे
दांताःसांख्यापातंजलादयः ॥ नेतिनेत्यभवंस्तूष्णींवेदोपियत्रकुंठितः ४२ अनंतकोटिब्रह्मांडरोमकूपोखिलेश्वरः ॥ येनमंत्रेणसोदर्शिमंत्रोधन्यतरोपिसः ४३
गणेशउवाच ॥ सम्यगुक्तंरतिपतेनमांब्रह्मादयोविदुः ॥ यदासाकारतांयामितेपिजानंतिमांतदा ४४ मयैवानुग्रहात्कामदृष्टवानसिमांतदा ॥ यतोहंपरितुष्ट
स्तेतपसामनुनातथा ४५ वृणुमत्तोखिलान्कामान्कामेकामंददामिते ॥ ब्रह्मोवाच ॥ इतिदेववचःश्रुत्वापुनरूचेमनोभवः ४६ आनुपूर्व्येणसकलंवृत्तांतंशि
वकारितम् ॥ तस्मैचाकथयत्कामःप्रसन्नार्थप्रदायिने ४७ अनंगतांस्वस्यरतेराक्रंदमनुमेवच ॥ अनुष्ठानंचिरकृतांशिवदत्तंवरंतथा ४८ वृणोतिस्मवरंतस्मात्सु
प्रसन्नाद्गजाननात् ॥ कामउवाच ॥ यदिप्रसन्नोभगवांस्तन्मेदेहिसदेहताम्४९मान्यतांसर्वदेवेषुप्राग्वल्लावण्यमेवच ॥ भक्तिर्दृढात्वच्चरणेत्रैलोक्यविजयंतथा ५०
॥ इतिश्रीग०उ०खंडेअष्टाशीतितमोऽध्यायः ॥ ८८ ॥ गणेशउवाच ॥ यद्यत्तेप्रार्थितंकामतत्तत्तेभवितास्खिलम् ॥ रमोदराज्जनिंप्राप्यसांगस्त्वंसर्वसुंदरः १ भ
वितासर्वमान्यश्चत्रैलोक्यविजयीतथा ॥ पुष्पंफलंविसलयंकामिन्यवयवामरुत् २ उद्बोधकानितेसंतुज्योत्स्नाचंदननीरजे ॥ मरालांडजशद्वश्वजेतास्यैर्हरा
दिकान् ३ दर्शनात्स्मरणादेषांमनस्यपिभविष्यसि ॥ मनोभूःस्मृतिभूरेवंनामापिस्याज्जनेषुते ४ अविस्मृतिर्मच्चरणेदृढाभक्तिश्चतेभवेत् ॥ स्मृतोहंपुरतःस्यां
तेमहत्कार्यउपस्थिते ५ ॥ ब्रह्मोवाच ॥ एवंतस्मैवरान्दत्वाकामायाथगजाननः ॥ अंतर्दधेमहाभागपश्यत्सुचसुरर्षिषु ६ तत्रकामोमहामूर्तिंगणेशस्यतथावि
धाम् ॥ संपाद्यस्थापयामासपूजयामासतांतदा ७ रतीनिर्मितपक्वान्नैर्मोदकैर्लड्डुकादिभिः ॥ महोत्कटेतिनामस्यतेजस्वित्वात्तथाकरोत् ८ प्रासादंनिर्ममेकांतं
रत्नस्तंभविराजितम् ॥ रुक्मिण्याउदराज्जातस्त्यक्तोदैत्येनवारिधौ ९ मत्स्येनगिलितस्तत्रसमत्स्योधीवरैस्ततः ॥ शंबरायार्पितेनापिमायावत्यैनिवेदितः १०
विभिन्नेस्मिंस्तदुदरान्निर्गतोवर्द्धितस्तया ॥ नारदोकथयत्तस्यैकामोयंवर्द्धितस्त्वया ११ उपदिष्टेनकमायाःशंबरंसततोवधीत् ॥ गणेशस्यप्रसादेनबुद्धनेको
व्यजिग्यत १२ मायावत्याशिक्षिताभिर्मायाभिर्बहुभिश्चसः ॥ प्रद्युम्नइतिविख्यातःसरस्वत्याःपुरंययौ १३ सर्वदेवेषुमान्यश्चत्रैलोक्यजयकारकः ॥
गजाननप्रसादेनबभूवानंदनिर्वृतः १४ रुक्मिणीप्रभृतिस्त्रीभिर्दृष्टःकृष्णइवापरः ॥ ततउत्थाययाताभिर्लज्जिताभिःसमंततः १५ बुद्ध्वापुत्रंनारदस्यवा
क्येनमुमुदुश्चताः ॥ आलिलिंगुस्तमभ्येत्यप्रणनामरतिश्चताः १६ सर्वापुरीहर्षयुतातस्मिञ्ज्ञातेबभूवसा ॥ ॥ कृउवाच ॥ ॥ एवंजनस्थानगतगणेशस्यम

हामुने १७ महिमाकथितोयत्ररामेणाच्छेदिनासिका ॥ शूर्पणख्यास्ततस्तत्तुनाम्नाख्यातंतुनासिकम् १८ तत्राद्यापिहिदृश्यंतेउपलामोदकाइव ॥ एव माराधितस्तेनकामेनासौगजाननः १९ षडक्षरेणमंत्रेणशेषेणाराधितोयथा ॥ रतिश्चमदनश्चापिननंदतुरुमौयथा २० ॥ व्यासउवाच ॥ कथमाराधितोब्रह्म न्नशेषेणासौगजाननः ॥ किमर्थंकिंचतेनाप्तंसुप्रसन्नाद्गजाननात् २१ एतत्सविस्तरंब्रूहिपृच्छतश्चतुरानन ॥ प्रष्टुःश्रोतुश्चवक्तुश्चयतःपुण्यंविवर्धते २२ ॥ ब्रह्मोवा च ॥ ॥ सम्यक्पृष्टंत्वयाब्रह्मन्कथयामिकथामृतम् ॥ शृणुष्वावहितोभूत्वासर्वंसत्यवतीसुत २३ कस्मिंश्चित्समयेशंभुःपार्वत्यासहितोमुने ॥ सुखासी नोगिरिवरेरम्यसानुशिलोच्चये २४ नानाद्रुमलताकीर्णेनिर्झरारावशब्दिते ॥ गुंजंतिभ्रमरायत्ररुक्मपंकजवासिनः २५ चंपकाशोकबकुलमालतीकुसुमा निलः ॥ आनंदयतिचित्तानिवसतांयस्यशेखरे २६ आययुस्तत्रगंधर्वाअप्सरोयक्षकिन्नराः ॥ देवाश्चमुनयोनागास्तंद्रष्टुंगिरिजापतिम् २७ केचित्तंप्रणिपा तेनसाष्टांगेनाभ्यवादयन् ॥ उच्चैर्जगुश्चगंधर्वानृतुश्चाप्सरोगणाः २८ पुपूजुस्तंदशभुजंव्याघ्राजिनधरंहरम् ॥ नंदिभृंगिगणाकीर्णंभालचंद्रंत्रिशूलिन म् २९ भस्मांगंशेषशिरसंशंकरंवृषभध्वजम् ॥ अपरैरर्चितंदेवमुपचारैर्मनोमयैः ३० निमील्यनयनेतस्युःकेचिद्ध्यानपरायणाः ॥ वसिष्ठोवामदेवश्चजमद ग्निस्त्रितोद्विजः ३१ अत्रिःकण्वोभरद्वाजोगौतमाद्यामुनीश्वराः ॥ तुष्टुवुर्विविधैःस्तोत्रैस्तत्रतंपार्वतीपतिम् ३२ स्तुवत्सुतेषुमुनिषुशेषोगर्वंपरंययौ ॥ अहमे वश्रेष्ठतरोलोकेषुत्रिषुनापरः ३३ यतःश्रेष्ठतरःशंभुस्तस्याहंशिरसिस्थितः ॥ धराधरणसामर्थ्यंमयिनान्यत्रकुत्रचित् ३४ वासुकेरज्जुभूतान्मत्कुलीनाद मृतंसुरैः ॥ प्राप्तंततोमरत्वंचतस्मान्नान्योस्तिमत्परः ३५ तद्वादिस्थंतदागर्वंज्ञात्वाशंभुस्त्रिलोकेश्वर ॥ विज्ञायाखिलदृक्तूष्णीमुत्तस्थौसहसाशिवः ३६ आस्फालयद्धरापृष्ठेशेषंतादृशगर्वितम् ॥ एकैकोमस्तकस्तस्यदशधादशधाभवत् ३७ मूर्छितःप्रहरार्द्धंसगतप्राणइवाभवत् ॥ ततःप्रभृत्यसौजातःसहस्र फणिमंडितः ३८ जीवशेषःशुशोचाथशेषोशेषाहिभूषणः ॥ अलंकरणभूतोहंत्रैलोक्येशहरस्यह ३९ इमामवस्थांसंप्राप्तोनजानेकेनकर्मणा ॥ चलितुंने वशक्नोमिपक्षहीनइवांडजः ४० किंकरोमिक्वगच्छामिकोमेत्राताधुनाभवेत् ॥ कोमेनिजपदप्राप्तावुपायंकथयेच्छुभम् ४१ कोवामेपनयेद्दुःखमितिचिंतापरस्तुसः ॥ ददर्शतेनमार्गेणगच्छंतंनारदंमुनिम् ४२ जहर्षकिंचिन्नागेंद्रःस्वप्नंप्राप्येवभिक्षुकः ॥ अतिकष्टामवस्थांतांनारदोलोकयत्पुरः ४३ निश्चेष्टंनिरनु श्वासंध्याननिष्ठंयथामुनिम् ॥ अशेषविषयज्ञोपिशेषंपप्रच्छनारदः ४४ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेएकोननवतितमोध्यायः ॥ ८९ ॥ ॥ ध ॥ ॥ ॥ नारदउवाच ॥ ॥ किमर्थमेवंजातोसिनिस्तेजादुःखितोभृशम् ॥ कथंभग्नशिराःकस्याचरोऽप्रियतरंमुनेः १ किंवाक्षुब्धोगिरीशस्तेकारिगर्वस्त्वयाथ किम् ॥ वदयत्कारणंशेषप्रतीकारंपुरावदे २ त्वांविनाधारयेत्कोनुचराचरयुतांधराम् ॥ अनुक्तवतितस्मिंस्तुस्वयमेवाब्रवीन्मुनिः ३ उपायंनागराजस्यस्व

१ अत्राध्यायसमाप्तिरेकस्मिन्पुस्तके ।

पूजयामासनानामंगलवस्तुभिः ११ बद्धांजलिरुवाचेदंसुप्रसन्नोगजाननं ॥ धन्योमेजनकोमातातपोज्ञानंवपुश्चदृक् १२ धन्येयंधरणीतातवीरुद्वृक्षफलानिच
धन्यएकाक्षरोमंत्रोयेनदृष्टोखिलेश्वरः १३ गजाननःप्रसन्नात्मापरमात्मापरात्परः ॥ यत्रकुंठाश्चतुर्वेदावेदांतामूकतांगताः १४ अगोचरोमनस्तर्कैःसोयंदेवोमयेक्षितः ॥ यस्मादाविर्भवंतीमेहरेशाग्निमुखाःसुराः १५ पातालानिचसप्तैवभुवनानिचचतुर्दश ॥ यत्रतानिलयंयांतिसोयंदेवोमयेक्षितः १६ योनिर्गुणोनिराधी[1]
शोगुरुगम्योनिराकृतिः ॥ ब्रह्मेतियंविदुःकेचित्सोयंदेवोमयेक्षितः १७ ॥ कउवाच ॥ एवंवाक्यामृतरसैःपरितुष्टोगजाननः॥ उवाचकश्यपंनम्रंस्तुवंतंविवि
धैःस्तवैः ॥ १८ ॥ ॥ गणेशउवाच ॥ भक्तेःस्तवादनुष्ठानात्प्रीतःस्तेहंमुनेधुना ॥ वरंवरयमत्तस्त्वंयंयंमनसेच्छसि १९ ॥ कश्यपउवाच ॥ सृष्टिंनानावि
धांकर्तुंसामर्थ्यंदेहिमेप्रभो ॥ त्वदंघ्रिकमलेभक्तिमविस्मरणमेवच २० यायाःप्रत्यक्षतांत्वस्मेरस्यांयत्रचाप्यहं ॥ तादृशंदेहिमेपुत्रंनाम्नाकश्यपनंदनम् २१
गणेशउवाच ॥ सर्वंतेवांछितंमत्तोभविताशुमहामुने ॥ भक्तिर्मेविस्मृतिःस्यात्तेसंकटेचांतिकंव्रजे २२ करिष्यसिविचित्रांत्वंसृष्टिंममप्रसादतः ॥ कउवाच ॥
एवमुक्त्वामुनिंदेवस्तत्रैवांतरधीयत ॥ कश्यपोपिमुदायुक्तोनिजस्थानंतदाययौ २३ कदाचित्कश्यपोकस्मादशरीरप्रपीडितः ॥ नचालभत्क्वापिशर्म
गृहमध्यंततोगमद् २४ नित्यंनैमित्तिकंकाम्यंकर्मध्यानंचनास्मरत् ॥ तंतथाविह्वलंदृष्ट्वायोषितोस्यचतुर्दश २५ दित्यदितिर्दनुःकद्रुर्विनताद्याःपुरःस्थिताः
बुभुजेक्रमशस्तास्तुनानागारेषुकश्यपः २६ कालेयथोक्तेसुषुवेदितिर्दैत्याननेकशः ॥ अदितिर्देवगंधर्वान्दनुश्चदानवानथ २७ क्रमेणकिन्नरायक्षाःसि
द्धचारणगुह्यकाः ॥ पशवश्चतथारण्याग्राम्याश्चासन्ननेकशः २८ पृथिवीपर्वतावृक्षाःसमुद्राःसरितोलताः ॥ धान्यानिधातवोरत्नामुक्ताःकृमिपिपीलिकाः
२९ सर्पाःपक्षिगणास्ताभ्यःसर्वमासीच्चराचरम् ॥ एवंदृष्ट्वासमंतानंजातंनानाविधंतदा ३० जहर्षकश्यपोधीमान्नानामंत्रान्समादिशत् ॥ ॥ शोधयि
त्वाऋणधनंसिद्धारिचक्रमीक्ष्यच ३१ षोडशार्णंचकस्मैचित्तथाष्टादशवर्णकम् ॥ एकाक्षरंचकस्मैचिदन्यस्मैचषडक्षरम् ३२ पंचार्णमष्टाक्षरंचद्वादशाक्षर
मेवच ॥ कस्मैचिच्चमहामंत्रंददौसमुनिपुंगवः ३३ कुर्वंत्वनुष्ठितंतावद्यावद्देवोनिरीक्ष्यते ॥ गजाननोखिलाधारःसर्वसिद्धिप्रदायकः ३४ एवमाज्ञापयत्तांश्च
तेचजग्मुस्तदैवहि ॥ तपसेबहुशोदेशान्जेपुःस्वंस्वंमनुंतदा ३५ आसनेभोजनेदेवंनिद्रायांजागरेपिच ॥ अनन्यभक्त्यादेवेशंसस्मरुस्तेगजाननम् ३६ दिव्यव
र्षसहस्रांतेपरितुष्टोगजाननः ॥ आविरासीदनेकात्मातत्पुरःकरुणानिधिः ३७ योयथाध्यातवान्देवंतादृशस्तत्पुरोभवत् ॥ कस्यचित्पुरतश्चासीन्मेघाभो
ष्टमहाभुजः ३८ कस्यचित्पुरतस्त्वासीच्छशिवर्णश्चतुर्भुजः ॥ अन्येकस्यचिदारक्तःषड्भुजोसौगणेश्वरः ३९ सहस्रनयनस्तावद्भुजोसावपिकस्यचित् ॥
भातिबालस्वरूपोपियुवावृद्धोपिभासते ४० दशद्वादशदोर्दंडोधूम्रवर्णोमहन्महः ॥ अष्टादशभुजोप्यासीत्कोटिसूर्यसमप्रभः ४१ तेजोरूपीमहाकायआ

१ निराधारइत्यपिक्वचित्पठ्यते

खुवाहनपृष्ठगः ॥ सिंहगोबर्हिगोवापिगजास्योनेकवक्त्रवान् ४२ दृष्ट्वादेवंतुतेसर्वेनेकधातुष्टुवुर्मुदा ॥ बद्धाजलिपुटानम्राभक्त्यादेवंगजाननम् ४३ ॥ सर्व उचुः ॥ यतोनंतशक्तेरनेकाश्चजीवायतोनिर्गुणादप्रमेयाद्गुणास्ते ॥ यतोभातिसर्वंत्रिधाभेदभिन्नंसदातंगणेशंनमामोभजामः ४४ यतश्चाविरासीज्जगत्सर्व वेत्तुस्तथाजासनोविश्वगोविश्वगोप्ता ॥ तथेंद्रादयोदैत्यसंघामनुष्यासदातंगणेशंनमामोभजामः ४५ यतोवह्निभानूभवोभूर्जलंचयतःसागराश्चंद्रमाव्योमवा युः ॥ यतःस्थावराजंगमावृक्षसंघाःसदातंगणेशंनमामोभजामः ४६ यतोदानवाःकिन्नरायक्षसंघायतश्चारणावारणाःश्वापदाश्च ॥ यतःपक्षिकीटायतो वीरुधश्चसदातंगणेशंनमामोभजामः ४७ यतोबुद्धिरज्ञाननाशोमुमुक्षोर्यतःसंपदोभक्तसंतोषकःस्युः ॥ यतोविघ्ननाशोयतःकार्यसिद्धिःसदातंगणेशंनमामो भजामः ४८ यतःपुत्रसंपद्यतोवांछितार्थोयतोभक्तिविद्यास्तथानेकरूपाः ॥ यतःशोकमोहौयतःकामएषसदातंगणेशंनमामोभजामः ४९ यतोनंतशक्तिः सशेषोबभूवधराधारणेनेकरूपेचशक्तः ॥ यतोनेकधास्वर्गलोकाहिनानासदातंगणेशंनमामोभजामः ५० यतोवेदवाचोविकुंठामनोभिःसदानेतिनेतीतितायंगृणं ति ॥ परब्रह्मरूपंचिदानंदभूतंसदातंगणेशंनमामोभजामः ५१ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखण्डेएकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ ७ ॥ कउवाच ॥ ॥ एवंस्तुत्वाचस्तुत्वाचसर्वेतेतुगजाननम् ॥ पुनरूचुर्गणाध्यक्षमद्यधन्यतमावयम् १ धन्यंतपोनोदानंचज्ञानंयज्ञश्चपूर्वजाः ॥ अद्यनो दृष्टयोधन्यायाभिर्दृष्टोगजाननः २ एवंवाक्यामृतैस्तेषांस्तुतिभिःपरितोषितः ॥ उवाचशृण्वतांतेषांगांभीर्याद्द्विरदाननः ३ नैतादृशंमयादर्शिब्रह्मावि ष्णुशिवादिषु ॥ यत्साक्षाद्दृश्यतेसर्वैरूपंमेनिर्गुणस्ययत् ४ अतितुष्टेनयास्तुत्यावरान्दातुमिहागतः ॥ यद्यद्वोवांछितंतत्तद्वृणुध्वमखिलंतुयत् ५ एवमुक्ता स्तदातेनविकटेनमुनीश्वर ॥ यस्ययद्वांछितंतत्तद्वव्रुस्तस्माद्गजाननात् ६ असंख्यत्वात्तद्वराणांनास्तिशक्तिश्चतुर्मुखैः ॥ गदितुंसर्वथातस्मादुक्तंसंक्षेपतोम या ७ तास्तान्ददौवरान्यान्यान्सर्वेवव्रुर्गजाननम् ॥ पुनरप्यवदत्सर्वानिदंस्तोत्रंममप्रियम् ॥ त्रिसंध्यंयःपठेदेतद्विद्यावान्पुत्रवान्भवेत् ॥ आयुरारोग्यमै श्वर्ययशोवृद्धिंजयोदयम् ॥ प्राप्नुयाद्वांच्छितानर्थानन्तेचपरमंपदम् ॥ पुनरूचेगणाधीशःस्तोत्रमेतज्जपेन्नरः ॥ त्रिसंध्यंत्रिदिनंतस्यसर्वकार्यंभविष्यति ८ योज पेदष्टदिवसंश्लोकाष्टकमिदंशुभम् ॥ अष्टवारंचतुर्थ्यांतुसोष्टसिद्धीरवाप्नुयात् ९ यःपठेन्मासमात्रंतुदशवारंदिनेदिने ॥ समोचयेद्धनात्तंराजबद्धंनसंशयः १० विद्याकामोलभेद्विद्यांपुत्रार्थीपुत्रमाप्नुयात् ॥ वांछितंलभतेसर्वमेकविंशतिवारतः ११ योजपेत्परयाभक्त्यागजाननपरोनरः ॥ एवमुक्त्वाततोदेवःसर्वेषामेव पश्यताम् १२ अंतर्दधेऽखिलाधारःसुमुखोसौगजाननः ॥ तेचचक्रुस्तदामूर्तिंगणेशस्यशुभाननाम् १३ प्रतिष्ठाप्यचतांस्थूलेप्रासादेरत्ननिर्मिते ॥ सुमुखे तिचतस्यास्तेनामचक्रुःसुविश्रुतम् १४ संपूज्यचनमस्कृत्वास्वंस्वंस्थानंययुःसुराः ॥ सर्वेतेमुनयोलोकाःसर्वकार्यरतास्तदा १५ केचित्तस्यानामचक्रुरेकदंत इतिस्फुटम् ॥ गंधर्वैःकिन्नरैरन्यास्थापितामूर्तिरुत्तमा १६ प्रासादेकांचनेश्रेष्ठेऽनेकधापरिपूज्यच ॥ कपिलेतिचनामास्याःस्थापयामासुरुत्तमम् १७ गुह्यका

श्चारणाःसिद्धामूर्तिमन्यांप्रचक्रिरे ॥ महालयेप्रतिष्ठाप्यनेमुश्चपुपुजुश्चताम् ॥ गजकर्णेतिनामास्याश्चक्रुस्तेतुरस्फुटार्थकम् ॥ तत्प्रभावाद्विघ्नस्थाःसर्वतोदेव
माक्रमन् १९ लंबोदरेतिनाम्नाचस्थापितासर्वमानवैः ॥ श्वापदैरखिलैरन्यास्थापितामूर्तिरुत्तमा २० विकटेतिचनाम्नातांपुपूजुस्तेययुर्वनम् ॥ गिरयश्चद्रुमा
श्चान्यांमूर्तिंस्थाप्यप्रपूज्यच २१ विघ्ननाशनइत्येवंनामकृत्वास्थितास्तुकौ ॥ तत्प्रसादाच्चतेख्याताःपर्वताश्चद्रुमास्तथा २२ सर्वैःपक्षिगणैर्मूर्त्तिःस्थापितारत्न
कांचनी ॥ गणाधिपेतिनाम्नातैःपूजिताचनमस्कृता २३ सर्वैर्विषःगैरेकास्थापितागणनायकी ॥ यस्याहूतिःकृतातैस्तुधूमकेतुरितिस्फुटा २४ सर्वैर्जला
शयैरेकाप्रतिमास्थापिताशुभा ॥ गणाध्यक्षेतिनाम्नासापूजितापरमोत्सवैः ॥ कृमिकीटादिनिचयैर्वनस्पत्योषधीगणैः ॥ स्थापितापरमामूर्तिर्भालचंद्रेतिवेश्रु
ता २६ अन्यैःसचेतनैरन्यारत्नप्रासादमध्यगा ॥ वैनायकीमहामूर्तिःपूजिताभक्तिभावतः २७ गजाननाख्ययाख्यातासर्वेषांसर्वकामदा ॥ तेतेजगत्त्रयेख्या
तास्तत्तज्जात्याबभूविरे २८ सुखिनःस्वस्वकार्येषुदक्षादेवप्रसादतः ॥ प्रत्येकनामकथनेनशक्तिर्ममवर्त्तते २९ सारंसारंप्रगृह्यैवकृतंनाम्नांसहस्रकम् ॥ ततो
पिसारभूतानिप्रोक्तानिद्वादशैवतु ३० समुद्रमथनाद्यद्वद्रत्नानीवचतुर्दश ॥ एवंसंक्षेपतोब्रह्मन्माहिमातेमिवर्णितः ३१विस्तराद्रदितुंशेषोनेशोनेशोप्यहंहरिः॥इंद्रा
दिमशकानांचजीवानांयक्षरक्षसाम् ३२ तत्रकागणनाकार्यामयासत्यवतीसुत ॥ तस्मात्सर्वेषुकार्येषुपूजनीयोगजाननः ३३ योनपूजयतेदेवदेवंविघ्नविनाश
नम् ॥ सदुरात्मापरित्याज्यश्चांडालइवदूरतः ३४ ॥ मुनिरुवाच ॥ अनुक्रमेणकथयनामानिद्वादशैवमे ॥ श्रवणात्पठनादेषांसर्वैर्निर्विघ्नतागमियाद् ३५ ॥ ब्रह्मो
वाच ॥ सुमुखश्चैकदंतश्चकपिलोगजकर्णकः ॥ लंबोदरश्चविकटोविघ्ननाशोगणाधिपः ३६ धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः ॥ द्वादशैतानिनामानियः
पठेच्छृणुयादपि ३७ विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा ॥ संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ३८ शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजम् ॥ प्रसन्नवदनंध्याये
त्सर्वविघ्नोपशांतये३९ कोटिकन्याप्रदानानिकोटियज्ञव्रतानिच ॥ तपांसियानिसर्वाणितीर्थान्यायतनानिच ४० स्वर्णभारसहस्राणिकोटिदानानियान्यपि ॥ कृ
च्छ्राणितप्तकृच्छ्राणिपराकेंदुव्रतानिच ४१ शतांशमेषांपुण्यस्यतानिनाम्नांनयांतिच ॥ इमानिप्रातरुत्थायशुचिर्भूत्वासमाहितः ४२ यःपठेन्मानवोभक्त्या
विघ्नानोयांतितंनरम् ॥ सिद्ध्यंतिसर्वकार्याणिमोक्षमंतेव्रजत्यसौ ४३ तस्यदर्शनतोलोकादेवाःपूताभवंतिच ॥ अतएवमुनेसौराःशाक्ताःशैवाश्चवैष्णवाः ४४
उक्त्वाद्वादशनामानिसर्वकार्याणिकुर्वते ॥ गाणेशाअपिकुर्वंतिकिमत्रापिचकौतुकम् ४५ नसिद्ध्यंतिहिकार्याणिद्वादशान्यतमस्यह ॥ उच्चारणंविनाब्रह्मंस्तस्मा
देकंसमुच्चरेत् ४६ दुष्टानांनास्तिकानांचकार्ययद्यद्विसिद्ध्यति ॥ तेपिबीजंसमुच्चार्यमज्ञानादपिकुर्वते ४७ एवंतेमहिमासर्वःकथितोलेशतोमुने ॥ उपासनाफ
लंनानायथामतिनिरूपितम्४८विष्णुनाकथितंयावत्तावत्तवनिरूपितम् ॥ सोपिनांतंजगामास्यगणेशोपासनस्यह ४९ गणेशनाममहिमापूर्णोज्ञातोनते
नच ॥ भृगुउवाच ॥ एवंतेकथितोराजन्नद्भुतोमहिमामया ५० ब्रह्मणासुप्रसन्नेनयोव्यासायनिरूपितः ॥ उपासनाखंडमिदंवर्णितंनृपतेमया ५१ यदितेश्रव

णेश्रद्धातदाग्यदपिवर्णये ॥ चरितंगणनाथस्यसोमकांताघनाशनम् ५२ सूतउवाच ॥ इतिवःकथितंनानाकथांतरसमन्वितम् ॥ उपासनंगणेशस्यज्ञानैकाद्या महर्षयः ५३ वेदव्यासायमुनयेब्रह्मणायत्समीरितम् ॥ भृगुणासोमकांतायवर्णितंपापनाशनम् ५४ शृणुयाद्योगणेशस्यपुराणमिदमुत्तमम् ॥ ससर्वामापदं हित्वाभुक्त्वाभोगाननेकशः ५५ पुत्रपौत्रसमायुक्तोज्ञानविज्ञानसंयुतः ॥ लभतेपरमांमुक्तिंगणेशस्यप्रसादतः ५६ नतस्यपुनरावृत्तिःकल्पकोटिशतैरपि ॥ यःश्रावयेन्महाभक्त्यायथोक्तफलाभाग्भवेत् ५७ यथाप्तंसोमकांतेनशृण्वतापरमादरात् ५८ ॥ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेब्रह्मव्यासभृगुसोम कांतसंवादेगजाननानामनिरूपणंनामद्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ श्रीमद्गजाननार्पणमस्तु ॥ ॥ श्रीशंवंदे ॥

॥ अङ्कितोऽयमुपासनाखंडः पूर्वार्धो गोपाळनारायणजनतया स्वमुद्रालये ॥

॥ इति श्रीमद्गणेशपुराणे पूर्वखंडं समाप्तम् ॥

॥ अथ श्रीमद्गणेशपुराणोत्तरार्धं प्रारंभः ॥

श्रीमहागणाधिपतयेनमः ॥ ॥ अथोत्तरखण्डः ॥ ॥ मुनयऊचुः ॥ ॥ सम्यगाख्यानमाख्यातंत्वयासूतमहामते ॥ सादरंश्रुतमस्माभिर्नचतृप्तिंगतावयम् १ यथानतृप्यतेजंतुरन्नमश्नन्दिनेदिने ॥ अन्यत्कथांतरंब्रूहियेनतृप्यामहेवयम् २ ॥ ॥ सूतउवाच ॥ ॥ उक्तंचोपासनाखंडंक्रीडाखंडंवदामिवः ॥ यथाकृतं गणेशेननानादैत्यविहिंसनम् ३ साधुद्विजगवांचैवपालनंपरमादरात् ॥ तदहंसंप्रवक्ष्यामिश्रूयतांस्थिरचेतसा ४ ॥ मुनयऊचुः ॥ यावद्यावत्कथ्यतेतत्पुरा णंतावत्तावद्वर्द्धतेश्रोतुमिच्छा ॥ तस्मात्सम्यक्कथ्यतांसर्वलोकःसंसाराब्धेर्येनसद्यःप्रमुच्येत् ५ ॥ सूतउवाच ॥ यदुक्तंब्रह्मणापूर्वंव्यासायामिततेजसे ॥ भृगु णासोमकांतायतदेतद्ब्रवीम्यहम् ६ ॥ व्यासउवाच ॥ पद्मयोनेवदविभोगणेशचरितंशुभम् ॥ यद्यद्रूपंसमास्थाययद्यच्चकृतवान्विभुः ७ कृपावतात्वया ब्रह्मन्ममवाक्यादुदीर्यताम् ॥ उपासनाखंडमिदंश्रुत्वातृप्तिंनयामिच ८ येनयेनावतारेणयंयंदैत्यंमहाबलम् ॥ जहनद्विकटस्तत्तत्कर्मास्यवक्तुमर्हसि ९ तदी यंबालचरितंलीलानानाविधाजपि ॥ श्रुत्वात्वद्वदनांभोजान्मनोनिर्वृतिमेष्यति १० ॥ ॥ सूतउवाच ॥ ॥ श्रुत्वानानाविधान्प्रश्नानुवाचकमलासनः ॥ कथां नानाविधांदिव्यांव्यासायपरिपृच्छते ११ ॥ ब्रह्मोवाच ॥ साधुपृष्टंत्वयाव्यासहृदयानंदकारिणा ॥ वक्तुर्विवर्द्धतेप्रीतिःसादरेश्रोतरिप्रभो १२ अवाच्यमपि वक्तुंमेपुण्यश्लोकेभवेत्त्वयि ॥ शक्तिर्गरीयसीयद्वद्वक्तुःश्रोतारिकथ्यताम् १३ इदानींसर्वमाख्यास्येगणेशचरितंतव ॥ नानावतारान्कृत्वासभूभारंहृतवान्वि भुः १४ हत्वानानाविधान्दैत्यान्स्वस्थानेस्थापयत्सुरान् ॥ साधूनांपालनरतोदुष्टनिर्मूलनक्षमः १५ इतिहासंशृणुमुनेगणेशाख्यानसंश्रयम् ॥ विष्टरश्रव साप्रोक्तंश्रवणात्सर्वकामदम् १६ ॥ विष्णुरुवाच ॥ युगेयुगेभिन्ननामागणेशोभिन्नवाहनः ॥ भिन्नकर्माभिन्नगुणोभिन्नदैत्यापहारकः १७ सिंहारूढोदशभु जोकृतेनाम्नाविनायकः ॥ तेजोरूपीमहाकायःसर्वेषांवरदोवशी १८ त्रेतायुगेबर्हिरूढःषड्भुजोप्यर्जुनच्छविः ॥ मयूरेश्वरनाम्नाचविख्यातोभुवनत्रये १९ द्वा परेरक्तवर्णोसावाखुरूढश्चतुर्भुजः ॥ गजाननइतिख्यातःपूजितःसुरमानवैः २० कलौतुधूम्रवर्णोसावश्वारूढोद्विहस्तवान् ॥ धूम्रकेतुरितिख्यातोम्लेच्छानीक विनाशकृत् २१ यंयंसदैत्यंहांतिस्मतादिदानींब्रुवेमुने ॥ जंगदेशीयनगरेसौद्रकेतुरभूद्द्विजः २२ सर्वशास्त्रार्थतत्वज्ञोवेदवेदांगपारगः ॥ समोजीवेनाग्निहोत्रीसुर गोद्विजपूजकः २३ ईश्वरोपासकोनित्यंसर्वागमविशारदः ॥ यस्यपत्नीशारदाख्यारूपलावण्यशोभिता २४ ईदृशीनाप्सरोमध्येनाष्टासुनायिकास्वपि ॥ य द्वक्त्रनिर्जितश्चंद्रश्चितयाक्षयमीयिवान् २५ अनेकदिव्याभरणैर्भासयंतीधरातलम् ॥ यथानक्षत्रमालाभिर्भासतेव्योममंडलम् २६ कदाचित्सागर्भवतीशारदो त्पललोचना ॥ शारदाशारदेमासिशरच्चंद्रसुशोभिते २७ शरीरतेजसायस्यानप्राज्ञायतकिंचन ॥ दोहदान्पूरयत्येषयंयंसाकामयत्सती २८ एवंसानवमेमा सियमलौसुषुवेसुतौ । अतिकांततरौस्वांतनंदनावुभयोरुभौ २९ आजानुबाहूदीर्घाक्षौदृष्ट्वाप्रोवाचतत्पिता ॥ अद्याहमनृणोजातोधन्यमद्यतपोमम ३० वंशोधन्योजनुर्धन्यंयत्पुत्रौवीक्षितौमया ॥ अर्घ्यार्घैर्द्विजवर्यान्ससंपूज्यचगणाधिपम् ३१ स्वस्तिवाच्यंचकाराशुमातृपूजनपूर्वकम् ॥ भक्त्याभ्युदयि

कंश्राद्धंजातकर्माकरोद्विजैः ३२ संपूज्यब्राह्मणान्भक्त्यादददौदानान्यनेकशः ॥ सुहृदोमानयामासवासोरत्नधनादिभिः ३३ नानावादित्रनिर्घोषैःशर्करांचगृहेगृहे ॥ दापयामासतांबूलंपुत्रजन्मसुनिर्वृतः ३४ यथाध्यानपरोयोगीप्राप्यसद्वस्त्वनुत्तमम् ॥ ततोदशाहेतीतेसावाकार्याद्विजपुंगवान् ३५ समर्च्य परयाभक्त्याज्योतिःशास्त्रविशारदान् ॥ पप्रच्छचैतयोर्नामकिंकार्यंद्विजसत्तमाः ३६ अतीतानागतज्ञानाद्विचार्यकथयंतुमे ॥ तेचोचुःप्राणिधानेनदेवांतकनरांतकौ ३७ नामनीअनयोर्ब्रह्मन्नन्वर्थेकुरुनोमते ॥ इतितद्वचनंश्रुत्वाद्विजभक्तिरतोद्विजः ३८ स्वशाखोक्तेनविधिनानामनीविदधेतथा ॥ ब्राह्मणान्भोजयामाससर्वांश्चनागरांस्तथा ३९ वव्रुर्धातेततस्तौतुमेरुमंदारसन्निभौ ॥ यथाकच्छाश्रितौतालौयथावंशांकुरौबलात् ४० यत्रयत्रपदन्यासंकुर्वातेतौयदृच्छया ॥ रसातलगतस्यात्रशेषस्यनमतेशिरः ४१ दृश्यतेमंडलंभानोस्तिष्ठतोःशिरसिस्थितम् ॥ पित्रोःप्रदर्शयंतौतौकौतुकानिभृशंतयोः ४२ कदाचिन्नारदोकस्माद्ब्रह्मलोकेतुगृहंययौ ॥ श्रुत्वाकीर्तिंबालकयोःकौतुकादग्रहीत्तुजौ ४३ मूर्ध्न्युपाघ्रायांकमारोप्यपितरावदत्तयोः ॥ ॥ नारदउवाच ॥ ॥ श्रुत्वाकीर्तिंसमायातःपुत्रयोरद्भुतांशुभाम् ४४ अग्रेद्भुततराचापिभविष्यत्यनयोर्मुने ॥ महद्भाग्यंतवसुनेयल्लब्धावीदृशौसुतौ ४५ दृष्ट्वान्योहर्षमायातिकावार्त्तास्वजनस्यह ॥ इत्याकर्ण्यशुभंवाक्यंनारदेनसमीरितं ४६ तावाहतुर्मुनिंनत्वापितरौनारदंतदा ॥ तवप्रसादाद्ब्रह्मायुःपुत्रयोरस्तुसांप्रतं ४७ अनुग्रहंकुरुतथायथैतौवीर्यवत्तरौ ॥ भवेतांलोकविख्यातौसर्वज्ञौरिपुदंडिनौ ४८ ॥ ॥ कउवाच ॥ ॥ रुद्रकेतोःशारदायाःपुत्रयोर्भक्तिमीप्सतः ॥ पंचाक्षरींमहाविद्यामुभयोरुपदिष्टवान् ४९ उवाचपुत्रौकामारिरनयासंप्रसाद्यताम् ॥ मस्तकेभयहस्तंचस्थाप्यानुष्ठानमादिशत् ५० एवमुक्त्वातमामंत्र्यरौद्रकेतुंमहामुनिः ॥ ततस्त्वंतर्दधेब्रह्मन्नारदोदिव्यदर्शनः ५१ अंतर्हितेमुनौतौचावदतांपितरौमुदा ॥ अनुष्ठानायनावाज्ञांभवद्भ्यांसंप्रदीयतां ॥ ५२ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेनारदोपदेशोनामप्रथमोध्यायः ॥ १ ॥ ॥ ध ॥ व्यासउवाच ॥ अनुष्ठानंकथंब्रह्मन्कुत्रवातौप्रचक्रतुः ॥ तत्सर्वंविस्तराद्ब्रूहिसादरंममपृच्छतः १ ब्रह्मोवाच ॥ साधुपृष्टं त्वयाव्याससर्वंतेकथयेधुना ॥ चक्रतुस्तावनुष्ठानंदेवांतकनरांतकौ २ पित्रोराज्ञांगृहीत्वैवजग्मतुर्गहनंवनं ॥ नसंचारोयत्रवायोर्नानाद्रुमलताकुलं ३ वापीकासारसहितंपुष्पपल्लवशोभितम् ॥ विशालगह्वरगिरिनानाप्रस्तरशालिच ४ तत्रस्थितावुभावेतौप्रारभेतांमहत्तपः ॥ एकांगुष्ठस्थितौचोभौतत्रतौस्थिरचेतसा ५ जपंतौनारदप्रोक्तांविद्यांपंचाक्षरींशुभां ॥ ध्यायंतौशंकरंदेवंसहस्रपरिवत्सरान् ६ निराहारौवायुभक्षौशरदांद्विसहस्रकं ॥ सहस्रवर्षंपत्राणिपक्वानिजक्षतुश्चतौ ७ एवंदशसहस्राणिवर्षाणिजपतोर्ययुः ॥ विवृद्धेभूरितपासिततश्चतेजसातयोः ८ सूर्योभून्मंदकिरणोभस्मोद्धूलितदेहयोः ॥ व्याघ्राजिनेचाक्षमालेबिभ्रतोगजचर्मणी ९ पुपूजतुरुषःकालेशंभुंकुसुमपल्लवैः ॥ तस्मिंस्तपोवनेतातयोरद्भुततेजसा १० जातिवैराःमुनिर्वैराआसन्सिंहगजादयः ॥ एवंतत्तपसातुष्टःपंचवक्त्रस्त्रिलोचनः ११ दशबाहुरपर्णागोव्याघ्रेभचर्मशूलवान् ॥ बिभ्रच्छिरसिगंगांचडमरुंदक्षिणेकरे १२ फणिहारसमायुक्तोरुंडमालालसद्गलः ॥ वृ

षारूढोनीलकंठःप्रभयाभासितांबरः १३ नानालंकारसंयुक्तःश्वेतांगश्चंद्रशेखरः ॥ दृष्ट्वातौतादृशंदेवंहर्षमापतुरुत्तमम् १४ ननर्ततुरुभौपश्चात्साष्टांगंप्रणिपेततुः॥ बद्धांजलिपुटौतौतंदेवदेवंसमूचतुः १५धन्यौनौपितरौदेवजनुषीनयनेतपः॥ धन्यंकुलंचदेहौचयतोदृष्टोमहेश्वरः १६ वेदांतागोचरोगम्योवाचोयस्मादुपावृत्ताः॥ आगमःकुंठितोयत्रषट्शास्त्राण्यथमानसम् १७सहस्रवदनःस्तोतुंनक्षमःसनकादयः ॥ नशक्ताःसर्वजगतःकर्तापातापहारकः १८ रंकंकरोतिराजानंराजानंरंकमेवच ॥ सर्पंकरोतिवलयंवलयंसर्पमेवच ॥ मृतंकरोतिजीवंतंजीवंतंमृतमेवच १९ अधनंयोधनाढ्यंचधनाढ्यमधनंतथा ॥ श्रुत्वैवंसतयोर्वाणींप्रोवाचचउमापतिः२० साधुसाधुश्रुतंवाक्यामृतंवांसमुदामया ॥ तपसापरितुष्टोवांवृषारूढःसहोमया २१आगतोध्याननिष्ठाभ्यांयाचेतांवांछितान्वरान् ॥ कउवाच ॥ अंधकारेरिदंवाक्यंश्रुत्वातौप्रोचतुस्तदा २२ हर्षगद्गदयावाचादेवांतकनरांतकौ ॥ यदितुष्टोसिदेवेशसर्वेशजगदीश्वर २३ यदित्वयावरादेयायद्यनुग्राह्यताचनौ ॥ तदादेवमनुष्येंद्रयक्षरक्षःपिशाचतः २४ मानवोरगगंधर्वाप्सरःकिन्नरतोपिच ॥ सर्वशस्त्रास्त्रतोवन्यग्राम्यपश्वादितोपिच २५ ग्रहनक्षत्रभूतेभ्योदानवासुरतोपिच नदिवानचरात्रौवाकृमिकीटादितोपिवा २६ मृत्युःकदापिनौस्यात्तेप्रसादाज्जगदीश्वर ॥ त्रैलोक्यराज्यंनौयच्छभक्तिंतेचरणेपिच २७ ॥ कउवाच ॥ तौजगादततःशूलीप्रसन्नस्तपसातयोः ॥ समाकर्ण्यवरान्सर्वान्निजभक्तामरांघ्रिपः २८ ॥ शिवउवाच ॥ यद्यद्वांवांछितंसर्वंतत्तथानतदन्यथा ॥ अभयंसर्वतोऽमृत्युस्त्रैलोक्येराज्यमेवच २९ लप्स्यथोलप्स्यतेचापिभवद्भ्यामंतकोमयं ॥ तयोःशीर्ष्णोरधाच्छंभुरभयंकरपंकजं ३० एवंप्राप्योप्सितान्कामानंतर्धानंययौशिवः॥ तावनुज्ञांबतोगृह्यतस्मिन्नंतर्हितेगृहं ३१ ईयतुस्तंपरिक्रम्यप्रणम्यचप्रपूज्यच ॥ हर्षेणपितरौदृष्ट्वानेमतुर्भृशहर्षितौ ३२ आलिंग्यपितरौतौतुनिजवृत्तांतमूचतुः ॥ आघ्रायमस्तकंप्राहपितातौतनयौमुदा ३३ युवयोःसुवरप्राप्त्यादर्शनाच्छंकरस्यच ॥ पावितंजन्मचकुलमर्जितंसुमहद्यशः ३४ श्रुत्वोदंतंशीतलानिजातान्यंगानिमेसुतौ ॥ जाताचामृतपानस्यपरावृत्तिर्नसंशयः ३५ मात्राम्यक्तौबुभुजतुस्ततोनंविविधंशुभम् ॥ पित्रासमंब्राह्मणैश्चवेदशास्त्रविशारदैः३६ ततःसापूजयामासनानालंकारभूषणैः ॥ तौपुत्रौब्राह्मणांश्चैवतेभ्योगृह्याशिषोबहु ॥ विससर्जप्रणम्यैतान्व्यतीयुस्तेनिशांसुखम्[1] ३७ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेद्वितीयोध्यायः २ ॥ ७ ॥ कउवाच ॥ ततःप्रातःसमुत्थायगुरुंध्यात्वासभाज्यच ॥ स्मृत्वानत्वाखिलान्देवान्जग्मतुर्नैर्ऋतींदिशम् १ कृत्वामूत्रपुरीषेतुदंतजिह्वाविशोध्यच ॥ स्नात्वासंध्यामुपास्यैताविष्णून्देवान्पुपूजतुः २ संपूज्यब्राह्मणान्भक्त्याददतुर्धनवाससी ॥ आज्यमालोक्यकास्यस्थंददतुर्ब्राह्मणायतत् ३ सदक्षिणंसमालोक्यदर्पणंनिर्मलंतथा ॥ परिधायचवासांसिविचारंचक्रतुस्तुतौ ४ ॥ ज्येष्ठउवाच ॥ अहंविजेष्येस्वर्लोकान्वरदानान्महेशितुः ॥ मृत्युलोकंचपातालंजयत्वंतत्प्रसादतः ५ ॥ कउवाच ॥ ॥ एवंतौनिश्चयंकृत्वाविलोक्यशुभवासरम् ॥ एकोययौस्वर्गलोकंवायुवेगस

[1] व्यतीयुस्तेनिशांसुखमितिपाठः ।

मोजवे ६ यातोमरावतींतत्रबभंजाराममंडलम् ॥ बध्वापरिकरंतस्थौशक्रस्यपुरतोबली ७ कोलाहलोमहानासीद्देवानांधावतांभृशम् ॥ कोयंकोयंकथंयातोकस्मादिंद्रसमीपतः ८ ध्वंतुबध्नंतुसुदृढंदूरीकुर्वंत्वमुंनरम् ॥ इतितेधावमानास्तेसर्वेतेननिराकृताः ९ उड्डीयोड्डीयसहसानिपत्यचपुनःपुनः ॥ तदुद्धानान्निपतिताःस्त्रीगर्भाश्चमहाद्रुमाः १० कंपितापृथिवीसर्वासपर्वतवनाकरा ॥ तदंगदीप्तश्यामास्तेजाताविबुधसत्तमाः ११ यथामयजितोमत्यौंयातिसद्योविवर्णताम् ॥ तद्वत्तद्दर्शनात्सर्वेविवर्णत्वंगताःसुराः १२ इंद्रोपिविह्वलोजातोविवर्णश्चतदामुने ॥ केचिद्दशदिशोयाताःसन्नद्धाःकेपिचाभवन् १३ केचित्तंशरणंयाताअत्यधीराःसुराधमाः ॥ ततइंद्रश्चतुर्दंतंवज्रहस्तःसमारुहत् १४ जगर्जसुमहामीमंचकंपेभुवनत्रयम् ॥ किंपश्यतेत्युवाचैनान्सन्नद्धान्सुरसत्तमान् १५ पौरुषंकुगतंतावद्यावदत्रागतोसुरः ॥ ततस्तेपुरतोजग्मुःसंग्रामायकृतोद्यमाः १६ रणोत्सुकान्सुरान्प्रेक्ष्यप्रोचेदेवांतकोहरिम् ॥ किमर्थंश्रमसेशक्रविचारयवरान्मम १७ अंतकोभयसंत्रस्तःपलायनपरोगतः ॥ तृणप्रायंतुतेवज्रंमन्येहंशंकराज्ञया १८ मच्छासात्सर्वतोयांतिदेवास्त्वद्दृष्टिवर्त्तिनः ॥ श्रूयतांमद्वचःशक्रसाम्नैवदीयतांमम १९ पदानिस्वानिसर्वाणिस्थीयतांयत्रकुत्रचित् ॥ अन्यथासकलंहित्वावृथामृत्युंप्रयास्यसि २० देवांतकेतिमन्नामनजानासिकथंसुर ॥ कउवाच ॥ ॥ इतितद्वचनंश्रुत्वाविभिदेहृदयंहरेः २१ शक्रस्यचमुखादग्निःप्रबलोनिर्गतोबहिः ॥ अतितप्तेयथातैलेजलपातोयथाभवेत् २२ ततऊचेमहेंद्रस्तंक्रोधावेशसमन्वितः ॥ त्वादृशाःकतिकतिननिहतादानवामया २३ त्वमिदानींवराद्गर्वादागतोस्यसुराधम ॥ वज्रपाताद्धतोनूनंधरण्यांनिपतिष्यसि २४ अन्यपदप्रधानोहिसमासोनाम्नितेबली ॥ ततःशक्रोहनत्तंतुवज्रेणदृढमुष्टिना २५ वज्रंतच्छतधाभिन्नमामभांड्च्युतंयथा ॥ देवांतकोच्छिन्नरोमातिष्ठदाजौनिराकुलः २६ ततोसौमुष्टिनापृष्ठेजघानसुरसत्तमम् ॥ तेनासौपतितोभूमौवाताहतइवद्रुमः २७ पौरुषंतस्यबुध्वैवपपालबलसूदनः ॥ अधावद्वेगतःपृष्ठेसिंहोमृगगणानिव २८ व्यादायभीषणंवक्त्रंपलतंतमुवाचसः ॥ पलायसेकिमधुनादत्तनाक्कगतातव २९ संमुखोभवशक्रत्वंसर्वदेवगणैःसह ॥ असंमुखंपलायंतंनहंतिवीरसत्तमः ३० स्वयंतत्पुरतोभूत्वामारयामासतान्सुरान् ॥ मुखेचपेटिकांदत्वागतासूंस्तानपातयत् ३१ भ्रामयित्वाततश्चैकंपोथयामासभूतले ॥ लत्तयामुष्टिनाकांश्चित्कूर्पराघाततोपरान् ३२ कंठेगृहीत्प्राणघातंचकर्षचापरान्सुरान् ॥ केषांचिज्जानुनीभित्त्वाकेषांचिच्चभुजावपि ॥ ऊरुयुग्मंचकेषांचिच्चिक्षेपदूरतोपितान् ३३ उत्तानाःपतिताःकेचित्केचिन्न्युब्जास्तथासुराः ॥ केचिन्मुखप्रहारंचचकुर्गतुमनीश्वराः ३४ केचिच्चुतर्कयामासुर्मनसादुःखितेनच ॥ अकस्मात्प्रलयंकिंनुप्रारभज्जगदीश्वरः ३५ सुविशीर्णाःसुराःसर्वेगजाःसिंहार्दितायथा ॥ ततःस्वयंजगर्जाशुजयशालीसुरांतकः ३६ यथामेघेषुगर्जत्सुगर्जतेबर्हिमंडली ॥ भास्करीभास्करस्त्यक्त्वायातोदूरतरंततः ३७ सर्वेपिपपलुर्देवास्त्यक्त्वास्वस्वपदानिच ॥ ततःस्वयंशक्रपदेतस्थौनिर्भयचेतसा ३८ सर्वेसुरागतास्तेमगिरिगह्वरमुत्तमं ॥ कंदमूलफलान्यादन्निन्युर्दुःखेनवासरान् ३९ ततोयुर्भूतलाद्दिग्भ्योसंख्येयादैत्यदानवाः ॥ चक्रुर्नानाविधैर्द्रव्यैर्नानातीर्थाहृतैर्जलैः ४०

नानर्षिमंत्र निचयैरभिषेकंसुरांतके ॥ शंखभेरीमृदंगादिदुंदुभीनांचनिस्वनैः ४१ ऊचुस्तंस्वामिनंदैत्यास्त्वादृग्दैत्यकुलेनच ॥ जातोवामवितावापिभवानाज्ञां करोतुनः ४२ ॥ ॥ कउवाच ॥ ॥ एवमेकाकिनातेनजिताःशक्रपुरोगमाः ॥ राज्यंचकारदेवानामरक्षच्चामरावतीं ४३ ततोगात्सत्यलोकंसदैत्यकोटिसमन्वितः ॥ ब्रह्मापिप्रययौतत्रयत्रदेवाःपुरागताः ४४ तत्रैकंनायकंस्थाप्यवैकुंठमगमच्चसः ॥ ब्रह्मणोयानमारुह्यकदाचिच्छाक्रमेवच ४५ लक्ष्म्यासहततःपूर्वंक्षीराब्धिमगमद्धरिः ॥ अत्याप्तंपरमंदैत्यंतत्रस्थाप्यव्यचारयत् ४६ किंमयानजितंदैत्याब्रुवंतुयामितत्रवै ॥ तेब्रुवन्नैवशेषास्तिदेवानांविषयःक्वचित् ४७ लोकपालपदेस्थाप्यनानादैत्यान्जनस्यच ॥ निरातंकोनिरुद्योगःसंरक्षस्वामरावतीं ४८ इत्यमात्यवचःश्रुत्वामुदापरमयायुतः ॥ देवांतकश्चकारासौतद्वाक्यंसम्यगीरितम् ४९ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेतृतीयोऽध्यायः ॥ ३ ॥ ॥ व्यासउवाच ॥ ॥ देवांतकस्यचरितंश्रुतंभक्त्यातवाननात् ॥ इदानींवदमेब्रह्मन्नरांतकविचेष्टितम् १ ॥ कउवाच ॥ शृणुष्वावहितोब्रह्मन्सम्यक्सत्यवतीसुत ॥ कथयिष्येधुनातत्तुदृष्ट्वातेपरमादरम् २ नरांतकोमहींगत्वान्नादैत्यगणान्वितः ॥ चकारकदनंराज्ञांमारयामासकांश्चन ३ सर्वेतंशरणंयाताद्दृष्ट्वाराज्ञोहतान्बहून् ॥ यद्यत्सैन्यंपश्यतिस्मतत्तद्घातिदिशोदश ४ यथाज्ञानेनचाज्ञानंयथासूर्योदयेतमः ॥ एवंभूमंडलंसर्ववशेचक्रेनरांतकः ५ येतुतंशरणंयातास्तदीयत्वात्पदेस्थिताः ॥ येहतास्तत्सुतास्तेनस्थापिताःकरदाःकृताः ६ येतुयुद्धोद्यताभूपास्तेपिसेवाकृतोऽभवन् ॥ तेषांपदेषुदैत्यान्सोस्थापयत्स्वस्यसंमतान् ७ पालयामासपृथिवींसमुद्रवलयांकितां ॥ आतंकभारसंतप्तादेवदानवकिन्नराः ८ मुनयोयुर्गिरिगुहांयज्ञस्वाध्यायवर्जिताः ॥ वेदत्यागस्यदोषेणमनसाचाभ्यसन्श्रुतीः ९ आतंकाक्रांतमनसोनतपस्यांचचक्रिरे ॥ ततोनरांतकोदैत्यान्नागलोकाजिगीषया १० प्रास्थायपत्सुबलिनोनानामायाविशारदान् ॥ तेतार्क्ष्यरूपाःसंयाताबभक्षुरुरगोत्तमान् ११ असंख्याताभक्षितास्तैस्ततःशेषोययौपुरः ॥ मुक्ताफलानिरत्नानिसहनागांगनायुतः ॥ १२ ॥ अनेकदिव्यवस्त्राणिप्रगृह्यरुचिराणिसः ॥ तानिसर्वाणिदत्त्वैवसामचक्रेसुरैःसह ॥ १३ ॥ शासनंपरिजग्राहनरांतकसमीरितं ॥ करभारंवार्षिकंसस्वीचक्रेनंतशीर्षकः १४ तथापिदैत्यस्तत्राप्यस्थापयद्दैत्यपुंगवं ॥ अनेकदैत्यसहितंसर्वाध्यक्षंरसातले १५ आज्ञापयामासचतंतत्रस्थंसनरांतकः ॥ यदैवविकृतिंपश्येरुरगाणांतदैवनः १६ दूतमुखात्सूचयस्वहनिष्यामोखिलानहीन् ॥ इत्थंशिक्षाप्यतंतेतुदैत्याःसर्वे नरांतकं १७ मृत्युलोकेस्थितंयातावृत्तांतंसर्वमब्रुवन् ॥ नरांतकःसंदाप्रैषीन्मृत्युपाताललोकजं १८ देवांतकायवृत्तांतंसर्वस्ययमनुष्ठितम् ॥ उपायनानिसर्वाणिस्वर्लोकेदुर्लभानिच १९ देवांतकोथाप्रैषीत्तंदुर्लभंयच्चभूतले ॥ एवंत्रैलोक्यराज्यंतौचक्रातेपरयामुदा २० ॥ ॥ सोमकांतउवाच ॥ ॥ कथमेतौहतौकेनरूपेणतद्वदस्वमे ॥ केनास्त्रेणचशस्त्रेणअवतारेणकेनच २१ ॥ ॥ भृगुरुवाच ॥ ॥ एवमेवकृतप्रश्नोव्यासमूचेचतुर्मुखः ॥ यांकथांपरयाप्रीत्यातामेवस्वांब्रवीम्यहम् ॥ २२ ॥ ॥ कउवाच ॥ ॥ दुर्जयौवरगर्वौतौयेनरूपेणघातितौ ॥ येनावतारेणमुनेयेनशस्त्रेणचास्त्रतः २३ संग्रामाब्रह्मणालोकादेवा

श्चस्वपदेस्थिताः ॥ तत्सर्वंकथयिष्यामिसादरंश्रूयतांमुने २४ ॥ ॥ इतिश्रीगणेशपुराणेउत्तर०चतुर्थोऽध्यायः ४ ॥ ॥ ब्रह्मोवाच ॥ ममैवमानसःपुत्रः कश्यपोबुद्धिमत्तरः ॥ पुण्यवान्धर्मशीलश्चतपस्वीविजितेंद्रियः १ अतिकारुणिकोलोकेदुःखशोकावमर्दनः ॥ वर्तमानंभूतभाविजानातिमीलितेक्षणः २ मन सास्सृष्टिसंहारकर्त्तावेदांतपारगः ॥ सर्वशास्त्रार्थतत्वज्ञःसमलोष्टाश्मकांचनः ३ अदितिर्यस्यज्येष्ठासीत्पत्नीनाम्नातिवल्लभा ॥ सर्वलक्षणसंपूर्णानुपमासात्रिवि ष्टपे ४ त्रिलोकींभस्मसात्कर्त्तुंपातिव्रत्येनतेजसा ॥ शेषोयस्ययुगान्वक्तुंनेशोवक्त्रसहस्रकैः ५ सेवंतेयांसदाचाष्टनायिकागुणलब्धये ॥ शक्रादिसुरवृंदानिजन यामासयानघा ६ मूलप्रकृतिरूपासाताद्दक्रूपंसमाश्रिता ॥ साकदाचित्स्वकंकांतंमुदितंमुदिताब्रवीद् ७ स्वामिन्विज्ञप्तुमिच्छामिकृपांकृत्वावदस्वतत् ८ पतिंविनानचान्यास्तिगतिःसद्योषितांप्रभो ॥ कश्यपउवाच ॥ सम्यगुक्तंत्वयाभद्रेममप्रीतिकरेनघे ९ तद्ब्रवीमिसमापृच्छयत्तेमनासिवर्त्तते ॥ अदितिरुवाच इंद्रादयोदेवगणाःस्वस्यपुत्रत्वमागताः १० परमात्माचिदानंदईश्वरोयःपरात्परः ॥ यदास्वपुत्रतामेष्येत्तदामेस्यात्स्थिरंमनः ११ तस्यसेवांकर्तुमीहेउपायं तत्रमेवद् ॥ येनसंपुत्रतामेष्येत्कृतकृत्यंमनोमवेद् १२ ॥ मुनिरुवाच ॥ साधुप्रोक्तंमहाभागेवचनंपरितोषकं ॥ यथाजलंतृषार्त्तस्यक्षुधितस्यचभोजनम् १३ तथामेवचनंजातंतवदेविसुतोषकृद् ॥विनापुण्यंकथंयायात्परमात्मास्वपुत्रतां १४ तत्रोपायंवदेतंचत्त्वदिकुरुस्थिरंप्रिये ॥ योगोचरःश्रुतीनांचब्रह्मादीनामगोचरः १५ निर्गुणोनिरहंकारोनिरीहोनिर्विकल्पकः ॥ योमायाविषयोमायानर्तकोमायिमोहनः १६ मायातीतोपिमायायाआधारःकारणातिगः ॥ मायाविस्तारकारीच कार्यकारणकारणं १७ कथंसाकारतांगच्छेदनुष्ठानंविनाप्रिये ॥ अदितिरुवाच ॥ कस्यध्यानंकथंकार्यंअनुष्ठानंमयाधुना १८ केनमंत्रेणवाकुर्वेतद्वदस्वमहामुने ॥ कश्यवाच ॥ एवंपृष्टोमुनिस्तस्यैनाममंत्रंसमादिशत् १९ पंचाक्षरंचतुर्थ्यंतमोंकारपल्लवान्वितं ॥ नमोंतंध्यानसहितंन्यासदैवतसंयुतं २० पुरश्चरणमार्गेचसर्वंतस्यै न्यवेदयत् ॥ ततःसामुदिताब्रह्मन्प्रणिपातपुरःसरं २१ कश्यपंनिजभर्त्तारंपूजयामाससादरं ॥ तदनुज्ञांसमादायजगामतपसेवनं २२ स्नातापवित्रवसनाध्यायंती स्थिरचेतसा ॥ विनायकंदेवदेवंन्यासंकृत्वायथाविधि २३ स्थानेद्रुमलताकीर्णेनिर्वातेनिरुपद्रवे ॥ अदितीरुद्धकरणाशुभासनपरिग्रहा २४ जजापपरमंमंत्रंस्म रंतीसाविनायकं ॥ अनन्यवृत्तिमनसासाक्षात्कारमभीप्सती २५ निराहारावायुभक्ष्याजपध्यानपरायणा ॥ तस्यास्तपःप्रभावेननिर्वैराःप्राणिनोभवन् २६ धर्षितादेवताःसर्वाःकिमियंसाधयिष्यति ॥ एवंवर्षशतंतेपेऽदितिःसापरमंतपः २७ क्लेशान्बहुविधांस्तस्याद्दृष्ट्वादेवोविनायकः ॥ स्त्रीभावेचतथाधैर्यमावि रासीद्विनायकः २८ तेजोराशिःपुरस्तस्याःसूर्यकोटिसमप्रभः ॥ गजाननोदशभुजोकुंडलाभ्यांविराजितः २९ कामातिसुंदरतनुःसिद्धिबुद्धिसमायु तः ॥ मुक्तामालांचपरशुंबिभ्रद्योमेघपुष्पजम् ३० कांचनंकटिसूत्रंचातिलकंमृगनाभिजम् ॥ उरगंनाभिदेशेतुदिव्यांबरविराजितम् ३१ महोराशिंपुरोदृष्ट्वाचकंपेत्वदितिर्भृशम् ॥ निमील्यनयनेमूर्छांमियायन्यपतद्भुवि ३२ जपंध्यानंविसस्मारचिंतयामासचेतसा ॥ किमागतंममपुरोभाग्यंकिमिदमद्भुतम् ३३

विस्मृताहंजपंध्यानकिंवायंपरमेश्वरः ॥ वरंदातुंसमायातोमहसाभासयन्नदिशः ३४ एवंसाविह्वलायावत्तावद्देवोजगादताम् ॥ ॥ विनायकउवाच ॥ ॥ मो
हंदेविदिवारात्रौयंध्यायासिचचेतसा ३५ दृष्ट्वानिष्ठांतपोघोरंवरंदातुमुपस्थितः ॥ वरयस्ववरान्मत्तोयान्यान्कामयसेहृदा ३६ तास्तान्दास्यामिसंतु
ष्टस्तपसानेनसुव्रते ॥ ॥ कउवाच ॥ ॥ तदीयंवाक्यमाकर्ण्यस्वस्थाजाताऽदितिस्तदा ३७ बद्धांजलिपुटादीनाप्रणनामविनायकम् ॥ अवदच्चतदादेवम
तर्क्यंमनसासदा ३८ ॥ ॥ अदितिरुवाच ॥ ॥ त्वमेवसृजसेविश्वंपासिहंस्यखिलेश्वरः ॥ नित्योनिरंजनोदेवोनिर्गुणोनिरहंकृतिः ३९ नानारूपधरो
नित्योयोगगम्योखिलार्थकृत् ॥ इदानींसौम्यरूपेणवरंदेहिविनायक ४० यदितुष्टोसिदेवेशयदिदेयोवरोमम ॥ तदामेपुत्रतांयाहिततोमेऽतकृत्यता ४१ तत
स्तेसेवनंयास्येसाधूनांपालनंभवेत् ॥ दुष्टानांनिधनंदेवलोकानांकृतकृत्यता ४२ ॥ ॥ विनायकउवाच ॥ ॥ अहंतेपुत्रतांयास्येपास्येसाधूंश्चकंटकान् ॥ हनि
ष्येसकलांवांछांपूरयिष्येतवापिच ४३ ॥ ॥ कउवाच ॥ ॥ एवमुक्त्वांतर्दधेसौदेवदेवोविनायकः ॥ सादितिःकश्यपंगत्वासर्ववृत्तांतमब्रवीत् ४४ ॥ अदि
तिरुवाच ॥ तवाज्ञयागतारण्यंतपस्तप्तंमहत्तरम् ॥ वरंदातुंमहोरूपआगतोसौगजाननः ४५ दृष्ट्वास्वरूपंभीतास्मिततोप्रार्थिविनायकः ॥ तेननानाविधा
दत्तावरामेमुनिसत्तम ४६ यास्येपुत्रत्वमित्युक्त्वांतर्दधेसौविनायकः ॥ सिद्धकार्यातवबलादागतास्वाश्रमंमुने ४७ ॥ कउवाच ॥ इतितस्यावचःश्रुत्वावर
दानंसुधोपमम् ॥ जहर्षमुनिमुख्योसौतयासहमुनीश्वर ४८ रेमातेपरमप्रीत्याअमृतादिविनिर्वृतौ ४९ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेपंचमोऽध्यायः ॥ ५ ॥
भृगुरुवाच ॥ अथसामेदिनीदुष्टदैत्यभारप्रपीडिता ॥ वेषांतरंसमास्थायजगामकमलासनम् १ दीनाहस्तांजलिंबध्वाजगादपद्मसंभवम् ॥ भूमिरुवाच ॥
जाताहंमलिनादीनाहीनायज्ञव्रतादिभिः २ स्थानभ्रष्टास्तथादेवाःसेंद्राःसर्षिगणाविधे ॥ अतिभारातिसंतप्ताकृत्वाहंशरणंगता ३ येनोपायेनदुष्टानांनाशः
स्यात्तद्विधीयताम् ॥ नोचेद्रसातलंयास्येसपर्वतजनाकुला ४ ॥ भृगुरुवाच ॥ इतिवाक्यंधरित्र्यासश्रुत्वाकस्तामथाब्रवीत् ॥ जहंसर्वेलोकपालाश्चंद्राद्यादे
वतागणाः ५ ऋषयोपिस्वधास्वाहारहितादुःखिताभृशम् ॥ भ्रष्टस्थानाभ्रष्टमंत्राभ्रष्टाचारायथालये ६ सर्वेवयंप्रार्थयामोदेवदेवंविनायकम् ॥ ब्रह्मरू
पंनिराकारंजगत्कारणकारणम् ७ यदासाकारतांयायाल्लोकानांदैवयोगतः ॥ तदाशंसर्वलोकानांस्यात्तवापिवसुंधरे ८ ॥ ॥ भृगुरुवाच ॥ ॥ इत्युक्त्वातुष्टु
वुर्देवंब्रह्माद्यर्षिगणामुदा ॥ निराकारंचसाकारंबद्धांजलिपुटास्तदा ९ नमोनमस्तेखिललोकनाथनमोनमस्तेखिललोकधामन् ॥ नमोनमस्तेखिललो
ककारिन्नमोनमस्तेखिललोकहारिन् १० नमोनमस्तेसुरशत्रुनाशनमोनमस्तेत्वद्दतभक्तपाश ॥ नमोनमस्तेनिजभक्तपोषनमोनमस्तेलघुभक्तितोष ११
निराकृतेनित्यनिरस्तमायपरात्परब्रह्ममयस्वरूप ॥ क्षराक्षरातीतगुणैर्विहीनदीनानुकंपिन्नभगवन्नमस्ते १२ निरामयायाखिलकामपूरनिरंजनायाखि
लदैत्यदारिन् ॥ नित्यायसत्यायपरोपकारिन्सनातनायसर्वत्रनमोनमस्ते १३ एवंस्तुत्वापुनःप्रोचुर्देवदेवंविनायकम् ॥ तेसर्वेमुनयोदेवाविह्वलाभृशदुःखिताः

१४ हाहाभूतंजगत्सर्वंस्वधास्वाहाविवर्जितं ॥ वयंमेरुगुहांयाताआरण्याःपशवोयथा १५ अतोमुंचैनंमहादैत्यंजाहिविश्वंभराधुना ॥ एवंस्तु
वत्सुसर्वेषुप्राहवाणीनभोगता १६ कश्यपस्यगृहेदेवोवतारिष्यतिसांप्रतं ॥ करिष्यत्यद्भुतंकर्मपदानिवःप्रदास्यति १७ दुष्टानांनिधनंचैवसाधूनांपालनंत
था ॥ ॥ भृगुरुवाच ॥ ॥ एवमाकर्ण्यतांवाचंब्रह्माप्रोवाचमेदिनीम् ॥ कउवाच ॥ स्वस्थाभवधरेदेविनभोवाणीविनिश्चयात् ॥ देवाःसर्वेमृत्युलोकेवतारि
ष्यंतित्वत्कृते ॥ हरिष्यतिमहाभारमवतीर्णोविनायकः १९ ॥ ॥ भृगुरुवाच ॥ इत्युक्तासातदातेनब्रह्मणाहृष्टमानसा ॥ स्वस्थानमगमत्साथस्वस्थचित्ताध
रातदा २९ ततोबहुतिथेकालेदितिःसागर्भमादधे ॥ तेजोतिवद्दधेतस्यादिनेदिनेयथाशशी २१ संपूर्णेनवमेमासेसुषुवेपुत्रमुत्तमम् ॥ ब्रह्मवाक्यादभूत्ख्या
तोनाम्नाकश्यपनंदनः २२ दशभुजोबहुबलःकर्णकुंडलमंडितः ॥ कस्तूरीविलसद्भालोमुकुटभ्राजिमस्तकः २३ सिद्धिबुद्धियुतःकंठेरत्नमालाविभूषितः ॥ चिं
तामणिलसद्वक्षाजपापुष्पारुणाधरः २४ उन्नसोभ्रूकुटीचारुललाटोदंतदीप्तिमान् ॥ देहकांत्याहततमादिव्यांबरयुतःशुभः २५ एतादृशंनिरीक्ष्यैनंबालंतात्पित
रौतदा ॥ तत्तेजसाहतदृशौकिंचिद्द्रष्टुंनशेकतुः २६ बलादुन्मील्यनयनेदृष्ट्वातद्रूपमुत्तमम् ॥ ननंदतुरुभौपश्चाद्बालस्ताविदमब्रवीत् २७ बालउवाच ॥ मात
स्त्वयायतःपूर्वंसहस्रपरिवत्सरं ॥ येनरूपेणसंध्यातस्तनयत्वेनयाचितः २८ तदानानावरान्दत्वापुत्रत्वंतेगतोधुना ॥ सोहंभूभारहरणंविधास्येसेवनंद्वयोः २९
ब्रह्मादीनांपदप्राप्तिर्दुष्टदैत्यविनाशनम् ॥ भृगुरुवाच ॥ इत्थमाकर्ण्यतद्वाक्यंसानंदाश्रूबभूवतुः ३० चक्रवाकौयथावीक्ष्यनभसीवदिवाकरम् ॥ ऊचतुस्तंत
दापुण्यमद्भुतंनौसमुद्यतम् ३१ येननौपुत्रतांयातःपरमात्माविनायकः ॥ धन्यंकुलंनौपितरौजनुषीज्ञानमेवच ३२ यतश्चराचरगुरुःसर्वसाक्षीनिराकृतिः ॥ नि
त्यानंदमयःसत्यःपुत्रत्वमगमच्छुभम् ३३ यस्मिंश्चराचरंप्रोतंसूत्रेमाणिगणाइव ॥ यःसर्वगःसर्ववेत्तासएवत्वंनसंशयः ३४ इदंरूपंपरंदिव्यमुपसंहरसांप्रतम् ॥
प्राकृतंरूपमास्थायक्रीडस्वकुहकोयथा ३५ यदायद्रूपकृत्यंतेतदातत्त्वंविधास्यसि ॥ इत्थमाकर्ण्यतद्वाक्यंपिदधेरूपमात्मनः ३६ द्विभुजःप्राकृतो
बालोरुरोदधरणीतले ॥ रसातलंचगगनंनादयन्विदिशोदिशः ३८ तच्छब्दश्रवणाद्दंध्याजातागर्भवतीद्रुमाः ॥ नीरसाःसरसाःशक्रोजत्द्वेषदेवतागणैः ३८
अयंबभूवदैत्यानांवर्द्धेधरणीतदा ॥ चकारजातकर्मास्यकश्यपोब्राह्मणैःसह ३९ प्राशयित्वामधुघृतंपस्पर्शमंत्रतश्चतम् ॥ जपायत्स्तनौबालं
मंत्रपाठपुरःसरं ४० छित्त्वानालंतुसंक्षाल्यबालंप्रास्वापयच्चसा ॥ ददौदानान्यनेकानिब्राह्मणेभ्योमुनिस्तदा ४१ अदापयत्प्रतिग्रहंसप्तमेदिवसेदितिः ॥
इक्षुसारंपंचमेतुवायनानिमहामुदा ४२ महोत्कटेतिनामास्यचक्रुरेकादशेपिता ॥ बालोपिववृधेशीघ्रंशुक्लपक्षेयथाशशी ४३ सर्वेभ्यउत्कटोय
स्मान्महोत्कटइतिस्मृतः ४४ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेविनायकाविर्भावोनामषष्ठोऽध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ वसि
ष्ठवामदेवाद्यामुनयस्तनयंतदा ॥ जातंमहोत्कटंश्रुत्वादर्शनायप्रतस्थिरे १ याताग्रहंकश्यपस्यतेनाथपरिपूजिताः ॥ विष्टरंपाद्यमर्घ्यंचदत्वागांचापिदक्षि

णाम् २ बद्धांजलिपुटोऽवोचद्धन्योहंपितरौतपः ॥ यदिंद्रहरिपूज्यंवःपादपद्ममयेक्षितम् ३ कंचिदागमनेहेतुंज्ञातुमीहेतपोधनाः ॥ तेषांमध्येश्रेष्ठत
मोवसिष्ठःप्राहतंमुनिम् ४ ॥ ॥ वसिष्ठउवाच ॥ ॥ श्रुतस्तेतनयोब्रह्मन्नारदात्सुमहोत्कटः ॥ तंद्रष्टुंत्वांचसंप्राप्तानान्यत्किंचित्प्रयोजनम् ५ ॥ ॥ क
उवाच ॥ तत्कालंसादितिर्बालंद्रष्टुंतेषामथानयत् ॥ उत्कटान्येषकर्माणिकरिष्यतिमहोत्कटः ६ द्वात्रिंशल्लक्षणयुतोवसिष्ठःप्राहतंमुनिम् ॥ अवतीर्णोमहा
तेजाःपरमात्माविनायकः ७ अनेकान्यस्यविघ्नानिभविष्यंतिमहामुने ॥ तानिसर्वाणिनश्यंतिरक्षणीयःक्षणेक्षणे ८ यतोस्यरक्तौचरणौध्वजांकुशविरा
जितौ ॥ ततःसंपूजयामासमुनिःकश्यपनंदनम् ९ प्रार्थयामाससर्वैस्तंभूभारहरणंकुरु ॥ साधूनांपालनंदेवदुष्टदानववातनम् १० तेसर्वेमुनयोजग्मुस्तंप्र
णम्ययथागतम् ॥ ततःसख्यातिमगमन्नाम्नाकश्यनंदनः ११ एकस्मिन्दिवसेप्रातःस्नातुंयातेमुनौबहिः ॥ अस्वापयत्स्वतनयमदितिर्गृहमाययौ १२ च
कारयज्ञसंभारांस्तावदेकानिशाचरी ॥ विरजेत्याभिविख्याताविकरालेक्षणानना १३ हलदंतोदरीनासापादचूर्णितभूधरा ॥ दीर्घस्तनीललज्जिह्वागोपुर
स्पर्द्धिसद्भगा १४ जग्राहबालकंसातुसर्वभक्ष्यानिशाचरी ॥ क्षुधिताभक्षयच्छीघ्रंपक्वंआफलंयथा १५ शनैर्जगामगगनंजलंपातुंभुवंययौ ॥ पपौजलंबहुतरं
पपातपृथुलोदरा १६ मूर्छामवापमहतींमर्पदष्टोनरोयथा ॥ लुलोलधरणीपृष्ठेमहाशूलवतीयथा १७ मुंचमुंचेतिजल्पंतीपदृंगंतुमथाक्षमा ॥ हाहाकारंप्रकु
र्वतीग्रतीवक्षःशिरोमुखम् १८ तावद्देहांतरेतस्यावृद्धेमुनिनंदनः ॥ विदार्यजठरंतस्यावक्षस्येवस्थितोभवत् १९ यथाजालंविदार्यैववहिर्यातिमहाझषः ॥
सातदैवमारावंकृत्वाप्राणान्जहौखला २० चूर्णयामहासदेहेनपंचयोजनगान्द्रुमान् ॥ विरजाविरजास्तेनप्रापितानिजधामसा २१ दृष्टेस्पृष्टेकृपासिंधौजगदी
शेकथंभवेत् ॥ ज्ञानदेमोक्षदेनृणामावृत्तिर्भवसागरे २२ अदितिर्गृहकार्याणिसंपाद्यबहिरागता ॥ नददर्शतदाबालंरुरोदभृशदुःखिता २३ गृहेगृहेनिरीक्ष्यै
वनालभत्कापिबालकम् ॥ ततोपतद्धरापृष्ठेहाहाकारंप्रकुर्वती २४ जन्याश्चरुरुदुस्तस्याःश्रुत्वारोदनमुच्चकैः ॥ आश्चर्यपरमंचक्रुःसर्वलोकाभयातुराः २५
साशुष्कवदनादीनाविललापमुहुर्मुहुः ॥ मुखंचसांजनेनेत्रेमृजंत्यश्रुजलाकुले २६ कल्पद्रुमइवप्राप्तःकेननीतोममार्भकः ॥ वरदानंकथंतस्यवृथास्याज्जगदी
शितुः २७ दत्तंनिधानंदेवेनकेननीतंदुरात्मना ॥ कथंमूढतराजाताल्ब्धविज्ञानसागरा २८ कथंदरिद्राजाताहंलब्ध्वाकांचनपर्वतम् ॥ एवंविलपतीवक्षोग्र
तीसाप्याननंशिरः २९ आश्रमाद्बहिरागच्छक्रोशमात्रंनिशाचरीम् ॥ ददर्शपतितांतस्यावक्षस्येवचतांशिशुम् ३० क्रीडंतंहास्यवदनंप्रबुद्धामिवकामिनम् ॥
धावमानातमादायालिलिंगचचुचुंबच ३१ उवाचानंदपूर्णासामहद्भाग्यंममाधुना ॥ यद्राक्षसीशयान्मुक्तोबालकोदैवयोगतः ३२ ययौसबालास्नात्वासानि
जमाश्रममंडलम् ॥ वृत्तांतंसर्वमाचष्टेश्रुत्वासोप्याहकश्यपः ३३ भूतभाविविशेषज्ञैरुक्तंयन्मुनिभिःप्रिये ॥ तदेतत्सत्यमभवत्तदाशीर्वचनादयम् ३४
जीवितोखिलभक्ष्यायाबालकःपुण्ययोगतः ॥ ततोरक्षांचकारासौदंदौदानान्यनेकशः ३५ शांतिकंकारयामासस्वस्तिवाचनपूर्वकम् ॥ क्षणमात्रंनहातव्यो

दितिमेवंसमादिशत् ३६ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेविरजाराक्षसीमोक्षणंनामसप्तमोध्यायः ॥ ७ ॥ ॥ कउवाच ॥ ॥ विरजांनिहतांश्रुत्वाराक्षसींब
लवत्तराम् ॥ उद्वतोधुंधुरश्चापिराक्षसोबलवत्तरौ १ आगतावाश्रमपदंकश्यपस्यमहात्मनः॥ शुकरूपधरौबालोदृष्ट्वाप्रोचेऽदितिंतदा २ त्यक्त्वास्तनंदीयतां
मेऽभौरंतुशुकाविमौ ॥ सोचेतंखगमौशक्यौमृगयानास्त्रियाक्वचित् ३ अथापिधर्तुंयाताचेदुड्डीयैतौगमिष्यतः ॥ कटेरुत्तीर्यजग्राहबालस्तौश्येनवत्तदा ४
पक्षाघातेनचंचूाचजघ्नतुस्तौभृशंचतम् ॥ तावदास्फालयत्सोपितौबलेनधरातले ५ जहतुस्तौतदाप्राणान्निजरूपधरावुभौ ॥ तद्देहभारभीत्यामूर्ध्वंशंविह्व
लिताभवत् ६ भग्नवृक्षौसनिनदौदेहौनिपतितौतयोः ॥ गव्यूतिमात्रंतौदृष्ट्वादितिस्तंपुनरग्रहीत् ७ शरीरेदृश्यतेनमुनिनाविस्तृततयोः ॥ छित्त्वादहतौ
लोकःकाष्ठसंचययोगतः ८ चकाराद्भुतशांतिंसबालकाम्युदयेच्छया ॥ आश्चर्यंपरमंचक्रेशिशोर्दृष्ट्वापराक्रमम् ९ उवाचपरमप्रीतोदितिंपुत्रयुतांतदा ॥
यौनदेवेनशक्रेणनहतौराक्षसेश्वरौ १० शुकरूपधरावेतौलीलयाशिशुनाहतौ ॥ अदितिंचचुकोपासौकिमर्थंमोचितस्त्वया ११ रक्षितोजगदीशेनक्कायु
ष्यंनास्यविद्महे ॥ अविस्मरोरक्षणीयोबालोयंयत्नतःसति १२ कथंचनिहतावेतौगिरिसारौनिशाचरौ ॥ निशाचरस्थलामिदंकथंजीवेच्छिशुर्मम १३ ॥
कउवाच ॥ उक्त्वापरस्परंतौतुस्नाप्यबालंतथाविधम् ॥ स्नात्वासुषुपतुस्तत्रदंपतीविस्मयान्वितौ १४ ततश्चतुर्थेवर्षेस्वाश्रमात्परतोययौ ॥ कासारंजल
जैर्युक्तंनक्रमत्स्यगणैर्युतम् १५ तमालवृक्षसरलजंब्वाम्रपनसान्वितम् ॥ नानावृक्षलताकीर्णंफलपुष्पसुशोभितम् १६ नानापक्षिगणाकीर्णंनानामुनिग
णान्वितम् ॥ अतिस्वच्छजलंरम्यंसुजनस्थेवमानसम् १७ व्यतीपातेसोमवत्यांस्नातुंतत्रागमद्दितिः ॥ उपवेश्यस्वकंबालमाकंठंजलगाभवत् १८ बालउ
ड्डीयतांगंतुंजलमध्येपपातह ॥ चिक्रीडसजलेयावत्तावन्नक्रोदधारतम् १९ धावधावेतिजननीचुक्रोशजलमध्यगा ॥ आगत्यजननीबालंगृहीतुंनैवचाशकत्
२० आकृष्यतेजलेतेनजनन्याबहिरेवसः ॥ सनक्रोबालसहितांदूरेदूरेचकर्षह २१ बालोवदत्ततस्तांसनमोच्योहंसुतस्त्वया ॥ सहत्वयासहैवाहंमरिष्येनब
लंमम २२ दृष्ट्वासबालामाकंठमग्नांतांविह्वलांभृशम् ॥ निष्कासितुंबलाच्छिष्याऽड्डीयपतितावने २३ तस्माद्बलवतोनक्रात्तोपिशक्तानचाभवन् ॥ ततो
त्यंतंबलंतस्यदर्शयामासबालकः २४ लीलयैवतदानक्रंपृथिव्यांजलतोक्षिपत् ॥ वायुर्यथाफलंपक्वंग्रावाणंबालकोयथा २५ शरीरंदृश्यतेतस्यविशीर्णंपति
तंभुवि ॥ गतचेष्टंगतप्राणंयोजनायतमद्भुतम् २६ सबालासहशिष्यैःसामुदंग्राप्तादितिस्तदा ॥ ततोदिव्यवपुश्चित्रगंधर्वस्तमुवाचह २७ अहमासंपुराराजागं
धर्वाणांगजानन ॥ विवाहेसर्वगंधर्वाममगेहमुपागताः २८ पूजिताःपरयाभक्त्यानभृगुःपूजितोमया ॥ वैवाहिकानिकार्याणिकुर्वताकुपितोमुनिः २९ शशा
पमांनक्रवरोभविष्यसिसरोगतः ॥ समाकर्ण्यमुनेःशापमुपशापंतमर्थयम् ३० ततोभृगुरुवाचेत्थंयदाकश्यपनंदनः ॥ गजाननःस्पृशेत्त्वांतुतदास्वंवपुराप्स्यसि
३१ इदानींमासिविज्ञातोबालरूपीगजाननः ॥ त्वमेवजगतांनाथःकर्त्तापातापहारकः ३२ निर्गुणोनिरहंकारःसदसत्कारणंपरम् ॥ नानावतारैर्भक्तानांपालकोदु

ष्टनाशनः ३३ सर्वव्यापीपूर्णकामोनेकब्रह्मांडनायकः ॥ मुनीनामप्यगम्यस्त्वंमनोवागनिरूपितः ३४ इतिस्तुत्वाचनत्वाचसंपूज्यबालरूपिणं ॥ गजाननंप्र
यातोसौकृत्वाप्रदक्षिणांमुहुः ३५ अदितिर्बालकंगृह्यलालयित्वास्तनंददौ ॥ आश्चर्यमानसायाताप्रसन्नानिजमंदिरम् ३६ प्रणम्यकश्यपंसर्ववृत्तांतंसमभाष
त ॥ सविस्मितोब्रवीच्चैनामयंतुपरमेश्वरः ३७ लीलाविग्रहवान्मन्येमानुषदेहमाश्रितः ॥ अत्यद्भुतानिचान्यानिकर्माण्येषकरिष्यति ३८ देवासुरैरशक्या
निद्रष्टव्यानिप्रसादतः ॥ अस्मिन्नभक्तिर्दृढाकार्याजनैरात्महितेप्सुभिः ३९ इतिश्रीगणेशपु०उत्तर०नक्रमोक्षणंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ ६१ ॥ ॥
कउवाच ॥ ॥ अन्यत्तेकथयिष्यामिचरितंबालरूपिणः ॥ गजाननस्याद्भहरंशृणुष्वैकमनामुने १ एकस्मिन्समयेहाहाहूहूस्तुंबरुरेवच ॥ वीणागानरतावी
णाहस्ताहरिपरायणाः २ शंखचक्रगदापद्मतुलसीदामभूषणाः ॥ गोपीचंदनलिप्तांगाःपीतांबरधराःशुभाः ३ कैलासंगंतुकामास्तेकश्यपस्याश्रमं
ययुः ॥ अतिसंमानितास्तेनपूजिताश्चयथाविधि ४ उवाचप्रणतस्तान्सोनायासेनसतांदृशिः ॥ केनपुण्येनसंजाताधर्मार्थकाममोक्षदा ५ धन्यंतपोज
निर्माितापितरौज्ञानमाश्रमः ॥ प्रयोजनंनजानेहंचलनेतद्वदंतुमे ६ इतितद्वचनंश्रुत्वासंतुष्टास्तेतमब्रुवन् ॥ कैलासंगंतुकामानांजातंत्वद्दर्शनंहिनः ७
दुरितंविलयंयातंजातंचसफलंजनुः ॥ अदूरेपरमासिद्धिर्विश्रांतिःपरमाचनः ८ अनुजानीहिगच्छामोगिरिशंद्रष्टुमुत्सुकाः ॥ श्रुत्वावाक्यानितेषांतुपुनरु
चेतपोनिधिः ९ मुक्त्वाव्रजंतुविश्राम्याप्यमुक्त्वेतोनकोगतः ॥ मज्जनायजलंतेभ्योदत्त्वापाकमकारयत् १० देवार्चनरताःस्नात्वाबभूवुर्मुनिसत्तमाः ॥ तेपिसं
पूज्यशर्वाणींशर्वंविष्णुंविनायकं ११ रविंविष्णुमयंध्याननिष्ठाआसन्मुहूर्ततः ॥ तदाविनायकोबालोरमित्वाबालकैर्बहिः १२ आगतोंतर्गृहंतावत्पंचभू
र्त्तिंददर्शसः ॥ गृहीत्वाबहिरेवाशुचिक्षेपाग्निगृहंययौ १३ भस्मांगरागंसर्वत्रकृत्वालीनोभवच्चसः ॥ विसृज्यध्याननंनापश्यन्मूर्त्तीस्तेपुरतःस्थिताः १४
ततस्तेविस्मिताःसर्वेपरस्परमथाब्रुवन् ॥ केनदैत्येननीतानोमूर्तयःकर्महेतवः १५ गंधर्वाराक्षसायक्षानेतुंमूर्तीःकिमागताः ॥ किंवासत्वपरीक्षार्थंअं
तर्धानंगताइमाः १६ ततःक्रोधेनमहताकश्यपंप्रष्टुमागताः ॥ भवद्गेहेकथंध्याननिष्ठानांमूर्त्तयोगताः १७ क्रीडंतिजातिवैरास्तआश्रमेइतरेतरम् ॥
देवाबिभ्यतितत्कस्मादाश्रमेदस्यवःस्थिताः १८ इतिश्रुत्वावचस्तेषांकश्यपोतिरुषान्वितः ॥ अभोजिनोविनिश्चित्यमूर्तिप्राप्तिंविनाचतान् १९ ततः
शिष्यान्समाकार्यकश्यपोमुनिसत्तमः ॥ तानुवाचनमेजन्मावध्यव्रतस्करोभवत् २० दैवादिदानींकोजातोदस्युस्तत्रवदंतुमे ॥ क्रोधवाक्यंनिशम्येत्थंऊचुः
शिष्यागुरुंप्रति २१ नवयंतस्कराःस्वामिन्पुत्रस्तेविदितस्तव ॥ दोषानुवर्णनेदोषाअस्माकंतन्नचक्ष्महे २२ तेषांब्राह्मींसमाकर्ण्यगिरंहस्तोमुनिस्तदा ॥ पुत्र
मन्वेषयन्यातोवह्नचागारेददर्शतम् २३ तेषांपुरःसमानीतोदृष्टस्तैःशिवसन्निभः ॥ उवाचतत्समक्षंतंकश्यपःक्रोधसन्निभः २४ मूर्तीरानयशीघ्रंत्वंनोचे
त्पुत्रमरिष्यसि ॥ मयाननीतारतास्तातप्रत्युवाचसनिर्भयः २५ ब्रवीषिशपथंयंयंतंतमेवकरोम्यहम् ॥ एवंवदन्पितुर्भीत्यारुरोदशिशुर्भृकः २६ प्रसार्य

वदनंभूमौपतितोभूशविह्वलः ॥ जननीचतदायाताताश्रुवाचततोभकः २७ यदिमेभक्षितादेवास्तर्ह्यस्येदृश्यतांमम ॥ प्रसारितेतदास्येसाददर्शाविश्व
मंतरा २८ विस्मितामूर्च्छितामूमौपतिताभयविह्वला ॥ ततस्तेदद्दशुस्तत्रगंधर्वाःकश्यपोपिच २९ कैलासंशंकरंसांगंवैकुंठंविष्णुमेवच ॥ ब्रह्माणंसत्यलो
कंचशक्रंचैवामरावतीम् ३० सपर्वतवनाकीर्णांधरणींलोकसंयुताम् ॥ सरितःसागरान्यक्षान्रक्षांसिपन्नगानपि ३१ वृक्षान्पक्षिगणांश्चैवभुवनानिचतुर्द
श ॥ इंद्रादिसर्वलोकांश्चपातालानिदशोदश ३२ ततोमाताप्रबुद्धासास्तनपानंददौमुदा ॥ ननामकश्यपस्तंतुदृष्ट्वेत्थंविश्वरूपिणं ३३ तर्कयामासमनसिसा
क्षादीश्वरएवयः ॥ अवतीर्णोममगृहेतमहंताडितुंगतः ३४ ततःसकश्यपःप्राहमुञ्यतामितिताम्प्रति ॥ नायंबालस्ताडयितुंमयाशक्योमहाबलः ३५ भी
षयंतूग्ररूपेणसमष्टिव्यष्टिरूपवान् ॥ भवतांयदिशक्तिश्चेत्ताड्यतांमूर्त्तिहेतवे ३६ तऊचुर्नवयंकिंचिद्भक्षयामस्तवालये ॥ अन्नंवाकंदमूलादिपंचायतनमंतरा
३७ इत्युक्तवंतोदद्दशुर्बालकंपंचधापिते ॥ शिवाशिवेनवीशेमाननरूपंतमेवहि २८ प्रणेमुस्थिरचित्तास्तेपुपूजुस्तुष्टुवुर्जगुः ॥ क्षणंतेदद्दशुर्बालंक्षणंपंचस्व
रूपिणम् ३९ क्षणंमहाभीतिकरंक्षणंतंविश्वरूपिणम् ॥ ततस्तस्मैनिवेद्यान्नंषड्रसंबुभुजुश्चते ४० ततस्तेनुनुवुर्भक्त्याबालंतंविश्वरूपिणम् ४१ ॥ त्रयऊचुः ॥
अज्ञानेनविमोहितंजगदिदंसंसारचक्रेभ्रमन्नानाभेदधियास्वरूपविसृजंनानाविधश्रामितम् ॥ नानापाशनियंत्रितंनिजकृतैःकर्मांकुरैर्भीशितंनानारूपमरूपमे
कमगुणंहित्वाभवंतंविभो ४२ अन्येतेचरणारविंदनिरताहित्वाफलंयाजकाआत्मानंस्वपरेपुवर्ष्मसुमदासंचिंतयंतोमलाः ॥ तेज्ञानेनविधूयसर्वकलुषंदग्ध्वां
कुरान्कर्मजांस्त्वामेवाशुविशंतिसर्वसरितोवार्द्धिंयथामेघजाः ४३ येकेचिद्भजनानुरक्तमनसःसिद्धिंगताभूयसींतेत्रैवानिमग्नमानसतथाविस्मृत्यपादांबुजं ॥
तेकृच्छ्रादुपरुह्यचोत्तमपदंतस्मात्पतंतोनिजादज्ञानान्नविदुर्विषंहिपिबतोहित्वामृतंदुर्लभम् ४४ तस्मान्नोजननंभवेद्यदिशुभंयद्वाशुभंत्वत्स्मृतिरास्तांतन्ननिरं
तरंशुभकरीभक्तिश्चदुःखाशिनी ॥ एवंचेद्भ्रमतांकदापिहिभवेत्संसारपाथोनिधेर्निस्तारोभवतःकृपेक्षणवशात्सर्वात्मनेतेनमः ॥ ४५ ॥ तवावतारान्नाहिकोपि
शक्तोवेत्तुंकथंवाकतिचित्कदेति ॥ योगीशमायेशगुणेशभूमन्नमोनमस्तेभगवन्नमस्ते ४६ ॥ कउवाच ॥ एवंस्तुत्वागतास्तेतुकैलासंगिरिशालयं ॥ पंचाय
तनमर्चंतोविस्मिताबालचेष्टितं ४७ ॥ इतिश्रीगणेशपुराणेउत्तर०बालचरितेहाहादिस्तुतिर्नामनवमोध्यायः ॥ ९ ॥ ७ ॥ कउवाच ॥ ततस्तुपंचमेवर्षे
सचौलंव्रतबंधनम् ॥ चकारकश्यपोधीमान्सूत्रोक्तविधिनाशुभम् १ शुभेमुहूर्तेलग्नेचब्राह्मणैर्वेदपारगैः ॥ आकारिताःशिष्यगणैर्देवदानवराक्षसाः २ मुनयो
यक्षनागाश्चतथाराजर्षयोपिच ॥ वैश्याःशूद्रास्तथायातानानोपायनपाणयः ३ ववदुर्बहुवाद्यानिदेवैराहतानिच ॥ गणेशपूजनंचक्रेस्वस्तिवाचनमेवच ४
मंडपस्थापनंचक्रेमातृकापूजनंतथा ॥ चकाराभ्युदयश्राद्धंब्राह्मणानांतथार्चनम् ५ सुहृदांवस्त्रदानंचचकारसयथार्हतः ॥ अन्येषांचतथातेपिवस्त्राणिनिदधुः

१ शक्रंतल्लोकमेवचइति पाठान्तरम् ।

पुरः ६ होमांतेपुनरानर्चब्राह्मणान्कश्यपस्ततः ॥ अंतःपटंवेदिकायांधारयित्वाससत्वरम् ७ कृत्वाग्निस्थापनंपूर्वंसुपनिन्युश्चबालकम् ॥ सुवासिन्योब्राह्मणा
स्तमक्षताभिरवाकिरन् ८ तन्मध्येराक्षसाःपंचसुदुष्टाब्रह्मलिंगिनः ॥ अस्त्रैस्तमाकिरन्दुष्टास्तत्प्राणहरणेच्छया ९ विघातश्चैवपिंगाक्षोविशालःपिंगलस्तथा ॥ च
पलश्चमहापुंड्राअक्षमालाविभूषिताः १० जलपात्रभृतोनर्घ्यवस्त्रांबरधराःशुभाः॥ विशीर्णोजायतदेहःकुमारस्यतदद्भुतः ११ ज्ञात्वाकुमारस्तान्दुष्टान्मंत्रयामा
सतंडुलान् ॥ महोत्कटःप्रचिक्षेपतंडुलान्पंचपंचसु १२ तदैवनिर्गतप्राणानिजरूपंसमाश्रिताः ॥ करालाःपतिताभूमौविशीर्णादशयोजनम् १३ वज्राघाताय
थापेतुर्गिरयस्तुबिडौजसः ॥ कोलाहलोमहानासीद्रजसाच्छादितादिशः १४ कथंव्यापादिताःपंचराक्षसाःकूटरूपिणः ॥ क्षणेनानेनबालेननजानीमोखिला
असुं १५ अवतीर्णोभुवोभारंहर्त्तुंकिंपरमेश्वरः ॥ एवंततोगरिष्ठेतेब्रह्माद्यादेवतागणाः १६ ववर्षुःपुष्पवर्णांणिविमानवरमाश्रिताः ॥ नीतेषुतेषुप्रेतेषुब्राह्मणाः
कश्यपोपिच १७ उपनीतेतत्रशिशौवासश्चमेखलामपि ॥ उपवीताजिनेदंडंददुस्तस्मैस्वमंत्रतः १८ ततोऽजलिंपूरयित्वाप्रोद्वीक्ष्यमंडलंरवेः ॥ होमंसर्वंसमा
प्यैनंसावित्रींकश्यपोब्रवीत् १९ पादमर्धंततःसर्वाभिक्षांमातापुरासदौ ॥ असंख्यातास्ततोभिक्षाददुस्तेसर्वआगताः २० उपदिश्यततश्चैनंशौचाचाराननेक
शः ॥ पुनश्चब्राह्मणान्पूज्यवासांसिकांचनंचगाः २१ महत्यरिष्टेतीर्तेस्मिंस्तेभ्योभक्त्यादद्दौमुनिः ॥ वसिष्ठस्तंसभामध्येनिनायब्रह्मणोंतिकम् २२ सोपिक
मंडलुजलैरस्यतीर्थंगृहीतवान् ॥ सर्वदाविकसत्पद्मंददावस्मैकरास्थितम् २३ ब्रह्मणस्पतिरित्येवंनामचक्रेतदास्यसः ॥ संपूज्यनामचक्रेस्यभारभूतिर्बृहस्पतिः
२४ रत्नमालांददौचास्मैकुबेरोपिगलस्थिताम् ॥ सुरानंदेतिनामास्यसंपूज्यचचकारह २५ सर्वप्रियेतिनामास्यदत्त्वापाशमपांपतिः ॥ शृण्वत्सुसुरसंघेषुच
कारशंकरोपिच २६ त्रिशूलंडमरुंदत्वाविरूपाक्षेतिचाभ्यधात् ॥ दत्वाचंद्रकलांनामभालचंद्रेतिचाकरोत् २७ रामस्यजननीचास्मैसखीबालायचार्पयत् ॥
परशुंपरशुहस्तेतिनामचक्रेस्फुटंमुदा २८ पुनःसंपूज्यसिंहंसाददौवाहनमुत्तमम् ॥ सिंहवाहनइत्येवंचक्रेनामातिसुंदरम् २९ उपादिशद्दुष्टनाशंकुरुशीघ्रंविना
यक ॥ सागरोद्विजरूपेणमुक्तामालांददावथ ३० मालाधरेतिनामास्यकृतवान्परिपूज्यच ॥ आसनार्थंततस्तस्मैशेषःस्वात्मानमर्पयत् ३१ फणिराजासने
त्येवंनामचक्रेस्वयंमुदा ॥ दाहशक्तिंददौवह्निर्धनंजयेतिनामच ३२ प्रभंजनेतिनामास्मैवायुश्चबलमुत्तमम् ॥ एवंसर्वेयथाशक्त्यादत्त्वानामानिचक्रिरे ३३ ते
षांनिर्वचनेशक्तिर्नकस्यापिभवेन्मुने ॥ अपुपूजन्नचैनंसशक्रोमदविमोहितः ३४ नवाकिंचिद्ददौचैनंउपायनवरंशुभम् ३५ जहांत्रिलोकीनमितःसुरेशोवृद्धोमृता
शीलघुमर्भकंतम् ॥ गजेंद्रगामीहरिशूलपाणिप्रपूजितःकश्यपजंनमस्थे ३६ सिंहोयथानात्तितृणंसमुद्रःपल्वलोदकम् ॥ नयाचतितथान्यंवाकल्पवृक्षोखिलंद
दत् ३७ एवंतस्याशयंबुद्ध्वाकश्यपःप्रणिधानवान् ॥ उवाचधर्मसंयुक्तंवचस्तद्धितकाम्यया ३८ यत्राद्भुतानिकर्माणियत्रस्युश्चगुणाकराः ॥ सनमस्यश्चपूज्यश्च
ब्राह्मणोपिचनिर्गुणः ३९ इतिश्रीगणेशपुराणेउत्तरखंडेनानानामनिरूपणंनामदशमोऽध्यायः ॥ १०॥ कश्यपउवाच ॥ जयंतुमद्गृहेकोपिह्यवतीर्णःपरःपुमान् ॥

अनिर्वाच्यगुणोहीनोगुणैस्त्रिभिरनावृतः १ एतद्विरोधयंकुर्यात्सपदभ्रंशतामियात् ॥ एतस्याद्भुतकर्माणिशृणुमेगदतःसुर २ विरजाराक्षसीघोराहंतुमेनं समागता ॥ साहतातेनबालेनपतिताहिद्वियोजना ३ उद्धतश्चैवधुंधुश्चदैत्यौपरमदुर्मदौ ॥ शुकरूपधरावेनांनिहंतुंसमुपागतौ ४ पक्षेधृत्वापोथितौतौ शिलायांगतजीवितौ ॥ निपेततुर्धरापृष्ठेविशालौसर्वदृग्गतौ ५ तथैवचित्रगंधर्वोजलेनक्रत्वमागतः ॥ एतस्यस्पर्शमात्रेणगतोदिव्यशरीरताम् ६ हाहा हूहूतुंबरूणांसत्वसंशोधनायसः ॥ जहारपंचायतनंपंचधास्वयमप्यभूत् ७ सर्वेषांचसमक्षंवोनिहताःपंचराक्षसाः ॥ एवंमुनिवचःश्रुत्वाबभाणबलवृत्रहा ८ इंद्रउवाच ॥ ॥ नदृष्टोस्यगुणोत्कर्षस्तावन्मान्योभवत्कथम् ॥ कउवाच ॥ ततोदिदेशवायुंसनयैनंव्योममंडलम् ९ तस्यानुज्ञापदंवायुर्युगांतसदृशोववौ ॥ आं दोलयन्सर्वलोकंभ्रामयन्कुधरान्भृशम् १० अकालःप्रलयःकिंनुप्रारब्धोलोकनाशनः ॥ इत्येवंभृशसंविग्नाऋषयश्चकंपिरे ११ बटुंनेतुंसमायातोमहाश क्त्याप्रभंजनः ॥ नचासनंत्वस्यचलंरोमवासमपद्यत १२ भग्नेवायौतुसंप्राहशुष्माणंपाकशासनः ॥ दहैनंत्वंबटुंशीघ्रंद्रष्टव्याशाकिरद्यते १३ तदाज्ञांशिरसागृह्य जगामतमुषर्बुधः ॥ निर्दहन्निवत्रीन्लोकान्प्रलयानलसन्निभः १४ भस्मीकर्तुंद्रुमान्सर्वान्शोषयन्सर्वसागरान् ॥ तंदहंतंजनान्सर्वान्दृष्ट्वाक्रतुयपनंदनः १५ तत्क्ष णादगिलद्रोगीभेषजंगुटिकामिव ॥ गिलितेतादृशेवह्नौक्रोधसंरक्तलोचनः १६ सहस्रलोचनोलोकाँल्लोचनैःसर्वलोचनैः ॥ तावद्ददर्शतंतत्रसहस्राधिकलोचनम् १७ असंख्यशीर्षमुकुटमनंतश्रोत्रसंयुतम् ॥ अनंतहस्तचरणमनंतोदारविक्रमम् १८ शशिसूर्याग्निनयनंशिखाव्याप्तनभस्तलम् ॥ सप्तपातालचरणंसप्तलोकै कमस्तकं १९ असंख्यसूर्यसंकाशंअसंख्येंद्रसुसेवितम् ॥ असंख्यकेशसंयुक्तंनानाब्रह्मांडरोमकम् २० आमूलाग्राद्यथावृक्षेभवंत्यौदुंबराणिवै ॥ औदुंबरेवा मशकासंख्यातीताभवंतिहि २१ तथैवैकैकरोमांचंसंख्यातीतांडसंयुतम् ॥ पश्यंस्तत्रैवैकतरंभ्रांतःशक्रोविवेशह २२ पश्यतिस्मसतन्मध्येत्रैलोक्यंसचराचर म् ॥ अरण्यकदलीकोशपत्रेपत्रेयथाफलम् २२ असंख्यातंजगत्तत्रपश्यतिस्मशचीपतिः ॥ बभ्रामभ्रांतचित्तोसौनालभान्निर्गमंततः २४ ततोननाममूर्ध्नासावे वंभग्नमनोरथः ॥ प्रार्थयामासदेवेशंतदाशक्रोगजाननम् २५ ॥ शक्रउवाच ॥ भूभारहरणार्थंयोजातःकश्यपनंदनः ॥ अचिंत्योमहिमायस्यकिमुवर्ण्योभवे न्मम २६ निर्गमंदेहिदेवेशकुक्षेरत्यंतविस्तरात् ॥ अदृष्टपारार्द्धसंख्यांद्वादशभ्रमतामया २७ तवकुक्षौमयादृष्टाभुवनानिचतुर्दश ॥ स्थानेस्थानेविभक्तानिप्र तिरोमांचमेकराट् २८ समष्टिव्यष्टिरूपाणिमहाविस्तारवंतिच ॥ दृष्टानितवरूपाणिसुसौम्यानीतराणिच २९ अद्भुतान्यप्यसंख्यानिवक्त्राणिनयनानिच ॥ दृष्ट्वादुर्दर्शरूपाणिजगत्क्षोभकाराणिते ३० दैत्यदानवपूर्णानिसुरमानववंतिच ॥ यक्षरक्षःपिशाचादिचतुराकरवंतिच ३१ विकरालमहोरूपमुपसंहरविश्व कृत् ॥ गतोमोहंस्मृतिर्लब्धाप्रसादान्निखिलेश्वर ३२ कायेनमनसाबुद्ध्यावाचात्वांशरणंगतः ॥ प्राक्तनंदर्शयविभोरूपंतेभक्तवत्सल ३३ ॥ कउवाच ॥ ए वंयावत्प्रार्थयतेस्वात्मानंतावदेवसः ॥ समामध्यगतंतंचददर्शब्रह्मचारिणम् ३४ पश्यतांसर्वलोकानांसाष्टांगंप्रणनामतम् ॥ अतिविस्मितचित्तोसौलज्जाहर्ष

समन्वितः ३५ शृण्वत्सुसर्वदेवेषुनावब्रह्मचारिणम् ॥ जातंमुनिगृहेशांतंक्रीडामानुषरूपिणम् ३६ ॥ शक्रउवाच ॥ जानेनत्वानंतशक्तिंपरेशंविश्वात्मानंविश्वबीजंगुणेशम् ॥ विश्वाभासंविश्ववंद्यंत्रिसत्यंत्रेधाभूतंजन्मरक्षार्तिहेतुम् ३७ एकंनित्यंसच्चिदानंदरूपंसर्वाध्यक्षंकारणातीतमीशम् ॥ चेष्टाहेतुंस्थावरेजंगमेचवांछापूरंसर्वगंत्वाभिवंदे ३८ सर्वेशानंसर्वविद्यानिधानंसर्वात्मानंसर्वबोधावभासम् ॥ सर्वातीतंवाङ्मनोगोचरंत्वांसर्ववासंसर्वविज्ञानमीडे ३९ ॥ ॥ कउवाच ॥ ॥ एवंस्तुत्वाचनत्वाचसंपूज्यस्वांकुशंददौ ॥ कल्पवृक्षंचदास्यौद्वेविनायकइतिस्फुटम् ४० चकारनामशक्रोथस्मरणात्सर्वसिद्धिदम् ॥ जयशब्दैर्नमःशब्दैर्वाद्यशब्दैरनेकधा ४१ गंधर्वगीतनिनदैरप्सरोनृत्यनिस्वनैः ॥ व्याप्तमासीत्पुष्पवर्षैस्तदाव्योमधरातलम् ४२ प्रतिकूलवहानद्यआसन्पूर्ववहाःशुभाः ॥ प्रसन्नमासीद्दिक्चक्रंववुर्वाताःसुखावहाः४३प्रदक्षिणार्चिषःशांताआसन्सर्वत्रवह्नयः ॥ ततःप्रसन्नःशक्रायददावभयमेकराट्४४भवितानभयंक्वापितवशक्करणाजिरे ॥ पठस्वस्तोत्रमेतत्त्वंत्रिसंध्यंभक्तितत्परः ४५ अन्योपियःपठेद्भक्त्याश्लोकत्रयमिदंनरः ॥ ससर्वानाप्नुयात्कामान्सर्वत्रविजयीभवेत् ४६ ततःशक्रोनमस्कृत्यवरं प्राप्यशुभावहं ॥ ततःसर्वेनमस्कृत्यस्वंस्वंस्थानंययुर्मुदा ॥ ४७ ॥ इतिश्रीगणेशपुराणेउत्तर०बालचरितेएकादशोऽध्यायः ॥ ११ ॥ ॥ ७ ॥ ॥ कउवाच ॥ ॥ ततस्तुसप्तमेवर्षेप्रवृत्तेमौविनायकः ॥ स्नात्वानित्यविधिंकृत्वामुकुटभ्राजिमस्तकः १ आयुधानिचचत्वारिसिंहारूढोदधारसः ॥ अंकुशंपरशुं पद्मंपाशंसर्वभयापहं २ दंडाजिनेकुंडलेचकांचनेरत्नसंयुते ॥ बिभ्रत्कमंडलुंदर्भान्कौशेयंपीतमुत्तमम् ३ कस्तूरीतिलकंचंद्रंललाटेक्षीणतेजसं ॥ मुक्ताफलमयींमालांकंठेनाभौफणीश्वरं ४ रोदसींकंपयन्घुंचैर्जगर्जासौस्वलीलया ॥ मेघस्वनइतिभ्रांत्याचातकाव्याददुर्मुखम् ५ उच्छलंत्योमहानद्यः सिषिचुर्व्योममंडलं ॥ तदाननंदतुरुभावदितिःकश्यपोपिच ६ धन्यावयंपूर्वजानइत्यात्मानंप्रशंसतुः ॥ एतस्मिन्समयेकाशीराजोप्याश्रममभ्यगात् ७ परस्परालिंगनेनमुमुदुस्तेखिलास्तदा ॥ न्यविशंतासनेसर्वेनमस्कृत्यपरस्परम् ८ स्वाद्वन्नंभोजयामासमुनिस्तंषड्रसैर्नृपम् ॥ विश्रांतंपरिपप्रच्छकिमागमनकारणं ९ श्रीमतांदर्शनंनोद्यजातंपुण्यवशान्नृप ॥ पुरोहितस्यमेनत्वंवृत्तांतंकिंगृहीतवान् १० ॥ ॥ कउवाच ॥ ॥ एवंमुनिवचःश्रुत्वाजगादनृपसत्तमः ॥ क्षमापराधंमेब्रह्मन्नराज्याकुलितचेतसः ११ पुत्रस्यमेविवाहोस्तित्वामाकारयितुंप्रभो ॥ आगतोहंमुनेजातःकृतार्थस्तवदर्शनात् १२ चलशीघ्रं विवाहंत्वंसंपाद्यपुनरेवाहि ॥ नश्लाघ्योलोकवर्येषुविनाचैवागमंतव १३ अहमेवसमायातोतस्त्वांनेतुंमहामुने ॥ ॥ मुनिरुवाच ॥ नाहमेष्येनृपश्रेष्ठचातुर्मास्यरतोधुना १४ पुत्रंनयसमर्थंमेयदीच्छसिजनाधिप ॥ ॥ राजोवाच ॥ ॥ पुत्रमाज्ञापयमुनेगमिष्यावोजवान्वितौ १५ एवंनृपवचःश्रुत्वामुनिःपुत्रमथाब्रवीत् ॥ वचोनुरोधाद्राज्ञोस्यप्रेषयेत्वांविनायक १६ विद्यमानेतुमहतिदुःखंविरहजेतव ॥ तामाज्ञांशिरसावंद्यचरणावुभयोरपि १७ मातापित्रोर्बहिरगाद्राज्ञाचारोपितोरथे ॥ सोपिनत्वातयोःपादौस्वयमारुरुहेरथम् १८ आजगामादितिस्तंचप्रावदन्नृपसत्तमम् ॥ अयंमेबालकोराजन्रक्षणीयो

निरंतरम् १९ उत्पातोजायतेतत्रयत्रमेबालकोभवेत् ॥ अतोयंयत्नतोरक्ष्यःपक्ष्मणीवकनीनिकाम् २० यथानयसिपुत्रंमेतथात्रत्वंसमानय ॥ ओमित्युक्त्वा दितिंराजाप्रणिपत्यविसृज्यताम् २१ सहतेनययौशीघ्रंरथेनानिलरंहसा ॥ गच्छतारथमार्गेणराज्ञाप्राप्तामहाटवी २२ नरांतकपितृव्यस्यस्थानंतच्चातिसुंदरम् ॥ रौद्रकेतोर्बलीभ्राताधूम्राक्षोनामनामतः २३ दशवर्षसहस्रंसतपस्तेपेसुदारुणम् ॥ सहस्रकिरणंनित्यंनित्यमाराधयन्मुदा २४ प्रार्थयन्सर्वसंहारकरमायुधमुत्तमम् ॥ त्रयाणांभुवनानांसइच्छन्वश्यत्वमात्मनः २५ वृक्षस्कंधालंबिपादोधोमुखोधूममापिबन् ॥ एवंबहुगतेकालेमोघंशस्त्रमुपस्थितम् ॥ २६ प्रेषितंभानुनातस्मैराक्षसायतपस्यते ॥ व्योमव्यापियस्यतेजोददर्शसविनायकः २७ शीघ्रमुड्डीयजग्राहगरुत्मानिवपन्नगम् ॥ तदाविस्मयमापेदेकाशीराजोमहामनाः २८ तर्कयामासमनसिलाभेहानौचजीविने ॥ नास्तिदैवातिरेकेणनिमित्तंभुवनत्रये २९ ममनैवाभवत्प्राप्तिःसहसातस्यतस्यया[1] ज्ञातुंतदस्त्रसामर्थ्यंतोलयित्वाक्षिपच्चसः ३० ऊर्ध्वंगतंतदैवाशुरवंकृत्वाभयानकम् ॥ धूम्राक्षेपतितंतत्तुसतदैवद्विधाभवत् ३१ गंडशैलाद्रुमास्ताभ्यांखंडाभ्यांचूर्णिताभृशम् ॥ धनुःपंचशतंपृथ्वीपतद्भ्यांव्यापितातदा ३२ ततस्तस्यसुतोख्यातोजघनोमनुरेवच ॥ शुश्रूषायांरतौतस्यपितरंवीक्ष्यतादृशम् ३३ क्रोधाविष्टौददृशतुस्तंविनायकमंतिके ॥ दुद्रुवतुःप्रसार्यैवंवक्त्रंकालांतकोपमम् ३४ वटुमानीयापितरंकथंघातितवानसि ॥ इत्यूचतुःकाशिराजंरोषाविष्टौनिशाचरौ ३५ रक्षितोसिपुरापित्राममपूर्वंनरांतकात् ॥ तंमारयित्वायत्नेनकथंजीवासिरेनृप ॥ ३६ ॥ कउवाच ॥ इत्याकर्ण्यनृपोवाक्यंचकंपेभृशविह्वलः ॥ तर्कयामासमनसिकथमानीतवानहम् ३७ नंदनंकश्यपस्यैनमपस्मारमिवास्थितम् ॥ क्रुद्धोनरांतकश्चेन्मेबलाद्राज्यंग्रहीष्यति ३८ तदामेरक्षिताकःस्यात्तःशपथमारभत् ॥ ॥ नृपउवाच ॥ ॥ एतदर्थंमयानीतोनैवायमर्भकःक्वचित् ३९ ब्राह्मणेश्वरयोरत्रशपथोमेनिशाचरौ ॥ पुरोहितस्यपुत्रोयंविवाहार्थंसमाहृतः ४० नविघ्नंकुरुतंतत्रनीयतांबालकोह्ययम् ॥ इत्यस्यवचनांतेममुनिपुत्रोजगादतम् ४१ कथंबध्वाशत्रुहस्तेशिशुंमांत्वंप्रयच्छसि ॥ अदितिंकश्यपंवापिवदिष्यसिकिमुत्तरम् ४२ क्रुद्धश्चेत्कश्यपस्त्वांहिकुर्याद्भस्मनसंशयः ॥ एवंवदतितस्मिंस्तुबालकेमुनिनंदने ४३ भक्षितुंतंसमायातौविडालौमूषकंयथा ॥ प्रसार्यवदनंबालोघोरंशब्दमथाकरोत् ४४ चकंपेचत्रिभुवनंतौचानिश्वासयोगतः ॥ संप्राप्तौमेघपटलंवात्ययैवयथातृणम् ४५ मूहूर्त्ताद्विनयेजातेव्यस्तौद्वौतौनिपेततुः ॥ नरांतकस्यनगरेजघनोमनुरेवच ४६ गिरिशीर्षेगंडशैलौमहावातेरितौयथा ॥ पतद्भ्यांतच्छरीराभ्यांचूर्णितानिगृहाणिच ४७ मुखहस्तरवाआसन्हाहाकारोमहानभूत् ॥ किमिदंकिमिदंदूताधावमानाययुस्तदा ४८ मृतौधूम्राक्षतनयौश्रुत्वासम्यग्व्यलोकयन् ॥ सचेतनौचतौदृष्ट्वासावधानावकुर्वत ४९ दूतास्तावूचतुःसर्ववृत्तांतमनुपूर्वशः ॥ वधंपितुःकाश्यपेयात्तस्यश्वासान्निपातनम् ५० सगच्छतिस्यंदनेनकाशीराजेन

[1] सहयातस्पतस्ययाइतिपाठान्तरम् ।

संयुतः ॥ एवंदूतानिशम्यैनंनरांतकमथाब्रुवन् ५१ पितृव्यंनिहतंश्रुत्वासापराधंनरांतकः ॥ ऋषिपुत्रंतथायांतंकाशीराजेनसंयुतम् ५२ क्रोधेनारक्तनय
नःपुरःपश्यन्निशाचरान् ॥ आज्ञापयत्तमानेतुंसहस्रप्रमितांस्तदा ५३ धृत्वानेयोमुनेःपुत्रोयुद्धकृच्चेत्सहन्यताम् ॥ काशीराजरथोवापिशीघ्रंगच्छंतुरा
क्षसाः ५४ आज्ञामात्रेणतेजग्मुस्त्वरयावातरंहसः ॥ काश्यपेयंचनृपतिंददृशुस्तेचतौचतान् ५५ ततोविनायकश्चक्रेभीमशब्दंभयावहम् ॥ ततोनिशाचराः
पेतुस्त्यक्त्वाप्राणांस्तुकेचन ५६ केचित्पलायिताःकेचिद्भग्नपादाःप्रपेदिरे ॥ केषांचिन्मस्तकाभिन्नाःकेचिच्छीर्णोदराःशरैः ५७ भग्नास्याभग्ननेत्राश्च
भग्नोरुबाहवःपरे ॥ प्रपलाय्यगतायेतुआगतास्तेनरांतकम् ५८ उदंतंसर्वमाचख्युर्विनायककृतंतदा ५९ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेनिशाचरव
धोनामद्वादशोऽध्यायः ॥ १२ ॥ ॥ दूताऊचुः ॥ ॥ विनायकंरथस्थंतंआज्ञांप्राप्यगतावयम् ॥ सर्वैरेवतदादृष्टःकृतांतसदृशस्तुसः १ सर्वेनिशाचराःस्वामि
न्मृतास्तद्भीतितोनघ ॥ वयंतवप्रसादेनजीवंतस्त्वांसमागताः २ ईश्वरीयकृपायोगात्सिंहवृंदाद्गजाइव ॥ त्रैलोक्येतुपुमान्नास्तियोयुध्येत्सहतेनवै ३ ॥ क
उवाच ॥ ॥ इत्थंनिशम्यतद्वाक्यंजगदेसनरांतकः ॥ किंवावदथबालिश्यात्कबालःकनरांतकः ४ किंकर्त्तव्यंपतंगेनप्रलयानलसन्निधौ ॥ मेरुगिरिःप
तेत्किंवास्वनतामूषकेनच ५ ततश्चाज्ञापयद्दैत्यान्काशिराजपुरींप्रति ॥ लुंठनंतत्रकर्तव्यंयेनव्यग्रोभवेन्नृपः ६ तस्मिन्व्यग्रेसोपिभवेत्कश्यपस्यसु
तोपिच ॥ नोचेद्बुधैर्निहंतव्योसर्वैःसर्वप्रयत्नतः ७ ततोददौमहार्हाणितेभ्योरत्नान्यनेकशः ॥ वस्त्राणिचविशिष्टानिशस्त्राणिविविधानिच ८ तेतंतदानम
स्कृत्ययय्युःकाशीशपत्तनम् ॥ परस्परंसमूचुस्तेदिक्चक्रंव्याप्यसेनया ९ तत्रयोभून्महासेनानीरिवंसोदिशत्तदा ॥ यस्यदृष्टिगतोदैत्याःसतुतेननिहन्यताम्
१० अन्यथाममदंड्यःसतस्याहंप्राणनाशकृत् ॥ एवंतेनसमादिष्टादैत्याजग्मुर्दिशोदश ११ विनायकस्तेनराज्ञारथस्थेनगतःपुरीम् ॥ नानाध्वजपताकाभि
श्चित्रितांरंगमालया १२ वाद्यदुंदुभिनिर्घोषैःपूजाद्रव्यैरनेकधा ॥ अमात्यानागराश्चैवप्रतिजग्मुर्विनायकम् १३ उपचारैःषोडशभिर्भक्त्यासर्वेप्यपूजयन् ॥
राजानंचततोजग्मुर्नगरीमंतराखिलाः १४ तस्मिन्प्रविष्टेप्रासादान्ररुहुर्योषितोखिलाः ॥ काश्चिद्बहिर्याताव्यस्तालंकरणांबराः १५ अनादृतपितृभ्रातृभर्तृ
मातृसुहृज्जनाः ॥ त्यक्त्वाभोजनपात्रंचभुक्तवंतंपतिंचकाः १६ एकानिरुद्धासर्वैःसाध्यात्वादेवंविनायकम् ॥ भक्त्यानिमील्यनयनेजहौप्राणांस्तदद्भुतं १७ ला
जवर्षैःपुष्पवर्षैर्ववर्षुस्तंकुमारिकाः ॥ विमानस्थादेवगणादद्दशुस्तंमहोत्सवम् १८ ब्राह्मणाःपरमात्मानंपश्यंतिस्मविनायकम् ॥ क्षत्रियास्तंमहावीरंपश्यंति
स्मरणोत्सुकं १९ वैश्यास्तंददृशुःसर्वेरुद्रंसंहारकारकम् ॥ शूद्रास्तंहरिरूपेणनृपरूपेणचालुकन् २० यस्ययस्ययथाभावस्तादृशंसोभ्यवीक्षत ॥ यथारक्ते
सितेपीतेस्फटिकस्तादृशाकृतिः २१ एकएवपुमान्यद्वत्पिताभ्राताचशालकः ॥ ततोविनायकोपश्यत्पुरमध्येमहासुरौ २२ विघंटंदंतुरंतुंसमाह्वयतसा
दरं ॥ तौदैत्यौदुष्टमनसौबालकैःसमुपागतौ २३ आलिंगितुंकृतोद्योगौतेनज्ञातौदुराशयौ ॥ आलिंग्यचूर्णयामासपुष्पंहस्तगतंयथा २४ व्यक्तौभूमिगतौ

तौतुरेजतुर्दशयोजनौ ॥ काशिराजश्चलोकाश्चदृष्ट्वाश्चर्यंतुमेनिरे २५ मुमुचुःपुष्पवर्षाणिदेवास्तस्मिन्नभोगताः ॥ साधुसाध्वितिशब्दैश्चजयशब्दैश्चकेचन २६ मुनयश्चैवदेवाश्चतुष्टुवुस्तंविनायकम् ॥ मायामानुषरूपेणचरंतंबाललीलया २७ शक्रादीनामजेयौयौतावनेनहिचूर्णितौ ॥ ततोवीथीरतिक्रम्यरथोयातोग्र तोग्रतः २८ ततोन्यावसुरौदृष्टौहंतुमेनंसमीयतुः ॥ पतंगविधुलौनाम्नावात्यारूपौमहाबलौ २९ ततोव्याकुलितोलोकोरजसाच्छादितोखिलः ॥ प्रासादा वृक्षसंघाश्चपतितावसुधातले ३० प्रावारनिचयाभांतिगगनेपक्षिसन्निभाः ॥ केषांचिन्मस्तकात्पेतुरुष्णीषाणिदिशोदश ३१ कोलाहलोमहानासीन्नप्रा ज्ञायतकिंचन ॥ रथोपिगगनंगंतुमुद्यतस्तंभितोमुना ३२ निःसारमनुजाःपेतुःसद्योजाताइवावनिम् ॥ ततोतिबलिनौज्ञात्वादधारशिखयोरुभौ ३३ एके नमुष्टिनादेवोभ्रामयित्वाबलाच्चिरम् ॥ तत्याजसधरापृष्ठेव्यमूतौदक्षेजनः ३४ तर्कयामासदेवोयंकश्यपस्यसुतोबली ॥ यतोनेनहतावेतावसुरौयोजना यतौ ३५ अस्मिन्वयसिकस्यापिनेदृशंवीक्ष्यतेबलम् ॥ एतावद्दृष्टसामर्थ्यंकाशीराजोप्यनंदत ३६ अवप्लुत्यरथात्तस्मात्तन्ननामविनायकं ॥ उवाचचमहायोगि न्बालस्यापिनतेकृतिः ३७ ब्रह्मादिज्ञानविषयाकुतःस्याच्चर्मचक्षुषः ॥ जगदुत्पादकोनेकरूपोस्यवनहेतवे ३८ नसंख्यावर्त्ततेस्वामिन्नवताराणांचतेविभो ३९ ततोग्रतोरथोयातस्त्वरयानृपतेर्गृहं ४० ततोददर्शबालोसौदैत्यंपाषाणरूपिणम् ॥ ततोहनत्परशुनाशतधासोभवत्तदा ४१ तस्माद्विनिःसृतोभीमोदं ष्ट्रादशनभासुरः ॥ श्मश्रुलोदीर्घकायश्चपुरुषःपिंगलोमहान् ४२ ततस्तेबालकाःसर्वेलोकाश्चान्येपिदुद्रुवुः ॥ तंचापिन्यहनन्मुष्ट्यासचापिन्यपतद्भुवि ४३ ममंसतजनाबालंभगवंतंधृताकृतिम् ॥ ततोराजाहृष्टमनारथादुत्तीर्यबालकम् ४४ अंतःप्रवेशयामासस्वयमादायसत्वरम् ॥ रत्नवर्णमयेस्वीयेआसनेचोपवे श्यतम् ४५ उपचारैःषोडशभिःप्रपूज्यचयथाविधि ॥ महार्हवस्त्राभरणैर्दिव्यैश्चैवसुगंधिभिः ४६ परमाह्लादसंयुक्तस्तुष्टावचननामच ॥ अन्नंचषड्रसंनानाप क्वान्नंव्यंजनान्वितम् ४७ सुहृद्भिर्भोजयामासपरमान्नमनेकधा ॥ ततोनानाफलान्याशुददौतेभ्योनराधिपः ४८ ततोष्टांगंचतांबूलंरत्नकांचनसंयुतम् ॥ ततःस्वयंबुभोजाशुशिशुभिःपरिवारितः ४९ ततःप्रस्वापयामासकृतसंध्याविधिंचतम् ॥ पर्यंकेरुचिरेदीपवितानपरिशोभिते ५० स्वयंतदाज्ञयाराजासु प्वापप्रिययासह ॥ अन्यासांश्चतुरःस्थाप्यजागरायतदंतिके ५१ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितंनामत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ६ ॥ कउवाच ॥ ॥ ततःप्रभातउत्थायशौचंकृत्वायथाविधि ॥ चकारमज्जनंसोथसंध्यांचक्रेयथाविधि १ होमंचकारसमिधंस्थाप्यकृष्णाजिनंशुभम् ॥ निधाय दंडंचिक्रीडबालकैःसविनायकः २ निशम्यकीर्त्तितन्नत्योब्राह्मणोवेदशास्त्रवित् ॥ धर्मदत्तइतिख्यातोमुनिपुत्रादिदृक्षया ३ आगतोनृपवर्यस्यकाशिराजस्यवे श्मसः ॥ राज्ञासंमानितःसोथपप्रच्छनृपसत्तमम् ४ क्वासौमहाबलःपुत्रकश्यपस्यवदस्वमे ॥ ततोलोकाजगुरयंक्रीडतेबालकैःसह ५ ततउत्थायविप्रोसौ पाणौधृत्वावदच्चतम् ॥ ममामित्रसुतस्त्वंहिश्रुताकीर्त्तिर्मयातव ६ अतस्त्वांस्वगृहेनेतुमागतोहंनसंशयः ॥ पुनीहिपादरजसासर्वंनःसफलीकुरु ७ परब्रह्म

स्वरूपोसिपरमात्मापरात्परः ॥ भूभारहरणार्थायजातोसिकश्यपालये ८ क्रीडामानुषरूपोसिजानेत्वांतत्वतोर्भक ॥ ततोविनायकःप्राहकिमर्थंत्वमिहागतः ९
आज्ञामात्रेणतेतातकथंनायामितेंतिकम् ॥ इत्युक्त्वात्वरयायायाद्धर्मदत्तपुरःसरः १० धूलिमुद्धूलयद्भिस्तैर्बालकैरनुगैर्बली ॥ मार्गेतुगच्छतस्तस्यनरांतकसमी
रितौ ११ कामसंज्ञश्चक्रोधंश्चद्वावेतौराक्षसाधमौ ॥ परस्परंयुध्यमानौहंतुमंतिकमागतौ १२ युध्यमानौनिपतितौबालकेदुष्टमानसौ ॥ खररूपौयथावह्निं
पतंगाविवदुर्मदौ १३ ततस्तेबालकाःसर्वेदुद्रुवुस्तेदिशोदश ॥ ततोविनायकोधृत्वातयोःपादौबलेनसः १४ भ्रामयामासबहुधापोथयामासभूतले ॥ ततस्तौ
पतितौभूमौव्यसूलोकाव्यलोकयन् १५ समकंपत्त्रिभुवनंपतद्वेहरवात्तदा ॥ लोकवार्त्तासुविश्वासंधर्मदत्तोन्वपद्यत १६ दृष्ट्वातस्यमहत्कर्मप्रत्यक्षेणमहामुनिः ॥
ततोययौधर्मदत्तस्तेनसाकंपुरःसरः १७ ददर्शकुंजरंमत्तंगूढरूपंमहाबलम् ॥ इतस्ततोविद्रवंतंजनंहंतुंसमुद्यतम् १८ इतस्ततोमहावीराःपलायनपरायणाः ॥
कोलाहलोमहानासीज्जनानांतत्रधावताम् १९ रजसाव्यापिसकलंनीहारेणेवपर्वताः ॥ गजोयातोराजगजान्मत्तान्हंतुंमहाबलः २० गजयुद्धंमहाघोरंप्रासाद
स्थाव्यलोकयन् ॥ बभंजुरश्वशालांतेदृष्ट्वाबद्धान्हयानपि २१ उद्बंधनाहयायातागजाश्चककुभोदश ॥ धर्मदत्तोगृहीत्वातंगृहांतर्गंतुमुद्यतः २२ आस्फाल्यतत्क
रंबालोरुरोहकरिणंबलात् ॥ बिभेदगंडंस्तनिनावारंवारंविनायकः २३ असृक्प्रवाहःपरितोनिपपातमहीतले ॥ सगजोबृंहितंकृत्वासर्वलोकभयावहम् २४ पत
तातेनभग्नानिविस्तीर्णेनायतेनच ॥ संख्यातीतान्यगाराणिसर्वोपस्करवंतिच २५ चकंपेपृथिवीसर्वासपर्वतवनाकरा ॥ ततोंधकारेविगतेतत्रेयुर्नागराजनाः २६
भीतभीतामहारौद्रेमृतेतस्मिन्निरीक्ष्यतम् ॥ बालंतुबलिनोगत्वातस्माद्धुत्तारयन्बलात् २७ धर्मदत्तःपुनश्चैनंकटावेवाभ्यवारयत् ॥ गृहमध्येनिनायाशुपुनरुत्पा
तशंकया २८ निवृत्तेस्वनिमित्तेसद्विजातिभ्योददौधनम् ॥ पूजायामासचैवैनमुपचारैःपृथक्पृथक् २९ वस्त्रालंकारकुसुमैर्नानानैवेद्यसंचयैः ॥ भोजयामासवि
धिवत्सिद्धिबुद्धीउभेददौ३० दक्षिणार्थंधर्मदत्तोननामदंडवद्क्षितौ ॥ उवाचचप्रसन्नात्माहर्षगद्गदयागिरा ३१ ममभाग्यंतुफलितंयद्दृष्टंचरणांबुजम् ॥ जगदीशो
जगत्कर्ताजगत्साक्षीजगद्गुरुः ३२ ममवाक्यादिहायातउद्धर्त्तुंममपूर्वजान् ॥ एवंब्रुवन्नेवमुनिःस्वासनेसन्निवेशितः ३३ विनायकेनदेवेनपूजितोबहुभक्तितः ॥ ततो
तिशुशुभेबालःसिद्धिबुद्धियुतोभृशम् ३४ गंगागौरियुतोयद्वच्छूलपाणिस्त्रिलोचनः ॥ एतस्मिन्नंतरेतत्रजृंभानाम्न्यागताशुभा ३५ पीतांबरधराचारुकंकणाचा
रुभूषणा ॥ अतिदुष्टमनाःसातुपत्नीधूम्राक्षरक्षसः ३६ सोवाचमधुरांवाचंनिधानमिदमुत्तमम् ॥ इत्यरिष्टानिजायंतेतानिनश्यंत्ययत्नतः ३७ कथंचारुभवेद्भो
गोमातापित्रोरमुष्यवै ॥ एवमुक्त्वास्त्रियःसर्वाउवाचचविनायकम्३८ महद्भाग्यंममविभोयज्जातंतवदर्शनम् ॥ परिश्रांतोसिदेवेशनानादुष्टविनाशनात् ३९
अभ्यंगंकुरुतैलेनसुगंधेनमहामते ॥ अंगंतेमर्दयिष्यामितैलमुद्वर्त्तनंतथा ४० ओमित्युक्तेततस्तेनविषहस्तासमादधे ॥ तैलेनचरणौतस्यविषोत्कर्षावि

---

१ क्रोधीचइत्यपिपाठः । २ नानोपवनवंतिचेतिपाठः ।

घायिना ४१ ममर्दजृंभतीजृंभालोकास्तांसाधुमेनिरे ॥ सासिषेवेभावदुष्टशुभभावापतिंयथा ४२ ततस्तस्यशरीरस्यदाहएवाभवन्महान् ॥ ततो ज्ञानेनबुद्धातांदुष्टभावांनिशाचरीम् ४३ नारिकेलफलेनाशुमस्तकेतांजघानसः ॥ ततःसापतिताभूमौनिजरूपंसमास्थिता ४४ असृक्प्रवाहमध्येसावि स्तीर्णायोजनद्वयम् ॥ धर्मदत्तश्चलोकाश्चतदाश्चर्ययुताबभुः ४५ पूजयामासविधिवद्भोजयामासतंपुनः ॥ पक्वान्नंविविधंस्वादुरसैःषड्भिःसमन्वितम् ॥ ४६ अस्मिन्नवसरेदेवाःपुष्पवर्षंप्रचक्रिरे ॥ नीराजनंलाजवर्षंमंगनाःपूजनानिच ४७ ततःसकाशिराजस्तमाकारयितुमागमत् ॥ रथोपरिनिवेश्यैनंवाद्यघो षसमन्वितः ४८ गंधर्वागानसहितानृत्यंत्यप्सरसःपुरः ॥ निनायस्वगृहंराजाविनायकमनामयम् ४७ गच्छन्सदृशेबालःसिंहारूढोधृतायुधः ॥ अनेक वीरसंयुक्तोदेवैरिवशतक्रतुः ५० सिद्धिबुद्धियुतोभातिगंगोमाभ्यांयथाशिवः ॥ नानाबंदिस्तूयमानःप्रविवेशनृपालयम् ५१ एवंबालचरित्रंयःशृणुयाज्जग दीशितुः ॥ सर्वान्कामानवाप्नोतिनारीभिर्बाध्यतेक्वचित् ५२ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरित्रेचतुर्दशोऽध्यायः ॥ १४ ॥ ७ ॥ ॥ कउवाच ॥ अपरास्मिन्दिनेराजालोकैःसहसभांययौ ॥ विनायकेनसहितोमित्रामात्यसमन्वितः १ तानुवाचततःसर्वान्बालकस्यगुणान्बहून् ॥ गुणवंतंप्रधानंतंपु रस्कृत्यमहाशयम् २ अहंहिकश्यपंयातआकारयितुमंतिकम् ॥ विवाहस्यचसिद्ध्यर्थंपुत्रस्तेनेहयोजितः ३ प्रस्थितोनेनयावत्तावदद्राक्षमद्भुतम् ॥ अ रिष्टानांसमूहंचनदृष्टंनचवैश्रुतम् ४ आदावनेननिहतोधूम्राक्षोराक्षसाधिपः ॥ जघनश्चमनुश्चापिसहस्रार्द्धयुतोहतः ५ योव्योमनीतवानेनंनगरेदंतुरोह तः ॥ विघंटोबालरूपश्चविधूलश्चमहाबलः ६ पतंगश्चैवनगरेवातरूपधरोहतः ॥ कूटोनामहतोनेनद्वारिपाषाणरूपधृक् ७ कामक्रोधावपिहतौ खरवेषधरावुभौ ॥ गजरूपधरःकुंडोहतोनेननिशाचरः ८ यानिचान्यान्यरिष्टानिनाशयिष्यतिबालकः ॥ इदानींनिश्चयःकार्योविवाहस्यद्विजैःसह ९ देवतास्थापनस्यापिहरिद्रामंडपस्यच ॥ विवाहोपस्करार्थंचज्योतिःशास्त्रविशारदैः १० ॥ ॥ कउवाच ॥ एवमाकर्ण्यतद्वाक्यममात्यावूचतुर्नृपं ॥ जयंबा लःपुरेयावद्वर्त्ततेनृपसत्तम ११ तावद्विवाहोनभवेदितिनोभातिनिश्चितम् ॥ अस्मिंस्थितेमहोत्पाताभविष्यंतिदिनेदिने १२ पक्षेमासेगतेराजन्विवाहंकर्तुम र्हसि ॥ ओमित्युक्तेनृपेणाथजग्मुःसर्वेनिजालये १३ राजाविनायकश्चापिभुक्त्वासुषुपतुःसुखम् ॥ ततोनिशीथेसंप्राप्तेसुप्तेसर्वजनेमुने १४ ज्वाला मुखोव्याघ्रमुखोदारुणोथत्रयोसुराः ॥ इच्छंतोपचितिंपूर्वहतानांदैत्यरक्षसां १५ संपूर्णांनगरींदग्धुमाद्यएच्छत्तदासुरः ॥ दारुणोवायुरूपेणतत्सहाया र्थमुद्यतः १६ व्याघ्रास्योभक्षितुंतत्रपलायनपरानभूत् ॥ एवंतेनिश्चयंकृत्वाप्राक्रोशन्सुमहास्वनैः १७ त्रैलोक्यंकंपितंसर्वंतदासंशयितंभृशम् ॥ प्रल यःपरचक्रंवाकिमागतामितिब्रुवन् १८ व्याघ्रास्यःसुमहाकायःस्थाप्योष्ठंधरणीतले ॥ पूर्वंपरंचगगनेमध्येजिह्वानदीइव १९ उत्सृजन्मुखतोज्वालाः

१ मोचितइतिपाठान्तरम् ।

सांबरंपत्तनंदहन् ॥ यथाहनुमतादग्धानगरीपुच्छवह्नितः २० तथाददाहनगरींदुष्टोसौमुखवह्नितः ॥ दग्धावृक्षालतारामाःप्रासादनिचयास्तदा २१ कोला हालोमहानासीन्मुखहस्तरवस्तथा ॥ हित्वासर्वाणिकार्याणिविद्रवंतिजनादिशः २२ नगराद्बहिरायांतंव्याघ्रास्योग्रसतेनरं ॥ तदेवभोजनंतस्यबालका श्चोपदंशकाः २३ केचिद्विस्रस्तवसनाविवस्त्राचापरेययुः ॥ स्त्रियःकूपासकाःकाश्चित्काश्चित्पत्यंशुकाययुः २४ व्याघ्रास्यंविवरंमत्वाविविशुर्जीवितेच्छया ॥ अन्यानाकारयंत्यस्तानभक्षयतसोसुरः २५ अकालेप्रलयेप्राप्तेकाशीराजोविनायकं ॥ सर्वंविहायराज्यंस्वंस्त्रीपुत्रादिस्ववस्तुसः २६ स्कंधेगृहीत्वाभ्र मतेनानास्थानेगृहेगृहे ॥ अतिदुःखेनसंतप्तस्तेजसाचैवशुष्मिणः २७ कथंमयाबालएषसर्वारिष्टप्रवर्त्तकः ॥ सर्वस्वहारकोमौढ्याद्दुर्निमित्तस्यकारणम् २८ विनैनंकिमहंब्रूयामदित्यैकश्यपायच ॥ निरस्तानिचपूर्वाणिमहारिष्टान्यनेनहि २९ आस्तेतूष्णींमिदानींकिंनजानेत्रापिकारणं ॥ एवंशोचन्दुर्गमुच्चैरुरोहस हतेनसः ३० तत्रापिदहनोवायुसहायःसमुपागमत् ॥ कुंभैश्चमृन्मयैःपात्रैःसिषिचुःसेवकास्तदा ३१ तत्पत्न्योनिर्ययुर्हित्वात्रीडांबालयुताबहिः ॥ अवतीर्यत तोराजाविह्वलोधःसमाययौ ३२ अश्वाश्चतरवीराश्चरथनागपदातयः ॥ निर्ययुर्नगरात्सर्वेपौराश्चसहगोधनाः ३३ विनायकःकाशिराजंकाशिराजोविनायकम्॥ गवेषयामासतदावर्तमानेजनक्षये ३४सर्वेषुलोकेषुगतेषुमध्येसव्याघ्रतुंडोनामिमीलतुंडं ॥ यावन्नतुंडेविशतिस्मदेवोविनायकोनंतगुणोमहात्मा ३५उदयेतुरवेर्जा तेददर्शाथविनायकः ॥ व्याघ्रास्यंदग्धनगरंजनपूर्णंचतन्मुखं ३६ वह्निंचनिकटेवीक्ष्यविवेशतन्मुखंबलात् ॥ तस्मिन्गतेनिजास्येतुन्यमीलयतसोसुरः ३७ आ स्यंगह्वरसंकाशंसर्वसंहरणेच्छया ॥ दारितुंबालकस्तत्रवव्रधेतीवतत्क्षणात् ३८पाटयामासतद्देहंव्याघ्रदेहेनरोदसी ॥ अभूच्चटचटाशब्दोवंशानांपाट्यतामिव ३९ ततोद्वेधाभवद्दैत्योगतासुरभवत्क्षणात् ॥ तदेकंशकलंतस्यगगनेसतुचिक्षिपे ४० वायुनाभ्रमतिस्मैतद्दूरेदेशे पपातच ॥ अर्धेनपततातेनचूर्णितंगहनंवनं ४१ अपरं चाभवत्क्रीडागृहंबालमुदावहम् ॥ उदतिष्ठंस्ततोलोकाअपरानप्यबोधयन्४२ततोग्निमापिबत्सर्वंपादाघातादचूर्णयत् ॥ विदारणंमहाकायंज्वालासुरयुतंतदा४३ एवंनिहत्यतान्दुष्टान्योगमायाबलेनसः ॥ अजीवयन्मृतान्सर्वान्नगरंचयथापुरा ४४ अकार्षीच्चजगज्जांशुकेसरीविनायकः ॥ सर्वलोकाश्चराजाचततस्तंतुष्टुवुर्मुदा ४५ नमोनंतशक्तेगुणानामधीशनमोरिष्टहंत्रेनमःसृष्टिकर्त्रे ॥ नमोविश्वपात्रेनमोविश्वहंत्रेनमोज्ञानदात्रेनमोज्ञानहंत्रे ४६ अकालप्रलयादेवीतिहोत्राज्जगत्प ते ॥ लीलावतारदैत्येभ्योरक्षितालीलयात्वया ४७ कस्यसामर्थ्यमेतावद्वह्निंपातुंमहाबलम् ॥ भूगोलसदृशास्यंकोहन्यादन्योमहासुरम् ४८ मृतानांजीव नंकोनुत्वदन्यःकर्तुमुत्सहेत् ॥ त्वमेवजननीदेवत्वमेवजनकोविता ४९ महाभाग्यंजनानांमेयेनतेसन्निधिःकृतः ॥ एवमुक्त्वारुरोहाश्वंसिंहयानंविनायकः ५० स्वंस्वंवाहनमारूढाःसर्वेवीराःसहस्रशः ॥ सुखेनमांदिरंगत्वानित्यकर्माकरोन्मुदा ५१ स्वंस्वंचमांदिरंयाताःसर्वेपौरानिरामयाः ॥ वाद्यत्सुसर्ववाद्येषुतुष्टुवुर्वांदि

१ नरयानमितिवापाठः ॥

नोनृपम् ५२ काशिराजोथविप्रेभ्योददौदानान्यनकेशः ॥ स्वस्तिवाच्यपुपूजाशुदेवास्तंचविनायकम् ५३ उपायनानिदेवायनानालोकाददुस्तदा ॥ विनायकोपिविप्रेभ्योददौतानियदृच्छया ५४ अमात्यानांचवीराणामंशुकानिददौनृपः ॥ विसृज्यसर्वान्भुक्त्वातौसुखेनस्वापमीयतुः ५५ यइदंशृणुयाद्भक्त्यानगरीमोक्षणंनरः ॥ सर्वान्कामानवाप्नोतिनारिष्टैर्बाध्यतेक्वचित् ॥ ५६ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेबालचरितेनगरीमोक्षणंनामपंचदशोध्यायः ॥ १५ ॥ ॥ ध ॥ ॥ ॥ कउवाच ॥ ॥ शृणुव्यासप्रवक्ष्यामिकथामाश्चर्यकारिणीम् ॥ यांश्रुत्वामानवोभक्त्यासुखमत्यंतमश्नुते १ उत्थायकल्पेराजासौनित्यंकृत्वायथौबहिः ॥ विनायकालयंगत्वास्नात्वातंपरिपूज्यच २ संप्रार्थयद्भोजनार्थंततोबालंविनायकम् ॥ ततोददौसउद्धारंनानापक्वान्नसंभवम् ३ शेषंदर्शतत्रासौलड्डुकान्पायसादिकम् ॥ अपूपान्वटकान्पुण्यमोदनंसूपसंयुतम् ४ दधिदुग्धंमधुघृतंकथिकापात्रसंचयम् ॥ मणिमुक्तामयींमालांनानालंकरणानिच ५ अपश्यत्तस्यदेहेसावनर्घ्याणिनवानिच ॥ पुनर्नत्वाचपप्रच्छनृपतिस्तंविनायकम् ६ केनभक्तेनपूजेयंकृतातेजगदीश्वर ॥ तमहंज्ञातुमिच्छामिद्रष्टुंचत्वत्प्रसादतः ७ एवमुक्तोनृपेणाथवदतिस्मविनायकः ॥ भक्तायकाशिराजायनिजभक्तकृतार्हणाम् ८ ॥ देवउवाच ॥ शृणुराजन्प्रवक्ष्यामियत्पृष्टोहमिहत्वया ॥ तदहंतेप्रवक्ष्यामिसंक्षेपेणनृपात्मज ९ दंडकारण्यदेशीयेपुरेनामलसंज्ञके ॥ भृशुंडनाम्नाभक्तोभूद्भूतभव्यभविष्यवित् १० स्रष्टुंपातुंचसंहर्तुंशक्तस्त्रैलोक्यमाशुयः ॥ ब्रह्माभवश्चविष्णुश्चनित्यंयद्दर्शनार्थिनः ११सर्वकालंममध्यानध्वस्तपापोजितेंद्रियः ॥ पुरातपस्यतस्तस्यभ्रूमध्यान्निस्तःकरः १२ भृशुंडीतिततःख्यातस्त्रिषुलोकेषुसर्वदा ॥ अतिभक्त्यामृत्युलोकेसादृश्यंप्रापितोमम १३ अद्यशुक्लचतुर्थ्यांतुपूजयामासमांमुदा ॥ घृतंदुग्धंदधिमधुपश्यमेंगात्रवन्नृप १४ भुक्तशेषमिदंचान्नंदृष्टंतेनृपसत्तम ॥ कउवाच ॥ ततऊचेकाशिराजोदेवदेवंजगत्पते १५ तमहंद्रष्टुमिच्छामिकथंसोत्रागमिष्यति ॥ विनायकउवाच ॥ ॥ गच्छराजंस्त्वमद्यैवतस्याश्चाश्रममंडलम् १६ संपूज्यप्रणिपत्यापिविवाहायतमाह्वय ॥ प्रार्थनीयःप्रयत्नेनवाच्यंचमद्वचोपिच १७ विनायकोममगृहमागतोस्तियतोमुने ॥ सचातितृप्तस्त्वत्कृतात्पूजनाद्भक्तितोमुने ॥ सोपित्वद्दर्शनाकांक्षीतेनेहप्रेषितावयम् १८ ममापिदर्शनेकांक्षामहतीपूजनेतव ॥ गृहंचसंपदोमेत्वमागत्यसफलीकुरु १९ एवमुक्त्वयाराजन्श्रुतेचममनामनि ॥ भृशुंडीममभक्तःसतत्क्षणादागमिष्यति २० ॥ ॥ कउवाच ॥ ॥ एवमुक्तःसतेनाथप्रस्थितःपरिपूज्यतम् ॥ तूणीरकार्मुकधरोह्ययमारुह्यशीघ्रगम् २१ नदीवनानिचगिरीनतिक्रम्यशनैर्ययौ ॥ प्रापतस्याश्रमंराजावरुरोहहयात्ततः २२ दृष्ट्वामुनिंभृशुंडींसप्रणिपातंचकारह ॥ तेनापिमानितःसोथपुपूजेतमृषिंमुदा २३ पश्यतिस्ममहारण्यमुपविष्टस्तदाज्ञया ॥ सरोवृक्षलतापुष्पैःफलैरम्यंतदाश्रमम् २४ कैलासोविष्णुलोकोथसत्यलोकोनतादृशः ॥ वेदघोषैःशास्त्रघोषैर्गीतनृत्यैर्विराजितम्२५अग्निहोत्रैश्चकासौरःपक्षिभिर्जलजैरपि ॥ द

१ आश्रममेमलनामानि इतिपाठोऽन्यत्र ।

ज्ञातमाश्रमंराजासमुदेहृष्टमानसः २६ दंडवत्प्राणिपत्यासौतंमुनिंसर्वमब्रवीत् ॥ विवाहकृत्यंतत्पूजामाज्ञांवैनायकीमपि २७ तस्मादेहिममगृहमितिचप्रा
र्थयन्नृपः ॥ ॥ ऋषिरुवाच ॥ ॥ करुत्वंवदमहाराजकोसौतेपिविनायकः २८ ॥ ॥ नृपउवाच ॥ ॥ काशिराजइतिख्यातंमांविद्धिराविवंशजम् ॥
कश्यपस्यसुतःसोपिदैवतंतेविनायकः २९ तंभोक्तुकामेनमयाश्रुताकीर्तिस्तवापिच ॥ चतुर्थ्यांपूजितःसम्यक्नानोपहारसंचयैः ३० तेतत्रदर्शितास्ते
नतृप्तेननगरेमम ॥ तेनोक्तंममनाम्नैवायास्यतिसमुनिर्नृप ३१ अतोहमेवसंयातःप्रार्थितुंत्वांमहामुने ॥ तवापिदर्शनंमत्वादुर्लभंचर्मचक्षुषाम् ३२ ॥ कउ
वाच ॥ ॥ एवमुक्तोनृपतिनाभूशुंडिर्विस्मयान्वितः ॥ उवाचकिमिदंसत्यमुतवासत्यमेवच ३३ योगोचरोवेदविदांवेदांतानांचचेतसः ॥ सकथंत्वद्गृहेतिष्ठे
दितिसंदिह्यतेमनः ३४ त्रयस्त्रिंशत्कोटिदेवादर्शनार्थंसमागताः ॥ सकथंतववाक्येनयामीत्युक्त्वास्वमाश्रमम् ३५ यदितिष्ठतिदेवोसौतवगेहेनराधिप ॥
स्वरूपंवदतस्याहंततोयास्यामितेगृहम् ३६ ॥ नृपउवाच ॥ अनंतानिस्वरूपाणिगणितुंनक्षमोविधिः ॥ शेषोवातस्यकोन्योहिवक्तुमीशोभवेद्विज ३७ अवती
र्णःसांप्रतंसकश्यपस्यगृहेमुने ॥ विनायकेतिनाम्नापिविख्यातोभुवनत्रये ३८ अत्यद्भुतेनरूपेणसप्तवर्षात्मकेनच ॥ अद्भुतानिचकर्माणिमहांतिजगदीश्वरः ३९
अशक्तोयानिकर्तुंवैतानितेनकृतानिच ॥ स्वरूपंतेभिवक्ष्यामियेनरूपेणमेगृहे ४० वसतेदेवदेवोसौब्रह्मचारिस्वरूपतः ॥ अवतीर्णोयदासोभूद्दिव्यकांतिश्चतुर्भुजः
४१ दिव्यमाल्यांबरधरोदिव्यालंकारसंयुतः ॥ दिव्यायुधधरोधीमान्दिव्यगंधानुलेपनः ४२ प्रार्थितःकश्यपेनासौप्राकृतोभूत्तदैवसः ॥ मुनिरुवाच ॥ नो
यंदेवोममध्यानगोचरोराजसत्तम ४३ यस्यप्रभावान्मेशुंडाजातादेवर्षिदुर्लभा ॥ यत्रकुत्रापियास्येहंसचेदाकारयिष्यति ४४ ॥ कउवाच ॥ एवंश्रुत्वामुनिवच
श्चिंताविष्टोब्रवीन्नृपः ॥ ममभाग्यमभाग्यंचमहदेतदुपस्थितम् ४५ त्वदाश्रयामहाघोरान्पर्वतान्गहनानिच ॥ अतिक्रम्येहसंप्राप्तःप्राप्तंत्वद्दर्शनंमहत् ४६ ब
लात्कारोनमेत्रास्तिगंतुंचैवालयंविभो ॥ ततोमुनिःकरुणयानृपमूर्ध्निकरंददौ ४७ निमीलयाक्षिणीराजन्नित्युक्तःसतथाकरोत् ॥ उन्मील्यनयनेपश्यत्क्षण
मात्रादसौनृपः ४८ गृहांतर्गतमात्मानंपूर्ववत्तदनुग्रहात् ॥ विनायकायतंसर्ववृत्तांतंसमभाषत ४९ दर्शनाद्धर्षसंपन्नोनागतोदुःखसंयुतः ॥ नागतस्तव
वाक्येनममयत्नान्मुनिस्तुसः ५० ब्राह्मणेषुबलात्कारोभस्मसर्वंकरिष्यति ५१ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेनृपप्रत्यागमोनामषोड
शोऽध्यायः ॥ ॥ १६ ॥ ॥ कउवाच ॥ ॥ आगतंराजशार्दूलंपुनःपप्रच्छसादरम् ॥ मेघगंभीरयावाचासर्वज्ञोपिविनायकः १ त्वयाकिमुक्तंतत्राथतेनवा
भाषितंनुकिम् ॥ वदमेनृपतत्सर्वंश्रुत्वावक्ष्यामितेमतिम् २ ॥ ॥ नृपउवाच ॥ ॥ तस्मैतेकथितंवाक्यंमयापिप्रार्थितंबहु ॥ सउवाचमुनिःक
स्त्वंकोसावपिविनायकः ३ उपास्यरूपंबिभृयात्तदायास्येतमीक्षितुम् ॥ एवंनिरुक्तस्तेनमार्गाचिंतापरंसमाम् ४ प्रेषयामासस्वगृहंदत्त्वामूर्ध्निकरंमम ॥ नि

१ अयं देवोममेत्यपिपाठः ।

मीलितदृशंचक्रेक्षणादुन्मील्यलोचने ५ तावद्ददर्शपुरतःस्थितंत्वांस्वगृहेसुर ॥ स्मृत्वाश्रमपदंतस्यहर्षश्चेतसिजायते ६ अहसीदितिश्रुत्वैववाक्यंतस्याविनायकः ॥ विनायकउवाच ॥ श्रांतोसिनृपशार्दूलपुनर्गच्छतमाश्रमम् ७ गजाननेतिमन्नामश्रुत्वायास्यत्यसौमुनिः ॥ एवंवदतितस्मिंस्तुसर्वरूपेविनायके ८ तावद्ददर्शभूशुंडेरात्मानमाश्रमेस्थितं ॥ पुनर्दृष्ट्वासनृपतिंहृदितर्कानथा करोद् ९ किमर्थंपुनरायातोराजाकिंवावदिष्यति ॥ ततऊचेनमस्कृत्यराजातंमुनिपुंगवं १० आकारयतित्वांविप्रस्वामीतवगजाननः ॥ नाममात्रेश्रुतेतस्यजहर्षंचमुमूर्छच ११ रोमांचितशरीरोसौआनंदाश्रुमुमोचह ॥ यदिपक्षौभवेतांमेतदोड्डीयगतोभवम् १२ इत्युत्कंठतयाविप्रःप्रतस्थेभूमुजासह ॥ भूशुंडौचलितेपृथ्वीकदाप्यचलितेमुनौ १३ चचालसंमुखीभूत्वाकंपंतीतमथाब्रवीत् ॥ रक्षमांमुनिशार्दूलनभीर्मत्तोधरेतव १४ गजाननंनिजंनाथंद्रष्टुंयामित्वरान्वितः ॥ इत्युक्त्वातांपुरोयातुंचलितोसौद्विजोत्तमः १५ पदेदत्तेतृतीयेतुदर्शयामासतांपुरीं ॥ दृष्ट्वापुरींनृपोहर्षादुवाचमुनिपुंगवम् १६ त्वत्प्रसादादिदंप्राप्तंपत्तनंवेगवत्तया ॥ तपतांजपतांदुर्ज्ञेमहिमाभवतांमुने १७ इत्युक्त्वाशीघ्रमनयत्स्वगृहंतंनृपोत्तमः ॥ उपवेश्यभूशुंडितमासनेकांचनोत्तरे १८ अपूजयन्महाभक्त्यापाद्यार्घ्यविष्टरादिभिः ॥ ऋषिरुवाच ॥ प्रतारितोहंनृपतेनेक्षेतावद्गजाननं १९ तंप्रदर्शयनोचेत्त्वांशप्स्यायास्येनिजाश्रमम् ॥ नृपउवाच ॥ क्रीडतेबालभावेनबालमध्येगजाननः २० वीरोयथाधूलिलिप्तस्तथैवायंविराजते ॥ ददर्शचमुनिस्तंतु शुंडादंडविराजितम् ॥ कोटिसूर्यप्रतीकाशंद्विभुजंद्विरदाननम् २१ उवाचनृपतिंक्रोधात्कथमेनंनमाम्यहम् ॥ विक्रमहांतयोराजन्मतेसौख्यंभवेत् २२ तृणमत्तिकथंसिंहोगजगंडविदारणः ॥ कउवाच ॥ श्रुतंतेनमुनेर्वाक्यंतमुवाचततोर्भकः २३ कौतुकाविष्टचित्तोसौलीलाविग्रहवान्विभुः ॥ विनायकउवाच ॥ कोदृक्षेसभवेत्स्वामीभूशुंडेवदसांप्रतम् २४ मुनिरुवाच ॥ दिव्यांबरोदशभुजोमुक्तामालाविभूषितः ॥ सिद्धिबुद्धियुतःकर्णकुंडलाभ्यांविराजितः २५ शुंडादंडमुखोलंबकर्णःसिंदूरमंडितः ॥ अहिशोभिमहानाभिःक्वणच्चरणनूपुरः २६ महामुकुटशोभाढ्योदशायुधलसत्करः ॥ एकदंतोभालचंद्रःक्षुद्रघंटाविराजितः २७ मयूरवाहनोदेववृंदवंदितपादुकः ॥ ॥ कउवाच ॥ इतितद्वचनंश्रुत्वापद्मासनगतःस्वयं २८ तादृग्रूपोभवद्बालःसृष्टिरक्षापहारकृत् ॥ भूशुंडीतंनिरीक्ष्यैवस्वस्योपास्यंगजाननम् २९ लुलुंठभूमौप्रेम्णासप्रतिपत्तिपराङ्मुखः ॥ ननर्तपरमानंदोरोचितशरीरवान् ३० देहभावंप्रपद्याथप्रणनामयथाविधि ॥ पूजयामासविधिवदुपचारैःपृथक्पृथक् ३१ आलिंग्यदशदोर्दंडैःपरमात्माजहर्षह ॥ सगद्गदोनिरीक्ष्यैतौसाश्रूराजाततोप्यभूत् ३२ ऊचेराजामहापुण्यंफलितंपूर्वजन्मजम् ॥ देवभक्तभवंसौख्यंदृष्टमद्यमयाद्भुतं ३३ उभाभ्यांप्रणिपत्याथपुपूजचयथाविधि ॥ महासनगतौतौतुपरस्परमथोचतुः ३४ ॥ गजाननउवाच ॥ तवनिष्ठामयाज्ञायिराज्ञाचापिनिवेदिता ॥ अतएषधृतोवेषोदशदोर्दंडमंडितः ३५ यथायथाजनोन्योपिध्यात्वामांभजतेमुने ॥ तथातथाहंरूपाणिकरोमिचदृदा

१ चतुर्भुजंकोटिसूर्यप्रकाशंद्विभुजंपुनःइत्यर्धेपाठः ।

मिच ३६ वांछितंतस्यलोकस्यविश्वासेनभजत्यसौ ॥ दुष्टभारभयाक्रांताधरित्रीसत्यलोकगा ३७ ब्रह्माणंशरणंयातातेनाहंप्रतिबोधितः ॥ अदित्याश्चवरेणाहंजा
तःकश्यपनंदनः ३८ भुवोभारंहरिष्यामिशक्रादींश्चनिजेपदे ॥ स्थापयिष्यामिदैत्यानांनाशंकृत्वाप्यनेकधा ३९ तवोत्कटमनुष्ठानंदृष्ट्वाहमीदृशोभवम् ॥ देवांत
कंसहभ्रात्राहत्वायामिनिजंपदम् ४० ऋषिरुवाच ॥ दृष्ट्वातवांघ्रियुगलंसर्वलोकसुखावहं ॥ सर्वक्लेशहरंदेववंधकांक्षितदंभ्रभो ४१ कृतकृत्यःपवित्रश्चजातोहंतव
दर्शनात् ॥ वरंमेदेहिविश्वात्मंस्तेनवृत्तोभवाम्यहं ४२ यदायदाहंध्यायामिरूपेणानेनविघ्नप ॥ तदातदामेप्रत्यक्षोभवेथाःकरुणानिधे ४३ आशापूरकइत्येवंनामते
ख्यातिमेतुच ॥ गजाननउवाच ॥ यदायदावांछसेत्वंतदायास्यामितेंतिकं ४४ भक्तिभावादिदंनामत्वयोक्तंख्यातिमेष्यति ॥ कउवाच ॥एवंवरौसमाकर्ण्यप्रणनाम
मुदामुनिः ४५ प्रणतेतुमुनौतस्मिन्पुनःप्रोचेगजाननः ॥ निधायमस्तकेहस्तंशनैस्तस्यद्विजस्यसः ४६ यद्यत्तेवांछितंब्रह्मंस्तत्सर्वंसिद्धिमेष्यति ॥ अविस्मृतिश्च
भवितामममनित्यंमुनेतव ४७ ॥ कउवाच ॥ एवमुक्त्वाबालरूपश्चिक्रीडसविनायकः ॥ सोपिपद्मासनगतोध्यानमेवान्वपद्यत ४८ आश्चर्यंपरमंचक्रुःसर्वलोकास्त
दाद्भुतं ॥ निरीक्ष्यबालरूपस्यचरितंपरमात्मनः ४९ काशिराजोवदत्तत्रधन्योहंजगतीतले ॥ दर्शनंप्राप्तवानस्यब्रह्मादीनांसुदुर्लभम् ५९ तंचबालंकरेधृत्वानिना
यांतर्गृहंमुदा ॥ भोजयामासस्वाद्वन्नंशाययामासपूर्ववत् ॥ आज्ञांगृहीत्वासुष्वापस्वयंचपूर्ववन्मुने ५१ ॥ इतिश्रीगणेशपु०उत्त०बाल०सप्तदशोऽध्यायः ॥ १७ ॥
॥ व्यासउवाच ॥ अपरेहनिसंप्राप्तेकाकथासमपद्यत ॥ तांमेकथयलोकेशशृण्वंस्तृप्यामिनक्वचित् १ ॥ कउवाच ॥ शृणुष्वावहितोब्रह्मन्कथयामिसमास
तः ॥ विनायककृतांदिव्यांकथांपापापनोदिनीम् २ उदितेतुदिवानाथेनित्यकर्मसमाप्यतौ ॥ क्रीडार्थमगमद्बालोराजाभद्रासनंतथा ३ दैत्योथब्राह्मगोभूत्वा
ज्योतिःशास्त्रविशारदः ॥ तालीयंपुस्तकंवामेमालांदक्षेकरेदधत् ४ पाटलंपरिधानंचशिरोवस्त्रंमहत्तरम् ॥ गोपीचंदनसंभूतांस्तिलकान्द्वादशापिच ५ अति
दीर्घतमश्मश्रुराजगामनृपांतिकम् ॥ समीपमागतंयावत्तावद्राजाननामतं ६ उत्थायतंसमीपेसस्वासनेसन्यवेशयत् ॥ पप्रच्छकुशलंतस्मैकार्यंचागमनंकुतः ७
किंचतेनामविप्रेंद्रकिंज्ञानंकिंचतेतपः ॥ वदसत्यंमुनेऽत्वाकृपांमयिकृपानिधे ८ ॥ कउवाच ॥ एवंपृष्टःसतेनाशुदत्वाशीर्वचनंपुरा ॥ अनुक्रमेणसकलंनिजगा
दमहामुने ९ हेमज्योतिर्विदित्येवंनाममेनृपनंदन ॥ गंधर्वलोकादायातोवस्तुंतवसमाश्रये १० भूतंभवद्भविष्यंचशांतिकानिचवेद्म्यहम् ॥ प्रश्नांश्चकथयिष्या
मियान्यांस्त्वंपृच्छसेनघ ११ अरिष्टान्यत्रजातानिज्ञातानितानिमेनृप ॥ भावितेदुष्टचिह्नंचविज्ञायाहंसमागतः १२ त्वदाश्रयेणवस्तुंमेवांछास्तिनृपसत्तम ॥
नृपउवाच ॥ किंनिमित्तमरिष्टानिजायंतेत्रमहामुने १३ अग्रेपिकानिभावीनिसत्यमेववदस्वमे ॥ तवप्रतीतौजातायांस्थापयिष्येनिजेगृहे १४ वृत्तिंचकल्पयि
ष्यामियोगक्षेमकरींतव ॥ गणकउवाच ॥ यावद्विनायकस्तेस्तिगृहेकश्यपनंदनः १५ तावद्विघ्नानिजायंतेयतोविघ्नाधिपस्तुसः ॥ असंचारेवनेचैनं
त्यक्त्वायाहिनृपात्मज १६ नभविष्यतिविघ्नंतेनगरेवागृहेपिच ॥ अस्मिन्स्थितेजलंसर्वंनगरंप्लावयिष्यति १७ तस्मिन्कथंचिन्नष्टेतुपर्वतावायुनोदिताः ॥ चू

र्णयिष्यंतिनगरंनृपनास्त्यत्रसंशयः १८ एतत्कथंनजानीषेपूर्वंनासन्नुपद्रवाः ॥ राज्ञाविश्वसितव्यंनोकपटैलुब्धकेशुचौ १९ अतिशूरैस्वोत्कटैचस्वात्मपातं प्रपश्यता ॥ एतेघ्नंतिचराजानंराज्यकामामहाशयाः २० एतत्कथयितुंयातोज्ञात्वाराज्यच्युतिंतव ॥ हिताहितमवश्यंहिवक्तव्यंजानतानृपे २१ विविच्यनृपमे वाक्ययंयथेच्छसितथाकुरु ॥ कउवाच ॥ एवमाकर्ण्यतद्वाक्ययंराजातंपर्यभाषत २२ ॥ राजोवाच ॥ अतीतानागतज्ञानादुक्तंसर्वंत्वयामुने ॥ मिथ्यैवभासते मह्यंतत्त्वज्ञानेप्रपंचवत् २३ त्वदुक्तप्रत्ययेजातेदास्यामिवेतनंतव ॥ नज्ञातोबालकश्चायंत्वयागणकसत्तम २४ ब्रह्माणंकमलाकांतंअपरंशूलिनंहरं ॥ ज नयिष्यतिवांछाचेद्ब्रह्मांडानिबहूनिसः २५ यदितेनिश्चयोवाक्येस्वकीयेब्राह्मणोत्तम ॥ नयैनंगहनंघोरंत्यक्त्वैनंपुनरेहिच २६ लोकद्वेषकृतोनेननिहताबल वत्तराः ॥ स्वद्वेष्टारंकथमयंनजानेस्थापयिष्यति २७ अनिष्टमस्यमनसिनवयंचिंतितुंक्षमाः ॥ अनेननगरीराज्यंत्रातमुत्पाततोबहु २८ करोतींद्रमनिंद्रंवाशक्रंशक्रं लघुंगुरुं ॥ उच्चंनीचंतथानीचमुच्चमीशमनीश्वरं २९ संश्रुत्यवाणीनृपतेर्गणकोभूद्रुषारुणः ॥ राजानंपुनरारेभेवक्तुंकिंचिदवाङ्मुखः ३० मयातवहितंप्रोक्त मनिष्टंतवभासते ॥ नजातुलंघयेत्कोपिभाविसुष्ठुतथेतरत् ३१ नृपतेदर्शयैनंमेबालंकलक्षणानिते ॥ कथयिष्येततोबालान्सर्वानाकारयन्नृपः ३२ अग्रेवि नाथकःप्राप्तोधावमानास्ततोखिलाः ॥ गणकंसनमस्कृत्यपप्रच्छकुतआगतः ३३ सामुद्रलक्षणज्ञोसिज्योतिःशास्त्रविशारदः ॥ भूतभाविभविष्यज्ञवद मेभाग्यजंफलम् ३४ ॥ कउवाच ॥ सधैर्यैबालवाक्यंतदाकर्ण्यकपटीद्विजः ॥ तर्कयामासमनसिकथंस्वास्तिगतिर्भवेत् ३५ अनेननिहतादुष्टाबलिनोनेक रूपिणः ॥ शिशोर्हस्तंगृहीत्वासवदतिस्मशुभाशुभम् ३६ चतुर्षुदिवसेषुत्वंकूपमध्येपतिष्यसि ॥ चेन्निर्गतःकथंचित्त्वंसिंधौमज्जनमेष्यसि ३७ ततोपिजी वितश्चेत्तुध्वांतमग्नोभविष्यसि ॥ ततोपिजीवितेशैलस्त्वयिकोपिपतिष्यति ३८ महांतौकालपुरुषौजीवंतंभक्षयिष्यतः ॥ एतान्यरिष्टानितवभविष्यंति नसंशयः ३९ प्रतीकारंब्रवीम्यत्रनिर्भयार्थंकुरुष्वतम् ॥ ततोन्यत्रमयासार्द्धंयाहिदिनचतुष्टयम् ४० पुनरत्रानयिष्यामिशपथोमेतवांद्विजः ॥ निशम्यवाचं बालोसौजगामांतर्गृहंशनैः ४१ राज्ञोहस्तात्प्रगृह्याशुमुद्रिकांरत्ननिर्मिताम् ॥ कृत्वातांस्वकरेबालोवदतिस्मद्विजंप्रति ४२ गणकाशुवदत्वन्नोगतंवस्तुमह त्तरम् ॥ केननीतंकदाप्राप्तंभूयात्तेप्रत्ययोभवेत् ४३ इत्युक्तःसतुबालेनविचार्यजनसंसदि ॥ बभाणहास्यवदनोमुद्रिकायादिलभ्यते ४४ ममै वयदिदेयासातदेदानींब्रवीम्यहम् ॥ तथेतिबालकेनोक्तेवैवकरंगतिसा ४५ इत्थमुक्तोजिह्मवेषधारिणावाडवेनसः ॥ तयामंत्रितयाबालोन्यवधीत्तंहृदिक्षणा त् ४६ सतयाभिन्नहृदयोवज्राहतइवाचलः ॥ निपपातधरापृष्ठेचालयन्वसुधांभृशं ४७ पततातस्यदेहेनचूर्णितंनगरंकियत् ॥ काशिराजोजनाःसर्वेआश्चर्यमे निरेतदा ४८ जहर्षुर्देवताःसर्वाःपुष्पवृष्टिंसुचक्रिरे ॥ स्वर्गभूवाद्यघोषैर्द्यौर्व्याप्तासमूद्भूतलंतदा ४९ ॥ ॥ जनाऊचुः ॥ ॥ कथंज्ञातोनेनदुष्टोब्राह्मणोब्रह्मवे षभृत् ॥ राज्ञापिनकृतंदैवाद्वाक्यंतस्यदुरात्मनः ५० अयंबालोनमंतव्योभूभारहरणेमरः ॥ अवतीर्णःकश्यपस्यगृहेसौकरुणानिधिः ५१ मुद्रिकाघातमात्रे

णकथंप्राणान्जहौबली ॥ इत्युक्त्वापुपूजुःसर्वेनेमुस्तंतुष्टुवुर्जगुः ५२ ददौदानानिविप्रेभ्योराजाराजीवलोचनः ॥ द्विजचारणबंदिभ्योदीनेभ्यश्चाप्यनेकशः ५३ नागरान्मानयित्वाताञ्चिससर्जततःसभाम् ॥ बालोपिबालकैरंतुंययौपूर्ववदज्ञवत् ५४ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेबालचरितेकपटिदैत्यव धोनामाष्टादशोध्यायः ॥ १८ ॥ ॥ ध ॥ ॥ कउवाच ॥ ॥ बालकेनहतंश्रुत्वाब्राह्मणंवेषधारिणम् ॥ नरांतकोमहादैत्योकूपकंदरा सुरम् १ प्रेषयामासबलिनंब्रह्मलब्धवरंतदा ॥ दत्त्वाबहूनिवस्त्राणिरत्नानिविविधानिच २ ॥ ॥ दैत्यउवाच ॥ ॥ गच्छतंमुहूर्तेनहंतुंबालंतमाशु च ॥ नानोपायैर्मारितानांकुरुतान्निष्कृतिंबलात् ३ ॥ ॥ कउवाच ॥ ॥ एवंतेनसमाज्ञप्तावसुरौकूपकंदरौ ॥ सेनयाचतुरंगिण्यागन्यूर्तिंसंप्रतस्थतुः ४ निष्टृत्यसेनांचततईयतुर्भृशहर्षितौ ॥ विचारंचक्रतुर्मार्गेकूपोहंकूपतामियाम् ५ बालोभवक्रीडमानंमयितंक्षिपयत्नतः ॥ मंडूकरूपःकूपस्थोभक्षयिष्यामि तत्क्षणात् ६ अंतर्द्धानंकरिष्यावःकृत्वाकार्यंमहत्तरम् ॥ एवंतौनिश्चितमतीकाशीराजपुरंमहत् ७ प्रापतुरभवत्कूपोमहान्नृपनृपाजिरे ॥ कंदरोबालरूपोभू द्रंतुंतेषुमनोदधे ८ राजाथददृशेकूपंसुजलंतंजहर्षच ॥ यावत्पश्यतिमध्येसौमंडूकंतंददर्शह ९ नदंतंमंजुलांवाणींपीतवर्णंभयानकम् ॥ कंदारोबालमध्य स्थोजगादतंविनायकम् १० बहिर्याहिमहाबाहोपश्यकूपंमनोहरम् ॥ ददर्शकूपंबालैःसबहिरागत्यतत्क्षणात् ११ अत्यंतंसुंदरंदृष्ट्वातंकूपंबालकैःसह ॥ चि क्रीडेविविधैर्भावैर्नानानिलयनैरपि १२ मध्याह्नेजलमध्यस्थाःसिंषिचुस्तेपरस्परम् ॥ मज्जनोन्मज्जनंचक्रुःकारयंतःपरस्परम् १३ ह्रदानंजलमध्येतेदूरादाग त्यचक्रिरे ॥ एवंरमित्वातेतत्रगृहान्गंतुंसमुद्यताः १४ तावद्विनायकोपश्यज्जलमध्येनिजंवपुः ॥ जानंस्तंतुंजलेसर्वानपश्यन्नासीद्बहिःपुरा १५ तावच्चुनो दतंदुष्टोजलमध्येसकंदरः ॥ अगाधंतज्जलंज्ञात्वालोडयामासलीलया १६ स्वेच्छयारमणोलक्ष्म्याक्षीराब्धिमिववाडवः ॥ अधोयातिमुहूर्तंसउपरिष्टात्त थैवच १७ मायामास्थायसगणोमज्जितुंसमजायत ॥ चरणौहस्तकमलेचिक्षेपबहुधाशिशुः १८ लुलुपुःसर्वशोबालास्तावत्तेनधृतोबलात् ॥ चरणेकंदरो नीतस्तत्कूपतलमादरात् १९ अमज्जयद्बलात्तंचमुंचमुंचेतिसोब्रवीत् ॥ विनायकोपितंप्रोचेमुंचमुंचेतिमामपि २० उभौसमबलौतौतुमज्जनोन्मज्जनेर तौ ॥ हिरण्यकशिपुर्लक्ष्मीनृसिंहाविवदुर्धरौ २१ अधस्ताद्बहुकालंतौगतौज्ञात्वाखिलाभेकाः ॥ चक्रुरार्तस्वरंदुष्टंमृतोबालइतिस्फुटम् २२ अपशद्वंत थाश्रुत्वाययुःस्त्रीवृद्धबालकाः ॥ काशिराजोपिचुक्रोशकिंकार्यमितिचाब्रवीत् २३ अगाधनीरकूपेस्मिन्कथंजीवेत्सबालकः ॥ कोप्यूचेचापरःप्राहशीघ्रंनिः सारितोयदि २४ उपायोभवितास्माकंश्चिज्जीवनायास्यनिश्चितम् ॥ येनयत्प्रार्थ्यतेदास्येतदस्मैजीवितंस्वकम् २५ निष्काश्यतांबहिर्बालोवेगेनचबलेनच ॥ इतिराजवचःश्रुत्वाकूपमध्येगतास्त्रयः २६ मग्नास्तेदैत्यकृतयामाययानापरोजनः ॥ अवतर्तुंमनश्चक्रेततोराजाशुशोचतम् २७ ॥ राजोवाच ॥ किंमयाकारिदु रितंयेनमेदुःखमीदृशम् ॥ कथंबालोमयानीतःसुखार्थंदुःखदोभवत् २८ दर्शयिष्येकथंतस्यापितृभ्यांमुखमेवच ॥ जनायवाकथमिदंकथमस्यमृतिर्भवेत् २९

निरस्तान्यत्यरिष्टानिमहांतिबालकेनह ॥ कथमस्यवशंयातोनजानेदेवचेष्टितम् ३० एवंसर्वेषुशोचत्सुस्त्रीवृद्धबालकेषुच ॥ मंडूकरूपीकूपस्थोव्यादायमुखमा
स्थितः ३१तावदेवागतोबालोनोदितःकंदरेणसः ॥ तेनापिनोदितोदैत्योदैत्यास्येन्यपतत्स्वलाः ३२ भक्षयामासकूपस्तंमत्स्योमत्स्यमिवालघुः ॥ गिलितोबाल
इतिसनिजरूपंसमास्थितः ३३कूपोपिगगनस्पर्द्धीचक्रेश्लाघ्यांयशोर्जिताम् ॥ सर्वेषामेवदैत्यानामानृण्यंगतवानहम् ३४इत्युज्जहर्षमनसामत्वादेवमविक्रमम् ॥
कंदरस्तुरुषाविष्टोविदार्यास्यमहोदरम् ३५निर्गम्यवेगमास्थायसबालोंतर्हितःक्षणात् ॥ विदारितंमेजठरमितिकूपोपिकंदरम् ३६ अदशत्कंठदेशेसजीवग्राहंरुषा
तदाएवंपरस्परवधात्पतितौविह्वलौभृशम् ३७पादहस्तावमर्दनचूर्णितंनगरंकियत् ॥ यथासुंदोपसुंदौतुपरस्परवधान्मृतौ ३८परस्परवधात्तद्वन्मृतौतौकूपकंदरौ
राजभृत्यैरपाकृष्यत्यक्तौतौनगराद्बहिः ३९ तत्क्षणादाजिरेकूपोपिदधेसाविनायकः ॥ दृष्टेपूर्ववत्क्रीडन्सर्वबालयुतोजनैः ४० आश्चर्यमेनिरेतत्रबालाराजाजना
अपि ॥ ऊचुःपरस्परंकेचित्कापट्यंयेनयुज्यते ४१ आमूलान्नश्यतेसोथस्वयमेवनसंशयः ॥ पतंगोदीपनाशार्थमायातिनश्यतेयथा ४२ अस्यचालयितुंशक्तो
नस्यात्कालोपिरोमच ॥ दृष्टंबहुविधंचास्यसामर्थ्यमवतारिणः ४३ जेतुमीशंगतःकामःस्वयंभस्मत्वमागतः ॥ काशिराजस्तुतद्श्रुत्वासत्यंसत्यमितिब्रुवन्
४४ ददौदानानिविप्रेभ्योविससर्जप्रपूज्यतान् ॥ विनायकंनमस्कृत्यगतालोकानिजान्गृहान् ४५ केचिदालिंग्यतंबालंययूराज्ञाप्रपूजितं ॥ देवाश्चपुष्पवर्षाणि
मुमुचुस्तुष्टुवुर्जनाः ४६ ॥ कउवाच ॥ एवंनज्ञायतेब्रह्मन्कार्याकार्यंमरुद्वलं ॥ मायास्वरूपंपुंभाग्यंराक्षसाचरणंमुने ४७अवतारगुणावापिनज्ञेयाःपरमात्मनः ४८
॥ इतिश्रीगणेशपुराणेउत्तरखण्डेकूपकंदरवधोनामएकोनविंशतितमोऽध्यायः ॥१९ ॥ व्यासउवाच ॥ काशिराजगृहेब्रह्मन्विवाहःसकदाभवत् ॥ तन्ममाचक्ष्व
भगवान्विस्तराच्चतुरानन १ कउवाच ॥ एकैकंनश्यतेरिष्टमपरंयातिवैपुनः ॥ अस्मिन्नष्टेकरिष्यामीत्येवंयावद्विचार्यते २कूपेचकंदरेनष्टेत्रयोप्यन्येतदीरिताः ॥ अंधकों
भासुरस्तुंगोराक्षसाःक्रूरदर्शनाः ३ जिघांसयागताबालंततोयुद्धमवर्तत ॥ श्रुत्वायेषांतुसंग्रामंब्रह्माद्याःप्रापलन्भयात् ४ दिग्गजामर्दितायैस्तुविबुधानांतुका
कथा ॥ कदायंकश्यपसुतोभविताद्दृष्टिगोचरः ५ नाशयामोनेकधातमितिव्यवसिताभृशं ॥ यावंतःप्रेषितावीरास्तावंतोनिधनंगताः ६ वयमेनंहनिष्यामो
ऽजित्वायामोनवैगृहान् ॥ वह्निरूपंसमास्थायदाहयामोमुनेःसुतं ७ अंधकस्त्वब्रवीत्तत्रतमसाव्याप्यखंदिशः ॥ अंधकारंकरिष्यामिधरायामथसर्वतः ८ त
तःपरस्परदृशिर्नस्यात्तेषांकदाचन ॥ अंभासुरोब्रवीतत्रमहींसर्वांजलेनह ९ आपुरंस्त्रावयिष्यामिसमंतान्नगतिर्भवेत् ॥ तुंगोब्रवीदहंतुंगोगिरिर्भूत्वापुरींतुतां
१० आलोड्यचूर्णयिष्यामिसपक्षइवपर्वतः ॥ अंधकारजलेवह्नौपर्वतेसर्वतःस्थिते ११ कोपिगंतुंनशक्नोतिकथंबालोगमिष्यति ॥ एवंनिश्चितसंकल्पाजगर्जु
स्तेत्रयोभृशं १२ तेषांगर्जितशब्देनकंपितंभुवनत्रयं ॥ तत्यजुर्निजवेलांतेसागराःक्षुभितोदकाः १३ ततोरविंसमाच्छाद्यतस्थौतत्रांधकासुरः ॥ अंधकारेम
हाघोरेनप्राज्ञायतकिंचन १४ अकस्माद्रजनीप्राप्ताव्यवसायपरैर्जनैः ॥ स्नानासक्तैर्जपासक्तैर्होमासक्तैर्द्विभिस्तदा १५ तपःसुवेदघोषेषुविवाहोपनयादिषु ॥

कीर्तनेषुपुराणेषुद्विजदेवार्चनादिषु १६ सक्तैर्नानाविधैर्लोकैर्निशाप्राप्तावृतादिषु ॥ जजल्पुःकिमुविंध्योयंरुणद्धिसूर्यमंडलम् १७ अथवाप्रलयोभावीवो परागःसमागतः ॥ सभायामूचुरासीनंराजानमितिपंडिताः १८ तर्कयंतियावदेवगावोऽगुःस्वगृहांतरं ॥ असंभावितवेलासुचक्रुर्दीपान्गृहेगृहे १९ कथमस्तमितिर्जातानपाकोनचभोजनम् ॥ व्यस्मयंततदानार्योदुदुहुर्गाश्चकाश्चन २० दीपिकाभिःकाष्ठदीपैर्व्यवहारंजनास्तदा ॥ चक्रुर्दुःखेनकार्याणिवणिजोब्राह्मणादयः २१ सेवकानांमहानंदःकामिनांचाभवत्तदा ॥ सालसानांप्रसुप्तानांनिद्रालूनांतथैवच २२ एवंकृतेचांधकेननाम्नाचांभासुरस्तदा ॥ मेघरूपेणवृषेधाराहस्तिकरोपमाः २३ शंपाप्रकाशतोलोकाःक्षणमीक्षांप्रचक्रिरे ॥ जलधाराभयात्सर्वेगृहमध्येस्थितास्तदा २४ प्रासादान्यपतन्केचिद्गृहाणांभित्तिकाअपि ॥ अंतःकेचिद्बहिःकेचिन्मृताजनचयास्तदा २५ झंझावातहतावृक्षाःपतिताधरणीतले ॥ सौदामिनीभिर्निर्दग्धादुमागृहचयाबहु २६ उत्तीरा भिर्नदीभिःसासमुद्रैरिवसंप्लुता ॥ नगरीसर्वलोकाढ्यासर्वसत्त्वसमाकुला २७ ॥ ॥ कउवाच ॥ प्रलयंदैत्यमायांचज्ञात्वासकरुणाकरः ॥ विनायकोकरोन्मायांबलेनवटमुच्चकैः २८ निर्ममेतत्क्षणादेकंलतागुल्मैःसुशोभितं ॥ शतयोजनविस्तीर्णंजटाशाखासमन्वितं २९ पक्षिरूपेणतत्रासौस्थितोगगनलेहिनी ॥ पक्षौभूमौप्रतिष्ठाप्यस्पृशंश्चशिरसानभः ३० प्रकाशयामासपुरींपीत्वाचंच्वाजलंमहत् ॥ करेणाशोषयद्वन्यकरीवपल्वलोदकं ३१ जनाहर्षाद्विजगदुर्गतोविघ्नोगतंजलं ॥ गतेंधकारेदृदृशुर्वटंसांद्रतरंचतं ३२ पक्षिणंचाद्भुताकारंनदृष्टंनचवैश्रुतं ॥ सर्वेजनाययुस्तत्रन्यग्रोधेस्थातुमुत्सुकाः ३३ अश्वैर्गजैरथैरुष्ट्रैः शिबिकाभिर्नृभिस्तुतैः ॥ स्त्रीभिर्दासैःकाशिराजोवटस्याधःसमाययौ ३४ पशवःसारमेयाश्चबिडालावनगोचराः ॥ विनायकप्रभावेणनवृष्टिस्तत्रनोतमः ३५ चक्रुःसर्वेपूर्ववत्तेवर्णाःकर्मयथाविधि ॥ पौराःसद्यवसायेषुसमसज्जंतपूर्ववत् ३६ सर्वेषांरक्षणंकर्तुंपक्षिरूपमधारयत् ॥ जगदीशोगणेशोनुनजानीमोत्रकिंचन ३७ विस्तार्यपक्षान्वृष्टिंयोन्यषेधीद्दैत्यकारिताम् ॥ वृष्टिंसोल्कांसकरकांस्वयंसेहेसुखेनसः ३८ इतिलोकास्तर्कयित्वास्थितानिर्व्याकुलास्तदा ॥ एकादशगताघस्राएवंतत्रास्थितस्यच ३९ नाज्ञासीत्कोपिचरितंविनायककृतंद्विज ॥ दृष्ट्वाविनायकंबालंक्रीडंतंबालयूथगम् ४० ततोदैत्यौक्षणिशक्तीनिश्चेष्टौसमपद्यताम् ॥ तुंगोजगर्जबहुधानादयन्प्रदिशोदिशः ४१ गिरिरूपंसमास्थायहनिष्येपक्षिणंक्षणात् ॥ ब्रुवन्नेवंबभूवाशुपर्वतोभूत्तदैवसः ४२ सरोनदीसमायुक्तःपंचयोजनविस्तृतः ॥ दिव्यौषधीभिर्दीप्ताभिर्भासयन्नगगनंदिशः ४३ नानापक्षिसमायुक्तोवाडवाश्रममंडितः ॥ सपक्षंपर्वतंदृष्ट्वापतमानंसपक्षिराट् ४४ उड्डीयपरिबभ्रामवारयामासतज्जलम् ॥ घूर्णयन्पक्षवातेनजंगमाजंगमंजगत् ४५ प्रस्थानिपतितामूमौपर्वतानामितस्ततः ॥ चंच्वादध्रेसतुंगाद्रिंकाश्यपिःफणिनंयथा ४६ सहतेनाभ्रमन्खेसौलक्षयन्दानवावुभौ ॥ अंधकंचरणैकेनपरेणांभासुरंचसः ४७ अतिक्रम्यभुवर्लोकमियायसमहाखगः ॥ अतिभ्रमणखिन्नास्तेतप्ताश्चसूर्यरश्मिभिः ४८ निपेतुर्व्यसवोभूमौत्रयःपर्वतसन्निभाः ॥ पतंतश्चूर्णयामासुर्वनान्युपवनानिच ४९ दृष्ट्वुदैत्यशरिराणिस्त्रीबालसहिताज

नाः ॥ ययुस्तेनगराभ्याशेवीक्ष्याश्चर्यंपरंययुः ५० खंडानि तच्छरीराणांगंडशैलाइवाबभुः ॥ निरस्यमायांदैत्यानांततोलोकाविसिस्मिरे ५१ वटंतंदेवरूपेणदृष्टुर्नचवैपुनः ॥ अंतर्हितेवटेपक्षिरूपंतत्याजसोर्भकः ५२ ततोविनायकंबालंकाशिराजोलिलिंगह ॥ पृष्ट्वाकुशलसंप्रश्नंनागराश्चनृपश्चतम् ५३ पुपूजुः परमप्रीत्याविघ्ननाशंविनायकम् ॥ प्रशशंसुर्मुदादेवंकश्यपस्यसुतंजनाः ५४ नजानीमोवयंदेवंमायांदैत्यकृतांपराम् ॥ सामर्थ्यंतेगुणांश्चापियत्रवेदाविकुंठिताः ५५ लीलयारक्षिताःसर्वेमोचिताबहुसंकटात् ॥ वातागताविनाशंचउत्पाताश्चैववृष्टय. ५६ भातिबिंबंरवेःसम्यगंधकारेगतेलयम् ॥ मनांसिसर्वलोकानांप्रसन्नानिमुदातदा ५७ नद्यःप्रसन्नसलिलाःसर्वमासीद्यथापुरा ॥ ववर्षुःपुष्पवर्षाणिदेवदेवेविनायके ५८ नानावाद्यनिनादैस्तेलंकृतंपुरमाविशन् ॥ ददुर्दानानिविप्रेभ्योदेवोनःप्रियतामिति ५९ शांतिहोमंविधायासौनृपोदाद्धनंबहु ॥ विसृज्यसर्वान्बुभुजेविनायकयुतोनृपः ६० ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेबालचरितेदैत्यत्रयवधोनामविंशतितमोऽध्यायः ॥ २० ॥ ॥ ध ॥ ॥ कउ वाच ॥ ॥ शृणुद्विजमहाश्चर्यंकथ्यमानंमयातव ॥ विनायकस्यचरितंसर्वपापहरंनृणाम् १ अंभासुरस्ययोमूर्धासगतोनिजमंदिरम् ॥ भ्रमरायानिरैक्षिष्टस्वीसातांन्यबोधयत् २ प्रसुप्तांकांचनेतल्पेसोत्थायांगणमाययौ ॥ पौत्रंशिरोनिरिक्ष्यैवमूर्छितापतिताभुवि ३ निघ्नतीनिजवक्षःसाकराभ्यांशोकनिर्भरा ॥ निपतद्भूषणास्विन्नानागामृष्टेवपद्मिनी ४ विभिन्नवलयाछिन्नकूर्पासातनुमध्यमा ॥ दृश्यादृश्यमहद्वात्रालुंठतीमुविविह्वला ५ निषिध्यमानासखिभिर्भ्रातृभिःस्वजनैरपि ॥ त्रिमुहूर्तैःप्रबुद्धासाकिंचिद्वक्तुंप्रचक्रमे ६ उत्थायचकराभ्यांतुनिजघानपुनःशिरः ॥ भ्रमर्युवाच ॥ ॥ येनेयंपृथिवीसर्वात्रासितासामरावती ७ मूर्ध्नांसहस्रंशेषस्यभ्रूकटाक्षेणकंपितम् ॥ येनराज्येभिषिक्तौतौदेवांतकनरांतकौ ८ यस्यक्ष्वेडितमात्रेणरोदसीकंपिताभृशम् ॥ सकथंपतितःकुत्रनिहतःकेनवासुतः ९ यंदृष्ट्वाकंपितःकालःसकथंनिधनंगतः ॥ एवमाक्रंदतीदीनाविवत्सेवपयस्विनी १० एवंविलपतींतांतुन्यषेधयत्सस्वीजनः ॥ नदृष्टासखिकेनापिमृतेनसहवैमृतिः ११ अतिशोकेनशोकोन्यःप्राप्यतेमूढजंतुभिः ॥ यदिस्नेहेनपुत्रंत्वंशोचसेऽस्यहितं कुरु १२ चारान्प्रेषयवृत्तांतग्रहणायास्यसर्वतः ॥ दह्यतांमस्तकोमंत्रैरेवमस्यहितंकुरु १३ सुत्दद्दामश्रुपतितंप्रेतस्यतन्मुखेपतेत् ॥ दहत्येनंनतत्त्याज्यमित्याहुःपरमर्षयः १४ एवमाकर्ण्यतद्वाक्यंसोवा चतांसखींरुषा ॥ अयंमूर्द्धामहाभागेस्थाप्यतांयत्नतःसखि १५ आनयिष्येऽदितेःपुत्रमस्तकंसहतेनच ॥ दाहयिष्याम्यमुंतस्मात्स्थाप्यतांतैलमध्यतः १६ साराक्षसीराक्षसवर्ययुक्तासमाययौराजपुरींनिहंतुम् ॥ विनायकंतंनिजरूपगोपिनीपतंगपत्नीवधनंजयांतिकम् ॥ आगतादितिरूपेणभासयंतीदिशोदश ॥ अतिलावण्यनिलयासर्वालंकारशोभिनी १८ दाडिमीबीजदशनाबिंबोष्ठीतनुमध्यमा ॥ विलसत्पद्मनयनामुक्तादामलसत्कुचा १९ वीरामुमुहिरेदृष्ट्वातादृशींनृपसद्मगां ॥ मनसाकामयंतिस्मयदालिंगनचुंबने २० तर्कयामासुरपरेरंभाकिंनुतिलोत्तमा ॥ मेनकावाघृताचीवानागीयक्षीशिवानुकिं २१ उर्वशीवारतीराज्ञीकश्यपस्यादितिर्नुकिं ॥ ज्ञात्वातुराजपत्नीतांप्रणनामादितिंमुदा २२ पूजयामाससौभाग्यद्रव्यैर्भूषांशुकादिभिः ॥ उवा

चचसुचावंगीप्रेमगद्गदयागिरा २३ महाभाग्येनदृष्टासित्वंदेवजननीमया ॥ विनायकप्रसादेनकान्यथादर्शनंतव २४ राज्ञीमेवंब्रुवंतीतुसाश्रुकंठावदद्वचः ॥
अदितिरुवाच ॥ ममबालोबहुदिनंस्थापितःकुत्रवर्त्तते २५ अत्युत्कंठतयासुभ्रूर्दर्शनार्थमिहागता ॥ स्त्रीणांस्वभावंजानासिमायाव्याकुलचेतसाम् २६ शो
कसंतप्तगात्राहंतमालिंगामिचार्भकम् ॥ तत्संसर्गसुशीतांगीप्राप्स्येसंतोषमुत्तमम् २७ इतितद्वचनंश्रुत्वासादरासाससंभ्रमा ॥ गवेषितुंतुतंबालंराज्ञीदूतान
चोदयत् २८ अन्येचरुर्युःकाशिराजंकश्यपस्त्रियमागताम् ॥ सस्नात्वागृहमागत्यतांदृष्ट्वाहर्षमापह २९ तांप्रणम्यमहाभक्त्याप्रोचेबद्धांजलिर्नृपः ॥ मेरा
ज्यंजन्मपितरौधनंदृष्टिःश्रुतंतपः ३० दृष्टाशक्तिर्देवमाताजगज्जननकारिणी ॥ नशक्तिर्वर्ततेसम्यग्वर्णितुंतेगुणान्मम ३१ बालोविनायकस्तेयंशक्रादधिकविक्रमः ॥ अवदानान्यनेकानिकृतानिबहुधासुरैः ३२ अशक्यानिमयावक्तुंरक्षसांनिधनानिच ॥ तस्यापिवर्णितुंनास्तिगुणानांशक्तिरल्पिका ३३ विश्राम्यतांक्षणंमातर्ममभाग्यंमहत्तरम् ॥ यदनेनहतामायाबलमाश्रित्यदानवाः ३४ अपरिक्षतेनवपुषाबालस्तेवसतेसुखम् ॥ त्वंकिमर्थमिहायातायाताचेत्स्थीयतांक्षणं ३५ निवृत्तेस्मिन्विवाहेतुप्रापयिष्येउभावपि ॥ सोवाच॥किमिदंभाषसेराजन्वियोगादस्यमेभवत् ३६महान्खेदोनचसुखंलेभेक्वापीहकिंचन ॥ कउवाच॥एवं
वदत्यांतस्यांसआगतोसौविनायकः३७प्रेषितोबालकैःसर्वैरागताजननीतव ॥ सालिलिंगततोबालमश्रुपूर्णामुदाजगौ ३८ चिरकालंस्थितोस्यत्रमांविहायाति
निष्ठुर ॥ त्वद्वियोगेनसंतप्तागतासर्वेविहायच ३९ जीविताशांपरित्यज्यत्वदर्थेतपआचरं ॥ अतिक्लेशेनलब्धोसितान्क्लेशान्वेत्तिचेश्वरः ४० विनात्वयाक्षणोमे
तोयुगकल्पसमोभवत् ॥ एवंलाघववाक्यासौदुष्टभावेनभामिनी ४१ अतिप्रेमबलात्सातंकटिदेशेदधारह ॥ सोपितच्चेष्टितंज्ञात्वागस्तस्याःपरिचिंतयन् ४२
गूढाभिसंधिस्तांप्रोचेपूर्वंकिंमेत्वयाहृतम् ॥ एवंतस्मिन्ब्रुवत्येवलड्डुकंसाततोददौ४३ अत्तेस्मिन्पुनरन्यंसामहाविषयुतंददौ ॥ अत्तेस्मिन्पुनरन्यंसययाचेलड्डुकंब
लात्४४काशिराजश्चपत्नीचप्रार्थयामासतुस्तदा ॥ उत्तिष्ठोत्तिष्ठमातस्त्वंसबालाभोजनंकुरु४५ यावदुत्तिष्ठतेसातुतावद्बद्धार्भकेणसा ॥ गिरींद्रसारवपुषासाततो
विह्वलाभवत् ४६ मुंचमुंचेतितंप्राहमाताहंतवबालक ॥ बहुकालेनद्रष्टुंत्वामागतास्नेहपाशतः ४७ कथंचूर्णयितुंमांत्वमुद्यतोसिगिरिर्यथा ॥ कराभ्यांनुनुदे
सातंतावन्निद्रांययौचसः ४८ प्रसार्यचरणौहस्तौश्वासोच्छासपरायणः ॥ इतिराजान्यषेधत्तांविह्वलांभारपीडिताम् ४९ मानिद्राभंगमस्याशुकुरुत्वंजननीस
ती ॥ उद्धर्तुंबालकंकेचिच्चक्रुःकरुणयामनः ५० उत्थापितुंचालितुंवासर्वेनाशकुवंस्तदा ॥ प्रार्थयामासुरपरेबालंराजीवलोचनम् ५१ अनुक्रोशंकुरुशिशोजन
नीतेमरिष्यति ॥ चालयामासचरणौहस्तौसाथशिरोधराम् ५२ किमिदंक्रियतेबालपितरंकिंवदिष्यसि ॥ एवंवदत्सुलोकेषुसामृताथनिशाचरी ५३ दशयो
जनदेहेनव्यापितंभूतलंतया ॥ पलायनपराःकेचित्तांदृष्ट्वातिभयानकाम् ५४ ययुःकेचिच्चतांद्रष्टुंविचित्रजनवृत्तयः ॥ राजाचविस्मितस्तत्रजनाःसर्वेविलोक्यता
म् ५५ कथंकपटरूपेयमागताबालघातिनी ॥ ऋषिपत्नीस्वरूपेणनज्ञातारक्षसीतिच ॥ अत्यद्भुतंज्ञानमस्यसामर्थ्यंचविलोकितम् ॥ इतिब्रुवाणास्तुनरास्तत्स

मीपंमुदाययुः ५७ बालस्तुत्थाप्यतस्यास्तुपुष्पभारसमंजगुः ॥ अपनेयेतितेप्याहुर्दुष्टादुष्टस्वरूपिणी ५८ परस्यानिष्टामिच्छेद्यःसएवनिधनंव्रजेत् ॥ तुष्टुवुःपारि
पूज्यैनंकाशिराजोजनाअपि ५९ ऋषयोलोकपालाश्चभक्त्यादेवंविनायकम् ॥ नाथस्त्वमसिदेवानांमनुष्योरगरक्षसाम् ६० यक्षगंधर्वविप्राणांगजाश्वरथपक्षि
णाम् ॥ भूतभव्यभविष्यस्यबुद्धींद्रियगणस्यच ६१ हर्षस्यशोकदुःखस्यसुखस्यज्ञानमोहयोः ॥ अर्थस्यकार्यजातस्यलाभहान्योस्तथैवच ६२ स्वर्गपाता
ललोकानांपृथिव्याजलधेरपि ॥ नक्षत्राणांग्रहाणांचपिशाचानांचवीरुधाम् ६३ वृक्षाणांसरितांपुंसांस्त्रीणांबालजनस्यच ॥ उत्पत्तिस्थितिसंहारकारिणेतेन
मोनमः ६४ पशूनांपतयेतुभ्यंतत्त्वज्ञानप्रदायिने ॥ नमोविष्णुस्वरूपायनमस्तेरुद्ररूपिणे ६५ नमस्तेब्रह्मरूपायनमोनंतस्वरूपिणे ॥ मोक्षहेतोनमस्तुभ्यंन
मोविघ्नहरायते ६६ नमोऽभक्तविनाशायनमोभक्तप्रियायच ॥ अधिदैवाधिभूतात्मनतापत्रयहरायते ६७ सर्वोत्पातविघातायनमोलीलास्वरूपिणे ॥सर्वांतर्या
मिणेतुभ्यंसर्वाध्यक्षायतेनमः ६८ अदित्याजठरोत्पन्नविनायकनमोस्तुते ॥ परब्रह्मस्वरूपायनमःकश्यपसूनवे ६९ अमेयमायान्वितविक्रमायमायाविनेमा
यिकमोहनाय ॥ अमेयमायाहरणायमायामहाश्रयायास्तुनमोनमस्ते ॥ एवंस्तुत्वातुतेसर्वेययुःस्वंस्वंगृहंमुदा ॥ त्यक्त्वातांराक्षसींछित्त्वाखंडशोदूरतःपुरा
त् ७१ यइदंपठतेस्तोत्रंत्रिसंध्योत्पातनाशनम् ॥ नभवंतिमहोत्पाताविघ्नाभूतभयानिच ७२ त्रिसंध्यंयःपठेत्स्तोत्रंसर्वान्कामानवाप्नुयात् ॥ विनायकःसदात
स्यरक्षणंकुरुतेनघ ७३ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेराक्षसीवधोनामएकविंशतितमोऽध्यायः ॥ २१ ॥ कउवाच ॥ अपरस्मिन्नहिनेराजाप्रातः
स्नानकृतोद्यमः ॥ पौराःसर्वेवितर्क्यैवंनायंदेवोनमानुषः १ नदेवश्चेत्कथंपंचमहांतोदेवदुर्धराः ॥ अजेयाःशक्रहरिभिर्हतादैत्यामहाबलाः २ देवएवभवेद्बालमध्ये
ऽयंक्रीडतेलघु ॥ इतितर्क्यततस्तावदागताराजदर्शनम् ३ राजापिभद्रमगमदुवाचसकलान्प्रति ॥ निरूपयंतुयत्कार्यंतद्वःसिद्धिंप्रयास्यति ४ किमर्थंप्रातरेवेह
पौरायूयंसमागताः ॥ तऊचुर्नरहस्यंयत्स्वाभिप्रेतमृतेवचः५त्वयायंहिसमानीतोमुनिपुत्रोविनायकः ॥ नास्यदास्यमभून्नोहिकिंचित्कापिकदाचन ६त्वयातुपूजि
तोनेकवारंस्वशरणेस्थितः ॥ यद्यत्तवगृहेयातितत्तन्नःप्रेषयस्यहो ७ अयंतुनकथंराजन्प्रेषितोनुविनायकः ॥ राजोवाच ॥ सम्यगुक्तंयत्रजनाविभज्यभुज्यतेतुयद्
८ अमृतंयातिचविषंविषमन्यद्भवेत्तुतत् ॥ अस्मिन्यस्यभवेद्भक्तिर्देवेवामानुषेपिवा ९ सएनंस्वगृहेनीत्वापूजयेद्भोजयेदपि ॥ जनास्तुत्रिविधाःपौरारजःसत्व
तमोगुणैः १० परीक्षंतेमरादुष्टाःपुण्यवंतोभजंत्यपि ॥ केचिदेनंविनिंदंतिप्रशंसंतिचकेचन ११ यस्यस्वभावोयादृक्स्यात्सतथावर्ततेनरः ॥ नजहातिदृष्य
माणश्चंदनःस्वसुगंधिताम् १२ कस्तुरीकर्दमयुतःपलांडुर्वानिजंगुणम् ॥ भवतांयदिभक्तिश्चेदनन्यास्मिन्सुतेमुनेः १३ नीयतांपूजयंत्वाशुभोजनायाप्रियाय
च ॥ परीक्षार्थंननेयोसौजनकोजननीमम १४ मयाकथंनरावाच्यानीत्वैनंपूजयंत्विति ॥ अस्यशक्तिंदृढांदृष्ट्वाममभक्तिर्विशिष्यते १५ नायंचेन्मत्पुरीकृत्या
कुतोयूयंकचाप्यहम् ॥ इतिराजवचःश्रुत्वापुनरूचुश्चनागराः १६ यथावदस्मिकल्याणतत्तथानतदन्यथा ॥ अस्माकंकार्यसिद्धिर्यातांकुरुष्वजनाधिप १७नी

त्वेमंस्वगृहेबालंपूजयामोयथार्हतः ॥ एतस्मिन्नंतरेबालोवदत्तान्सदसिस्थितान् १८ जानन्नंतर्गतंतेषांसर्वसाक्षीजगद्गुरुः ॥ विनायकउवाच ॥ किमर्थंमांप्रार्थयंतोभवंतोतिमहत्तराः १९ अहंबालोमुनिसुतोमत्पूजनफलंनुकिम् ॥ भविष्यतिनजानेहंभवतांव्ययकारिणाम् २० विवाहोव्रतबंधोवायज्ञोवान्योमहोत्सवः ॥ तदाभवद्गृहंयास्येहव्यंकव्यंयदाभवेत् २१ असंख्याताभवंतोहिकथमेकोगृहंव्रजे ॥ वकेशिनींकिमर्थंवागांधोक्ष्यथभवद्विधाः २२ वांछितार्थीकथंयाचेत्यक्त्वाकल्पद्रुमंद्रुमम् ॥ अन्यत्क्षुद्रंवांछितंवातद्द्यूयंसमुत्सुकाः २३ ऊचुवाच ॥ विनायकवच श्रुत्वाश्रेणीमुख्याजगुःपुनः ॥ अस्मिन्विवाहेसंपन्नेनस्थास्यातिक्षणंभवान् २४ राज्ञःप्रसादाद्दृष्टोसिभक्तिंनःसफलीकुरु ॥ अवाप्तकामस्यचतेसृष्टिस्थित्यंतकारिणः २५ सर्वांतर्यामिणःसर्वचित्तवृत्तीर्विजानतः ॥ कर्तुंवाप्यन्यथाकर्तुमकर्तुंवाक्षमस्यह २६ चिदानंदस्यनैवास्तिपूजाभिर्नःप्रयोजनम् ॥ भक्तिप्रियोदेवइतिनिगमंनवृथाकुरु २७ निशम्येतिवचस्तेषांतानूचेथविनायकः ॥ एवंचेद्भवतांभक्तिस्तदायास्येनृपाज्ञया २८ एवमाकर्ण्यतद्वाक्यंसर्वेपिस्वगृहान्ययुः ॥ मंडपान्विदधुःकेचित्केचिद्वस्त्रगृहाणिच २९ तोरणान्विदधुर्भक्त्यादर्शशोभाद्भुतानिच ॥ भाजनानिमहार्हाणिसुगंधचंदनानिच ३० द्रव्याणिचसुगंधीनिमृगनाभिभवानिच ॥ फलानिचविचित्राणिवासांस्याभरणानिच ३१ पक्वान्नानिविचित्राणिपंचामृतयुतानिच ॥ स्थापितामूर्तयोनानामुक्तामालाविभूषिताः ३२ एवंगृहेगृहेसर्वेसामग्रींचक्रुरुत्सुकाः ॥ एकोभून्नगरप्रांतेब्राह्मणोवेदशास्त्रवित् ३३ शुक्लनामाशुक्लवृत्तिःशांतोदांतःक्षमान्वितः ॥ श्रौतस्मार्तकर्मनिधिर्ब्रह्मनिष्ठोतिथिप्रियः ३४ यस्यपत्नीमहाभागाविद्वमानामनामतः ॥ निस्पृहाज्ञानसंपन्नासर्वविषयवसुंदरा ३५ दरिद्राज्ञाननिष्ठासापतिप्राणापतिव्रता ॥ तस्यागृहगतंदृश्यंनभस्तारांकितंस्फुटम् ३६ नस्वर्णैराजतंताम्रंभाजनंरीतिजंनच ॥ गौरावल्कलसंवीतातेजोज्वालासुशोभना ३७ यदंगतेजसाव्याप्तंदृश्यमानंनदृश्यते ॥ तेनवृत्तेनतुष्टासागृहशोभाविधायिनी ३८ तस्यास्तोषेणतुष्टोमूढिनयेनचसेवया ॥ स्वस्थःस्थितोज्ञाननिष्ठस्तिष्ठत्यकृतभोजनः ३९ कदाचिद्भिक्षितुंयातोवारितस्तुगृहेगृहे ॥ महोत्सवंप्रकुर्वद्भिर्विनायकहृतेजनैः ४० यलब्धंतेनतुष्टोसौभार्यामित्याब्रवीदिदं ॥ श्रूयतांपत्निनगरेवारितोहंगृहेगृहे ४१ आयास्यतिप्रतिगृहंपूजार्थंसविनायकः ॥ योवतीर्णोमुनिगृहंभूभारहरणोद्यतः ४२ आयास्यतिगृहंचेत्सपूजार्थंयत्नमाचर ॥ साब्रवीन्महतींपूजांत्यक्त्वान्नंत्वद्गृहेकथं ४३ भवतांसोकिंचनानांकथंवागृहमेष्यति ॥ गंधपुष्पंपर्युषितंपक्वंकंदफलंमुने ४४ भविष्यतिकृतंसम्यगसम्यक्स्वल्पमप्यहो ॥ किंवाप्रयोजनंतस्यगृहेणभवतांप्रभो ४५ इतिप्रियावचःश्रुत्वापुनरूचेमुनिःप्रियां ॥ समांभक्तंविजानातिदीनानाथप्रभुःप्रभुः ४६ भक्तिप्रियोस्तिदेवोयंनलोभवशगोविभुः ॥ अर्णसाचपलाशेनपुष्पेणप्रीयतेहिसः ४७ सुवर्णनिचयैर्वापिनहिदंभात्समर्पितैः ॥ इत्याकर्ण्यवचस्तस्यविद्रुमापुनरब्रवीत् ४८ एवंचेत्तर्हियत्सिद्धंतदेतस्मैनिवेद्यतां ॥ ततोष्टादशधान्यानांकृत्वापिष्टंपपाचसा ४९ ओदनञ्चकृतोजीर्णतंदुलानांजलाधिकः ॥ मुष्टिपिष्टंपर्णपुटेपक्त्वाभुंक्तेदिनेदिने ५० तत्तेनदीयमानेनद्रव्येणचैलमानयत् ॥ गंधाक्षतंचपुष्पाणिधूपंदीपंमहार्तिके

५१ वन्यंफलंवल्कलंचस्थापयामासचैकतः ॥ शुष्कामलकखंडानिमुखवासार्थमेवच ५२ प्रसार्यदर्भानिचयंसुसिक्तस्वांगणेध्वजं ॥ चकारकाशिपूनासौध्या
ननिष्ठोभवन्मुनिः ५३ नैवेद्यंवैश्वदेवंचकृत्वापूर्वंप्रयत्नतः ५४ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेद्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥ ७ ॥ ॥
कउवाच ॥ ॥ सबालोबालमध्येतुचिक्रीडेकौतुकान्वितः ॥ राजाभद्रासनगतोनृत्यंसर्वजनैःसह १ यावत्पश्यतिवेश्यानांतावदेवागतावुभौ ॥ देवलोका
त्सदोरम्यंसनकश्चसनंदनः २ उद्भासितंतयोर्दीप्त्यासूर्याभ्योरिवतत्सदः ॥ आसनादुद्गतिष्ठत्सनृपतिःसहसेक्ष्यतौ ३ शिरःस्थाप्यपादपद्मेसाष्टांगंप्रणनामतौ ॥
बद्धांजलिरुवाचाथअद्यधन्यंकुलंमम ४ राज्यंज्ञानंचदेहश्चपत्नीपुत्रादिकंचयत् ॥ इत्युक्त्वापाणिनाधृत्वास्वासनेचोपवेश्यतौ ५ उपचारैःषोडशभिरपूजयत
भक्तितः ॥ तौचविश्रामयामासपादसंवाहनादिभिः ६ पुनःपुनःप्रणम्यासौवक्तुंसमुपचक्रमे ॥ राजोवाच ॥ ॥ मुनीनांन्यस्तदंडानांनिस्पृहाणांचसर्वदा ७
कार्यंलिप्सानकाचित्स्यादाज्ञामीहेतथाप्यहं ॥ तपोराज्यंकुलंशीलंसार्थंकंकर्तुमुद्यतः ८ ॥ ॥ तावूचतुः ॥ ॥ अवाप्तसर्वकामोसौपरब्रह्मस्वरूपवान् ॥
लीलावतारीभगवान्कश्यपस्यसुतस्तव ९ गृहेनानाकौतुकानिकुरुतेद्भुतविक्रमः ॥ श्रुत्वावदानंतस्यात्रद्रष्टुमावांसमागतौ १० अन्यथाशक्रभवनत्या
गेकिन्नःप्रयोजनं ॥ गृहेयस्यकल्पतरुःसोन्यंकिंयाचयिष्यति ११ तस्यांघ्रिकमलंनत्वागन्छावःस्वस्थलंनृप ॥ एवंतयोरागतयोःश्रुत्वावाक्यंविनायकः १२
वदतोरागतःक्रीडांत्यक्त्वामोदकहस्तकः ॥ पंचखाद्यमयंभक्ष्यंमोदकंलीलयादधत् १३ तयोस्तंदर्शयामासनृपोहास्यपरोमृदु ॥ सोयंसमागतोदेवोयद्दर्शनस
मुत्सुकौ १४ आगतोयच्चकर्तव्यंकुरुतंतद्यथेप्सितः ॥ तंनिरीक्ष्यमुनीतौतुपस्परमथोचतुः १५ अनेनदूषितोनूनंकश्यपोमुनिसत्तमः ॥ तत्पुत्रतांममासाद्यस्वाचा
रत्यजताभृशं १६ स्पृष्टास्पृष्टविचारोस्यभक्ष्याभक्ष्यविधिर्नच ॥ दर्शनेस्पर्शनेचास्यमहान्दोषोभवेत्खलु १७ कथंस्वनियमांस्त्यक्त्वास्थितःक्षत्रियवेश्मनि ॥ स्वध
र्मेनःस्थितानांतुदर्शनेनास्यकिंभवेत् १८ शुश्रावतांगिरंदेवोनृपसन्निहितस्तदा ॥ उवाचवाक्यंवाक्यज्ञोवाचस्पतिरिवापरः १९ क्वगतंभवतोज्ञानंवृथाश्रमवतो
र्मुनी ॥ स्वर्गंत्यक्त्वाकथमिहसंप्राप्तौप्राकृताविव २० श्रुत्वेत्थंवचनंतस्यनृपतिंतावथोचतुः ॥ मायामयस्यदेवस्यमाययामोहितोभृशम् २१ देह्यनुज्ञांगमिष्या
वोनिजमाश्रममंडलम् ॥ ततोनृपतिशार्दूलोदृढभक्तिप्रणोदितः २२ स्थीयतांश्रूयतांवाक्यंमदीयामित्युवाचतौ ॥ भक्त्याचप्रार्थयामासस्नात्वाभुक्त्वानुगम्य
ताम् २३ निशम्यप्रार्थनांतस्यप्रोचतुर्मुनिपुंगवौ ॥ नभुज्यतेराजकीयमन्नंतस्माद्व्रजावहे २४ तदनुज्ञांसमासाद्यमणिकर्णीततोगतौ ॥ विनायकःसर्वबालै
रनुयातोमुदारमन् २५ स्नात्वागतःशुक्लयूहंज्ञात्वातद्भक्तिमादृतः ॥ यथाधावतिगौर्वत्संयथामातारुदच्छिशुम् २६ यथाकृष्णःसभानीतांद्रौपदींशरणागता
म् ॥ दृष्ट्वातौदंपतीदेवंपादयोर्विनिपेततुः २७ आनंदाश्रूणिमुंचंतौवाचागद्गदयागिरा ॥ लिलिंगतुर्मुदादेवंननृतुर्हर्षनिर्भरौ २८ नाविंदतुःप्रकर्तव्यंदेहाती
ताविवासतुः ॥ रोमांचांचितगात्रौतौबाष्पधाराममुंचताम् २९ मुहूर्तालब्धसंज्ञौतौनेमतुर्जगदीश्वरम् ॥ ततऊचेमुनिर्दंपतीननायेतियत्तव ३० विख्यातं

त्रिषुलोकेषुनामपापहरंशुभम् ॥ सार्थकंकृतमद्यैवजन्मनःपाददर्शनात् ३१ प्रासादनिचयांस्त्यक्त्वागतःपर्णकुटीमिमाम् ॥ धन्योवंशोमदीयोद्यजन्मज्ञानंत
पोवयः३२अपूजयत्ततस्तंसकुशासनगतंमुनिः ॥ प्रक्षाल्यचरणद्वंद्वंजलंतच्छिरसादधत् ३३ गंधाक्षतपुष्पमालाधूपंदीपंददावथ ॥ दूर्वांकुरान्शमीपत्रंसुतैलंके
तकंशुभम् ३४ खाद्यंस्वल्पंपुरःस्थाप्यफलमारण्यकंतथा ॥ पुष्पांजलिंमंत्रपूतांदत्वानत्वासलज्जितः ३५ कदन्नंकथमस्मैतद्देयमित्येवचिंतयन् ॥ अभिप्रायंवि
दित्वातंदेवदेवोविनायकः ३६ याचेमातःकिमन्नंतेगृहेतद्दीयतांमम ॥ भक्त्यादत्तंकदन्नंमेऽधिकंस्यादमृतादपि ३७ विषंभवतियद्दत्तंदंभेनाश्रद्धयान्वितम् ॥
विस्तीर्णमोदनंशुष्कंभास्करींबहुधान्यजाम् ३८ आस्थापयत्पुरस्तस्यमुनिपत्नीह्रियान्विता ॥ तैलंचसकलंदृष्ट्वाप्राहसंस्तंचबालकाः ३९ अभक्षयत्सप
क्वान्नसदृशंपरमादरात् ॥ प्रतिग्रासंजलंपीत्वाजघासबलवत्तरम् ४० ततस्तेनौदनःपात्रेनिक्षिप्तोमुनिनाखिलः ॥ तज्जलंचालितंदिक्षुबालोरोद्धुंनचाशकत् ४१
ततोभवद्दशभुजोबुभुजेचौदनंचतैः ॥ आश्चर्यंदद्दशुर्लोकाहसंतोहस्ततालतः ४२ अपूर्वःपाचितोयंनुजानुदघ्नजलेनयः ॥ इत्यूचुर्बुभुजुर्बालारुच्यापायसक
ल्पया ४३ साकंतेनचयैर्भुक्तंगतास्तेदेवतुल्यताम् ॥ अशोचन्नितरेपश्चाद्वेहसन्विवृतैरदैः ४४ कोलाहलोमहानासीन्नगरेकविनायकः ॥ केचिद्ययुःशुक्लगृहे
भुनक्तिशीर्णमोदनम् ४५ रोद्धुंकृतादशभुजोओदनंचभुनक्तितैः ॥ भुक्तेतस्मिन्विशुद्धेसशुष्कमामलकंददौ ४६ मुखशुद्धितेनचक्रेजगदात्माविनायकः ॥
प्रसन्नःशुक्लमवदत्प्रीतोभावेनतेनव ४७ वरान्वृणुमहाभागमत्तोयानभिकांक्षसे ॥ शुक्लउवाच ॥ सर्वान्नागरिकांस्त्यक्त्वाभोक्तुंरुक्षान्नमागतः ४८ अयमेववरो
मह्यंयज्जातंतवदर्शनम् ॥ प्रभुवाक्यानुरोधेनयाचेभक्तिंत्वयिस्थिराम् ४९ अंतेमोक्षंचमेदेहियेननावर्ततेपुनः ॥ नसंसारसुखेचित्तंरमतेमेविनायक ५० ॥ क
उवाच ॥ एवमस्त्वितितंप्रोच्यपूर्ववद्बिभुजःशिशुः ॥ गृहंतस्मैशक्रगृहाद्धरंसद्रत्नकांचनम् ५१ अत्युत्तमंस्वरूपंचज्ञानंसंपदमर्पयत् ॥ अनुज्ञातोययौताभ्या
मन्यत्रबालकैर्वृतः ५२ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेबालचरितेशुक्लवरप्रदानंनामत्रयोविंशतितमोध्यायः ॥ २३ ॥ कउवाच ॥ व्यलोकयंस्तंनगरेतस्मि
न्सर्वेमहाजनाः ॥ विधायपूजासामग्रींभोजनस्याप्यनेकधा १ गृहेगृहेराजगृहेसर्वामात्यगृहेपिच ॥ गवेषयंतिस्मजनास्तदाकश्यपनंदनम् २ अपृच्छंतजनाः
सर्वेकचिद्दृष्टोविनायकः ॥ नेतिनेतिश्रुतिर्वाक्त्रियंसकस्याक्षिगोचरः ३ भवेन्नालोकितोस्माभिरितितत्रावदन्जनाः ॥ पुरप्रांतेतुयेतत्रतेशृण्वन्जनवाक्यतः ४
सचागतःशुक्लगृहंततस्तेतद्गृहंययुः ॥ नापश्यंस्तमथापृच्छंस्तेनोक्तंसइतोगतः ५ सतुमायामयोबालोजनान्वंचितुमुत्सुकः ॥ विसृज्यबालकान्पश्चाद्धरेणाग
त्यसुप्तवान् ६ केचित्तंददृशुःसुप्तंहर्यक्षमिवगह्वरे ॥ केचित्तंक्रोधवशगानिनिंदुर्बालकोलघुः ७ पिशाचइवकिंयातोदरिद्रस्यगृहंप्रति ॥ ईशश्चेत्सर्वभावज्ञः
सर्वेषांप्रियमाचरेत् ८ उत्थाप्यतंकरेधृत्वायाहीतिशरणंशुभम् ॥ सफलंकुरुनःसर्वंत्वदर्थमुपकल्पितम् ९ गतःखेदोभ्रमणजोदृष्ट्वात्वच्चरणांबुजम् ॥ या
हियाहिगृहान्नस्त्वंभोक्तुंबालगणैःसह १० सऊचेसांप्रतंभुक्तंपुनरूचुर्जनास्तुतम् ॥ दरिद्रस्यगृहेकिंतेभुक्तंस्याद्वैक्ष्यवर्तिनः ११ नापोपिपिबतेक्वान्नंकथंभुक्तं

त्वयाविभो ॥ ॥ गणेशउवाच ॥ ॥ उदरंपरिपूर्णंमेयातुंशक्तिश्चनास्तिमे १२ ॥॥ कउवाच ॥ ॥ ततःसर्वेविदित्वातंभुक्तंशुल्लगृहेजनाः ॥ निराशाभग्नसंक
ल्पारुष्टादीनाविचेतसः १३ संभाराव्यर्थतांयातानानाक्लेशार्थसंचिताः ॥ बुभुजुस्तान्स्वयंदुष्टादांभिकाभक्तिवर्जिताः १४ येभक्तास्तेनिराहारास्तस्थुर्ध्या
नपरायणाः ॥ एवंसर्वेषुलोकेषुज्ञात्वाध्यानस्थितेषुसः १५ एकोनानास्वरूपोभूद्घटाकाशइवस्फुटम् ॥ जलपूर्णेषुकुंभेषुरविर्नानायथेक्षते १६ क्वचित्पर्यंक
शयनःक्वचिज्जपपरायणः ॥ क्वचिद्दानरतःक्वापिभोजनायसमुत्सुकः १७ क्वचित्पाठयतेशिष्यान्सांगंवेदंसहार्थकम् ॥ क्वचिव्याकरुतेशास्त्रंक्वचिच्चपठतिस्व
यम् १८ एवंनानास्वरूपैःसनानागृहगतोबभौ ॥ अयमस्मद्गृहंयातःपूर्वमित्याभिमेनिरे १९ तैलमुद्वर्तनंस्नानंपूजनंभोजनंददुः ॥ एवंसर्वेजहृषिरेकाशिराज
समन्वितम् २० दृष्ट्वादेवंपरमयामुदासाधुविनायकम् ॥ पुपूजुर्भोजयामासुर्द्विजान्सुहृदणानपि २१ पंचामृतंचपक्वान्नंव्यंजनंपायसौदनौ ॥ अन्यद्रुचिकरं
सर्वंबुभुजुस्तेयथारुचि २२ एवंद्विजेषुदेवेषुकाशिराजेसुहृत्स्वपि ॥ आशीर्वत्सुसभाविष्टःकाशिराजोन्वपृच्छत २३ माययामुनिपुत्रस्यमोहितोनेकधाकृतेः ॥
राजोवाच ॥ ॥ विनायकोगतोभोक्तुंनानागृहइतिस्फुटम् २४ अयंमेनिकटेप्यस्तिकोनुभुंक्तेगृहेगृहे ॥ क्वचिच्चशिबिकारूढोयातिभोक्तुंविनायकः २५ ग
जारूढःक्वचिद्याातिहयारूढश्चकुत्रचित् ॥ एवंसर्वेषुलोकेषुपूजाव्यग्रेषुबालके २६ ततस्तौनगरींयातौतत्रतत्रविनायकम् ॥ अपश्यतांभुक्तवंतंपरावृत्यसमी
यतुः २७ यत्रयत्रगृहेयातौतत्रतत्रविनायकम् ॥ निर्वृत्यसकलंनित्यंभिक्षार्थंपर्यगच्छताम् २८ शयानंशयनेदिव्येभक्षयंतंफलानिच ॥ चर्वयंतंचतांबूलंक
चिद्गंधादिचर्चितम् २९ क्वचिन्नृत्यंप्रपश्यंतंगणिकानांगणान्वितम् ॥ क्रीडंतमक्षैःकुत्रापिक्वचिद्बुद्धिबलेनच ३० नानालंकारसंयुक्तंदिव्यवस्त्रान्वितंक्वचित् ॥
पठंतंचजपंतंचध्यानेनतमपश्यताम् ३१ स्तूयमानंक्वचिद्भक्तैस्तुवंतंजगदीश्वरम् ॥ दर्शयंतंविभूतिंस्वांभक्तायानेकशःक्वचित् ३२ युवानंरमयंतंस्वाःस्त्रियोत्यं
तमनोरमाः ॥ चिकित्सयंतंवृद्धंचसेवंतंरसमुत्तमम् ३३ रिंगंतंभक्षयंतंचभृदंकुत्रचिदंगणे ॥ परिश्रांतंपिबंतंकंक्रीडाभिःकंदुकादिभिः ३४ एवंतौक्षु
धितौश्रांतौपर्यटंतौगृहेगृहे ॥ सर्वत्रदृष्ट्वातंदेवंपरस्परमथोचतुः ३५ अत्रास्तिनिर्मलःशुक्लोब्राह्मणोनगरेशुचिः ॥ यावोभोक्तुंतस्यगृहइत्युक्त्वातत्रजग्म
तुः ३६ तत्रापिसोंगणगतोदृष्टस्ताभ्यांविनायकः ॥ नगरेनात्रभोक्तव्यंनतुशेषंविनायकात् ३७ इत्युक्त्वाबहिरायातौपुरोदृष्ट्वाविनायकम् ॥ तिर्यग्गति
धरौभूत्वाततोपिसमपश्यतां ३८ प्राच्यांप्रतीच्यांचदिशितमेवेतौसमंततः ॥ अधश्चोर्ध्वंसर्वगतंविनायकमपश्यतां ३९ विनायकस्वरूपंचतौपुनर्विश्वरू
पिणं ॥ सर्वंविनायकमयंवस्तुमात्रमपश्यतां ४० अथाभावयतांशंभुंविष्णुंतौभृशविस्मितौ ॥ अपश्यतांहृदितदातंचतंचविनायकम् ४१ निमील्यनयने
चांतस्तमेवमुनिसत्तमौ ॥ उद्घाट्यनयनेचापिस्वांतएनमपश्यतां ४२ किरीटिनंकुंडलिनंमुक्तामालांबरांगदं ॥ कटिसूत्रेणहैमेनमुद्रिकाभिश्चभूषितं ४३ सिं
हारूढंदशभुजांसिद्धिबुद्धियुतंशुभं ॥ भालचंद्रंमृगमदतिलकंनागभूषणं ४४ सूर्यकोटिप्रभंसृष्टिस्थितिसंहारकारिणं ॥ त्यक्त्वाभेदंतत्वविदौनेमतुश्चर

णांबुजं ४५ नुतःस्मपरयाभक्त्यादेववेवंविनायकं ॥ तस्यैवकरुणाप्राप्तप्रबोधौतौतुमुनीश्वरौ ४६ इतिश्रीगणेशपुराणेउत्तरखंडेविनायकभोजन्कथननंनामच
तुर्विंशतितमोऽध्यायः ॥ २४ ॥ ॥ तावूचतुः ॥ सर्वेषांकारणानांत्वंकारणंकारणातिगः ॥ ब्रह्मस्वरूपोब्रह्मांडकारणंव्यापकःपरः १ पासीदंसृजसेविश्वंत्वमे
वहरसेनच ॥ नानारूपैररूपस्त्वंनानामायाबलान्वितः २ त्वमेवपंचभूतानियक्षगंधर्वराक्षसाः ॥ कस्त्वांस्तोतुंसमर्थःस्याच्चराचरस्वरूपकं ३ नेतिनेति
ब्रवीतिस्मत्वद्रूपाज्ञानतःश्रुतिः ॥ आवांविमोहितौज्ञातुंनेशाथेरूपमुत्तमं ४ महिमानंनजानीवोनेकरूपस्यतेविभो ॥ कृतकृत्यौभवत्पाददर्शनात्स्वःप्रभो
धुना ५ नानावतारैर्भूभारंहरसेनंतशक्तितः ॥ ॥ कउवाच ॥ ॥ एवंतयोःस्तुतिंश्रुत्वाप्रीत्याप्रोवाचतावुभौ ६ विनायकोबालरूपीकौतुकीमायिकोपि
च ॥ तत्वज्ञौमत्प्रसादाच्चसर्वज्ञौचभविष्यथः ७ एवंदत्वावरंदेवस्तत्रैवांतरधीयत ॥ ततस्तौमूर्त्तिमतुलांकृत्वासम्यग्विनायकीं ८ कृत्वाप्रासादमतुलंरत्न
कांचनसंयुतं ॥ स्थापयामासतुरुभौसनकश्चसनंदनः ९ आख्यांचचक्रतुस्तस्यावरदोयंविनायकः ॥ गणेशकुंडमितिचकृतंताभ्यांसरोवरं १० अत्रस्ना
त्वापूजयेद्योवरदंतंविनायकं ॥ सकामानखिलान्प्राप्यभुक्त्वाभोगाननेकशः ११ अवाप्यपुत्रान्पौत्रांश्चविद्यामायुर्यशोमहत् ॥ धनंधान्ययशश्चापितत्व
ज्ञानंचशाश्वतं १२ अंतेवैनायकंधामयातिनास्त्यत्रसंशयः ॥ ॥ कउवाच ॥ ॥ यत्रदेवाःसगंधर्वायक्षाश्चाप्सरसांगणाः १३ दृष्ट्वासंपूज्यदेवेशंतत्रैवांतार्हि
ताःक्षणात् ॥ संप्राप्तविस्मयौतौचजग्मतुर्दिवमुत्तमं १४ काशिराजोपितत्रैत्यसामात्यःसप्रजस्तुतं ॥ नानाद्रव्यैरलंकारैर्वस्त्रैरुच्चावचैरपि १५ पक्वान्नै
श्चाप्यनेकैश्चफलैर्नानाविधैरपि ॥ रत्नैर्मुक्ताफलैःपुष्पैर्दक्षिणाभिरनेकशः १६ पुपूजपरयाभक्त्याब्राह्मणैःसहमंत्रतः ॥ ब्राह्मणान्पूजयामासवस्त्रालं
कारकांचनैः १७ आशिषःपरिगृह्यैवनगरंपुनरागमत् ॥ तथैवताःप्रकृतयःपुपूजुस्तंविनायकं १८ तथैवब्राह्मणान्पूज्यजगृहुराशिषःपराः ॥ ततःप्रजास्तं
पुपूजुर्यथाशक्तिविनायकं १९ सर्वेतेहृष्टमनसःपुरंप्रविविशुस्तदा ॥ इतितेसर्वमाख्यातंविनायकविचेष्टितं २० सर्वपापहरंपुण्यंकिमन्यच्छ्रोतुमिच्छसि ॥
॥ ॥ मुनिरुवाच ॥ ॥ श्रुतंचरित्रंशुक्लस्यशुक्लाभिक्षारतस्यच २१ धातुस्पर्शविहीनस्यगृहंयातोविनायकः ॥ भुजैर्दशभिरादायह्योदनंशिथिलं
जलैः २२ जग्ध्वात्यक्त्वाश्रमंतृप्तोदारिद्र्यंचव्यनाशयत् ॥ दत्तंगृहंतुशुक्लस्यशक्रस्यनगराद्वरं २३ संपदोपितथादत्तायाःसंतिह्यलकाधिपे ॥ स्वरूपं
चतथादत्तंयन्नास्तिमकरध्वजे २४ ज्ञानंतस्मैतथादत्तंयन्नास्तिचतुरानने ॥ अत्रकिंकारणंब्रह्मंस्तन्मेव्याख्यातुमर्हसि २५ ॥ ॥ कउवाच ॥ ॥ सम्यक्
पृष्टंत्वयाव्यासपरमेशकथायतः ॥ पुनातिप्राश्निकंश्रोतॄन्वक्तारंभक्तितःश्रुता २६ मनोमेहिस्थितंवक्तुंतत्पृष्टंहित्वयाविभो ॥ सम्यक्तेहंवदिष्यामिभक्तिग
म्यस्यचेष्टितम् २७ सर्वज्ञःसर्वदर्शीचसर्वगःसर्वचित्तवित् ॥ भक्त्यैवतुष्यतेदेवोभावोहितोपकारणम् २८ भक्त्याहृतंपलाशंचजलंपुष्पंमनोहरम् ॥ तेनै
वपरितुष्टोसावात्मानंचप्रयच्छति २९ दंभेनहेलयावापिलज्जयापिपरस्यवा ॥ महाधनंमहावित्तंरत्नानिविविधानिच ३० कांचनंराजतंमुक्तादत्तंसर्वंवृथाभवे

त् ॥ शमीपत्रेणतुष्टोसौव्याधायादात्सलोकताम् २१ प्रसंगतोपिदत्तेनभावंकृत्वादृढंहृदि ॥ अनायासेनलब्धेनतस्माद्भक्तिर्गरीयसी ३२ ॥ ॥ इतिश्री
गणेशपुराणेउत्तरखण्डेबालचरितेभक्तिप्रशंसाकथनंनामपंचविंशतितमोऽध्यायः ॥ २५ ॥ ॥ ७ ॥ ॥ मुनिरुवाच ॥ ॥ किंकर्मकृतवा
न्व्याधःकथंपत्रंसमर्पितमम् ॥ किंनामासकथंप्राप्तःसालोक्यंतद्वदस्वमे १ ॥ ॥ कउवाच ॥ ॥ विदर्भदेशेनगरमादिषाख्यंबभूवह ॥ विख्यातंत्रिषु
लोकेषुकुबेरनगरोपमं २ भीमोनामाभवद्व्याधोनगरेमांसविक्रयी ॥ परेषांदोषकथनेदोषोयद्यपिवर्तते ३ प्रश्नेकृतेतुवक्तव्योयाथातथ्यान्नमत्सरात् ॥ सभी
मोदोषबहुलोबाणकोदंडवान्वने ४ शरपूर्णेषुधीखड्गीचापंबिभ्रच्छास्त्रिकां ॥ जवधीत्प्राणिनोनित्यंकुटुंबभरणेरतः ५ पथिकान्ब्राह्मणांश्चापिनिर्दयोनि
र्जनेवने ॥ कदाचिन्नगरेतस्मिन्समारब्धोमहोत्सवः ६ प्रातरेववनंयातोबहुमांसजिघृक्षया ॥ विक्रयेच्छुर्द्रव्यलुब्धोकुटुंबस्यापिपोषकः ७ जघानमृगयूथां
स्तान्मांसभारयुतःपुरं ॥ यावत्प्रविशतेतावदागतोराक्षसोमहान् ८ मनुष्यगंधहृष्टोसौययौतस्यांतिकंक्षणात् ॥ पिंगाक्षोनामतःपिंगनेत्रःसर्वभयंकरः ९
मनुष्यश्वापदाशीसदुष्पूरइवहव्यभुक् ॥ चकंपेसचतंदृष्ट्वाव्याधोभूमावथापतत् १० पतितानिचशस्त्राणिनेत्रेप्याच्छादितेबलात् ॥ उन्मील्यनयने
पश्यच्छमीवृक्षंसमीपतः ११ आरुरोहचभीमस्तंराक्षसोपिसमारुहत् ॥ तावच्चिक्षेपशाखांसतत्पत्रंवायुनेरितम् १२ पपातगणनाथस्यवामनस्थापितस्यह ॥
मस्तकेतेनतुष्टोसावुभाभ्यांपूजितःस्फुटम् १३ वामनायवरान्दातुंस्फुटोयोभूद्गजाननः ॥ बलिंविजेतुकामायकश्यपस्यात्मजायसः १४ अत्यंतंतु
ष्यतेदेवोदूर्वयाचशमीदलैः ॥ रत्नकांचनसंयुक्तादिव्यवस्त्रसमन्विता १५ दूर्वांकुरंविनापूजानिष्फलाजायतेनृणां ॥ शमीपत्रेणवासास्यात्सफला
नान्यथाक्वचित् १६ यज्ञदानव्रतैरन्यैस्तपोभिर्नियमैरपि ॥ तथानप्रीयतेदेवःकांचनैरत्नसंचयैः १७ दूर्वाभिश्चशमीपत्रैर्यथासुप्रीयतेविभुः ॥ तयो
स्तुष्टोदेवदेवःप्रेषयद्यानमुत्तमम् १८ स्वरूपधारिभिर्युक्तांकिंकरैर्निजलोकतः ॥ तेषांनिरीक्षणान्नष्टःपापपर्वतराशयः १९ कृपयाचगणेशस्यतयोराक्ष
सभीमयोः ॥ यथाग्निकणसंपर्कान्नश्यंतेतृणपर्वताः २० त्यक्त्वादेहौदिव्यदेहौगृहीत्वायानमास्थितौ ॥ दूतैःसंपूजितौनानावस्त्रभूषाविलेपनैः २१ नाना
वादित्रनिर्घोषैःस्त्रीगंधर्वैर्युतंमहत् ॥ नीतौतौदेवनिकटेनेमतुस्तौविनायकम् २२ अशेषपापनिर्मुक्तौप्रापतुस्तौसरूपतां ॥ आकल्पंस्थापितौतेनगणेशेननिज
स्थले २३ एवंभावप्रियोदेवःप्रीयतेभक्तिभावतः ॥ तथैवमुष्टिमात्रान्नात्संतुष्टोभूद्द्विजस्यसः ॥ शुष्कस्यप्रददौदिव्यमलकासदृशंगृहम् २४ तस्माद्दूर्वाशमीपत्रै
र्विनापूजावृथाभवेत् ॥ नमहत्यादांभिकयापूजयाप्रीयतेतथा २५ यथाभावेनकृतयास्वल्पयासौगजाननः २६ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेभीमरा
क्षसमोक्षणंनामषड्विंशतितमोऽध्यायः ॥ २६ ॥ ॥ ७ ॥ ॥ व्यासउवाच ॥ ॥ पूर्वजन्मनिव्याधोसौकआसीद्राक्षसोपिसः ॥ किंशीलःकिंसमाचार

१ मादोशाख्यमितिपाठः । २ चिच्छेदेतिपाठः ।

रतन्ममाचक्ष्वनाभिज १ अनुष्ठानंकृतंतेनवामनेनकथंप्रभो ॥ कथंतस्मैवरोदत्तोगजाननस्वरूपिणा २ लोकोगणेशस्यकथंपृथगन्यत्रतिष्ठति ॥ कथंशमीप्रियातस्यसर्वमेतद्वदाशुमे ३ ॥ कउवाच ॥ शृणुवक्ष्यामितेसर्वंयद्यत्पृष्टंत्वयामुने ॥ राजासीत्पूर्वजनुषिसव्याधोवेदपारगः ४ सर्वशास्त्रप्रवक्ताचसर्वलक्षणलक्षितः ॥ यज्वाविनीतोऽहीमांश्चदेवतातिथिपूजकः ५ गजाश्वरथपत्तीनांसंख्यायस्यनविद्यते ॥ दाताशूरश्चमेधावीसमृद्धोमघवानिव ६ ध्वजश्चशत्रुजिद्यस्यप्रधानौबुद्धिमत्तरौ ॥ यतोधरीकृतःकाव्योगिरांपतिरपिस्फुटम् ७ यौतौक्षितितलेजेतुंसमर्थौशस्त्रतेजसा ॥ पत्नीसुलक्षणास्यासीद्वनाम्नाचमदनावती ८ पतिव्रताधर्मशीलासुमुखीसर्ववेदिनी ॥ नतयासदृशीकाचित्त्रिषुलोकेषुकामिनी ९ दीनानाथवृद्धजनेकृपालुरतिथिष्वपि ॥ यजतोर्ददतोरेवंरतयोःपूजनेसताम् १० तयोर्वृत्तेनतुतुषुःपौराजानपदाजनाः ॥ अमित्राअपिगृण्हंतिषड्गुणान्साधुसंमतान् ११ एवंसपुण्यकीर्त्तिःसन्शशासपृथिवीमिमाम् ॥ बहुसंवत्सरंदैवाद्वकालधर्ममुपेयिवान् १२ मरिष्यमाणश्चक्रेसौगोसहस्रंयथाविधि ॥ महादानान्यपिददौदशाष्टौचेतराणिच १३ मृतेस्मिन्नगरीसर्वाशुशोचनृपतिंतदा ॥ अपुत्रत्वात्सहैवास्यपत्नीसहगतिंययौ १४ मंत्रिणौसर्वसंस्कारान्कारयामासतुर्द्विजैः ॥ एकादशाहेददतुर्नानादानानिभक्तितः १५ गतेमासेमंत्रयतोराज्याहींकुलजंनरम् ॥ धीमंतंसत्वसंपन्नंशूरंसत्यपराक्रमम् १६ दुर्धर्षस्यसुतंतस्यदायादस्यमहाबलम् ॥ क्षेत्रजंसांबनामानंराज्ञाशिष्टंचतावुभौ १७ अमात्यौनिश्चयंकृत्वाराज्यंदातुंतुतस्यह ॥ पौरजानपदान्सर्वान्ब्राह्मणान्परिपृच्छ्यच १८ शुभेमुहूर्त्तेलग्नेचनानासंभारसंचयैः ॥ कारयामासतुरुभावभिषेकंद्विजैःसह १९ ॥ ॥ मुनिरुवाच ॥ ॥ कथंक्षेत्रात्समुत्पन्नःकिंजातीयःपितामह ॥ ससांबस्तन्ममाचक्ष्वसर्वज्ञोसिकृपानिधे २० ॥ ॥ कउवाच ॥ दुर्धर्षेणकृतायत्नाःपुत्रार्थंबहुधामुने ॥ नचजातःसुपुत्रोस्यदुष्टदैवयुतस्यह २१ तस्यपत्न्याप्रमदयाकैवर्तासक्तचित्तया ॥ जनितःसुमुहूर्तेसनज्ञातोजारजस्त्विति २२ यावंतिराजचिह्नानितावंतिददतुश्चतौ ॥ निवेद्यकोशसहितंसर्वंराज्यंसराष्ट्रकम् २३ अमात्यपदनिष्ठौतौजातावास्तांयथापुरा ॥ सराज्यंप्राप्यदुर्द्धर्षसुतोमत्तःश्रियाभवत् २४ स्त्रीमांसमदिरासक्तोमत्तोगजइवालसः ॥ दुराचाररतोनित्यंनयमार्गपराङ्मुखः २५ आदायधनिनांसर्वंधनंतान्निरवासयत् ॥ अपमानंचकाराशुब्राह्मणानांसतामपि २६ बहिश्चकारतान्सर्वान्वृत्तिमाच्छिद्यसांततिम् ॥ शिष्टःस्मप्रकृतीर्नीतिंनतद्वाक्यंसमाददे २७ वारंवारंयदातौतंशिष्टःस्मकरुणायुतौ ॥ अमात्यौसबबंधाशुनिगडाभ्यांरुषान्वितः २८ शिक्षापयंतौपितरौतस्यतंदुर्हृदंसुतम् ॥ यत्प्रसादात्त्वयाप्राप्तंराज्यंनिहतकंटकम् २९ विनिग्रहंकथंसाध्वोस्तयोस्त्वंकुरुषेखल ॥ अनादृत्यतुतद्वाक्यंपीयूषमिवपामरः ३० शृंखलाभ्यांनिबद्धौतौकारागारेध्यवासयत् ॥ अतिदुष्टोदुष्टबुद्धिनामाभूत्तत्सखानिशम् ३१ तमेवसचिवंचक्रेदत्वाश्वंकांचनंगजम् ॥ रत्नानिदिव्यवासांसिरांकवास्तरणानिच ३२ दासीदासानसंख्यातान्पानान्यन्नंचनारिकम् ॥ नकरोत्यस्यवाक्यंयस्तस्यछेत्स्येशिरोबलात् ३३ इत्युक्त्वासर्वलोकेषुसांबोंतःपुरमाययौ ३४ ॥ इतिश्रीग०उत्त०बालचरितेसप्तविंशतितमोध्यायः ॥ २७॥ कउवाच ॥ सराजकार्यंकुरुतेस्वयंभुंक्तेवरस्त्रियः ॥

राष्ट्रेश्वृणोतिरामांसोऽपतिंवासपतिंतथा १ बलादानयतेभोक्तुंक्रंदतांरुदतामपि ॥ नवागणयतेज्ञातिभेदंविषयलंपटः २ याचोन्नतकुचानारीतस्यदृष्टिपथंगता ॥ तामालिंगत्यसौकामीचुंबतीमांयभत्यपि ३ परद्रव्याणिगृण्हातिस्त्रियोपिसबलात्पुनः ॥ सोपिताद्दग्गुणोमंत्रीदुष्टबुद्धिपथेरतः ४ एवंदुराचाररतौनकन्यांनचमातरं ॥ नवर्जयंतःसंभोगेभगिनीमपिनिर्घृणौ ५ नब्रह्महत्यांमनुतोनस्त्रीबालवधंतथा ॥ एवंपापसमाचारौपापस्यपर्वताविव ६ आस्तामुभौदुष्टबुद्धीराजामात्यौ सुदुःसहौ ॥ नब्राह्मणोयतिर्वापितृहेयातिभिक्षितुं ७ नराष्ट्रेनामतस्यापिगृण्हातिप्रकृतेरपि ॥ एकदामृगयार्थंतौयातःस्मगहनंवनं ८ घ्नतःस्ममृगयूथानिपक्षियूथान्यनेकशः ॥ तानिप्रापय्यनगरमश्वारूढौस्वयंपुनः ९ वैनायकंमहास्थानंपथितौपश्यतःस्मह ॥ यस्मिन्विराजतेमूर्तिर्जीर्णावैनायकीशुभा १० स्थापिता रामपित्रासापुत्रार्थंकुर्वतातपः ॥ भक्त्यासाक्षात्कृतोयत्रदेवदेवोविनायकः ११ दशाक्षरेणमंत्रेणध्यायताबहुवासरं ॥ दत्वातस्मैवरान्देवोविदधेवांछितानपि १२ ततोवसिष्ठहस्तेनतेनेयंस्थापितादृढा ॥ वरदेतिचनामास्यावसिष्ठेनकृतंततः ॥ अस्यदर्शनतोनृणांपुरुषार्थाश्चतुर्विधाः॥ स्मरणात्पूजनाद्यापिसेत्स्यंतेनात्रसंशयः १३ एवंवसिष्ठवाक्येनस्थानंतद्धविषप्रथे ॥ गणेशभजनेनास्यस्मरणेनार्चनेनच १४ रामलक्ष्मणभरताःशत्रुघ्नसहिताःसुताः ॥ जातालोकेषुविख्याताःसर्वज्ञाःशूरसंमताः १५ एवंदृष्ट्वामहारम्यंप्रासादंराजनिर्मितं ॥ उत्तरेतुरश्चपृष्ठाद्राजामात्यौपुपूजतुः १६ पत्रैःपुष्पैर्नमतुस्तंसर्वपापहरंविभुं ॥ प्रदक्षिणीछत्यविभुमीयतुःक्षणमात्रतः १७ एतदेवपरंपुण्यंदेवाज्ञातंतयोस्तदा ॥ एवंपापसमाचारौराज्यंकृत्वाथमभ्रतुः १८ बध्वापाशैर्याम्यदूतैर्नीतौतौशमनांतिकं ॥ चित्रगुप्तंसमाहूयपप्रच्छसशुभाशुभं १९ तेनोक्तंनतयोरस्तिपुण्यलेशोरवेःसुत ॥ पापानांगणनानास्तिदूतांश्चैवेदमब्रवीत् २० बध्यतांबध्यतामेतौलोहदंडेनपात्यतां ॥ कुंडेवीचिमयेपंक्तिसहस्रपरिवत्सरान् २१ एकैकस्मिन्क्रमेणैतौकुंडेभुक्त्वाघसंचयान् ॥ क्षिप्यतांमृत्युलोकेचनीचयोनिगतावुभौ २२ अनयोःपुण्यलेशोस्तिदूताःशृणुततत्कृतिं ॥ प्रसंगादर्चितोदृष्टोदेवआभ्यांगजाननः २३ तेनपुण्येनसोप्येतावुद्धरिष्यतितत्रवै ॥ एवमाकर्ण्यतद्वाक्यंदूतैर्बद्धौहतौदृढं २४ कुंभीपाकेशोणितोदेनिरयेरौरवेपितौ ॥ निक्षिप्तौकालकूटेचक्रमशःशतवत्सरान् २५ तामिस्रेचांधतामिस्रेपूयशोणितकर्दमे ॥ कंटकेतुक्षतांगौतौसंतप्तौतप्तवालुके २६ विक्षतौकृमिभिस्तत्रभृशंसूचीमुखैरुभौ ॥ असिपत्रवनेघोरेततोनीतावुभावपि ॥ २७ ॥ यत्रशस्त्राभिघातेनवर्ष्मभिद्यतिनां पिनां ॥ ततस्तप्तशिलायांतौनिष्पिष्टौघनघाततः २८ भुंजंतौनरकानेकविंशतिंबहुवासरं ॥ नदुःखंशक्यतेवक्तुंशेषेणाशेषतस्तयोः २९ एवंकतिसहस्राणि भुक्त्वाभोगाननेकशः ॥ निस्तीर्णभोगौतौपापशेषेणभुवमागतौ ३० एकोजातःकाकयोनौकौशिकोभूत्परोपिच ॥ ततएकोदर्दुरोभूदपरःसरटोभवत् ३१ ततएकोविषधरोपरोभूद्वृश्चिकोपिच ॥ तत्रापिकुर्वतःपापंनानालोकान्विदंशतः ३२ श्वमार्जारयोर्योनौजातौनकुलसूकरौ ॥ वृकजंबूकयोर्योनौ जातौघोटकगर्दभौ ३३ ततउष्ट्रगजौजातौततोनक्रमहाझषौ ॥ ततोव्याघ्रमृगौजातौततोवृषभमाहिषौ ३४ एवंनानायोनिगतौजातौचांडालकीटकौ ॥

राक्षसीभिल्लयोर्योनौततश्चांतेसमीयतुः ३५ पिंगाक्षोदुर्बुद्धिरितिनाम्नाख्यातौचभूतले ॥ आजन्मकृतपापस्यकथ्यतेबहुदोषता ॥ ३६ ॥ यदातौराजप्रकृ
ञि स्तांपापरतौपुरा ॥ एकंपुण्यंतयोरासीन्मृगयायांप्रसर्पतोः ३७ विनायकस्यनमनंदर्शनंचप्रदक्षिणा ॥ अर्चनंफलपुष्पाद्यैस्तुष्टआसीद्गजाननः ३८
॥ अगाधंततयोःपुण्यमासीतज्जन्मसंचितम् ॥ यदापुराराक्षसोसौभीमंभक्षितुमागतः ३९ सआरूढःशमीवृक्षंतत्पत्राणिचमस्तके ॥ पतितानिगणेशस्यतु
ष्टोभूत्सद्वयोरपि ४० दिव्यदेहंतयोर्दत्वास्वर्लोकंप्रापयद्विभुः ॥ एतत्तेकथितंपूर्वजन्मकर्ममयातयोः ४१ ॥ शमीपत्रार्चनादेवतुष्टोभूत्सगजाननः ॥ यथायं
स्थापितस्तेनवामनेनतदप्यहम् ४२ कथयामिमुनेसंवैतदनुष्ठानमेवच ॥ यथाचगणनाथोस्यप्रसन्नोवरदोभवत् ४३ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबाल
चरितेभीमराक्षसयोर्जन्मवर्णनंनामअष्टाविंशतितमोऽध्यायः॥ २८ ॥कउवाच॥ मयाज्ञप्तःकश्यपोसौसृष्टिनानाविधांकुरु॥ सविनीतोमहाज्ञानीभूतभव्यभ
विष्यवित् १ अतिवैश्वानररवितेजाःसुतपसांनिधिः ॥ सृष्टिसामर्थ्यसंप्राप्तौततापसुमहत्तपः २ षडक्षरेणमंत्रेणध्यात्वादेवंगजाननम् ॥ दिव्यवर्षसहस्रांते
सदेवोवरदोभवत् ३ ईप्सितानस्यसर्वान्सददौनानावरान्शुभान् ॥ ततोसौमनसायद्यदकल्पयतलाघवात् ४ तत्तदग्रेपश्यतिस्मवरदानप्रभावतः ॥
चतुर्दशसुपत्नीषुऋतुदानादनेकधा ५ चकारतेजसासर्वंजगत्स्थावरजंगमं ॥ तासुश्रेष्ठचद्वेपत्न्यौदित्यदितीतिनामतः ६ अदित्यापितपस्तप्तंविष्णुप्री
णनहेतवे ॥ संवत्सराणामयुतंततस्तुष्टोजनार्दनः ७ जगत्त्राःपालनायासौधर्मसंस्थापनायच ॥ शक्रादितत्सुतानांचदुष्टानांनिग्रहायच ८ पुत्रतामग
मत्तस्यास्तयापूर्वंप्रसादितः ॥ अथसास्वामिनंप्राहदितिर्होमायसादरं ९ ऋतुंमेदेहिभगवन्बाधतेमदनानलः ॥ इत्याकर्ण्यवचस्तस्यामुनिस्तांप्राहसादरं
१० अयंकालोघोररूपोहोमकालउपस्थितः ॥ क्षणमाचरधैर्यंत्वंपश्चाद्रंस्येत्वयासह ११ अस्मिन्कालेभवेद्दुष्टमपत्यंदेवधर्मधुक् ॥ इतिस्वामिवचः
श्रुत्वाहस्तेधृत्वाननामतं १२ उवाचरक्तनयनादग्धुकामाजगत्त्रयं ॥ इदानीमेवमेवांछानकृताचेत्वयामुने १३ देहत्यागंकरिष्यामिविह्वलामदनाग्नि
ना ॥ यथातथास्तांदैवान्मेअपत्यंदेवधर्मधुक् १४ इतितद्वचनंश्रुत्वाशरणागतवत्सलः ॥ ददावृतुंतदातस्यैहोमंज्ञात्वाचकारह १५ ततश्चास्याःसु
तोजज्ञेहिरण्याक्षोमहाबलः ॥ हिरण्यकशिपुश्चोभौचेरतुस्तपउत्कटं १६ पंचाक्षरंमहामंत्रंपितुस्तौबहुवत्सरं ॥ एकांगुष्ठस्थितौवायुमात्रभक्षौसव
ल्मिकौ १७ अथाययौमहादेवोवरंदातुंकृपानिधिः ॥ तुष्टुवतुस्ततस्तंतौभक्त्यादेवंत्रिलोचनं १८ कृतांजलिपुटौचोभौप्रणिपातपुरःसरं ॥ यथाश
क्तियथाज्ञानंतद्दर्शनस्फुरन्मती १९ योदेवोवृषवाहनोदशभुजश्चंद्रार्द्धनागान्वितोनानारूपगणैर्गिरींद्रतनयायुक्तोजगत्कारणं ॥ योव्याघ्राजिनकृत्तिमां
स्त्रिनयनोयःशूलधृक्कामहाभक्तेच्छापरिपूरणैकनिलयोधर्मार्थमोक्षप्रदः २० इतिस्तुत्वामहादेवंसर्वव्यापिनमीश्वरं ॥ नमश्चक्रतुर्देवंभक्तवांछासुरद्रु
मं २१ तावुवाचततस्तुष्टोवृणुतंवरमित्यसौ ॥ वृणुतस्तौवरान्देवादमृतंयक्षरक्षसः २२ किन्नरैर्मानुषश्रेष्ठैःपिशाचैश्चारणादिभिः ॥ नशस्त्रैर्ना

र्द्रशुष्कैश्चजंतुभिर्जलजैरपि २३ स्थावरैर्जंगमैरन्यैर्नादिवाननिशासुच ॥ नष्टपृथिव्यांनचचाकाशेनांतरालेतथोषसि २४ तथेतिताववाचेशस्तथाचांतर्द धेहरः ॥ तदैवतावजयतांरोदसीचरसातलं २५ देवस्थानानिसर्वाणिबलादाक्रम्यतौस्थितौ ॥ हिरण्यकशिपोर्जातःप्रल्हादोनामनामतः २६ त नयोविष्णुभक्तेषुगरीयान्वंशकंटकः ॥ जपन्नारायणंदेवंपित्रासंताडितोभृशं २७ अनेकयातनायांसरक्षितोनेकधामुना ॥ जलेस्थलेविषादग्नेर्वि ष्णुनाकरुणावता २८ हिरण्यकशिपुःसायंसर्वलोकभयंकरः ॥ नारसिंहेनवपुषानखैःसविदारितः २९ वाराहेणहतःपूर्वोदंष्ट्रयावसुधात्रता ॥ विरोचनः सुतस्तस्यबलिस्तस्याभवत्सुतः ३० विरोचनःसूर्यभक्तोमुकुटंप्राप्तवांस्ततः ॥ ऊचिवांस्तंचसप्राश्चःपरहस्तोयदास्पृशेत् ३१ मुकुटस्यतदाध्वंसोभावितोना त्रसंशयः ॥ ससूर्यवरदानेनचक्रेत्रिभुवनंवशे ३२ च्युतस्थानास्ततोदेवाअच्युतंशरणंययुः ॥ सचिंतांमहतींकृत्वानिश्चयंनाध्यगच्छत ३३ ततस्तेनधृतंरू पंसर्वयोषिद्वरंस्त्रियः ॥ तेनतंरमयामासबहुकालंविरोचनम् ३४ ततःससुरतंकर्तुमुद्यतोभूत्कुबुद्धिमान् ॥ ततस्तंसुदतीप्राहममैकावासनास्तिभोः ३५ अभ्यंगं कुरुपूर्वंत्वंततोहिरंस्यसेमया ॥ इतिश्रुत्वासतद्वाक्यंकामासक्तोन्वमोदत ३६ उत्तार्यमुकुटंसाथमूर्ध्नितैलंन्यमर्दयत् ॥ सतदाशतचूर्णोभूत्तत्सारूप्यंसजाग्रवान् ३७ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेविरोचनवधोनामएकोनत्रिंशोध्यायः २९ ॥ कउवाच ॥ बलिस्तुहरिमक्त्वान्नकिंचिदन्वतप्यत ॥ वेदवेदांग वित्प्राज्ञःसर्वशास्त्रविशारदः १ परनिंदापरद्रव्यपरद्रोहपराङ्मुखः ॥ दातायज्वामानयितामान्यानांपरमादरात् २ गच्छन्वदन्स्वपन्भुंजंस्तिष्ठन्नपिजपन्पिबन् ॥ ध्यायतिस्महरिंनित्यंभक्त्यासंस्थिरचेतसा ३ एकदाशुक्रमाहूयपारपूज्ययथाविधि ॥ पप्रच्छतंबलिर्नीतिंशक्रोभुंक्तेमरावतीं ४ कथंचभागोनास्माकंभा वृत्वेसततंस्थिते ॥ इतिमेसंशयंप्राज्ञछेत्तुमर्हस्यशेषतः ५ ॥ शुक्रउवाच ॥ तवपूर्वैरेतदर्थंकृतंवैरंनिरंतरं ॥ सुरैःसार्द्धंमहाभागतेसर्वेनाशमापिताः ६ देवै र्विष्णुसहायैस्तुनानामायाबलाश्रयात् ॥ त्यक्त्वावैरंभवान्साधुयजतांशतसंख्यया ७ तत्पुण्यस्यबलादैंद्रंपदंपूर्णमवाप्स्यसि ॥ बलिरुवाच ॥ सम्यगुक्तंत्व याब्रह्मन्नीतिशास्त्रविशारद ८ साम्नोदानविधेर्भेदाज्जघन्योनिग्रहोमतः ॥ सोपिपुण्यबलात्सिध्येत्तस्मात्पुण्यंदृढंमतं ९ ॥ कउवाच ॥ एवंसनिश्चयंकृत्वाव सिष्ठादीन्समाह्वयत् ॥ भृग्वादींश्चमुनीन्पूज्यसुमुहूर्तेसमारभत् १० यज्ञंमहासमारंभंसर्वानंदकरंपरं ॥ सर्वेतेयज्ञकुंडानिप्राचीसाधनपूर्वकं ११ चक्रुश्चकार यामासुर्यज्ञसंभारसंचयान् ॥ वेदिकामंडपार्दीश्चभूमिशोधनपूर्वकं १२ कृत्वाभ्युदयिकंश्राद्धंस्वस्तिवाचनपूर्वकं ॥ मातॄणांपूजनंकृत्वास्थापयामासुरादरात् ॥ मंत्रैर्नानाविधैर्विप्राःसर्वामंडपदेवताः १३ रेजातेदंपतीतत्रश्वेतवस्त्रावलंकृतौ ॥ अमात्यराजसुहृदांपौराणांचगणैर्वृतौ ॥ १४ ॥ सम्मानितास्त्रियोपश्यन्नग वाक्षैस्तंमहोत्सवं ॥ अन्वारब्धाब्राह्मणास्तेपूर्वांगानिन्यवर्तयन् १५ आलभंतपशुंवेदकल्पवाक्यानुसारतः ॥ तत्तद्देवायतन्मंत्रैर्जुह्वतिस्मविधानतः १६ यज्ञ वाटेचतुर्द्वारेसर्वेषामनिवारिते ॥ आयांतियांतिसर्वेपिपूजितास्त्रिविधाजनाः १७ विवदंतेमहावादैरेकतोविदुषांजनाः ॥ नृत्यंत्यप्सरसोन्यत्रपठंतेवैदिकाःकुतः

१८ गायंतिवैष्णवाःशैवामृदंगतालवादनैः ॥ भुंजतेब्राह्मणाःस्वेच्छाभोजनंषड्रसैःक्वचित् १९ कथयंतिकथानानाकथाःशृण्वंतिमोदकाः ॥ एवंसुविततेय
ज्ञेवसिष्ठाद्यामहर्षयः २० वेसोर्ध्वारांसुमहतींपातयामासुरग्निषु ॥ उत्तरांगानिसंपाद्यरथेतौस्थाप्यदंपती २१ कर्तुंचावभृथस्नानंसर्वेलोकाविनिर्ययुः ॥ नाना
वादित्रनिर्घोषैर्वरबंदीरवैरपि २२ वेदघोषैर्बहुविधैःसामगानैर्हरिप्रियैः ॥ स्नात्वागत्यहरिंसोथतोषयामासतान्द्विजान् २३ अनेकरत्ननिचयैर्धनैर्वस्त्रैरने
कशः ॥ गोभिरश्वैर्गजैर्गंधैरिच्छाविषयपूरणैः २४ एकोनशतमेवंतेतस्ययज्ञानपारयन् ॥ शतेयज्ञेसमारब्धेशक्रश्चिंतांपरांययौ २५ कनीयांसंसशरणंस्व
पदभ्रंशशंकया ॥ क्षीरसागरमध्यस्थंशेषशायिनमीश्वरम् २६ मयासंवाहितपदंसेव्यमानंसुरैरपि ॥ गीयमानंनारदेनवीणाहस्तेनसादरम् २७ तुं
बरुप्रमुखैरन्यैरप्सरोगणकिन्नरैः ॥ अस्तौदसौहरिर्दृष्ट्वातंहरिंस्वेष्टसिद्धये ॥ प्रणम्यसंपुटंकृत्वापाण्योर्भावेनसादरम् २८ ॥ शक्रउवाच ॥ नमोनंतशक्तेनमो
विश्वयोनेनमोविश्वभर्त्रेनमोविश्वकर्त्रे ॥ नमोदैत्यहंत्रेनमोनेकरूपनमोसकचित्तार्थदायास्तुनियम् २९ ॥ कउवाच ॥ एवंस्तुत्वाब्रवीदेनंवासवोबालिचेष्टि
तम् ॥ बालिर्विरोचनसुतोविख्यातोभुवनत्रये ३० ग्रहीष्यतिममपदंमत्वाच्छतगुणादयम् ॥ यावत्तस्यभवेद्वाणीसंवज्ञातंतुविष्णुना ३१ ततऊचेसभगवानिं
द्रंसंकटचिंतया ॥ ममभक्तोबालिःशक्रतपस्वीविजितेंद्रियः ३२ तपसःफलमेतेनभोक्तव्यंश्रुतिवाक्यतः ॥ नजायतेवृथाकर्मशुभंवायदिवाशुभम् ३३ साध
यिष्येभवत्कार्यंस्थिरीकुरुमनोहरे ॥ ततःसगर्भतांपेदेअदित्याजठरेविभुः ३४ सुषुवेनवमेमासिसादितिस्तनयंशुभम् ॥ प्रभयातस्यतेदीपानिष्प्रभत्वमु
पागमन् ३५ स्नात्वाशीतजलेनाशुजातकर्मयथाविधि ॥ चकारकश्यपोधीमान्स्वास्तिवाचनपूर्वकम् ३६ कृत्वापितृमहायज्ञंमातृपूजनपूर्वकम् ॥ ददर्शबाल
कंपश्चात्प्राशयित्वाघृतंमधु ३७ ह्रस्वंपृथुलमूर्द्धानंलघुपादंबृहत्तनुम् ॥ दिव्यज्ञानसमायुक्तंदिव्यदेहंचतुर्भुजम् ३८ नानालंकारसंयुक्तंज्ञात्वाविष्णुमथा
नमत् ॥ उवाचचप्रसन्नात्मातपोवंशोद्यचक्षुषी ३९ ज्ञानंतथाश्रमोधन्योधरास्वर्गोरसातलम् ॥ धन्यास्त्वद्दर्शनादेतेसच्चिदानंदरूपिणः ४० ॥ ॥ कउवाच ॥
एवमाकर्ण्यतद्वाक्यमुवाचजगदीश्वरः ॥ अदित्यास्तपसातुष्टःपुत्रत्वमहमागतः ४१ हर्तुंभूभारमतुलंज्येष्ठकार्यंचसाधितुम् ॥ इत्युक्त्वाप्राकृतोभूत्वारुद
त्स्तन्यंपपावथ ४२ नामनिष्क्रमणंकर्मचक्रेन्नप्राशनंमुनिः ॥ तृतीयेचौलमब्देसपंचमेव्रतबंधनम् ४३ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेवामनावता
तारककथनंनामत्रिंशोऽध्यायः ॥ ३० ॥ कउवाच ॥ वेदांश्चचतुरःसांगानध्यापयततंमुनिः ॥ एकस्मिन्दिवसेतातंवामनःपर्यपृच्छत ३ केनोपायेनदेवानांप
दमाप्तिर्भविष्यति ॥ भूभारहरणंतन्मेयथावद्वक्तुमर्हसि २ ॥ ॥ कश्यपउवाच ॥ उपदेशंकरिष्यामिमंत्रस्यसिद्धिदस्यते ॥ षडक्षरस्यविघ्नेशतोषकस्यममा
त्मज ३ तस्मिन्प्रसन्नेविघ्नेशेजगत्स्थित्यंतकारिणि ॥ अनेकब्रह्मांडविधौसर्वकारणकारणे ४ सर्वेकामाःप्रसिध्यंतितदर्थंयत्नमाचर ॥ ॥ कउवाच ॥ ॥
एवमुक्त्वाददौतस्मैसुमुहूर्तेमहामनुम् ५ तदैवचलितस्तस्मादाश्रमाद्धर्षसंयुतः ॥ प्रणम्यतमनुज्ञाप्यजगामतपसेशिशुः ६ भ्रमतादृष्टवतेनाविदर्भेस्थान

मुत्तमम् ॥ लताद्वक्षसमाकीर्णैकासारपरिशोभितम् ७ तत्रपद्मासनंकृत्वाजजापतंमनुंशुभम् ॥ षडक्षरंवर्षमात्रंनिराहारोजितेंद्रियः ८ निर्वाणंतस्यतज्ज्ञा
त्वाविरासीत्सिद्धिबुद्धियुक् ९ मयूरवाहनोदेवःशुंडादंडविराजितः ॥ विलसद्दशदोर्दंडैरत्नमालाविभूषितः १० आशीविषलसन्नाभिर्नानालंकारशोभि
तः ॥ आगतोद्दष्टमक्तंतंधेनुर्वत्सामिवादरात् ११ वामनस्तंपुरोदृष्ट्वासर्वतेजोभिभाविनम् ॥ सर्वसिद्धिकरंदेवंसर्वविघ्ननिवारणम् १२ नुनावपरयाभक्त्या
देवेदेवंगजाननम् १३ ॥ वामनउवाच ॥ अव्यक्तंव्यक्तहेतुंनिगमनुततनुंसर्वदेवाधिदेवंब्रह्मांडानामधीशंजगदुदयकरंसर्ववेदांतवेद्यम् ॥ मायातीतंस्ववेद्यं
स्थितिविलयकरंसर्वविद्यानिधानंसर्वैश्वंसर्वरूपंसकलभयहरंकामदंकांतरूपम् १४ तंवंदेविघ्नराजंविधिहरमुनिभिःसेव्यमानंसनागैस्तेजोराशिंत्रिसत्यंत्रि
गुणविरहितंतत्त्वमस्यादिबोध्यम् ॥ भक्तेच्छोपात्तदेहंनिजजनसुखदंतत्त्वबुद्धिप्रकाशंसांबाद्यैःस्तूयमानंसकलतनुगतंमुक्तिमुक्तिप्रदंतम् १५ ॥ कउवाच ॥
॥ इतिस्तुतोदेवदेवःप्रसन्नःप्राहवामनम् ॥ वरंवरयतुष्टोहंयत्तेमनसिवर्तते १६ स्तोत्रेणतपसाचैवपरितुष्टोददामितत् ॥ वामनउवाच ॥ नतेस्वरूपंविदु
रजजाद्याब्रह्मर्षयोयेसनकादिकाद्याः ॥ दृष्टोसिसत्वंजगतामधीशत्वत्तःकमन्यंवरमद्ययाचे १७ अथापितेवाक्यभिदाभयात्त्वांयाचेवरंतंममनाथदेहि ॥ प
राजयोमेनभवेत्कदापिकार्येखिलेविघ्नभयंनचस्यात् १८ उद्यतोस्तिबलिःशक्रपदमनुंक्रतोर्बलात् ॥ सचमांशरणंयातस्तस्यसिद्धिर्यथाभवेत् १९ त
थाकुरुजगत्कर्तर्यदितुष्टोसिमेनघ ॥ ॥ गजाननउवाच ॥ एतत्तेभवितासर्वंस्मरणान्ममसुव्रत २० सेत्स्यंतिसर्वकार्याणिमहांतिचलघूनिच ॥ ॥ कउ
वाच ॥ एवमुक्त्वागतेदेवेवामनोकारयच्छुभाम् ॥ काश्मीरोपलजांसोथस्थापयन्मूर्तिमुत्तमाम् २१ चतुर्भुजांत्रिनयनांशुंडादंडविराजिताम् ॥ प्रसन्नकरिह
स्ताभ्यांभक्तानामभयप्रदाम् २२ स्मरणाद्दर्शनाद्ध्यानात्पूजनात्सर्वकामदाम् ॥ प्रासादंकारयामासरत्नकांचननिर्मितम् २३ तत्रैकंब्राह्मणंस्थाप्यग्रामंद
त्वाधनानिच ॥ त्रिकालंपूजनंतस्यकारयामासतेनसः २४ आगतःस्वगृहंनत्वापितरंसर्वमब्रवीत् ॥ तपश्चतत्फलंचाथयज्ञंगंतुमपृच्छत २५ कश्यपेना
भ्यनुज्ञातोवामनोदर्भदंडभृत् ॥ सूत्रकृष्णाजिनधरोमेखलीयज्ञमाययौ २६ हस्वाकृतिंमुनिंदृष्ट्वामुनयोविस्मितास्तदा ॥ नायंमुनिर्यतस्तेजोदृश्यते
परमाद्भुतम् २७ तंदृष्ट्वापरमायांतंबलिरुत्थायसत्वरम् ॥ कोसित्वमितिपप्रच्छनत्वातंकुतआगतः २८ किंवांछसिवदविभोपितामाताचकस्तव
वसतिस्तवकुत्रास्तिततऊचेसवामनः २९ नस्मरेपितरौराजन्ननाथंविद्धिमांकृशम् ॥ त्रैलोक्येवसतिर्मेस्तियाचेभूमिंत्रिभिःपदैः ३० मितांकर्तुंपर्णकु
टीशक्तिश्चेदस्तिदीयताम् ॥ ॥ कउवाच ॥ इतिवाक्यंमुनेःश्रुत्वाहृदिज्ञात्वाकृपायुतम् ३१ तंदातुमुद्यतंभूमिमूचेकाव्योबलिंतदा ॥ शुक्रउवाच ॥ नब्रा
ह्मणोहरिरयंकपटंरूपमास्थितः ३२ हरिष्यतित्रिभुवनंपदत्रयमिषेणतु ॥ मादीयतामस्यकिंचिदितिसत्यंब्रवीमिते ३३ तमुवाचमहादैत्योमूढकिं

१ ब्रह्मचारिहरिरयमितिपाठः ।

वदसेवचः ॥ हरिश्चेद्विमुखोगच्छेत्सर्वंमेसुकृतंनयेत् ३४ अस्मात्पात्रंकिमन्यत्स्यादस्मैदत्तमनंतकम् ॥ इत्युक्त्वातंपुनःप्राहवामनंदैत्यपुंगवः ३५ ब्रह्मन्द
त्तामयाभूमिःसंकल्पःक्रियतामिति ॥ वामनःप्राहराजानंसंकल्पयितुमुद्यतः ३६ तावद्द्वारांनिरुध्यैवस्थितःशक्रोन्यदेहतः ॥ ददौशलाकांतत्पात्रे
भग्ननेत्रोबहिर्गतः ३७ ततःपाणितलेतस्यवामनस्यजलंददौ ॥ स्मृत्वागणेशंवद्धेवामनोहर्षनिर्भरः ३८ मूर्ध्नाक्रम्यस्वर्गलोकमेकपादेनरोदसी ॥ पाताला
न्यपरेणापिदत्तंतन्मस्तकेपरम् ३९ ततऊचेबलिंदेवागच्छत्वंधरणीतलम् ॥ त्वांविनाहंकथंयामीत्येवमाहबलिस्तुतम् ४० इत्याकर्ण्यवचस्तस्यपुनस्तंप्राह
वामनः ॥ सान्निध्यंममतत्रापिभवितात्वदनुग्रहात् ४१ इंद्रोमांशरणंयातःप्रियंकार्यैहितस्यमे ॥ तवापिममभक्तस्यप्रियंपश्चाद्भविष्यति ४२ ऐं
द्रेपदेनिवृत्तेस्यपदंदास्येतवैवतत् ॥ ततोब्रह्मादयोदेवास्तुष्टुवुर्वामनंविभुम् ४३ मुमुचुःपुष्पवर्षाणिवाद्यानिववदुःसुराः ॥ पुपूजुस्तेपिसर्वेचजगुश्च
ननृतुःपरे ४४ ततश्चांतर्दधेदेवोवामनोनंतविक्रमः ॥ स्वंस्वंस्थानंगतादेवायथापूर्वंमुदान्विताः ४५ ॥ ॥ कउवाच ॥ ॥ एवंतेनकृतामूर्तिर्विख्या
ताभूज्जगत्त्रये ॥ गजाननस्यदेवस्यसर्वेषांकामदानृणाम् ४६ इत्येतत्कथितंसर्वंप्रसंगाद्बलिचेष्टितम् ॥ लाघवंवामनस्यापिमहिमासुमुखस्यह ४७ अदोषा
ख्येपुरेतेनस्थापितस्यमहात्मना ॥ दशबाहोःप्रसिद्धस्यदेवदक्षिणभागतः ४८ प्रियत्वंतस्यशम्यास्तेकथयिष्येधुनास्फुटम् ४९ ॥ ॥ इतिश्रीगणेशपुरा
णेउत्तरखण्डेबालचरितेएकत्रिंशोध्यायः ॥ ३१ ॥ ॥ ध ॥ ॥ कउवाच ॥ ॥ शृणुष्वावहितोब्रह्मन्नितिहासंपुरातनम् ॥ प्रियव्रतायाकथय
त्स्वयमेवगजाननः १ ॥ ॥ गजाननउवाच ॥ ॥ शमीपत्रस्यमहिमाशृणुष्वार्यमहाफलम् ॥ नयज्ञैर्नचदानैश्चव्रतैःकोटिशतैरपि २ नजपैःपूजनैर्वा
पिममतोषस्तथाभवेत् ॥ नपद्मैर्नान्यकुसुमैःशमीपत्रैर्यथाभवेत् ३ शमीतिकीर्तनादेवपापंनश्यतिवाचिकम् ॥ स्मरणान्मानसंपापंस्पर्शनात्कायजंतथा ४
नित्यंतत्पूजनाद्ध्यानाद्वंदनाच्चैवभक्तितः ॥ निर्विघ्नकरमायुष्यंज्ञानंपापक्षयोपिच ५ वांछासिद्धिरचापल्यंजायतेनात्रसंशयः ॥ ॥ मुनिरुवाच ॥ ॥ को
सौप्रियव्रतोराजाकिंशीलःकुत्रवाभवत् ६ कथंवैतस्यकथितागुणाःशम्यामहात्मना ॥ एनंमेसंशयंब्रह्मन्कृपयानुदसुव्रत ७ ॥ ॥ कउवाच ॥ ॥ अ
त्राप्युदाहरंतीममितिहासंपुरातनम् ॥ शंकरस्यचसंवादंपार्वत्यासहपुत्रक ८ ॥ ॥ पार्वत्युवाच ॥ ॥ कथंशमीप्रियादेवसर्वज्ञजगदीश्वर ॥ गजाननस्यमे
शंसयदितेमय्यनुग्रहः ९ ॥ शंकरउवाच ॥ ॥ शृणुप्रियेप्रवक्ष्यामिकथामेकांशुचिस्मिते ॥ यथाप्रियागणेशस्यशमीतिज्ञास्यतेतथा १० प्रियव्रतोनामरा
जापूर्वमासीन्महामतिः ॥ सत्यवान्धर्मसंपन्नोधर्मात्माशंसितव्रतः ११ तेजस्वीचवदान्यश्चवेदशास्त्रार्थतत्ववित् ॥ सर्वलक्षणसंपन्नश्चतुरंगबलाधिकः १२
पालयामासपृथिवींप्रजाःपुत्रानिवौरसान् ॥ कीर्तिश्चप्रथमाभार्याप्रभातस्यापराभवत् १३ धूर्तश्चकुशलस्तस्यप्रकृतीसंबभूवतुः ॥ कुशलौनीतिशास्त्रे
षुषडाननपराक्रमौ १४ बुध्यापराक्रमेणापिरसासर्वावशीकृता ॥ सतुराजावशंनीतःप्रभयातस्यभार्यया १५ क्रीडतेहर्निशंसोथनानालंकारशोभया ॥

यौवनाक्रांतवपुषारंभादिभ्योतिरम्यया १६ क्षणमात्रंनसहतेवियोगंसतयासह ॥ धिक्करोतिसदाज्येष्ठांतद्वचोनशृणोत्यपि १७ रुषानिरीक्षतेतासतन्मृतिंचिंतयत्यपि ॥ स्वयंनभाषतेकिंचिन्नगृह्णातितयार्पितं १८ ततस्तस्याभवत्पुत्रःप्रभायांपतिसन्निभः ॥ जातकर्मचराजास्यकृत्वाधर्ममनेकधा १९ नामचास्याकरोत्पद्मनाभिरित्थंद्विजेरितं ॥ शुक्लपक्षेयथाचंद्रोववृधेसोपिबालकः २० बुद्धिमान्कुशलोयुद्धेपितृतोप्यधिकोभवत् ॥ पंचमेव्रतबंधंचचकारास्यनृपस्तदा २१ प्रियव्रतोनहाबुद्धिमद्राणामधिपोबली ॥ पांचालराजकन्यांसभार्यांतस्याप्यमेलयत् २२ अतिवैभवयुक्तौतौविवाहंचक्रतुस्तयोः ॥ कदाचिदस्यसापत्नीज्येष्ठादासीत्वमापिता २३पादसंवाहनंकर्तुमागताभर्तृसन्निधिं ॥ निपपातमहीपृष्ठेसपत्न्याचरणाहता २४दुःखितारुदतीहीणाजगामनिजमंदिरं ॥ कमहंशरणंयायांकोमेदुःखंव्यपोहयेत् २५ सपत्न्यामानितायामेत्रातास्याद्धरिरव्ययः ॥ स्मृतमात्रस्तुयस्त्रातादौपद्याकरुणानिधिः २६ यानैवमनुतेभर्तानकोपिमनुतेपितां ॥ अतोनजीवितेनार्थःशोषयिष्येकलेवरं २७ पिबेहालाहलंवापिपतेवापींजलान्वितां ॥ नमनोनिश्चयंयातितस्याविह्वलचेतसा २८एतस्मिन्नंतरेदैवाद्देवलोब्राह्मणोत्तमः॥पुरोहितःसमायातःसजगादगजाननीं२९उपासनांक्लेशहंत्रींसर्वकायफलप्रदां ॥ सातदैवप्रपद्याशुमूर्तिंमंदारनिर्मितां३०गजाननस्यसंपूज्यस्नात्वाशुद्धदिनेतुसा॥ उपविष्टापूजयितुंपरमेणसमाधिना ३१ त्यक्त्वाहरंहरिंचांबांतेजोयुक्तंपरंरविं ॥ सर्वैःसंपूज्यतेदेवदेवआदौगजाननः ३२ विचार्यमाणेपंचानांभेदोनैवोपलभ्यते ॥ योभेदेनेक्षतेचैतान्सयातिनरकान्नरः ३३ एकएवपरानंदपूर्णोसौपरमेश्वरः ॥ स्वेच्छयापंचधाजातोलोकानुग्रहकारणात् ॥ एकएवपुमान्यद्वत्पुत्रमातुलनामभिः ३४ सासम्यक्षोडशभिस्तमुपचारैःपुपूजह ॥ दूर्वापुष्पैर्दक्षिणाभिर्नमस्कारैरनेकधा ३५ कृत्वाकरपुटंसातुतुष्टावजगदीश्वरं ॥ कीर्तिरुवाच ॥ त्वमेवजगदाधारस्त्वमेवसर्वकारणं ३६ त्वमेवब्रह्माविष्णुश्चबृहद्भानुस्त्वमेवहि ॥ चंद्रोयमोवैश्रवणोवरुणोवायुरेवच ३७ त्वमेवसागरानद्योलताकुसुमसंहतिः ॥ सुखंदुःखंतयोर्हेतुस्त्वंनाशस्त्वंविमोचकः ३८ इष्टविघ्नकरोनित्यंमहाविघ्नकरोविराट् ॥ त्वमेवपुत्रलक्ष्मीदस्त्वमेवसर्वकामधुक् ३९ त्वमेवविश्वयोनिश्चत्वमेवविश्वहारकः ॥ त्वमेवप्रकृतिस्त्वंवैपुरुषोनिर्गुणोमहान् ४० त्वमेवशशिरूपेणसर्वमाप्यायसेजगत् ॥ त्वमेवभूतभव्यंचभाविभावात्मकःस्वराट् ४१ शरण्यःसर्वभूतानांशत्रूणांतापनःपरः ॥ कर्मकांडपरोयज्वाज्ञानकांडपरःशुचिः ४२ सर्ववेत्तासर्वविधिःसर्वसाक्षीचसर्वगः ॥ सर्वव्यापीसर्वविष्णुःसर्वसत्यमयःप्रभुः ४३ सर्वमायामयःसर्वमंत्रतंत्रविधानवित् ४४ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेबालचरितेद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ ७ ॥ ॥ ऋषय ऊचुः ॥ एवंसानुदिनंपूज्यतुष्टावतंविनायकम् ॥ एकस्मिन्दिवसेतस्याःसख्योदूर्वार्थमाययुः १ शुक्लमासवशान्नापुःक्वापिदूर्वांकुरान्शुभान् ॥ शमीपत्राणिभूयांसिगृहीत्वातुतदंतिकं २ आययुःपरमश्रांतादूर्वाभावंन्यवेदयन् ॥ शमीपत्रैःपुपूजैनंसर्वोपचारपूर्वकं ३ दूर्वांविनानिराहारातिष्ठत्सानियमेरता ॥ तस्यतुष्टिःपराजाताशमीपत्रैःसमर्पितैः ४ अशेततत्पुरःस्वप्नमपश्यत्सामहाद्भुतं ॥ अब्दांतेसैवमूर्तिस्तामिमांवाचमुवाचह ५ वरंददामितेसुभ्रुशमीपत्रैःसु

तोषितः ॥ सानोवाचयदाकिंचित्कीर्तिःसातांपुनर्जगौ ६ ॥ मूर्तिरुवाच ॥ वश्यस्तेभविताक्रांतोभोगाश्चानेकशःशुभाः ॥ त्वद्भक्तिनिरतःपुत्रोभविष्य
तिमहाबलः ७ क्षिप्रप्रसादनेत्येवंकुरुनामास्यसुंदरम् ॥ तुर्येब्देस्यविषान्मृत्युर्भविष्यतिपुनःक्षणात् ८ गृत्समदोद्विजोभ्येत्यपुनस्तंजीवयिष्यति ॥ रा
ज्यकर्ताचिरायुश्चधर्मशीलोभविष्यति ९ इदंस्तोत्रंपठेद्यस्तुममसंतोषकारणम् ॥ तस्यवश्योभवेद्राजाकिमन्यःप्राकृतोजनः १० पुत्रवान्धनसंपन्नोवेद
वेदांगपारगः ॥ बुद्धिश्चवर्धतेतस्यमेधावृद्धिर्भवेद्दृढा ११ वांछितान्लभतेसोर्थांस्त्रिसंध्यंयःपठेदिदम् ॥ ममभक्तिर्दृढातस्यमोक्षश्चांतेभविष्यति १२ एवं
दत्वावरान्स्वप्नेसदेवोपिदधेक्षणात् ॥ जागृतासाश्रुनयनाविस्मितामानसेवदत् १३ दीनानाथेनमहतीकृपामयिनियोजिता ॥ अनुग्रहोमहान्मह्यंयद्दत्तंद
र्शनंस्वयम् १४ विनायकेनदेवेनपावितापरमादरात् ॥ अद्याहंतेनदेवेनसर्वभूतानुकंपिना १५ इयमेवपरासिद्धिरिदमेवतपःफलम् ॥ अयमेवपरोलाभोयद
वोचन्मयासह १६ ॥ कउवाच ॥ ततःप्रभातेस्नातासापरमानंदनिर्भरा ॥ पुपूजपरयाभक्त्यागणेशंवरदंशुभम् १७ समाप्यनियमंमूर्तिंपूर्वस्थानेन्य
वेशयत् १८ पुरोहितंसमानीयपूजयामासभक्तितः ॥ गणेशंमनसाध्यात्वावदंतीनाममालिकाम् १९ स्मरंतीतद्वरान्कीर्तिःसमयंचप्रतीक्षती ॥ ततःकालेन
महताप्रभासानिष्प्रभाभवत् २० रक्तपित्तवतीजाताप्रारब्धादीश्वरेच्छया ॥ करौपादौचनासाचतस्याःक्षरतिनित्यशः २१ अतिबीभत्सरूपांतांतत्या
जमनसापतिः ॥ नवक्तिनेक्षतेज्ञात्वाप्रयत्नान्निष्फलान्बहून् २२ ततःकीर्तेर्गृहंयातस्तपसासुदशाकृतेः ॥ कृपयागणराजस्यस्वयंवश्योभवच्चसः २३ संगृही
त्वाकरेतांतुमंचकंसमुपानयत् ॥ चिक्रीडस्वेच्छयाकीर्त्यातिष्ठस्तत्परायणः २४ नवियोगंक्षणंतस्याःसहतेनृपसत्तमः ॥ सापिभोगानलंकाराननंतान्बु
भुजेसती २५ सापिगर्भवतीजाताकालेनसुषुवेसुतम् ॥ शुभेमुहूर्तेराजासौददौदानान्यनेकशः २६ पुत्रजन्मप्रहृष्टःसन्ब्राह्मणेभ्योयथार्हतः ॥ दिक्षुस्थाप्य
द्विजान्पंचजातकर्मचकारसः २७ क्षिप्रप्रसादनेत्येवंनामचक्रेततोस्यह ॥ तुतोषपुत्रंदृष्ट्वेवनानालंकारसंयुतम् २८ अतिप्रीतिमतीकीर्तिरभवत्पुत्रदर्शनात् ॥
प्रभाचदुःखितापुत्रंसपत्न्यावीक्ष्यसुंदरम् २९ एषएवभवेद्राजाज्येष्ठापुत्रोयमित्युत ॥ दध्योदनंतुसविषंकीर्तिपुत्रायसाददौ ३० सतुविह्वलतांयातोवि
वृत्तनयनःक्षणात् ॥ प्रभैवचमहाशब्दंकृत्वारोदीद्दृशातुरा ३१ तस्याःशब्दंसमाकर्ण्यकीर्तिस्तमगमत्तदा ॥ तमुदंतंसापतयेन्यवेदयतसादरम् ३२ भिष
जोपिददुस्तस्माऔषधानिनृपाज्ञया ॥ परीक्ष्यविषबाधांतेतस्मैरज्ञेन्यवेदयन् ३३ नगुणायभवंतिस्मनानामंत्रौषधानिच ॥ प्रभातुधिक्कृताभर्त्रानिर
स्तादूरतोगृहात् ३४ कीर्तिस्तंबालकंगृह्यसखीभिःकाननंययौ ॥ नगराद्योजनंयातितावद्बालोमरसः ३५ अंकेकृत्वातुतंबालंरुरोदशोकविह्वला ॥ मूर्छि
तापतितामूर्मौलतेववायुनेरिता ३६ च्युतालंकरणाध्वस्तकंकणामस्तकांचला ॥ क्षणेनकिंचिदाश्वस्तासस्मारद्विरदाननम् ३७ उत्पत्तेःस्मरतीबालचेष्टितंनि
घ्नतीस्वहृत् ॥ दैवात्तेनैवमार्गेणप्रययौमुनिसत्तमः ३८ नाम्नागृत्समदःसाधुःसाक्षात्सूर्यइवापरः ॥ गणेशभक्तप्रवरस्तपसांपरमोनिधिः ३९ सतस्थौकरुणावि

ष्टःसाकीर्तिःप्रणनामतं ॥ उवाचश्वसतीसातंगणनाथप्रसादजः ४० जयंबालोममृतोजीवयैनंतपोबलात् ॥ क्षिप्रप्रसादनइतिनामदेवाज्ञयाकृतम् ४१ सप
रंन्यादुष्टभावेनविषमस्मैसमर्पितम् ॥ ततोनेनसमप्रापिमुनेमरणमीदृशम् ४२ नसतांदर्शनंव्यर्थमितियाचेतपोधन ॥ शरणागतसंयागंनेहंतेसाधवोजनाः
४३ इतितस्यावचःश्रुत्वामुहूर्तंध्यानतत्परः ॥ अभवन्मुनिशार्दूलस्ततोगृत्समदोब्रवीत् ४४ शृणुदेविप्रवक्ष्येहमुपायंपुत्रजीवने ॥ अज्ञानतःशमीपत्रैस्त्व
यापूजिविनायकः ४५ तत्पुण्यमस्यहस्तेत्वमर्पयस्वममाज्ञया ॥ तत्प्रसादादाशुसुतउत्थास्यतितवाधुना ४६ सातुतद्वचनस्यांतेकीर्तिर्हर्षसमन्विता ॥ ददौ
तस्मैशमीपूजासंभवंपुण्यमुत्कटम् ४७ उत्तस्थौसुकुमारोस्याअमृतेनोक्षितोयथा ॥ सातुहर्षान्मुनेःपादौववंदेशिरसापुनः ४८ उवाचतंमुनिंज्ञातंकथंशम्या
प्रपूजनम् ॥ महिमानंवदमुनेशमीपूजनसंभवम् ४९ येनसंजीवितोबालोमुक्तश्चयमकिंकरैः ॥ ज्ञात्वातंचकरिष्यामिनित्यंशम्याःप्रपूजनम् ५० येनवैबहुधाक्रू
रायमदूतादुरासदाः ॥ निरस्तागणनाथस्यदूतैर्बहुरणाजिरे ५१ जीवयित्वाशिशुंमेतेगताधामगजाननम् ॥ येनपुण्येनबालोमेविषंत्यक्त्वासुखीपुनः ५२ संजी
वन्नुत्थितःशीघ्रंसुप्तोत्थितइवापरः ॥ अतोहंपरिपृच्छामिमहिमानंशमीभवं५३ ॥ कउवाच ॥ इतितद्वचनंश्रुत्वाप्रोचेगृत्समदस्तुतां ॥ गृत्समदउवाच ॥उच्चा
रितेनाम्नियस्याःकोटिपातकनाशनं ५४ महिमानंहिकस्तस्याःसाकल्येनवदेद्भुवि ॥ संक्षेपेणतुवक्ष्यामिमहिमानंयथामति ५५ व्रतदानतपोभिश्चनानातीर्थ
निषेवणैः ॥ पंचाग्निसाधनैरप्सुनिवासैर्हैमकालिकैः ५६ नतत्फलमवाप्नोतियत्स्याच्छम्याप्रपूजने ॥ प्रातःकालेत्रिसंध्यंवाशमींनित्यंस्मरेत्तुयः ५७ वंदयेदर्चये
द्वापिभक्तिभावसमन्वितः ॥ ध्यात्वागजाननंदेवंतस्यतुष्टोविनायकः ५८ ददातिवांछितानर्थानंतेमोक्षंनसंशयः ॥ अत्राप्युदाहरंतीमामितिहासंपुरातनम् ५९
नारदस्यचसंवादंशक्रस्यचमहात्मनः ६० ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालसंजीवनंनामत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ कीर्तिरुवाच ॥ ब्रूहिब्रह्मन्नशेषेण
संवादंनारदेंद्रजम् ॥ श्रुत्वातंसंशयंत्यक्त्वातृप्तास्यामृतादिव १ ॥ कउवाच ॥ इतितस्यावचःश्रुत्वावक्तुंसमुपचक्रमे ॥ समुनिरितिहासंतंसंवादंनारदेंद्रजम्
२ ॥ मुनिरुवाच ॥ कदाचित्पर्यटन्मुष्णुनारदोदिव्यदर्शनः ॥ यदृच्छयागतःशक्रंत्रिलोकीभ्रमणेरतः ३ शक्रस्तंपरिपूज्यैवपप्रच्छौत्सवचेष्टितं ॥ यदाहना
रदोधीमांस्तच्छृणुष्वमहामुने ४ ॥ नारदउवाच ॥ देशेमालवसंज्ञातऔर्वोनामवैद्विजः ॥ वेदवेदांगवित्साक्षाद्भानुरस्तंविनायथा ५ शक्तोयोमनसास्रष्टुं
पातुंहर्तुंचराचरं ॥ धर्मपत्नीरतोनित्यंसमलोष्टाश्मकांचनः ६ मेधावीतपसाश्रेष्ठोजातवेदाइवापरः ॥ सुमेधानामतस्यासीत्पत्नीपरमधार्मिका ७ लावण्यल
हरीकांतानानालंकारशोभना ॥ रूपेणानिर्जितरतिर्धिक्कृताप्सरसोगणाः ८ पतिशुश्रूषणरतालालिताप्रमादरात् ॥ तयोःसमभवत्कन्यासापिताभ्यांसु
लालिता ९ नामास्याश्चक्रतुरुर्वीशमीकेतिनिजेच्छया ॥ यद्यत्प्रार्थयतेसातंतद्ददातिपतिर्विभुः १० सातुकन्यारूपवतीसंजातासप्तवार्षिकी ॥ तदर्थंचिंत
यामासवरार्थमौर्वोगतः ११ धौम्यपुत्रंसशुश्रावेदशास्त्रागपारगम् ॥ शौनकस्यमुनेःशिष्यंतेजोराशिंपरंमुनिं १२ गुरुवाक्यरतंदांतंगुरुशुश्रूषकंपरं ॥ मं

सीन्महातेजादशबाहुर्विनायकः १ किरीटंकुंडलेमालामंगदेकटिसूत्रकम् ॥ बिभ्रत्सर्पोपवीतंचसिंहारूढोग्निसन्निभः २ पश्यतःस्मपरामूर्तिंकोटिसूर्यसम
प्रभाम् ॥ तुष्टुवतुस्तौदेवंनत्वाबद्धांजलीउभौ ३ ॥ तावूचतुः ॥ विश्वस्यबीजंपरमस्यपातानानाविधानंदकरःस्वकानाम् ॥ निजार्चनेनादृतचेतसांत्वंविघ्नप्रहर्त्ता
गुरुकार्यकर्ता ४ परात्परस्त्वंपरमार्थभूतोवेदांतवेद्योहृदयातिगोपी ॥ सर्वश्रुतीनांचनगोचरोसिनमावइत्थंनिजदैवतंत्वाम् ५ नपद्मयोनिर्नहरोहरिश्चहरिःषडा
स्योनसहस्रमूर्द्धा ॥ मायाविनस्तेनविदुःस्वरूपंकथंनुशक्यंपरिनिश्चितंतत् ६ तवानुकंपामहतीयदास्याद्विभुंजतःकर्मशुभाशुभंस्वम् ॥ कायेनवाचामनसा
नमेत्वांजीवंश्चमुक्तोनरउच्यतेसः ७ त्वंभावतुष्टोविदधासिकामान्नानाविधाकारतयाखिलानाम् ॥ संसृत्यकूपारविमुक्तिहेतुरतोविभुंत्वांशरणंप्रपद्ये ८ ॥ ग
णेशउवाच ॥ तुष्टोहंपरयाभक्त्यातपसापरमेणच ॥ अनयापरयास्तुत्याब्राह्मणौवृणुतंवरान् ९ कुजन्मनाशकमिदंममस्तोत्रंपठेत्तुयः ॥ त्रिसंध्यंचत्रिवारं
चसर्वान्कामानवाप्नुयात् १० षण्मासाज्जायतेविद्यालक्ष्मीर्नित्यजपादपि ॥ पंचवारजपान्मर्त्यआयुरारोग्यमाप्नुयात् ११ ॥ ॥ कउवाच ॥ श्रुत्वागणे
शवाक्यंतावूचतुःपरमादृतौ ॥ और्वस्यसुतादेवशमिकानामतःशुभा १२ मंदारायसुतादत्तावेदशास्त्रार्थदर्शिने ॥ शौनकस्यचशिष्यायधौम्यपुत्रा
यधीमते १३ उभौप्रहसितौमोहाद्दृष्ट्वामार्गेभुशुंडिनम् ॥ सचमत्वानिजावज्ञांशशापपरयारुषा १४ तच्छापाद्दक्षतांयातौमंदारःशमिकापिसा ॥ तयो
श्चमातापितरौशोचंतौभृशदुःखितौ १५ आवांचक्लेशितौदैवसर्वेषांनःप्रियंकुरु ॥ एतयोःकुजतांदूरीकुरुशीघ्रंगजानन १६ ॥ गजाननउवाच ॥
असंभाविवरंदास्येकथंविप्रौकथंवृथा ॥ करिष्येभक्तवचनंतस्मात्तुष्टोब्रुवेवरम् १७ अद्यप्रभृतिमंदारमूलेस्थास्यामिनिश्चलः ॥ मृत्युलोकेस्वर्गलोके
मान्योयंचभविष्यति १८ मंदारमूलेमेमूर्तिंकृत्वायःपूजयेन्नरः ॥ शमीपत्रैश्चदूर्वाभिस्त्रितयंदुर्लभंभुवि १९ यतःशमीमधिष्ठायसर्वदाहंस्थिरो
मुनी ॥ अयमेववरोदत्तोवृक्षयोरतिदुर्लभः २० भवद्वाक्यानुरोधेननभुशुंडीवचोन्यथा ॥ दूर्वाभावेथमंदारोद्वयाभावेशमीमता २१ उभयोःसाफलंदद्यान्ना
त्रकार्याविचारणा ॥ नानायज्ञैर्नतत्पुण्यंनानातीर्थव्रतैरपि २२ दानैश्चनियमैश्चैवपुण्यंतत्प्राप्नुयान्नरः ॥ यत्स्यान्ममशमीपत्रैःपूजनेनद्विजोत्तमौ २३ नाहं
प्रीयेधनकनकचयैर्नान्नदानैर्नवस्त्रैर्नानापुष्पैर्नचमणिगणैर्नैवमुक्ताफलैश्च ॥ यद्यच्छम्यादलनिचयकृतैःपूजनैर्ब्राह्मणानांमंदाराणांकुसुमनिचयैःसर्वकालंमुनी
द्रौ २४ यःशमींप्रातरुत्थायपश्येद्वंदेच्चपूजयेत् ॥ ससंकष्टंचरोगंचनंविघ्नंचबंधनं २५ प्राप्नोतिमत्प्रसादेनदारान्पुत्रधनानिच ॥ पशून्यांश्चकामांश्चमु
क्तिमंतेमदाश्रयां २६ इदमेवफलंप्रोक्तंमंदारैरपिपूजने ॥ मंदारमूर्तिपूजाभिरहंगृहगतोभवं २७ नालक्ष्मीर्नचविघ्नानिनापमृत्युर्नचज्वरः ॥ नाग्निचोरभयं
तत्रकदाचिदपिजायते २८ वेदवेदांगविद्विप्रःक्षत्रियोविजयीभवेत् ॥ वैश्यस्तुवृद्धिमाप्नोतिशूद्रःसद्गतिमाप्नुयात् २९ ॥ ॥ कउवाच ॥ ॥ एवमुक्त्वास्थितोदे
वोमूलेमंदारकेतदा ॥ शमीमूलेपितस्थौसदेवदेवोविनायकः ३० और्वोपिसपत्नीकस्तपस्तप्तुंस्थिरोभवत् ॥ तस्यमूलेतपस्तप्त्वात्यक्त्वादेहंदिवंगतः ३१

दारनामकंशांतंसमाहूयशुभेदिने १३ तांददौगृह्यविधिनापारिबर्हंददौबहु ॥ जातेविवाहेमंदारोययौस्वस्याश्रमंप्रति १४ यौवनस्थांतुतांज्ञात्वाशमीकांपुन
राययौ ॥ मंदारोमानितःसम्यग्गौरवेणसुपूजितः १५ संभोज्यसुमुहूर्तेनदत्वावस्त्रादिकांचनम् ॥ प्रास्थापयदुभौविप्रोजामातरमथाब्रवीत् १६ इयंसुताम
मब्रह्मन्नदत्तातुभ्यंविधानतः ॥ पालयस्वबहुस्नेहादद्यप्रावन्मयायथा १७ प्रणिपत्याथश्वशुरआमेत्युक्त्वाजगामसः ॥ स्वमाश्रमपदंप्राप्याचक्रीडनिजभा
र्यया १८ कदाचिद्दृषिमुख्योसौभूशुंडीतस्यचाश्रमम् ॥ मंदारस्यसमायातोद्विरदाननभक्तिमान् १९ रुष्टोसावनलःसाक्षात्तुष्टश्चेदीश्वरोपमः ॥ तपसानिर्ग
ताशुंडाभूशुंडीतिचसोभवत् २० स्थूलोदरोबृहत्कायोनानालंकारमंडितः ॥ ददर्शतुरुभौतंतौमंदारःशमिकातदा २१ विरूपमिवतंदृष्ट्वाजहसतुर्मुदातदा ॥
सोपमानभयात्रस्तश्चुकोपारुणलोचनः २२ उवाचतंमंदमतेनजानासिमदोद्धतः ॥ अहसीद्विद्वृतैर्दंतैःपत्न्यासहयतस्तुमाम् २३ अतोयातंदृक्षयोनौसर्वप्रा
णिविवर्जितौ ॥ ॥ कउवाच ॥ ॥ शापंश्रुत्वातिकठिनंसंतप्तौतौबभूवतुः २४ प्रणम्यप्रोचतुर्विप्रमुच्छापंक्षमर्हसि ॥ ततऊचेभुशुंडीसजानन्करुणयायुतः
२५ शुंडांदृष्ट्वाकृतंहास्यंयुवाभ्यांमूढभावतः ॥ शुंडावान्देवदेवोसौसुप्रसन्नोभवेद्यदा २६ तदायुवांनिजंरूपंप्राप्स्येथेनात्रसंशयः ॥ एवमुक्त्वागतोयावन्मुनि
राश्रममंडलम् २७ तावत्तौवृक्षतांयातौत्यक्त्वादेहौतुमानुषौ ॥ मंदारतांचमंदारोब्राह्मणःप्रापतत्क्षणात् २८ शमिकाशमितांप्राप्तासर्वतःकंटकैर्वृता ॥
उभौवृक्षौप्राणिमात्रैर्वर्जितौमुनिवाक्यतः २९ अनागतौतुतौज्ञात्वाशौनकश्चेतयान्वितः ॥ मासमात्रेगतेनैवयातिकस्मान्महाबलः ३० मंदारोयामितंद्र
ष्टुंशिष्यायांतुमयासह ॥ शीघ्रमौरवमागम्यपप्रच्छशनकैरिदम् ३१ आनेतुंशमिकांप्राप्तोमंदारःक्वास्तितद्वद ॥ औरवउवाच ॥ मयाप्रेषितदैवाशुदत्वा
कन्यांतुतत्सममम् ३२ नागतश्चेत्स्वाश्रमंसनजानेक्वगतोह्यसौ ॥ चिंतयामासुरथतेऔरवःशौनकादयः ३३ किमुभौभक्षितौमार्गेवृकव्याघ्रतरक्षुभिः ॥ अ
थवानिहतौचोरैर्दृष्टावाशीविषेणवा ३४ ततस्तेत्वरिताजग्मुस्तदुदंतबुभुत्सया ॥ क्वचित्क्वचिज्जनाऊचुर्मासमात्रमितोगतौ ३५ ततोरण्येपदेदृष्टेस्त्री
पुंसोश्चारुरूपिणी ॥ अनूपेतेतयोर्ज्ञात्वास्नात्वाध्यात्वाविलोकयन् ३६ ज्ञात्वाभुशुंडिनाशप्तावुपहासरुषावशात् ॥ वृक्षतांगमितौसर्वपक्षिकीटविवर्जितौ ॥
३७ मंदारस्तांतुमंदारःशमिकाशमितामपि ॥ शोचातेतावुभौविप्रौऔरवःशौनकोपिच ३८ धौम्यपुत्रःसाधुरयमध्येतुंसमुपागतः ॥ अधीतविद्यःसकथंगमि
तोद्वुमतांबलात् ३९ पिताश्रुत्वात्यजेत्प्राणान्दृष्टःकिंवावदामितम् ॥ औरवोपिशुशोचैनांशमिकांनिजकन्यकाम् ४० ॥ कउवाच ॥ तावुभौपरिचिंत्यैवं
नमेदोभक्तदेवयोः ॥ गणेशंपरिराध्यैवंमोचयावइमावघात् ४१ जितेंद्रियावूर्ध्वदृष्टीनिराहारौदृढव्रतौ ॥ एकांगुष्ठस्थितावुर्व्यांतोषयामासतुर्मुदा ४२
ततस्तौकूपयाविष्टौतेपातेपरमंतपः ॥ षडक्षरेणमंत्रेणदेवदेवंविनायकम् ४३ एवंद्वादशवर्षाणिचेरतुस्तपउत्तमम् ॥ औरवःकन्यकार्थंचशिष्यार्थंशौ
नकोपिच ॥ ४४ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेचतुस्त्रिंशोऽध्यायः ३४ ॥ कउवाच ॥ ततस्तुष्टःपाशपाणिर्दृष्ट्वाक्लेशंतथातयोः ॥ आविरा

शमीगर्भगतोदुःखादौरवोदृढयोगतः ॥ शमीगर्भइतिख्यातोजातोसौहव्यभुक्ततः ३२ अतएवशमीकाष्ठंमथ्नंतीहाग्निहोत्रिणः ॥ शौनकोपिवचःश्रुत्वागजान
नसमीरितम् ३३ कृत्वामंदारमूलस्थमूर्तिंचारुगजाननीं ॥ मंदारैश्चशमीपत्रैर्दूर्वाभिश्चार्चयन्मुदा ३४ ददौवरान्शौनकायपरितुष्टोगजाननः ॥ ततःस्वमा
श्रमंयातःसर्वदापुपूजच्चतम् ३५ ॥ गृत्समदउवाच ॥ तदारभ्यशमीतस्यगणेशस्यप्रियाभवत् ॥ इतितेसर्वमाख्यातंपुनश्चकथयामिते ३६ ॥ इतिश्रीगणे
शपुराणेउत्तरखंडेबालचरितेशमीमंदारप्रशंसानामपंचत्रिंशोऽध्यायः ॥ ३५ ॥ गृत्समदउवाच ॥ सह्याद्रिपर्वतेदेवोन्यवसद्विरिजायुतः ॥ स्वगणैर्मुनिभिर्युक्तःपुं
ण्यक्षेत्रेमहाबले १ दिदृक्षुःप्रययौतत्रब्रह्मालोकपितामहः ॥ पत्नीद्वयसमायुक्तोदेवगंधर्वकिन्नरैः २ दृष्ट्वातुशंकरंपूज्यस्वाभिप्रायंन्यवेदयत् ॥ आकार
यामासतदापरमर्षीन्सदाशिवः ३ जमदग्निर्वसिष्ठंचमार्कंडेयंचनारदं ॥ कपिलंपुलहंकण्वंविश्वामित्रंत्रितंद्वितम् ४ तआययुःशिवाहूताअन्येसर्वेदिदृक्षवः ॥
उषःकालेमुहूर्तेतेनिष्काश्यप्रारभन्मखम् ५ त्वरावंतोथविस्मृत्यपूजांवैनायकींशुभां ॥ सावित्रींगृहकार्येषुसक्तांत्यक्त्वामुनीश्वराः ६ गायत्रीमुपवेश्यै
वपुंण्याहवाचनंचते ॥ कारयित्वाभ्युदयिकंमातृपूजनपूर्वकं ७ अस्थापयन्नाग्निकुंडेयावद्वैश्वानरंचते ॥ सावित्रीतावदायातारंभंदष्ट्वारुषान्विता ८ उवा
चक्रोधरक्ताक्षीवीक्ष्यसर्वान्सभासदः ॥ ॥ सावित्र्युवाच ॥ ॥ मामनादृत्ययागोयंसमारब्धोनसेत्स्यति ९ ॥ ॥ ऋषिरुवाच ॥ ॥ मुंचंतीमुखतोज्वालादग्धु
कामाचराचरं ॥ शशापसादेवमुनीन्जडायूयंभविष्यथ १० नियुक्त्वानधिकारांतांगायत्रींसर्वएवयत् ॥ ततोदेवाःप्रणम्योचैःप्रार्थयामासुरुत्सुकाः ११
सावित्रींसर्वजननींडलयोरैक्यतःशुभे ॥ जलरूपाभविष्यामोनदीनदस्वरूपिणः १२ तथेत्युक्तेतयादेव्यानदीरूपत्वमागताः ॥ वेण्यानाम्नामहेशो
भूत्कृष्णःकृष्णाभवन्नदी १३ तत्तन्नाम्नाबभूवुस्तेसरितःसर्वदेवताः ॥ यत्रपूर्वंविघ्नराजोनार्च्यतेज्ञानदुर्बलैः १४ तत्रविघ्नाभवंत्येवंशंकरस्ययथापुरा ॥
पुरत्रयवधेजाताविघ्नास्तस्याप्रपूजनात् १५ ब्रह्मार्चितांपरांप्रापमखविघ्नउपस्थिते ॥ मन्निमित्तंसुराःसर्वेधुनीरूपमुपागताः १६ विमानंसर्वलोकेषु
गमितःकेनकर्मणा ॥ संकल्पबाधश्चकथमद्यप्राप्तोदुरत्ययः १७ विघ्नहर्ताजगन्नाथोनस्मृतोनचवार्चितः ॥ सर्वेषांचैवदेवानांयतोमोहःसमाविशत् १८ तंप्र
सन्नंकरिष्यामिततोयज्ञोभविष्यति ॥ एवंयावच्चिंतयतेब्रह्मातावत्सुरांगनाः १९ देवान्वैतादृशान्ज्ञात्वासभीयुर्ब्रह्मणोंतिकं ॥ पुलोमजागिरिजाछायापि
कमलापिच २० अन्याअपिसमूचुस्तंसर्वास्ताःकमलासनं ॥ कथंयज्ञःसमारंभिमान्यानोमानिताकथं २१ नापूजिचकथंविघ्नहर्तापूर्वंगजाननः ॥ त्वयि
विस्मरणंचैवनवास्मारिसुरैःकथं २२ किमस्माभिरनुष्ठेयंदेवैर्वाजलरूपिभिः ॥ कंयामशरणंदेवत्वदृतेकमलोद्भव २३ इतितासांवचःश्रुत्वामाभयंकुरुतेंति
कः ॥ ताउवाचयजिष्येहंयथासर्वंभवेच्छुभं २४ किमसाध्यंहिभक्तानांसुप्रसन्नेगजानने ॥ सर्वाःकुरुध्वंतद्भक्तिंसवःसर्वप्रियंचरेत् २५ प्रसादयिष्येहमपि
जगदीशंविनायकं ॥ अनादिनिधनंदेवंसर्वकारणकारणं २६ इत्युक्तास्तागताद्रंदेशंकर्णाटकंशुभं ॥ मंदारमूलंविघ्नेशंस्थित्वाध्यातुंतदीरिताः २७ रामेण

स्थापितंपूर्ववक्रतुंडेतिनामतः ॥ यद्वरैर्विजयीरामोहत्वाराक्षसपुंगवान् २८ दशाननंचविख्यातंययौपत्न्यानिजंपदं ॥ तेपुस्तत्रतपोघोरंसर्वास्ताःसुरयोषितः २९ काचिन्नामजपंचक्रेकाचिन्मंत्रजपंतथा ॥ काचित्पद्मासनेतस्थौध्यायंतीपरमेश्वरं ३० काजिद्वीरासनगतानि राहारातथापरा ॥ संमार्जयंतीद्वाराणिचत्वराणिगृहाणिच ३१ प्रदक्षिणानमस्कारैःकुर्वतीभक्तिमुत्तमां ॥ काचिदेकांगुष्ठगतातस्थौध्यात्वाविनायकं ३२ काचिन्निमील्यनयनेस्तोत्राण्येवापठत्तदा ॥ बहुकालेव्यतिक्रांतेनतुतोषविनायकः ३३ तदाचिंतांपरांजग्मुःकिंकुर्मइतिविह्वलाः ॥ ततःसुमनसांभारान्दूर्वाभारांस्तथापराः ३४ समर्प्यपुपुजुर्देवंधूपदीपान्नकांचनैः ॥ मंदारपुष्पैरन्याश्चशमीपत्रैरथापराः ३५ नभोवाणीततःश्रुत्वाशमीपत्रंविनाविभुः ॥ नसंतुष्येदितिदासर्वाएवशमीदलैः ॥ ३६ पुपूजुःपरयाभक्त्यादेवदेवंगजाननं ॥ ततःपरमकारुण्यात्सुप्रसन्नःशमीदलैः ३७ आविरासीत्पुरस्तासांलसच्चारुचतुर्भुजः ॥ किरीटकेयूरधरोहारकुंडलमंडितः ३८ लंबकर्णोल्लसद्गंडोविषाणद्वयमंडितः ॥ सिद्धिबुद्धियुतश्चाखुवाहनःपीतवस्त्रवान् ३९ सर्वास्तादृशुर्देवंकोटिसूर्यसमप्रभं ॥ निमील्यनयनेनेमुर्दंडवत्पृथिवीतले ४० तुष्टुवुस्ताःकरपुटंकृत्वासौम्यमहाव्रतं ॥ अतिप्रसन्नवदनाःपरमानंदनिर्भराः ॥ ४१ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरकांडेबालचरितेषट्त्रिंशत्तमोध्यायः ॥ ३६ ॥ ॥ ७ ॥ ॥ कीर्तिरुवाच ॥ ॥ कथंस्तुतिःकृतातास्तांमेवदमहामुने ॥ ॥ मुनिरुवाच ॥ ॥ श्रूयतांसास्तुतिःकीर्तेशृणुष्वावहिताचतां १ ॥ ॥ ताऊचुः ॥ ॥ नमस्तेसर्वरूपायसर्वांतर्यामिणेनमः ॥ नमःसर्वकृतेतुभ्यंसर्वदात्रेकृपालवे ॥ २ ॥ नमःसर्वविनाशायनमस्तेनंतशक्तये ॥ नमःसर्वप्रबोधायसर्वपात्रेखिलादये ॥ ३ ॥ परब्रह्मस्वरूपायनिर्गुणायनमोनमः ॥ चिदानंदस्वरूपायवेदानामप्यगोचर ४ मायाश्रयायामेयायगुणातीतायतेनमः ॥ सत्यायासत्यरूपायगुणविक्षोभकारिणे ५ शरणागतपालायदैत्यदानवभेदिने ॥ नमोनानावतारायविश्वरक्षणतत्पर ६ अनेकायुधहस्तायसर्वशत्रुनिबर्हण ॥ अनेकवरदात्रेतेभक्तानांहितकारक ७ ॥ कउवाच ॥ एवंस्तुत्वापुनर्नत्वायाचंतिस्मवरानबहून् ॥ देवानांजलरूपाणांस्वरूपाणिप्रयच्छभोः ८ नास्मृतिःसर्वदातेस्यात्तथाकर्तुमिहार्हसि ॥ गणेशउवाच ॥ ददामिवांछितंवोहमनुष्ठानवशीकृतः९ स्तुत्यानयाशुसंतुष्टस्तथास्तुवचनंतुवः ॥ सावित्र्यावचनाज्जाताजलभूताःसुराःशुभाः १० तद्वाक्यमन्यथाकर्तुनहिशक्तःपितामहः ॥ निजंस्वरूपंयास्यंतिस्थित्वांशेनतथाविधान् ११ स्वाधिकारान्प्रपत्स्यंतेनान्यथाभाषितंमम ॥ शमीपत्रैःपूजयंतुयूयंदेवास्तुमामिह १२ येनार्पितंशमीपत्रंभुवनंतेनचार्पितम् ॥ सुवर्णशतभाराणांफलंप्राप्नंनसंशयः १३ ॥ कउवाच ॥ एवंब्रुवतिविघ्नेशेस्वरूपधारिणःसुराः ॥ स्थिताअंशान्नदीरूपादद्युस्तेविनायकम् १४ तेपिसंप्रार्थयामासुर्नत्वास्तुत्वागजाननम् ॥ क्षमापराधंनोदेवबुद्धिमोहव्यपाश्रयात् १५ त्यक्त्वाज्येष्ठांभवंतंचप्रारभामोयदिंचताम् ॥ दृष्टंतुतत्फलंसद्यःप्रसादात्ते

१ ततानान्याभिषेचनं ।

पुनर्नवाः १६ जाताःस्मपरमानंदंप्राप्ताःस्मकृपयातव ॥ एवमुक्त्वापुपूजुस्तेशमीपत्रैर्विनायकम् १७ सोपिताभ्यांतिनंद्याथपिदधेविघ्ननाशनः ॥ ततस्तेसुंदरां मूर्तिंकृत्वापाषाणतःशुभाम् १८ चतुर्भुजांकरिकराननांहेरंबनामतः ॥ प्रासादंपरमंकृत्वास्थापयामासुरादरात् १९ ऊचुश्चसर्वलोकानामुपकारायतेसुराः ॥ इमंयःपूजयेद्भक्त्याविघ्नाधीशंसुपत्तने २० तस्यप्रसन्नोभगवान्सर्वान्कामान्प्रदास्यति ॥ वंदनात्स्मरणाद्वापिनमनान्नात्रसंशयः २१ यातत्रासान्महामूर्तिर्मंदारतरुनिर्मिता ॥ तांगृहीत्वाययाविंद्रःस्वपुरंपरमर्द्धिमत् २२ सपत्नीकःपूजयतेभक्त्येदानीमपिप्रभुः ॥ सर्वेदेवाःस्वस्वपदेततोमंदारवृक्षजाम् २३ कृत्वामूर्तिंगणेशस्यशमीपत्रैरपूजयन् ॥ मुदंप्रापुःस्वयोषिद्भिरापुःकामाननुत्तमान् २४ ब्रह्मादशवर्षाणितपःकृत्वामहत्तरम् ॥ कृत्वाप्रसन्नंविघ्नेशंपुनर्यागमकारयत् २५ सोपिमंदारजांमूर्तिंपुपूजेपरमादरात् ॥ विघ्नराजस्यवरदांशमीपत्रैरनेकधा २६ स्वर्णपत्रैश्चदूर्वाभिर्मंदारैःकेतकैरपि ॥ श्वेतदूर्वांकुरैश्चापिसर्वकामफलप्रदाम् २७ ॥ गृत्समदउवाच ॥ एवंतेवर्णितोमातर्महिमालेशतःशुभे ॥ मंदारस्यचशम्याश्चश्रवणात्पापनाशनः २८ ततःप्रभृतिदेवस्यप्रियात्यंतंशमी शुभा ॥ अपूजिसत्वयाज्ञानात्तेनासौपुत्रउत्थितः २९ मंदारस्यापिमहिमामयासम्यङ्निरूपितः ॥ इदानीमनुजानीहिगमिष्येनिजमंदिरम् ३० ॥ कउवाच ॥ श्रुत्वाचमहिमानंसाशमीमंदारसंभवम् ॥ प्रणिपत्यमुनिंपुत्रजीवनंविससर्जह ३१ श्रुत्वेदमाख्यानवरंगणेशप्रीतिवर्द्धनम् ॥ नससंकष्टमाप्नोतिसर्वान्कामाँल्लभेन्नरः ३२ यःस्मरेत्प्रातरुत्थायशमींमंदारमेवच ॥ गणेशंचसदाभक्त्यानिष्पापःससुखीभवेत् ३३ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेबालचरितेशमीमंदारमाहात्म्यंनामसप्तत्रिंशोध्यायः ॥ ३७ ॥ ॥ ७ ॥ ॥ कीर्तिरुवाच ॥ सम्यगुक्तंत्वयाब्रह्मन्शमीमाहात्म्यमादरात् ॥ मंदारस्यापिकथितंते नमेतुष्यतेमनः १ जीवितश्चकुमारोयमुपदिष्टःषडक्षरम् ॥ नचोच्चारयितुंशक्यंबालभावान्मुनीश्वर २ सुगमंसुप्रसादंचस्वराज्यप्रापकंमुने ॥ जप्तुंशक्यंबालकेनमंत्रमस्मैदिशाधुना ३ मुनिरुवाच ॥ सम्यद्दृष्टतवमतिर्गजाननपदांबुजे ॥ अतोहमस्यदास्यामिनिजंमंत्रंसुखप्रदम् ४ सर्वस्यजगतोहेतुर्नामयश्चतुरक्षरम् ॥ शुभाशुभस्यचद्रष्टुर्दुष्टदैत्यहरस्यच ५ सर्वधर्मपरित्रातुर्दिवोदासोपकारिणः ॥ द्विजरूपधरस्यापिवाराणस्यांस्थितस्यह ६ विश्वेश्वरस्याविमुक्तप्राप्त्यैयत्नंप्रकुर्वतः ॥ सर्वांतर्यामिणश्चापिविश्वेश्वरनुतस्यह ७ जगतःपालनार्थायजनार्दननुतस्यच ॥ ध्यातस्यपूजितस्यापिब्रह्मणासृष्टिहेतवे ८ अर्चितस्यशिवेनापिसर्वसंहारहेतवे ॥ पुलोमजाधवेनापिपूजितस्यसुभक्तितः ९ दैत्यानांनिधनार्थायदेवराज्यसुखाप्तये ॥ सूर्येणवरुणेनापिशशिनाचयमेनच १० अग्निनावायुनास्वस्वगुणोत्कर्षायपूजितः ॥ बृहस्पत्युशनोभ्यांचस्वस्वोत्कर्षायपूजितः ११ शेषेणाराधितोढुंढिर्धराधरणहेतवे ॥ गंधर्वकिन्नरायक्षाःसिद्धचारणराक्षसाः ॥ ऋषयःपशवःसर्वेस्थावराजंगमाःशुभाः १२ आराधयंतिविश्वेशंस्वस्वकार्यार्थसिद्धये ॥ अपारगुणपारोयंढुंढिराजोखिलेश्वरः १३ गुणांतंनयपुर्यस्यब्रह्मविष्णुशिवादयः ॥ तस्मिंस्तुपूजितेभक्त्याशमीपत्रेणभावतः १४ पुत्रस्तेभविताराज्यभागीशत्रुनिबर्हणः ॥ कीर्तिरुवाच ॥ श्रुतोमेमहिमाब्रह्मन्ढुंढिराजाश्रयोखिलः

१५ किंकर्माकथमुत्पन्नःकस्यांशःकिंपराक्रमः ॥ केनास्यचकृतंनामकेनासौपूजितःपुरा १६ इमंमेसंशयंब्रह्मन्छेत्तुमर्हस्यशेषतः ॥ मुनिरुवाच ॥ सम्यक्पृ
ष्टंत्वयाभद्रेज्ञानाधिकतयाशुभे १७ भक्त्यानिवेदितश्चायंसंशयस्तंनुदामिते ॥ यथादुरासदोदैत्योहतोनेनदुराक्षसः १८ मायावतारोमोहाययातोदिवोदा
संनृपम् ॥ अविमुक्तंसमानीतोयथाविश्वेश्वरोहरः १९ ढुंढिराजेतिनामास्ययेनजातंनृपांगने ॥ तत्सर्वंकथयिष्यामियथास्कंदाच्छ्रुतंमया २० अगस्त्यायक
थयताशृणुष्वैकमनाःशुभे ॥ ॥ स्कंदउवाच ॥ शृणुष्वावहितोब्रह्मन्नविमुक्ताश्रयांकथाम् २१ यस्याःश्रवणमात्रेणसर्वपापैःप्रमुच्यते ॥ कश्यपायहरिःप्राह
सृजनानाविधाःप्रजाः २२ प्ररूढतपसासोथमसृजेजारजाःप्रजाः ॥ एकविंशतिसाहस्रमंडजास्वेदजास्तदा २३ उद्भिजाश्चैवतावंत्योमानुष्यंतासुदुर्लभं ॥ पुण्ये
नलभतेतच्चब्राह्मण्यंबहुपुण्यतः २४ तच्चेत्संरक्षितंसम्यग्धर्माधर्मव्यवस्थया ॥ ददातिपरमंस्थानंयद्गत्वानानिवर्तते २५ चतुराशीतिलक्षेषुनोचेत्पतितजन्मसु ॥
दुराचारानरायाम्ययातनासुपतंतिवै २६ कर्मक्षयेततोजातेबहुकालेनतेपुनः ॥ मृत्युलोकंसमायांतिकाणाःकुब्जादरिद्रिणः २७ तदेषामनुकंपार्थंब्रह्मेशानादयः
सुराः ॥ ऋषयश्चमहाभागानानातीर्थानिचक्रिरे २८ क्षेत्राणिचमहार्हाणिप्राणिपापहराणिच ॥ विलयंतःस्थितास्तत्रपापंदेवर्षयस्तदा २९ यत्रस्थितानांजंतू
नांपापस्यविलयोभवेत् ॥ जंतूनपापावपरित्रातुंस्थितादेवर्षयःसदा ३० सर्वश्रेष्ठांसर्वगुणांमुक्तिमुक्तिप्रदांशुभां ॥ विश्वेश्वरोनिर्ममेयध्यातृज्ञातृविमुक्तिदाम्
३१ सर्वतीर्थमयींरम्यांनाम्नावाराणसींपुरीम् ॥ यत्रचक्रेसरःख्यातंविष्णुनाप्रभविष्णुना ३२ तपस्यताकृतंचारुस्नानमात्रेणमुक्तिदं ॥ यद्दृष्ट्वाकंधराकंपा
च्छिवस्यकुंडलान्मणिः ३३ पतितस्तत्रसंजातानाम्नासामणिकर्णिका ॥ ततोभगीरथाहूताजाताभागीरथीनदी ३४ अत्रकीटपतंगानांमुक्तिर्मरणतोभवे
त् ॥ त्रिवारनामस्मरणात्काशीवासफलप्रदा ३५ धन्यास्तावीरुधोवल्यस्तृणवृक्षानचान्यतः ॥ गच्छंतिकमठामत्स्याभूकैलासंविहायतत् ३६ नित्यंयत्र
स्थितोशंभुर्नानारूपोयरूपवान् ॥ रविःशशीहरिर्ब्रह्मासएवागिरिजापतिः ३७ विनायकःशक्तिरूपःकारणंजगतोपिसः ॥ प्रलयेपित्रिशूलाग्रेध्रियतेयेनकारिका
३८ एकोयंपंचधाजातोलोकानुग्रहकाम्यया ॥ भक्तोयांयांध्यातिमूर्तिंसातेनध्रियतेक्षणात् ३९ अत्रयोमनुतेभेदंसोवीचीर्लभतेनरः ॥ स्तुतिमेकत्रनिंदांवापर
त्रयःसमाचरेत् ४० सयातिनरकानेकविंशतिंबहुवत्सरम् ॥ अतोभस्मासुरसुतःख्यातोनाम्नादुरासदः ४१ सशुक्रमुपसंगम्यविद्यांपंचाक्षरींगतः ॥ दिव्यव
र्षसहस्रंसएकांगुष्ठस्थितोभवत् ४२ निराहारःकाष्ठभूतःसवल्मीकोस्थिशेषवान् ॥ नेत्रमात्रावशिष्टोसौजजापपरमंमनुं ४३ आययौतंवरंदातुंतत्क्लेशपरितोषि
तः ॥ दशबाहुःपंचवक्त्रोरुंडमालाविभूषितः ४४ त्रिशूलंडमरुंबिभ्रज्जटाजूटविभूषितः ॥ गंगाधरस्त्रिनयनश्चिताभस्मांगलेपनः ४५ वृषध्वजोवृषारूढःश
शिरेखाविभूषितः ॥ अपर्णाकःकृपाविष्टोजगादैत्यपुंगवं ४६ ॥ शिवउवाच ॥ उत्तिष्ठोत्तिष्ठभद्रंतेतपसाक्लेशितोभृशं ॥ ईप्सितंतेप्रदास्यामिवरयस्वहृदि

१ मायावतामोहयतदिवोदासंनृपंपरमितिपाठः । २ पतंतिजन्मस्विति पाठः ।

स्थितम् ४७ ॥ कउवाच ॥ ॥ ततउन्मील्यनयनेबद्धा ऽलिपुटोसुरः ॥ प्रणम्यपरितुष्टाववरदंतंमहेश्वरम् ४८ त्वंजगत्कारणंदेवपरमानंदविग्रहः ॥ क्षरा
क्षरातीततनुर्गुणत्रयविकारकृत् ४९ गुणातीतोज्ञानमयोव्यक्ताव्यक्तविधानवित् ॥ मुनिध्येयतनुःसर्वभक्तानुग्रहकारकः ५० ब्रह्मांडानामनंतानांहेतुःश्रेय
स्करःसताम् ॥ अखंडानंदपूर्णस्त्वममोघफलदायकः ५१ सर्वाधारःसर्वसहःसर्वशक्त्युपबृंहितः ॥ पृथिवीवायुसलिलवह्नितेजःस्वरूपवान् ५२ अघघ
न्यंतपोनेत्रोपितरौजन्मतेयतः ॥ दृष्टंस्वरूपंसाक्षान्मेगतंपापंलयंपरम् ५३ योगित्दच्छ्रुतिवाचोयोगोचरोनकदाचन ॥ इदानींवरयेदेवतन्मेत्वंदातुमर्हसि ॥
॥ शिवउवाच ॥ ॥ निःशंकंवरयाशुत्वंसर्वदास्येतिदुर्लभम् ५४ स्तोत्रेणतपसाचैवप्रणयेनसुतोषितः ॥ मुनिरुवाच ॥ ततोवव्रेभयंदेवात्सुप्रसन्नात्सदाशि
वात् ५५ चतुराकरजेभ्योमेमामृत्युःसंभवोदिति ॥ यक्षरक्षःपिशाचेभ्योदेवदानवकिन्नरात् ५६ मुनिमानवगंधर्वसर्पेभ्योहिवनेचरात् ॥ दक्षारूपंमदीयंतुत्र
सेयूरणमूर्द्धनि ५७ सर्वेदेवामहाभागसुरराज्यंचयच्छमे ॥ संस्मृतिश्चरणेनित्यंभक्तिस्तेव्यभिचारिणी ५८ शिवउवाच ॥ एकांशक्तिंविनासर्वदेवेभ्योदायिते
भयं ॥ शक्तितेजोद्भवःकश्चिज्जित्वासंजीवयिष्यति ५९ शिरसिस्थाप्यचरणंधरिष्यतिनिरंतर ॥ निष्काशितोयदातेनचरणस्तेशिरोगतः ६० तदापुनस्त्रिशो
कींत्वंबलाज्जेष्यसितेजसा ॥ भक्तिश्चमेदृढतरास्मृतिस्तेवैभविष्यति ६१ ॥ गृत्समदउवाच ॥ एवंदत्वावरांस्तस्मैशिवोंतर्द्धानमन्वगात् ॥ दुरासदोपिस्व
गृहमाययौहर्षनिर्भरः ६२ इदंस्तोत्रंपठेद्यस्तुसर्वान्कामानवाप्नुयात् ६३ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेअष्टत्रिंशोध्यायः ॥ ३८ ॥ ॥ ७ ॥
॥ मुनिरुवाच ॥ ॥ ततस्तुवरगर्वेणशिवलब्धेनदैत्यराट् ॥ नममर्षनिजात्मानंमोहितःकेवलंतुसः १ इयेषपृथिवींजेतुंहयारूढोभवत्पुरा ॥ निबद्धकेशह
स्तस्तुविलसत्कर्णकुंडलः २ असिहस्तोधनुष्पाणिर्निषंगद्वयशोभितः ॥ रत्नमुक्तामणिमयींबिभ्रन्मालांमहाधनाम् ३ कस्तूरीतिलकोदिव्यवस्त्रच्छन्नःसुकं
चुकः॥ तांबूलविलसद्वक्त्रःप्रकृतिद्वयसंयुतः ४ याभ्यांस्वभुजवीर्येणजितावीराअनेकशः ॥ उभयोःपार्श्वयोस्तस्ययौगच्छेतांबलान्वितौ ५ चतुरंगंतुतत्सैन्यं
पृथिवीविजयोद्यतम् ॥ रजसाच्छादयद्व्योमविस्तीर्णंजलधेरिव ६ योयोवीरोभवेत्स्फीतस्तंतमेवाजयच्चसः ॥ ततआदायरत्नानिद्रव्याणिचसहस्रशः ७ आ
स्थापयत्सततस्थानेस्वीयानाप्तान्महाबलान् ॥ नानाधिकारेबलवान्वशेकृत्वाखिलान्नृपः ८ येचाशस्त्राःकरात्स्थाप्यतमेवशरणंययुः ॥ अत्यंतंभीरवोयेतु
त्यक्त्वाराज्यमपीपलन् ९ दूतैरेववशेचक्रेतानपीत्थंदुरासदः ॥ एवंभूमंडलंजित्वाशक्रंजेतुमियेषसः १० ससैन्यःसहसाप्रायान्नगरींशक्रपालिताम् ॥ ज्ञा
त्वावरस्यसामर्थ्यंतस्यदुष्टस्यदेवराट् ११ पलाय्यचगुहांयातःसामरःसकुटुंबकः ॥ तस्मिन्नवक्षणेविष्णुःस्थानात्क्षीराब्धिमाययौ १२ अंकेलक्ष्म्याशिरः
स्थाप्यशेतेस्ममधुसूदनः ॥ त्यक्त्वाकैलासशिखरंकाशींयातस्तुशूलभृत् १३तेनैवसाकमगमच्चतुरश्चतुराननः ॥ योयोयातिपदंत्यक्त्वातत्रतत्रसदैत्यराट् १४
स्थापयत्येवबलिनांनिजदूतंसुहृत्तमम् ॥ एवंनिर्जित्यविबुधान्दर्पेणैवमहाबलः १५ कैवर्तकानांविषयेन्यवसद्वस्मकेपुरे ॥ मुकुंदपुरामित्येवख्यातंलो

वेपुसर्वतः १६ यस्मिन्भस्मासुरोराजापूर्वमासीद्बलान्वितः ॥ शंकरेणवरोयस्मैदत्तआश्चर्यकारकः १७ समरिष्यतिमूर्ध्नित्वंयस्यहस्तंप्रदास्यसि ॥ एवंदत्त
वरोदैत्योदुष्टभावप्रचोदितः १८ परीक्षार्थंवरस्याथवरदातुस्तुमस्तके ॥ करंदातुंययौदुष्टःपपालगिरिजापतिः १९ सदृष्टश्चक्रहस्तेनविष्णुनाप्रभविष्णुना ॥
सुंदरंमोहिनीरूपंधृत्वायातस्तदंतिकं २० उवाचममवाक्येचेत्स्थास्यसित्वंनरोत्तम ॥ अंगनाहंतदातेस्यांहर्षादोमितिसोब्रवीत् २१ नृत्यतिस्मतदासातु
तद्वाक्यात्सननर्तह ॥ सायथादर्शयद्भावंसोपिदर्शयतेतथा २२ तयास्थापिस्वशिरसिहस्तस्तेनापितत्क्षणात् ॥ भस्मसादभवद्दैत्योदुष्टचेष्टितमंतकृत् २३
मुकुंदोपिस्थितस्तत्रतन्नाम्नापप्रथेपुरं ॥ अनुष्ठानवतांनृणांसद्यःपरमसिद्धिदं २४ सामोहिनीसर्वकामान्ददातिभक्तिनोनृणां ॥ तत्रस्थित्वात्रिभुवनंशास्तिग
र्वाद्दुरासदः २५ उवाचमंत्रिणोगर्वात्कथंत्रिभुवनंमया ॥ आक्रांतंस्वप्रतापेनजयताऽसुरवैरिणः २६ ततोमात्याःसमूचुस्तेविमुक्तंनजितंत्वया ॥ दशमंखंडमि
तितत्तुल्यंनास्तिहिकुत्रचित् २७ यत्रास्तेशंकरःसर्वसुरैरपिचसेव्यते ॥ नजितंयत्पुरंयावत्तावत्तेपौरुषंवृथा २८ इतितद्वाक्यमाकर्ण्यमुदंलेभेरणप्रियः ॥
उवाचतान्सद्यएवयामितांवैससैनिकः २९ विमानवरमास्थायक्षणाद्यातःसकाशिकाम् ॥ प्रविष्टमात्रेदैत्येंद्रेहाहाकारःपुरेभवत् ३० तत्रयेविबुधाआसन्सर्वे
चांतर्दधुस्तदा ॥ शिवस्तुनिजभक्त्वान्नचुकोपार्थकिंचन ३१ दत्तंराज्यंकियत्कालमित्युक्त्वापरिवारवान् ॥ केदारक्षेत्रमगमन्मुनयोपिपलायिताः ३२ जै
गीषव्यंविनासर्वेक्षेत्रसंन्यासिनंशुभे ॥ ततोबभंजमूर्तिंसमोहाविष्टोदुरासदः ३३ प्रासादान्महतोभंक्त्वामुमुदेज्ञानदुर्बलः ॥ कोपिचेत्स्मरतेदेवंतंताडयकुरु
तेबहिः ३४ नस्वाहानवषट्कारःस्वधाकारोनचक्वचित् ॥ नवेदाध्ययनंक्वापिनशास्त्राध्ययनंक्वचित् ३५ नपुराणंदेवपूजानव्रतंनप्रदक्षिणाः ॥ दुरासदादु
ष्टमतौतत्रराज्यंप्रशासति ३६ कर्ममार्गेविलुप्तेतुधर्मोपिलयमाययौ ॥ नष्टेधर्मेसुराःकीर्तेआसन्सर्वेबुभुक्षिताः ३७ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडे
बालचरितेदुरासदोपाख्यानेएकोनचत्वारिंशोध्यायः ॥३९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ गृत्समदउवाच ॥ ततःकेदारमगमन्सर्वेदेवर्षय
स्तदा ॥ व्यजिज्ञपुःपद्मभवंसशिवंसर्ववित्तमं १ प्रणम्यशिरसासर्वेवागींद्राग्निपुरःसराः ॥ देवर्षयऊचुः ॥ पदभ्रष्टावयंदेवाःस्वाचारान्मुनयोपिच २ दुरासद
भियादेवस्थानंकर्तुनचक्षमाः ॥ केनास्मैहिवरोदत्तोयेनासौभुवनेश्वरः ३ जातोदुष्टोवधश्चास्यकस्मादेतद्विचिंत्यताम् ॥ येनैवसौख्यंलोकानांतत्कर्तव्यंदयालु
भिः ४ ॥ कउवाच ॥ इतितद्वचनंश्रुत्वाप्रोवाचचतुराननः ॥ उपायंकथयिष्यामितद्वधायसुरर्षयः ५ यदातेनतपस्तप्तंदारुणंबहुवासरम् ॥ ददावस्मैवरा
न्देवोह्यनंतानंबिकापतिः ६ एनंयोघातयेद्देवःसनास्तिभुवनत्रये ॥ कदाचिद्देवदेवोसौगुणत्रयविभागकृत् ७ अहंशिवश्चविष्णुश्चत्रेधाजातायदाज्ञया ॥ गु
णत्रयविभागात्सगुणेशइतिपप्रथे ८ विश्वव्यापीचमायावीविश्वकर्तापहारकः ॥ गुणातीतोगुणेशश्चपरात्परतरःशिवः ९ विभ्रद्यात्सोवतारंचेत्पार्व
त्याजठरेविभुः ॥ तदैवतस्यनाशःस्यान्नान्यथासुरसत्तमाः ॥ स्तुवंतुसर्वेतस्मात्तंविश्वचिंताकरंप्रभुम् ॥ आदौकुरुततांदेवींप्रसन्नांभववल्लभाम् १० ततेजःसंभवो

बालोदुरासदवधेभवेत् ॥ एवमेववरस्तेनशंकरेणकृतोस्यह ११ ॥ मुनिरुवाच ॥ एवंवाक्यंब्रह्ममुखाच्छ्रुत्वादेवाजहर्षिरे ॥ तुष्टुवुर्भक्तांतांभवानींभक्तवत्सलाम् १२ देवर्षयऊचुः ॥ नताःस्महेत्वांजगदेकहेतुंपरात्परांविश्वविचित्रशक्तिम् ॥ अचिंत्यरूपांत्रिदशैरशेषैरशेषवंद्यांविगुणांगुणेशाम् १३ धराधरांत्वांधरणीस्वरूपामाधारभूतांस्थिरजंगमानाम् ॥ त्रैलोक्यसारांत्रिगुणादिभूतांत्रयीतनुंतांत्रिदशस्वरूपाम् १४ नताःस्महेदेविवरप्रदांत्वांविष्णोर्विमोहांपददांसुराणाम् ॥ भक्तार्तिहंत्रींसकलार्थदात्रींत्रैलोक्यकर्त्रींनिखिलार्थगोप्त्रीम् १५ एवंस्तुत्वातदादेवीजगादसुरसत्तमान् ॥ वृणुध्वंवांछितंदेवाःस्तोत्रेणानेनतोषिता १६ ददामिसकलान्कामान्भवतांयेमनोगतान् ॥ ततऊचुःसुराःसर्वेवृत्तांतंब्रह्मणेरितम् १७ ततऊचेचतान्देवीस्तुवंतुगणनायकम् ॥ शुभाशुभस्ययःकर्तासर्वसिद्धिकरोविभुः १८ अवाप्तसर्वकामार्थःसर्वस्यजगतःपिता ॥ ततस्तेतुष्टुवुर्देवंभक्त्यासर्वेविनायकम् १९ ॥ ॥ देवर्षयऊचुः ॥ ॥ नताःस्मोविघ्नकर्तारंदयालुंसर्वपालकम् ॥ सर्वस्यजगतोहेतुंसर्वव्यापिनमीश्वरम् २० अनेकशक्तिसंयुक्तंसर्वकामप्रपूरकम् ॥ दीनानुकंपिनंदेवंसर्वज्ञंकरुणानिधिम् २१ स्वेच्छोपात्ताकृतिंनानाह्यवताररतंसदा ॥ गुणातीतंगुणक्षोभंचराचरगुरुंविभुम् २२ एकदंतंद्विदंतंचत्रिनेत्रंदशहस्तकम् ॥ शुंडादंडमुखंविघ्ननाशनंपापहारकम् २३ भक्तानांवरदंनित्यंसृष्टिस्थित्यंतकारकम् ॥ अनादिमध्यनिधनंभूतादिंभूतवर्धनम् २४ त्रिलोकेशंसुराधीशंदुष्टदानवमर्दनम् ॥ लंबकर्णंबृहद्भानुंव्यालभूषाधरंशुभम् २५ एवंस्तुत्वातुतंदेवंगणेशंसर्वसिद्धिदम् ॥ शुश्रुवुस्तेनभोवाणींमाभूद्वोमानसोज्वरः २६ दुरासदंमहावीर्यंहनिष्यामिभयंकरम् ॥ इतिश्रुत्वानभोवाणींपुनःशंकरमाययुः ॥ ध्याननिष्ठंचतेदृष्ट्वाप्रणम्योचुश्चपार्वतिम् २७ ॥ ॥ देवाऊचुः ॥ ॥ नजानीमोनभोवाणींकेनेमामीरितांशुभे ॥ हरस्यध्याननिष्ठत्वात्कथंकुर्मोखिलेश्वरि २८ ॥ ॥ देव्युवाच ॥ ॥ ततोदेवानिदानींयोनिश्चयंसमरिष्यति ॥ तस्याःक्रोधेनतप्तायानिश्वसंत्याःपुनःपुनः २९ आस्यान्नासापुटान्नेत्रान्निःसृतंतेजउत्तमम् ॥ ज्वालामालाकुलंदग्धुंब्रह्मांडमिवचोद्यतम् ३० प्रत्याहतदृशःसर्वेदृदृशुर्ज्ञानचक्षुषा ॥ वैनायकींमहामूर्तिंदशहस्तांतमोनुदाम् ३१ बिभ्रतींमुकुटंरत्नकोटिसूर्यसमप्रभाम् ॥ विद्युत्प्रभामहारत्नकुंडलेरदनंशुभम् ३२ दिव्यांबरेचसिंदूरमायुधानिदशैवच ॥ कस्तूरीतिलकंभालेमालांहृदिफलान्विताम् ३३ यत्तेजोव्यानशेविश्वंप्रलयानलसन्निभम् ॥ व्यालयज्ञोपवीतंचज्ञात्वानेमुःसुरास्तदा ३४ प्रार्थयामासुरथतेआनंदघनमीश्वरम् ॥ दृष्टोसियोगगम्यस्त्वमप्रतर्क्योव्ययःस्वराट् ३५ निरामयोनिराभासोनिर्विकल्पोजरोमरः ॥ सर्वस्वरूपःसर्वेशःस्वप्रकाशोजगन्मयः ३६ अव्यक्तोजगदाधारोब्रह्मरूपोखिलार्थदृक् ॥ पुराणपुरुषोज्ञानमूर्तिर्वाचामगोचरः ३७ वयंधन्यावयंधन्यादृष्ट्वातंननृतुःसुराः ॥ ॥ मुनिरुवाच ॥ ॥ यथादेवैर्वर्णितोसौतेजोरूपीविनायकः ३८ एवमेवजगन्माताप्रशशंसगजाननम् ॥ निर्गुणंयन्निराकारमव्यक्तंसर्वगंपरम् ३९ ध्यानगम्यंचिदाभासंसच्चिदानंदविग्रहम् ॥ सर्वव्यापीजगद्धेतुरद्वयावद्विचिंतितम् ४० विनायकस्वरूपेणसाकारंदृष्टमद्वयत् ॥ अवतीर्णममगृहेहंतुंदैत्याननेकशः ४१ जगतामुपकारायपातुंविश्वंचराच

रम् ॥ पुपूजपार्वतीभक्त्याददौसिंहंस्ववाहनम् ४२ वक्रतुंडेतिनामास्यदध्रेसर्वार्थदंनृणाम् ॥ दुरासदस्यचवधंप्रार्थयामासतंतदा ४३ देवानांचपदप्राप्तिं
निःसपत्नामयाचत ४४ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेबालचरितेचत्वारिंशोध्यायः ॥ ४० ॥ ॥ ध्र ॥ ॥ कउवाच ॥ ॥ एवंप्र
शंसितोदेव्यादेवैश्चसविनायकः ॥ उवाचपार्वतींप्रीत्याप्रणिपत्यमुदायुतः १ ॥ ॥ गणेशउवाच ॥ ॥ देवानांसर्वलोकानांकर्तुंपालनमुत्तमम् ॥ दु
रासदंनिहंतुंचहर्तुंभूभारमेवच २ मातस्त्वांसेवितुंधर्मैकर्तुंकर्मचवैदिकम् ॥ अवतीर्णोस्मिसर्वज्ञेयद्ब्रवीमिकरोमितद् ३ एवंब्रुवतिविघ्नेशेसुराःसर्वेतमू
चिरे ॥ पुनःस्तुत्वाचनत्वाचजगत्कारणकारणम् ४ रजांसिविममेद्भूमेरुड्डानिमिहिकाजपि ॥ जानीयात्सगुणांस्तेयोविममेत्सागरेजलम् ५ धन्यंचक्षु
र्हिदेवानांयद्दृष्टौचरणौविभो ॥ इदानींनोगतंदुःखंप्राप्तंचस्वस्वकंपदं ६ दुरासदंहरस्वैनंभूभारंचाखिलेश्वर ॥ ॥ कउवाच ॥ ॥ इतिदेववचःश्रुत्वा
जहाससविनायकः ७ ऊचेसर्वंकरिष्यामिदशायुधधरःप्रभुः ॥ एवमुक्त्वासुरान्देवोहर्षगद्गदयागिरा ८ सिंहारुढोययौशीघ्रंपुरींवाराणसींतदा ॥ तमन्वयुर्दे
वगणागिरिजागिरिशोपिच ९ ज्ञात्वादुरासदोदैत्योविनायकमुपागतं ॥ देवसेनायुतंवीरोनिर्ययौनगराद्बहिः १० दृष्ट्वासेनांतुदैत्यस्यसामात्यांसायुधांदृढां ॥
नानाविधायुधवर्तींगर्जंतींघनवन्मुहुः ११ गुहाविदारयन्सर्वाःसजगर्जविनायकः ॥ उवाचतंमहादैत्यंभ्रांतोस्यद्यापिरेकथं १२ त्वयाबलाद्देवगणानिर्जिताश्च
महीभुजः ॥ मुनयोधिक्कृताःसर्वेतदाहंनाभवंखल १३ निर्भयेनत्वयादोषाबहवःसंचिताःपुरा ॥ तेषांफलमिदानींत्वंगणेशात्प्राप्तुमर्हसि १४ उपद्रुतास्त्वया
लोकास्त्रैलोक्यवासिनोखिलाः ॥ तदर्थमतवीर्णोहमुद्धर्तुंत्वांध्रुवोभरं १५शरणंयाहिरेत्यक्त्वामानंलज्जांसुदुस्त्यजां ॥ यासिसंग्रामशिरसिचेदिदानींमरिष्यसि
१६ शिवप्राप्तवरात्सर्वंत्रैलोक्यंपीडितंत्वया ॥ एवमुक्त्वादुष्टबुद्धिंगणेशोरणसंभ्रमः १७ परशुंतोलयामासज्वालामालासुशोभितं ॥ आच्छाद्यभास्करंक्षोभा
त्प्रलयानलसन्निभः १८ जवेनोद्दयेतस्यत्यक्त्वाशस्त्रंक्षतांतवत् ॥ परशुनाहतस्तस्यरोमापिनचचालह १९ क्रोधसंरक्तनयनउदतिष्ठद्गजसन्निव ॥ त्रैलोक्यं
तमुवाचाथदेवदेवंदुरासदः २० नदेवादेवराजोवादिक्पालावानमेपुरः ॥ यातास्त्वंतुकथंयातोबालभावाद्गजाधुना २१ नाबिभेम्यंतकान्मूढकिमर्थंमर्तुमि
च्छसि ॥ एवमुक्त्वाततःकोशान्निष्काश्यासिंमहोज्वलं २२ क्षुरधारंयदावाताद्द्वयश्चूर्णतांययुः ॥ दैत्यस्तेनाहनद्देवमंकुशेनन्यवारयत् २३ सोसिःपरशु
घातेनशतधाखंडितोपतत् ॥ भग्नासिर्मल्लयुद्धाययौदैत्योमहाबलः २४ त्यक्त्वायुधानिदेवोपिवव्रधेतादृशोबलात् ॥ ततोयुद्धंतयोरासीत्तुमुलंरोमहर्षणं
२५बाहुभ्यांकूर्पराभ्यांचमुष्टिभ्यांतौप्रजघ्नतुः ॥ पादाभ्यांजानुजंघाभ्यांपृष्ठाभ्यांचनिजघ्नतुः २६उड्डीयपेततुर्देहेपर्यायेणमहास्वनौ ॥ पार्ष्णिघातान्प्रकुर्वंतौघा
तान्कूर्परयोरपि २७ सक्थ्नोश्चजानुघातांस्तौस्कंधाघातान्परस्परं ॥ लुलुंठतुर्धरण्यांतौधूलिधूसरितौभृशं २८ परस्परंजयंतौचलपंतौसाधुसाध्विति ॥ ए
वंबहुदिनंयुद्धंदृष्ट्वादेवाविसिस्मिरे २९ चेतसाबहुलज्जंतौज्ञात्वासामर्थ्यमस्यह ॥ ततोविनायकोमुष्टिंललाटेदृढमाहनत् ३० स्फुटितंमुखमस्याशुधरण्यांप

तितस्यह ॥ द्विमुहूर्तोनिपतितोवज्राहतइवाचलः ३१ सकथंचित्प्रबुद्धोभूत्यक्त्वामूर्च्छांचिरागतां ॥ तदात्मानमशक्तंसमनुतेस्मभृशातुरः ३२ जाययौसै न्यमध्येसदिनांतेसविनायकः ३३ यइदंशृणुयाद्युद्धंयुद्धकालेउपस्थिते ॥ सजयंप्राप्नुयान्मर्त्योयथादवोविनायकः ३४ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबाल चरितेएकचत्वारिंशोध्यायः ॥ ४१ ॥ ॥ ७ ॥ ॥ गृत्समदउवाच ॥ ॥ ज्ञात्वापराक्रमंतस्यवक्रतुंडस्यदैत्यराट् ॥ जाययौधैर्यमालंब्ययो द्धुमस्त्रैर्गजाननं १ शिवंस्मृत्वाचमंत्रंचवह्निदैवतमादरात् ॥ अभिमंत्र्यशरंतेनतत्याजसविनायके ॥ अग्निज्वालाभयाद्देवादेवपृष्ठमथागमन् ॥ ततोवि नायकोमुंचत्पर्जन्यास्त्रंहिसर्ववित् २ करिशुंडामिताधाराःप्रादुरासंस्ततःक्षणात् ॥ शांतोभूत्तत्क्षणाद्वह्निस्ततोदैत्योरुषान्वितः ३ मारुतास्त्रंशीघ्रजवं वृष्टिवारणमास्रजत् ॥ चकंपेधरणीवृक्षागिरयःपतिताभुवि ४ तदस्त्रेणमहामेघाःक्षयंनीताःक्षणार्द्धतः ॥ पर्वतास्त्रंततोदेवआविश्चक्रेमनोर्बलात् ५ सर्वत्रपर्वताजाताःकुंठतामगमच्चतत् ॥ विलीनेमारुतास्त्रेतुरौद्रमस्त्रंततोस्रजत् ॥ ६ ॥ तस्मिन्विमुच्यमानेतुवक्रतुंडोप्यवासृजत् ॥ ब्रह्मास्त्रंतन्निवृत्त्यर्थमगा त्सैन्यंहिभस्मसात् ७ परस्परमयुध्येतामस्त्रेतेबहुवासरम् ॥ तयोःसंघट्टनाद्वह्निर्न्यपतद्धरणीतले ८ तेनदग्धान्जनान्ज्ञात्वाकेशाभ्यांवारितेशुभे ॥ अमा त्यानब्रवीद्दैत्योज्ञात्वोत्कृष्टंविनायकं ९ तेनाभियुध्यतांसैन्यैर्भुक्त्वायामिपुनारणम् ॥ ततोमात्याःसर्वसैन्यैर्विनायकमयोधयन् १० विनायकोगताश्चिंतामे काकित्वात्ततःक्षणात् ॥ षट्पंचाशन्मितामूर्तीश्चकारासौस्वतेजसा ११ नानालंकारसंयुक्तानानामालाविभूषिताः ॥ सर्वादिव्यांगदांगास्तेसर्वेशाशिवि भूषणाः १२ केचिच्चतुर्भुजाःकेकित्षड्भुजादशहस्तकाः ॥ सिंहारूढाबर्हिगताःकेचिन्मूषकवाहनाः १३ सर्वेचयुयुधुस्तत्रदारयंतोरिसैनिकान् ॥ के षांचित्त्रोटिताःपादाःकेषांचिन्मस्तकाअपि १४ केषांचिद्बाहवोभिन्नाजानुजंघोदराणिच ॥ हुंकारेणैवगर्जंतःकेचिच्चशरणंययुः १५ केचित्पलायनप रायणाजीवनहेतवे ॥ केचित्प्रहारंकुर्वंतोममुःसंमुरवमेवच १६ तेतुस्वर्गंगताभेजुर्भोगानप्सरसोपिच ॥ वाजिनश्चरथानागावाम्यउष्ट्रान्यनेकशः १७ ना नाशस्त्राहताःपेतुःखंडदेहागतासवः ॥ असृङ्मज्जाद्यःप्रादुरासन्केशशैवलशोभिताः १८ आच्छूरिकासिमत्स्येभनक्रैःखेटककच्छपैः ॥ रुंडाश्वैश्वसाफेनै र्मेदकर्दमसंचयैः १९ चापशस्त्रैरस्थिबकैश्चर्मपेशीसुदर्दुरैः ॥ भल्लूकाद्यैःशुशुभिरेमनास्विहृदयप्रियाः २० भुक्त्वागत्यददर्शाथसर्वंतद्रणमंडलम् ॥ सर्वास्मि न्निहतेसैन्येततोदैत्योतिदुःखितः २१ सस्मारमनसावाक्यंयदुक्तंशूलपाणिना ॥ वरदानस्यसमयेजयस्तेशक्तिसंभवात् २२ अयमेवभवेत्किंनुबालकः शक्तिसंभवः ॥ यदुत्कटंबलंदृष्टमस्मिन्त्रैलोक्यसारभृत् २३ कालोपिनैवंविजयेत्तत्रचान्यस्यकाकथा ॥ एवंमनसिकृत्वासएकाकित्वात्पपालच २४ वक्रतुं डोगतश्चितांनहंतव्योरिपुःपलन् ॥ देवेभ्योनमृतिश्चास्ययथायंशंकरोब्रवीत् २५ तस्माद्योगात्समास्थास्येवैराटंरूपमुत्तमम् ॥ ततोवैराटरूपेणमदधार करेणतम् २६ एकपादेनतस्थौसकाशींतांरक्षितुंबलात् ॥ एकंपादंतुदैत्यस्यदधारमस्तकेततः २७ उवाचदैत्यंरदैत्यवराच्छैवान्नतेमृतिः ॥ अतोस्मिन्नगरेतिष्ठ

पर्वतेवसुनिश्चलः २८ द्वारभूतःपुरस्यास्ययतःपूर्वंदृशिस्तव ॥ दुष्टानांपीडकोनित्यंनित्यंमेसान्निधिस्तव २९ दैत्योपिपरयाभक्त्यातमेववरमर्थयत् ॥ दैयउवाच ॥ एवमेवसदातिष्ठस्थाप्यपादंमयिस्थिरम् ३० ॥ मुनिरुवाच ॥ तथेतितमुवाचाथस्थितःकाश्यांविनायकः ॥ एवंदुरासदंजित्वाचकारपृथिवींशिवाम् ॥ ३१ तस्मिन्कृत्वापुष्पवृष्टिंप्रणम्यसंप्रपूज्यच ॥ स्वस्वस्थानंगतादेवा मुनयःस्वाश्रमानपि ३२ अन्येयेयेतमर्चंतिपूर्णकामाभवंतिते ॥ एवंविनायकस्यथकाश्यांषट्पंचमूर्तयः ३३ तुंडनाख्येपुरेचापिएकपादविनायकः ॥ संहृत्यचविराट्रूपंसर्वकामप्रदःस्थितः ३४ यइदंवरमाख्यानंशृणुयाद्भक्तिमान्नरः ॥ सर्वान्कामानवाप्नोतिगाणेशंपदमेतिच ३५ सर्वत्रजयमाप्नोतिपुष्टिमारोग्यमेवच ३६ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेदुरासदजयोनामद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ गृत्समदउवाच ॥ विजितेतुगणेशेनदैत्येतस्मिन्दुरासदे ॥ दिक्पालामुनयश्चैवशशीसूर्योगुरुःकविः १ प्रशशंसुर्देवदेवंदुरासदारिपुंविभुं ॥ श्रुतिस्मृतिकृतोमार्गःस्थापितोनिहितोसुरः २ स्थापनाचकृतास्माकमशक्तानांदुरासदे ॥ त्वमेवसृजसेविश्वंत्वमेवफलदायकः ३ समःसर्वेषुभूतेषुकर्माभिर्नचलिप्यसे ॥ त्वदाश्रयाचतुर्वर्णाजंतवश्चत्वदाश्रयाः ४ गवेषयंश्चनानार्थान्ततत्तत्कर्माणियोजयन् ॥ गवेषणेढुंढिरयंधातुरुक्तोमनीषिभिः ५ सआस्तेढुंढिरित्येवसंज्ञाराजोत्तरास्तुच ॥ तवयद्दर्शनंपूजाध्यानंस्मरणमेवच ६ धर्मार्थकाममोक्षाणांसाधनंपुत्रपौत्रदम् ॥ इत्युक्त्वापुपुजुस्तेमुंमंदारैश्चशमीदलैः ७ दूर्वांकुरैर्हरिद्रैश्चश्वेतैश्चकुसुमैरपि ॥ नानापक्वान्ननैवेद्यैःफलैर्बहुविधैरपि८रत्नानांनिचयैर्विप्रभोजनैस्तमतोषयन् ॥ एवंतेपूजिताःसर्वेसप्तावरणरूपिणः९स्थितावाराणसींत्रातुंषट्पंचाशद्विनायकाः ॥ एकःपंचमुखस्तत्रविश्वेशद्वारितिष्ठति १०अन्येचाभिन्ननामानोप्याप्यवाराणसींस्थिताः ॥ स्थितेविश्वेश्वरेतत्रसर्वेतत्रैवसंस्थिताः ११ आचंद्रंस्वाधिकारेषुब्रह्माद्यामुनयोखिलाः ॥ अकुर्वन्सर्वकर्माणिसर्वेलोकायथापुरा १२ इतितेसर्वमाख्यातंकीर्तेपृष्टंहियत्त्वया ॥ ढुंढिराजस्यावतारोधर्मकामसुखप्रदः १३ दिवोदासबहिर्भावंकथयिष्येधुनातव १४ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेढुंढिराजाख्यानंनामत्रिचत्वारिंशोध्यायः ॥ ४३ ॥ ॥ ॥ कीर्तिरुवाच ॥ ॥ ढुंढिराजावतारोयंख्यातस्तेशक्तिसंभवः ॥ दुरासदवधार्थायत्रिलोकीपालनायच १ एकपादःस्थितस्तुंडनगरेचैकपादतः ॥ स्थितोदैत्यंसमाक्रांत्यवाराणस्यामितिश्रुतम् २ उमाभ्यामपिपादाभ्यामुभयत्रस्थितिःकथम् ॥ एवंमेसंशयंब्रह्मन्छेत्तुमर्हसिसर्ववित् ३ ॥ मुनिरुवाच ॥ ॥ किमसाध्यंविश्वरूपेविश्वकर्तरिविश्वपे ॥ विश्वव्यापिनिविश्वेशेढुंढिराजेचशासति ४ विश्वांतर्यामिणिपरेविश्वसंहारकारिणि ॥ सप्तपातालचरणेस्वर्गव्यापिशिरोरुहे ५ सर्वतःपाणिचरणेसर्वतःश्रोत्रचक्षुषि ॥ मनसश्चश्रुतीनांचब्रह्मादीनांचयोगिनाम् ६ अगम्येतत्त्वतोवायुपृथिवीजलरूपिणि ॥ यस्यरोमांचरंध्रेषुब्रह्मांडानांहिकोटयः ७ भ्रमंतिपवनोद्धूताःपतंगाइवव्योमनि ॥ संशयोवावितर्कोवातस्मिन्मातर्नविद्यते ८ अनेकरूपिणिविभौप्रभुःकर्तुंचराचरम् ॥ यदिच्छयाभवेद्राज्ञिसुधाविषस्वरूपिणी ९ अमृतंविषरूपंचतत्रकिंकिंनसंभवेत् ॥ अवतारस्यदेवस्यविचित्रागतिरुच्यते १० कियंतोह्यवतारावैकदाकुत्रेतिनिश्चितुम् ॥ न

शक्यतेसुरैः सर्वैःसशेषैरपिसर्वदा ११ अतस्त्यक्त्वातुसंदेहंकथांशृणुमयेरिताम् ॥ यांश्रुत्वासर्वधर्मज्ञेमुच्यतेपापसंचयात् १२सूर्यवंशोद्भवोराजादिवोदासोभवत्पुरा ॥ वदान्यश्चमहामानीमान्योभूमंडलेखिले १३ वक्ताबृहस्पतिसमःसर्वज्ञःसर्वदाशिवः ॥ वेदशास्त्रपुराणानांज्ञानीविज्ञजनप्रियः १४ कामिनीमोहनतनुर्जितेंद्रियतयास्थितः ॥ उपकारपरोनित्यंपरद्रोहपराङ्मुखः १५ निस्पृहःपरवित्तेषुस्थूललक्ष्यःपराक्रमी ॥ तपसातस्यतुष्टेनब्रह्मणाराज्यमुत्तमम् १६ काश्यांवृष्टिविहीनायांदत्तंलोकोपकारिणा ॥ सर्वदेवबहिष्कारात्सोपिजग्राहबुद्धिमान् १७ स्वयमेवाभवत्सोथरविरिंद्रोहुताशनः ॥ मरुद्वंद्रश्चधर्मेणपालयामासतांपुरीम् १८ तपसातस्यसंजातावृष्टिर्लोकाइतस्ततः ॥ अविमुक्तंसमायाताःप्रशशंसुर्नृपंचतम् १९ तस्यपत्नीसुशीलासानाम्नानामपतिव्रता ॥ धर्मशीलादानपरापतिवाक्यपरायणा २० आचारंव्यवहारंवाप्रायश्चित्तमसौनृपः ॥ पंडितैःकारयामासराजदंडंनचाददे २१ शिवेनमरुतःसर्वेमंदारगिरिमन्वयुः ॥ नापमृत्युर्नशोकोवानैवदुःखंहिकस्यचित् २२ उत्पाताश्चिविधानासंस्तस्मिन्राज्यंप्रशासति ॥ हाहाकारःशमंयातोनावृष्टिर्विहितोमहान् २३ पशुपक्षिमनुष्याणांसस्यानिचबहून्यपि ॥ यदायत्तंप्राणिमात्रंजातानिवृष्टियोगतः २४ स्वाहास्वधावषट्काराःसर्वआसन्यथापुरा ॥ तेचदेवाःसुखंप्राप्तायेप्रार्थयन्नृपंपुरा २५ यंतुष्टुवुःसुराःसर्वेब्रह्मवाक्यप्रणोदिताः ॥ सोपिनानास्तुतिंचक्रेदेवानांदर्शनाद्भृशम् ॥ २६ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेचतुश्चत्वारिंशोध्यायः ४४ ॥ कीर्तिरुवाच ॥ कथंमुनेसर्वदेवाःप्रयातामंदरंगिरिं ॥ शिवेनचकथंत्यक्तंरम्यंवाराणसीपुरी १ एतन्मेशंसदेवर्षेसंशयोत्रमहान्मुने ॥ ॥ मुनिरुवाच ॥ ॥ द्वादशाब्दमनावृष्टौनष्टेस्थावरजंगमे २ स्वाहास्वधावषट्कारविहीनेचधरातले ॥ ब्रह्मवाक्यप्रणुन्नैस्तुदेवैःसंप्रार्थितोहरः ३ महादेवजगन्नाथकरुणालयशंकर ॥ अध्यास्यमंदरगिरिंमरीचिस्तुतपस्यति ४ अब्दानामयुतंदेववरंदातुंप्रयाहितम् ॥ ॥ ॥ मुनिरुवाच ॥ ॥ एवंसंप्रार्थितोदेवैर्महेशःकरुणालयः ५ सर्वैःसुरगणैःसार्द्धमग्निचंद्रार्यमादिभिः ॥ वरंदातुंससंप्रापमरीचिंतंमहामुनिं ६ अस्थिमात्रावशिष्टंचददर्शससदाशिवः ॥ तस्मिन्क्षणेनागतश्चेत्सतुप्राणान्समुत्सृजेत् ७ तदुत्कटेनतपसाप्रीतोसौगिरिजापतिः ॥ निजंस्वरूपंदत्त्वाचविमानेननिजंपदं ८ प्रापयामाससहसागणैर्वादित्रनिस्वनैः ॥ सर्वैर्देवगणैःशंभुस्तस्थौगिरिवरेशुभे ९ दिवोदासस्यनापश्यत्किंचिद्रंध्रंसदाशिवः ॥ देवान्संप्रेषयामासद्रष्टुंतद्रंध्रमादृतः १० योयोदेवोयातिकाशींतस्यरंध्रंनपश्यति ॥ स्वनाम्नापरिसंस्थाप्यर्लिंगंतत्रैवतस्थिवान् ११ दिवोदासस्यराज्येतुसर्वे वर्णाःस्वधर्मिणः ॥ आश्रमस्थाद्विजाःसर्वेयथोक्ताचारसंयुताः १२ गुरुशुश्रूषवःशिष्याःस्त्रियआसन्पतिव्रताः ॥ धर्मशीलादानपराव्रतोपवासतत्पराः ॥ १३ यतयश्चत्रिषवणाव्रतिनोहोममौनिनः ॥ स्नानंसंध्यांजपंहोमंस्वाध्यायंदेवतार्चनम् ॥ १४ ॥ आतिथ्यंवैश्वदेवंचस्वयमेवप्रकुर्वते ॥ गृहस्थाःसर्वएवाष्टौकर्माणिभक्तितोनघाः १५ अतोविवर्धतेधर्मोवृष्टिश्चानुत्तमाभवत् ॥ स्वर्गेदेवामुमुदिरेपितरश्चस्वधाभुजः १६ नवंध्यानचवापुष्पाविधवावा

मृतप्रजा ॥ नावृष्टिर्नातिवृष्टिश्चस्वचक्रंनपरंतथा १७ शुकाश्चशलभानासन्मूषकावाकदाचन ॥ एवंचसर्वसस्यानांनिष्पत्तिःसमपद्यत १८ विश्वेश्वरं माधवंचढुंढिंभैरवमेवच ॥ दंडपाणिंगुहंगंगामदृष्ट्वावानिमज्जयवा १९ मणिकर्णींभवानींवायोभुंक्तेदंड्यएवसः ॥ इतिडिंडीरवंनित्यमकरोन्नृपसत्तमः ॥ २० नपापलेशस्तत्रासीदेवंनृपवरेस्थिते ॥ विनारंध्रंनतद्राज्यंजिघृक्षतिसदाशिवः २१ वाराणसीवियोगेनपरितप्तस्ततोऽभवत् ॥ प्रेषयामासविघ्नायततो ष्टावपिभैरवान् ॥ २२ ॥ उवाचतान्कारयंतुराज्येस्याणुतुकिल्बिषम् ॥ आदास्येततएतस्मात्काशीराज्यंनसंशयः ॥ २३ ॥ जग्मुस्तेत्वरयाभद्रेआज्ञां प्राप्यसदाशिवात् ॥ दृष्ट्वावाराणसींतेतुविश्रांताःस्नानकर्मणा २४ अदृष्ट्वातस्यदुरितंकाशीवासंप्रचक्रिरे ॥ शिवश्चितापरश्वासीदनागच्छत्सुतेषुतत् ॥ ॥ २५ ॥ ततोप्रेषयदादित्यान्रंध्रंद्रष्टुंनृपस्यह ॥ तेपितत्पुण्यमालोक्यस्थिताःकाश्यांमुदान्विताः ॥ २६ ॥ नकार्यंचहरस्यापिनत्याज्येयंपुरीतिच ॥ तत श्चतुःषष्टिमिताअप्रेषयतयोगिनीः ॥ २७ ॥ अणुमात्रमदृष्ट्वैनोदिवोदासस्यताअपि ॥ स्थितावाराणसींप्राप्ययजंत्यःशिवमव्ययम् ॥ २८ ॥ ततःसंप्रेषया मासदुर्गांदुःखविनाशिनीं ॥ अदृष्ट्वातदघंसापितस्थौग्रामाद्बहिःकिल २९ ध्यानेनातोषयद्देवंसर्वकामैश्चमानवान् ॥ दिक्पालानथशंभुश्चप्रेषयामास सत्वरम् ॥ ३० ॥ गतावाराणसींतेतुनेक्षेरंस्तदघंलघु ॥ स्वस्वनाम्नाप्रतिष्ठाप्यलिंगानिन्यवसन्मुदा ॥ ३१ ॥ ऋषयःप्रेषिताःपश्चादुत्सुकेनशिवेनह ॥ गतास्तेत्वरयात्दृष्ट्वाःशिवेनापिप्रणोदिताः ॥ ३२ ॥ गत्वातीर्थविधिंकृत्वास्थित्वावाराणसीमनु ॥ आशीर्वादायगच्छंतःपश्यंतस्तस्यचेष्टितम् ॥ ३३ भक्त्यातान्पूजयामाससर्वान्सधनवस्त्रकैः ॥ नान्वगृण्हंस्तद्धनंतेनैनोपिदृदृशुर्लघु ३४ स्वस्वनाम्नापरिस्थाप्यतेपुस्तेपरमंतपः ॥ ततःसर्वेमरास्तेनप्रेषि ताःकार्यसिद्धये ३५ तेपिनोदृदृशुस्तस्यदुष्कर्मधर्मचारिणः ॥ नायातिकोपिकाश्यास्तुयोयःसंप्रेष्यतेमया ३६ ततश्चितापरोरुद्रोनिश्चयंनाध्यगच्छत ॥ म नसाचिंतयामासकदाद्रक्ष्येचतांपुरीम् ३७ दिवोदासस्यराज्येचयदापापंभविष्यति ॥ तदैवप्राप्याकाशींचनान्यथाचमयाक्वचित् ३८ विनाढुंढिंमाधवंचसर्वे देवानिरर्थकाः ॥ नायांतिचस्थितास्तत्रकाश्यांध्यानपरायणाः ३९ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेबालचरितेदिवोदासोपाख्यानेपंचचत्वारिंशो ध्यायः ॥ ४५ ॥ ॥ ध ॥ ॥ मुनिरुवाच ॥ ॥ अविमुक्तवियोगेनपरितप्तःशिवस्तदा ॥ सर्वार्थवशगंढुंढिंनत्वाप्रार्थयदातुरः १ ॥ शिवउ वाच ॥ ॥ पंचानामपिभूतानांकारणानांचकारणम् ॥ चिदानंदघनोविश्वध्येयोवेदांतगोचरः २ प्रधानंपुरुषश्चासिगुणत्रयविभागकृत् ॥ विश्वव्यापीविश्वनि धिर्विश्वरक्षणतत्परः ३ नानावतारकृच्चासिभूभारहरणोद्यतः ॥ देवानांपालनेशक्तोदैत्यानांनिधनेतथा ४ द्विजानांचैवधर्माणामार्तानांशरणैषिणाम् ॥ स्वे च्छयापत्यतांयातेत्वयिब्रह्मस्वरूपिणि ५ कमन्यंशरणंयामिकाशीविरहदुःखितः ॥ ॥ ढुंढिरुवाच ॥ ॥ अन्यानेवप्रेषयसिसर्वविद्याविशारदान् ६ सर्वद र्शीकिमर्थंत्वंमोहमेषिसदाशिव ॥ ॥ शिवउवाच ॥ ॥ इदानीमेवगच्छत्वमविमुक्तंगजानन ७ दिवोदासस्यविघ्नार्थंममकार्यार्थसिद्धये ॥ माययामोहय

जनंपुण्यंयेनास्यहीयते ८ ॥ ॥ ढुंढिरुवाच ॥ ॥ यामिशीघ्रंमहादेवनाचिंतांकर्तुमर्हसि ॥ साधयिष्येतवहितंदर्शयिष्येनिजांपुरीं ९ बहिष्कृत्यदिवोदासं
जनपापविभागिनम् ॥ मुनिरुवाच ॥ इत्युक्त्वाशिवमानम्यपार्वतींचषडाननम् १० प्रदक्षिणीकृयतथानारदंगुरुमेवच ॥ प्रस्थितोखिलविद्यानांकलानां
चनिधिर्विभुः ११ प्रापवाराणसींपुण्यांपुण्यमेवास्यदृष्टवान् ॥ ज्योतिर्विंदभवत्सद्यस्तस्यपापमलक्ष्यसः १२ रुक्मकांतिर्दिव्यदेहोमुक्तामालाविभूषितः ॥
रुक्ममुक्तामयेश्रोत्रद्वयेबिभ्रत्सुकुंडले १३ द्वात्रिंशल्लक्षणयुतोभूतभव्यभविष्यवित् ॥ कटिसूत्रंचनाभौतुमहारत्नविभूषितम् १४ पीतवस्त्रपरीधानोदिव्य
गंधानुलेपनः ॥ कामातिसुंदरतनुःकामिनीजनमोहनः १५ पतिव्रताश्चयानार्यश्चकमुस्ताआपिद्विजम् ॥ मनसाचिंतितंप्रश्नंवदतिस्माखिलंतुसः १६ जतः
पतिव्रतानार्यःप्रश्नंप्रष्टुंतमन्वयुः ॥ विहायबालकान्भर्तॄन्भ्रातॄनन्यान्सुहृज्जनान् ॥ स्वप्नान्वदतिलोकानांस्वमायादर्शितानसौ १७ सेवतांसर्वलोकानां
ददातिसुबहून्वरान् ॥ तद्वरस्यप्रभावेणदुष्टःकुष्ठोविनश्यति १८ पुत्रिण्यःसर्ववंध्याश्चजातास्तद्वरदानतः ॥ हस्तंदृष्ट्वामहाभाग्यंकर्माणिकथयत्यसौ १९
यद्यद्येनचसंभुक्तंभोक्ष्यमाणंचतत्क्षणात् २० विस्मितोनगरेलोकःसर्वआसीन्मुदान्वितः ॥ नेदृशोब्राह्मणोदर्शिसर्ववेत्तागुणाकरः २१ नभूतोनभविष्यो
वाइतिलोकावदंत्यमुम् ॥ पूजयंतिधनैरत्नैर्ज्ञात्वाप्रत्ययमस्यते २२ हस्तेधृतानिवस्तूनिकथयत्येवतत्क्षणात् ॥ दरिद्रस्याप्रयत्नस्यप्रष्टुंयातस्यवेत्त्यसौ
२३ अभिप्रायंस्वयंतस्यब्रूतेत्रिदिनमंतरा ॥ भविष्यसिधनाढ्यस्त्वंतथैवासौभवत्यपि २४ गतंनष्टंकथयतियथायत्तत्तथाभवेत् ॥ एवमाचक्षतस्तस्यढुंढे
र्विप्रस्वरूपिणः २५ द्वित्रिमासैर्गतावार्त्ताराजकर्णेजनेरिता ॥ जनाऊचुः ॥ राजपत्न्योपियाश्चान्याःपातिव्रत्यपरायणाः २६ एतावत्कालपर्यंतंनोभज
न्यदेवताः ॥ विनापतिंगतास्तास्तुविनाज्ञांतंनिरीक्षितुं २७ नोभविष्यतिपुत्रोवाकन्यावेतिविचारितुं ॥ सखीभिस्तुनिषिद्धास्ताढुंढिरत्रागमिष्यति २८
आकार्यतुततस्तास्तुरहस्येतमुपानयन् ॥ उपवेश्यासनेरम्येराजपत्न्यःप्रपूजिरे २९ प्रक्षाल्यचरणद्वंद्वंतद्दर्शनसुविह्वलाः ॥ कस्तूरीचंदनंतस्यश
रीरेपर्यमर्दयन् ३० निकटेतस्यकाचित्तुभूत्वादाद्वीटिकाःस्वयं ॥ पप्रच्छुर्बहुप्रश्नांस्तंसर्वाएवाब्रवीच्चसः ३१ प्रत्ययेतुममुत्पन्नेसर्वास्तास्तुविसिस्मिरे ॥
एवंताःप्रत्यहंतस्यदर्शनंपूजनंस्वयम् ३२ त्यक्त्वातागृह्यकार्याणिचक्रुस्सर्वास्तुतत्पराः ॥ नैतादृशोदृष्टपूर्वोभूतभव्यभविष्यवित् ३३ इत्यब्रुवन्स्तु
वंत्यस्तंसर्वज्योतिर्विदुत्तमम् ॥ उत्थितेराज्ञिताःशीघ्रंविससर्जुःक्षणांदमुं ३४ पतिभावंपरित्यज्यतमेवार्चितयन्सदा ॥ दिवोदासोपितंज्ञात्वासमाकार्यन
नामच ३५ स्वासनेतंपरिस्थाप्यपुपूजेविष्टरादिभिः ॥ गामर्घ्यंचधनंवस्त्रमर्पयामाससादरम् ३६ यद्यत्तंपरिपप्रच्छतत्सर्वंसमुदाब्रवीत् ॥ विस्मृत्य
निजदेवंसंतमेवार्चितयन्नृपः ३७ रहस्येपरिपप्रच्छप्रश्नान्नानाविधान्बहून् ॥ प्रत्ययेतुसमुत्पन्नेप्रार्थयामाससादरं ३८ ग्रामान्धान्यंधनंदास्येतिष्ठात्रनि
कटेमम ॥ चमत्कारावहुविधाद्दृष्टायस्मान्मयात्वयि ३९ ततोजगादढुंढिस्तंप्रपंचरहितोनृपं ॥ स्त्रीपुत्रकन्यागारादित्यक्त्वावाराणसीमगा ४० नग्रा

मानधनंधान्यंरोचतेमेस्पृहस्यते ॥ एकंवदामितेवाक्यंहृदितत्कर्तुमर्हसि ४१ इतःसप्तदशेराजन्दिनेकोपिपरः पुमान् ॥ आगत्यसवदेद्यत्तत्कर्तव्यमविचारतः ४२ हितंतेपरमंराजन्भविष्यतिनसंशयः ॥ एतावतामयालब्धाग्रामाधान्यंधनानिच ॥ ४३ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेबालचरितेषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ध ॥ ॥ राजोवाच ॥ अवश्यंमुनिशार्दूलकरिष्येवचनंतव ॥ करवाण्यन्यथाचेन्मेशपथोस्तिहरस्यह १ गृत्समदउवाच ॥ ॥ एवं तेनसर्वजनाःकाशिस्थाःस्ववशीकृताः ॥ त्यक्त्वासर्वाणिकर्माणितमेवपरिसेविरे २ भूतंभव्यंविप्रकृष्टंभविष्यंचविवृण्वता ॥ ततोविष्णुर्बौद्धरूपीपंचक्रोशाद्बहिःस्थितः ३ आगत्यमाययामोहंजनयन्सर्वदेहिनां ॥ श्रुतिस्मृतिविरुद्धंसोपाठीद्धर्मंवृषंद्विषन् ४ सोपिस्ववचनात्सर्वान्ववशेचक्रेमहाजनान् ॥ साकारभ्रजनंसर्वंदूषयामाससादरं ५ किमर्थंपार्थिवीमूर्तिरर्च्यतेतैजसीरपि ॥ सर्वोजनोमूढमनाःपरात्मनिहृदिस्थिते ६ वृक्षाणांजीवतांछेदःपशूनामपिहिंसनं ॥ कृष्णतेस्वस्यवित्तानिपरस्मैयःप्रयच्छति ७ नष्टेदेहेतुभूतानिलीयंतेपंचपंचसु ॥ स्वयमेवहिभोक्तव्यंपक्वान्नंसघृतंमुदा ८ देहात्मापरिपूज्योसौनानाभोगैर्यथासुखम् ॥ ततःसर्वेजनाःस्वंस्वंमार्गंमुक्त्वातथाभवन् ९ ब्राह्मणानपिसंत्यज्यबुभुजुर्भोगमुत्तमम् ॥ तत्पत्नीकमलानामपूरयंतीमनोरथान् १० स्थितावाराणसीवासिस्त्रियःसर्वाव्यमोहयत् ॥ बोधयामासयत्नेनदुष्टमार्गंदिनेदिने ११ भिद्यंतेबुद्धयस्तेषांपुरग्रामनिवासिनां ॥ स्वदेहेभर्तृदेहेन्यस्यदेहेसएवतु १२ नभिद्यतेपुमान्यद्वन्मुखनासाकरादिभिः ॥ तथात्मानैवभिद्येतदेहैरेतैश्चतुर्विधैः ॥ एवंप्रलोभिताःकांताःपुंसोन्यानपिभेजिरे १३ ब्राह्मणाअग्निहोत्रेषुयज्ञेषुशिथिलादराः ॥ व्रतेदानेचहोमेचदेवब्राह्मणपूजने १४ पशूनांयज्ञियानांचछेदनेसंशयंदधुः ॥ परस्परंगृहेचैतोबुभुजुर्भोगमुत्तमम् १५ स्वयमेवबुभुजिरेश्राद्धानिचव्रतानिच ॥ एवंचधर्मलोपोभूदेनसोवृद्धिरेवच १६ ततोबौद्धोजगामाशुदिवोदासस्यमंदिरम् ॥ पूजितःपरयाभक्त्यासतेनस्वासनेशुभे १७ ततऊचेदिवोदासंवाक्यंवाक्यविशारदः ॥ ॥ बौद्धउवाच ॥ ॥ शृणुराजन्महितंवच्मिश्रुत्वातत्कुरुसादरम् १८ इयंवाराणसीशूलभृता निर्मायितेजसा ॥ प्रलयेपित्रिशूलाग्रेध्रियतेसर्वजंतुभिः १९ पुण्यवद्भिरिहस्थेयंमृतौमोक्षमभीप्सुभिः ॥ पापात्मानोभैरवेनाक्रियंतेबहिरेवच २० रक्षणंपुण्यकर्तॄणांक्रियतेतेनतेनच ॥ तवपुण्यंस्थितंयावत्तावदत्रस्थितोभवान् २१ काश्यांराज्यंप्रकुर्वाणइदानींनतथाभवान् ॥ पापंचसंप्रवृत्तंतेराज्येनरकृन्नृप २२ ॥ ॥ नृपउवाच ॥ ॥ सम्यगुक्तंत्वयामह्यंकरिष्येवचनंतव ॥ ज्योतिर्विदाढुंढिनाचप्रोक्तंयत्सत्यमेवतद् २३ वदमेत्वंचकश्चासिमद्धितार्थमिहागतः ॥ यदिवेत्तुमयाशक्यंतत्त्वंतेपुरुषोत्तम २४ ॥ ॥ कउवाच ॥ ॥ ततःसकरुणाविष्टोदर्शयामासतंनृपम् ॥ निजंचतुर्भुजंरूपंशंखचक्रगदाधरम् २५ समष्टिव्यष्टिरूपेणाचिद्रूपंचप्रदर्शितम् ॥ ततोनृपोनमस्कृत्यपुपूजपरयामुदा २६ ननर्तपरयाभक्त्यातद्दर्शनमहोत्सवः ॥ धन्योहमितितंप्राहपितृभ्यांसहितोनव २७ पूर्वंराज्यंपरित्यज्यतपस्तप्तंमयाबहु ॥ ब्रह्मणेदंबलान्नह्यंदत्तंराज्यमनुत्तमम् २८ त्वद्दर्शनाज्जन्ममृतीगतेमेनात्रसंशयः ॥ इदमेवपरंयाचेत्वामहंशर

णंगतः २९ ॥ ॥ मुनिरुवाच ॥ ॥ इत्युक्तःपरमात्मासौप्रोक्तवान्नृपसत्तमम् ॥ विश्वेश्वरप्रसादाच्चतवापिराजसत्तम ३० भवितापरमामुक्तिस्त्यक्त्वाराज्यं सुखीभव ॥ भैरवोदंडपाणिश्चबहिःकुर्यादतोन्यथा ३१ एकमाकर्ण्यतद्वाक्यंचिंतांपरमिकांययौ ॥ ध्यात्वाविचार्यतद्धेतुंबुबोधसर्वमेवसः ३२ ज्योति र्विदंगणेशंचबौद्धंमायाविनंहरिम् ॥ प्रणम्यशिरसाभक्त्याकोसीतिनिजगादतम् ३३ सोपिबुध्वामहाविष्णुर्निजरूपंसमास्थितः ॥ चतुर्भुजंशंखचक्रग दापद्मधरंविभुम् ३४ पीतांबरसमायुक्तंसर्वलोकाश्रयंपरम् ॥ उवाचतंनृपःपूज्यधन्योहंममपूर्वजाः ३५ यन्मोक्षदंपदयुगंदृष्टंपुण्यप्रभावतः ॥ देहि मेपरमांमुक्तिमुद्रामेतांगृहाणच ३६ बलाद्दत्तंब्रह्मणामेशास्तुराज्यंशिवोनिजम् ॥ ततोजगादतंविष्णुःशिवोमुक्तिंप्रदास्यति ३७ ॥ कउवाच ॥ एवमुक्त्वा दिवोदासंमहायोगेश्वरोहरिः ॥ अंतर्हितःपुनर्यायाद्बौद्धरूपीनिजाश्रमम् ३८ प्रेषयामासदूतंसशिवागमनहेतवे ॥ दिवोदासस्यराज्येमेधर्मवृद्धिःकृताबहुः ॥ ३९ ज्योतिर्विदागणेशेनत्यक्तंराज्यंनृपेणते ॥ शीघ्रमायाहिविश्वेशनिजांवाराणसींपुरीम् ४० ततोराजाराजचिह्नंत्यक्त्वातेपेपरंतपः ॥ प्रासादेपर मेस्थाप्यशिवलिंगंसुविश्रुतम् ४१ स्वनाम्नामोक्षदंपुंसांसकामानांतुकामदम् ॥ प्रतीक्षन्दर्शनंतस्यशंकरस्यार्थदायिनः ४२ ॥ ॥ इतिश्रीगणेशपुराणे उत्तरखंडेसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ मुनिरुवाच ॥ ॥ त्यक्तंराज्यमितिज्ञात्वानिजंरूपंसमाश्रितः ॥ अवसत्सर्वलोकानांढुंढिस्तत्रार्थदायकः १ दूतं चप्रेषयामासशीघ्रमागम्यतामिति ॥ शंकरायमहाबुद्धिस्ततःसहर्षनिर्भरः २ आरुह्यवृषभंदेवोययौवाराणसींपुरीम् ॥ दिव्यवाद्यनिर्घोषैःस्वगणैःपरि वारितः ३ जैगीषव्यंनिराहारंवल्मीकमिवसंस्थितम् ॥ अनुगृह्ययययौढुंढिंप्रणम्यचउवाचतम् ४ ॥ ॥ शिवउवाच ॥ ॥ त्वमेवविश्वेश्वरविश्वरूपविश्वं सृजस्यत्सिहिपासिदेव ॥ शुभाशुभंकर्मनिरीक्ष्यतस्यददासिभोगंविविधंगणेश ५ ब्रह्मापिसृष्टिंकुरुतेंगितात्तेतद्रक्षणंचैवहरिस्तथाहम् ॥ संहारकारीह चराचरस्यविभागकृत्यंहिगुणत्रयस्य ६ तवप्रसादाद्धरिरजजोपिशिवश्चशक्तोनिजकर्मसिद्धये ॥ त्वयाविनावेदविधिर्वृथास्यात्त्वदीयशक्त्यासुरशत्रुना शः ७ अनंतशक्तिःप्रकृतिःपुरात्वांसमर्च्यदुष्टंमहिषंजघान ॥ यच्छ्वासनिर्धूतनगप्रपातभीतंजगत्कृत्स्नमिदंररक्ष ८ त्वमप्रमेयोखिललोकसाक्षीत्वम व्ययःकारणकारणंच ॥ वेदाविकुंठास्त्वयिसर्वएवशेषोधराभृत्तवभक्तितोहि ९ त्वामेवनत्वापरिपूजयंतःसंतोयजंतेमनसास्मरंतः ॥ त्वय्येवभक्तिंपरि कल्पयंतोमुक्तिंभजंतेपरिवृत्तिहीनाः १० अनेकरूपांघ्रिविलोचनत्वमनेकशीर्षश्रुतिबाहुजिह्वः ॥ अनंतविज्ञानघनोह्यनेकब्रह्मांडहेतुःपरमप्रकाशः ११ तवप्रसादादविमुक्तमेतद्दृष्टंचिराद्यत्नवताखिलेश ॥ ॥ मुनिरुवाच ॥ ॥ एवंस्तुत्वापुनःपूज्यप्रार्थयामासशंकरः १२ गतंविरहदुःखंमेप्राप्यवारा णसींपुरीं ॥ इदानींसर्वदारक्षमद्भक्तांश्चपुरीमिमाम् १३ विनाप्रसादंतेनस्यात्काशीवासःकदाचन ॥ दंडपाणेर्भैरवस्यैतेपियस्यकृपाभवेत् १४ ता रकंब्रह्मतस्यांतेदिशामिचनचान्यथा ॥ माघेमासिचतुर्थ्यांयोभौमवारेविधूदये १५ अपूपैर्मोदकैरन्यैरुपचारैःप्रपूजयेत् ॥ संहृत्यतस्यसंकष्टंस्तोत्रपाठेन

योनुयाद् १६ तस्यापिसकलान्कामान्ययच्छलक्ष्मीमनेकधा ॥ यइदंप्रातरुत्थायत्रिसंध्यंवापिभक्तितः १७ पठेत्स्तोत्रंसकृद्वापिभुक्तिर्मुक्तिश्चतस्यच ॥ अन्वेषयित्वासर्वार्थान्विदधासिनृणामिह १८ अतोद्ढुंढिरितिख्यातस्त्रिलोक्यांत्वंभविष्यसि ॥ ढुंढिरित्येवतेनाममुक्तिदंपापनाशनम् १९ स्मरणात्सर्वकार्याणां सिद्धिदंचभविष्यति ॥ ॥ मुनिरुवाच ॥ ॥ एवमुक्त्वास्थापयत्सगंडकीयशिलाकृताम् २० मूर्तिंढुंढेर्महादेवःप्रासादेचारुनिर्मिते ॥ ततोविवेशभवनं सर्वेदेवाःस्वमंदिरम् २१ दिवोदासस्यमुक्तिंसददौभक्तस्यशंकरः ॥ ॥ गृत्समदउवाच ॥ ॥ एवंविमोहितस्तेनदिवोदासःस्वमायया २२ विष्णुनाबौद्धरूपेणतस्यास्यचहितंकृतम् ॥ सर्वंतेकथितंदेवसामर्थ्यंढुंढिनाकृतम् २३ एवंप्रभावोदेवोसौयद्वराद्युत्थितःसुतः ॥ ॥ कउवाच ॥ ॥ एवंगृत्समदःप्रोक्त्वा तस्यैढुंढिविचेष्टितम् २४ गृहीत्वाज्ञांययौशीघ्रंनिजमाश्रममंडलम् ॥ तदानीमेवसापुत्रमादायप्रस्थितातातः २५ ढुंढेरायतनंयातानानानारीनरैर्युतम् ॥ महोत्सवंप्रकुर्वद्भिर्दृष्ट्वाकीर्तिर्नमामतम् २६ ययौवाराणसींपुण्यांमरणान्मुक्तिदायिनीं ॥ माघमासेचतुर्थ्यांसाभौमवारेमुदान्विता २७ अनेकस्वर्णपात्रस्थैःपक्वान्नैः पायसादिभिः ॥ पूजितंभक्तनिवहैर्नृत्यगीताविशारदैः २८ नानालंकारसंयुक्तंदिव्यमाल्यांबरावृतम् ॥ नानामणिगणोपेतंनानामुक्ताविभूषितम् २९ सुवर्णरत्ननिचयैर्दक्षिणार्थंनिवेदितैः ॥ नदृश्यतेदेवसुखमितिचिंतापरामवत् ३० मयाकिंचनयास्मैकिंनिवेद्यमितिसानव ॥ सादूर्वाशमिमंदारकुसुमैर्मार्गसंचितैः ३१ पुपूजपरयाभक्त्यापुत्रोदयमयाचत ॥ शमीमंदारदूर्वाभिर्यथातुष्टोभवत्तयोः ३२ नतथाद्रव्यनिचयैर्ढुंढिराजस्तुतोषह ॥ ततोभक्तागताःसर्वेस्वस्वमंदिरमादृताः ३३ उमौतौजननीपुत्रौसन्निधौतत्रतस्थतुः ॥ तयोर्निराहारतयाभक्तिभावेनतोषितः ३४ आविरासीन्मूर्तिमध्याद्ढुंढिराजोमहोत्कटः ॥ ऊचतुर्मुनिनाप्रोक्तंयत्स्वरूपंमहेशितुः ३५ तदेतत्पुण्यनिचयैर्दृष्टंसाक्षात्सुभास्वरं ॥ सर्वालंकारसंयुक्तंमुकुटेनविराजितम् ३६ दशबाहुधरंचारुनेत्रपंकजशोभितम् ॥ अनर्घ्यरत्नमुक्तानांबिभ्रद्दाममहत्तरम् ३७ पीतांबरयुतंदंतविराजितमनुत्तमम् ॥ दृष्ट्वैवंपरमंरूपंमग्नावानंदसागरे ३८ विस्मृतौपूजनंकर्तुंनमस्कारंचतावुभौ ॥ उवाचभगवान्देवोवरंवरयसुव्रते ३९ सुप्रसन्नःप्रदास्यामियत्तेमनसिवर्तते ॥ मुक्ताफलैर्नरत्नैश्चद्रव्यैर्नानाविधैरहम् ४० प्रीतोयथाशमीपत्रैर्मंदारैरपिशोभने ॥ कउवाच ॥ ॥ एवमाकर्ण्यतद्वाक्यंकीर्तिस्तोषमियात्परम् ४१ देहभावंसमासाद्यजगादाद्रिदाननम् ॥ किंस्त्रियावचनंकार्यंसर्वज्ञेसर्वरूपिणि ४२ आज्ञयाथतथाप्यूचेसान्निध्यालब्धबोधया ॥ ॥ कीर्तिरुवाच ॥ निष्कलोनिरहंकारोनिर्गुणोसिजगत्प्रभुः ४३ पूर्णानंदःपरानंदःपुराणश्चपरात्परः ॥ दिक्पालरूपीसोमार्कसरित्सागररूपवान् ४४ त्वमेवपृथिवीवायुराकाशस्तेजएवच ॥ जलंतथांतरिक्षंचगंधर्वोरगराक्षसाः ४५ चराचरस्वरूपस्त्वंदीननाथकृपानिधिः ॥ विनायकादिरूपेणव्याप्तोसिसांप्रतम् ४६ अद्यमेनयनेधन्येजन्मभर्तासुतोप्ययम् ॥ पितरौचकुलंशीलंरूपंज्ञानंतपोपिच ४७ जन्मांतरीयपुण्येनदृष्टःक्षिप्रप्रसादनः ॥ तवैवचाज्ञयादेवस्थापितास्यतवाग्रिया ४८ सपत्न्यास्यविषंदत्तंमृतउत्थापितःपुनः ॥ गृत्समदेनमुनिनातवभक्त्यैवविश्व

राट् ॥ ४९ ॥ शमीपत्रैश्चपूजातेकथितातवलब्धये ॥ मुनिप्रभावाद्दृष्टोसितापत्रयनिवारणः ॥ ५० ॥ प्रसन्नश्चेद्देहिनाथमीप्सितंममसुतस्यते ॥ त्रैलो
क्येपियशश्चाग्र्यंराज्येनिःसंगवृत्तितां ५१ दीर्घायुःसद्गुणग्रामंबलंकीर्तिंसुखंक्षमां ॥ विजयंसर्वसंग्रामेद्विजेदेवेरतिंपरां ५२ ॥ ॥ ढुंढिरुवाच ॥ ॥ ये
येवरास्त्वयाप्रोक्ताःस्तेतेदत्तामयानघे ॥ सहस्रयज्ञकर्तासौजीवन्वर्षसहस्रकम् ५३ शांतोदांतोहिमद्भक्तोराज्यंकर्तासुतस्तव ॥ चतुर्भिरप्युपायैःसवशेस
वंकरिष्यति ५४ ममध्यानंनामजपःसर्वदास्यभविष्यति ॥ अंतेममस्मृतिंकृत्वामत्स्वरूपंप्रपत्स्यते ५५ ॥ ॥ कउवाच ॥ एवंतस्यैवरान्दत्वापरितुष्टोवि
नायकः ॥ ददौस्वपरशुंतस्यपशुंबाहुरितिस्फुटम् ५६ चक्रेनामस्वयंदेवस्ततश्चांतर्हितोभवत् ॥ ५७ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेकीर्तेर्वरप्रदनंनाम
अष्टचत्वारिंशोध्यायः ॥ ४८ ॥ ॥ कउवाच ॥ ॥ एवंलब्धवराकीर्तिःशेषांरात्रींनिनायच ॥ उषःस्नात्वाप्रपूज्याशुमूर्तिंपुत्रयुतायया १ हर्षितादुःखि
तादेवविरहान्नगरंस्वकम् ॥ नानाध्वजपताकाभिःसैकैर्धूपैरलंकृतम् २ ढुंढिनामजपंतौतौनृपपत्नीसुतावुभौ ॥ ज्ञात्वागतौनृयानेनसेनयावाद्यनिस्वनैः ३
आनिन्येनगरंकर्णपुरंनाम्नासुविश्रुतम् ॥ मूर्ध्न्याघ्रायाशुतनयंसस्वजेपरमादरात् ४ उवाचपरमप्रीतोहर्षगद्गदयागिरा ॥ क्षिप्रप्रसादनसुतश्चांतोसिबहु
वासरम् ५ दृष्ट्वात्वांपरमाह्लादंप्राप्तोलब्ध्वासुधामिव ॥ विससर्जाखिलांल्लोकान्दत्वावस्त्राणिदक्षिणाः ६ कीर्तिश्चसनृप.पश्चात्परस्परमथोचतुः ॥ सापिस
वैनृपायास्मैवृत्तांतंसंन्यवेदयत् ७ परस्परालिंगनचुंबनानिहास्यंविनोदंपरिचक्रतुस्तौ ॥ तांबूलविच्छेदमपिप्रहर्षात्कामस्ययुद्धंनिरपत्रपौच ८ ततःकति
पयाहस्सुज्ञात्वापुत्रंगुणाकरम् ॥ विनीतंसर्वधर्मज्ञंनीतिशास्त्रविशारदम् ९ अभिषेचनीयसंभारान्कृत्वाहूयवरान्द्विजान् ॥ सुहृदःसर्वराजन्यानाभिषेकंसु
तेददौ १० शुभेमुहूर्तेसल्लग्नेसप्रेष्टग्रहसंयुते ॥ कृत्वाभ्युदयिकंश्राद्धंस्वस्तिवाचनपूर्वकम् ११ नानाद्रव्ययुतैस्तोयैरभिषेकमकारयत् ॥ नदत्सुसर्वतुर्येषु
ऋग्यजुस्साममंत्रतः १२ संतोष्यब्राह्मणान्न्यान्दक्षिणारत्नदानतः ॥ स्वयंचवनवासीयदीक्षांगृह्यचपृच्छ्यच १३ विससर्जाखिलान्राजानिजसाध
नसंस्थितः ॥ ततःपरशुबाहुःसप्रशशासमहीमिमां ॥ १४ ॥ धर्मशास्त्रीयनीत्याचत्यागेनयज्ञआर्जयत् ॥ विख्यातस्त्रिषुलोकेषुपराक्रमबलादभूत् ॥ १५ ॥
मंदारमूर्त्तिंढुंढेःसकृत्वाकंठेदधारह ॥ शमींदूर्वांविनापूजांनकरोतिकदाचन १६ नानाभोगाननेकान्स्त्रीर्बुभुजेधर्मतस्तुसः ॥ उत्पाद्यपुत्रान्दानानिद
त्वावर्षसहस्रकम् १७ चकारराज्यंपश्चात्तत्पुत्रेन्यस्यदिवंययौ ॥ कल्पाननेकान्स्वर्गेसस्थितोढुंढिस्वरूपवान् १८ ॥ ॥ मुनिरुवाच ॥ ॥ एवंराम्याःप्र
भावस्तेसंक्षेपेणनिरूपितः ॥ तत्पूजनस्यपुण्यंचमंदारस्यप्रसंगतः १९ तस्मात्त्वयापिपूज्योहंशमीमंदारतोमुने ॥ भक्त्यासमर्पितंपुष्पंपत्रमिष्टंसुधायते २०
निषिद्धपत्रपुष्पादिसमर्प्यनरकंव्रजेत् ॥ यस्ययद्दैवतंमुख्यंतदिष्टमितरेषुवा २१ समर्पयन्नभेदेनभक्तोदोषंनचाप्नुयात् ॥ एवंपंचापिसंपूज्यदेवांस्तत्परतामिया
त् २२ सात्त्विकोलीयतेदेवैराजसस्तुसरूपताम् ॥ ब्रह्मभ्यांचैवसान्निध्यंतामसस्तुसलोकताम् २३ प्राप्नुयाद्भजमानस्तुत्रेधाभक्तिर्नवैवृथा ॥ ॥ व्यासउ

वाच ॥ ॥ विनायकस्यलोकोवैकस्मिन्लोकेचतिष्ठति २४ एतंमेसंशयंब्रह्मञ्छेत्तुमर्हसिसांप्रतम् ॥ कमन्यंपरिपृच्छामिसर्वज्ञंत्वांविहायभोः २५ ॥ ॥ ब्र
ह्मोवाच ॥ ॥ मयापिनारदायोक्तोमुद्गलायचतेनच ॥ काशीराजायचाख्यातोलोकोवैनायकःशुभः २६ सकामदायिनीशक्त्यातेनैवनिर्मितःपुरा ॥ निज
लोकेतिनामास्यस्वयंचकेविनायकः २७ काशीराजोविमानस्थोदृष्ट्वांश्चर्मचक्षुषा ॥ यंप्राप्यदुःखंनद्वंद्वंप्राप्नुतेस्त्रीपुमानपि २८ ब्राह्मंकल्पंचवसतिज्योतिरूपं
समाप्यच ॥ इक्षुसागरसंभोगंलभतेत्रयःस्थितः २९ महाप्रलयवेलायांतिष्ठत्येवाविनाशियत् ॥ तत्पीठंतस्यदेवस्यनिद्रास्थानंसनातनम् ३० सेवेतेसि
द्धिबुद्धीतंसामवेदस्तुगायति ॥ कल्पवृक्षोयच्छतितत्कल्पितंमनुजेनयत् ३१ अकल्पिताःसंपदोत्रजायंतेतत्प्रभावतः ॥ मयैववर्णिताःसर्वेदेवलोकाअने
कशः ३२ गणेशनिजलोकस्यशक्तिर्नोममवर्णने ॥ संक्षेपेणततोख्यायिकिमन्यच्छ्रोतुमिच्छसि ३३ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेशमीमंदारफल
वर्णनंनामएकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ ७ ॥ ॥ मुनिरुवाच ॥ ॥ कथंचकाशिराजेनप्राप्तंतत्स्थानमुत्तमम् ॥ मुद्गलस्योपदेशेनतन्मेशंसितुमर्ह
सि १ ॥ ॥ कउवाच ॥ ॥ तीर्थयात्राप्रसंगेनमुद्गलस्तंनृपंययौ ॥ सपूजयित्वापप्रच्छसर्वज्ञंतंमुनिंनृपः २ ॥ नृपउवाच ॥ ॥ विनायकस्यलोकोकःप्राप्य
तेसकथंमया ॥ ॥ मुनिरुवाच ॥ ॥ स्वानंदभुवनेत्येवंनिजलोकेतिचद्वयम् ३ वैनायकस्यलोकस्यविख्यातंनामवर्त्तते ॥ उत्पत्स्येतेयदादैत्यौदेवांतकनरां
तकौ ४ विनायकोपितौहंतुंमानुषेवतरिष्यति ॥ सतुबालकरूपेणलीलाअद्भुतविक्रमाः ५ करिष्यतिनृलोकेस्मिन्स्वेच्छाचारीमहाबलः ॥ शुक्रस्यभाक्तियुक्त
स्यदरिद्रस्यगृहेयदा६भुक्त्वादत्त्वामोदलक्ष्मींशुक्रायेंद्रस्यदुर्लभाम्॥विवाहार्थंसमानीतोदर्शायिष्यतिपौरुषम् ७यदातेगृहमागच्छेत्तदातद्भक्तितोनृप॥काशी
राजमहाबाहोनिजलोकमवाप्स्यसि ८ ॥ कउवाच ॥ एवमुक्त्वागतेतस्मिन्काशीराजोमहामतिः ॥ गणेशभक्तिंकुर्वाणःकालाकांक्षीबभूवह ९ ततोबहुति
थेकालेऽवतीर्णोसौविनायकः ॥ कश्यपस्यगृहेयोवैलीलाविग्रहवान्विभुः १० हतानानाविधादैत्याःक्रीडानानाविधाःकृताः ॥ दारिद्र्यंहृतवान्सद्यःशुक्रस्या
दनृगृहेतदा ११ काशिराजस्यभवनंपुनरागान्महाबलः ॥ हतौमहाबलौदैत्यौदेवांतकनरांतकौ १२ स्वानंदभवनंयातःक्षीरसागरमध्यगम् ॥ काशीराजस्तुवि
रहार्त्तिचयन्सर्वदातुतम् १३ आलिंगतिनरंकंचिदयमेवविनायकः ॥ इतिमत्वासभामध्येसवैतादात्मकंजगत् १४ पश्यतिस्मदिवारात्रौसोपितन्मयतामिया
त् ॥ निराहारःकदाचित्सातिष्ठतिस्मनृपस्तदा १५ ग्रासमात्रंकदाचित्समुनक्तिचयथामति ॥ कदाचिद्धसतेक्वापिनृत्यतिस्मनृपस्तदा १६ निद्रातिबहुकालं
तंपश्यन्स्वप्नेविनायकम् ॥ एवंनृपेस्थितेमाय्याश्चिंतामापुःसुदारुणां १७ यदिलोकाविजानीयुःपरचक्रंपतेत्तदा ॥ एवंचिंतयतांतेषाममात्यानांनृपालये १८
तदैवमुद्गलोध्यानंविसृज्यनृपतिंययौ ॥ तद्दर्शनप्राप्तबोधःप्रणामनृपोमुनिं १९ उपवेश्यासनेपश्चात्संपूज्यचयथाविधि ॥ बद्धांजलिरुवाचाथधन्योवंशोजनु
र्मम२०पितरौमंदिरंनेत्रेधन्येत्वद्दर्शनान्मुने ॥ यत्प्रसादात्परंस्थानंसंसारतारणंनृणां२१अवमानान्महद्दुःखंतंत्वापुण्येनदृष्टवान्॥ तमुवाचततोविप्रोवाचातस्य

सुतोषितः २२ ॥ ॥ मुनिरुवाच ॥ ॥ त्वादृशस्तुविनीतात्मानैवदृष्टोनचश्रुतः ॥ प्रजनात्परितुष्टोहंवांछितंतेददाम्यहं २३ ॥ ॥ कउवाच ॥ ॥ तद्वाक्यपरितुष्टोसौकाशीराजोजगादतम् ॥ अनेनैवचदेहेनस्वानंदभुवनंमुने २४ इच्छेयंचचिरंतत्रस्थातुंनैवचसंपदः ॥ ततऊचेमुद्गलोसौपरितुष्टस्तयागिरा २५ अनेनजडदेहेनस्वानंदभुवनंनृप ॥ प्राप्स्यसेत्वंगणेशस्यपुनरावृत्तिवर्जितः २६ भुक्त्वात्रसंपदःपंचसहस्रपरिवत्सरान् ॥ ब्रह्मकल्पमयंकालंततःस्वानंदमाप्स्यसि २७ ॥ ॥ नृपउवाच ॥ ॥ कीदृक्सलोकःकिन्नामावदसत्यंमुनेमम ॥ केनपुण्येनगम्योसौश्रुतालोकामयाखिलाः २८ ॥ ॥ मुद्गल उवाच ॥ ॥ शृणुराजन्मयाश्राविमहिमाकपिलान्मुनेः ॥ सामान्यतःसर्वलोकाःप्रसिद्धायेश्रुतास्त्वया २९ गहनागतिरत्यंतमस्यलोकस्यभूपते ॥ दिव्यलोकेतिनामास्यनिजलोकेतिचापरं ३० सकामदायिनीपीठेसंतिष्ठतिविनायकः ॥ विस्तीर्णंपंचसाहस्रयोजनानिमहामते ३१ रत्नकांचनभूमौसराजतेभासयन्नदिशः ॥ स्वानंदनामादिव्योयमिक्षुसागरमध्यगः ३२ नवेदैर्नचदानैश्चव्रतैर्यज्ञैर्जपैरपि ॥ तपोभिर्विविधैश्चायंप्राप्यतेनैवकर्हिचित् ३३ विनायकस्यकृपयाप्राप्यतेनित्यभक्तितः ॥ समष्टिव्यष्टिरूपोत्रसदातिष्ठतिविघ्नराट् ३४ पादैःससप्तपातालंव्याप्यशेषशिरांसिच ॥ कूर्मंचकमठं चैवश्रोत्राभ्यांचदिशोखिलाः ३५ केशैर्व्योमापिसंरोध्यस्थितआधारपंकजे ॥ भ्रूमध्येप्याग्निचक्रेतंद्विपत्रेध्यातिपुण्यकृत् ३६ खेचरीमुद्रयायुक्तो नान्योध्यातुंनचक्षमः ॥ सहस्रपत्रंब्रह्मांडसरोजंविलसत्प्रभम् ३७ तत्रतेजःस्वरूपोस्तिहृदिद्वादशपत्रकम् ॥ दशपत्रंनाभिचक्रंलिंगेषट्पत्रकंशुभम् ३८ षोडशारंकंठदेशेतत्रसर्वत्रविघ्नराट् ॥ तेजोरूपीदीप्यमानःसत्यलोकेयथाविधिः ३९ द्वादशारंतुवैकुंठंतत्रविष्णुःसदास्थितः ॥ कंठाब्जेपंचवक्त्रोसौकैलासेसगणोयथा ४० सोमसूर्याग्निनेत्रोसौभूमंडलमहोदरः ॥ एकविंशतिस्वर्गान्सव्याप्यचौषधिरोमवान् ४१ सरितःसागरायस्यवर्मबिंदुर्विभात्यसौ ॥ ब्रह्मांडेभांतियस्यैवब्रह्मांडानितुरेणुवत् ४२ त्रयस्त्रिंशत्कोटिदेवाजीवायेचसहस्रशः ॥ औदुंबरगताभांतिमशकाइवतद्गताः ४३ रचनांतस्यलोकस्यसंक्षेपेणब्रुवेनृप ॥ तुंगंयन्मेरुशिखरंतत्कैलासशिरस्पृहं ४४ सहस्रयोजनंशून्यमगम्यंमुनिपुंगवैः ॥ तत्रएकाशक्तिरुद्वैर्भामिकानामनामतः ४५ यत्संमताद्भवंत्येवभ्रमराःशुभ्रएवच ॥ पद्मासनगताधारशक्तिस्तन्मस्तकेस्थिता ४६ चामीकरनिभायास्तन्मस्तकेकामदायिनी ॥ कोटिसूर्यनिभातस्यामूर्ध्निपीठंमहत्तरम् ४७ विकरालंजटाभारंबिभ्रतीवदनंतथा ॥ सहस्रसूर्यसंकाशाभासयंतीदिशोदश ४८ विस्तीर्णंदशसाहस्रयोजनंतावदायतम् ॥ असंख्यसूर्यसंकाशंतन्मध्येयोजनायतम् ४९ स्वानंदभवनंभातियत्रकांचनरत्नजाः ॥ असंख्याताग्रहाभांतिभास्वरागजमौक्तिकाः ५० तस्यैवकृपयाप्राप्योदुःखमोहविवर्जितः ॥ तदुत्तरेभातिपरइक्षुसागरएवतु ५१ सहस्रपत्रसंयुक्तात्तन्मध्येपद्मिनी शुभा ॥ सहस्रपत्रंकमलंतस्यांभातियथाशशी ५२ तत्कर्णिकागतस्तत्पोरत्नकांचननिर्मितः ॥ दिव्यांबरयुतःशोतेनृपतत्रविनायकः ५३ सिद्धिबुद्धी

सदातस्यपादसंवाहनंमुदा ॥ कुर्वातेपरयाभक्त्यासामवेदास्त्रिमूर्तिमान् ५४ गानंकरोतिशास्त्राणिमूर्तिमंतिस्तुवंतितम् ॥ पुराणानिचसर्वाणिवर्णयं
त्यस्यसद्गुणान् ५५ बालरूपधररत्नशुंडादंडविराजितः ॥ कोमलांगोरुणनिभोविशालाक्षोविषाणवान् ५६ मुकुटीकुंडलीराजत्कस्तूरीतिलकःस्व
राट् ॥ दिव्यमाल्यांबरधरोदिव्यगंधानुलेपनः ५७ मुक्तामणिगणोपेतंसरत्नदामसंदधत् ५८ अनंतकोटिसूर्यौजाश्चंद्रार्धकृतशेखरः ॥ स्मरणात्पा
पहासद्यःस्मृतागंगायथानृणाम् ५९ तेजोवतीज्वालिनीचशक्तीपर्यंकपार्श्वयोः ॥ सहस्रादित्यसंकाशेतिष्ठतोनृपसर्वदा ६० नशीतंनजरातत्रक्लमःस्वेदो
थतंह्यपि ॥ क्षुधातृषावादुःखंवानकदाचनजायते ६१ आनंदह्रदमग्नास्तेतत्रासन्नयेसुपुण्यतः ॥ विश्वव्यापीबालरूपीयत्रातिष्ठतिविश्ववित् ६२ ॥
मुद्गलउवाच ॥ ॥ एवंतेकथितोलोकोगणेशस्ययथामति ॥ तस्मादनन्यभक्त्यात्वंतमेयाराधयप्रभो ६३ ॥ ॥ कउवाच ॥ ॥ एवमुक्त्वा
गतःस्थानंस्वकीयंमुद्गलोमुनिः ॥ काशीराजोगणेशस्यभजनेतत्परोभवत् ६४ सहस्रंपंचवर्षाणिकृत्वाराज्यमनेनह ॥ देहेनयानमारुह्यगतःस्वानंद
धामतत् ६५ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेगणेशलोकवर्णनंनामपंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ ॐ ॥ ॥ व्यासउवाच ॥ कथमाराधितस्ते
नकाशीराजेनविघ्नराट् ॥ कथंचचर्मदेहेनगतःस्थानमनुत्तमम् १ एतन्मेशंसभगवन्शृण्वंस्तृप्यामिनक्वचित् ॥ ॥ कउवाच ॥ ॥ सम्यक्शृणुमहाबुद्धेक
थांपापप्रणाशिनीम् २ कथयामिमहाबुद्धेइतिहासंपुरातनम् ॥ यथानिर्वासनोभूपःस्वानंदभवनंगतः ३ महिमानंपरिज्ञायमुद्गलाज्ज्ञानसागरात् ॥ का
येनमनसावाचागणेशेभक्तिमानभूत् ४ गोदानानिमहामक्त्यागजदानान्यनेकशः ॥ रथाश्वगृहधान्यानिदशदानान्यजानपि ५ विनायकप्रीतयेसद
दात्येवदिनेदिने ॥ मिष्टान्नभोजनैर्विप्रांस्तोषयित्वाधनादिभिः ६ गणेशदृढभक्तिंसयाचतेस्मदिनेदिने ॥ माघशुक्लचतुर्थ्यांसभौमवारेशुभेदिने ॥
७ स्नानंचकृत्वःकालेसंध्यांनित्यविधिंतथा ॥ भूषयित्वातथात्मानंनानालंकरणांशुकैः ८ आकार्यसकलाँलोकान्ब्राह्मणान्सुहृदोपरान् ॥ पूजयामास
विविधैरत्नैरंशुकसंचयैः ९ वारंवारंपश्यतिस्मविमानागमनंनृपः ॥ सभातोगंतुकामांस्तान्निषेधतिमुहुर्मुहुः १० ततोविनायकोज्ञात्वाकालंतस्यमहा
त्मनः ॥ प्रेषयामासदूताभ्यांविमानंद्युतिमत्तरम् ११ ॥ ॥ गणेशउवाच ॥ ॥ प्रमोदामोदगत्वातुकाशीराजंधरातले ॥ मद्भक्तमत्रानयतंविमान
वरमास्थितम् १२ ॥ ॥ कउवाच ॥ ॥ तदाज्ञांप्राप्यतंनत्वादिवोलोकादुभौतदा ॥ दिव्यंविमानमादायकाशीराजंसमीयतुः १३ तत्तेजोधर्षितालो
कामेनिरेप्रलयानलम् ॥ केचिच्चमेनिरेव्यभ्रेविद्युत्पातमिवागतम् १४ तर्कयामासुरपरेपतंतंरविमंडलम् ॥ घंटानांचैवतूर्याणांगंधर्वाप्सरसांस्वनम् १५
श्रुत्वान्येजज्ञिरेयानंगणेशकृपयागतम् ॥ अंगणेकाशिराजस्यसमुत्तीर्णंश्रियालसत् १६ आगतौराजनिकटेप्रमोदामोदसंज्ञकौ ॥ गणौदिव्यांबरध
रौदिव्यभूषाविराजितौ १७ दिव्यमाल्यानुलेपाद्यैर्दिव्यदीप्त्यास्मराविव ॥ विनायकस्वरूपौतौनत्वाराजानिजासने १८ उपवेश्यप्रपूज्याशुयावत्पृच्छति

तौनृपः ॥ तावत्तावूचतुर्दूतौसर्वलोकेथशृण्वति १९ शृणुराजन्प्रवक्ष्यामिवाक्यंवैनायकंशुभम् ॥ नभक्तास्त्रिषुलोकेषुत्वत्तःप्रीतिकरोनृपः ॥ त्वाध्यायतोदिवा रात्रंत्वद्गुणान्वदतोनिशम् २० धन्योसिजन्मसाफल्यंकृतंपुण्यवतात्वया ॥ त्वद्दर्शनात्क्षिप्रतरंनष्टंपापंतमोमहत् २१ नजानीवस्तपःकिंतेकृतंजन्मांतरेषुच ॥ परब्रह्मस्वरूपोयंबालरूपीविनायकः २२ भवतांगृहमागत्यनानालीलाअदर्शयत् ॥ देवस्यदेवभक्तस्यमहिमानैवगोचरः २३ यतोविनायकोदेवस्त्वांचिंत यतिसर्वदा ॥ त्वदर्थंप्रेषितंयानंदिव्यंवैभवसंयुतम् २४ नयावोदिव्यलोकंत्वांतदाज्ञावशवर्त्तिनौ ॥ शीघ्रमानयतांकाशीराजमित्याहनौविभुः २५ शृण्वत्सु सर्वलोकेषुशुश्रावसवचस्तयोः ॥ अमृताब्धौनिमग्नोभूदानंदाश्रुस्रजन्मुहुः २६ देहावस्थांपुनर्लब्ध्वाप्रणम्यतौउवाचसः ॥ धन्यंजन्मचपितरौनिष्ठाभक्ति श्चसंपदः २७ यद्दुर्लभोमयादृष्टौचरणौवांशुभावहौ ॥ विनायकस्वरूपेणप्राप्तौनेतुंपरंस्थलम् २८ इक्षुसागरमध्यस्थंदुर्दर्शंचर्मचक्षुषां ॥ यन्निर्गुणंचिदानंदं परंब्रह्मसनातनम् २९ विश्वोत्पत्तिस्थितिलयहेतुभूतमगोचरम् ॥ यदणुभ्योप्यणुतरंस्थूलात्स्थूलतरंचयत् ३० सर्वत्रगमसक्तंचसाकारंगुणभोक्तृच ॥ नानारूपमरूपंचभूभारहरणोद्यतम् ३१ तेनमेरंकभूतस्यकृपेयंमहतीकृता ॥ इत्युक्त्वासनमस्कृत्यसर्वानालिंग्यप्रेक्ष्यच ३२ दूतावूचेत्वारुहतंप्रणिपातपु रःसरम् ॥ पश्चादहंसमारोक्ष्येविमानंमर्त्यदुर्लभम् ३३ अमात्याभ्यांनमस्कृत्यपुत्रंदत्वातयोःकरे ॥ प्रजानांपालनंकार्यंधर्मेणचबलेनच ३४ मुद्गलेनच तत्प्रोक्तमनुभूतमिदंमया ॥ इत्युक्त्वाचर्मदेहेनरुरोहयानमुत्तमम् ३५ अधिष्ठितंतुदूताभ्यांपूजिताभ्यामनेकधा ॥ आरूढस्यचतत्रास्यदेहोभूद्रविसन्निभः ३६ दिव्यैर्गंधैरलंकारैस्ताभ्यांसंपूजितोंशुकैः ॥ गतौतौवायुवेगेनदर्शयंतौचतौनृपम् ३७ भूतप्रेतपिशाचानांलोकंदुष्कृतकर्मणां ॥ यत्रतेविकृताकाराऊर्ध्व पादाअधोमुखाः ३८ पृष्ठभागमुखाःकेचिन्मस्तकाक्षास्तथापरे ॥ त्र्यदिनेत्राःपृष्ठनेत्राःसूक्ष्मकंठामहोदराः ३९ यथारश्मौजालगतेभ्रमंतिपरमाणवः ॥ तथा भ्रमंतिगगनेनेकरूपाःसुदुःखिनः ४० कोयंलोकोदूतवरौब्रूतंमइतिसोब्रवीत् ४१ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेएकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥ ॥ ॥ दूतावूचतुः ॥ प्रेतभूतपिशाचानांलोकोयंराजसत्तम ॥ निंदापैशून्यतास्तेयकृतोयांत्यत्रभूपते १ ततोग्रेपश्यतिस्मासौलोकावसुररक्षसां ॥ यत्रते विविधाकाराऊर्ध्वकेशाभयानकाः २ घोरास्याश्चललज्जिह्वामेघनादाधरोपमाः ॥ अग्निकुंडनिभांस्तान्सदृष्ट्वापप्रच्छतौपुनः ॥ ३ ॥ केषामिदंपुरंदूतौ गदतंमेनुपृच्छतः ॥ तावुचतुरयंलोकोदुष्टदानवरक्षसां ४ श्रौतस्मार्तक्रियाहीनाअत्रतिष्ठंतिपापिनः ॥ तदग्रेसददर्शाथलोकंगंधर्वसेवितम् ॥ ५ ॥ रौ प्यस्वर्णगृहायत्ररत्नकांचनभूमयः ॥ नरनार्यःकामरत्योनृत्यगानविशारदाः ॥ ६ ॥ अतिसौख्यकरंतंसदृष्ट्वापप्रच्छतौपुनः ॥ केषामिदंपुरंदूतौगदतं मेनुपृच्छतः ७ ॥ ॥ तावूचतुः ॥ ॥ गंधर्वनगरंचेदंदेवस्थानेषुगायकाः ॥ प्राप्नुवंतिमहापुण्यादिदंपुरमनुत्तमम् ८ सिद्धचारणयक्षानांगुह्यकानांपुरंम हत् ॥ नानाव्रतैस्तथादानैर्गम्यंपुण्यसमुच्चयैः ९ दूतौचतौनृपंपश्चाद्दर्शयेतांगरीयसीं ॥ इंद्रस्यनगरींरम्यांअश्वमेधशतार्जितां १० सुवर्णरत्नगोदानरथा

श्वगजदानतः ॥ गम्यांतीर्थाभिषेकाद्यैःपुण्यैर्नानाविधैरपि ११ यत्रेंद्रभवनंरम्यंदर्शयेतामुभौनृपम् ॥ नृपोनिरीक्ष्यतौप्रोचेयच्छ्रुतंदृष्टमेवतत् १२ अग्नि
लोकंततोग्रेतौदर्शयेतांनृपंशुभम् ॥ यत्राग्निहोत्रिणोवाह्नितेजसोभांत्यनेकशः १३ ततोग्रेदर्शयेतांतौयमलोकंशुभाशुभम् ॥ यत्रपुण्यकृतोयांतितथापा
पकृतोपिच १४ सधर्मःसुकृतांभातिक्रूरोदुष्कृतकर्मणाम् ॥ सुकृतःसर्वभोगांस्तुदुष्कृतोनरकानपि १५ भुंजतेप्राणिनःस्वस्वकर्मभोगाननेकशः ॥ कुं
भीपाकेचपच्यंतेछिद्यंतेचासिपत्रकैः १६ अयोघनेनताड्यंतेकृत्यंतेकंटकैरपि ॥ तामिस्रेचांधतामिस्रेकृमिकुंडेसपूयके १७ पात्यंतेनरकेघोरेदुष्कृतः
प्राणिनःसतान् ॥ निरीक्ष्यामीलयन्नेत्रेयातंयातमितिब्रुवन् १८ ततोग्रेदर्शयेतांतौकौबेरंलोकमुत्तमम् ॥ अत्याश्चर्यकरंशक्रलोकादतिवरंपरम् १९
रत्नकांचनयुक्तानिगृहाणिदीप्तिमंतिच ॥ रत्नकांचनदानेनतुलादानैश्चकोटिशः २० प्राप्नुवंतिमहाभागाःकौबेरंलोकमुत्तमम् ॥ ततोग्रेदर्शयेतां
तौवारुणंलोकमुत्तमम् २१ तीर्थान्नदानतोलभ्यंकुबेरभवनातिगम् ॥ अप्सुसर्वेशुष्कदेहावसंतिसुखभोगिनः २२ वापीकूपतडागानांदृश्यंतेजलदायि
नः ॥ ततोग्रेदर्शयेतांतौवायुलोकंसुखावहम् २३ ददतेव्यजनंग्रीष्मेसोशरिंकर्पुरंजलम् ॥ वसंतिवायुलोकेतेस्वेच्छागतिविहारिणः २४ ततोग्रेदर्शयेतां
तौसूर्यलोकंदुरासदम् ॥ पंचाग्निसाधनरताःसूर्यभक्तिपरायणाः २५ अवाप्तकामामुनयःसर्वेतेसूर्यवर्चसः ॥ निवसंतिनिराबाधाब्रह्मकल्पशतंनराः २६
नाक्षत्रंचंद्रलोकंचदर्शयेतांनृपंततः ॥ मुक्ताफलसुवर्णानांदानेनसोमयागतः २७ प्राप्नुवंतिमहात्मानोलोकमेनंसुपुण्यतः ॥ गोलोकंचततोग्रेतौदर्श
येतांनृपंतदा २८ गोसहस्राणियेदद्युर्ब्राह्मणेभ्योयथाविधि ॥ रोमसंख्यैस्तुकल्पैस्तेगोलोकेनिवसंतिहि २९ सत्यलोकंततोग्रेतौदर्शयेतांचिरंतनम् ॥ स
त्यव्रतावेदविदोवेदाध्ययनतत्पराः ३० सदाचाराःशास्त्रविदःपुराणपाठकाश्चये ॥ अन्नदानरतायज्ञकर्तारस्तीर्थसेविनः ३१ अप्रतिग्राहकाविप्राःपरो
पकृतिकारिणः ॥ तपस्विनोदानपराःसत्यलोकंव्रजंतिते ३२ गव्यूत्यष्टसहस्रेणविस्तीर्णंतावदायतम् ॥ यत्रब्रह्मामुनिगणैर्गणैराजर्षिणांपरैः ३३ देवर्षीणां
दानवानांगंधर्वाप्सरसांतथा ॥ स्तूयमानोदिवारात्रंसेव्यतेभक्तितत्परैः ३४ यत्रेंद्रभवनाभानिगृहाणिपरितोलसन् ॥ तंदृष्ट्वानृपतिर्लोकंविस्मितःप्राहतौत
दा ३५ ॥ ॥ नृपउवाच ॥ ॥ धन्योस्म्यनुगृहीतोस्मिगणेशेनकृपावता ॥ भवद्भ्यांचयतोदृष्टःस्वर्गलोकाःसुदुर्लभाः ३६ कउवाच ॥ तंपुनर्दर्शयेतांतौ
वैकुंठंविश्रुतंत्रिषु ॥ लोकेषुतत्रगच्छंतिवैष्णवाभक्तितत्पराः ३७ सर्वलोकेषुश्रेष्ठंतनोपमायस्यविद्यते ॥ शेषोनवर्णनेशक्तोनेकवक्त्रोनचात्मभूः ३८
ऊर्जस्नायीह्रषस्नायिमेषस्नायीतिलान्नदः ॥ गोदोगीताध्ययनवान्प्राणिनांचोपकृच्चयः ३९ विष्णुलोकंव्रजत्याशुसहस्रंपंचयोजनम् ॥ सूर्यचंद्रप्रकाशानिविश्व
कर्मकृतानिच ४० मंदिराणिप्रभासंतिरत्नकांचनराजतैः ॥ येषुनप्रविशत्येवतमोरत्नमरिचिभिः ४१ परिवारयुतोलक्ष्म्यायत्रातिष्ठतिदैत्यहा ॥ ज
हर्षनृपवर्योसौदृष्ट्वातत्पुण्यसंचयाद् ४२ ततोग्रेदर्शयेतांतौकैलासंगिरिशालयम् ॥ मेरोस्तुशिखरेरम्येऽयुतयोजनविस्तृते ४३ रविचंद्रप्रकशानिहर्म्या

णियत्रभांतिच ॥ यत्रपंचाक्षरजपारुद्राध्यायजपाश्चये ४४ अनेकसाधनरताःपुण्यवंतोव्रजंतिह ॥ तंदृष्ट्वाप्राहनृपतिर्विनायकप्रसादतः ४५
दृष्ट्वासर्वेदेवलोकाःपुण्यदादर्शनान्नृणाम् ॥ ततोग्रेनरविश्चंद्रःसहस्रयोजनावधि ४६ विमानप्रभयायातिनचपश्यंतिकिंचन ॥ मेघनादनिभंशब्दंशुश्रावदुः
सहंनृपः ४७ गिरिवर्यप्रकाशानांभ्रमराणांसमंततः ॥ कस्यशब्दःश्रूयतेयमितिपप्रच्छतौनृपः ४८ कदाद्रक्ष्यामिदेवस्यपादपद्ममितिस्फुटं ॥ ददर्शपुरतो
राजाशक्तिभ्रामरिकांदृढाम् ४९ अनेकादित्यसंकाशांब्रह्मांडग्राससाहसाम् ॥ प्रसारितमुखांभीमांदृष्ट्वामूर्च्छामियान्नृपः ५० आश्वास्यनिन्यतुस्तंतुदूतावग्रेनृ
पंतदा ॥ ततआधारशक्तिंसततोप्यतिभयंकराम् ५१ दृष्ट्वाचकंपेनृपतिर्भ्रामरीमस्तकेस्थिताम् ॥ करालकेशांलंबोष्ठींदीर्घजिह्वांप्रभायुताम् ५२ आश्वासि
तोव्रजन्नग्रेसोपश्यत्कामदायिनीम् ॥ आधारशक्तिंसंविष्टांयोजनायुतविस्तृताम् ५३ भ्रमंतिपर्वतायस्याःश्वासवायुविवर्तनात् ॥ वज्रातिनिष्ठुरैर्देहैर्यस्या
स्तिष्ठतिसापुरी ५४ वदतःस्मनृपंदूतौपश्यस्वानंदपत्तनम् ॥ यद्ध्यानपरितृप्तोसिकोटिसूर्यनिभंशुभम् ५५ रत्नकांचनसंभिन्नाभातियत्रगृहाःपरे ॥ मुक्ता
रजतसूर्याश्मनिर्मिताश्चसहस्रशः ५६ नीलाश्मकुट्टिमायत्रपुमांसोयत्रवाह्निमाः ॥ यत्रवापीकूपतडागाभांतिचसरांसिच ५७ स्वच्छशीतांबुनीलानिपतिरत्न
तटानिच ॥ यदंबुपानान्नजरानक्षुद्रोगोनृणांभवेत् ५८ आक्रीडाविमलानानावृक्षवल्लीविराजिताः ॥ दिव्यौषध्योदिवामूर्यकोटिभाभांतियत्रच ५९ चंद्रपृष्ठे
प्रपश्यंतिकलंकरहितेमुखम् ॥ विलासिनीजनायत्रसर्वदाधोगतेनिशि ६० यत्रपुष्पवनामोदःश्रमंहंतिविहारिणाम् ॥ इक्षुसागरतीरंतत्प्राप्योत्तेरुर्मुदायुताः
६१ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेद्विपंचाशत्तमोऽध्यायः ५२ ॥ ब्रह्मोवाच ॥ ॥ पुरिक्षुरसंपुण्यनिचयैर्लभ्यमंजसा ॥ तन्मध्येपद्मिनीश्वेतासहस्रदल
पद्मयुक्१सहस्रकिरणप्रख्यंतस्यांयत्पद्ममुत्तमम् ॥तन्मध्येतस्यदेवस्यपर्यंकोतिमनोहरः२दिव्यास्तरणसंपन्नोदिव्यधूपैःसुधूपितः ॥ दिव्यनानाकुसुमवान्स्वप्र
भैरत्नसंचयैः३भासयन्प्रभयासर्वादिशोविदिशएवच ॥ व्यजनैर्वीज्यमानंसतत्रशेतेविनायकः४कोटिचंद्रनिभोनानालंकारोनागभूषणः ॥ रंभास्तंभनिभंशुंडा
दंडंरदनसुंदरम् ५ दधद्दिव्यांबरच्छन्नोभालनेत्रःकिरीटवान् ॥ कुंडलेचांगदेमुद्राकटिसूत्रंमहाधनम् ६ सिद्धिबुद्धीसिद्धिहेतूपादौसंवहतोस्यह ॥ अ
णिमागरिमाश्चेतचामरैर्वीजितःस्मह ७ ज्वालिनीतेजिनीदीप्यमानेचोभयतःस्थिते ॥ दिव्यगंधेनलिप्तांगोदिव्यमालाविभूषितः ८ महिमाप्रथिमादायस्थिते
दृष्टिसमीपतः ॥ जलंगंडूषपात्रंचछत्रंकांचनरत्नयुक् ९ ततोदूतौकरेधृत्वातंनृपंपुरतोस्यतु ॥ ईक्षतेवागवसरंततोदेवोन्वबुध्यत १० तौदूतावूच
तुर्देवमानीतोयंतवाज्ञया ॥ प्रणम्यचस्थितौदूरंतदाज्ञापेक्षकावुभौ ११ तस्मिन्प्रबुद्धेराजासप्रणनामकृतांजलिः ॥ उवाचपरमप्रीत्याधन्योवंशोममाद्यह
१२ पितरौजन्मविद्याचतपोदृष्टिःसुतादयः ॥ येनमेदर्शितंब्रह्मध्येयंपदयुगंतव १३ नब्रह्मलोकेकैलासेशक्रलोकेपिवैभवः ॥ एतादृशोदर्शि
मयानान्यलोकेपिकश्चन १४ दूतावूचतुरास्यतांसततस्तौचनिषेदतुः ॥ ततोपश्यद्बालरूपंद्विभुजंसविनायकम् १५ येनतौनिहतौदैत्यौदेवांतकन

रांतकौ ॥ अतिगौरंकोमलांगंहिमकर्पूरसन्निभम् १६ नशशाकतदावक्तुंबाष्परुद्धमहागलः ॥ आनंदाश्रुनदीपूरैरासिंचंस्तत्पदद्वयम् १७ विज्ञायतन्महाभ
क्तिमुत्थाप्यालिंग्यविघ्नराट् ॥ मूर्ध्न्यांघ्रातश्चपितृवद्बहुकालगतःसुतः १८ देवोपिबाष्पकंठोभूदुभौरोमांचसंयुतौ ॥ उभौसुखाब्धिसंमग्नौदेहातीतौयथासु
नी १९ उवाचवचनंपश्चाद्बालरूपीविनायकः ॥ त्वद्गृहेनेकधातातक्रीडतायत्कृतंमया २० तत्क्षांतंहित्वयासर्वंशुभंवायदिवाशुभम् ॥ निहताबहवोदैत्याश्च
राभारश्चसंहृतः २१ पालिताःसाधुलोकाश्चस्थापिताधर्मसेतवः ॥ तवाज्ञयापुनर्यातःकश्यपंसृष्टिकारकम् २२ प्रणम्यतंनिजंलोकंप्राप्तोसुंसर्ववैभवम् ॥ त्वामे
वपरिचिंत्याहंविश्रांतिंनलभेक्वचित् २३ तवादिभावंज्ञात्वाहंमुद्गलंमुनिपुंगवम् ॥ अप्रेषयंतवगृहंतदनुग्रहतस्त्वया २४ प्राप्तस्थानंमुद्गलेनभक्तेनेदंत्व
यापिच ॥ यदगम्यंसदादेवैर्ब्रह्माद्यैर्मुनिपुंगवैः २५ ॥ ॥ कउवाच ॥ ॥ पीत्वावागमृतंतस्यनृपोनत्वापुनःपुनः ॥ उवाचधैर्यमालंब्यतुष्टावचयथामति २६
॥ नृपउवाच ॥ नमामितेनाथपदारविंदंब्रह्मादिभिर्ध्येयतमंशिवाय ॥ यत्पद्मपाशासिपरश्वधादिसुचिह्नितंविघ्नहरंनिजानाम् २७ यदर्च्यतेविष्णुशिवादि
भिःसुरैरनेककार्यार्थकरैर्नरैश्च ॥ अनेकशोविघ्नविनाशदक्षंसंसारतप्तामृतवृष्टिकारि २८ नमामितेनाथमुखारविंदंत्रिलोचनंवह्निरवींदुतारम् ॥ कृपाकटाक्षा
मृतसेचनेनतापत्रयोन्मूलनदृष्टशक्ति २९ नमामितेनाथकरारविंदमनेकहेतिक्षतदैत्यसंघम् ॥ अनेकभक्ताभयदंसुरेशसंसारकूपोत्तरणावलंबम् ३० त्व
मेवसत्त्वात्मतयाबिभर्षिसृजस्यजोराजसतामवाप्य ॥ तमोगुणाधारतयाचहांसिचराचरंतेवशगंगणेश ३१ यःशुद्धचेताभजतेनिशंत्वामाक्रम्यविघ्नान्परि
धावसित्वम् ॥ सत्त्वांवशेकृत्यसुखंहिशेतेवत्संयथागौरिवधावसित्वम् ३२ येन्येभजंतःसमवाप्यतापान्संसारचक्रेबहुधाभ्रमंतः ॥ कदापितेनुग्रहमा
प्यतेपिभजंतिमानुष्यमवाप्यतेपि ३३ धरारजःकोपिमिमीतनाकेतारागणंवारिमुचांचधाराः ॥ नालंगुणानांगणनांहिकर्तुंशेषोविधातातववर्षपूगैः ३४
निराकृतेस्तेयदिनाकृतिःस्यादुपासनाकर्मविधिर्वृथास्याद् ॥ गुणप्रपंचःप्रकृतेर्विलासोजनस्यभोगश्चतथाकथंस्याद् ३५ सत्संगतिश्चेत्सदनुग्रहःस्या
त्सत्कर्मनिष्ठासदनुस्मृतिश्च ॥ चित्तस्यशुद्धिर्महतीकृपातेज्ञानंविमुक्तिश्चनदुर्लभास्याद् ३६ ॥ कउवाच ॥ इतिस्तोत्रंसमाकर्ण्यपरितुष्टोविनायकः ॥ उ
वाचकाशिराजंसवरंवृणुहृदिस्थितम् ३७ ॥ नृपउवाच ॥ जातंवरस्यकृत्यंमेयत्राहंहिसमागतः ॥ इतःपुनर्जन्ममृतीनस्यातांतद्विधीयताम् ३८ ॥ कउवाच ॥
स्तोत्रेणप्रीतस्तंप्राहतथेतिदिव्यदेहिनम् ॥ स्थापयामासनिकटेकल्पकोटियुगावधि ३९ मुनेस्तोत्रंमयातस्मात्प्राप्तंतस्यप्रसादतः ॥ नारदायमयाप्रोक्तंना
रदोगौतमायच ४० प्राहसोपिमुनीन्सर्वान्सर्वकामफलप्रदम् ॥ ज्ञानदंमोक्षदंविघ्ननाशनंपावनंपरम् ४१ यःपठेत्सलभेद्भक्तिंगणेशसन्निधौनरः ॥ विद्या
कामोलभेद्विद्यांत्रिसंध्यंयःपठेन्नरः ४२ पुत्रकामोलभेत्पुत्रान्जयकामोलभेज्जयम् ॥ एवंसर्वंसमाख्यातंयद्यत्पृष्टंत्वयामुने ४३ आख्यानंकाशिराजस्यकि
मन्यच्छ्रोतुमिच्छासि ॥ भृगुरुवाच ॥ इतिश्रुत्वाब्रह्मवाक्यंव्यासोनिःसंशयोगिरः ४४ पुनःपप्रच्छसुमतिर्विस्तरेणकथांतरम् ॥ ॥ व्यासउवाच ॥ ॥ शु

ल्लस्यातिदरिद्रस्यहृतंदारिद्र्यमादरात् ४५ भुक्त्वाकदन्नंतद्वेहेकाशिराजंसमेत्यच ॥ किंचकारसदेवोपिकाशिराजश्चतद्वद ४६ कथंतौनिहतौदैत्यौभूभारश्च कथंहृतः ॥ स्थापितश्चकथंधर्मस्तन्मेशंसयथाविधि ॥ ॥ कउवाच ॥ ॥ कथयामिसमासेनचरितंबालरूपिणः ॥ हृत्वाशुल्कस्यदारिद्र्यंयद्य त्तेनकृतंमुने ४८ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेराजस्वानंदप्राप्तिवर्णनंनामत्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ कउवाच ॥ ॥ भुक्त्वाशुल्कगृहेदेवो यावत्क्रीडतिचत्वरे ॥ क्षणंसुष्वापमध्येसततोनागरिकाजनाः १ भोजनायसमारंभंकृत्वामुनिसुतस्यह ॥ काशिराजगृहंतावदाकारयितुमागताः २ तानू चेकाशिराजस्तुक्रीडन्क्रीडन्नितोगतः ॥ पश्यंतिस्मततोलोकागृहेगृहेविनायकम् ३ शुल्कस्यसगृहंयातइतिकेचित्समूचिरे ॥ ततोजनानिनिंदुस्तंदेवंशुल्कमकिं चनम् ४ ॥ जनाऊचुः ॥ उष्ट्रस्तुकंटकान्भुंक्तेहित्वाकोमलपल्लवान् ॥ अस्मानाढ्यान्विहायासौदरिद्रस्यगृहंगतः ५ वृथैवेश्वरतांनीतोराज्ञाबालोयदीश्व रः ॥ स्यादयंचेत्तदाकुर्यात्संतुष्टिंसर्वचेतसाम् ६ कदन्नंतदपिस्वल्पंकथंभोक्ष्यतिबालकः ॥ केचित्सत्पुरुषास्तेषुतमानयितुमुत्सुकाः ७ इतस्ततःप्रधावंतिवि ज्ञातुंतंविनायकम् ॥ पप्रच्छुर्मार्गगान्लोकान्क्वचिद्दृष्टोविनायकः ८ पृष्ट्वापृष्ट्वाव्रजंतिस्मजनास्तद्भक्तितत्पराः ॥ केचिदूचुःशुल्कगृहंगतःस्यादितिताव्रा ति ९ तेशीघ्रंतद्गृहंयाताज्ञात्वासुप्तंविनायकम् ॥ अतिष्ठन्सात्विकास्तूष्णींप्रबुद्धःस्याद्यदाविभुः १० तदैनंप्रार्थयामेतिराजसास्तुतमब्रुवन् ॥ उत्तिष्ठयाहिरे भोक्तुमन्नंपर्युषितंभवेत् ११ त्वदर्थेनगरेलोकाःकोलाहलंप्रकुर्वते ॥ दरिद्रस्यास्यशुल्कस्यशुल्कभिक्षारतस्यह १२ पर्याप्तिश्चास्याभिक्षायाजायतेनकदाच न ॥ नजलंकोपिपिबतितस्यगेहेकथंभवान् ॥ भुक्तवान्कुत्सितंचान्नंकश्यपस्यात्मजोपिसन् १३ केचित्तंविविधैर्वाक्यैर्निंदुस्तुष्टुवुःपरे ॥ मुनिरुवाच ॥ एवंश्रुत्वासर्ववाक्यमुवाचकश्यपात्मजः १४ ॥ ॥ देवउवाच ॥ ॥ भक्त्योपपादितंचान्नंभुक्तमद्ययथेच्छतः ॥ पदमात्रंहिगंतुमेशक्तिस्तृप्तस्यनास्तिच १५ ग्रासमात्रंहिभोक्तुंमेवांछानास्त्यधुनाजनाः ॥ ॥ कउवाच ॥ ॥ एवंनिष्ठुरतांज्ञात्वाजनास्तेविरसास्तदा १६ ऊचुःपरस्परंकेचित्कर्तव्यंकिंहिबालके ॥ सो पिविह्वलतांज्ञात्वापुरवासिजनस्यह १७ एकोनंतत्वमापेदेघटाकाशइवक्षणात् ॥ जलकुंभगतोयद्वत्सवितानेकरूपवान् १८ प्रतिगृहंगतोनानाक्रीडास क्तोभवद्विभुः ॥ क्वचित्सोपानमार्गेषुक्वचिद्दोलागतोपिच १९ क्वचिच्चपर्यंकगतःक्वचित्सौधगतोपिच ॥ क्रीडतेहसतेक्वापिगृहबालैर्भुनक्तिच २० अध्ये तिक्वापिशास्त्राणिपाठयत्यपिकुत्रचित् ॥ तंदृष्ट्वास्वगृहंयातंकाशिराजेनसंयुतम् २१ जहृषेसगृहस्वामीधन्योहमितिचाब्रवीत् ॥ एवंसर्वगृहेराजसहितो सौविनायकः २२ क्वचिदभ्यज्यतेतैलैःस्नातिक्वापिशुभैर्जलैः ॥ पादप्रक्षालनंक्वापिक्रियतेपरमादरात् २३ उपचारैःषोडशभिःपूज्यतेक्वापिभक्तितः ॥ भु ज्यतेपरमान्नेनबालभावाद्यथातथा २४ क्वचिन्नानापरिमलैःकस्तूरीचंदनादिभिः ॥ अर्च्यतेसुमनोभिश्चनैवेद्यैर्विविधैरपि ॥ सेव्यतेगृहपत्नीभिःशिशु भिःसेवकैरपि २५ भुक्त्वायथेष्टंसुष्वापपादसंवाहनादिभिः ॥ वेदपारायणरतःक्वापिगानरतस्तुसः २६ शृणोतिसत्कथांक्वापिहरेरपिकथांक्वचित् ॥ क

चिच्चप्रमदानृत्यंपश्यतिस्मनृपेणसः २७ आरार्तिक्यैश्चविविधैःक्वापिनीराज्यतेविभुः ॥ क्वचिच्चपाशहस्तोसौक्रीडतेक्षुद्रबालकैः २८ पुराणंवाच्यते क्वापिधर्मशास्त्रंस्मृतिस्तथा ॥ एवंसर्वगृहेभुक्त्वासर्वेषांकामपूरकः २९ यस्ययस्ययथावांछातथातांव्यदधाद्विभुः ॥ सुप्रसन्नोमहादेवोयथाकल्पद्रुमो पिच ३० यथाचिंतामणिःकामधेनुर्वाखिलकामदा ॥ दीननाथेतियन्नामकृतंतत्सार्थकंतदा ३१ देवदुंदुभयोनेदुःपुष्पवृष्टिर्गृहेगृहे ॥ दृष्ट्वैवंकाशि राजासौभ्रांतऊचेनिजान्प्रति ३२ जयंविनायकोबालःसन्निधौममतिष्ठति ॥ सकथंसर्वगृहगःपूज्यतेसर्वमानवैः ३३ गृहेगृहेतुसकथंतिष्ठत्यत्रापिसां प्रतम् ॥ योमामाकारयतितंवदामिचपुनःपुनः ३४ विनाविनायकंयामिकथंभोक्तुंभवद्गृहे ॥ गृहमध्यस्थितंचान्नंभुंजेकाश्यपसंयुतः ३५ तंभुक्तवंतंत्यक्त्वैव बहिस्थमथदृष्टवान् ॥ इतस्ततोब्रुवन्लोकादृढविस्मितमानसाः ३६ नानागृहगतोभुंक्तेकाशिराजयुतोविभुः ॥ आकर्ण्यवचनंतेषांहसन्नूचेनृपःसतान् ३७ विनामांसकथंयातोभोक्तुंनानागृहानिति ॥ ततोगृहाणिद्वित्रीणिगत्वाराजाहिदृष्टवान् ३८ स्वंचकश्यपपुत्रंचभुक्तवंतंगृहेगृहे ॥ एतस्मिन्नंतरेप्राप्तौसात्वातौ मुनिसत्तमौ ३९ भुक्त्यर्थंभ्रममाणौतौसनकश्चसनंदनः ॥ पुरींमहोत्सवयुतांविनायकमयींशुभाम् ४० यद्यद्गृहंप्रविशतस्तत्रतत्रविनायकम् ॥ प श्यतःस्मरतस्तौतुयातःस्मबहिरेवच ४१ भुक्तंचभुक्तवंतंचसुक्रीडंतमेवच ॥ जपंतंचपठंतंचपाठयंतंचपश्यतः ४२ एवंसर्वत्रतंदृष्ट्वापरस्परमथोचतुः ॥ नस्थलंभोजनार्थायदृश्यतेथात्रनिर्मलम् ४३ यावःशुद्धगृहंकर्त्तासनावातिथ्यमादरात् ॥ इत्युक्त्वातद्गृहंयातोदृष्टस्तत्रापिकाश्यपः ४४ अधोमु खौक्षुधार्तौतौयातःस्मनगराद्बहिः ॥ पश्यतःस्मपरांमूर्तिंस्फुटांवैनायकींशुभाम् ४५ अंतर्हृदिचनेत्रेस्वेनिमील्योन्मील्यवापुनः ॥ अधश्चोर्ध्वंचांतराले दिक्षुचैवविदिक्षुच ४६ तस्थतुस्तौततःपश्चाध्यानस्तिमितवीक्षणौ ॥ क्षणमुद्घाटचनयनेविनायकस्वरूपिणम् ४७ परस्परंपश्यतिस्मसनकस्तंपरोपि तम् ॥ यंदेवंतौध्यायतःस्मपश्यतस्तंविनायकम् ४८ सर्वव्यापीसर्वरूपआविरासीत्तयोःपुरः ॥ दशबाहुःसिंहगतःसिद्धिबुद्धिविराजितः ४९ सुप्र काशंकिरीटंचकुंडलेचांगदेदधत् ॥ दिव्यगंधंचमाल्यंचनागंचेंद्रार्द्धमेवच ५० कस्तूरीतिलकंदिव्येवसनेदशनप्रभे ॥ सौम्यतेजाःसुमनसांदुष्टानांदु र्निरीक्षणः ५१ त्यक्त्वाभ्रमंतुतत्वज्ञौप्रणमेतांविनायकम् ॥ बध्वाकरपुटंतौतंतुष्टुवातेमहामती ५२ ॥ ॥ तौऊचतुः ॥ ॥ नित्यमद्वैतमपरंपरंब्र ह्मसनातनम् ॥ तमेवपरयाभक्त्यापंचभूतात्मकंविभुम् ५३ चराचरगतंसर्वरूपिणंपरमेश्वरम् ॥ भ्रमंतियस्यरोमांचगताब्रह्मांडकोटयः ५४ सकथं स्तवनीयोसौवेदांतानामगोचरः ॥ आवयोर्वांछितंदेवत्वयाज्ञात्वाप्रपूरितम् ५५ नविघ्नोमहिमानंतेबालरूपधरस्यह ॥ भूभारहरणार्थायकाश्यपंरूपमुत्त मम् ५६ ॥ ॥ कउवाच ॥ ॥ अंतर्दधेतुतद्रूपमुभयोःस्तुवतोःपुरः ॥ नपश्यतोयदारूपंतदातौश्रमवर्जितौ ५७ प्रासादंपरमंकृत्वामूर्त्तिंवैनायकींशुभा म् ॥ ब्रह्मघोषैश्चयथादृष्टंशुभेदिने ५८ स्थापयामासतुर्नामवरदोयंविनायकः ॥ गणेशतीर्थमितिचतत्रयत्सरउत्तमम् ५९ स्थापितंनामतस्या

पितत्रतस्त्र्यातिमागमत् ॥ अत्रस्नानेनदानेनगणेशपूजनेनच ६० सर्वान्कामानवाप्नोतिहित्वापापंपुरातनम् ॥ तत्रेयुर्मुनयःसर्वेदेवाश्चसदिगीश्वराः ६१ दृ
ष्ट्वासंपूजितंदेवंस्तुत्वानत्वाययुःपुनः ॥ मुनिरुवाच ॥ ॥ एवंतौबालरूपस्यप्रभावंद्रष्टुमागतौ ६२ दृष्टप्रभावौसंतुष्टौस्वस्थानमापतुःपरम् ॥ यइदंशृ
णुयाद्भक्त्याबालस्यचरितंशुभम् ६३ सर्वान्कामानवाप्नोतिप्रेत्यब्रह्ममयोभवेत् ॥ नबालग्रहपीडास्यात्सर्वत्रविजयीभवेत् ६४ इतिश्रीगणेशपुराणेउत्तरखं
डेबालचरितेचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ मुनिरुवाच ॥ ॥ तयोस्तुगतयोःपश्चान्मोहापन्नोमहानृपः ॥ काशिराजोहयारूढोभ्रमतिस्मगृहेगृहे १ वि
नायकमचक्षाणःक्वगतोभोक्तुमित्युत ॥ विहायमांकथंयातोमिष्टान्नंभोक्तुमेकशः २ गृहेगृहेपर्यपृच्छत्क्वगतोसौविनायकः ॥ इदानींबहिरायातोभुक्त्वाक्री
डितुमुत्सुकः ३ काशिराजेनसहितोवृथात्वंपृच्छसेकथम् ॥ एवंनिराकृतःसर्वैःपुरवासिजनैरसौ ४ परमंश्रममापन्नोकुटुंब्यकिंचनोयथा ॥ केचिदूचुःशु
क्लगृहेक्रीडतेसौविनायकः ५ ततोहर्षयुतःशुक्लगृहंयातोनृपस्तदा ॥ ददर्शचांगणेतस्यबालंवृषगतंविभुम् ६ दृष्ट्वातंवृषमारूढंत्रिनेत्रमिवचापरम् ॥ प्रणम्य
परयाभक्त्याबद्धांजलिपुटोब्रवीत् ७ ॥ ॥ नृपउवाच ॥ ॥ नबालेसाधुचरितंनज्ञानंस्नेहएवच ॥ विहायमांकथंभोक्तुमिष्टान्नंविविधंत्वया ८ ॥ कउवाच ॥
एवमाकर्ण्यतद्वाक्यमुवाचसविनायकः ॥ यत्रयत्रमयाभुक्तंतत्रभुक्तंत्वयापिच ९ मिथ्यात्वंभाषसेमंदबालस्त्वमसिबुद्धितः ॥ वदिष्यंतिजनाःसर्वेपृच्छेति
चससाक्षिकम् १० श्रुत्वावैनायकंवाक्यंजनाऊचुर्नृपंतदा ॥ इदानींहित्वयाभुक्तंविनायकसमीपतः ११ कथंमिथ्याभाषसेत्वंवृद्धःसन्नृपसत्तम ॥ ततःप्रकृ
तिमापन्नोज्ञानवान्सनृपोब्रवीत् १२ अज्ञेयातेपरामायायोगिनामपिमोहिनी ॥ धन्योसिसर्वरूपेणसर्वत्रमानितोयतः १३ ॥ कउवाच ॥ रोमांचांचितगात्रः
सध्यानमेवान्वपद्यत ॥ ततोवैनायकंरूपंस्वयमेवान्वपद्यत १४ यथाजलेजलंक्षिप्तंजलत्वंप्रतिपद्यते ॥ पुनर्मायाबलेनासौभिन्नमूर्तिर्नृपोत्तमः १५
सतुतंशिबिकारूढंनिनायनिजमंदिरम् ॥ नानावादित्रनिर्घोषैर्नृत्यैर्गीतैरनेकशः १६ शुशुभेबालकोतीवदेवेषुमदनोयथा ॥ अनुयातिसपत्नीकोभक्त्याशु
क्लःशनैःशनैः १७ परावर्त्यमुखंदृष्टोबालेनव्रीडताभृशम् ॥ कथंप्रयातोदत्वास्मैवरंकंचनतोषकम् १८ इत्येवंमनसातस्मैददौसंपत्तिमुत्तमाम् ॥ कुबेरसंपदः
श्रेष्ठांसर्वाश्चर्यकरींविभुः १९ शुक्लःपरावृतोदीनःसपत्नीकोमहामनाः ॥ कदन्नभक्षणाद्देवोरुष्टःकिंत्वितिचिंतयन् २० नापश्यत्तांपर्णकुटींचिंतांपरमिकांय
यौ ॥ ततस्तुसेवकाःशुक्लंसुगंधतैलमर्दनैः २१ स्नापयित्वाप्यलंचक्रुर्भूषणैःकांचनांशुकैः ॥ तथैवतस्यपत्नींचबलादिवनियोजिताः २२ अत्याश्चर्ययुतौचो
भौपश्यतःसर्वसंपदः ॥ रत्नकांचनभित्तीश्चमंचान्नानासनानिच २३ मुक्तामणिगणैश्चित्राण्यनेकानिस्थलेस्थले ॥ कांचनानिचभांडानिवस्त्राण्याच्छादना
निच २४ भक्ष्याण्यनेकरूपाणिखाद्यानिविविधानिच ॥ दृष्ट्वेत्थंसकलंचोभौपरस्परमभाषताम् २५ किमिदंभवनंक्षुद्रंजातंमिंद्रगृहोपमम् ॥ ततःशुक्लोब्रवी
त्पत्नींविनायकप्रसादतः २६ सर्वंजानीहिसुभगेनसमक्षंमहाविभुः ॥ ददातितुपरोक्षेसौअल्पमात्रेणतोषयन् २७ स्वयंदत्तंबहुतरमल्पमेवहिमन्य

ते ॥ भक्त्योपपादितंस्वल्पंमन्यतेबहुलंविभुः २८ तस्माद्ध्येयनकामेनस्नेहेनारिपुभावतः ॥ स्मर्तव्योनमनीयश्चस्तव्यःपूज्योहितायच २९ मुनिरुवाच ॥
ततस्तुनगरेगुप्तौनरांतकसमीरितौ ॥ आस्तांदूतौचिरंकालंशूरश्चचपलस्तथा ३० यच्चंडशब्दात्त्रैलोक्यंकंपतेश्वत्थपत्रवत् ॥ यच्छिरःकंपतःकंपंयांतिदे
३१ वाःसवासवाः ३१ पराक्रमेबलेशब्देत्रैलोक्येनसमस्तयोः ॥ अयंतुशिबिकामध्येहंतव्योमुनिदेहजः ३२ यतोनेनहतादैत्याबलिनःपूर्वमागताः ॥ तेषांप्र ५५
तिकृतिःकार्येत्येवमूचुःपरस्परम् ३३ विद्युद्रूपंसमास्थायगर्जतःस्मभृशंरवौ ॥ तत्तेजसाप्रतिहतचक्षुषावीरसंचयाः॥ किमिदंकिमिदमितिचुक्रुशुर्भृशविह्वलाः ॥
३४ एतस्मिन्नंतरेप्राप्तौशिबिकानिकटंतुतौ ॥ वाहाःपलायिताःसर्वेत्यक्त्वातंचविनायकम् ३५ धृतौविनायकेनोग्रौहस्ताभ्यांबलिनौबलात् ॥ उत्पाटितुंधर
ण्यांसभ्रामयामासतावुभौ ३६ करुणार्द्रमनाःपश्चात्स्थापयामासभूतले ॥ हंतव्यःपुरुषेणासौयःपराक्रमतोधिकः ३७ मशकेनिहतेकःस्यात्पुमर्थःपुरुषस्यह ॥
ततःपप्रच्छतौकस्यदूतौवाकथ्यतामिति ३८ स्वशक्त्यातुकृतेयत्नेनदोषःपुरुषस्यह ॥ एवंतद्वचनंश्रुत्वाप्रोचतुःपुरतःस्थितौ ३९ करुणाब्धिर्भवान्ख्यातोदीन
नाथःपितासिनः ॥ सेकश्चोपनेताचविद्यादोमयदोपरः ४० अन्नदःपंचपितरोविख्याताभुवनत्रये ॥ आवांदूतौगुप्तरूपौनरांतकसमीरितौ ४१ तवविघ्नकरौदे
वरक्षितौऊपयात्वया ॥ भूतंभव्यंभवच्चैवसर्वंजानासिसर्ववित् ४२ येयेवैरेणत्वांयाताहतास्तेक्षणमात्रतः ॥ एतस्मिन्नंतरेपौराविनायकमथाब्रुवन् ४३ कि
मेतौरक्षितौदेवदुष्टौलोकभयंकरौ ॥ अनयोरुपकारस्तुकृतोपकृतयेभवेत् ४४ पन्नगायपयोदत्तंविषमेवहिजायते ॥ ॥ मुनिरुवाच ॥ ॥ तानुवाचततो
देवःपूर्वमेवानयोर्मया ४५ अभयंदत्तमधुनाविपरीतंकथंभवेत् ॥ इत्युक्त्वामोचयत्तौसततोराजाब्रवीत्पुनः ४६ अपराधानसंख्यातानक्षांत्वातौमोचितौरि
पू ॥ मरणेजीवनेजंतोरिच्छातेकारणंमता ४७ इत्युक्त्वामंदिरंप्राप्तौकाशिराजविनायकौ ॥ नत्वातौसर्वलोकाश्चस्वंस्वंभवनमागमन् ४८ प्रशंसंतोनृपं
नानारूपिणंचविनायकं ४९ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेदूतमोचनंनामपंचपंचाशत्तमोऽध्यायः ५५ ॥ मुनिरुवाच ॥ तौतुरौद्रपुरेरम्यांनरांतक
सभांगतौ ॥ सहस्रस्तंभरुचिरांमणिमुक्ताविभूषितां १ अनेकवीरसंबाधांनानाश्चर्यवतींशुभाम् ॥ शतयोजनविस्तीर्णांतावदायामसंयुतां २ नानामणिमये
रम्येआसनेसनरांतकः ॥ उपविष्टस्तत्समयेतस्यामात्यौवरासने ॥ ३ ॥ उभौगगनसंलेहिमूर्द्धानौबलिनांवरौ ॥ नत्वातौवदतःशूरश्चपलश्चगुणान्बहू
न् ४ वक्तव्यंदूतवर्येणयत्स्यात्साध्वितरच्च यत् ॥ अन्यथादूतदोषःस्यात्स्वामिकोपश्चदारुणः ५ श्रुत्वातत्स्वामिनाकार्यंविचार्यस्वहितंशुभम् ॥ आवांवि
नायकेविघ्नान्कर्तुंयातःपुरींतुतां ६ अतिगुप्ततरौतत्रस्थितौबालप्रतीक्षकौ ॥ विघंटोदंतुरश्चाथप्रथमंबालरूपिणौ ७ ताभ्यामालिंगितस्तौसभस्म ३९
चक्रेविनायकः ॥ पतंगश्चविधूलश्चवायुरूपधरौततः ८ यातौबालकमुत्क्षिप्तुंशिरआक्रम्यनाशितौ ॥ पाषाणरूपीप्रबलःशतधाखंडितोसुरः ९ कामक्रोधौ
द्यावसुरौरासभरूपमास्थितौ ॥ हंतुंबालंतुमार्गेतौचूर्णितौधरणीतले १० ततःकुंडिन्यास्तुवरःकौंजरंरूपमास्थितः ॥ मार्गमावृत्यसंतस्थौतत्कुंभस्थावि

दारणात् ११ निहतःक्षणमात्रेणकुमारेणबलेनसः ॥ धर्मदत्तगृहंपश्चाज्जृंभणीहंतुमागता १२ नारिकेलेनशिरसिहताभृत्युमवापसा ॥ ज्वालासुरोव्या
घ्रतुंडस्तृतीयस्तुविदारणः १३ आगतानाशितुंबालमाद्योजज्वालतांपुरीम् ॥ अंत्यःसाहाय्यमकरोद्वायुरूपतयास्यह १४ विदार्यास्यंव्याघ्रतुंडोभ
क्षयच्चाखिलान्जनान् ॥ त्रयोपिनिहतास्तेनबालेनानंतमायया १५ मेघनामामहादैत्योगाणकंरूपमास्थितः॥ निहतोमुद्रिकाघातात्तदद्भुताग्निवाभवत् ॥
१६ कूपश्चकंदरश्चोभौनिहतौमायिनौबलात् ॥ अंभासुरोंधकस्तुंगोनाशितुंबालमागताः १७ एकेनाकारितुतमोधाराभिर्वृष्टेपरः ॥ अपरस्तुंगशि
खरोन्यपतद्बालकोपरि ॥ १८ ॥ महाविहंगरूपेणदूरक्षिप्तास्त्रयोपिच ॥ तेषांप्रतिकृतिंकंतुंभ्रमरानामराक्षसी ॥ १९ ॥ आगताभक्षितुंबालंदुष्टाशयव
तीशुभा ॥ तदुरःस्थलमाक्रम्यप्राणान्जग्राहविघ्नराट् ॥ २० ॥ ततआवांतडिद्रूपमास्थायबालकंगतौ ॥ विहंतुंतेनविधृतौकरयोर्बलशालिना ॥२१ ॥ कृ
पावतामविमुक्तौचपृष्ट्वासर्वंचिकीर्षितम् ॥ कथयित्वोदंतमखिलमागतौस्वामिनंप्रति २२ एकदानगरेतत्रसर्वैरेकःसमाहृतः ॥ भोजनायचशुक्लेनदरिद्रेण
विनायकः २३ विशीर्णमोदनंभुक्त्वासहतैलेनप्राग्विभुः ॥ पश्चाद्गतोनंतकायोभोक्तुंसर्वगृहेषुसः २४ सर्वत्रकाशिराजेनसहितोबुभुजेहिसः ॥ काशि
राजेनमूढेननज्ञातंतद्विचेष्टितम् २५ स्वामिन्नेतादृशीशक्तिःक्वापिदृष्टानचश्रुता ॥ इदानींयद्धितंतेस्यात्तद्विसम्यग्विधीयताम् २६ जानीवहेनजेतास्यत्रैलो
क्येविद्यतेपुमान् ॥ ॥ मुनिरुवाच ॥ ॥ इत्थंश्रुत्वातयोर्वाक्यंप्रजज्वालसुरांतकः ॥ वमतिस्ममुखादग्निंविश्वमत्तुंप्रसारितात् २७ कपिरुड्डानशीलो
पिनासिंहंबाधतेक्वचित् ॥ बध्वातुभ्रुकुटीमुग्रामुवाचसनरांतकः २८ ग्रासशीलश्चाजगरोनमहींग्रसतेक्वचित् ॥ आश्चर्यंममचित्ततुभवद्वाक्यादुपागतम्
२९ खद्योतोराजतेतावद्यावच्चंद्रोनदृश्यते ॥ चंद्रोपिराजतेतावद्यावत्सूर्योनदृश्यते ३० नदृश्यतेयदाराहुस्तावत्सूर्योपिराजते ॥ नदृष्टःकालरूपोहंतावद्बा
लोमहानयम् ३१ सकाशिराजंतंबालंजानीयातांदिवंगतम् ॥ यत्रतेनिहतादैत्यागतास्तत्रगमिष्यति ३२ ॥ ॥ मुनिरुवाच ॥ ॥ एवमुक्त्वासा
मुत्तस्थौजगर्जगर्जयन्दिशः ॥ चकंपेपृथिवीसर्वातद्गर्जनरवाकुला ३३ ततआज्ञापयत्सर्वान्वीरान्सज्जीभवंत्विति ॥ काशिराजस्यनगरींयामियुद्धायदं
शितः ३४ तस्मिन्वदातिसेनेत्थंसन्नद्धासमुपागता ॥ सर्वशांतिकराघोराचतुरंगध्वजान्विता ३५ सैन्येनरजसासर्वंव्याप्तमासीद्विगंतरम् ॥ आच्छादितेदि
नकरेनप्राज्ञायतकिंचन ३६ पदातयोप्यसंख्येयाःसिंदूरारुणमस्तकाः ॥ उड्डीयोड्डीयधावंतोमिथ्यायुद्धंप्रचक्रिरे ३७ मुक्तकेशाःखड्गहस्ताभृशुंडीचर्मपाणयः
॥ पाषाणद्रुमखट्वांगशक्तिपाशकराःपरे ३८ ततोयथौगजानीकंघंटानादविभूषितम् ॥ सिंदूरारुणसद्दंडदंतावरणराजितम् ३९ नानाधातुविचित्रोनुपर्वता
नांव्रजोव्रजन् ॥ चीत्कारेणनदद्भंतौभिंदन्विवागिरिव्रजम् ४० आघोरणायदानस्युस्तदासर्वंहतंभवेत् ॥ दानोदकेनतुरजःप्रशांतमभवत्तदा ४१ अश्वारोहास्त
योर्जग्मुर्मृकुटाटोपमस्तकाः ॥ शस्त्रिकाचर्मनिस्त्रिंशधनुर्बाणविभूषिताः ४२ बृंहितैर्हेषितैर्व्योमकुर्वंतःसगुणंभृशम् ॥ कंकालैश्चतनुत्राणैश्शूलैश्चविराजि

ताः ४३ गदामुद्गरपट्टीशमहापरशुपाणयः ॥ चक्रतोमरभल्लासिपाशस्थाणिकराःपरे ४४ अश्वाअलंकृतानानालंकारैश्चामरैरपि ॥ मनोजवावायुवेगाव्योमै
वाक्रांतुमिच्छवः ४५ ततःसुवर्णरजतमुक्तामणिविभूषितम् ॥ सुवर्णाक्षैर्ध्वजैर्युक्तंनानालंकृतवाजिभिः ४६ नानायुद्धसमूहैश्चधनुर्बाणशतैर्युतम् ॥ कार्त
स्वरमहाचक्रंकिंकिणीजालमंडितम् ४७ महारथीमहामात्योरथमास्थायनिर्ययौ ॥ कृष्णदेहोमहाकायोवीरकंकणशोभितः ४८ लसत्कुंडलसुश्रोत्रोमहा
मुकुटमंडितः ॥ मुक्तासुवर्णमालाढ्योमुद्रिकाखड्गमंडितः ४९ केशरागरुकस्तूरीकर्पूरांगविलेपनः ॥ शुचिरस्त्राणिसस्मारनप्रयुक्तानिकुत्रचित् ५० वी
रावेशेनसबभौरोगीशोफांगतोयथा ॥ नानावादित्रनिर्घोषैर्नादयन्दिदिशोदिशः ५१ वीराविनायकंजेतुंहृष्टागर्जत्यनेकशः ॥ बृंहितैर्हेषितैःक्ष्वेडैरथनोमिस्व
नैरपि ॥ निनादंतंसमाकर्ण्यत्रस्तादेवादरींययुः ॥ एवंनरांतकःकाशीराजस्यनगरींययौ ५३ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेनरांतकनिर्गमनंनामष
ट्पंचाशत्तमोध्यायः ॥ ५६ ॥ ध ॥ ॥ कउवाच ॥ ॥ तस्मिन्प्रयातेदैत्येंद्रेप्राग्गुल्मेषुगतानराः ॥ धावमानानृपंप्रोचुर्मुक्तवंतंनरांतकः १ आग
तोदैत्यराजोसौचतुरंगबलान्वितः ॥ पौरावादित्रनिर्घोषान्श्रुत्वाचक्रुर्महास्वनान् २ कोलाहलोमहानासील्लोकानांनगरेभृशम् ॥ पलायितादशदिशोलोकाः
प्राणपरीप्सया ३ राजाथभोजनंत्यक्त्वाप्रोत्तस्थौस्पर्शवानिव ॥ कृत्वायुद्धक्षमंवेषंलोकानाज्ञापयत्पुरा ४ सज्जीभवंतुयुद्धायभेरीशब्दमकारयत् ॥ खड्गचर्म
धरोराजानिषंगीचापवान्बली ५ तनुत्राणीचकंकालीपुपूजेतंविनायकम् ॥ जयपूर्वंचतंस्मृत्वानत्वाचाश्वंसमारुहत् ६ तृतीयमानकारावंश्रुत्वासेनाचराययुः॥
सन्नद्धास्त्वरमाणाश्चपत्त्यश्वरथंदनैर्गजैः ७ अतिप्रहृष्टास्तेयोधास्त्रैलोक्यग्राससाहसाः ॥ नगर्याःपूर्वभागेसवेदिकायांस्थितोनृपः ८ अमात्यान्सर्ववी
रांश्चददौवस्त्रधनानिसः ॥ उवाचसमयोयंवोदर्शयंतुपराक्रमम् ९ विनायकानुग्रहान्नोनभयंविद्यतेक्वचित् ॥ तथापिबलवान्दैत्योबलाज्जिग्येवसुंध
रां १० जयस्यनियमोनास्तिदैवाधीनाश्चपूरुषाः ॥ नसेनालक्षभागेनविद्यतेतोब्रवीम्यहम् ११ क्वसागरःक्वकुंभोदंक्वखद्योतःक्वाविविः ॥ तेनैवरक्षिताःसाम्रा
स्थितताराज्यश्रियावयम् १२ अपराधाःसुबहवोजातानोमस्तकेततः ॥ कियंतोनिहतादैत्याविनायकबलेनच १३ त्यक्त्वासामप्रयातोसौविचारःक्रियतांहि
तः ॥ मुनिरुवाच ॥ तत्राब्रवीन्महामात्योराजानंभयविह्वलम् १४ चतुर्भिर्बुद्धिमद्भिस्त्वंयाहिदैत्यंनरांतकम् ॥ शरणंस्वस्वकार्यार्थेनीचानुशरणंशुभं १५
बृहस्पतिमतंराजन्ब्रवीमितेशृणुष्वतत् ॥ श्रुत्वातत्कुरुराजेंद्रततःक्षेमंभविष्यति १६ ॥ बृहस्पतिरुवाच ॥ कन्याप्रदानसहभोजनवस्त्रदानसामाभिधान
नमनप्रणयप्रमाणैः ॥ तत्कीर्तिकीर्तनतदाप्तजनानुवादमुख्यैरुपायनिचयैरहितान्विहंस्याद् १७ ॥ मुनिरुवाच ॥ सचेद्विनायकंयाचेद्दत्वाराज्यस्यरक्षणं ॥
कर्तव्यमितिमेमातिस्वहितंतद्विचिंत्यताम् १८ ततःसर्वजनाःसाधुसाध्वितिप्राब्रुवन्नृपं ॥ सम्यगुक्तममात्येनवैरच्छेदायभोनृप १९ विचारयत्सुतेष्वेवंदैत्या
स्तेबलवत्तराः ॥ रुरुधुस्तांपुरींसैन्यैःसर्वतेशलभाइव २० मध्येगतान्नरानदृष्ट्वाददहुस्तांपुरींखलाः ॥ प्रजज्वालमहानग्निश्चतुर्दिक्षुविदिक्षुच २१ धूमेनाच्छा

ददर्शकाशिराजःस्वंनगरंभद्रमेवच ॥ कश्यपस्यात्मजंबालंक्रीडतंतांविनायकम् १६ तत्प्रसादादाप्तबुद्धिर्नुनावपरयामुदा ॥ ज्ञातातेपरमामायामयाकु
क्षिगतेनच १७ त्वमेवकर्तादेवानांमनुष्याणांदिशामपि ॥ सर्गाणांसागराणांचसरितांबलिसद्मनाम् १८ यतस्तेरोमकूपेषुब्रह्मांडानांहिकोटयः ॥ दृष्ट्वाभां
तेनचमयाप्रसादात्तवनाथभो १९ आश्चर्यंबहुधादृष्टंमयातवचविश्वविद् ॥ अहंयुद्धायसंप्राप्तोध्वजिनीपुनरागता २० नरांतकस्यसैन्येनसाजिताता
त्क्षणादनु ॥ अमात्यपुत्रसहितोनरांतकमुपाद्रवम् २१ विधृतस्तेनसहसासैन्यंजित्वाममक्षणाद् ॥ दग्धाचनगरीसर्वादृष्टःसकालपूरुषः २२ तेनापिभक्षि
तातस्यसेनानानाविधाक्षणाद् ॥ धृत्वानरांतकंयातःपुरुषःसतवांतिकम् २३ सर्वैस्त्वदुदरंयातास्तत्रदृष्टोसिमेप्रभो ॥ सर्वेदृष्टंचतत्रापिजंबूद्वीपंसविस्तरम् ॥
२४ एवंकोष्टांतरेदृष्टंभूतलंचसविस्तरम् ॥ ततोहिखिन्नास्त्वांयाताःशरणंजगदीश्वर २५ त्वदाज्ञयातुरोमांचद्वारेणानिर्गताबहिः ॥ पुनर्दृष्टोसिबालस्त्वंनिजं
चभवनंमहद् २६ किमिदंकौतुकंदेवमायाजालमिदंविभो ॥ कश्चासौपुरुषोदेवयेनाभक्षिमहाचमूः २७ केनासौविधृतोदैत्योरक्षितश्चापिकेनच ॥
केनादर्शिचरोमांचद्वारंनिर्गमनायच २८ इतिमेसंशयंदेवनुदभक्तस्ययत्नतः ॥ ॥ कउवाच ॥ एवंतेनकृतःप्रश्नोमस्तकेतस्यधीमतः २९ विना
यकःकरतलंकृपयानिदधारह ॥ दिव्यज्ञानोभवद्राजाकाशीराजस्तुतत्क्षणाद् ३० तुष्टावपरयाभक्त्यादेवदेवंविनायकम् ॥ ॥ राजोवाच ॥ त्वमेवब्रह्मा
विष्णुश्चमहेशोभानुरेवच ३१ त्वमेवपृथिवीवायुरंतरिक्षंदिशोद्रुमाः ॥ पर्वतैःसहिताःसिद्धागंधर्वायक्षराक्षसाः ३२ मुनयोमानवाश्चापिस्थावरंज
गमंजगत् ॥ त्वमेवसर्वंदेवेशसचेतनमचेतनम् ३३ जन्मांतरीयपुण्येनदृष्टोसिकश्यपात्मज ॥ ॥ कउवाच ॥ एवंब्रुवतिराजेंद्रेमोहयामासतत्क्षणाद् ॥
३४ ततोराजापुपूजैनंविनायकमनामयं ॥ ततःपौराहर्षयुताराजानंद्रष्टुमाययुः ३५ नत्वानत्वाददुस्तस्मैवस्त्राण्याभरणानिच ॥ राजापिदापयामासतेभ्यो
वस्त्राण्यनेकशः ३६ विसृज्यलोकांस्तान्सर्वान्जननीमभ्यगात्ततः ॥ तवप्रसादान्मातस्तेदृष्टंपादयुगंमया ३७ गृहीतोदैत्यराजेनदेवदेवेनरक्षितः ॥ ततो
हर्षयुतामातालिलिंगतंचिरागतं ३८ अमात्यौराजपत्नीतांनत्वाहतुरुभौतदा ॥ तवपुण्यप्रभावेनदृष्टंतेचरणांबुजं ३९ विनायकस्यमायाभिर्मोहिता
मोचिताश्चह ॥ ततस्तत्रययौराजाभार्यामंबांजगादच ४० निवृत्तेषुचलोकेषुहर्षगद्गदयागिरा ॥ ॥ राजोवाच ॥ ॥ परमंकष्टमापन्नोधृतोदैत्येनतत्क्षणाद्
४१ मोचितोमाययानेनप्रापितोनगरंनिजं ॥ ॥ कउवाच ॥ शुशुभेनगरंतच्चनानावादित्रनिस्वनैः ४२ पताकाभिरनेकाभिर्विविधैश्चमहोत्सवैः ॥ प्रत्या
नीतैःसर्वलोकैर्विनायकबलेनच ४३ कुमाराःकन्यकाश्चापियोषितःपतयोपिच ॥ जनकाश्चजनन्यश्चपुत्राश्चभ्रातरस्तथा ४४ लिलिंगुश्चजहर्षुश्चददृशुर्दा
नान्यनेकशः ॥ बुभुजुर्भोजयामासुर्लोकुश्चपपुर्जगुः ॥ ४५ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेराजमोक्षणंनामएकोनषष्टितमोध्यायः ५९ ॥ कउवाच ॥
ततोनरांतकोदृष्ट्वाविनायकविचेष्टितम् ॥ मेधयातर्कयामासदृष्टमस्याद्भुतंमहद् १ काशीराजेधृतेतेननिर्मितःकालपूरुषः ॥ अखिलावाहिनीतेनभक्षितामम

तांः ४३ गदामुद्गरपट्टीशमहापरशुपाणयः ॥ चक्रतोमरभल्लासिपाशशक्तिकराःपरे ४४ अश्वाअलंकृतानानालंकारैश्चामरैरपि ॥ मनोजवावायुवेगाव्योमै
वाक्रांतुमिच्छवः ४५ ततःसुवर्णरजतमुक्तामणिविभूषितम् ॥ सुवर्णाक्षैर्ध्वजैर्युक्तंनानालंकृतवाजिभिः ४६ नानायुद्धसमूहैश्चधनुर्बाणशतैर्युतम् ॥ कार्त
स्वरमहाचक्रंकिंकिणीजालमंडितम् ४७ महारथीमहामात्योरथमास्थायनिर्ययौ ॥ कृष्णदेहोमहाकायोवीरकंकणशोभितः ४८ लसत्कुंडलसुश्रोत्रोमहा
मुकुटमंडितः ॥ मुक्तासुवर्णमालाढ्योमुद्रिकाखड्गमंडितः ४९ केशरागरुकस्तूरीकर्पूरांगविलेपनः ॥ शुचिरत्नाणिसस्मारनप्रयुक्तानिकुत्रचित् ५० वी
रावेशेनसबभौरोगीशोफांगतोयथा ॥ नानावादित्रनिर्घोषैर्नादयन्दिशोदिशः ५१ वीराविनायकंजेतुंहृष्टागर्जत्यनेकशः ॥ बृंहितैर्हेषितैःक्ष्वेडैरथनोमिस्व
नैरपि ॥ निनादंतंसमाकर्ण्यत्रस्तादेवादरीययुः ॥ एवंनरांतकःकाशीराजस्यनगरीययौ ५३ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेनरांतकनिर्गमनंनामष
ट्पंचाशत्तमोध्यायः ॥ ५६ ॥ ७ ॥ ॥ कउवाच ॥ ॥ तस्मिन्प्रयातेदैत्येंद्रेप्राग्गुल्मेषुगतानराः ॥ धावमानानृपंप्रोचुर्मुक्तवंतंनरांतकः १ आग
तोदैत्यराजोसौचतुरंगबलान्वितः ॥ पौरावादित्रनिर्घोषान्श्रुत्वाचक्रुर्महास्वनान् २ कोलाहलोमहानासील्लोकानांनगरेभृशम् ॥ पलायितादशदिशोलोकाः
प्राणपरीप्सया ३ राजाथभोजनंत्यक्त्वाप्रोत्तस्थौस्पर्शवानिव ॥ कृत्वायुद्धक्षमंवेषंलोकानाज्ञापयत्पुरा ४ सज्जीभवंतुयुद्धायभेरीशब्दमकारयत् ॥ खड्गचर्म
धरोराजानिषंगीचापवान्बली ५ तनुत्राणीचकंकालीपुपूजेतंविनायकम् ॥ जयपूर्वंचतंस्मृत्वानत्वाचाश्वंसमारुहत् ६ तृतीयमानकारावंश्रुत्वासेनाचरायययुः॥
सन्नद्धास्त्वरमाणाश्चपत्त्यश्वस्यंदनैर्गजैः ७ अतिप्रहृष्टास्तेयोधास्त्रैलोक्यग्राससाहसाः ॥ नगर्याःपूर्वभागेसवेदिकायांस्थितोनृपः ८ अमात्यान्सर्ववी
रांश्चददौवस्त्रधनानिसः ॥ उवाचसमयोयंवोदर्शयंतुपराक्रमम् ९ विनायकानुग्रहान्नोनभयंविद्यतेक्वचित् ॥ तथापिबलवान्दैत्योबलाज्जिग्येवसुंध
रां १० जयस्यनियमोनास्तिदैवाधीनाश्चपूरुषाः ॥ नसेनालक्षभागेनविद्यतेतोब्रवीम्यहम् ११ क्वसागरःक्वकुंभोदंक्वखद्योतःक्वरविः ॥ तेनैवरक्षिताःसाम्रा
स्थिताराज्यश्रियावयम् १२ अपराधाःसुबहवोजातानोमस्तकेततः ॥ कियंतोनिहतादैत्याविनायकबलेनच १३ त्यक्त्वासामप्रयातोसौविचारःक्रियतांहि
तः ॥ मुनिरुवाच ॥ तत्राब्रवीन्महामात्योराजानंभयविह्वलम् १४ चतुर्भिर्बुद्धिमद्भिस्त्वंयाहिदैत्यंनरांतकम् ॥ शरणंस्वस्वकार्यार्थेनीचानुशरणंशुभं १५
बृहस्पतिमतंराजन्ब्रवीमितेशृणुष्वतत् ॥ श्रुत्वातत्कुरुराजेंद्रततःक्षेमंभविष्यति १६ ॥ बृहस्पतिरुवाच ॥ कन्याप्रदानसहभोजनवस्त्रदानसामाभिधान
नमनप्रणयप्रमाणैः ॥ तत्कीर्तिकीर्तनतदाप्तजनानुवादमुख्यैरुपायनिचयैरहितान्निवर्हेस्यात् १७ ॥ मुनिरुवाच ॥ सचेद्विनायकंयाचेद्दत्वाराज्यस्यरक्षणं ॥
कर्तव्यमितिमेभातिस्वहितंतद्विचिंत्यताम् १८ ततःसर्वजनाःसाधुसाध्वितिप्राब्रुवन्नृपं ॥ सम्यगुक्तममात्येनवैरच्छेदायभोनृप १९ विचारयत्सुतेष्वेवंदैत्या
स्तेबलवत्तराः ॥ रुरुधुस्तांपुरींसैन्यैःसर्वतेशलभाइव २० मध्येगतान्नरान्दृष्ट्वाददहुस्तांपुरींखलाः ॥ प्रजज्वालमहानग्निश्चतुर्दिक्षुविदिक्षुच २१ धूमेनाच्छा

दितपनोनप्राज्ञायतकिंचन ॥ कल्पांतइवतत्रासील्लोकानामतिदारुणः २२ ध्रीयंतेतेपरैर्यैर्ग्निभयाद्यांतिबहिर्नराः ॥ सबालायोषितश्चापिलिलिंगुश्चुचुंबिरे २३ पतिव्रतास्त्यजुःप्राणान्लज्जयातिपरिप्लुताः ॥ आरुह्यगोपुरंकाश्चिद्देहत्यागंप्रचक्रिरे २४ अपरास्तत्यजुःप्राणान्शस्त्रैःपाशैर्विषैरपि ॥ अतिरम्याधृतादूतैर्नीतास्तास्वामिनंप्रति २५ नरांतकेनभुक्त्वाताःप्रेषितानगरंस्वयम् ॥ एवंतंप्रलयंदृष्ट्वामात्यानूचेनृपःपुनः २६ अस्मत्समक्षंयोषाश्चेनीतादुष्टैर्दुरात्मभिः ॥ तदाऽयशोमहन्नःस्यात्तस्माद्युध्यामहेऽसुरैः २७ एवमुक्त्वास्वमश्वंसप्रेरयन्युद्धदुर्मदः ॥ सज्जंकृत्वाधनुःसद्योबाणवृष्टिमथाकरोत् २८ आच्छादितोरश्मिमालीदैत्यामोहमुपागमन् ॥ धाराधरायथाधाराविमुंचंतितथाधनुः २९ मुंचंतिस्मशरैस्तेतेनिहतादैत्यसंचयाः ॥ केचिन्मृताश्चमग्नाश्चकेचिन्निश्चरणाःकृताः ३० केषांचिदुदरंभग्नंपरेषांबाहवोहताः ॥ केषांचित्स्फोटितानेत्राःकेषांचिदुरवोपिच ३१ अमात्याःसेनयासार्द्धंकाशीराजंसमन्वयुः ॥ खड्गैःपरश्वधैस्तेतान्परवीरान्निजघ्निरे ३२ तदाघातैर्हताःकेचित्पतिताभूतलेपरे ॥ तेपिदैत्यामहाशस्त्रैर्निजघ्नुस्तान्रणाजिरे ३३ अंधकारेमहारौद्रेसेनाधूलिकृतेपरे ॥ निजघ्नुरेवशस्त्रैस्तेवीरान्स्वांश्चपरानपि ३४ मल्लयुद्धंचचक्रुस्तेपरस्परजिगीषया ॥ अश्वारूढैर्गजारूढैरथारूढैःपदातिभिः ३५ पदाताश्चरथारूढैर्युयुधुःशस्त्रसायकैः ॥ एवंसंभ्रांतमभवत्तद्युद्धंतुमुलंपरैः ३६ प्रभग्नादैत्यसेनासातदायातापराङ्मुखी ॥ सिंहनादंचकारोच्चैःकाशिराजोजयान्वितः ३७ हर्षात्सेनांतरंयातोनिघ्नन्युद्धेवरान्वरान् ॥ भिंदन्सेनांमहाघोरांयुद्धावेशीगजोयथा ३८ शतंसहस्रंवीराणांसेनामध्येजघानसः ॥ निघ्नंतंतंतथादृष्ट्वारुरुधुःपरसैनिकाः ३९ राजायमितिबुध्वातेसर्वएवसमाययुः ॥ तच्छराणांमहावृष्टिंसोढ्वादधुर्बलादमुम् ४० अमात्ययोस्तुपुत्राभ्यांसहतेदैत्यपुंगवाः ॥ सेनाचरामहाशब्दंधृतोराजेतिचक्रिरे ४१ ततःसेनाचराराज्ञोधृताःकेचित्पलायिताः ॥ मृताःकेचित्क्षताःकेचिच्छरणंकेपितान्ययुः ४२ महावनेमहोक्षेवबलवद्भिर्वृकैरिव ॥ अमात्यपुत्रसहितंनिन्युर्दूतानरांतकम् ४३ दग्धाचनगरीसर्वानिवार्यैःसैनिकैस्तुसा ॥ ततोनरांतकःस्वीयान्जगादवीरसत्तमान् ४४ यदर्थमागतावीरास्तत्कार्यंसिद्धमेवनः ॥ नमेस्तिगणनातस्यमुनिपुत्रस्यसांप्रतम् ४५ जितेप्रभौजितासेनाजितेदुर्गेजितंपुरम् ॥ काशिराजेजितेबालोजितएवनसंशयः ४६ अथानेष्यतिराजायंबालंनिग्रहतोधुना ॥ एवमुक्त्वाययौवाद्यानिर्घोषैःसतथापुरीं ४७ काशिराजंपुरस्कृत्यस्तूयमानोथबंदिभिः ॥ यच्छन्वस्तूनिबंदिभ्योददौविप्रेभ्यएवच ॥ ४८ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेराजनिग्रह०सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ ऋउवाच ॥ ॥ अर्धमार्गेगतोयावद्धर्षेणासौनरांतकः ॥ तावदेवश्रुतंकाशीराजपत्न्याधृतोनृपः १ अस्यंतंसाशुशोचाथपौरायेचावशेषिताः ॥ आक्रंदःसुमहानासीन्मत्स्यानांनिर्जलेयथा २ अंबासापतिताभूमौधृतेभर्तरिवैरिभिः ॥ मूर्छिताचविवर्णाभूद्रंभावातहतायथा ३ सखीभिःसहितारोदीद्रुदतीप्राब्रवीत्तदा ॥ ॥ अंबोवाच ॥ ॥ सिंहस्येवगजानीकहंतायोरिपुमर्दनः ४ शृगालतुल्यदैत्येनसकथंविधृ

तोबलात् ॥ क्वगतंमत्तमातंगसहस्रंबलाशालिनः ५ बलंभर्तुर्मदीयस्यदैत्यकोटिहरस्यह ॥ कथंरुष्टोमहेशोमेकदाद्रक्ष्येनिजंपतिम् ६ कंदेवंशरणं यामियस्तंशीघ्रंविमोचयेत् ॥ कश्यपस्यास्यबालस्यवराद्युद्धंकृतंवरम् ७ तद्विसर्वंवृथाजातंराज्ञिमूढत्वमागतम् ॥ योबालवचनाच्छ्रेष्ठैर्विरोधंकृतवान्वृथा ८ कोजयेत्तंमहादैत्यंभर्तृग्राहंनरांतकम् ॥ विनासर्वैःकथंकल्पकालःप्राप्तोहताशया ९ अहंचधरणीचापिकथंवैधव्यमागता ॥ नतादृशःक्वापिजातोकरुणाब्धिः शरण्यदः १० ॥ ॥ मुनिरुवाच ॥ ॥ एवंतच्छोकमाकर्ण्यकश्यपस्यात्मजोबली ॥ शब्देनमहतागर्जन्ब्रह्मांडस्फोटकारिणा ११ प्रतिशब्देन गगनंजगर्जचदिशोपिच ॥ चकंपेधरणीसर्वासपर्वतवनाकरा १२ पक्षिणःपतितास्तेनमृताभ्रांताजनास्तदा ॥ ततःसिंहंसमालोक्यक्रोधव्याकुल लोचनः १३ क्वगतासिमहायुद्धप्रसंगेप्राहतामिति ॥ सातदाशयमालक्ष्यचक्रेनानाविधांचमूम् १४ विकरालमुखावीराःप्रादुरासन्सहस्रशः ॥ हलदंताःसर्पजिह्वानराःपर्वतमस्तकाः १५ दारितास्यास्तुभूगोलमकस्माद्ग्रसयिष्णवः ॥ आस्यानलंविमुंचंतःशतनेत्रामहाबलाः १६ येषांनामारं भ्रगतानदृश्यंतेमहागजाः ॥ सूर्याचंद्रमसौयेषांश्वासान्निपतितौभुवि १७ जटाभिःपृथिवीयेषांसर्वासंमार्ज्यतेभृशम् ॥ सहस्रयोजनहस्ताद्विगुणाश्च तदंघ्रयः १८ तेषांतुनायकःक्रूरोविनायकसमीपतः ॥ आगतःपरिपप्रच्छकिंकार्यंवदमेप्रभो १९ देहिमेक्षुधितस्यादौभक्ष्यंतृप्तिकरंप्रभो ॥ इत्यु क्तवंतंपुरुषमुवाचसविनायकः २० भक्षयस्वमहासेनांनरांतकमुपालिताम् ॥ हत्वातुतच्छिरोमह्यमानयस्यत्वरान्वितः २१ तत्सैन्येननतृप्तिश्चेद्दास्येभ क्ष्यांतरंतव ॥ एवमाज्ञामनुप्राप्यनत्वातंकश्यपात्मजम् २२ महाक्ष्वेडितशब्दंतुकृत्वायातोनरांतकम् ॥ तस्यक्ष्वेडितशब्दस्यताद्यूपेणसैनिकाः २३ नरां तकोपिभीतास्तेदुद्रुवुस्तेदिशोदश ॥ हस्तेधृत्वातुतान्सर्वान्मुखमध्येसमाक्षिपत् २४ उद्धुधूलरजोभौमंनप्राज्ञायतकिंचन ॥ अंधकारेमहाघोरेदीपिकाभिर्व्य लोकयन् २५ तंदृष्ट्वापुरुषंघोरंकेचित्प्राणान्प्रजज्ञिरे ॥ तांश्चापिजीवतःसर्वांस्त्वरयाभक्षयत्यसौ २६ नरांतकस्तुदृष्ट्वैवंसर्वंसैन्यविनाशनम् ॥ अतर्क यत्स्वमनसाकृतांतस्यांतकोपरः २७ आगतःकिंमयाकार्यंदृश्यतेबलवानयम् ॥ एवंवदन्ददर्शाथसेनामद्यौतुभक्षिताम् २८ प्रलयानलवच्चायंपृतनां हरतेबलात् ॥ निःशेषामेवकर्तामुमगस्त्यइववारिधिम् २९ दैत्यसेनाचराःसर्वेमहाशब्दान्प्रचक्रिरे ॥ केचिच्चभक्षितास्तेनचूर्णिताःपादघाततः ३० श्वासानिलाहताःकेचित्केचिद्भीत्यैवमाद्रिरे ॥ परस्परोपरितदावीरानिपतिताःपरे ३१ याहियाहीतिवक्त्रातुंचुक्रुशुस्तंनरांतकम् ॥ करावातेननिहतान् भक्षयत्येषतत्क्षणात् ३२ असंख्यभक्षणादस्यनशांतोजठरानलः ॥ अश्वारोहागजारोहाःपदातारथसादिनः ३३ भक्षितानिहतावाहागजाश्चानेक शोमुने ॥ एवंकोलाहलंश्रुत्वासज्जंकृत्वाधनुर्बलात् ३४ धरण्यांजानुनीस्थाप्यशरानुभयतस्तथा ॥ आदायधनुराकृष्यशरवृष्टिंतदाकरोत् ॥ ३५ ततोंधकारमभवच्छरवृष्टिकृतंपुनः ॥ पक्षिणःपतिताभूमौराज्ञोभृत्याजनेकशः ३६ सगीलयतिपुरुषोबाणान्दैत्यसर्मारितान् ॥ असंख्या

ताःशरास्तस्यरोमकूपेषुनिर्गताः ३७ स्रवंतोरुधिरंसर्वेनजानात्यणुवेदनाम् ॥ प्रादुश्चक्रेततोस्त्राणिपौरुषेणनरांतकः ३८ तान्यस्त्राण्यगिलत्सर्वाण्यंडा न्याजगरीयथा ॥ कुंठितास्त्रःक्षीणशस्त्रोनष्टसायकसंचयः ३९ क्षीणशक्तिःपपालासौदैत्यराजोनरांतकः ॥ सकालपुरुषस्तस्यपृष्टएवालगत्त दा ४० बभ्रामभूतलेदैत्योपश्यत्पृष्ठेतुतंयदा ॥ तदास्वंगेजगामाशुभयात्तस्यनरांतकः ४१ पुनःपृष्ठेचतंदृष्ट्वापपातधरणीतले ॥ तत्रापितंददर्शाथप्राविशद्धरणीतलम् ४२ सकालपुरुषःकेशेततोदध्रेनरांतकम् ॥ बिलंविशंतमुरगंगरुडोतिबलंयथा ४३ ततोनरांतकंप्राहपुरुषःसबलान्वितः ॥ क्वगमिष्यसिदृष्टःसन्ममाग्रेत्वंनरांतक ४४ ईश्वरस्यवरान्मत्तोवृथादेवर्षिपीडनम् ॥ मनुष्याणांचसंहारमनंतानांमहाखल ४५ तवसंहरणेदुष्टावतीर्णोस्तिविनायकः ॥ अहंकारंचमकलंत्यक्त्वातंशरणंव्रज ४६ अघानितेविनश्यंतिदृष्ट्वातत्पादपंकजम् ॥ इत्युक्त्वातंबलाद्दैत्यमानिनायनरांतकम् ४७ विनायकस्यनिकटेदैत्यराजंपरंततः ॥ उवाचाथप्रणम्यासौस्वामिनंतंविनायकम् ४८ भक्षितंसर्वसैन्यंतेआज्ञांप्राप्यमहत्तरम् ॥ अत्यंतंक्षेशितोनेनधृत्वैनंत्वांसमानयम् ४९ ममनिद्रास्थलंयच्छश्रमापनुत्तयेविभो ॥ सर्वेषांचसुखायास्यमुक्तिंयच्छविनायक ५० एवंतद्वाक्यमाकर्ण्यतंविभुःप्रत्यभाषत ॥ ममवक्त्रांतर्गतस्त्वंनिद्रांप्राप्नुहिस्वेच्छया ५१ इत्याकर्ण्यमहावाक्यंविनायकमुखोद्गतम् ॥ तन्मुखंप्रविवेशाथतद्रूपंसमपद्यत ५२ यथागंधोघराजातस्तत्रैवपरिलीयते ॥ तथाविनायकाज्जातस्तत्रैवलयमाप्तवान् ५३ यइदंशृणुयाद्भक्त्यामहदाख्यानमुत्तमम् ॥ सर्वान्कामानवाप्याथमुक्तिंचलभतेध्रुवं ५४ इतिश्रीगणेशपुराणेउत्तरखंडेनरांतकनिग्रहोनामअष्टपंचाशत्तमोध्यायः ॥५८॥ ॥ मुनिरुवाच ॥ ॥ विनायकेनबालेनकुतःसपुरुषःकृतः ॥ येनतद्भक्षितंसैन्यमानीतःसनरांतकः १ एतन्मेप्रकटंब्रूहिसंशयोत्रमहान्मम ॥ ॥ कउवाच ॥ ॥ यन्निर्गुणंपरंब्रह्मतदेतत्सगुणंबभौ २ विनायकस्वरूपेणब्रह्मविष्णुशिवात्मकम् ॥ भूभारहरणार्थायदुष्टानांनिधनायच ३ पालनायस्वधर्मस्यबिभ्रतेनंतरूपताम् ॥ सएवसृजतेविश्वंपातिहंतिस्वतेजसा ४ अपेक्षतेसलोकानांनिमित्तंनियतिंपराम् ॥ नचात्रसंशयःकार्योनिकमायामयेविभौ ५ तदिच्छयासर्वमिदंजगद्विपरिवर्तते ॥ इदानींतस्यमायांतेकथयिष्यामिविस्तरात् ६ अमात्यपुत्रसहितोनरांतकधृतोनृपः ॥ यावन्नपत्तनंप्रापतावत्कालंपुमानसौ ७ भक्षयामासतांसेनांदैत्येनपरिपालिताम् ॥ विनायकेनपुरुषोमुखेसैन्यंनिहितस्तदा ८ राजामात्यकुमारौचसोपितेसर्वएवतु ॥ जठरेतस्यदेवस्यददृशुःसकलंजगत् ९ सप्तद्वीपवतींपृथ्वींपर्वतद्रुमसंयुताम् ॥ सरित्सागरवापीभिस्तडागैर्मानवैःश्रिताम् १० देवगंधर्वमुनिभिःसिद्धयक्षनिशाचरैः ॥ पन्नगैरप्सरोभिश्चशोभितंस्वर्गमंडलम् ११ पातालानिचसप्तानिभ्रमंतोददृशुस्तदा ॥ एवंतेजठरेतस्यकोष्ठेकोष्ठेपृथक्पृथक् १२ ददृशुर्भ्रांतमनसोब्रह्मांडनिचयान्बहून् ॥ खिन्नास्तेशरणंजग्मुर्देवदेवंविनायकम् १३ मनसाप्रार्थयामासुस्तदादेवंविनायकम् ॥ श्रांतानांखिन्नचित्तानांकृपांकुरुकृपानिधे १४ तदस्तान्बालरूपेणमार्गमादर्शयद्विभुः ॥ ततोरोमांचमार्गेणबहिर्यातायथापुरा १५

ददर्शकाशिराजःस्वंनगरंभद्रमेवच ॥ कश्यपस्यात्मजंबालंक्रीडतंतंविनायकम् १६ तत्प्रसादादाप्तबुद्धिर्नुनावपरयामुदा ॥ ज्ञातातेपरमामायामयाकु
क्षिगतेनच १७ त्वमेवकर्तादेवानांमनुष्याणांदिशामपि ॥ सर्गाणांसागराणांचसरितांबलिसद्मनाम् १८ यतस्तेरोमकूपेषुब्रह्मांडानांहिकोटयः ॥ दृष्ट्वाभां
तेनचमयाप्रसादात्तवनाथभो १९ आश्चर्यंबहुधादृष्टंमयातवचविश्वविद् ॥ अहंयुद्धायसंप्राप्तोध्वजिनीपुनरागता २० नरांतकस्यसैन्येनसाजिताता
रक्षणादनु ॥ अमात्यपुत्रसहितोनरांतकमुपाद्रवम् २१ विधृतस्तेनसहसासैन्यंजित्वाममक्षणाद् ॥ दग्धाचनगरीसर्वादृष्टःसकालपूरुषः २२ तेनापिभक्षि
तातस्यसेनानानाविधाक्षणाद् ॥ धृत्वानरांतकंयातःपुरुषःसतवांतिकम् २३ सर्वेत्वदुदरंयातास्तत्रदृष्टोसिमेप्रभो ॥ सर्वेदृष्टंचतत्रापिजंबूद्वीपंसविस्तरम् ॥
२४ एवंकोष्ठांतरेदृष्टंभूतलंचसविस्तरम् ॥ ततोहिखिन्नास्त्वांयाताःशरणंजगदीश्वर २५ त्वदाज्ञयातुरोमांचद्वारेणनिर्गताबहिः ॥ पुनर्दृष्टोसिबालस्त्वंनिजं
चभवनंमहत् २६ किमिदंकौतुकंदेवमायाजालमिदंविभो ॥ कश्चासौपुरुषोदेवयेनाभक्षिमहाचमूः २७ केनासौविधृतोदैत्योरक्षितश्चापिकेनच ॥
केनादर्शिचरोमांचद्वारंनिर्गमनायच २८ इतिमेसंशयंदेवनुदभक्तस्ययतनतः ॥ ॥ कउवाच ॥ एवंतेनकृतःप्रश्नोमस्तकेतस्यधीमतः २९ विना
यकःकरतलंकृपयानिदधारह ॥ दिव्यज्ञानोभवद्राजाकाशीराजस्तुतत्क्षणाद् ३० तुष्टावपरयाभक्त्यादेवदेवंविनायकम् ॥ ॥ राजोवाच ॥ त्वमेवब्रह्मा
विष्णुश्चमहेशोभानुरेवच ३१ त्वमेवपृथिवीवायुरंतरिक्षंदिशोद्रुमाः ॥ पर्वतैःसहिताःसिद्धागंधर्वायक्षराक्षसाः ३२ मुनयोमानवाश्चापिस्थावरंज
गमंजगत् ॥ त्वमेवसर्वंदेवेशसचेतनमचेतनम् ३३ जन्मांतरीयपुण्येनदृष्टोसिकश्यपात्मज ॥ ॥ कउवाच ॥ एवंब्रुवतिराजेंद्रेमोहयामासतत्क्षणाद् ॥
३४ ततोराजापुपूजैनंविनायकमनामयं ॥ ततःपौराहर्षयुताराजानंद्रष्टुमाययुः ३५ नत्वानत्वाददुस्तस्मैवस्त्राण्याभरणानिच ॥ राजापिदापयामासतेभ्यो
वस्त्राण्यनेकशः ३६ विसृज्यलोकांस्तान्सर्वान्जननीमभ्यगात्ततः ॥ तवप्रसादान्मातस्तेदृष्टंपादयुगंमया ३७ गृहीतोदैत्यराजेनदेवदेवेनरक्षितः ॥ ततो
हर्षयुतामातालिलिंगतंचिरागतं ३८ अमात्यौराजपत्नीतांनत्वाहतुरुभौतदा ॥ तवपुण्यप्रभावेनदृष्टंतेचरणांबुजं ३९ विनायकस्यमायाभिर्मोहिता
मोचिताश्चह ॥ ततस्तत्रययौराजाभार्यामंबांजगादच ४० निवृत्तेषुचलोकेषुहर्षगद्गदयागिरा ॥ ॥ राजोवाच ॥ ॥ परमंकष्टमापन्नोधृतोदैत्येनतत्क्षणाद्
४१ मोचितोमाययानेनप्रापितोनगरंनिजं ॥ ॥ कउवाच ॥ शुशुभेनगरंतच्चनानावादित्रनिस्वनैः ४२ पताकाभिरनेकाभिर्विविधैश्चमहोत्सवैः ॥ प्रत्या
नीतैःसर्वलोकैर्विनायकबलेनच ४३ कुमाराःकन्यकाश्चापियोषितःपतयोपिच ॥ जनकाश्चजनन्यश्चपुत्राश्चभ्रातरस्तथा ४४ लिलिंगुश्चजहर्षुश्चददुर्दा
नान्यनेकशः ॥ बुभुजुर्भोजयामासुर्लोकुश्चपपुर्जगुः ॥ ४५ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेराजमोक्षणंनामएकोनषष्टितमोध्यायः ५९ ॥ कउवाच ॥
ततोनरांतकोदृष्ट्वाविनायकविचेष्टितम् ॥ मेधयातर्कयामासदृष्टमस्याद्भुतंमहत् १ काशीराजेधृतेतेननिर्मितःकालपूरुषः ॥ अखिलावाहिनीतेनभक्षितामम

वंशः २ अमात्यपुत्रसहितोराजासावुदरंगतः ॥ अन्यंगोबाहिरानीतोदर्शोविश्वंनृपस्यहं ३ अस्मादमुक्तिश्चमुक्तिश्चभवितामेनसंशयः ॥ तस्मादेनंहनिष्यामिमामयंवाहनिष्यति ४ इत्येवंनिश्चयंकृत्वाप्रोवाचसविनायकम् ॥ दैत्यउवाच ॥ ऐंद्रजालिकविद्येयंदर्शितावहुधात्वया ५ नाहंबिभेमितस्यास्तुमायावीचनरांतकः ॥ यस्यनिश्वसितेनापिनिपतंतिमहाद्रयः ६ भ्रूक्षेपमात्रेणचमेब्रह्मांडंकंपतेभृशम् ॥ यस्यहस्ततलाघाताद्भूगोलोपिविधाभवेत् ७ तेनत्वंबालरूपःसन्कथंयुद्धंकरिष्यसि ॥ योव्याघ्रसंमुखंगच्छेत्सकथंसुखमेष्यति ८ ॥ कउवाच ॥ इतिब्राह्मींसमाकर्ण्यनरांतकसमीरितां ॥ अब्रवीत्परमात्मासौबालरूपीविनायकः ९ ॥ विनायकउवाच ॥ किमर्थंवल्गसेमूढयदातेपृतनाखिला ॥ भक्षिताक्वगताशक्तिर्यदर्थंकथ्यतेमुहुः १० शूराःशौर्यंदर्शयंतिनगांपरबलारुजां ॥ वृश्चिकेनाल्पकायेनमृगेंद्रोहन्यतेक्षणाद् ११ अल्पेनहिप्रदीपेननश्यतेप्रबलंतमः ॥ यस्यसंनिहितोमृत्युःसन्निपातात्सलीयते १२ अल्पेनक्षणिनामत्तमातंगोहिनियम्यते ॥ कउवाच ॥ इतिश्रुत्वातुवाक्यानिदेवप्रोक्तानिदैत्यराट् १३ चकंपेपरयाभीत्याजगर्जघनवद्दृढम् १४ भीषयन्रोदयन्रावैःकंपयन्भूमिमंडलं ॥ अधावत्परमावेशोहंतुकामोविनायकम् १५ यथापतंगोदीपार्चिर्हंतुंयातित्वरान्वितः ॥ त्रिवक्रांभ्रुकुटींबिभ्रावम न्नास्येनपावकम् १६ तंतथायांतमालोक्यकाशिराजोनिजंधनुः ॥ सज्जीचकारसहसाकर्णमाकृष्यसायकम् १७ उवाचसाम्नादैत्यंतंनिर्लज्जंबद्धमोचितम् ॥ माजीवंत्यजदैत्येंद्रजीवन्भद्राणिपश्यसि १८ परावृत्यप्रयाहित्वंनोचेन्मृत्युंप्रयास्यसि ॥ कउवाच ॥ इतितद्वाक्यमाकर्ण्यप्राहदैत्योरुषाज्वलन् ॥ १९ ॥ नरांतकेतिमेनामत्वादृशानांहिभक्षणाद् ॥ इदानींशरणंयाहियदिजीवितुमिच्छसि २० पुनर्नृपोब्रवीद्वाक्यंमुमूर्षुंतंनरांतकम् ॥ विनाशसमयेमूढविपरीतामतिर्भवेद् २१ मित्राणिशत्रुतांयांतिविपरीतेप्यनेहसि ॥ त्वयाप्याचरितंपापंवरगर्वादनेकशः २२ वरस्यैवप्रभावेणनवज्रंगणितंत्वया ॥ इदानीमवतीर्णोयं त्वादृशानांवधायच ॥ कश्यपस्यात्मजोभारंहर्तुंभूमिगतंदृढम् ॥ वरःपुण्यंचशिथिलंजातंतेपापसंचयात् २४ भारतीमेवमाश्रुत्यचकंपेहृदिदैत्यराट् ॥ धावयित्वानृपकराज्जगृहेसशरंधनुः २५ बलाच्चिक्षेपभूमौतच्छतधाचव्यशीर्यत ॥ जघन्मुष्टिघातेनतंनृपंसनरांतकः २६ पतितःसधरापृष्ठेवज्राहतइवाचलः ॥ दृष्ट्वाविनायकोधावत्स्तृणिहस्तोमहाबलः २७ गर्जयन्गगनंसर्वादिशश्चविदिशःस्वनैः ॥ चकंपेपृथिवीसर्वादिशःप्रज्वलिताइव २८ तेजसापरशास्तस्य सर्वदृष्टिहरेणच ॥ तेनाहनद्दैत्यशिरोयथेंद्रोगिरिमुत्कटम् २९ तथाहतोदैत्यराजोनिपपातमहीतले ॥ मूर्छनांमहतींप्राप्तोमर्मभिन्नोयथाश्मना ३० उदतिष्ठत्क्षणाद्दैत्योहस्ताभ्यांपर्वतावुभौ ॥ प्रगृह्यचप्रचिक्षेपविनायकजिघांसया ३१ शतधाचूर्णितौतेनमुदापरशुघातिना ॥ माययादैत्यराजोथनानारूपधरोभवत् ३२ यद्यद्रूपंचकाराशुतत्तद्रूपंविनायकः ॥ भग्नदर्पंचकाराशुतेनतेनमहासुरम् ३३ शस्त्रैःशस्त्राणिसंवार्यतथास्त्रैरस्त्रसंचयम् ॥ ततस्तुमल्लयुद्धेनयुयुधातेपरस्परम् ३४ चरणंचरणेनैवहस्तंहस्तेनजघ्नतुः ॥ जानुभ्यांजानुनीचोभौपुष्पितावितर्किंशुकौ ३५ वक्षसाचैववक्षश्चपेततुर्धरणीतले ॥ पुनरु

त्थायबलिनौकूर्पराभ्यांनिजघ्नतुः ३६ पुनर्दैत्योमहोदेवंस्मृत्वावृक्षानवासृजत् ॥ पृष्ठेनपृष्ठंधावंतौललाटेनललाटकम् ३७ स्रवंतौरुधिरंचोभौगुल्फाभ्यांगुल्फ
मेवच ३८ पर्वतांश्चसवृक्षांश्चविनायकजिघांसया ॥ अप्राप्तानेवतान्सर्वांश्चिच्छेदसविनायकः ३९ पद्मपाशांकुशाघातैःपरशोर्दृढकर्मणा ॥ तस्यांनिवारिता
यांतुदैत्योमुंचत्तथापराम् ४० वृष्टिमन्यांतथाचान्यांनिरस्तांवीक्ष्यचापराम् ॥ काशिराजोययौदूरंमृतंज्ञात्वाविनायकम् ४० विनायकोपिसंक्लेशाद्दादिचिं
तामथाकरोत् ॥ असंख्यातबलोदैत्योजयोपायोनदृश्यते ४२ कदादेवाःस्वनिलयंप्राप्स्यंतिनिहतारयः ॥ नरांतकोपिसंजातोदेवानामप्यथांतकः ४३ एवं
चित्तेचिंतयतिवारंवारंविनायके ॥ तूणेषुपतिताबाणाःकालदंडोपमादृढाः ४४ पिनाकोष्टापदमयःपुरस्तस्यपपातह ॥ शोभयंस्तेजसास्वेनदिशश्चविदिशो
पिच ४५ कार्मुकंतुस्फुरत्कांतिदृष्ट्वासर्वेजहर्षसः ॥ मेनेजितंतंचदैत्यंसिद्धंचदेवकांक्षितं ४६ जग्राहबाणान्कोदंडंकृत्वाश्वेडितमुच्चकैः ॥ पिनाकंतोल
यामाससज्जंचक्रेधनुस्तदा ४७ पृथिव्यांजानुनीस्थाप्यतूणौचोभयतस्तथा ॥ तद्धनुःशब्दमाकर्ण्यचकंपेभुवनत्रयम् ४८ सव्यदक्षिणहस्ताभ्यामाकृ
ष्यसायकद्वयम् ॥ मुमोचैदैत्यमालक्ष्यमुंचन्नग्निकणान्मुहुः ४९ पपातदैत्यभुजयोरकस्मात्सायकद्वयं ॥ गर्जत्प्रकाशयद्व्योमसंहरज्जीवसंचयान् ५० उल्कै
वपातयामासभुजौवृक्षाविवास्यतत् ॥ यथेंद्रोवज्रघातेनपर्वतस्येवसानुनी ५१ नरांतकद्वारदेशेमहानेकोपतत्करः ॥ अपरस्तत्पितुर्द्वारिचूर्णयन्प्राणि
संचयान् ५२ अन्यावास्तांकरौतस्यददर्शचविनायकः ॥ अभ्यधावत्पुनर्दैत्योव्यादितास्यइवांतकः ५३ हस्ताभ्यांतत्रपादाभ्यांचिक्षेपपादपान्बहून् ॥ द्रुमा
णांचमहावृष्टिंप्राक्षिपत्सविनायके ५४ अंधकारंमहच्चासीन्नप्राज्ञायतकिंचन ॥ ततोब्रवीद्दैत्यराजंदृष्ट्वावीर्यंविनायकः ५५ ॥ ॥ इतिश्रीगणेशपुराणेउत्तर
खंडेषष्टितमोऽध्यायः ॥ ॥ ६० ॥ ॥ विनायकउवाच ॥ ॥ नेदृशोदृष्टपूर्वोमेबलीचवीर्यवत्तरः ॥ इदानींपौरुषंपश्यममबालस्यचेष्टितम् १ इत्युक्त्वापु
नरेवासौबाणंतूणादकर्षयत् ॥ आकर्णंधनुराकृष्यप्राक्षिपत्तंनरांतकम् २ प्रकाशयन्व्योमतलंपातयन्वृक्षसंचयम् ॥ आंदोलयन्निवययौपुष्पवत्तंनरांतकं ३
सबाणोछेदयत्तस्यचरणौसपपातह ॥ अर्धकायेनिपतितेदैत्येगर्जद्विनायकः ४ चरणौव्योममार्गेणभ्रमंतौपतितौगृहे ॥ देवांतकस्यमहतिचूर्णयंतौबहू
न्जनान् ५ अर्द्धकायःसदैत्येंद्रोमुखंकृत्वाभयानकं ॥ अभ्यधावद्बलेनासौग्रसन्निवजगत्त्रयम् ६ तथैवचरणावस्यमाययासंबभूवतुः ॥ विनायकस्यानिक
टेबभाषेभ्येत्यदैत्यराट् ७ त्वयायदर्शितंमह्यंपौरुषंकायभेदनात् ॥ छेत्स्येतवापिचांगानिपश्यमेपौरुषंतथा ८ श्रुत्वावाक्यंपुनस्तस्यजगर्जासौविनायकः ॥
शरवृष्टिंपुनारौद्रांअसृजद्दैत्यपुंगवे ९ सोपितांभक्षयामाससंख्यातीतांमहाबलः ॥ ततएकंमहाबाणंअभिमंत्र्यविनायकः १० अग्नितुंडरुक्मपुंखंगर्ज
मानंभयानकम् ॥ आकर्णंज्यामपाकृष्यतत्याजदैत्यमस्तके ११ सययौवायुवेगेनदारयन्निवपर्वतान् ॥ संहरन्पक्षिसंघातान्पातयन्वृक्षसंचयान् १२
श्रुत्वातदीयनिनदंययुःसेनादिशोदश ॥ पपातदैत्यकंठेसगिरिसानौयथापविः १३ तदाघाताच्छिरोप्यस्यपक्षीवगगनंययौ ॥ न्यपतत्परिकूजत्तत्पितुर्गे

हेभयानकम् १४ पुनरन्यच्छिरोस्याभूदच्छिन्नमिवपूर्ववत् ॥ ततःकोपेनदैत्योपिचक्रेक्ष्वेडितमुच्चकैः १५ बिभ्युःसुराःपक्षिसंघाःसर्वेचजनसंचयाः ॥
धरवृष्टिपुनारौद्रांचक्रेतस्मिन्विनायके १६ ससर्वांबाणवृष्ट्यैवमध्येचिच्छेदलाघवात् ॥ अहोरात्रमभूद्युद्धंगिरिबाणमयंनवम् १७ परिशश्रामदेवो
पिसोपिदैत्योमहाबलः ॥ चिंतामवापमहतींप्रजज्वालचतेजसा १८ ततोजग्राहपरशुंज्वालामालासमाकुलम् ॥ तोलयामासबलवांश्चकंपेधरणीतदा १९
विमानगाःसुराःसर्वेयुद्धंद्रष्टुमुपागताः ॥ चकंपिरेतदाशेषोबिभायचरसातले २० अवासृजद्दैत्यपतौसतस्याशुशिरोहरत् ॥ पुनरन्यदभूच्चारुशिरोमुकुट
कुंडलम् २१ पुनस्तत्पातयामासशिरःक्रुद्धोविनायकः ॥ पुनरन्यदभूत्तस्यच्छिन्नेतस्मिन्पुनःपुनः २२ एवंशतसहस्राणिशिरांसिसोच्छिनद्विभुः ॥ पु
नश्चिंतयामासमृतौदैत्यस्यकारणम् २३ मोहयामाससहसामाययातंनरांतकम् ॥ शिवस्यवरदानेनगर्वितंबलवत्तरम् २४ नाज्ञासीच्चतदादैत्योपरंचा
त्मानमेवच ॥ क्षणाच्चभासतेरात्रिःक्षणाच्चदिनमेवच २५ क्षणाच्चभासतेस्वर्गःपृथ्वीपातालमेवच ॥ जागरश्चसुषुप्तिश्चतुरीयास्वप्नएवच २६ विनायको
पिदेवोवानारीवापुरुषोपिवा ॥ गुह्यकोवास्थसिद्धोवायक्षोराक्षसएवच २७ स्वकीयोवापरोवापिपितावाजननीतुवा ॥ निर्जीवोवासजीवोवाभ्रमादेवम
मन्यत २८ चिंतांचपरमामापतर्कयामासचेतसि ॥ एवंमेतुवरादत्ताःशिवेनशूलधारिणा २९ अयंचसमयःप्राप्तःप्रायोमृत्युर्भविष्यति ॥ ॥ कउवाच ॥ ॥
एवंयावच्चिंतयतेपुरस्तावद्ददर्शसः ३० विनायकंविराड्रूपंगगनोर्ध्वगमस्तकम् ॥ पातालव्याप्तचरणंदिक्श्रोत्रंवृक्षरोमकम् ३१ भ्रमद्ब्रह्मांडरोमांचंपयो
धिश्रमबिंदुकम् ॥ नखाग्रेयस्यदेवानांभांतित्रिंशत्त्रिकोटयः ३२ उदरेभांत्येकदेशेभुवनानिचतुर्दश ॥ ततोविनायकोदैत्यंमर्दयामासतत्क्षणात् ३३ पा
दांगुष्ठनखाग्रेणमत्कुणंबालकोयथा ॥ ततोदेवाश्चमुनयोजयशब्दैर्मुहुर्मुहुः ३४ तुष्टुवुर्मुमुचुःपुष्पवृष्टिंभक्त्याप्रहर्षिताः ॥ अंतर्हितेतुवैराटेरूपेगाद्धरणीविभु
म् ३५ नत्वाप्रोवाचदेवेशअर्धभारोत्वतोमम ॥ पूर्णेत्वतेपराप्रीतिर्मेस्यात्तस्मात्सदाकुरु ३६ तस्यामंतर्हितायांतुकाशीराजःपुपूजतम् ॥ उवाचचप्रसन्नात्मा
विनयावनतोनृपः ३७ अत्याश्चर्यंविभोदृष्टंमनोवाण्योरगोचरम् ॥ अवतीर्णोसिभूभारंहर्त्तुतच्चकृतंत्वया ३८ त्रयस्त्रिंशत्कोटिदेवैरवध्योयंहतोयतः ॥ अतिपुण्येनद
ष्टंतेविराड्रूपंसुरेश्वर ३९ ॥ कउवाच ॥ एवंब्रुवतिराजेंद्रेपौराःसर्वेब्रुवंस्तदा ॥ धन्योसिबालभावेनसर्वान्नोभ्रामयस्यहो ४० यशःप्रथयितुंसर्वंकृतमेतद्विभो
त्वया ॥ पुपूजुश्चमहाभक्त्याप्रार्थयन्नितितंविभुम् ४१ भक्तिंतेदेहिनोदेवस्ववियोगंचमाकुरु ॥ ततोराजाचतेलोकाददुर्दानान्यनेकशः ४२ ब्राह्मणान्प्रा
र्थयामासुरेवमेवजयोस्तुनः ॥ उपायनानिचतदाददूराज्ञेपरस्परम् ४३ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेदैत्यदमनंविराड्दर्शनंनामएकषष्टितमोध्या
यः ॥ ६१ ॥ ॥ ७ ॥ ॥ कउवाच ॥ ॥ रौद्रकेतोस्तुयाभार्याशारदाख्याद्विजस्यसा ॥ विदर्भ्यामुपविष्टासासखीभिःकौतुकान्विता १ नरां
तकस्यचशिरोकस्मात्ताभिर्ददर्शह ॥ पतितंप्रांगणेकर्णकुंडलाभ्यांविराजितम् २ नादयत्पत्तनंसर्वंशिखरंपार्वतंयथा ॥ श्यामलंहिमसंसृष्टंविशाभंकमलंय

था ३ बिभ्यतोरौद्रकेतुश्चशारदाघातविह्वला ॥ सावधानोदहशतूरुदंतःस्मभृशंतदा ४ लुंठतःस्मधरण्यांतौताडयंतौचवक्षसि ॥ मूर्च्छामवापतुरुभौमुहू
र्तादिवचेतनाम् ५ माताशुशोचचतदाहृदिस्थाप्यचतच्छिरः ॥ चक्रंदेविह्वलासागौर्मृतवत्सायथाभृशम् ६ ॥ शारदोवाच ॥ वीरश्रियाव्याप्ततनूरणायैवस
मुत्सुकः ७ प्रोक्तवान्नहिकिंचिन्मामिदानींगिरमाहर ८ क्वगतःपूर्वकायस्तेशिरसैवसमागतः ॥ एकाकीकथमायातःक्वतेसैन्यंमहत्तरं ९ क्वतेजलधरायाताश्छत्रचा
मरधारिणः ॥ यंदृष्ट्वावरकामिन्योम्लायंतेविरहाग्निना १० सकथंम्लानतांयातोरविरस्तानुगोयथा ॥ किंमयाह्यपराद्धंतेपित्रावावत्सलेनच ११ किमर्थंवदसे
नैवरुददश्रुप्रमार्ज्यनः ॥ पराध्यास्तरणोपेतेमंचकेस्वापतत्परः १२ क्वेदानींपरिसुप्तोसिखिद्यतेमेमनोभृशम् ॥ विनाभूतौत्वयानेशावास्यंसंदर्शितुंसुत ॥
१३ ॥ ॥ कउवाच ॥ ॥ शारदायाःशुचंश्रुत्वारौद्रकेतुःशुशोचह ॥ विनावृत्तांतकथनात्क्वगतोसिप्रियात्मज १४ प्रत्यहंसर्ववृत्तांतंजातंभाविनमेवच ॥ सं
श्रावयसिस्वस्थानमिदानींकिन्नभाषसे १५ यदित्वंसंमुखेयुध्यन्धारापूतोदिवंगतः ॥ मामपृच्छ्यचमांत्यक्त्वाकथंत्वंपरिजग्मिवान् १६ कथंत्वया
कृतापित्रोःपुत्रताशत्रुतापिच ॥ यदात्वंसेवकंकरात्खड्गंगृण्हासिस्वंकरे १७ तदासपर्वतवनासस्वर्गाकंपतेचभूः ॥ सकेनपातितोमह्यांनजानेकालपर्ययम्
१८ दैवंहिबलवल्लोकेपौरुषंतुनिरर्थकम् ॥ भूषणंममवंशस्यलोकस्यचगतंक्वनु १९ लोकस्यापिचयःकालःपंचास्योरिगजस्ययः ॥ सकथंत्वंद्विधाभूतो
वाताहतइवद्रुमः २० प्रतापसवितारंजनयंतूलदाहहुताशनः ॥ ॥ कउवाच ॥ ॥ एवंनानाविधंशोकंरौद्रकेतुश्चशारदा २१ कृत्वामूर्धानमादायदेवांत
कमगच्छताम् ॥ भद्रासनात्समुत्थायत्वरयातौतथाविधौ २२ दृष्ट्वाकंठंसमालिंग्यरुरोदावरजंतदा ॥ तत्परीवारभूतायेदैत्याःकालयमोपमाः २३ रुरुदुः
सुस्वरंतत्रदृष्ट्वानारांतकंशिरः ॥ मातुर्हस्ताच्छिरोगृह्यतत्स्नेहादिनिधायच २४ चक्रंदकुररीवासौभ्रातृस्नेहेनदुःखितः ॥ ॥ देवांतकउवाच ॥ ॥ समंभु
क्तंसमंपीतंक्रीडितंसुप्तमुत्थितम् २५ समंतप्तंसमंजप्तंक्वगतोसिविहायमाम् ॥ यस्यतेदर्शनान्मर्त्याःसुरायांतिदिशोदश २६ सकथंनिहतःकेनदुष्टेनच
बलीयसा ॥ रसारसातलंचैवतवैवचनिवेदितम् २७ विहायमांकथंस्वर्गंगतोसिभ्रातृवत्सल ॥ यस्यज्याघोषमाकर्ण्यकंपतेस्मचराचरम् २८ असंख्या
तान्नृपायस्यसान्नेद्वारगताबभुः ॥ सकथंपितरौहित्वागतश्चसुंदरांस्त्रियम् २९ एवंतक्रंदनंश्रुत्वावीरलोकाःसमाययुः ॥ हेतुभिर्वारयामासुर्बलादधृत्वा
तुतत्करैः ३० ॥ ॥ जनाऊचुः ॥ ॥ नवीराःपरिशोचंतिवीरेयुद्धेहतेनृप ॥ विघ्नंतितंबलाद्गत्वायेनासौनिहतोभवेत् ३१ मृत्युस्तुसर्वजंतूनांसहदेहेनजाय
ते ॥ सोद्यवर्षशतेनापिभविष्यतिनसंशयः ३२ स्वस्यवान्यस्यवाराजंस्तत्रकापरिदेवना ॥ श्रुत्वावाक्यंतुलोकानांतदादेवांतकोऽसुरः ३३ सावधानमना
भूत्वापितरौप्राहधर्मवित् ॥ माशोचतमहंयामिग्रसितुंतंनिजंरिपुम् ३४ वदतंक्वनिवासोस्ययेनबंधुर्हतोमम ॥ तंहत्वासुखमेष्यामिबंधुंयास्यामिवामृतः ॥
३५ ममभ्रूभंगमात्रेणकंपतेभुवनत्रयम् ॥ मयिक्षुब्धेतुकस्त्राता लोकानांपितरौयतः ३६ ॥ ॥ कउवाच ॥ श्रुत्वादेवांतकवचआश्वस्तौतावुभौतदा ॥ शो

कसागरमग्नौतावुद्धृतौतेनवाक्यतः ३७ ऊचतुःपरमंवाक्यंज्येष्ठपृष्ठौसविस्तरम् ॥ काशिराजेतिविख्यातोराजापरमधार्मिकः ३८ वैवाहिकोमहोत्साहस्त
द्गृहेसमपद्यत ॥ आकारिताःसर्वजनाःकश्यपस्यात्मजोपिच ३९ सबालएवबलवान्विनायकइतिस्मृतः ॥ तेनमार्गेहतोभ्राताधूम्राक्षोममपुत्रक ४०
तस्यप्रत्याम्नायकृतेप्रेषितावीरसंमताः ॥ धावमानाययुस्तेचसहस्रांङ्गिनशाचराः ४१ सप्तवर्षेणतेसर्वेनाशितामुनिसूनुना ॥ तेषांप्रत्याम्नायकृतेस्वयं
यातोनरांतकः ४२ अनेकशस्त्रसंपन्नश्चतुरंगबलान्वितः ॥ एकोपिनागतस्तस्मादकस्माद्दग्धोशिरः ४३ शोकंकृत्वातवपुरआनीतंतच्छिरोधुना ॥ ॥ कउ
वाच ॥ ॥ इतितद्वाक्यमाकर्ण्यचकंपेरक्तलोचनः ४४ देवांतकश्चोदतिष्ठद्बसन्निवजगत्त्रयम् ॥ उवाचगर्वमोहेनपितरंवंगवत्तरम् ४५ कालंहानिष्येखिल
ब्रह्मन्युज्जांपृथ्वींविधायच ॥ करिष्येक्रोधदृष्ट्यैवब्रह्मांडंभस्मसात्क्षणात् ४६ इत्युक्त्वाक्ष्वेडितंदृत्वाजगर्तीकंपयन्निव ॥ देवाधिकारेयेदैत्यास्तान्सर्वाना
जुहावच ४७ नत्वातौपितरौवाक्यंप्रोचेदेवांतकस्तदा ॥ इदानींमुनिपुत्रंतमानयिष्यामिसत्वरम् ४८ सहैवतेनदास्यामिमूर्ध्न्यस्यचधनंजयम् ॥ एवमुक्त्वा
बलात्सर्वेउड्डीयसहसाचते ४९ देवांतकोप्यसंख्याताविहंगाइवशीघ्रगाः ॥ काशिराजपुरींप्राप्यवेष्टयेयुःसमंततः ५० कोलाहलोमहानासीद्रजसाच्छादि
तादिशः ॥ नप्रकाशोरवेरासीत्पौराश्चचुक्रुशुर्भृशम् ५१ नरांतकेहतेद्वित्रिदिवसानैवयद्गताः ॥ तत्कथंपुनरायातःप्रलयोत्रजनापहः ५२ कोयंप्रचंडदेहेनदु
ष्प्रेक्ष्योवैसमागतः ॥ क्षमःकालंकलयितुंभक्षितुंवाजगत्त्रयम् ५३ दैत्यानांपरिखाजाताःप्रेषितादैत्यपुंगवाः ॥ हतास्तेनाथतेसर्वेगंतुंमार्गोनाविद्यते ५४ एवं
वदत्सुपौरेषुतावद्भूताःसमागताः ॥ काशिराजंकथयितुंदेवांतकसमागमम् ५५ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेनगरीनिरोधोनामद्विषष्टितमोऽध्यायः ॥
६२ ॥ दूताऊचुः ॥ ॥ देवांतकोमहारौद्रोरौद्रैर्दैत्यैःसमावृतः ॥ असंख्यैर्विविधैःकालभीतिदैर्व्योममस्तकैः १ वयंतद्दर्शनभ्रांताःपलाय्यत्वामुपागताः ॥ न
गरीवेष्टितारानन्यत्करिष्यसितत्कुरु २ ॥ ॥ कउवाच ॥ ॥ श्रुत्वादूतमुखाद्राजावृत्तांतंसमकंपत ॥ अतिम्लानतयायातोबालकंसविनायकम् ३ क्रीडंत
शिशुमध्येतंवृत्तांतंसर्वमब्रवीत् ॥ राजोवाच ॥ परब्रह्मन्नमस्तेस्तुलीलामानुषविग्रह ४ चराचरगुरोनानालीलाकरनमोस्तुते ॥ अनेकशोवयंत्रातास्त्वयाबा
लस्वरूपिणा ५ इदानीमपिरक्षास्मानस्माद्देवांतकात्प्रभो ॥ ॥ कउवाच ॥ ॥ एवंसंप्रार्थितस्तेनकाशिराजेनबालकः ६ देहंकृत्वाविशालंसिंहारूढोधनु
ष्करः ॥ सिद्धिबुद्धियुतोगर्जन्नादयन्गिरिकंदराः ७ तेजसालोपयन्सूर्यंवमन्नग्निकणान्मुखात् ॥ बाणंखड्गंचपरशुंधनुर्हस्तेविधारयत् ८ नभोमार्गेणनगराद्ब
हिर्यातोविनायकः॥ क्ष्वेडितेनसदैत्यानांमनांसिपरिकंपयन् ९ ददर्शदुष्टसैन्यंतंदेवांतकममर्षणं ॥ असंख्यातास्तदादैत्याबभ्रमुःशलभाइव १० दृष्ट्वानानाविधं
सैन्यंसिद्धिंप्रोवाचविघ्नराट्॥ एकाकिनानसाध्येयंसेनानानाविधीयतां ११ स्वकीयासाधितुंदैत्यंकुरुशीघ्रमिदंवचः ॥ कउवाच ॥ ततःसिद्धिर्नमस्कृत्वापरमात्मां
घ्रिपंकजं १२ देवांतकंयोधयितुंययौचाथजगर्जच ॥ निनादैःसर्वजंतूनांदैत्यानांभयदायिनी १३ चचालशेषोद्यौश्चापिपर्वतावृक्षसंचयाः ॥ तद्गर्जितमहारावैः

प्रतिशब्दैरनेकशः १४ सस्मारचाष्टसिद्धीःसाताश्वयातामुदान्विताः ॥ अणिमाप्रथमंप्राप्तागरिमातदनंतरं १५ महिमालघिमाचापिसंप्राप्तेतदनंतरं ॥ प्राप्तिश्चैवतुप्राकाम्यंवशित्वंचसमाययौ १६ ईशित्वंतदनुप्राप्तंतासांसैन्यमभूदनु ॥ गजाश्वरथपादांतंनानायुधविराजितं १७ वर्षाकालेयथानद्यः सागरंयांतिसर्वतः ॥ तथासैन्यंदशदिशोयातिस्मयुद्धलालसं १८ असंख्यवाद्यनिर्घोषंवीरशब्दैर्नदद्दृशं ॥ कृतांतसदृशान्वीरान्भूगोलग्राशनोत्सुकान् १९ दृष्ट्वादेवांतकःस्वांतंचिंतयामासचेतसि ॥ बालंक्षणेनजेष्यामीत्येवंयुद्धायचागतः २० अकस्मादीदृशंसैन्यंकुतएतद्विनिर्गतम् ॥ दृष्टंविचित्रसामर्थ्यं बालस्यमायया कृतम् २१ मरिष्येमारयिष्येवाजीवस्त्याज्योयशोनहि ॥ एवंवदतिदैत्येंद्रेसेनान्यःप्राब्रुवन्वचः २२ वयंयोत्स्यामहेसैन्यैरक्षपृष्टंजयोभवेत् ॥ पीत्वावाक्यामृतंतेषांत्दृष्टोदेवांतकोब्रवीत् २३ सम्यगुक्तंमहावीरायांतुयुद्धाययामिच ॥ जयोस्तुममवाक्येनभवतांपुण्यकर्मणां २४ आशिषंपरिगृह्यैवनमस्कृत्वासुरांतकम् ॥ कर्दमोनागदैत्योथययौव्यूहंरथाकृतिं २५ दीर्घदंतोययौचक्रव्यूहंपरमदुर्जयम् ॥ गरिम्णावीरमुख्यैस्तुरचितंवीरमोहनम् २६ प्र थिम्णापालितंव्यूहंतालजंघोययौमुदा ॥ महिम्नारचितंव्यूहंयक्ष्मनामासमाययौ २७ प्राप्त्याविरचितंव्यूहंययौघंटासुरोमहान् ॥ प्राकाम्यरचितंव्यूहं रक्तकेशोबलान्वितम् २८ कालांतकोययौव्यूहंवशितारचितंपरम् ॥ ईशितारचितंव्यूहंदुर्जयोभिययौबली २९ एतेषांवचसाऽशक्यंवक्तुंसामर्थ्यमंजसा ॥ अष्टौव्यूहानयुध्यंतदैत्याअष्टौमहाबलाः ३० परस्परंविनिघ्नंतःपरान्परमदुर्जयान् ॥ शरधाराविमुंचंतोजलधारायथाघनाः ३१ चिच्छिदुरुत्तमांगानिशस्त्रै र्नानाविधैर्भटाः ॥ निहतैश्चतदावीरैर्गजैरश्वैर्वसुंधरा ३२ ऊरुभिर्जानुभिर्हस्तैश्छिन्नैरासीत्सुदुर्गमा ॥ खेटानिपुरतःकृत्वाजघ्नुःपादांश्चकेचन ३३ उड्डीयगिरिवत्केचित्पेतुर्वीरेषुचूर्णितुम् ॥ रजोंधकारेनाज्ञासीत्स्वीयःस्वीयंपरस्परम् ३४ ततोनिपेतुःसहसादैत्यादेवहताभुवि ॥ देवाहताश्चदैत्याश्चकुर्व तैर्भैरवान्रवान् ॥ ३५ ॥ कबंधायुयुधुस्तत्रमुमुदुश्चाप्सरोगणाः ॥ शुशुभुःशस्त्रसंघातैःपुष्पिताःकिंशुकायथा ॥ ३६ ॥ शुक्रस्तत्रमृतान्दैत्यानुज्जीवय तिविद्यया ॥ अष्टौव्यूहायुयुश्चिंतांमृतशेषाबलान्विताः २७ इशितायैततःप्रोचुःसर्वेतेशुक्रचेष्टितम् ॥ तस्याःक्रोधवशादेकाकृत्यास्यान्निर्गतापुरः ३८ कटाक्षेणतयाज्ञप्ताभार्गवंतुनिजेभगे ॥ कृत्वातदांतर्दधेसापश्चात्तत्याजबर्बरे ३९ तेनबर्बरदेशीयंतंवदंतिमनीषिणः ॥ ततोमुमुदिरेदेवायुयुधुश्चबला न्विताः ४० निहन्यमानादैतेयाःपलायनपरायणाः ॥ केचिच्चशरणंप्राप्तारक्षरक्षेतिचापरे ४१ प्रत्यूचुर्देवगंधर्वानणिमादिकृतांस्तदा ॥ कदाविजयिनोदै त्याःकदाचिद्देवतागणाः ४२ अभवन्युद्धनिरताःपरस्परजयैषिणः ॥ द्वंद्वयुद्धमभूद्घोरंतस्मिन्नुपरतेयुधि ४३ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेशुक त्यागोनामत्रिषष्टितमोध्यायः ॥ ६३ ॥ ॥ ऋउवाच ॥ ॥ कालांतकेनदैत्येनप्राकाम्येनपरस्परम् ॥ कालांतकोविजयतेप्राकाम्यंयावदेवहि १ ताव त्सहाय्यमकरोद्वशित्वंवेगवत्तरम् ॥ तत्याजागीरिशृंगंतन्मस्तकेहस्तलाघवात् २ तेनकालांतकोभूमौसहसानिपपातह ॥ रुधिराक्तंद्विधाभूतंदृष्ट्वाकालांतकंत

दा ३ हाहाकारोमहानासीद्दैत्यसेनाचरंध्वथ ॥ मुसलोनामदैत्येशोमल्लश्चैवापरोसुरः ४ महिमाचैवचत्वारोययुर्युद्धायसादराः ॥ प्राकाम्येनयुयुधिरेनेकेश
स्त्रप्रहारिणः ५ असंख्याताहतादेवाःपतिताभग्नवृक्षवत् ॥ असृग्जलप्रवाहिन्यआसन्नद्यःसहस्रशः ६ ईशितावाशित्वंचविभूतिश्चययुस्ततः ॥ साहाय्यं
चक्रिरेतस्यप्राकाम्यस्यतदायुधि ७ चत्वारःपर्वतास्ताभिश्चतुर्ध्वपिनिपातिताः ॥ तैश्चतेचूर्णिताःसर्वेगताःस्वर्गसुदुर्लभम् ८ अणिमातुशिखांधृत्वाकर्दमस्य
रणेबलात् ॥ अपाटिसहसाभूमौशतधासव्यशीर्यत ९ अस्रवद्रुधिरंवक्त्राच्छुठन्प्राणान्जहौतदा ॥ महिमालघिमाचैवगरिमावृक्षसंचयान् १० यक्ष्मासु
रेतालजंघेदीर्घदंतेन्यपातयन् ॥ ततोघंटासुरोरक्तकेशोदैत्योथदुर्जयः ११ आययुःसर्वसैन्यानिनिश्वसंतोमहाबलाः ॥ तैराहतंबलंदृष्ट्वावशितासिद्धिबुद्धयः ॥
१२ मुष्टिघातैर्निजघ्नुस्ताभालदेशेदृढंतदा ॥ तेपिभूमौनिपतिताःशतधाचूर्णितास्तदा १३ ततोजगर्जुःसर्वास्ताजयंलब्ध्वास्वशक्तितः ॥ विनायकोविज
यतेसर्वास्ताएवमूचिरे १४ अन्येक्षुद्रतरादैत्यास्तेपिताभिर्विनाशिताः ॥ पुनःसर्वेदैत्यसिंहाःसिद्धिसेनांव्यनाशयन् १५ कोलाहलोमहानासीत्सेनयो
रुभयोरपि ॥ हंतुनिघ्नंतुबध्नंतुसावधानाभवंत्विति १६ प्रादुरासीत्ततश्चाग्निःशस्त्रसंघट्टसंभवः ॥ भग्नेशस्त्रेमल्लयुद्धंचक्रुर्वीरारुषान्विताः १७ पुन
श्चानियतंयुद्धंपरस्परविनाशनं ॥ अभवत्तुमुलंसूर्यस्ततश्चास्तमयंगतः १८ अंधकारेणमहतादिशोव्याप्ताःसमंततः ॥ ततोदिव्यौषधीर्गृह्यनिजघ्नुस्तेपरस्परम्
१९ अहोरात्रत्रयंघोरंयुद्धमासीन्निरंतरम् ॥ असृङ्नद्योदशदिशोयाताविरिवहास्तदा २० खेटकूर्माःखड्गझषाःशिरःकमलशोभिताः ॥ गजग्राहाःप्रेतकाष्ठाः
केशशैवलराजिताः २१ भीरुभीतिकरावीरमहाहर्षविवर्द्धनाः ॥ ततोजयत्सुदेवेषुसर्वदाबलशालिषु २२ देवांतकोययौचिंतांतर्कयामासचेतसि ॥
येनसर्वेदेवगणाजितास्तेस्वप्रभावतः २३ क्वेयंतत्रबालमायासामान्याजनमोहिनी ॥ अष्टसिद्धीःसर्वसैन्यमिदानींनाशयाम्यहम् २४ धृत्वाविनायकं
बालंगमिष्यामिस्वमालयम् ॥ एवमुक्त्वाखड्गपाणिःस्वनेनापूरयन्दिशः २५ आययौपरसैन्यानिनिघ्नन्खड्गेनसर्वशः ॥ भयेनमूर्छितादेवानिपेतु
र्धरणीतले २६ स्मृत्वाविनायकंदेवंजहुःप्राणांस्तुकेचन ॥ अमृङ्नदीवहाःकेचित्केचित्स्वर्गंगताःसुराः २७ केचिद्दैत्यंविलोक्यैवजहुर्जीवितमात्मनः ॥
ततोभग्नादेवसेनापपालचादिशोदश २८ सोपिदैत्यःखड्गपाणिर्निघ्नन्पृष्ठेजवानताम् ॥ गरिमातन्निरीक्ष्याथपर्वतंवृक्षसंकुलम् २९ तत्याजदैत्यदेहेस
खड्गेनशतधाच्छिनत् ॥ ततोष्टसिद्धयःक्षुब्धास्तत्यजुःपर्वतान्बहून् ३० चिच्छेदत्वरयातान्सखड्गाघातेनलाघवात् ॥ उड्डीयमहिमातस्यस्कंधेस्थि
त्वातमाददे ३१ खड्गंदैत्यकराच्छीघ्रमंतर्द्धानंययौतदा ॥ बलाच्चिक्षेपतंखड्गंतस्यदैत्यस्यमस्तके ३२ सएवशतधाजातोनतुमूर्द्धातदद्भुतम् ॥ शरवृष्टितदा
दैत्योभग्नपृष्ठश्चकारह ३३ एकैकस्यांदशदशपंचसप्तशरानसौ ॥ क्षिप्त्वाव्याकुलयांचक्रेततस्ताभुविपेतिरे ३४ ततोदेवायुयुधिरेपतितास्वष्टसिद्धिषु ॥ मु
हूर्तात्सावधानास्तायययुर्देवंविनायकम् ३५ तमुदंतंपरिज्ञायबुद्धिःप्रोचेविनायकम् ॥ कथंविचारस्तस्यस्याद्यत्रबुद्धिर्नदृश्यते ३६ पराजिताःसिद्धयस्ते

देह्यनुज्ञांव्रजाम्यहम् ॥ योद्धुंदैत्येनतेनाथपौरुषंचास्यलक्षये ३७ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ ध ॥

कउवाच ॥ ॥ श्रुत्वाबुद्धिवचोदेवोहर्षंप्राप्यजगादताम् ॥ ॥ देवउवाच ॥ ॥ गच्छयुध्यस्वदैत्येनजहितंयशआप्नुहि १ एवमुक्त्वासुवासांसिददौत

स्यैविनायकः ॥ साचनत्वातदादेवंययौदैत्यंरणंप्रति २ तस्याःक्ष्वेडितशब्देनकंपितंभुवनत्रयम् ॥ वदनान्निर्ययौतस्याएकाशक्तिर्गरीयसी ३ जटिलाविकृता

स्याचजगद्भक्षणलालसा ॥ विशालाभ्यांतुनेत्राभ्यांत्यजंतीज्वालसंचयान् ४ दहंतीदैत्यसेनांसाययौसाचपपालह ॥ दशनेपतितादैत्यास्तस्याःकेचिद्र

तासवः ५ अन्येत्वतर्कयन्वक्त्राद्यगंतव्यंकुसुखंभवेत् ॥ केचिदाहुर्धावधावदेवांतकमृतावयम् ६ एवंकोलाहलंश्रुत्वाययौदेवांतकःपुरः ॥ सज्जंकृत्वाधनुःशीघ्रं

शरानाशीविषोपमान् ७ ससर्जतस्यागात्रेषुदर्शयन्पाणिलाघवम् ॥ आच्छाद्यभानुंतन्मूर्ध्नाबाणजालैस्तथाविधैः ८ साप्रसार्यमहद्वक्त्रंबिसवद्विलतेशरा

न् ॥ तूणीरास्तस्यदैत्यस्यसर्वेरिक्तास्तदाभवन् ९ नतस्यास्त्रसिरभवद्राक्षसस्येवमानुषैः ॥ देवांतकंक्षीणशक्तिंदृष्ट्वासासैन्यमाययौ १० भक्षयामासता

नू ॥ तूणीरास्तस्यदैत्यस्यसर्वेरिक्तास्तदाभवन् ९ नतस्यास्त्रसिरभवद्राक्षसस्येवमानुषैः ॥ देवांतकंक्षीणशक्तिंदृष्ट्वासासैन्यमाययौ १० भक्षयामासता

नूदैत्यान्कांश्चिद्वस्तादपातयत् ॥ कांश्चिद्गलेविनिक्षिप्यचूर्णयामासचापरान् ११ असंख्यकोटीदैत्यानांभक्षिताश्चूर्णिताहताः ॥ चूर्णयंतीपदाघातैःकांश्चिद्दे

वांतकंययौ १२ तमुवाचतदासातुविशमेभगगह्वरम् ॥ यत्रतेशेरतेदैत्यामातुर्गर्भंगताइव १३ येभक्षितामृतास्तेमेजठरेजीर्णतांगताः ॥ तद्भीत्यासपपा

लाशुमूत्रविड्भ्यविह्वलः १४ यत्रयत्रप्रलीनोभूत्तत्रतत्रापिसाययौ ॥ बभ्रामस्वर्गलोकान्सपातालानिदिशोदश १५ ततःशिखांसमाक्रम्यधृत्वातंप्राक्षिं

पद्मगे ॥ तयासहततोबुद्धिर्विनायकमुपाययौ १६ ननामतांपुरस्कृत्यमदघूर्णितलोचनाम् ॥ पातयंतीमुभयतःस्तनाघाताद्वनस्पतीन् १७ शरधाराश्चवन

वत्स्रवंतीमंदगामिनी ॥ निराकरोत्करालांतांदृष्ट्वादेवोविनायकः १८ निराकृतायांतस्यांतद्भगाद्दैत्योपतद्भुवि ॥ सोपिदुर्गाधिरित्येवदूतैःसंत्याजितोबहिः

१९ सतुसंज्ञांसमासाद्यस्नात्वातूष्णींगृहंययौ ॥ व्रीडितोधोमुखश्चैतांयातोम्लानोतिदुःखितः २० बुध्यानिवेदितासातुननामतंविनायकम् ॥ तांदृष्ट्वाजहसु

र्बिभ्युर्मम्लुःपेतुश्चकेचन २१ ततःसैनंजगादाशुभक्षितादैत्यवाहिनी ॥ सोपिदेवांतकःपार्यौनिक्षिप्यस्थापितोमया २२ इदानींवसतिस्थानंदेहिदेव

दयानिधे ॥ ॥ देवउवाच ॥ ॥ वंचयित्वागतोदैत्योगृहंस्वंदैत्यनाशिनि २३ तवापिपौरुषंज्ञातंशक्रादिभ्योधिकंमया ॥ विशवक्त्रममैवत्वंविश्रांतिंतत्र

गच्छच २४ अहंतंसाधयिष्यामिमाचिंतांकर्तुमर्हसि ॥ ॥ कउवाच ॥ ॥ एवमाकर्ण्यतद्वाक्यंदृष्ट्वावक्त्रंविवेशसा २५ सुष्वापपरमप्रीतामातुरंकेयथार्भ

कः ॥ उदरेदेवदेवस्यसर्वलोकनिवासिनि २६ ॥ ॥ इतिश्रीगणेशपुराणेत्तउरखंडेबुद्धिविजयोनामपंचषष्टितमोऽध्यायः ६५ ॥ कउवाच ॥ ॥ शार

दारौद्रकेतुश्चरात्रौदेवांतकंसुतम् ॥ एकाकिनंनिरीक्ष्यैनमालिंग्यचसमूचतुः १ आच्छादयंतंवदनंव्रीडितंभृशविह्वलम् ॥ अभाषमाणंकंपंतंवातयुक्तमिवद्रु

मम् २ पितोवाच ॥ किमर्थंवदसेनैवस्वामवस्थांतुमूकवत् ॥ ईप्सितंसाधयिष्यामियत्नात्त्रैलोक्यदुर्लभम् ३ कउवाच ॥ पीत्वावागमृतंतस्यसावधानमनाः

सुतः ॥ उवाचपितरंमातुर्निकटेनिर्विशंकया ४ ॥ पुत्रउवाच ॥ भवदाज्ञांगृहीत्वैवयोद्धुंयातोविनायकम् ॥ शौरराशीविषाकारैरसंख्यैर्नाशिताःसुराः ५ प्रवर्तिताअसृङ्नद्योभग्नासेनातुकाश्यपी ॥ ततएकामहाकृत्यादरीवक्त्रानभःस्पृशी ६ करालकेशीपातालचरणापर्वतस्तना ॥ आगतादेवसेनायारक्षणार्थंममांतिकम् ७ खड्गेननिहतासातुविव्यथेनैवकिंचन ॥ निक्षिप्तासर्वसेनामेतयातातदरीभगे ८ भक्षयंत्येवसर्वाणिशस्त्राणिशरसंचयान् ॥ साऽपिगेविनिक्षिप्ययातादेवंविनायकम् ९ स्निग्धत्वात्तद्भगस्याहंचलितःपतितोभुवि ॥ महांधकारेनज्ञातःपलाय्यगृहमागतः १० स्नात्वानदीजलेतत्रीतोधोमुखस्ततः ॥ ॥ कउवाच ॥ ॥ एवंपुत्रवचःश्रुत्वारौद्रकेतुर्जगादतम् ११ उपायंतेवदाम्येकंनचिंतांकर्तुमर्हसि ॥ ततोमुहूर्तमालोक्यददौतस्मै महामनुं १२ अघोरस्यसबीजंतमुवाचजनकःपुनः ॥ शिवंध्यात्वाचसंपूज्यकुर्वनुष्ठानमुत्तमम् १३ होमंचतर्पणंविप्रभोजनंचदशांशतः ॥ शिवेप्रसन्नेकुंडाद्धि तुरंगोनिःसरिष्यति १४ तमारुह्यव्रजरणंजयंप्राप्स्यसिनिश्चितम् ॥ कउवाच ॥ एवंपितुर्वचःश्रुत्वाप्राहपुत्रोमुदाचतम् १५ उपदेशःकृतःसम्यग्विधिमस्यब्रवीतुमे ॥ ततोलोकंनिवार्यैवजग्मतुर्गृहमध्यतः १६ उभावारक्तवसनौरक्तचंदनचर्चितौ ॥ रक्तपुष्पाणिसंनीयशिवंपुपूजतुस्तदा १७ अनुष्ठानंबहुदिनंचक्रतुःपरमादरात् ॥ अनुष्ठानेसमाप्तेतुकुंडंचक्रतुरादरात् १८ षट्कोणंलक्षणैर्युक्तंमेखलायोनिसंयुतम् ॥ तत्राग्निंविधिवत्स्थाप्यपात्राणिचयथाविधि १९ पंचप्रेतासनगतौजुहुवुस्तौहविस्तदा ॥ सजानुभागमांसानिछित्त्वाछित्त्वाचभक्तितः २० असृग्घृतेनमांसेनतृप्तोभूत्पावकस्तदा ॥ दशांशहोमेजातेतु पुपूजेवह्निदेवताम् २१ बलिदानंचकाराशुछित्त्वापुत्रशिरस्तदा ॥ तेनपूर्णाहुतिंचक्रेविससर्जाथपावकम् २२ ईश्वरस्यप्रसादेनपुत्रोस्यपूर्ववद्बभौ ॥ ब्राह्मणान्भोजयामासतर्पणांतेयथाविधि २३ ततोरात्र्यांव्यतीतायांउदितेचदिवाकरे ॥ ददर्शतुरगंकृष्णंस्निग्धांगंबलवत्तरम् २४ मनोजवंहेषितेनकंपयंतंजगत्त्रयम् ॥ पुपूजपरयाभक्त्यानीराज्यैनंयथाविधि २५ अलंकृत्यालंकरणैर्मणिमुक्तामयैःशुभैः ॥ नमस्कृत्यद्विजान्सम्यक्पितरंपरिगृह्यच २६ आशिषोथसमारुह्यतमश्वंससुरांतकः ॥ शेषसेनांसमादाययौशेषंप्रकंपयन् २७ शस्त्रास्त्रैःकवचैःशूलैर्भातिसेनाधनुःशरैः ॥ आससादरणस्तंभंतयासहसुरांतकः २८ क्रंदत्सुसर्वसैन्येषुसंत्रस्तादेववाहिनी ॥ व्याप्तेतुरजसाव्योम्निनप्राज्ञायतकिंचन २९ पुनरप्यागतोदैत्यःसद्यःसेनाविघातकः ॥ सिद्धिसेनाचराश्चैवप्राद्रवन्दुःखिताभृशम् ३० दृष्ट्वारणागतंतंतुसिद्धिसेनासमुत्थिता ॥ हेषाभिःसिंहनादैश्चनादयंतीदिगंतरम् ३१ ततःशस्त्रप्रहारैश्चविजघ्नुरितरेतरम् ॥ सहस्वप्रहरामीतिप्रबोध्यजघ्नुरोजसा ३२ भुविजानुंविनिक्षिप्यशरानाशीविषोपमान् ॥ आकर्णंधनुराकृष्ययुयुधुस्तेपरस्परम् ३३ खेटानिचांतरेकृत्वायुयुधुश्चापरेतदा ॥ स्मृत्वापूर्वप्रहारंचपरिजघ्नुश्चकेचन ३४ पूर्ववैरमनुस्मृत्यरिपूंश्चक्रेविरूपिणः ॥ कोपिवीरश्रियायुक्तोरिपुंकेशेषुचाग्रहीत् ३५ पार्ष्णिघातैर्मुष्टिघातैःपातयामासभूतले ॥ कौचिन्मत्तौशिरोघातंजघ्नतुरितरेतरम् ३६ ततोभग्नांदैत्यसेनांदृष्ट्वासतुसुरांतकः ॥ अश्वंसंप्रेष्यशर्मा

सेनांसिद्धिविनिर्मिताम् ३७ अश्वहेषांसमाकर्ण्यकेचिन्मूर्छांगताभुवि ॥ पतिताअश्वचरणैश्चूर्णिताश्चापरेसुराः ३८ त्रिशूलेनहताश्चान्येखड्गेनचतथापरे ॥ इत्थं
णजालैरनेकैश्चपातयामासवैसुरान् ३९ सर्वस्मिन्हन्यमानेतुस्वसैन्येसिद्धयस्तदा ॥ पलायनंसमालंब्ययुःसर्वाविनायकम् ४० इतिश्रीग०उ०सिद्धिपराजयो
नामषट्षष्टितमोध्यायः ६६ ॥ कउवाच ॥ सतज्ज्ञात्वामहाश्चर्यंचकारनिजचेतसि ॥ ततोविनायकःक्रोधात्सिंहारूढोरणोत्सुकः १ स्वगर्जितेनचतदागर्जयन्गग
नंदिशः॥ कंपयन्सर्वलोकानांमनांसिपर्वतानपि २ ययौवेगेनमहतादेवान्तकसमीपतः ॥ प्रहस्यतमुवाचाथदैत्योदेवान्तकस्तदा ॥ दैत्यउवाच ॥ कथंयातःशु
ष्कतालुर्नवनीतादनक्षमः॥ युद्धायबालनस्थेयंगच्छमातुःस्तनंपिब ३ अदित्यांकश्यपाज्जातःकथंमूढत्वमागतः॥ यतोदेवांतकेनाद्ययोद्धुमिच्छसिबालक ४ का
लोबिभेतिमांदृष्ट्वात्वथात्वंमर्त्तुमिच्छसि ॥ अतिकोमलगात्रत्वाद्ग्रासमात्रंभविष्यसि ५ ॥ कउवाच ॥ इतिदैत्यवचःश्रुत्वाक्रोधसंरक्तलोचनः ॥ विनायकः
प्रहस्याहवमन्वक्राद्भुताशनम् ६ ॥ ॥ देवउवाच ॥ क्षीबोसिमद्यपानेनप्रायोवासन्निपातवान् ॥ असंबद्धंयुक्तिहीनंवल्गसेमूढभावतः ७ वह्निर्दहतिसर्वंहि
लघुर्वायुसमीरितः ॥ त्वद्वाक्यनुन्नस्त्वांहन्यांदैत्याधमनबुध्यसे ८ इदानींत्यजबुद्धितांनांतकोविद्यतेमम ॥ त्वदर्थमवतीर्णोहंब्रह्मभूतःसनातनः ९ स्थाणो
र्वरस्यगर्वेणकृतंतेसर्वपीडनम् ॥ अवधितस्यसंप्राप्तंबुद्धिहीननबुध्यसे १० त्रैलोक्यपीडयापापंयज्जातंतवदुर्मते ॥ अलंतेकत्थनेनाद्यदर्शयस्व
स्वपौरुषं ११ शक्तिपायोर्विनिर्गत्यकोवावक्रंप्रदर्शयेत् ॥ सहस्वप्रहरस्वाद्ययदियुद्धंत्वमिच्छसि १२ श्वोभाविनंमृत्युमद्यमूढभावात्त्वमिच्छसि ॥ कउवा
च ॥ ॥ एवमाभाष्यतंदैत्यंसज्जंचक्रेधनुःप्रभुः १३ नरांतकगतिंतस्यदातुमिच्छन्विनायकः ॥ टणत्कारेणधनुषश्चकंपेभुवनत्रयम् १४ आकर्णज्या
मथाकृष्यबाणंदैत्येससर्जह ॥ दैत्येनशतधाभिन्नःसबाणःपतितोभुवि ॥ १५ ॥ ततोदैत्योधनुःसज्यंकृत्वाचिक्षेपसायकान् ॥ धनुषस्तस्यशब्देनाविनेदुःपर्व
तादिशः १६ हुंकारेणचतान्बाणान्पातयामासविघ्नराट् ॥ पुनर्विनायकोबाणान्बह्वीश्चिक्षेपदैत्यपे १७ एकेनमुकुटंतस्यशरेणकर्णकुंडले ॥ भ्रूमौन्य
पातयद्देवोबाहूद्वाभ्यांबिभेदच १८ ललाटंसायकेनैवततोदैत्योरुषान्वितः ॥ चचर्वदंतान्नेत्रेचविस्फार्यान्यान्शरान्बहून् ॥ १९ ॥ छादयन्गगनंकाष्ठा
विससर्जविनायकम् ॥ निरास्यैकेनबाणेनखमध्येताविनायकः २० स्वयंचक्रेमंडपंसक्षणाद्बाणमयंविभुः ॥ अंधकारेघोरतरेयुयुधातेपरस्परम् ॥ २१ ॥
शरवृष्ट्याबाणवृष्टिंनिजघ्नतूरुषान्वितौ ॥ शतशस्तौनिराकृत्यबाणवृष्टीउभावपि २२ ॥ ततोदैत्योमहामंत्रंजस्वाष्टशतसंख्यया ॥ मंत्रयामासतेनाशुवारणा
स्त्रेणसायकम् २३ तत्याजाथप्रादुरासन्वारणाःकोटिशस्ततः ॥ चतुर्दंतागिरिनिभामेरुमंदरचूर्णिनः २४ येषांमदवहानद्यःप्रादुरासन्समंततः ॥ येषां
बृंहितमात्रेणनादितंभुवनत्रयम् ॥ २५ ॥ यथाघनानांवर्षासुगर्जितेनमहामुने ॥ नाशयामासुरनिशंदेवसैन्यानितेगजाः २६ धावतांपृष्ठलग्नास्तेगजायां
तिदिशोदश ॥ पादाघातैश्चहस्तैश्चदंताग्रैर्वीरघातिनः ॥ २७ ॥ सेनायाःक्रदनंदृष्ट्वासिंहास्त्रंप्राक्षिपद्विभुः ॥ ततःसिंहाःप्रादुरासन्शतशोथसहस्रशः ॥

२८ तेषांगर्जितशब्देनगजानिपतिताभुवि ॥ सिंहाविदार्यामासुर्गजगंडस्थलानिते २९ सिंहनादैर्बृंहितैश्चदैत्यशब्दैरनेकशः ॥ त्रैलोक्यंकंपितमभूद्देवाः सर्वेविसिस्मिरे ॥ ३० ॥ उड्डीयोड्डीयसिंहास्तेगजकुंभेषुपेतिरे ॥ एवंतेनिहताःसर्वेकरिणःसिंहसंचयैः ॥ ३१ ॥ विरेजुरिंद्रनिहतावज्रेणेवमहीधराः ॥ ततःसिंहाययुर्दैत्यान्भक्षयंतोदिशोदश ३२ निहतेसर्वसैन्येतुचिंतामापसुरांतकः ॥ अयंबालोपिबलवान्दृश्यतेकश्यपात्मजः ३३ इदानींदर्शयिष्येस्ययमस्यसदनंध्रुवम् ॥ एवमुक्त्वापुनर्बाणंमंत्रयामासदैत्यराट् ३४ योजयामासधनुषिशार्दूलप्रसवंतदा ॥ आकर्णंधनुराकृष्यमुमोचदेववाहिनीं ३५ बाणःसचययौशीघ्रंनादयन्गगनंदिशः ॥ यत्पुंखवायुनाभग्नानिपेतुर्वृक्षसंचयाः ३६ प्रादुरासन्ननेकाश्चततःशार्दूलसंचयाः ॥ सिंहांस्तेभक्षयामासुःसिंहास्तेंतर्हितास्ततः ३७ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेअस्त्रयुद्धंनामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ कउवाच ॥ ॥ ततोदैत्योबाणयुगंमंत्रयामाससादरम् ॥ निद्रास्त्रेणतदाचैकंगंधर्वास्त्रेणचापरम् १ वामजानुंपुरःस्थाप्यज्यामाकृष्यससर्जतौ ॥ तयोःशब्देनसहसाचकंपेभुवनत्रयम् ॥ २ एकःसैन्येनिपतितोपरोदेवसमीपतः ॥ ततस्तालामृदंगाश्चगंधर्वाप्सरसस्तथा ३ गाननृत्यानिचित्राणिपुरोपश्यद्विनायकः ॥ पतितानिचशस्त्राणिनबुबोधकरात्तदा ४ मोहितोमंजुलरवैःकर्तव्यंनाभ्यपद्यत ॥ सैनिकाःसुषुपुःसर्वेनिद्रास्त्रेणविमोहिताः ५ निशामुखेयथाबालाअव्यवस्थंहिशेरते ॥ स्त्रियोपिचाथताःसर्वाःसुषुपुर्विगतत्रपाः ६ देवांतकोपश्यदेवंजहर्षचजगर्जच ॥ ततःसंस्थापयामासगुल्मानिपरितोबहु ७ देवसैन्यस्यमहतोबलीवीरयुतानिच ॥ चक्रेकुंडंत्रिकोणंचभूमिसाधनपूर्वकम् ८ अष्टकुंभान्समानीयशतसंख्यान्प्रयत्नतः ॥ स्नात्वापद्मासनंचक्रेनानाप्रेतेषुसादरम् ९ दैत्यान्निहत्यशतशोमांसराशिंमहत्तरम् ॥ चकाराभिचरंदैत्योवह्निंस्थाप्ययथाविधि १० दिगंबरोजुहावाथमांसानिमंत्रपूर्वकम् ॥ सहस्रेतुहुतेपश्चाद्वह्निपूर्णाहुतिंचयः ११ चकारकुंडमध्येसोपश्यच्छक्तिंक्षुधातुराम् ॥ नरमांसानितस्यैसददौपातुंचतान्वदान् १२ अतृप्तांतांपरिज्ञायप्रेतान्न्यानथार्पयत् ॥ ततःसाबहिरायाताव्योमकेशीभयंकरा १३ विशालगर्तनेत्रातिकरालवदनारुणा ॥ उवाचपरमप्रीतानादयंतीदिशोदश १४ तृप्तास्मिरक्तमांसैस्तेनभयंविद्यतेक्वचित् ॥ तामुवाचाथदैत्योपिपुपूजेभक्तिभावतः १५ उपचारैःषोडशभिःप्रणिपातपुरःसरम् ॥ ततोदिव्यांबरधरोनानालंकारभूषितः १६ देव्याअंकंसमासाद्यजगर्जबलवत्तरं ॥ सोड्डीयतेनसहितानभस्येवस्थिताभवत् १७ नानाशस्त्रधरासोपिधनुर्बाणधरोबभौ ॥ तामुवाचरौद्रकेतुपुत्रःपरमहर्षितः १८ कश्यपस्यात्मजोबालश्चंचलोबहुलंपुरा ॥ इदानीमत्रकिंतेनकर्तव्यंकुचरेणमे १९ इदानींसर्वसैन्यानिनाशयिष्येतवाग्रतः ॥ एवंब्रुवतिदैत्येंद्रेकाशिराजोशृणोद्वचः २० ततोविनायकंराजाबोधयामाससादरम् ॥ ॥ काशिराजोवाच ॥ ॥ भूतभव्यभविष्यज्ञकथंमायांनबुध्यसे २१ गांधर्वीदैत्यरचितांकथंसक्तोसितत्रवै ॥ देवांतकेनाभिचरान्निर्मितांराक्षसीमिव २२ सासैन्यंनाशयिष्यतितेसावधानमनाभव ॥ ॥ कउवाच ॥ ॥ एवंनृपवचःश्रुत्वा

सावधानमनाविभुः २३ बुध्वातज्ज्ञानदृष्ट्यैवसर्वंमायामयंतदा ॥ शरद्वयंविनिष्कृष्यमंत्राभ्यांपरिमंत्र्यच २४ घंटास्त्रेणखगास्त्रेणश्रोत्राकर्षणसंभ्रमात्
विनायकोमुमोचाथतौबाणौवेगवत्तरौ २५ गर्जंतौघनवद्घुक्मपुंखौमारुतवेगिनौ ॥ सहसाच्छादयंतौचसहस्रकरमंडलम् २६ घंटानादःसमभवन्म
हान्सर्वविमोहनः ॥ ततोघंटास्वनान्श्रुत्वाप्रोत्तस्थुःसर्वसैनिकाः २७ सिद्धयःसर्ववीराश्चयुयुधुःशस्त्रपायः ॥ अपरस्तस्यसैन्येषुमुक्तोबाणःखगास्त्र
तः २८ ततःखगाःप्रादुरासन्नानारूपामहौजसः ॥ पक्षवातेनतेषांतद्रांधर्वंलयमागतम् २९ अंधकारंयथासूर्यसारथेरुदयान्मुने ॥ ततस्तेपक्षिणः
सर्वेबभक्षुर्दैत्यसैनिकान् ३० पक्षाघातहताःकेचित्केचिच्चंच्वग्रविक्षताः ॥ केचिद्भीत्यैवपतितादैत्याःप्राणान्विहायच ३१ हाहाकारोमहानासीद्दैत्यसै
न्येषुसर्वशः ॥ ततोदेवांतकोरोषात्खड्गास्त्रंप्राहिणोत्तदा ३२ तस्यध्वनिंसमाकर्ण्यचक्षुर्भेसैन्यसागरः ॥ दिग्गजाश्चततःखड्गाअसंख्याताविनिःसृताः ३३
वह्निमंतश्चसंघट्टात्सेनयोरुभयोरपि ॥ अग्निदग्धास्तदादैत्यानिपेतुर्धरणीतले ३४ खगाश्चनिहताःकेचित्केचिद्दग्धास्तथाग्निना ॥ अपरेययुरंतार्द्दिदिश
श्चथचकाशिरे ३५ असंख्यखड्गप्रभयासेनाचक्षुर्महोमुषा ॥ खड्गवृष्ट्याविनिहतादेवाःपेतुर्धरातले ३६ केषांचिद्बाहवश्छिन्नाःकेषांचिन्मस्तकाःक
राः ॥ जठरेजानुभागेचपृष्ठभागेपराहताः ३७ निपेतुर्दैवपुंजेषुमृतेषुचगतासवः ॥ अष्टसिद्धिकृतासर्वासेनाएवंविनाशिताः ३८ अस्त्रघ्नद्योदशादि
शोयाताःप्रेतवहास्तदा ॥ विनायकस्ततोदृष्ट्वादैत्यस्याद्भुतविक्रमम् ३९ बाणंनिष्काश्यसुदृढंवज्रास्त्रेणाभिमंत्र्यच ॥ आक्रंदनेनमहतादैत्यसैन्येमुमो
चतम् ४० पर्वताश्चद्रुमास्तस्यशब्देनपतिताभुवि ॥ तदस्त्रानलसंयोगाद्दिग्दाहःसमजायत ४१ देदीप्यमानंसहसाच्छादयन्रविमंडलम् ॥ पक्षि
णोनिहतादग्धास्तेजसातस्यकेचन ४२ खंडितंतेनसहसाखड्गास्त्रंतत्सहस्रशः ॥ निर्दहतदादैत्यसेनांवज्रैरनेकशः ४३ सहस्रशोनिहन्यंतेएकया
वज्रधारया ॥ यतोयतोगमद्दैत्यस्ततस्ततापतच्चतत् ४४ चुचूर्णमस्तकान्पादान्हस्तान्स्कंधानुरूनपि ॥ धरांभित्त्वागतादैत्यास्तानप्यथजघानतत् ४५ एवं
सर्वेहतादैत्यावज्रैस्तीक्ष्णैःसहस्रशः ॥ ततोदेवांतकंजग्मुस्तानिवज्राणिसर्वशः ४६ सोपिबाणंसमादायमंत्रयामासयत्नतः ॥ रौद्रास्त्रेणाथसंयोज्यधनुषःकर्षणे
नतम् ४७ ससर्जपरसैन्येषुशिवनामांकितंशुभम् ॥ नादयन्गगनंसोथदिशश्चविदिशोपिच ४८ वमन्नग्निकणान्दिक्षुप्रलयानलसन्निभः ॥ भूलोकादेवलो
काश्चभयाद्याताद्दिशोदश ४९ विनायकस्यसैन्येषुमहाकोलाहलोह्यभूत् ॥ तस्मिन्निपतितेबाणेपुरुषोघोरदर्शनः ५० निःसृतोभीषणमुखस्त्रैलोक्यंग्रासय
न्निव ॥ जटिलोदीर्घहस्तश्चदीर्घपादोमहोदरः ५१ धराधरोव्योमगोष्ठोगिरिजिह्वोभयानकः ॥ वज्रास्त्रंभक्षयामासक्षणात्सपुरुषोमहान् ५२ विनायक
हंतुकामोययौतस्यांतिकंक्षणात् ॥ ततोविनायकःशीघ्रंब्रह्मास्त्रंसमयोजयत् ५३ मंत्रेणशतसंख्येनसायकेवेगवत्तरे ॥ आकर्णकर्षणाद्देवोमुमोचसहसाचतम्
५४ चकंपेतस्यशब्देनतारेणभुवनत्रयम् ॥ विस्फुलिंगैर्दिशोदग्धानप्राज्ञायतकिंचन ५५ ततोपिपुरुषोजज्ञेतादृशोतिभयानकः ॥ तावुभौयुध्यतोर्व्योम्नि

परस्परजयैषिणौ ५६ नानाविधंमल्लयुद्धंचक्रतुस्तौमहाबलौ ॥ क्षणेनांतर्हितौचोभौनदृश्येतेथकुत्रचित् ५७ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेअस्त्रयुद्धंनाम
अष्टषष्टितमोध्यायः ॥ ६८ ॥ कउवाच ॥ ततोदेवांतकोतीवविस्मितोतर्कयत्तदा ॥ यथायथामयामायाक्रियतेस्यनिवृत्तये १ तथातथाप्ययंबालोदर्शय
त्येवपौरुषम् ॥ कदायंनिधनंयायात्कदास्वप्स्येगतश्रमः २ इत्येवंचिंतयाविष्टोधनुःसज्यमथाकरोत् ॥ अभिमंत्र्यशरंघोरंविससर्जविनायके ३ ससायको
बाणवर्षमनंतंकृतवान्विभौ ॥ शक्तिंचनिर्ममेघोरांत्रैलोक्यग्राससाहसाम् ४ ददर्शविघ्नराजस्तांतदंकेदैत्यपुंगवम् ॥ वर्षंतंशरजालानितीक्ष्णानिसुबहून्यपि
५ ततोष्टसिद्धयःशीघ्रंउड्डीयबलवत्तरम् ॥ दधुस्तांसहसाशक्तिमानिन्युस्तांविनायकम् ६ आनीयमानासाहस्तान्निःसृत्याथपलायिता ॥ रोषात्ताभिर्दैत्यप
तिरानायिसकचग्रहात् ७ अणिमानंततोदैत्योजघानमुष्टिनादृढम् ॥ मुष्टिघातंसमासाद्यमूर्च्छितानिपपातह ८ लघिमागरिमाचाथवशिमातंमहासुरम् ॥
यावल्लत्ताप्रहारैस्तुनिजमुस्तावदेवहि ९ दैत्येनविधृतावेगाच्चरणेषुपृथक्पृथक् ॥ यावदास्फालयेत्पृथ्व्यांनिःसृतास्तावदेवताः १० प्राकाम्यंचैवभूतिश्चजघ्न
तुस्तंततोबलात् ॥ पपातभूतलेदैत्योवमन्नग्निंमुखात्ततः ११ क्षणाल्लभ्यततःसंज्ञामारुरोहहयंदृढम् ॥ शस्त्रपाणिर्वायुवेगोनिजघानविनायकम् १२ दृ
ढासिघाताद्देवोथकिंचिन्मूर्च्छामवाप्तवान् ॥ निमेषात्सावधानोभूदधावद्दैत्यनायकं १३ हिरण्यकशिपुंविष्णुर्यथावृत्रंशचीपतिः ॥ शरंचकमलंपाशमंकुशं
चचतुःकरैः १४ बिभ्राणःशुशुभेवीरश्रियापरमयाज्वलन् ॥ गर्जित्वाघनवद्देवोजघानदैत्यपुंगवम् १५ चतुर्भिरायुधैर्वेगान्नचचालतथापिसः ॥ आश्च
र्यंपरमंप्रापद्दृष्ट्वाशस्त्रंवृथार्थताम् १६ वज्रात्सारतरंमेनेदैत्यदेहंविनायकः ॥ ततोदेवोराक्षसस्यधूम्राक्षस्यमहायुधम् १७ वज्रंसंचूर्णयन्सूर्यमंडलादागतंतुयद् ॥
तदादायाहनत्तेनदैत्यंतच्छतधाभवत् १८ नरोमापिचचालास्यतदप्याश्चर्यमुत्तमम् ॥ ततोनानाशस्त्रघातैर्जघ्नतुस्तौपरस्परम् १९ मस्तकेपृष्टभागेचह
दयेबाहुमंडले ॥ तयोःशस्त्रविघातेनजातोवह्निर्वसुंधराम् २० ददाहनचतौभीतौयुद्धमेवान्वपद्यतम् ॥ निशीथेतमसाव्याप्तेविरामंनसमीयतुः २१ त
तःकृत्रिमदीप्त्यातौपरस्परमयुध्यताम् ॥ ततोमायांरौद्रकेतुश्चक्रेसुरविमोहिनीम् २२ अदितिंसुंदरांकृत्वादैत्यहस्तेन्यवेशयत् ॥ पद्मनेत्रांपीनकुचांकुंकुमारक्त
भालिकाम् २३ मुक्ताहारांसुवलयांदिव्यांशुकंविराजिताम् ॥ लावण्यलहरींरुक्मविलसद्दिव्यकंचुकाम् २४ विनायकंनिरीक्ष्यैवरुरोददैत्यहस्तगा ॥ धावधावे
तितंप्राहत्रासिताहंकिमीक्ष्यसे २५ एवंब्रुवत्यांदैत्योस्याश्चिच्छेदकंचुकींबलात् ॥ अंशुकंचचकर्षास्यामदेनाविष्टचेतसा २६ उच्चैरुवाचदेवंसाक्रंगतापुरु
षार्थता ॥ लोकलज्जाभयान्मांत्वंनिःस्नेहाशुविमोचय २७ विनायकोनिरीक्ष्यैतांबाष्पकंठोरुषान्वितः ॥ नसस्मारविचारंसशस्त्राणिजगलुःकराद् २८
शुशोचममममातेयंकथमस्यकरेगता ॥ धिग्जन्मयस्यजननीगतावस्थांदुरत्ययाम् २९ देवानांजननीचैवसंप्राप्तादुष्टसंगतिं ॥ काशिराजोपितंदृष्ट्वाशोचंतं
गणनायकम् ३० स्वयंशुशोचबहुधालोकोपिनगरेस्थितः ॥ ततोदेवांतकोदेवंजगर्हेबहुधातदा ३१ धिग्जन्मपौरुषंतेद्यनप्राणंत्यजसेकथम् ॥ निर्लज्जो

सिमुखंलोकेदर्शयस्येवयोधुना ३२ त्वत्समीपंहनिष्येस्याःशिरःकायात्खलाधुना ॥ कउवाच ॥ इतितांनिष्ठुरंवाक्यंश्रुत्वादेवोविनायकः ३३ त
र्कयामासमनसिसत्यमेववदत्ययम् ॥ प्राणत्यागायकिंकार्यंविषंवापाशबंधनम् ३४ उदरेशस्त्रसंघातःकार्योवामृत्युहेतवे ॥ इत्थंयावच्चिंतयतेदुःखशोक
समन्वितः ३५ तावदाकाशवाणींसशुश्रावचविनायकः ॥ सोवाच ॥ मायेयंरचितादेवदैत्येनदुष्टबुद्धिना ३६ अवधेह्यरिणंयत्तोभूत्वाजहिनिजंरिपुम् ॥
ततःससावधानोभूज्ज्ञात्वामायामयींतुताम् ३७ जहर्षचमहाबुद्धिर्दैत्यंहंतुंप्रचक्रमे ॥ स्मृत्वाचतद्वरंशंभुदत्तंतस्मैदुरात्मने ३८ उपःकालंविनास्
वैशस्त्रास्त्राणिवृथात्वयि ॥ एवंतस्यवरंज्ञात्वाप्रातर्युद्धायनिर्ययौ ३९ दैत्योपिपुरतोपश्यद्युद्धांतेतंविनायकम् ॥ आरक्तनयनंभ्राजन्मुकुटंकुंडलोज्ज्वल
४० दंतप्रकाशरुचिरंमुक्तादामविभूषितम् ॥ दिव्यांबरंसुधामानंव्योमस्पृक्पुष्करंविभुम् ४१ दृष्ट्वादेवांतकोरूपंबिभायचविसस्मरे ॥ अद्यैनरशरीरंकिंअद्यै
गजसमंपरम् ४२ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेएकोनसप्ततितमोऽध्यायः ६९ ॥ ॥ कउवाच ॥ ॥ एवंवदतियावत्सभयभ्रांतःसुरांतकः ॥ ताव
द्देवोदधारैनंउत्संगेलघुबालवत् १ कृत्वापद्मासनंचारुगणेशःस्वप्रभावतः ॥ उवाचचैनंदैत्येंद्रंवरंस्मरनिजंशुभम् २ सदैत्योरदनंचास्यधृत्वाहस्तद्वयेनह ॥
दोलयामासदेहंस्वंजंतरिक्षेमुहुर्मुहुः ३ यावत्पपातभूपृष्ठंकृत्वादंतंसुरांतकः ॥ तावद्दधारतंदेवःस्वदंतंलाघवाद्विभुः ४ अहनत्तेनदंतेनमस्तकेतंसुरांतकम् ॥
जगर्जचमहारावैर्गर्जयन्विदिशोदिशः ५ चालयन्पृथिवींसर्वांपातालान्यखिलानिच ॥ द्विजाघातेनशतधाकारिदेहोस्यतत्क्षणात् ६ असृग्वृष्टिःप
पाताशुगगनान्मेघवृष्टिवत् ॥ उत्पातंमेनिरेलोकाःसर्वेभूतलवासिनः ७ दैत्यदेहगतंज्योतिस्तंविवेशविनायकम् ॥ पश्यतांसर्वदेवानांप्रधनालोकितंपु
नः ८ देहस्तुनिपपातास्यधराप्रष्ठत्रियोजनम् ॥ चूर्णयन्वृक्षसंघातान्पर्वतान्पादपैर्युतान् ९ एवंदृष्ट्वागतिंतस्यमैनिकाश्चदिशोदश ॥ याताश्चकीर्तिचि
न्नाशंप्राप्तास्तद्देहपाततः १० मुमुचुःपुष्पवर्षंतेदेवाःस्वस्थानमागताः ॥ देवदुंदुभयोनेदुर्नृपदुंदुभिनिस्वनैः ११ दिशश्चविमलाआसन्ववुर्वा
ताःसुखावहाः ॥ तेजांसिवह्नेर्लोकानांप्रसन्नानितदाभवन् १२ प्रतिकूलवहानद्यआसन्सन्मार्गगास्तथा ॥ ततःशक्रादयोदेवामुनयस्तंपुपूजिरे १३
तुष्टुवुःपरयाभक्त्यादेवदेवंविनायकम् ॥ विमोचितावयंबंधाद्देवांतककृताद्विभो १४ उपेंद्रइवदेवेंद्रकार्यंयस्मात्कृतंत्वया ॥ उपेंद्रइतिनाम्नात्वंख्यातिं
लोकेगमिष्यसि १५ वयंस्वस्वाधिकारेषुनिरातंकावसामहे ॥ स्वाहास्वधावषट्काराभविष्यंतिगृहेगृहे १६ एवमुक्त्वानमस्कृत्यदेवंतेचप्रदक्षिणम् ॥ अनु
ज्ञाताययुःसर्वेस्वंस्वंस्थानंमुदान्विताः१७ मुनयश्चतदादेवैर्हृषीकेशेतिनामच ॥ कृत्वानत्वाययुःस्वंस्वमाश्रमंहर्षनिर्भराः १८ ततःसर्वेधराधीशाःसंपूज्यचप्रण
म्यच ॥ ऊचुर्विनायकंदेवमुद्धृताधरणीत्वया १९ दैत्यभारभराक्रांतातस्मात्त्वंधरणीधरः ॥ इत्युक्त्वातेगताःस्वस्वपत्तानानितदाज्ञया २० ततःपश्चात्पश्य
तिस्मकाशिराजोविनायकम् ॥ सिंहारूढंबालरूपंक्रीडंतंबालकैःसह २१ बालोपितंनृपंदृष्ट्वालिलिंगपरमादरात् ॥ उभावानंदभरितौमुंचंतोश्रूणिनेत्रतः २२

ततऊचेनृपोदेवंमहद्भाग्यंममोदितम् ॥ ब्रह्मादीनामगम्यंयत्परंब्रह्मसनातनम् २३ तन्मेदृग्गोचरंनित्यंपूर्वपुण्यफलोदयात् ॥ विश्वस्यकारणानाचकारणंत द्विवर्जितम् २४ वेदांतवेद्यंसद्ज्योतिर्ज्योतिषामपिभास्वरम् ॥ नानारूपमरूपंयद्बालरूपेणमेगृहे २५ क्रीडतेस्वेच्छयापृथ्वीभारहारिमनोहरं ॥ कउवाच ॥ एवंश्रुत्वास्तुतिंतस्यप्रमृज्याश्रूणिविघ्नराट् २६ उवाचनक्षणंत्वत्तोयामिदूरंकदाचन ॥ ततोराजापुपूजैनमुपचारैरनेकशः २७ ततोवादित्रनिर्घोषैर्बंदिशब्दैर्वि मिश्रितैः ॥ सुरांतकवधाद्धर्षयुक्तैःसेनाचरैःसह २८ विनायकंबालरूपंस्तुवद्भिःस्वपुरंययौ ॥ विसृज्यसर्वलोकांश्चदत्वावासांसिचैकशः २९ तांबूलानिच केषांचित्पुरस्कृत्यविनायकम् ॥ विवेशस्वगृहंरम्यंहर्षनिर्भरमानसः ३० इतिश्रीगणेशपुराणेउत्तरखंडेबालचरितेपुरप्रवेशोनामसप्ततितमोऽध्यायः ७० ॥ कउवाच ॥ अपरस्मिन्दिनेब्रह्मन्नराजाभद्रासनंगतः ॥ अमात्यान्वीरमुख्यांश्चवृद्धांश्चसुहृदोद्विजा १ आकार्यचनमस्कृत्यजगादत्रदिसंस्थितम् ॥ राजो वाच ॥ विवाहायतुपुत्रस्यसमाहूतोविनायकः २ उत्पाताबहवोजातास्तेचतेननिराकृताः॥ आदित्यैचमयाप्रोक्तंशीघ्रंतेतनयंशुभम् ३ आनयिष्येतत्रबहुदिव साजग्मुरंजसा ॥ स्वस्थेषुत्रिषुलोकेषुविवाहोस्यांविचिंत्यताम् ४ ॥ अमात्याऊचुः ॥ सम्यगुक्तंमहाराजविलंबोविघ्नकारितः ॥ जातोविवाहकार्येस्मिन्नग तेस्मिन्सविधीयताम् ५ विनायकप्रसादेनसर्वमन्याकुलंजगत् ॥ दूरस्थानांचसुहृदांप्रेष्यंतांलग्नपत्रिकाः ६ दूतांश्चसर्वसंभारान्कर्तुंग्रामेषुयुज्यताम् ॥ कउ वाच ॥ इतिप्रकृतिवाक्यानिश्रुत्वालोकाःसभासदः ७ साधूक्तमितितत्रोचुस्ततोराजाजहर्षच ॥ ज्योतिर्विद्भिर्लग्नदिनंनिश्चिकायतदैवसः ८ प्रेषयामाससु हृदोदूतानाकारितुंशुभान् ॥ सामग्रींकारयामासदूतैराप्तैर्यथाविधि ९ ततोमगधराजोपिसुतामादायतांपुरीं ॥ आययुःसर्वसुहृदोनानादिग्भ्यःसमागताः १० उपायनानिभूरीणिददुस्तेन्योन्यमादरात् ॥ देवतास्थापनंतौचचक्रतुःसुमहोत्सवान् ११ सांगोपांगविवाहंतौसम्यक्संपाद्ययत्नतः ॥ तोषयामासतुर्वि प्रान्सर्वलोकान्धनादिभिः १२ विसृज्यसुहृदःसर्वांस्ततोराजाविनायकम् ॥ भूषयामासविविधैर्भूषणैरंशुकैर्वरैः १३ अभ्यज्यभोजयामासस्वाद्वन्नंसहबं धुभिः ॥ ततोरथंसमारुह्यसहतेननृसत्तमः १४ ययौवादित्रनिर्घोषैःकश्यपाश्रममुत्तमम् ॥ ततोनागरिकाःसर्वेहित्वाकृत्यानिनिर्ययुः १५ भोजनंपठनं निद्राव्यासंगंतत्यजुस्तदा ॥ अकृत्वास्वस्ववेषंतेत्वरयानिर्ययुःपुरात् १६ ततोबालसहस्राणिरुरुधुस्तंविनायकम् ॥ अस्मांस्त्यक्त्वाकथंयासिकथंनिष्ठुर तांगतः १७ गमिष्यइतिपूर्वंनःकथंनोक्तंप्रसंगतः ॥ अश्रुकृत्वास्मद्गृहेयासिकथंतंनिजमाश्रमम् १८ कश्चिद्बालोदधारास्यपादपद्मंरुदन्मुहुः ॥ कश्चित्स्नेहा त्समालिंग्यदधारकरपंकजम् १९ पौरांगनास्तथैवैनंबालामुग्धाःसयौवनाः ॥ विपर्यस्यनिजाभूषाआययुस्तंविलोकितुम् २० यथापाथोनिधिंसर्वावर्षाका लेसमुद्रगाः ॥ यांतिहंसायथामुक्तासमूहंमरुतोहरिं २१ अतिप्रीतियुताःप्रोचुःकथंयासिविनायक ॥ अकस्मात्स्नेहमुत्सृज्यकथंनिष्ठुरतांगतः २२ ॥ कउ वाच ॥ ॥ रथादवततारासौदृष्ट्वाताञ्नृपसंयुतः ॥ परिश्रांतान्धावमानान्स्खलतःपततोपिच २३ तानुवाचततःसर्वान्मुहूर्तंत्वरयाजनाः ॥ नृपेणसहितः

शीघ्रमागतोनगराद्बहिः २४ इदानींप्रार्थयेसर्वान्नत्याज्याकरुणामयि ॥ अपराधास्तुक्षंतव्यामयावःसदनेकृताः २५ नवत्याज्यःपरिचयोयदेवोद
र्शनंभवेत् ॥ एवंतद्वाक्यमाकर्ण्यपौराःसर्वेशुचान्विताः २६ रोमांचांचितगात्रास्तेप्रोचुर्गद्गदयागिरा ॥ जनाऊचुः ॥ नमायामायिनस्तेस्तिसर्वस्यजगतःपि
तुः २७ नपितात्यजतेबालान्सापराधानपिध्रुवं ॥ नचंद्रउष्णतांयातिसुवर्णंनीलतामपि २८ कथंनिष्ठुरतांयातःकथंगंतुंसमुत्सुकः ॥ पूर्वमेवनचागाश्चेत्त
दाशोकोनसंभवेत् २९ चोरयित्वाकथंयासिसर्वेषांनोमनांसिच ॥ कथंकार्यंकरिष्यामोनीतेषुनोमनस्सुच ३० जलेनष्टेजलचराःकथंजीवंतितद्वद ॥ प्राणे
गतेशरीरेणकिंप्रयोजनमस्तिनः ३१ कस्तत्रप्रतिकारःस्यादिक्षुश्चेत्स्रवतेविषं ॥ तस्मान्नोनयतत्रत्वंयासितत्रस्वकिंकरान् ३२ तद्वचःपरिकर्ण्यासौप्रोचेगद्गद
यागिरा ॥ मुंचन्नेत्राश्रुबहुलंसर्वांस्त्रीवृद्धबालकान् ३३ ॥ देवउवाच ॥ नखेदःसर्वदाकार्योनवियोगोममक्वचित् ॥ सर्वांतर्यामिणोपायहीनस्यानंदरूपिणः
३४ नचित्तस्थसमाधानंभवेद्वैचिंतनेनमे ॥ मममूर्तिंमृदाकृत्वापूजयंतुगृहेगृहे ३५ संकटंवोयदातुस्यात्स्मर्तव्योहंतदाजनाः ॥ साक्षात्कारंप्रदास्यामिनाश
यिष्यामिसंकटं ३६ कउवाच ॥ वचनंतत्समाकर्ण्यननंदुःसर्वनागराः ॥ नेमुःप्रदक्षिणीकृत्यजयशब्दैःप्रतुष्टुवुः ३७ गृहीत्वाज्ञांययुःसर्वेपौराःस्वंस्वंनिवेशनं ॥ वि
नायकोपिशीघ्रंसरथारूढोययौपुरः ३८ काशिराजेनसहितोमावृदर्शनलालसः ॥ सददर्शपरावृत्यमुखंपौरकुमारकान् ३९ आक्रंदतस्तानुवाचपुनर्यास्ये
व्रजंतुहि ॥ चिंतानकार्यासत्यंवोब्रवीमिनानृतंक्वचित् ४० एवंतान्सपरावृत्यक्षणात्स्वाश्रममाप्तवान् ४१ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेविनायकाश्र
मंप्रतिगमनंनामैकसप्ततितमोध्यायः ७१ ॥ कउवाच ॥ पूर्वमेवचदूतेनकथितोसौविनायकः ॥ अदित्यैकाशिराजेनरथस्थेनसहागतः १ ततःसातद्वियोगेन
धावमानाययौपुरः ॥ औत्सुक्यत्वरितावेदनांचलंपतितंस्वकम् २ दृष्ट्वातांमुनिपुत्रोपिरथात्प्रस्कंद्यसत्वरः ॥ आययौमातुरभ्याशमालिलिंगचतांमुदा ३
आनंदाश्रुमुमोचासौसोपिबाष्पंचिरागतः ॥ मुहूर्तमेकभावंतौगच्छेतांपयसीइव ४ ददौस्नेहात्स्वस्थचित्तास्तनपानंमुदादितिः ॥ प्रमृज्यनेत्रेप्रोवाचश्रांतो
सिबहुवासरं ५ ततोननामतांराजाजगौगद्गदभाषया ॥ राजोवाच ॥ नीत्वाविनायकंदेवंयातास्तुबहुवासराः ६ अतोनमातःकोपंत्वंमयिकर्तुमिहार्हसि ॥
वियोगंनास्यसोढुंचनशक्तोहंमुनिप्रिये ७ नतृप्तिरस्तिपीयूषेनोदासिन्यंनिधावपि ॥ दिनेदिनेनवप्रेमवर्धयत्येषनोगृहे ८ उत्पाताबहवोनेनपुरेनोविनिवारि
ताः ॥ असंख्याताहतादैत्यादेवाश्चमुदमापिताः ९ बहुलाचकृताकीर्तिःस्थापिताधर्मसेतवः ॥ पौरुषंचतथानेनकृतंनेंद्रादिभिःकृतम् १० कउवाच ॥ एवंस
र्ववृत्तांतंकथयामाससादरं ॥ ततोदितिस्तुदध्यन्नंभामयित्वात्यजद्बहिः ११ दुष्टदृष्टिनिपातस्यशांतयेबालकोपरि ॥ ततोबालंसनृपतिंनिनायाश्रममंडलम्
१२ कश्यपोहिबहिर्यातोदृष्ट्वापुत्रंसभूपतिं ॥ तौतंचनेमतुर्भक्त्यावद्धांजलिपुटावुभौ १३ आलिलिंगमुनिस्तौचमूर्ध्न्यघ्रायमुदातदा ॥ उवाचरुद्धकंठोसावंके
कृत्वाविनायकम् १४ काशिराजनोचितंतेबालंनीत्वाविलंबनम् ॥ शीघ्रमेवानयिष्येहमित्युक्त्वानीतवान्कथम् १५ वियोगेनास्यतन्नामंगानांमेधुनानृप ॥

जाताशीतलतापुण्याद्दर्शनादस्यसांप्रतम् १६ ॥ कउवाच ॥ ततऊचेकाशिराजोनिपीयमुनिभाषितम् ॥ उपविश्यासनेरम्येप्राप्यानुज्ञांमुनेर्नृपः १७ ॥ नृपउ
वाच ॥ अस्यैवमाययाजातासत्यतामेमुनीश्वर ॥ मद्गृहंदेवदेवेनस्वकीयमितिनिश्चितम् १८ अवाप्तकामोदेवोयंस्वकामवशगोमुने ॥ संपाद्यममपुत्रस्यविवा
हंसमुपागतः १९ ॥ कउवाच ॥ तस्यदैत्यवधादीनिकर्माण्यस्मैन्यदेदयत् ॥ ततोजहर्षतुरुभौमुनिपत्नीमुनिश्चसः ॥ ज्ञात्वापराक्रमंतस्यस्वपुत्रस्यगुणान्बहून्
२० ततस्तेभोजनंचक्रुःषड्रसान्नेनसादरम् ॥ दत्वाशीर्वचनंतस्मैविससर्जनृपंमुनिः २१ सोपिताम्प्रणनामाथप्रादक्षिण्येननिर्ययौ ॥ प्राप्यानुज्ञांनेत्रयुग्मान्मुं
चन्नश्रुसुदुःखितः २२ स्मरन्गुणगणंतस्यस्नेहनिर्भरमानसः ॥ शीघ्रंप्रयातोनगरंवाद्यघोषसमन्वितः २३ सर्वैनागरिकाबालाविनायकदिदृक्षया ॥ आग
तादद्दशुस्तत्रततोदुःखितमानसाः २४ निरीक्ष्यतंकाशिराजंययुःस्वंस्वंनिकेतनम् ॥ अपरेद्युःसर्वपौराःपप्रच्छुस्तंनृपंमुदा २५ यास्यइत्युक्तवान्देवोनागतः
सकथंनृप ॥ त्वंतुनिष्ठुरभावेनत्यक्त्वातंकथमागतः २६ ॥ राजोवाच ॥ अत्यंतंप्रार्थितोदेवउक्तवान्मांमुनिप्रियः ॥ मन्मूर्तिस्थापनंकृत्वासेवध्वंसर्वएवमां २७
वियोगोनचसर्वांतर्यामिणावःकथंचन ॥ ततस्तेकारयामासुर्मूर्तिधातुमयींशुभां २८ चतुर्भुजांत्रिनयनांसर्वभूषणभूषितां ॥ शूर्पकर्णांगजमुखींसर्वाव
यवसुंदराम् २९ ढुंढिराजेतिनाम्नातांस्थापयामासुरादरात् ॥ ऋत्विग्भिर्ब्राह्मणैरन्यैर्वेदशास्त्रविशारदैः ३० प्रासादंपरमंकृत्वापुपूजुस्तेदिनेदिने ॥ येन
येनैवकामेनपूजयेद्योविनायकम् ३१ तंतंददातितस्मैसभक्त्यासंपूजितोविभुः ॥ एवंनानामूर्तिधरोभ्राजतेस्मविनायकः ३२ विश्वेश्वरेस्वनगरंयातेसर्वसुरैः
सह ॥ दिवोदासेचाविमुक्तेकाशिराजेसुखंस्थिते ३३ विनायकोमुनिंप्राहकश्यपंमातरंचताम् ॥ अहंतेपुत्रतांयातस्तपसाराधितःपुरा ३४ भूभारश्च
हृतःसम्यक्हतौदैत्यौमहाबलौ ॥ त्रैलोक्यपीडकौदुष्टौदेवांतकनरांतकौ ३५ देवाश्चसाधवश्चैवरक्षिताःस्थापिताःपरे ॥ इदानींतुगमिष्यामिनिजलोकांचि
रंतनम् ३६ ॥ ॥ कउवाच ॥ ॥ श्रुत्वावाक्यमुभौसिन्नौबाष्पकंठौतमूचतुः ॥ वदातेदर्शनंदेवपुनरावांभविष्यति ३७ ततःसमातरंप्राहदर्शनंमेभविष्य
ति ॥ भवान्यामंदिरेमातःसत्यंमेप्रियभाषितम् ३८ एवंश्रुत्वादेववाक्यंपुनर्यावद्वदत्यसौ ॥ तावदंतर्हितोदेवस्ततस्तौखिन्नमानसौ ३९ कारयामासतुर्मूर्तिं
प्रासादंचातिशोभनम् ॥ विनायकेतिनामास्यचक्रतुर्भक्तितत्परौ ४० तस्यांमूर्तौध्यातमात्रोनित्यंदर्शयतेविभुः ॥ स्वात्मानंसर्वगंनानारूपिणंसविनायकः
४१ ॥ गृत्समदउवाच ॥ एवंकीर्तेसमाख्यातंचरितंतेमयाशुभम् ॥ विनायकस्यदेवस्यश्रवणात्सर्वसिद्धिदम् ४२ धन्यंयशस्यमायुष्यंसर्वोपद्रवनाशनम्
॥ सर्वकामप्रदंसर्वपापसंचयनाशनम् ४३ पुनस्तेकथयिष्यामिसिंधुदैत्यवधायसः ॥ अवतीर्णःशिवगृहेमयूरेश्वरसंज्ञितः ४४ बाल्यात्प्रभृत्यद्भुतानिनानाक
र्माणियोकरोद् ४५ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेविनायकचरित्रकथनंनामाद्विसप्ततितमोध्यायः ७२ ॥ ॥ व्यासउवाच ॥ ॥ कथंब्रह्मन्शिवगृहेमयू
रेश्वरसंज्ञितः ॥ अवतीर्णःकिमर्थंवाकिंचतच्चरितंपितः १ मयूरेश्वरसंज्ञाचकथंजाताविनायके ॥ एतन्मेसर्वमाचक्ष्वशृण्वंस्तृप्यामिनकचिद् २ ॥ कउवाच

त्रेतायुगेमहादैत्यःसिंधुनामाऽभवत्पुरा ॥ सहतस्तेनबलिनाऽवतीर्णे नाशिवालये ३ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ शौनकस्यचसंवादंराज्ञाचचक्र
पाणिना ४ मैथिलेविषयेराजागंडकीनगरेशुभे ॥ चक्रपाणिरितिख्यातःसाक्षाद्विष्णुरिवापरः ५ नगुणावर्णितुंशक्याःशेषेणास्यकदाचन ६ तेजसालोप
यन्प्रभानुंलावण्येनचमन्मथं ॥ मत्याबृहस्पतिंस्कंदंविक्रमेणबलेनच ७ येनेयंसकलापृथ्वीक्षणेनवशवर्तिनी ॥ कृतासर्वेचराजानःसेवायांविनियोजिताः ८
तुरंगाणांगजानांचपदातीनांजयैषिणाम् ॥ रथानांचनयस्यास्तिसंख्यानंजगतीतले ९ साक्षाल्लक्ष्मीस्थिरायस्यगृहेदर्शनगोचरा ॥ रत्नकांचनमुक्ताभिरनि
शंभासयद्दिशः १० भद्रंभद्रकरंयस्यलोकानामलकोपमम् ॥ यस्यामात्यौमहाबुद्धीसांबश्चैवसुबोधनः ११ सेवंतौस्वामिकार्यार्थेतृणीकृत्यस्वजीवितम् ॥
यस्यासीत्प्रमदारम्यानाम्नोग्राचारुहासिनी १२ कुमुदानिविकासंतेदिवायन्मुखचंद्रतः ॥ अनेकभूषादीप्त्यायानाशयित्वाखिलंतमः १३ पातिव्रत्यगुणा
न्द्रष्टुंयांतिसर्वाःपतिव्रताः ॥ एवंराजाबुधोमान्यःसदाविष्णुपरायणः १४ पुराणश्रवणेसक्तोधर्मशास्त्रपरायणः ॥ संतत्यारहितःसोथदुःखमापदिवानिशम् ॥
१५ अपत्यंजायतेयद्यत्तत्तन्नश्यतितत्क्षणात् ॥ अनेकव्रतदानानियज्ञांश्चक्रतवान्बहून् १६ ततःसराजाकर्स्मिश्चित्समयेनिजभार्यया ॥ आकार्यप्रकृतीपौरा
न्विरक्तोराज्यसंपदि १७ उवाचसर्वान्दंडंचकोशंराज्यंत्यजेधुना ॥ किमपुत्रस्यराज्येनस्वर्गहीनस्यमेधुना १८ यानिकर्माणिचमयापुत्रार्थेचरितानिच ॥
ईश्वरार्पणबुध्याचेत्कृतानिस्युर्यदातदा १९ मुक्तिःस्यादुभयोःपूर्वजन्मकर्मक्षयोपिच ॥ गतमायुर्वृथालोकावनंयास्येमुदाधुना २० सर्वंप्रकृतिसात्कृत्वायू
यंतद्वाक्यकारिणः ॥ गमिष्येहंवनंलोकास्तपस्तप्तुंहितायवै २१ कदाचिदिष्टसिद्धिश्चेत्पुनर्यास्येनिजांपुरीम् ॥ ध्रुवमाज्ञांममपुनःप्रयच्छताधुनाजनाः ॥ ए
वंश्रुत्वानृपवचःसर्वेदुःखितमानसाः २२ जश्रुधाराःप्रमुंचंतःप्रोचुस्तंनृपसत्तमम् ॥ पौराऊचुः ॥ जननीजनकस्त्वंनःकथंनिष्ठुरतांगतः ॥ किमर्थंत्यजसे
नस्त्वमपराधंविनाप्रभो २३ विनाभवंतंनोजन्मवृथैवमातरंशिशोः ॥ वयमप्यनुयास्यामोयत्रयातिभवान्प्रभो २४ कउवाच ॥ ॥ एवंवदत्सुलोकेषुनृपे
णाथागतोमुनिः ॥ शौनकोमुनिशार्दूलोजातवेदाइवापरः २५ वेदवेदांगशास्त्राणांवक्तात्रैलोक्यविश्रुतः ॥ शक्रादिसुरवंद्योयोभूतभव्यभविष्यवित् २६
तंदृष्ट्वापुरतोराजाननामोत्थायचासनात् ॥ स्वासनेतमुपावेश्यपुपूजपरयामुदा २७ भुक्तवंतंचविश्रांतंपादसंवाहनादिभिः ॥ चक्रपाणिरथोवाचपुण्यांकिंफ
लितंमम २८ यज्जातंदर्शनंतेद्यसर्वपापहरंशुभम् ॥ सर्वकामप्रदंनृणांदुर्लभंपापकर्मणाम् २९ ततःप्रोचेमुनिश्चक्रपाणिंनृपतिसत्तमम् ॥ संतुष्टःपरयाभ
क्त्याप्रश्रयेणदमेनच ३० ॥ ॥ मुनिरुवाच ॥ ॥ माचिंतांकुरुराजेंद्रमाचराज्यंपरित्यज ॥ पुत्रस्तेभवितासम्यक्मद्वाक्यान्नात्रसंशयः ३१ मयावाणीनो
क्तपूर्वानृताहासेपिकर्हिचित् ॥ ॥ कउवाच ॥ ॥ एवमाकर्ण्यतद्वाक्यंजहृषेराजसत्तमः ३२ अलंकारान्ददौतस्मैरत्नकांचननिर्मितान् ॥ वस्त्राणिचमहार्हा

१ भ्रुवंतआज्ञामितिपाठः ।

णिनचजग्राहवैमुनिः ३३ पुनःप्रोवाचनृपतिंवयंवल्कलधारिणः ॥ निःस्पृहाःसर्वभोगेषुसर्वभूतहितेरताः ३४ सृष्टिसंहारकरणेसमर्थाःकरुणाऽन्वयः ॥ सा
धूनांदर्शनरताःसमलोष्टाश्मकांचनाः३५विद्वत्सुनैवकमलास्थानंधत्तेकदाचन ॥ तस्मान्नेदंग्रहीष्यामिकांचनंवसनंशुभम् ३६तीर्थयात्राप्रसंगेनत्वामहंसमुपाग
तः ॥ दिनानिचव्यतीतानिबहूनितवदर्शने ३७ कउवाच ॥ पुनस्तौनेमतुःसम्यग्दंपतीशौनकंमुनिम् ॥ पप्रच्छतुरुपायंतंसंतानोत्पादनेक्षमम् ३८ सर्वत्र
ततपोयज्ञान्मत्वादानानिवैवृथा ॥ ततोब्रवीन्मुनिःसौरंव्रतंसर्वार्थदंनृणाम् ३९ अनेकजन्मपापानांशमनंपुत्रपौत्रदम् ॥ मुनिरुवाच ॥ मासमात्रंव्रतंकार्यमार
भ्यभानुसप्तमी ४० कृत्वाभ्युदयिकंश्राद्धंमातृपूजनपूर्वकम् ॥ अभ्यर्च्यगणनाथंचस्वस्तिवाच्यद्विजर्षभान् ४१ सुवर्णकलशेस्थाप्यसौवर्णंरविमंडलं ॥
उपचारैःषोडशभिर्भक्तिभावसमन्वितः ४२ रक्तचंदनमिश्रैश्चतंडुलैःकुसुमैरपि ॥ रक्तैर्नानाविधैरन्नैःफलैश्चविविधैरपि ४३ अर्घ्यैर्द्वादशसंख्यैश्चनमस्कारैःप
रिक्रमैः ॥ स्तुतिभिःप्रार्थनाभिश्चप्रार्थयेत्परमेश्वरम् ४४ ततोलक्षनमस्कारान्कुर्वीतकारयीतवा ॥ प्रत्यहंलक्षविप्रांस्तुभोजयेत्परयामुदा ४५ गामेकांप्रत्य
हंदद्याद्वेदज्ञायकुटुंबिने ॥ ब्रह्मचर्यणतिष्ठेच्चसपत्नीकोनृपोत्तम ४६ दीनांधकृपणेभ्यश्चदद्यादन्नंदयान्वितः ॥ मासांतेसर्वसंभारान्ब्राह्मणायसमर्पयेत् ४७
एवंव्रतेकृतेराजन्पुत्रस्तेमत्प्रसादतः ॥ भविष्यतिमहाख्यातःसूर्यभक्तियुतःशुचिः ४८ कउवाच ॥ ॥ एवंव्रतंसमादिश्यशौनकोंतर्हितस्तदा ॥ ततश्चका
रनृपतिर्यथादिष्टंव्रतंतुतत् ४९ पत्न्यासहविनीतात्मासूर्यभक्तिपरायणः ॥ ब्राह्मणान्भोजयामासयथेच्छंलक्षसंख्यया ५० उपवासयुतःपत्न्यामासमा
त्रंबभूवसः ॥ गोदानंचनमस्कारांश्चक्रेचाकारयद्द्विजैः ५१ सूर्यमंत्रंजपन्नित्यंतन्नामस्मरणंसदा ॥ ततःकदाचित्तत्पत्नीरात्रौस्वप्नेददर्शतम् ५२ निजभर्तृ
द्विजरूपंसवितारंमनोरमम् ॥ चकमेकामरूपंतंमदनाग्निप्रपीडिता ५३ उवाचपरितप्तांगीकामोमेबाधतेभृशम् ॥ ऋतुंमेदेहिभर्तस्त्वंनोचेन्मृत्युर्भवेन्मम ॥
५४ सोपिवंध्यंविनिश्चित्यतत्पतिंकामुकांचताम् ॥ स्वप्नएवभर्तृरूपीसवितातामृतुंददौ ५५ साप्रबुद्धाततःप्राहसमुत्थाप्यनिजंपतिम् ॥ नियमस्थेनकिं
ब्रह्मंस्त्वयामेऋतुरर्पितः ५६ सउवाचततःस्तांतुनाहंव्रतमनाःशुभे ॥ उपवासरतःक्षीणोरारमरविभक्तिमान् ५७ ततःपुनःप्राहसतींनान्यंजानेकथंचन ॥
त्वद्रूपेणैवध्यायामिसवितारंव्रतेस्थिता ५८ ऋतुजेनचदग्धाहंवह्निनांतर्गतेनह ॥ ततःपुनश्चक्रपाणिरूचेतांप्रियभाषिणीम् ५९ ॥ ॥ नृपउवाच ॥ ॥
तुष्टोसौसविताकांतेनमस्कारैश्चभोजनैः ॥ ब्राह्मणानांगवांदानैरुपवासैर्जपैरपि ६० आवांसिद्धिंददौसम्यक्पुत्रस्तवभविष्यति ॥ ॥ कउवाच ॥ ॥ दि
नेदिनेगर्भवृद्धौतस्यास्तापोभिवर्द्धते ६१ सामुमूर्षुश्चंदनानिसोशीराणिनिषेवते ॥ लिलेपांगेचकर्पूरंतापोनास्याशशामच ६२ नचार्द्रवस्त्रपवनैस्ततःसास
खिभिःसह ॥ तत्याजसिंधुतीरेतंगर्भंगत्वामहत्तरम् ६३ आययौसाथविश्रांतासखिभिर्निजमंदिरम् ॥ निवेद्यभर्त्रेत्यक्तंगृहकार्यरताभवत् ६४ ॥ इति
श्रीगणेशपुराणेउत्तरखंडेसिंधूत्पत्तिवर्णनंनामत्रिसप्ततितमोध्यायः ॥ ७३ ॥ ॥ कउवाच ॥ ॥ त्यक्तेगर्भेतयासिंधौबालोजनिमहाबलः ॥ तेजस्वीवि

करालास्योर्ध्वभालस्त्रिलोचनः १ रक्तकेशजटाभारश्चक्रपाणिस्त्रिशूलभृत् ॥ बालशब्देनतस्याथचकंपेभुवनत्रयम् २ आजानुबाहुराक्रांतुमियेषविष्टपत्रयम्॥ चुक्षुभेसागरस्तेनयादोभिर्मुनिसत्तम ३ तत्रस्थितस्तुबालोसौसमुद्रमुपशोषयत् ॥ ॥ समुद्रउवाच ॥ ॥ जीवनायममसुतंनेष्यएनंनृपालयम् ४ इत्यानि नायतंबालंसमुद्रोनृपमंदिरम् ॥ तवपत्न्यात्याजिगर्भोदुःसहत्वान्ममोदरे ५ ॥ कउवाच ॥ दंपत्योःभुक्तःस्थाप्यप्रोचएवंद्विजस्तदा ॥ उग्रोबालस्ततोजा तोखिललोकभयंकरः६यस्यप्रथमशब्देनकंपितंभुवनत्रयम् ॥ नेत्राभ्यांनोक्षितुंशक्योतएनंसुपानयम् ७ इत्युक्त्वाबालकंमुक्त्वांऽतर्दधेसागरस्तदा ॥ तत एनंकराभ्यांसाकटौदध्रेनृपांगना ८ स्थापयित्वादतौप्रेम्णास्तनपानंमुदान्विता ॥ ऽभावानंदयुक्तौतौदंपतीपुत्रदर्शनात् ९ यथाचिरंयोगनिष्ठोलब्ध्वाब्रह्म मृतंपरम् ॥ ततआकारयामासब्राह्मणान्सुहृदोपिच १० ज्योतिर्विद्विर्विचार्यास्यसिंधुरित्यभिधांशुभाम् ॥ राज्ञीचक्रेनृपश्चास्यजातकर्मयथाविधि ११ कृत्वा ददौततोदानमनेकंहर्षनिर्भरः ॥ अनेकेभ्योद्विजातिभ्योवस्त्राणिविविधानिच १२ दापयामासनगरेपताकाभिरलंकृते ॥ वाद्यत्सुसर्ववाद्येषुशर्कराश्चगृहेगृहे १३ गतेषुसर्वलोकेषुरक्तांगइतिनामच ॥ चक्रतुर्दंपतीस्नेहादथमात्यौसमूचतुः १४ उग्रायास्तनयश्चायमुग्रमुग्रायरोपिच ॥ अयमुग्रेक्षणइतिनाम्नाख्या तोभविष्यति १५ विप्रप्रसादनइतिपौरानामप्रचक्रिरे ॥ ततःसर्वेपौरजनाऽपदाविविधास्तदा १६ दुर्वृत्तायसोप्येतानदापयामाससत्क्षणात् ॥ व वृधेबालकःसोथशुक्लपक्षेयथाशशी १७ यथाग्निर्वायुवेगेनवर्धतेक्षणमात्रतः ॥ तथास्यतेजसाबालःप्रवृद्धोगगनंस्पृशत् १८ क्रीडन्नेवसदाबा लोवृक्षान्गृहगतान्बहून् ॥ उत्पाटयपातयामासबाहुस्ततलेनह १९ अरण्येक्रीडतातेनपर्वताश्चूर्णिताद्रुमाः ॥ उड्डीयचंद्रहरिणंक्षणंजग्राहकाहचित् ॥ २० जलावतारमार्गेतुरुद्धेक्कापिकरेणुना ॥ मुष्टिघातेनबिभिदेगंडमस्याःपपातसः २१ एवंतस्याद्भुतंकर्मदृष्ट्वालोकाविसिस्मिरे ॥ जहर्षजननीचास्य पिताज्ञात्वातिमानुषम् २२ एवंप्रवृद्धोबालोसौसिंधुनामहाबलः ॥ उवाचपितरंस्यास्येतपस्तप्तुमहंनृप २३ अनुष्ठित्यास्वर्गलोकंभूलोकंचरसातलम् ॥ आक्रमिष्येवृथायुर्मेगच्छतीतिमतिर्मम २४ एवमाकर्ण्यतद्वाक्यंदूरदुःखितरौचतम् ॥ उत्कंठैस्वस्यपुत्रस्यनित्यंप्रार्थयतेपिता २५ जननीसर्वदेवेभ्यो व्रतदानादिनापिच ॥ एवमाज्ञामवाप्यैवनत्वातौसययौवनम् २६ तत्रभ्रमन्ददर्शाथकासारंजलजैर्युतं ॥ तत्रस्थातुंमनश्चक्रेविविक्तंप्रीतिहर्षितः २७ एकां गुष्ठेनभूमिष्ठऊर्ध्वबाहूरविंस्मरन् ॥ शुक्रोपदिष्टंमंत्रंजपन्पर्वतनिश्चलः २८ दक्षिणेजानुनिसदावामपादंनिधायच ॥ अंजलिंहृदिविन्यस्यध्यायन्दिनमणिंत दा २९ शीतवातातपजलवृष्टीनांसहनोदृढः ॥ वायुमात्राशनस्तस्थौवल्मीकाक्रांतविग्रहः ३० यस्थिमात्रावशिष्टोपिजपत्येवमहामनुम् ॥ एवंतस्यव्यती यायशरदाद्विसहस्रकम् ३१ तस्यसिंधोःशरीरोत्थास्तेपुर्भासोरवितदा ॥ एवमुग्रंततोदृष्ट्वाप्रत्यक्षोभूद्दिवाकरः ३२ उवाचपरमप्रीतोनुष्ठानेनतवाधुना ॥ वरंव रयचित्तस्थंदास्यामिजीवितावधि ३३ सिंधुस्तदाकर्ण्यवचोभाषितंभानुनास्वयम् ॥ देहभावंगतोपश्यत्पुरतोभास्करंप्रभुम् ३४ नत्वातत्पादकमलंबद्धा

जलिपुटोब्रवीत् ॥ नमस्तेदीननाथायनमस्तेसर्वसाक्षिणे ३५ नमस्तेत्रिदशेशायब्रह्मविष्णुशिवात्मने ॥ नमस्तेविश्ववंद्यायनमस्तेविश्वहेतवे ३६ नमस्ते वृष्टिबीजायसस्योत्पादनहेतवे ॥ परब्रह्मस्वरूपायसृष्टिस्थित्यंतहेतवे ३७ गुणातीतायगुरवेगुणक्षोभविधायिने ॥ सर्वज्ञायज्ञानदात्रेसर्वस्यपतयेनमः ३८ धन्यंमेजन्मदेवेशवंशोमेजनकोपिच ॥ जननीचतपश्चापियज्जातंतवदर्शनम् ३९ वरदश्चहिनेशत्वंदेहिमेसर्वतोऽभयं ॥ तवप्रसादात्संग्रामेजयेयं सर्वदेवताः ४० वर्त्तमानादेवगणान्नमेमृत्युर्भवेदिति ॥ एवंतस्यवरान्श्रुत्वापरितुष्टोविभावसुः ॥ उवाचनिजभक्तंतमनुष्ठानश्चशंकरम् ४१ ॥ ॥ सूर्यउवाच ॥ ॥ नभयंविद्यतेदेवयोनिभ्योनृभ्यएवच ॥ नातिर्यग्भ्योननागेभ्योनदिवानिशिक्वचित् ४२ नोषःकालेनसंध्यायांममवाक्याद्भविष्यति ॥ मरणंतेनृपसुतगृहाणामृतभाजनम् ४३ इदंयावत्कंठगतंतावन्मृत्युर्नतेभवेत् ॥ निष्कांशयेदिदंयस्तेतस्मान्मृत्युर्भविष्यति ४४ देवोयोवतरत्कोपिधुन्वन्केशाग्रतो दिवम् ॥ यस्यांगुष्ठनखाग्रेस्युर्ब्रह्मांडानांहिकोटयः ४५ सत्वांहनिष्यतिविभुरन्यस्मादभयंतव ॥ मद्वरस्यप्रसादेनसर्वंतृणमयंतव ४६ त्रैलोक्यराज्यंते दत्तंनात्रकार्याविचारणा ॥ ॥ कउवाच ॥ ॥ एवंनानावरान्दत्वांतर्दधेसाकितातदा ४७ सोप्यानंदसमायुक्तोजगामनिजमंदिरम् ॥ जननीचपितातस्यमूर्ध्न्या घ्रायापतुर्मुदम् ४८ ऊचतुस्तंतदापुत्रंविरहात्तेनवर्जितौ ॥ चिंतयाकृशतांयातौपश्यपुत्रदशामिमाम् ४९ तयोःपादौप्रणम्याहसपुत्रोहर्षनिर्भरः ॥ प्रस न्नःसवितामह्यंत्रैलोक्यस्वामितामदात् ५० साधयिष्येतद्वरात्तांनचिंतांकर्तुमर्हथः ५१ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेवरप्रदानंनामचतुःसप्ततित मोऽध्यायः ॥ ७४ ॥ कउवाच ॥ ॥ बुद्धिमंतंसुतंज्ञात्वासवितुर्वरदर्पितम् ॥ राज्यंतस्मैददौसर्वंदेशकोशबलान्वितम् १ पितावनंययौतस्यस्वात्मसाधन लालसः ॥ सतुपित्राभिषिक्तःसन्राज्यंकर्तुंमनोदधे २ श्रेणीमुख्यान्समाहूयप्रकृतीरधिकारिणः ॥ आस्थापयत्स्वाधिकारेमानपित्रांशुकादिभिः ॥ डिं डीरवेणस्वाज्ञायाभंगेदोषमघोषयत् ३ दिग्जयार्थततोवीरानाज्ञापयतसत्वरम् ॥ तेजसाहेपयत्सूर्यमतिभीषणविग्रहः ४ वीराअग्रेप्रयांतिस्मविक रालारुणाननाः ॥ नग्ननानाशस्त्रधरारजश्छादितभास्कराः ५ ततोगजाश्चतुर्दंतानानावर्णविभूषिताः ॥ ययुर्महाशृंखलिनःकंपयंतोवसुंधरां ६ महामा त्रसमारूढाश्चंचलाःपर्वताइव ॥ नानावर्णध्वजयुतादिग्गजानभेत्तुमिच्छवः ७ घंटाघोषेणमहतानादयंतोदिगंतरं ॥ अश्वारोहाययुःपश्चान्नानालंक रणान्विताः ८ असंख्यतूणधनुषांशस्त्राणांमंडलान्विताः ॥ सिंधुदैत्यश्चभूमध्येराजहयपृष्टगः ९ मुक्तामालालसत्कंठोधनुर्बाणलसत्करः ॥ ख ड्गखेटधरोगच्छंश्चूर्णयन्द्रुमपर्वतान् १० यद्यन्नगरमुद्दिश्ययातिदैत्योमहाबलः ॥ तस्यतस्याधिपंवीराधृत्वानिन्युर्निजाधिपम् ११ स्वकीयंनायकंचित्तं मुद्रांतत्रन्यवेशयन् ॥ ततोन्येशरणंयातादासभावमुपागताः १२ करदांस्तानसकृत्स्वैवररक्षस्वपदेबलात् ॥ एवंसर्वान्विशंचक्रेदैत्यकाव्यस्ततोऽन्वयुः १३ शुंभोनिशुंभोवृत्रश्चप्रचंडःकालएवच ॥ कदंबासुरनामाचशंबरःकमलासुरः ॥ १४ ॥ कोलासुरोब्रवीत्तत्रयथात्रिपुरदैत्यराट् ॥ विजित्यलोकान्त्रि

तयमधिकारान्नहिनोददौ १५ तथायच्छाधिकारान्नोजित्वात्रैलोक्यमोजसा ॥ तेस्मिन्हतेशिवेनाद्यदृष्टोसिप्रबलोसुरः १६ नतेपराक्रमतुलांकृतांतोपिलभे
त्क्वचित् ॥ तवाज्ञांकर्तुमिच्छामस्तवसेवांमहाबल १७ एवमाकर्ण्यतद्वाक्यंसंतुष्टःसिंधुदैत्यराट् ॥ ददावश्वान्गजांस्तेभ्योवस्त्राणिभूषणानिच ॥ १८ ॥
॥ ॥ सिंधुरुवाच ॥ ॥ प्रबलस्तुतदाहंस्यांयदाजेष्येमरावतीं ॥ हरविष्णुसत्यलोकान्पातालानिचसप्तच ॥ १९ ॥ ॥ कउवाच ॥ ॥ साधु
साध्वितिसर्वेषुब्रुवत्सुसर्वदैत्यपाः ॥ जगर्जुश्चजहर्षुश्चब्रह्मांडंपर्यकंपयन् २० नभूपयुद्वाकंडूर्नोद्यशमद्देवयुद्धतः ॥ शमंयास्यत्यतोजग्मुःशीघ्रमेवात्र
जन्दिवम् २१ रुरुधुस्तेशक्रपुरींब्राह्मणाइववित्तदम् ॥ मध्यंविविशुरपरेलुंठंतोरत्नसंचयान् २२ कोलाहलोमहानासीद्देवानांतत्रगर्जतां ॥ ततःसभामध्य
गतोहरिर्दूतमुखात्ततः २३ शुश्रावदैत्याभिगमंवेष्टितांचनिजांपुरीं ॥ शीघ्रमैरावतारूढोवज्रहस्तोमरान्वितः २४ आययौतेनदैत्येनयोद्धुकामःसुराधि
पः ॥ केचिदूचुःसुरास्तत्रनायंयुद्धक्षमोहरे २५ विनारमापतिंचास्यनसमोदृश्यतेक्वचित् ॥ यावद्ददत्सुतेष्वेवंतावद्दैत्योमहाबलः २६ शक्रंसुरगणैर्युक्त
मविध्यच्छरवृष्टिभिः ॥ तावद्देवगणाःकेचित्पलायनपरायणाः ॥ २७ ॥ ततोधावन्महेंद्रोसौगर्जमानोरुषान्वितः ॥ ग्रसन्दैत्यगणान्सर्वान्वज्रोद्यतकरोऽ
रिहा २८ जहनदैत्यराजंतंमस्तकेवज्रतोदृढम् ॥ समूर्छांमहतींप्रायान्मुहूर्तात्पुनरुत्थितः २९ उवाचचहरिंगच्छस्वक्षयंनक्षयंव्रज ॥ मममुष्टिप्रहारेणकालो
मृत्युंगमिष्यति ३० तत्रकागणनातेस्तिनाशृणोत्तद्धरिर्वचः ॥ रोषाविष्टोमहादैत्यस्ततोमुष्टिप्रहारतः ३१ बिभेदैरावतकटंरुधिरौघप्रवर्षितम् ॥ ततऊर्ध्वो
यदैत्यस्तच्चतुर्दंतानधारयत् ३२ अपातयद्गजपतिमाश्चर्यंहरिरायय्यौ ॥ दधारचहरिंपादेपोथयद्यावदेवतम् ३३ तावत्सूक्ष्मेणवपुषानिर्गतोहस्तमध्यतः ॥
जगामदूरदेशंसमनसाप्रशशंसतम् ३४ नैतादृशंबलंदृष्टमतिष्ठंचेन्मृतोभवं ॥ ततोमरगणैःसार्द्धंशरणंतंहरिंहरिः ३५ जगामवपुषान्येनविस्मृत्यैरावतंगजं ॥
सिंधुदैत्यस्तुसेंद्रेषुदेवेषुविद्रुतेषुच ३६ इंद्रासनसमारूढोदैत्यवृंदेनवेष्टितः ॥ ददौपदानिदेवानांदैत्येभ्यःसकलानिसः ३७ ततःशुंभादयोदैत्याःस्थितास्तेषुनिरा
कुलाः ॥ नमस्यंतोसुरपतिंप्रशंसंतोबलाधिकं ३८ नानावादित्रनिर्घोषैर्नादयंतस्त्रिविष्टपं ३९ इतिश्रीगणेशपुराणेउत्तरखंडेसुरपराजयोनामपंचसप्ततितमोध्यायः
७५ ॥ ॥ कउवाच ॥ ॥ वैकुंठेसुखमासीनमागतोमरसंयुतः ॥ हरिर्हरिंनमस्कृत्यनिजगादप्रयोजनम् १ ॥ इंद्रउवाच ॥ किंनजानासिगोविंदसिंधुदैत्यकृ
तामिमाम् ॥ आपदंनोमरावत्यांदुष्टैराक्रमणंकृतम् २ तेनसार्द्धंछलंयुद्धंयथाशक्तिसुरैःसह ॥ नसजेतुंक्षमोदैत्योतस्त्वांशरणमन्वियाम् ३ नत्वांविनागतिर्नो
स्तिसर्वदात्वंगतिर्हिनः ॥ निर्दालयैनंनोदेहिस्थानानिजगदीश्वर ४ ॥ कउवाच ॥ श्रुत्वाहरिवचोविष्णुश्चिताश्चर्यसमन्वितः ॥ उवाचतंनभीःकार्याप्रविजे
ष्येऽसुरंक्षणात् ५ एवमुक्त्वा हृषीकेशोरुरोहनिजवाहनम् ॥ तदुड्डानेनचतदाचकंपेभुवनत्रयम् ६ पतिताजवनोद्वक्षाःपक्षिवृंदसमन्विताः ॥ किरीटकुंडलधरो
वनमालाविभूषितः ७ कौस्तुभार्चिर्लसद्वक्षाःकस्तूरीतिलकोज्ज्वलः ॥ शंखचक्रगदापद्महस्तोयातोमरावतीं ८ ज्ञात्वादेवगणान्प्राप्तान्गरुडासनसंयुतान् ॥ युद्धा

याजग्मुरसुरानानाशस्त्रधरास्तदा ९धनुश्चक्रधरोदैत्यःसतूणोहयसंगतः॥ सिंधुरप्यागतोरोषाद्योद्धुकामोमहाबलः १० ततःकुबेरोवरुणोवायुरग्निःपुरंदरः॥ सोमोमित्रश्चभौमश्चनासत्यौमदनोपिच ११ ततोभवद्द्वंद्वयुद्धंसिंधुदैत्येपुरःस्थिते॥ प्रचंडोवरुणेनाजौकमलेनचयक्षराट् १२ वृत्रेणशतयज्वाचनिशुंभःपवनेनच॥शुंभोपियुयुधेतत्रविष्णुनाप्रभविष्णुना १३ वह्निश्चंडेनमुंडेनसोमश्चयुयुधेभृशं॥ कदंबेनचभौमश्चमदनेनचशंबरः १४ नासत्यौकालदैत्येनसर्वएवचसैनिकाः॥ शस्त्रैरस्त्रैःप्रजघ्नुस्तेमर्मस्थानानिचासकृत् १५ केचिद्युयुधिरेमल्ललीलयायुद्धदुर्मदाः॥ परस्परंशस्त्रघातैःकेचित्तत्रप्रपेदिरे १६ मृतामुमूर्षवःकेचिद्व्यंगाश्चैववव्रल्गिरे॥ जयंपराजयंतेनप्रापुःक्वाचित्कमेवच १७ ततोवृत्रासुरःशक्रमहनन्मुष्टिघाततः॥ मस्तकंमस्तकेनैवनिजघ्नतुरथौजसा १८ एवंहस्तेनहस्तंचपादंपादेनजघ्नतुः॥ वक्षस्थलेनवक्षश्चततोवज्रेणसोहनत् १९ जघानवृत्रःशक्रंतंसोपतन्मूर्छितोभुवि॥ यावत्पलायतिपुरोवमन्रक्तंमुखाद्बहु २० ततःपपातभूपृष्ठेहतोमूर्छांगतोभृशम् पुनःसंज्ञामवाप्यैववज्रकल्पेनमुष्टिना २१ जघानवृत्रःशक्रंतंसोपतन्मूर्छितोभुवि॥ यावत्पलायतिसुरोवमन्रक्तंमुखाद्बहु॥तावद्दैत्यायोद्धुकामाःसमीयुःसर्वतोदिशं॥दृष्ट्वापराक्रमंतेषांमघवांतर्दधेतदा २२ एवंयेयेद्वंद्वयुद्धंकुर्वंतोदेवतागणाः॥ तेसर्वेभग्नदर्पास्तुपलायनमकुर्वत २३ एवंदेवेषुभग्नेषुगरुडंप्राहिणोद्धरिः॥ चक्रदीप्त्यास्वदीप्त्याचभासयन्विदिशोदिशः २४ जहनच्चक्रधाराभिर्दैत्यश्रेणिरनेकशः॥ केचिद्भग्ननादैत्याःकेचिद्भग्नशिरोधराः २५ केचिच्चशतधाजाताःशीर्णजानूरुबाहवः॥ केचिच्चशरणंयातानममारजनार्दनः २६ सर्वेमहाबलादैत्यामुक्तिंहरिरहतागताः॥ मेदोमांसवहानद्यःसद्यस्तत्रप्रवर्तिताः २७ ततःशंखनिनादेनहरिःसर्वं व्यनादयत्॥ एवंजयतिगोविंदेसर्वेशुंभादयोसुराः २८ तमेवयोद्धुमायाताद्वंद्वयुद्धंविहायतत्॥ विराड्रूपेणभगवान्धृत्वातांश्चतुरोसुरान् २९ भिंडिपालेनपाषाणं यथाक्षिपतिमानवः॥ तथाचंडंचमुंडंचनिशुंभंशुंभमेवच ३० भ्रामयित्वाक्षिपद्दूरेमध्येकृत्वासरिद्वराम्॥ तेमूर्छांपरिभूयैवपुनश्चवाहिनींगताः ३१ हृदिप्रचंडंपृष्ठेतुवृत्रंमुष्टिप्रहारतः॥ जघानहरिरव्यग्रःकालंकमलमेवच ३२ भौमासुरंचशिरसिकदंबंचक्रघाततः॥ कोलासुरंचगदयाविव्याधहृदिमाधवः ३३ ततःसिंधुरगात्तूर्णंकृतकोलाहलारवः॥ दिग्गतान्नादयन्प्रोचेबलंतेदर्शितंहरे ३४ ममापिपौरुषंपश्यनचगंतुंत्वमर्हसि॥ नमेदृष्टिगतोजीवन्नरिपुर्यातिकदाचन ३५ भूतभव्यभविष्यज्ञकिंपूर्वंनविचारितम्॥ यस्यशब्देनचभृशंकंपतेभुवनत्रयम् ३६ तत्पुरःकथमायातःखद्योतइवपूषणम्॥ ततोमरगणाःप्रोचुर्वल्गंतंसिंधुदैत्यपं॥ ३७ शूरानहिप्रजल्पंतिदर्शयंत्येवपौरुषम्॥ अस्माकंनहरेराज्ञानोचेत्त्वंशतधाभवेः ३८॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेषट्सप्ततितमोऽध्यायः॥ ७६॥ कउवाच॥ ॥ इतितद्वचनंश्रुत्वाक्रोधाद्विह्वलिकणान्वमन्॥ यथासिंहोगजानीकंयातितद्वद्ययौसुरान् १ सिंधुर्मुष्टिप्रहारेणजघानबलसूदनम्॥ पपातसधरापृष्ठेवाताहतइवद्रुमः २ भालदेशेकुबेरंचहनौचवरुणंयमं॥ पृष्ठदेशेजघानासौचक्राघातेनदैत्यराट् ३ तालुदेशेपावकंचमन्मथंलत्तयाहनत्॥ अनिलंपादघातेनशनैश्चरमपोथयत् ४ सोमंभौमंभ्रामयित्वातत्याजभूतलेबलात्॥ पृष्ठभागेहनच्चैवसनकंचसनंदनम् ५ नासत्यौनारदश्चापिकुत्रापिचपलायिताः॥

ततःपलायिताःसर्वेदृष्ट्वावीर्यंसुरास्तदा ६ पतितामूर्छिताःकेचिद्दैत्यश्चक्रेणमाधवम् ॥ मुष्टिदेशेजघानासौचक्रंतस्यापतद्भुवि ७ माधवोगदयामूर्ध्निदैत्ये शंतमताडयत् ॥ वंचयित्वाचशतधागदांस्वांचव्यचिक्षिपत् ८ ज्ञात्वापराक्रमंतस्यप्रोचेतंमधुसूदनः ॥ वरयस्ववरंदैत्ययत्तेमनसिवर्तते ९ नैतादृशोमयादर्शिपुरुषार्थोसुरेक्वचित् ॥ ततोब्रवीद्दैत्यपतिःपरमाह्लादसंयुतः १० यदितुष्टोसिदेवेशयदिदेयोवरोमम ॥ गंडकीनगरमेत्वंपरिवारयुतोहरे ११ सार्वकालंवसविभोनान्यंयाचेवरंपरम् ॥ ततऊचेमहाविष्णुस्तास्यामिनगरेतव १२ दत्तोवरोयतोनूनंततोस्मिवशगस्तव ॥ ततःससत्यलोकेचकैलासे वैष्णवेपदे १३ आस्थापदैत्यपतीन्स्वयंशाक्रेपदेवसद्व ॥ तत्राप्यन्यंस्थापयित्वास्नापतियुतःस्वयं १४ वाद्यदुंदुभिनिर्घोषैःस्वपुरींगंडकींययौ ॥ नुवंति बंदिनस्तंतुनेदशोभूत्पुमान्क्वचित् १५ येनविष्णुर्गृहंस्वीयंजित्वानायिसुरान्बहून् ॥ ददृशुर्नागरास्तस्यसमीपेवरुणंहरिम् १६ कुबेरंदेवमुख्यांश्चततःस्वम वनंययुः ॥ ततःप्रोचेहरिर्दैत्योगंडकीनगरेसुखम् १७ विहरस्वामरैःसार्द्धंततःसोपितथाकरोत् ॥ परितोदूरतोदैत्यादैत्यान्न्यान्न्यवेशयत् १८ ततोदेवाहरिं प्रोचुःकिंकृतंगरुडध्वज ॥ त्यक्त्वास्वविक्रमंकिंत्वंस्थितोत्यानंदनिर्भरः १९ कथंकारागृहेप्राप्तान्दृत्युलोकंगताःकथम् ॥ कथमंतोभवेदस्यभोगस्यजगदीश्व र २० ततऊचेहरिःसर्वान्कालोहिदुरतिक्रमः ॥ कालेनजायतेसर्वंहसतेवर्धतेपिवा २१ तस्मात्कालंप्रतीक्षध्वंकालएनंग्रसिष्यति ॥ एवंजित्वात्रिलोकींस महाबलपराक्रमः २२ ततोदैत्योजगौसर्वंवृत्तांतंपितरौमुदा ॥ आशिषंददतुस्तौचज्ञात्वापौरुषमस्यह २३ ततोदैत्योदुष्टमतिर्भूतलेसमवोषयत् ॥ देवद्वि जगवामर्चांक्रियतेयेनकेनाचित् २४ सहंतव्योथवासाधुरानेयोममसन्निधौ ॥ प्रतिमायत्रयत्रस्यात्तांभंक्त्वानिक्षिपेज्जले २५ मयैवप्रतिमांकृत्वापूजयंतुगृ हेगृहे ॥ प्राबोधयन्सिंधुवचोदूताएवंस्थलेस्थले २६ भंक्त्वाप्रासादमूर्तीश्चतोयेगाधेचचिक्षिपुः ॥ सिंधोश्चप्रतिमांकृत्वास्थापयन्परमादरात् २७ पूजार्थं राक्षसाश्चापिततोयातानिजंपतिम् ॥ ऊचुर्वैनायकहरहरिमानुरमादिकाः २८ प्रतिमाःप्रविभज्याशुक्षिप्ताःसर्वामहाजले ॥ तवैवप्रतिमास्तत्रस्थापिताराक्ष साअपि २९ पूजार्थंस्थापिताःस्वामिन्नागताश्चतवांतिकम् ॥ एवंधर्मस्यसर्वस्यविच्छित्तिःसमजायत ३० यज्ञदानस्वधास्वाहावषट्कारान्नचाकरोत् ॥ देवद्विजगुरूणांचपूजनंकचनाभवत् ३१ मेरुयाताऋषिगणाःकेचिदभंशमुपागताः ॥ एवंत्रैलोक्यप्रबलादैत्याजाताश्चराक्षसाः ३२ विलीनानिधनंप्राप्ताः साधवोदेवतागणाः ॥ यथादेवगणामोक्षंसिंधोःप्राप्ताःशृणुष्वतत् ३३ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेसप्तसप्ततितमोऽध्यायः ॥ ॥ ७७ ॥ ॥ कउ वाच ॥ ॥ सर्वेनिगृहितादेवाःसिंधुनाप्रभविष्णुना ॥ तस्यैदग्धवधोपायंचिंतयामासुरुत्सुकाः १ हरिरुवाच ॥ सर्वेषांसंमतंज्ञायकर्तव्यःकार्यनिश्चयः ॥ तस्मात्सर्वैर्ध्रुवंत्वद्यमतंयस्ययथाभवेत् २ ॥ ॥ कउवाच ॥ ॥ इतिशक्रवचःश्रुत्वाब्रुवन्ब्रह्मादयःसुराः ॥ ईश्वरःसर्वकर्तास्तिसकल्पाणंकरिष्यति ३ सयेनतुष्यतेदेवःसउपायोविधीयताम् ॥ सएनंपरिभूत्वैवनःपदानिप्रदास्यति ४ ततोवक्रुमधानोसौबृहस्पतिरभाषत ॥ स्वल्पयापूजयासद्यःप्रसन्नोजातये

विभुः ५ चराचरगुरुःसद्यःसर्वैःप्रार्थ्योऽसुरांतकः ॥ ॥ देवाऊचुः ॥ ॥ कोदेवःप्रार्थनीयस्तेमतोवाचस्पतेवद ६ तस्यतुष्टिंकरिष्यामःस्वपदप्राप्तयोसि
लाः ॥ ॥ गुरुरुवाच ॥ ॥ सृजतेपातियोविश्वंहंतिरूपत्रयात्मकः ७ अबीजोबीजभूतश्चाशेषवाचामगोचरः ॥ नित्योब्रह्ममयोज्योतिःस्वरूपःशाश्वगोच
रः ८ अनादिमध्यनिधनोनिर्गुणोयोनिरामयः ॥ बहुरूपैकरूपश्चयस्यनामास्तिलाजनाः ९ गृहीत्वासर्वकार्येषुसिद्धिंयांतिनिजेप्सिताम् ॥ संकष्टंहरतेभ
क्त्यापूजितःसविनायकः १० आराधयंतुसर्वेतंसवःसिद्धिविधास्यति ॥ मासस्यकृष्णपक्षोयंसंप्रदृश्योमुनासुराः ११ चतुर्थीभौमयुक्तास्यप्रियाविघ्नहरस्यह
॥ सएवप्रकटीभूयदास्यतेस्वपदानिवः १२ सिंधुंमसंनिहत्यैवनात्रकार्याविचारणा ॥ यद्यत्कामयतेयोयस्तत्तत्सर्वंप्रदास्यति १३ ॥ देवाऊचुः ॥ सम्यगुक्तं
गुरोवाक्यंयेनदृष्टावयंमुने ॥ महाश्रोतोवहान्नस्त्वंकर्णधारोसिसांप्रतम् १४ ॥ कउवाच ॥ ततस्तेशक्रवरुणकुबेरमधूमुदनाः ॥ गुरुसोमशशीनाश्चयमाग्न्यानि
लकादयः १५ पंचामृतंगंधमाल्यंशमीदूर्वाश्चपल्लवान् ॥ फलान्यरण्यजातानिविविधानिचमृत्तिकाः १६ अशर्कराःसमादायगंडकींतांनदीययुः ॥ मंडपांविधु
लंकृत्वाभंक्त्वावृक्षाननेकशः १७ लताभिःकदलीस्तंभैःसुच्छायंचसुशीतलम् ॥ स्नात्वानित्यक्रियाःकृत्वामूर्तीश्चक्रुःसुशोभनाः १८ सिंहारूढादशभुजादशा
युधविराजिताः ॥ वैनायकीःकरिकरानानाभूषाविराजिताः १९ सिद्धिबुद्धियुताःपार्श्वेकिरीटकुंडलोज्वलाः ॥ पीतवस्त्रपरीधानाःसर्पयज्ञोपवीताः ॥ तस्मि
न्मंडपमध्येताःस्थापयित्वायथाविधि ॥ पुपूजुःपरयाभक्त्याषोडशैरुपचारकैः २० पंचामृतैःशुद्धजलैर्वस्त्रगंधादिदीपकैः ॥ नैवेद्यैर्विविधैश्चैवफलैश्चारार्तिकैःशु
भैः २१ एवंसंपूज्यतेमंत्रंजेपुःसवितृतुष्टये ॥ अस्तंयातेसवितरिसंध्यांकृत्वास्तुवन्विभुम्२२ ॥ सर्वेऊचुः ॥ दीननाथदयासिंधोयोगिहृत्पद्मसंस्थित ॥ अनादि
मध्यरहितस्वरूपायनमोनमः २३ जगद्भासचिदाभासज्ञानगम्यनमोनमः ॥ मुनिमानसविष्टायनमोदैत्यविघातिने २४ त्रिलोकेशगुणातीतगुणक्षोभनमोनमः
त्रैलोक्यपालनविभोविश्वव्यापिन्नमोनमः २५ मुनिमानसनिष्टायनमोदैत्यविघातिने ॥ मायातीतायभक्तानांकामपूरायतेनमः ॥ सोमसूर्याग्निनेत्रायनमोवि
श्वंभरायते २६ अमेयशक्तयेतुभ्यंनमस्तेचंद्रमौलये ॥ चंद्रगौरायशुद्धायशुद्धज्ञानरूपेनमः २७ ॥ ॥ कउवाच ॥ ॥ एवंस्तुवत्सुदेवेषुतेजो
राशिरभूत्पुरः ॥ सर्वेहतद्दशोदेवाविस्मिताअभवंस्तदा २८ ततस्तत्रूपयादेवःसौम्यतेजाअजायत ॥ ततस्तेदद्दशुर्देवंसिंहारूढंविनायकम् २९ दशायु
धधरंतावद्भुजंदिव्यकिरीटिनम् ॥ नानाभूषाभिरामंचमुक्तादामविभूषितम् ३० दिव्यगंधानुलेपाढ्यंव्यालबद्धोदरंविभुम् ॥ क्षुद्रघंटाक्वणत्पादंकस्तु
रीतिलकोज्ज्वलम् ३१ एवंदृष्ट्वासुरादेवंनमस्कृत्योचिरेतदा ॥ यश्चैतिताेमुरोर्वाक्यात्सएवायंविनायकः ३२ सएवदृष्टःसाक्षात्तुवाङ्मनोगोचरोविभुः ॥ ज
न्मधन्यंदृशिधन्यातपोदानंचनःसुराः ३३ततऊचेसुरान्देवस्तुष्टोहंभवतांस्तवैः ॥ पूजयाचैवभक्त्याचसंकष्टीव्रततोपिच ३४ संकष्टहरमेतच्चस्तोत्रंख्यातंभवि
ष्यति ॥ यःपठेत्प्रयतोनित्यंसमेमान्योभवेत्सुराः ३५ तस्यदर्शनतःसर्वेनश्येयुर्यक्षराक्षसाः ॥ भोगान्भुनक्तिविविधानंतेमोक्षपदंलभेत् ३६ शृण्वंतुमेपु

नर्वाक्यांसिसुदैत्येनपीडिताः ॥ शरणंमेप्रपन्नाश्चयज्ञवेदविवर्जिताः ३७ निरुद्वागंडकीदेशेस्वधास्वाहाविवर्जिताः ॥ ततोह्यस्यवधंकर्तुमवतारांतरंमम ३८
गिरिजायाग्रहेदेवाभविष्यामिचसांप्रतम् ॥ मयूरेश्वरनाम्नाहंख्यातिंयास्येतदाचवः ३९ पदानामाश्रमाणांचप्राप्तिःसिंधौहतेमया ॥ भविष्यतिनसंदेहोय
तःकृतयुगेसुराः ४० सिंहारूढोदशभुजस्तेजोरूपीविनायकः ॥ षड्भुजःशशिवर्णश्चत्रेतायांबर्हिवाहनः ४१ मयूरेश्वरनामाचद्वापरेरक्तवर्णवान् ॥ चतुर्बा
हुराखुवाहोभूत्वाचाहंगजाननः ४२ ततःकलियुगेप्राप्तेश्यामवर्णोदषन्मयः ॥ धूमकेतुरितिख्यातोभविष्यामिसुराग्रहम् ४३ शीघ्रमेवकरिष्यामिभवतांवां
छितंसुराः ॥ ॥ कउवाच ॥ ॥ एवंनिवेद्यतान्देवस्तत्रैवांतर्दधेविभुः ४४ आनंदंचसुराःप्रापुःस्वकार्यकृतनिश्चयाः ॥ यइदंपरमाख्यानंशृणुयाच्छ्रावयेच्च
यः ४५ पठेच्चपरयाभक्त्याध्यात्वादेवंविनायकम् ॥ सर्वान्कामानवाप्नोतिप्रेत्यब्रह्ममयोभवेत् ४६ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेसुरर्षिवरप्रदाननामज
ष्टसप्ततितमोध्यायः ॥ ७८ ॥ कउवाच ॥ निर्जितान्सिंधुनादेवान्ज्ञात्वाशंभुर्निजस्थलात् ॥ सप्तकोटिगणाकीर्णश्चिसंध्याक्षेत्रमभ्यगात् १ स्वाहास्वधा
वषट्कारवेदाध्ययनवर्जिताः ॥ निवसंतिभयात्सिंधोर्गौतमाद्यामहर्षयः २ दृष्ट्वातेत्र्यंबकंदेवंपरिवव्रुःसमंततः ॥ यथातीर्थेविप्रवराबालकाजननींय
था ३ प्रणम्यतंप्रपूज्यैवप्रोचुर्धन्यतमावयम् ॥ अनुष्ठानंदृशिर्जन्मधन्यंज्ञानंयतोहरः ४ अगोचरोदृष्टिगतोदंडकारण्यमागतः ॥ दुरितंविलयंयातंपुण्यंचफ
लितंमहत् ५ इदानींनचदुःखंनोदृष्टेदेवेभविष्यति ॥ यथोदितेदिवानाथेनध्वांतंदृश्यतेक्वचित् ६ ततोब्रवीन्महादेवःसर्वांस्तान्मुनिपुंगवान् ॥ शिवउवा
च ॥ सिंधुनाक्रामित्रैलोक्यंकृतोदेवविनिग्रहः ७ मुनीनामपिकेषांचित्तेनाखिन्नमनोमम ॥ विश्रांतिंनलभेस्थानेततोहमिहचागतः ८ भवतांदर्शनेनाहंप
रितुष्टोमुदान्वितः ॥ इदानीमवकाशंसपरिवारस्यदीयताम् ९ अतिपुण्येनवःप्राप्तंदर्शनंपापनाशनम् ॥ यत्रस्थित्वापरंध्यानंकरिष्येजगदीशितुः १० ॥ क
उवाच ॥ इतिशूलिवचःश्रुत्वाप्रोचुःसर्वेमहर्षयः ॥ सर्वेश्वरस्यतेदेवदातास्थानस्यकोभवेत् ११ कल्पद्रुमस्यकःकामःकेनासौपरिपूर्यते ॥ क्षीरार्णवतृषार्किं
वापल्वलेनगमिष्यति १२ तवैवरूपंपृथिवीतववश्यात्रसर्वदा ॥ त्वमीशःसर्वलोकस्ययथेच्छसितथाकुरु १३ दर्शयामःसुरपतेसुंदरंतवचाश्रमम् ॥ नाना
वृक्षलताकीर्णंरम्यवापीसरोजलम् १४ यादोभिःपक्षिभिर्युक्तंघनच्छायंसुविस्तृतम् ॥ स्वादुकंदफलोपेतंमृदुघाससमन्वितम् १५ यदीच्छात्रवसत्र्यक्षपरिपा
लयनोखिलान् ॥ कउवाच ॥ तत्रावसन्महादेवोगंगागौरीगणैर्युतः १६ कैलासादधिकंमेनेमुनेराश्रममंडलम् ॥ तदाश्रयेणतेसर्वेगौतमाद्यामहर्षयः १७
चेरुस्तपांसिविविधान्यासंस्तेविगतज्वराः ॥ शिवोपितपजारेभेगंगागौरीसहायवान् १८ ततोगणाश्चसामग्रींतस्यचक्रुर्महात्मनः ॥ कस्मिंश्चित्समयेगौरीपृ
च्छतिस्मसदाशिवम् १९ त्वमेवकर्ताहर्तात्वंपातात्रिश्वस्यशंकर ॥ अष्टमूर्तिरमूर्तिस्त्वंसर्वेशःसर्वभावनः २० सर्वश्रेष्ठतमस्त्वंचसर्वेषांसर्वकामदः ॥ अ
ष्टानांकर्मणांदेवफलदातास्खिलार्थवित् २१ त्वत्तःश्रेष्ठतमःकोस्तियंत्वंध्यायसितंवद ॥ देवाश्चमुनयोनागायक्षमानुषराक्षसाः २२ यत्सत्तयाखिलंविश्वं

स्वत्तःश्रेष्ठतमस्तुकः ॥ त्रयस्त्रिंशत्कोटिदेवैःपूज्यसेसिद्धसाधकैः २३ ॥ कउवाच ॥ इतितद्वचनंश्रुत्वाशिवोवचनमब्रवीत् ॥ शिवउवाच ॥ सम्यक्पृष्टंत्वयादेवितुष्टोवाक्येनतेनघे २४ शृणुष्वावहितादेविवित्तरेणब्रवीमिते ॥ अद्यापिनकथंज्ञातोयंध्यायामिसुरेश्वरि २५ तत्स्वरूपंनिरूपिष्येतवप्रीतिचिकीर्षया ॥ लोकानामुपकारायसंसारोत्तारणायच २६ योदेवःसर्वभूतेषुगूढश्चरतिविश्वकृत् ॥ योनंतशीर्षानंतश्रीरनंतचरणःस्वराट् २७ अनंतश्रुतिनेत्रश्चानंत नामागुणातिगः ॥ अनंतरूपीयोदेवोवेदकर्ताखिलार्थदः २८ योनंतशक्तिर्विश्वात्मादुपमेयःपुरातन. ॥ नोपमाशेषचंद्राब्धिव्योम्नांनारायणस्यच २९ भारतस्यचवेदस्यव्यासस्यचमुनेरपि ॥ यतोजीवाअनंताश्चजायंतेबुमुचोयथा ३० जलधारायथाग्नेर्वाविस्फुलिंगाभवंतिहि ॥ ब्रह्मविष्णुशिवादीनांगु णत्रयप्रदःप्रभुः ३१ सृष्टिपालनसंहारानाज्ञापयततौरिह ॥ ततोगुणविभागेनगुणेशइतिपप्रथे ३२ तमिमंपरमात्मानंपरात्परतरंविभुं ॥ गुणेशम निशंध्यायेपरब्रह्मस्वरूपिणम् ३३ ॥ गौर्युउवाच ॥ तुष्टाहंतववाक्येनप्रत्ययोमेकथंभवेत् ॥ तंगुणेशंकथंसाक्षात्करोमिचभजामिच ३४ तमुपायंवद विभोयदितुष्टोसिशंकर ॥ कउवाच ॥ इतितस्यावचःश्रुत्वापुनरूचेमहेश्वरः ३५ शिवउवाच ॥ ॥ एकनिष्ठतयायावत्तपसाराधितोनते ॥ तावत्प्रत्यक्ष तांदेविकथंयास्यतिसप्रभुः ३६ ॥ देव्युवाच ॥ कथंमयातपःकार्यंकेनोपायेनवाविभो ॥ यदितुष्टोसिदेवेशवदसत्यंममानघ ६७ ॥ कउवाच ॥ ॥ एवं तदादरंबुध्वाप्रोवाचागिरिजांहरः ॥ येनतस्याभवेत्प्रीतोगुणेशोगुणवल्लभः ३८ एकाक्षरमनुंतस्यैदद्यौसम्यग्घरस्तदा ॥ द्वादशाब्दंकुरुतपस्ततस्तुष्टोभवे द्विभुः ३९ साक्षात्कारंगुणेशस्तेप्रदास्यतिनसंशयः ॥ तदैवसानमस्कृत्यगिरीशंदृष्टमानसा ४० जगामतपसेगौरीमंत्रध्यानपरायणा ॥ जीर्णापुरादुत्त रेतुलेखनाद्रिंमनोहरं ४१ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेगौरीमंत्रप्रदानंनामनवसप्ततितमोध्यायः ७९ ॥ कउवाच ॥ तत्रसाकाननंदृष्ट्वारम्यंपुष्पजलान्वि तम् ॥ तस्थौपद्मासनगतानासाग्रन्यस्तलोचना १ गणेशध्याननिरताप्राङ्मुखीजपतत्परा ॥ एकाक्षरस्यमंत्रस्यशुष्कद्रुमइवस्थिता २ नफलंनजलंमू लंपर्णंकंदंनमारुतं ॥ जग्तिसानिश्चलातत्रनिर्वाणंपरमंश्रिता ३ एवंसाद्वादशाब्दानिव्यतीतानिततोविभुः ॥ कृपयाविरभूत्प्रीतोगुणेशोगुणवल्लभः ४ किरीटकुंडलधरोदशबाहुस्त्रिशूलभृत् ॥ भालचंद्रःशंखचक्रमुक्तामालाविभूषितः ५ अक्षमालांचकमलंकस्तूरीतिलकंदधत् ॥ मध्येनारायणमुखोद क्षिणेचशिवाननः ६ वामेब्रह्ममुखःशेषेपद्मासनगतोविभुः ॥ तत्फणामंडलच्छायःकुंदकर्पूरसन्निभः ७ उवाचजगदंबांतांयंध्यायसिदिवानिशं ॥ गुणे शोगुणेशइतिसोहंतेदर्शनंगतः ८ तवनिष्ठांचभक्तिंचतपउग्रमवेक्ष्यच ॥ ममस्वरूपंवक्ष्यामिप्रीतस्तवंवरानने ९ त्रयस्त्रिंशत्कोटिदेवेष्वधिकोनचमत्प रः ॥ गुणत्रयविभागाच्चगुणेशइतिमांविदुः १० त्रिदेहोगुणतश्चाहंसंतुष्टस्तपसाचते ॥ वरंवरयमत्तस्त्वंयत्तेमनसिवर्त्तते ११ असाध्यमपिदास्यामित्रैलो क्येस्मिन्महेश्वरि ॥ इतितद्वचनंश्रुत्वाहर्षगद्गदनिःस्वना ॥ १२ ॥ उन्मील्यनयनेगौरीपश्यतिस्मपुरोविभुं ॥ गुणेशंत्रिगुणेशंचत्रितनुंप्रणनामसा ॥ १३ ॥

उवाचजन्मनिष्ठाचतपोमंत्रोहरोपिच ॥ अद्यधन्यतमोजातोदृष्टोतेपदपंकजम् १४ अद्यासिद्धिःपराप्राप्तासाक्षाद्दृष्टोयतोभवान् ॥ नकांक्षेऽन्यवरंकंचित्त्वद्वा
क्यंनचलंघये १५ अतस्त्वंपुत्रतांयाहिममप्रीतिकरोभव ॥ निरंतरंदर्शनंतेसेवनंपूजनंभवेत् १३ इतितस्यावचःश्रुत्वागुणेशोहर्षनिर्भरः ॥ उवाचगिरिजां
तांसभविष्यामिसुतस्तव १७ वांछितंपूरयिष्यामिलोकानांचतवापिच ॥ एवमुक्त्वागुणेशस्तामंतर्धानमगात्क्षणात् १८ नददर्शयदादेवीगुणेशंतंक्षणा
त्तदा ॥ अमन्यतमयादृष्टःस्वप्नःकिंसुखदःक्षणम् १९ ईश्वरस्योपदेशेनदृष्टोदेवोखिलार्थदः ॥ नसोद्भुविरहंतस्यशक्तास्मीतिव्यधाच्छिवा २० गुणेशप्रति
मांकृत्वास्थापयामाससादरम् ॥ प्रासादंकारयामासचतुर्द्वारंसुशोभनम् २१ गिरिजात्मजेतितन्नामस्थापयामाससुंदरम् ॥ सिद्धिक्षेत्रमितिख्यातंभविष्यति
नृणामिह २२ अनुष्ठानवतांसिद्धिर्भविष्यतिनसंशयः ॥ इतिदत्वावरंतत्रसंपूज्यचयथाविधि २३ प्रदक्षिणानमस्कारान्कृत्वाचद्विजपूजनम् ॥ दत्वादानानि
तेभ्यश्चगृहीत्वाशीर्वचोद्विजात् ॥ त्रिसंध्याक्षेत्रमगमद्योगस्थंदद्शेहरम् २४ तत्पादपंकजेस्वीयंशिरःपद्मंन्यधाच्छिवा ॥ उवाचनिजवृत्तांतमाज्ञांप्राप्यावि
भोतव २५ उपदेशंमनोश्चापिद्वादशाब्दंकृतंतपः ॥ अवायुभक्षयास्वामिंस्ततस्तुष्टोगुणेश्वरः २६ उवाचपरमप्रीतोभावंज्ञात्वापरंमम ॥ तवोदरेवतारंतु
करिष्याम्यचलात्मजे २७ वांछितंचकरिष्यामिदेवानांचतवापिच ॥ एवमुक्त्वाक्षणेनासौतत्रैवांतर्दधेविभुः २८ ततोहंपरमप्रीतामूर्तिंप्रासादमेवच ॥ वि
धायस्थापयित्वातांतवांतिकमुपागता २९ ॥ ॥ कउवाच ॥ ॥ एवंश्रुत्वाप्रियावाक्यंप्रहृष्टमानसोहरः ॥ प्रोत्फुल्लनयनःप्राहधन्यासिगिरिजात्मजे ३०
साक्षद्दृष्टोगुणेशस्तेगृहेसोवतरिष्यति ३१ हनिष्यतिमहादैत्यंभूभारंचहरिष्यति ॥ इंद्रादिलोकपालानांस्वपदानिप्रदास्यति ३२ एतन्ममवचोदेविनचावि
स्मर्तुमर्हसि ॥ कउवाच ॥ एवमुक्त्वाशिवोदेवआलिलिंगशिवांतदा ३३ आनंदाश्रूणिमुंचंतौरोमांचितततनूउभौ ॥ तिष्ठंतौपरमाह्लादयुतावंबामहेश्वरौ
३४ इतिश्रीगणेशपुराणेउत्तरखंडेअशीतितमोऽध्यायः ॥ ८० ॥ कउवाच ॥ ततःसापार्वतीहृष्टासखीजनमगान्निजम् ॥ वृत्तांतंसर्वमाचख्यौहृष्टरूपोपिसो
भवत् १ ततःप्रभृतिसादेवीगुणेशमानसाभवत् ॥ पश्यतिस्मान्यबालंसागुणेशोयंभवेदिति २ गृहीतुंधावतितदातन्मात्रासानिषिध्यते ॥ नक्वापिविश्रमंयाति
गुणेशध्यानतत्परा ३ तन्नामजपतेनित्यंतन्मयंलोकतेजगत् ॥ पप्रच्छचसखीःसर्वागुणेशोयास्यतेकदा ४ पित्रामेकथितंपूर्वंव्रतमीशाप्तयेशुभम् ॥ पार्थिवस्यग
णेशस्यपूजनंचयथाविधि ५ तेनव्रतप्रभावेनप्राप्तास्मिशंकरंप्रियम् ॥ पुनस्तदाचरिष्यामिगुणेशप्राप्तयेधुना ३ ततोभाद्रचतुर्थ्यांसाकृत्वामूर्तिंमुदान्विता ॥
उपचारैःषोडशाभिःपुपूजचगजाननीम् ७ षड्भिर्ध्यानादिकैःपंचामृतैर्वस्त्रैरनेकशः ॥ यज्ञोपवीतगंधैश्चधूपदीपैर्यथाविधि ८ नानापुष्पैश्चनैवेद्यैर्नानाविधफलै
रपि ॥ तांबूलैरार्द्रपूगैश्चलवंगादिसमन्वितैः ९ दूर्वाभिश्चशमीपत्रैर्दक्षिणाभिरनेकशः ॥ आरार्तिक्यैर्विचित्रैश्चमंत्रपुष्पैःस्तवैरपि १० प्रदक्षिणाप्रार्थनाभि
र्ब्राह्मणानांचपूजनैः ॥ परितुष्टामूर्तिरसौपार्थिवीचेतनामगात् ११ तदैवप्रभयातस्याःकोटिसूर्यप्रभाजिता ॥ कल्पानलार्चिर्विजितानंतचंद्रप्रभाहृता १२

हतनेत्रप्रभागौरीमूर्छितापतिताभुवि ॥ मुहूर्तात्सावधानासाप्रोवाचजगदीश्वरम् १३ किंमयाविकृतंदेवपूजनेनचतत्कृते ॥ अभिचारोथवाकेनप्रयुक्तोयंनवेश्मितं १४ कथंमेविफलोयत्नोजातोदेवकृपानिधे ॥ कउवाच ॥ श्रुत्वेत्थंवचनंतस्याःसौम्यतेजाअभूत्प्रभुः १५ सातदैवाभवद्दृष्टाबालंवीक्ष्यपुरोगतम् ॥ असंख्यवक्त्रनयनंअसंख्यांघ्रिशिरोधरम् १६ असंख्यमुकुटंसूर्यचंद्राग्निलोचनंविभुम् ॥ मुक्तामणिमयींमालांबिभ्रंतंदीप्तिमत्परम् १७ अनेकायुधहस्तंच सर्वावयवसुंदरम् ॥ दृष्ट्वातुपार्वतीरूपंपवित्रंपरमाद्भुतम् १८ अतर्कयच्चेतसासानिमील्यनयनेशुभे ॥ कंपमानांगयष्टिःसाकर्तव्यंनाभ्यपद्यत १९ ॥ पार्व त्युवाच ॥ चिंतितंकिंमयादृष्टमरिष्टमद्भुतंनुकिम् ॥ उन्मील्यनयनेपश्यद्दिव्यदृष्टिर्धरात्मजा २० तावच्छिवोपदिष्टंतदवदीच्चजगादच ॥ अस्यैवमाययाभ्रांतानजानामिविभुंप्रभुम् २१ पप्रच्छतंततःकस्त्वंकुतआगमनंतव ॥ किमर्थंत्वंगुणेशश्चेद्भवितासिवदस्वमाम् २२ ॥ कउवाच ॥ इतितद्वचनंश्रुत्वावदत्पपुरु षोमहान् ॥ स्वेननानादयन्सर्वादिशोविदिशएवच २३ ॥ देवउवाच ॥ यंध्यायसिदिवारात्रावनुष्ठानवतीशुभे ॥ सोहंगुणेशस्तेगेहेऽवतीर्णःपरमःपुमान् ॥ २४ परात्परतरोयस्मादवदंत्यवरार्थिनीम् ॥ यास्यैतेपुत्रतांदेवियत्कृत्यंमेशृणुष्वतत् २५ उभयोःसेवनंकार्यंसिंधुदैत्यविनाशनम् ॥ अमराणांपदप्राप्तिंकृत्वायास्यैनिजंपदम् २६ ॥ कउवाच ॥ पीत्वावाक्यामृतंतस्यप्रीतासागिरिजात्मजा ॥ उवाचेहपरंभाग्यंपरमंमेतपःफलम् २७ नायकोनंतकोटीनांब्रह्मांडानांवि भुर्मया ॥ दृष्टश्चिदानंदघनोयस्मात्सृष्टमनेकशः २८ पंचभूतानिब्रह्मेशहरिश्चंद्रेंद्रभास्कराः ॥ नक्षत्राणिचगंधर्वायक्षामुनिगणाद्रुमाः २९ शैलाःपक्षिगणाः सर्वेभुवनानिचतुर्दश ॥ स्थावरंजंगमंयस्मात्सचेतनमचेतनम् ३० सत्वंममकुमारत्वंप्राप्तोसीतिविडंबनम् ॥ अथत्वांप्रार्थयेदेवप्राक्तोभवसांप्रतम् ३१ येनतेलालनंकुर्यांसेवनंपरमादरात् ॥ ॥ कउवाच ॥ यावद्ब्रह्मदितिसैवंतुददर्शपुरतस्तुतम् ३२ षड्भुजंचंद्रसुभगंलोचनत्रयभूषितम् ॥ सुनासंसुमुखंवदनंस्थू लवक्षसमीश्वरम् ३३ ध्वजांकुशोर्ध्वरेखाजचिह्नितंपादपंकजम् ॥ कोटिस्फटिकसंकाशंकोटिचंद्रप्रभंविभुम् ३४ हेमताराभिरान्केशान्दधंतंबालरूपिणम् ॥ कुर्वंतंप्रथमंशब्दंकंपयंतंवसुंधराम् ३५ जनास्थानानिमर्यादांतत्यजुस्तस्यशब्दतः ॥ नीरसावृक्षनिचयाःसपल्लवचयास्तदा ३६ जातागावोबहुक्षीरास्त्रैलो क्यंजहृषेपुनः ॥ देवदुंदुभयोनेदुःपुष्पवृष्टिरथापतत् ३७ दृष्ट्वाबालंतुगिरिजाहस्ताभ्यांजगृहेमुदा ॥ स्नापयामासपयसातंनस्नेहभावतः ३८ प्रस्नु तौपाययामासस्तनौपरमहर्षिता ॥ शिवोपिजहृषेतेनाशिशुनापरमेणह ॥ ३९ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेगणेशाविर्भावोनामैकाशीतितमो ध्यायः ॥ ८१ ॥ ॥ ४ ॥ ॥ कउवाच ॥ ततःशिवगणाःशंभुवृत्तांतंतंन्यवेदयन् ॥ आश्चर्यंपरमंदेवंशिवापुत्रसमन्विता १ जातापुत्रावलोका र्थंततोयाहिनिजंस्थलम् ॥ एवंगणवचःश्रुत्वातुतोषगिरिजापतिः २ आगत्यवीक्ष्यतंबालमद्भुतंशशिमन्निभम् ॥ स्फटिकाद्रिनिभंकुंदधवलंकंजलोचनम् ॥ ३ आश्चर्यंपरमंलेभेप्रोवाचचवचस्तदा ॥ शिवउवाच ॥ नायंबालोनादिसिद्धोजराजन्मविवर्जितः ४ लीलाविग्रहवानेषस्वप्रकाशोगुणातिगः ॥

शुद्धसत्वमयःसर्वजीवेशोभुवनेश्वरः ५ मुनिध्येयोखिलाधारोब्रह्मभूतोसिलप्रदः ॥ कउवाच ॥ एवमुक्त्वाकराभ्यांसबालमादत्तशंकरः ६ लालयित्वाह
दिस्थाप्यसर्वहृत्स्थोपियःसदा ॥ पुनरुचेचगिरिजांशिवोऽशिवहरोविभुः ७ परमात्मागुणातीतःपुत्रतांतेसमागतः ॥ परानुष्ठानतोदेविसाक्षाद्दृष्टोविभु
स्त्वया ८ ॥ कउवाच ॥ ततोविप्रान्समाहूयपूजयित्वागणाधिपम् ॥ पुण्याहंवाचयित्वाचमातृपूजनपूर्वकम् ९ कृत्वाभ्युदयिकंश्राद्धंप्राशयित्वाघृतंमधु
॥ अभिमंत्र्यशिशुंभूमौगिरिजातंस्तनंददौ १० गौतमादीन्पूजयित्वाददौदानान्यनेकशः ॥ ततस्तेतदनुज्ञातानामप्रोचुर्महर्षयः ११ अयंतेबालतांयातो
नादिसिद्धोखिलेश्वरः ॥ निर्मितासर्वलोकानांचराचरगुरोर्गुरुः १२ मायावीवेदवेदांतागोचरोमध्यगेरवौ ॥ अवतीर्णःसुमुहूर्तेकीर्तिमाविष्करिष्यति १३
भाद्रशुक्लचतुर्थ्यांतुशशिवारेचवायुभे ॥ सिंहलग्नेपंचशुभग्रहयुक्तेभवत्सुतः १४ श्रीमान्पराक्रमयुतोद्भुतकर्मामहाबलः ॥ भविष्यतिचलोकानांभक्तानामति
सौख्यदः १५ एकादशदिनेशंभोकुरुनामास्यसुंदरम् ॥ कउवाच ॥ एवमुक्त्वागताःसर्वेमुनयोनिजमंदिरम् १६ हरोबालंविनिक्षिप्यगिरिजाशयनेशुभे
॥ विसृज्यलोकानखिलान्बहिरायान्मुदान्वितः १७ ततःशेषोययौतत्रफणाच्छायामथाकरोत् ॥ नीरजस्कांवरांचक्रुर्मेघास्तत्रसुखोववौ १८ मारुतोमाल
तीगंधोननृतुश्चाप्सरोगणाः ॥ जगुर्गंधर्वसंघाश्चतुष्टुवुश्चारणाविभुम् १९ ततोमुनिगणाःसर्वेमृन्मूर्तिंचक्रुरुत्तमाम् ॥ मंडपंशोभनंकृत्वाकदलीपुष्पमंडितम्
२० पुपूजुःपरयाभक्त्यापद्मासनगतामुदा ॥ गुणेशेतिगुणेशेतिजेपुःसर्वेनिरंतरम् २१ अहोरात्रोषिताःसर्वेरात्रौचजागरान्विताः ॥ यथाशक्तिद्विजान्भोज्य
चक्रुस्तेपारणंद्विजाः २२ एवंदशदिनेविप्रान्भोजयामासुरादरात् ॥ गृहेगृहेमहोत्साहांश्चक्रुर्देवस्यतुष्टये २३ एकादशेतुदिवसेसर्वेमुनिगणाःशिवम् ॥ आ
हूताआययुर्नामकर्तुंशिवसुतस्यह २४ मानितास्तेननेतेसम्यक्कारयामासुरुत्तमम् ॥ सर्वेशत्वाडुणेशेतिसर्वविघ्नहरंशुभम् २५ शिवोपितान्मुनीन्प्राहसम्य
ङ्नामसमीरितम् ॥ सर्वारंभेषुपूज्योयमितितस्मैवरंददौ २६ पूजितामुनयःसर्वेदत्वादानानिसर्वशः ॥ आज्ञांगृहीत्वाशंभोस्तेस्वस्वाश्रमपदंययुः २७ अं
तर्गृहगतादेवीपुपूजेदेवताःस्वयम् ॥ तदादिसातिथिःख्यातामुणेशस्यवरप्रदा २८ तस्यांमहोत्सवःकार्यश्चतुर्थ्यांस्वशुभाप्तये ॥ मृन्मयींप्रतिमांकृत्वापूजयेच्च
यथाविधि २९ कृत्वामंडपिकांचारुमुपोष्यजागृयान्निशि ॥ मोदकापूपलड्डूकैःपायसैःपूजयेद्विभुम् ३० अपरस्मिन्दिनेविप्रान्भोजयेच्चयथाविधि ॥ एकविं
शतिसंख्याकान्यथाशक्तिचदक्षिणाम् ३१ दत्वातेभ्योनमस्कृत्यपश्चाद्भोजनमाचरेत् ॥ योनपूजयतेचास्यांगणेशंमृन्मयंनरः ३२ सविघ्नैराभिभूतःसन्नानारो
गैःप्रपीड्यते ॥ नतस्यदर्शनंकुर्यात्पतितस्येवकर्हिचित् ३३ जातेतुदर्शनेतस्यगणेशंनामसंस्मरेत् ॥ चतुर्थ्यामहिमानंनोनशक्यंमुनिरूपितुं ३४ कर्माणि
तुगुणेशस्ययथामतिनिरूपये ॥ गुप्तरूपाःसिंधुदूताःशंकरालयसंस्थिताः ३५ तमुदंतंतुतेगत्वाप्रावदन्सिंधवेतदा ॥ समासीनायवोधैश्चबहुभिर्वेष्टितायच ३६
स्थापयित्वाप्सरोनृत्यंगानंगंधर्वसंभवम् ॥ दूताऊचुः ॥ दक्षिणेदंडकारण्येत्रिसंध्याक्षेत्रसंज्ञिते ३७ गत्वातत्रदृष्टवंतोभगवंतंशिवाभिधं ॥ अष्टाशीतिसहस्रा

णांमुनीनामाश्रमान्बहून् ३८ एकस्मिन्दिवसेबालंशिवाप्रासूतपङ्कजम् ॥ लावण्यकोशंत्रैलोक्येनुपमंमहसोज्ज्वलं ३९ दशाहस्सुमहोत्साहैर्गतेषुमुनिपुंग
वाः॥ चक्रुर्नामगुणेशेतितस्यबालस्यशंकरः ४० वयंवादित्रनिर्घोषैर्बधिराइवतास्थिम ॥ यदिहंतुंगमिष्यामःसप्तकोटिगणास्तदा ४१ एकैकस्यबलंघोरंपर्वतो
न्मूलनक्षमम् ॥ निहन्युःसहसाभ्येत्यवृत्तांतंकोनिवेदयेत् ४२ ॥ कउवाच ॥ एवंवदत्सुदूतेषुशुश्रुवेव्योमवाक्तदा ॥ उत्पन्नःक्रापितेहंतासिंधोसावधतांव्रज४३
सिंधुरुवाच ॥ ॥ वध्यतांवध्यतांकोयंब्रूतेदुष्टवचोग्रह ॥ ॥ कउवाच ॥ ॥ केचिद्दुद्रीयपतिताधावयित्वापरेययुः ४४ तावद्दैत्योमहामूर्छांसंप्राप्तःपतितो
भुवि ॥ चिंतामग्नोम्लानमुखोनिरुत्साहोहतप्रभः ॥ ४५ उवाचविस्मलब्धावोमुहूर्त्तात्प्राप्यचेतनाम् ॥ त्रैलोक्यकंटस्यापिकंटकःकउपस्थितः ४६ क
थंहन्याद्व्रजःसिंहंमशकोवाथवारणम् ॥ त्रयस्त्रिंशत्कोटिदेवानिर्जिताक्षणमात्रतः ४७ तस्यमेमरणंकस्माज्जायेतव्योमवाङ्मृषा ॥ ऋतास्तुवागमिष्यामिभाक्षे
तुंतमहंरिपुम् ४८ एवमुक्त्वाक्षणाद्दैत्यःसभद्रासनगतोभवत् ॥ सर्वेवीरास्ततोयाताःश्रुत्वावार्तांतथाविधाम् ४९ त्वमेवमृत्योर्मृत्युश्चतवमृत्युःकथंभवेत् ॥
इत्यूचुस्तेऽभवेद्व्यापितंवयंवातयामहे ५० स्वर्गेभूमौतलेवापिगगनेवावसेद्यदि ॥ देह्याज्ञांनोगमिष्यामोदैत्यस्तानब्रवीदथ ५१ सखीनांसेवकानांचपीत्वावा
क्यामृतंपरम् ॥ प्रीतोहंयांतुशीघ्रंतुयत्रमेसरिपुर्भवेत् ५२ अनेकमाययाहत्वारिपुमर्मनिवेद्यताम् ॥ कउवाच ॥ एवमाज्ञांगृहीत्वातेसंख्यातीतायुस्ततः
५३ त्रिसंध्याक्षेत्रमासाद्यगुप्तरूपेणचावसन् ॥ गौरीसुतंतत्रकुत्रमाययाहन्मइत्युत ५४ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेव्यशीतितमोऽध्यायः ८२ ॥ ॥
कउवाच ॥ शुक्लचंद्रइवब्रह्मन्ववृधेसदिनेदिने ॥ ततोहिमालयःप्रायाल्लुत्वागौरीसुतंशुभम् १ अलंकारान्समादायानूल्यरत्नसमन्वितान् ॥ अजिरेतंनिरीक्ष्यैव
वधावयित्वाययौसुता २ आलिलिंगमुदागौरीबहुकालागतंचतम् ॥ आनंदाश्रूणिमामुंचत्मोपिसातंततोवदत् ३ गौर्युवाच ॥ कथंनिष्ठुरतांयातोवृत्तांतंम
मकर्हिचित् ॥ नगृण्हासिनवास्वीयंप्रेषयस्यापिनिर्दय ४ हिमवानुवाच ॥ सत्यंवदसिगौरित्वंकंठेप्राणाममस्थिताः ॥ अतस्त्वद्दर्शनाकांक्षीप्राप्तोहंहरबल
भे ५ वत्सेधेनुमनोयद्वत्तद्वत्त्वयिमनोमम ॥ कउवाच ॥ एवमाकर्ण्यतद्वाक्यंसाददावासनंशुभम् ६ उपविष्टोब्रवीद्वाक्यंपुनर्गिरिवरःसुताम् ॥ श्रुतोनारदवा
क्येनपुत्रस्तेपरमाद्भुतः ७ ततस्तंद्रष्टुमायातःसर्वविघ्नहरंशुभम् ॥ कउवाच ॥ पार्वतीबालमादायपितुरंकेन्यवेशयत् ८ सोलंकारैरलंकृत्यमहिमानंततोब्र
वीत् ॥ सउवाच ॥ अयंबालोमहामायःकरिष्यतिमहीमिमाम् ९ निष्कंटकांयथाचंद्रःशीतलांस्वकरैरिमाम् ॥ अयंदेवगणान्सर्वान्स्वस्थानेस्थापयिष्यति
१० करिष्यत्यंघ्रिसेवांतेशिशोरस्यमुनीश्वराः ॥ एतस्यसर्वरूपाणिस्थावराणिचराणिच ११ अयमेवसदाध्येयोब्रह्मादीनांसहस्रदृक् ॥ सहस्रांघ्रिःसर्वजगत्कार
णानांचकारणम् १२ सहस्रास्योनंतमूर्तिःसमष्टिव्यष्टिरूपवान् ॥ त्रैलोक्यदर्शनेदक्षोबालोद्दृष्टःक्वापिशुभायवान् १३ अहंतन्मयतांयातोदृष्ट्वातत्पादपंकजम् ॥
यथांभसिपयःक्षिप्तंयातितन्मयतांक्षणाद् १४ अस्ययत्नंकुरुशुभेनिधिरेषपुरातनः ॥ कउवाच ॥ मस्तकेमुकुटंचास्यस्वांगदेभुजयोरपि १५ पकजंहृदिशु

त्योश्चकुंडलेरत्नभूषिते ॥ कटिसूत्रंकटौचांघ्र्योर्महार्हाःक्षुद्रघंटिकाः १६ एवंदत्त्वाभूषणानिनामचक्रेशुभंगिरिः ॥ हेरंबेतिमहाविघ्नहरंभक्ताभयप्रदम् १७ त
तोभुक्त्वागृहीत्वाज्ञांययौस्वस्थानमद्रिराट् ॥ एकस्मिन्दिवसेबालश्चिक्रीडनिजमंदिरे १८ गृध्रासुरोगृध्ररूपीमहाबलपराक्रमः॥ पक्षवातेनयस्याद्रिचयश्चूर्ण
त्वमीयिवान् १९ गंडशैलाश्चवृक्षाश्चपादाघातेनतस्यच ॥ सपक्षच्छाययाबालमाच्छाद्यखेभ्रमत्तदा २० नयनानिचसर्वेषांपक्षावातरजःकणैः ॥ आच्छादय
न्महाशब्दैःश्रोत्रेबधिरतामितेद् २१ ततश्चंचूतुंबालंगृहीत्वागृध्रपुंगवः ॥ व्योममार्गंगतोदूरंगरुडोभुजगंयथा २२ बभ्रामगगनेदुष्टोजानन्बालपराक्रमम् ॥
ततोपश्यद्गिरिसुताबालःकुत्रकुतोगतः२३नापश्यच्चत्वरेतंतुततःशोकाकुलाभवत् ॥ केननीतोममसुतोदुष्टेनचदुरात्मना २४ उपविष्टाततोपश्यद्व्योम्निगृध्रमु
खेसुतम् ॥ मूर्छितापतिताभूमौधावधावेतिचाब्रवीद् २५ ममप्राणागमिष्यंतिविनापुत्रंसुरेश्वर ॥ कथंममोपरिव्योमपातितंशंकरःकथम् २६ नैर्घृण्यंपरमं
प्राप्तोमय्येवजगदीश्वरः ॥ द्वादशाब्दंतपस्तप्तंनिराहारतयामया २७ करुणाब्धिःस्वप्रकाशोवतीर्णोभून्ममालयम् ॥ सगतोनिधिरूपोमेभाग्यायाःपापसंच
याद् २८ गतेबालेगतंसर्वंसुखमात्यंतिकंमम ॥ कउवाच ॥ एवंतस्यांतुशोचंत्यांशुशुचुस्तत्सखीजनाः २९ ततस्तेतत्समाधानंचक्रुर्ज्ञानेनयुक्तिभिः ॥ अना
दिनिधनेबालेनशोकंकर्तुमर्हसि ३० स्वप्रकाशेवतीर्णेतेबह्वनुष्ठानयोगतः ॥ कुत्रवामृन्मयीमूर्तिश्चेतनामगमद्वद ३१ स्थिराभवक्षणेनत्वंद्रक्ष्यसेस्वसुतंशुभे ॥
अंतकस्यांतकोबालःपुनरेष्यतिनिष्ठया ३२ सस्वीजनेवदत्येवंतावद्बालःस्वमुष्टिना ॥ दधारचंचुंबलवान्यथाश्वासोननिर्ययौ ३३ श्वासरोधाद्गताऽसुः
सगृध्रस्तेनसमन्वितः ॥ निपपातमहीपृष्ठेवज्राहतइवाचलः ३४ पतमानोगृध्रदेहोदशयोजनविस्तृतः ॥ चूर्णयामासगेहानितच्चित्रमभवद्दृशम् ३५ चैत्य
वृक्षेषुभग्नेषुययुःपक्षिगणादिशः ॥ ततोदृष्ट्वातुंबालमवदत्ससखीगणः ३६ अयमक्षतदेहस्तुपतितोगिरिजासुतः ॥ ॥ कउवाच ॥ श्रुत्वेत्थंवचनंतस्य
त्वरितावालमाददे ३७ गौरीनिधायत्हृदयेपरमानंदमापच ॥ आश्चर्यंपरमंप्राप्यददौदानान्यनेकशः ३८ गतमस्यमहारिष्टमग्रेनस्यादितिद्विजाः ॥ नमस्कृ
त्यद्विजान्प्रायान्मंदिराभ्यंतरंशिवा ३९ दशयोजनविस्तारःक्वासुरोबलवत्तरः ॥ क्वबालःकोमलतनुर्लघुरूपोजघानतम् ४० एतावतोबलमिदमग्रेकिंवाकरि
ष्यति ॥ इत्युवाचसखींगौरीस्तनपानंददौमुदा ४१ अयंलघुर्नमंतव्योयथावह्निकणोदहेत् ॥ महांतंकाष्ठनिचयंतथानेनहतोसुरः ४२ ततस्तद्देहखंडानिग
णादूरेनिचिक्षिपुः ॥ शृणुयादिदमाख्यानंसोसुरैर्नाभिभूयते ४३ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेऽयशीतितमोध्यायः ८३ ॥ कउवाच ॥ मासेद्वितीयेगौरी
तंसायमभ्यज्यबालकम् ॥ स्थापयामासदोलायांगायतिस्मसुदाबहु १ तावदाखूसमायातौमायारूपधरौसुतम् ॥ तौक्षेमकुशलौदैत्यौतद्वधाकांक्षिणावुभौ
२ नखदंष्ट्रायुधौघोरौमंदिराभ्यंतरंगतौ ॥ युध्यंतौपालनाभ्याशेस्फुरदंगरुहौखलौ ३ ययोश्चीत्कारशब्देनश्रुतयोबधिरीकृताः ॥ पादाघातेनभूःसर्वाकृष्टक्षे
त्रसमाकृता ४ ततोयष्टिंगृहीत्वासाभीषयामासतावुभौ ॥ पलायनपरौचोभावुपरिष्टाद्ततौतदा ५ युध्यंतौपतितौघोरौबालकोपरितावुभौ ॥ उरस्थला

भिघातात्सबुबुधेबालकोत्तमः ६ कृत्वाकर्कशशब्दंतुसाविभायतदाशिवा ॥ बालभावेनहस्तौसंचालयामासभीतितः ७ तदाघातादुभौनष्टजीवितौपतिता वधः ॥ वमंतौरुधिरंवक्त्राद्दृष्ट्वाभ्रांताशिवाभवत् ८ किंचिज्जीवितशेषौतौबहिर्नीतौगणैस्तदा ॥ मोक्षंजग्मतुराघाताद्गणेशकरसंभवात् ९ तद्देहौपति तौघोरौदशयोजनविस्तृतौ ॥ कोलाहलोमहानासीद्दृष्ट्वादेहौतथागतौ १० गणानांचसखीनांचपार्वत्यासुमहांस्तदा ॥ विध्वस्ताआश्रमावृक्षाःपर्वताभुव नानिच ११ पतद्भ्यांतच्छरीराभ्यांनिर्जीवाभ्यांमहांयपि ॥ छित्त्वाछित्त्वातुतद्देहौगणानिन्धुर्बहिस्तदा १२ पार्वतीभयवित्रस्तावालमादायसत्वरम् ॥ पाय यामाससस्नेहेनस्तन्यंबालकवत्सला १३ ऋषिपत्न्यःसमायातापार्वतीमूचिरेनघाः ॥ पुण्यंमहत्तुतेगौरियेनविघ्नंविनश्यति १४ द्विमासिकेनबालेनहतौदुष्टौ महासुरौ ॥ अग्रेत्रिभुवनेनेनसदृशोनभविष्यति १५ मातारक्षसभूरत्रयत्नःकार्यःशिशाविह ॥ नेप्यंतिराक्षसागुप्ताअसुरामायिनःपरे ॥ १६ ॥ कउवाच ॥ एवमुक्त्वागतादेव्योगणास्तांतुसमूचिरे ॥ अयंतुतेशिवेबालोहनिष्यतिदिनेदिने १७ अस्माभिस्तुकियत्कालंबहिःकार्याहतासुराः ॥ ततस्तुमुनयोजग्मू रक्षांचक्रुरथार्भके १८ ददौदानानितेभ्यःसाविससर्जप्रणम्यतान् ॥ ततस्तृतीयेमासेतुस्वस्वकार्यरतेजने ॥ मध्याह्नेपार्वतीबालंगृहीत्वामंचकेस्वपत् ॥ १९ तत्परीचारिकाःसुप्ताःकाश्चित्कार्यांतरेस्थिताः ॥ चक्रुःकाश्चिद्वारिवार्तामेतस्मिन्नंतरेसुरः २० क्रूरास्त्र्यश्वोतुवेषेणविवेशगिरिजालयम् ॥ वंचयित्वालोके दृष्टिंश्वेवदुष्टोमहाबलः २१ सनिरीक्ष्यशिवांसुप्तांजहृषेमनसातदा ॥ यावन्निद्रातिगिरिजातावन्नेष्येशिशुंत्वहम् २२ लाघवान्मंचकारूढोबालमादाय मस्तके ॥ मंचकाधःपपाताशुचुक्रोशबालकस्तदा २३ ततःप्रबुद्धागिरिजाबिडालास्यगतंशिशुम् ॥ निरीक्ष्यधावधावेतिप्राक्रोशद्भयविह्वला २४ निमील्यन यनेमूर्च्छांमगाद्दुःखेनभीतितः ॥ कंठेदशतियावत्सतावद्बालोदधारतम् २५ कर्णयोरुभयोर्दोर्भ्यांस्वभावात्पादताडनात् ॥ न्यपातयच्छिरोदेशेमंचकाधोम हासुरम् २६ सभिन्नहृदयोधावद्बहिर्गत्वापपातह ॥ महावातेनवृक्षात्तुपक्वंकिंचित्फलंयथा २७ दुर्गंधंरुधिरंतस्यपतितंधरणीतले ॥ आच्छादयन्नासिकांसा गिरिजाशोकविह्वला २८ आदायतस्मैप्रादात्सास्तनपानंशिशोस्तदा ॥ आगताबालशब्देनसर्वास्ताःपरिचारिकाः २९ स्पृशंतिस्मतदंगानिप्रत्येकंकौतुकान्वि ताः ॥ अजरामरतामस्यनिश्चित्यमनसातुताः ३० सतुदीर्घोबिडालोभूत्तदाद्वादशयोजनम् ॥ कियत्यश्चूर्णिताःसख्यःकियत्यःपरिचारिकाः ३१ गणाश्चैवसमा यातास्तुंदघ्नातथाविधम् ॥ आश्चर्यंपरमंचक्रुर्बालकस्यपराक्रमे ३२ क्वदैत्योमायिकोदुष्टःक्वबालचरणाहतिः ॥ इंद्रादीनामवध्यायेहन्यंतेनेनलीलया ३३ इत्युक्त्वाज्ञांगृहीत्वातेगणायातानिजंपदम् ॥ केचिच्चबलिनोदैत्यनाकृष्यतत्यजुर्बहिः ३४ कटिदेशेगृहीत्वैनंसाविशन्निजमंदिरम् ॥ ततश्चतुर्थमासेतुमु निपत्न्यःसमागताः ३५ नानासौभाग्यद्रव्याणिगृहीत्वोत्तरगेरवौ ॥ अबालाश्चसबालाश्चपार्वत्यामंदिरंशुभं ३६ तासामासनसत्कारान्ददौदाक्षायणी तदा ॥ नमस्करोतितानारीःकटौबालंप्रगृह्यच ३७ परस्परंसमर्च्यंत्योहरिद्राकुंकुमादिभिः ॥ भूमौसंस्थाप्यबालानिगतिमंत्यगतीनिच ३८ पार्वतीयस्त

तस्तेषुक्रीडतेस्माऽपिबालकः ॥ तेनसर्वेशुशुभिरेशशिनोडुगणोयथा ३९ दृष्ट्वातामुनिपत्न्यस्तमूचुर्गौरिसुतामिति ॥ धन्यासिगौरिपुत्रेणशिवदत्तेनभा
स्वता ४० तवबालस्यसान्निध्याद्वासंतेनोपिबालकाः ॥ निधिसंगेनहेमत्वंलोहेनापिसमाप्यते ४१ एवंकौतुकयुक्तास्ताआनर्चुश्चपरस्परं ॥ हरिद्राभिः
कुंकुमेक्षुखंडचंदनगृंजकैः ४२ तिलैर्गुडैस्तालपत्रैर्नानापरिमलैरपि ॥ काश्चिदंगेहरिद्रांचसुखेषुचालिलिंपिरे ४३ एतस्मिन्नंतरेदैत्योनाम्नाबालासुरो
महान् ॥ बालरूपीसमवयास्तन्मध्येक्रीडितुंययौ ४४ चिक्रीडपार्वतीयेनयुद्ध्यन्निवविनोदतः ॥ यथासिंहेनक्रोष्टातुमाहिषोवागजेनच ४५ कंठेनकंठसंघट्ट
ष्यपेततुर्मुविदारुणौ ॥ मस्तकेचरणाभ्यांसोहनद्दुष्टोगजाननं ४६ कचानादायहस्ताभ्यांविचकर्षबलादसुं ॥ स्वयंचगर्जतेदुष्टोवृद्धःक्रोष्टायथानिशि
४७ दृष्ट्वातथाविधौतौसागिरिजाप्राहताखियः ॥ कस्यैषैदृढबालोयंताडयित्वाशिशुंमम ४८ क्रंदतेसौखरइवप्रहरेप्रहरेखलः ॥ अर्भकाणांस्वभा
वोयमित्युपेक्षितवत्यसौ ४९ तौतुभूमिगतौबालौलुंठतःस्मालुवत्सलौ ॥ धृत्वापरस्परंकेशानाकर्षंतौचसर्वशः ५० हसंतौहासयंतौचबालकांश्चमुनिस्त्रि
यः ॥ जानन्नपिमहादैत्यंखेलतिस्मविनायकः ५१ ततोबालासुरोदुष्टोहस्ताभ्यांबलवत्तरम् ॥ जीवग्राहंकंठदेशेदधारगणनायकम् ५२ तथातंसोपिजग्रा
हरुद्धश्वासोसुरोभवत् ॥ विह्वलंदैत्यपुत्रंतंदृष्ट्वादुश्चित्ततांस्त्रियः ५३ ययुश्चचुक्रुशुर्बालोनिहतोनेननिश्चितम् ॥ धावमानाययुःकाश्चिन्नाशकन्मोचितुंहितौ ५४
स्त्रियश्चपुरुषाःसर्वेततस्तामंबिकांशुभाम् ॥ ऊचुर्विमोचयैनंत्वंमुनिपुत्रोमरिष्यति ५५ ततःसापार्वतीबालंमुंचमुंचेतिसाब्रवीत् ॥ अस्मिन्मृतेशपिष्यंति
मुनयोनस्तपोन्विताः ५६ जीवदानात्परंपुण्यंनास्तिब्रह्मांडगोलके ॥ गमिष्यतिमहाशक्तिस्तवतेषांतुशापतः ५७ ॥ कउवाच ॥ ॥ एवंयावत्प्रार्थयतेगि
रिजातावदेवहि ॥ नेत्रद्वारेणतत्प्राणागतावुद्बुदवत्क्षणाद् ५८ ददृशुस्तंततःसर्वेदशयोजनमायतम् ॥ करालवक्त्रंपतितंचूर्णयित्वामहाद्रुमान् ५९ ततस्त्रि
योययुर्भीताबालमादायसत्वराः ॥ वृकवृंदंहिदृष्ट्वैवधेनवोजायथाभयाद् ६० गिरिजापिस्वकंगृह्यभ्रामयित्वासुतंमृदम् ॥ दत्वास्तनंकारयित्वाशांतिकंद्विज
पुंगवैः ६१ ददौदानानितेभ्यःसाजगृहेआशिषोबहु ॥ नजानेआसुरींमायांकियंतोयांतिनाशितुम् ६२ ततस्तेविलयंयांतिममबालान्महाखलाः ॥ ईश्व
रेसानुकूलेकःपीडितुंक्षमतेजनम् ६३ ॥ ॥ कउवाच ॥ ॥ एवमाकर्ण्यैतद्वाक्यंमुनिपत्न्योययुश्चते ॥ गणास्तंदूरतःक्षिप्त्वास्नात्वास्वंधामलेभिरे ६४ ॥ इ
तिश्रीगणेशपुराणेउत्तरखंडेबालासुरवधोनामचतुरशीतितमोऽध्यायः ॥ ८४ ॥ कउवाच ॥ श्रुत्वामुनिमुखात्पुत्रंगिरिजायामहाबलम् ॥ पंचमेमासिसंप्रा
प्तेमरीचिर्वीक्षितुंययौ १ भूतभव्यभविष्यज्ञःसमलोष्टाश्मकांचनः ॥ वेदशास्त्रार्थतत्वज्ञोन्यस्तस्वपरविभ्रमः २ संहारेरक्षणेसृष्टौमनसाजगतःक्षमः ॥ तंदृष्ट्वा
पादयोस्तस्यपतितासाखिभिःसह ३ उपवेश्यासनेपादौक्षालयामासशक्तितः ॥ तज्जलंपावनंपीत्वासिषेचांतर्गृहंमुदा ४ उपचारैःषोडशभिःपुपूजेश्वरभावना ॥
उवाचपार्वतीतुष्टालभ्यंदृष्ट्वंपदंहिते ५ ॥ मुनिरुवाच ॥ अहमात्ममनादेविनत्रजामिहिकुत्रचिद् ॥ अकस्माद्ध्यानविषयस्तवपुत्रोबभूवमे ६ तस्यतेदर्शना

कांक्षीशिवस्याप्यहमागतः ॥ कउवाच ॥ एवमाकर्ण्यमावाक्यंतस्यपैस्तनयंस्वकम् ७ अतिप्रीतिमनागौरीतस्यांकेसंन्यवेशयत् ॥ऊचेसातंमहाभाग्यंफालेतंदर्शनात्तव ८ पुण्यंचपरमंप्राप्तंशुभमग्रेभविष्यति ॥ मुनिरुवाच ॥ गौरितेयंसुतोब्रह्मस्वरूपोभासतेमम ९ षट्चक्रभेदनरतायोगनिष्ठामहर्षयः ॥ वायुभक्ष्याउपासंतेयंतेसोयंतवात्मजः १० गुणत्रयविभेदेनत्रितनुस्त्रिक्रियाकरः ॥ यत्सत्तयाथशेषोपिवहतेमस्तकेभुवम् ११ अणुरूपःस्थूलरूपःसप्तविंशतितत्वकृत् ॥ चेतनाचेतनंविश्वंयद्रूपंसर्वकर्मकृत् १२ युगेदशभुजःपूर्वंसिंहारूढोविनायकः ॥ द्वितीयेषड्भुजोबर्हिवाहनःशशिसन्निभः १३ मयूरेशइतिख्यातोनानादैत्यनिबर्हणः ॥ तृतीयेतुयुगेदेवोरक्तवर्णश्चतुर्भुजः १४ गजाननइतिख्यातोधूम्रवर्णःकलौयुगे ॥ धूमकेतुरितिख्यातोद्विभुजःसर्वदैत्यहा १५ एतस्यरक्षणंगौरिदैत्येभ्यःकुरुसर्वदा ॥ गौर्युवाच ॥ एषोतिचपलोबालोदैत्याह्यतिबहूनपि १६ अग्रेकिंकर्मकर्तेतिनजानेमुनिसत्तम ॥ दैत्यानानाविधादुष्टाःसाधुदेवद्रुहःखलाः ॥ अतोस्यकंठेकिंचित्त्वंरक्षार्थंबद्धुमर्हसि १७ ॥ मुनिरुवाच ॥ ध्यायेत्सिंहगतंविनायकममुंदिग्बाहुमाद्येयुगेत्रेतायांतुमयूरवाहनममुंषड्बाहुकंसिद्धिदं ॥ द्वापरेतुगजाननंयुगभुजंरक्तांगरागंविभुंतिष्येतुद्विभुजंसितांगरुचिरंसर्वार्थदंसर्वदा १८ विनायकःशिखांपातुपरमात्मापरात्परः ॥ अतिसुंदरकायस्तुमस्तकंसुमहोत्कटः १९ ललाटंकाश्यपःपातुभ्रूयुगंतुमहोदरः ॥ नयनेभालचंद्रस्तुगजास्यश्चोष्ठपल्लवौ २० जिह्वांपातुगणक्रीडश्चुबुकंगिरिजासुतः ॥ वाचंविनायकःपातुदंतान्रक्षतुदुर्मुखः २१ श्रवणौपाशपाणिस्तुनासिकांचिंतितार्थदः ॥ गणेशस्तुमुखंकंठंपातुदेवोगणंजयः २२ स्कंधौपातुगजस्कंधःस्तनौविघ्नविनाशनः ॥ हृदयंगणनाथस्तुहेरंबोजठरंमहान् २३ धराधरःपातुपार्श्वंपृष्ठंविघ्नहरःशुभः ॥ लिंगंगुह्यंसदाव्याच्चुवक्रतुंडोमहाबलः २४ गणक्रीडोजानुजंघाऊरूमंडलमूर्तिमान् ॥ एकदंतोमहाबुद्धिःपादौगुल्फौसदावतु २५ क्षिप्रप्रसादनोबाहूपाणीआशाप्रपूरकः ॥ अंगुलीश्चनखान्पातुपद्महस्तोरिनाशनः २६ सर्वांगानिमयूरेशोविश्वव्यापीसदावतु ॥ अनुक्तमपियत्स्थानंधूमकेतुःसदावतु २७ आमोदस्त्वग्रतःपातुप्रमोदःपृष्ठतोवतु ॥ प्राच्यांरक्षतुबुद्धीशआग्नेय्यांसिद्धिदायकः २८ दक्षिणस्यामुमापुत्रोनैर्ऋत्यांतुगणेश्वरः ॥ प्रतीच्यांविघ्नहर्ताव्याद्वायव्यांगजकर्णकः २९ कौबेर्यांनिधिपःपायादीशान्यामीशनंदनः ॥ दिवाव्यादेकदंतस्तुरात्रौसंध्यासुविघ्नहृत् ३० राक्षसासुरवेतालग्रहभूतपिशाचतः ॥ पाशांकुशधरःपातुरजःसत्वंतमःस्मृतिं ३१ ज्ञानंधर्मंचलक्ष्मींचलज्जांकीर्तिंदयांकुलं ॥ वपुर्धनंचधान्यंचगृहंदारान्सुतान्सखीन् ३२ सर्वायुधधरःपौत्रान्मयूरेशोवतात्सदा ॥ कपिलोजाविकंपातुगवाश्वंविकटोवतु ३३ भूर्जपत्रेलिखित्वेदंयःकंठेधारयेत्सुधीः ॥ नभयंजायतेतस्ययक्षरक्षःपिशाचतः ३४ त्रिसंध्यंजपतेयस्तुवज्रसारतनुर्भवेत् ॥ यात्राकालेपठेद्यस्तुनिर्विघ्नेनफलंलभेत् ३५ युद्धकालेपठेद्यस्तुविजयंप्राप्नुयाद्ध्रुवम् ॥ मारणोच्चाटनाकर्षस्तंभमोहनकर्मणि ३६ सप्तवारंपठेद्यस्तुदिनानामेकविंशतिम् ॥ तत्तत्फलमवाप्नोतिसाधकोनात्रसंशयः ३७ एकविंशतिवारंचपठेत्तावद्दिनानियः ॥ कारागृहगतंसद्योराज्ञावध्यंचमोचयेत् ३८ राजदर्शनवेलायांपठेद्यस्तुत्रिवारतः ॥ सराजानंवशंनीत्वाप्रकृतींचसभांज

येव ३९ इदंगणेशकवचंकश्यपेनसमीरितं ॥ सर्वरक्षाकरंसर्वकामप्रपूरकं ॥ मुद्गलायचतेनाथमांडव्यायमहर्षये ४० मह्यंसप्राहकृपयाकवचंसर्वसिद्धिदं ॥ नदेयं भक्तिहीनायदेयंश्रद्धावतेशुभे ४१ अनेनास्यकृतारक्षानबाधास्यभवेत्क्वचिद् ॥ राक्षसासुरवेतालदैत्यदानवसंभवा ४२ ॥ इतिश्रीगणे०उत्त०गणेशकवचंना मपंचाशीतितमोध्यायः ॥ ८५ ॥ कउवाच ॥ ततोस्यांकात्सुतंगौरीनमस्कृत्यसमाददे ॥ आज्ञांगृहीत्वाप्रायात्स्वंमंदिरंहृष्टशहर्षिता १ सोप्यनुज्ञांततो गृह्यशिवंनत्वाश्रमंययौ ॥ ततोगौरीचकारास्यसुमुहूर्तेशुभेदिने २ गौतमादीन्समाहूयब्राह्मणानुपवेश्यच ॥ द्विजेभ्योनमयांचक्रेसाप्रणम्यस्वयंचतान् ३ सर्वे देवगणास्तत्रनानोपायनपाणयः ॥ आययुस्तंगणाश्चापिगंधर्वाप्सरसस्तथा ४ उवाचगौरीतान्विप्रानुपवेशनमस्यह ॥ विचार्यसर्वमुनिभिःकुर्वंतुद्विजपुंगवाः ५ तऊचुर्मुनयःसर्वेगुरुवारस्त्रयोदशी ॥ पौष्णंनक्षत्रमद्यास्तितस्मात्कार्योमहोत्सवः ६ ततोगृत्समदःशीघ्रंनानारत्नचयंभुवि ॥ निधायचच कारशुचतुष्कंरत्ननिर्मितम् ७ गणेशपूजनंकृत्वापुण्याहवाचनंतथा ॥ दिव्यवस्त्रावृतेतस्मिन्नुपवेश्यशिवासुतम् ८ नीराजयामासचतंपतिवत्स्त्रीभिरादरात् ॥ रत्नप्रभाजालगतंनानालंकारदीपितम् ९ उपायनानितेसर्वेशिवाभ्यांतत्सुतायच ॥ वाद्यत्सुदिव्यवाद्येषुप्रददुर्भक्तितत्पराः १० सापूजयत्ततोविप्रान्रत्नवस्त्रादिकांचनैः ॥ आशीर्वादाक्षतांस्तस्मिंश्चिक्षेपसकलार्पितान् ११ भवानीपूजयामासमुनिपत्नीःसकन्यकाः ॥ ताऊचुर्गिरिजेधन्यात्वदन्यानास्तिकुत्रचित् १२ एतादृशःसुतोवापिसर्वलक्षणमंडितः ॥ ॥ कउवाच ॥ ॥ एवंवदत्सुसर्वेषुस्त्रीजनेषुमहाखलः १३ व्योमासुरोव्योमकर्णोनामायाविशारदः ॥ नबलेसदृशस्तस्यकोपित्रिभुवनेभवत् १४ सतुद्वारिस्थितंचूतंनानाशाखासमन्वितम् ॥ जभेद्यंवारणशतैःकल्पांतमारुतैरपि १५ प्रविवेशतदाव्योमोमाययासतदंतरम् ॥ यथादृष्टिवशाद्भूतंविशतेदुष्टचेष्टिते १६ दोलयामासतंवृक्षंकल्पांतेमारुतोयथा ॥ द्रुमपातभयात्सर्वेमुनयश्चसमागताः १७ भीताःप्रोचुर्विनावायुंकंपतेकिंमहाद्रुमः ॥ तावत्कटकटाशब्दंशुश्रुवुर्वृक्षसंभवम् १८ स्त्रियोगणाश्चसर्वेतेचक्रिरेतुपलायनन् ॥ विस्मृत्यबालकंभ्रांतागिरिजापिपलायिता १९ एतस्मिन्नंतरेवृक्षोनिपपातार्भकेतदा ॥ हस्ताभ्यांनिहतस्तेनशतचूर्णोपतद्भुवि २० यथाघननिपातेनक्रमुकंदृषदिस्थितम् ॥ भ्रमंतिस्मतदाव्योम्नितच्छाखाःपल्लवान्विताः २१ ऋषीणामाश्रमाःकेचिद्भग्नाःशाखानिपाततः ॥ पलायितेजनेपेतुःकाश्चिच्छाखाःसपल्लवाः २२ ततोव्योमासुरोदुष्टोगतासुर्निपपातह ॥ व्यादायास्यंवमन्रक्तंशतधातेनसोभवत् २३ आययुस्ततःसर्वेस्त्रियश्चबालकंतदा ॥ ददृशुस्तेयथापूर्वमुपविष्टंनिराकुलम् २४ सुमेरुनिश्चलंस्वस्थंततःसर्वेविसिस्मिरे ॥ पंचमासेनबालेनमहाबलपराक्रमः २५ लीलयाहस्ततोदैत्यःसवृक्षःशतधाकृतः ॥ हाहाकारस्वागौरीधावतिस्मनिजंसुतम् २६ मुनयस्तामथोचुस्तेहतदैत्यःसुतस्तव ॥ सादृदर्शततोबालंहिमवत्पर्वतोपमम् २७ उत्थायकटिदेशेतंधृत्वास्तन्यंददौमुदा ॥ मरीचिवाक्यंसस्मारप्रशशंसमहेश्वरम् २८ यमीश्वरोवतिसदातंहंतुंयःसमीहते ॥ सएवविलयंयातिपतंगइवदीपगः २९ मुनयोयोषितःसर्वाययुःस्वंस्वंनिवेशनन् ॥ ततोगणाय

युःकेचिदक्षतंवीक्ष्यतत्सुतम् ३० ऊचुर्धन्यतरामातारक्षितस्तेसुतोऽसुरात् ॥ दुष्टाएवलयंयांतिसाधुर्नकापिसीदति ३१ ततःसाशर्करांतेभ्योदत्वाज्ञाप्रददौशि
वा ॥ सर्वाभ्यश्चततोयाताहृष्टातेननिजंगृहम् ३२ यइदंशृणुयात्पुण्यमाख्यानंभक्तिमान्नरः ॥ नसबाधांलभेत्क्वापिसर्वत्रनिर्भयोभवेत् ३३ इतिश्रीगणेश
पुराणेउत्तरखंडेभूम्युपवेशवर्णनंनामषडशीतितमोऽध्यायः ॥८६ ॥ कउवाच ॥ व्योमासुरस्यभगिनीतस्यदुःखेनदुःखिता ॥ निशामुखेदर्शदिनेसमुत्पन्ना
क्षुधातुरा १ भक्षयामासमाहिषान्शतसंख्यान्महाबलान् ॥ करालकेशीलंबोष्ठीतालनासादरीमुखा २ हलदंताकूपनेत्राश्रोत्रावरणसंयुता ॥ दीर्घस्तनीमहा
घोराभूमिस्पृक्कचकाखला ३ दीर्घबाहुर्निम्ननाभिर्गौधेवकर्कशात्वचि ॥ नामचक्रुस्तदालोकाःशतमाहिषभक्षणात् ४ अन्वर्थंभावदुष्टायाःस्फुटंतुशत
माहिषा ॥ सायथौबंधुहंतारंहंतुंबंधुप्रियंकरी ५ कमनीयतराभूत्वासर्वावयवसुंदरा ॥ नानालंकारसंयुक्तागौराषोडशवार्षिकी ६ कृत्वाषोडशशृंगारान्मो
हयंतीकटाक्षतः ॥ सायथौदुष्टभावेनगिरिजालयमुत्तमम् ७ प्रणनामशिवांचादौग्रोवाचपरमादरात् ॥ धन्याहंकृतकृत्याहंप्राप्ताहमीप्सितंफलम् ८ यतस्त्वंसर्व
जननीसर्वदेवमयीशुभा ॥ सर्वध्येयासर्वसिद्धिःसर्वकारणकारणम् ९ जगन्मोहनदक्षात्वंपुण्येनदृष्टिमागता ॥ ॥ कउवाच ॥ ॥ श्रुत्वावाचंतदीयांसाप्रो
वाचगिरिजातुताम् १० उत्तिष्ठोत्तिष्ठभद्रंतेसंतुष्टाहंतवेक्षणात् ॥ कस्यासिकुतआयासिकिमर्थंचवरांगने ११ कामंतेपूरयिष्यामिवदसत्यंममाग्रतः ॥ सो
वाच ॥ ॥ अहंचिरंवियोगार्ताशरणंत्वामुपागता १२ श्रुतंस्यादमरावत्यानायकोसुरनिर्जितः ॥ सलीनःक्वापिगिरिजेसर्वदेवगणाअपि १३ त्वंतुभाग्यव
तीदेविनवियोगोहरस्यते ॥ सत्त्वंभवेत्सर्वदुःखमसत्त्वंतुवियोगजं १४ पार्वत्युवाच ॥ ॥ बालोयंममसुभगेहनिष्यतिखलान्बलात् ॥ मोचयिष्यतिदेवान्स
कालःकश्चित्प्रतीक्ष्यतां १५ एतदर्थंगुणेशेनधृतोदेहोममालये ॥ भूभारोत्तारणार्थायमुनीनांपालनायच १६ कउवाच ॥ ॥ इत्युक्त्वापूजयामासपादक्षालन
पूर्वकं ॥ सखीभिःकुंकुमाद्यैश्चभोजयामाससादरं १७ सापिभुक्त्वाशिवातल्पेसुष्वापोवाचतत्सखीः ॥ गिरिजाबालकंसख्यआनयंतुममांतिकं १८ विश्व
स्ताःसर्वसख्यस्तादडुर्बालंतुतत्करे ॥ लालयामाससास्नेहान्मुखचुंबनवल्गनैः १९ तज्ज्ञात्वासाविज्ञायसर्वज्ञःसशिवात्मजः ॥ राक्षसीमितिनिश्चित्यहस्ता
भ्यांश्रोत्रयोरधात् २० नासिकांचततोभारंमहापर्वतसन्निभं ॥ तदंगेपातयामाससाचश्वासनिरोधतः २१ विह्वलापरिचिक्षेपपादाघातान्नशिशौभृशम् ॥
मुचमुंचेतिभाषंतीकौतुकंद्रष्टुमागतां २२ कथंहंसिस्त्रियंदुष्ट्वनागस्कांशिवासमाम् ॥ ॥ कउवाच ॥ तदाक्रंदनमाकर्ण्यसखीभिःसहपार्वती २३ आगतामो
चितुंपुत्रंनाशकत्तमुवाचसा ॥ नमारयाशुमुंचैनांशक्रस्यमहिषीप्रियां २४ श्रुत्वामातृवचोबालोदूरेचिक्षेपतांतदा ॥ पपातोपरिव्याजेनक्षणात्स्तोभ्युदाति
ष्ठत २५ तत्कर्णनासिकाहस्तोदृष्टःसास्रक्स्रवोपिच ॥ तदंघ्रिघातात्साप्राणांस्तत्याजक्षणमात्रतः २६ गतासुतांशुशोचाथपार्वतीस्नेहनिर्भरा ॥ उवाचचप
लोबालोदुर्यशोजितवानहं २७ श्रुत्वाशचींहतामिंद्रःकिंवागत्यकरिष्यति ॥ ददर्शपुरतोगत्वाराक्षसींतांशिवाशिवां २८ दशयोजनविस्तीर्णांक्षतभू

भूरुहांतदा ॥ तत्याजशोकंजत्द्वेषेप्रशशंसनिजंसुतं २९ आदायसुतमव्यंगंपार्वतीमंदिरंययौ ॥ विस्मापयत्यसौबालशंकिताबालपौरुषं ३० विस्मयं
पौरुषेतस्यसमपद्यतपार्वती ॥ तत्सख्यश्छिन्नकर्णौतांछिन्ननासांव्यलोकयन् ३१ कथमस्यालाघवंचकथमस्यबलंशिशोः ॥ अहसन्प्रावदन्नित्थंदत्वातालंप
रस्परं ३२ ततस्तांराक्षसींदूराच्चिक्षिपुःप्रमथास्तदा ॥ अरिष्टेविहतेगौरीददौदानानिभक्तितः ३३ ततस्तुसप्तमेमासेप्रवृत्तेनिद्रितेजने ॥ तमसासर्वतोव्याप्तेदश
दिङ्मंडलेखिले ३४ निशीथेरण्यपशुपुरुत्सुदर्दुरेषुच ॥ पर्यंकेपरिसुप्तायांपार्वत्यांदिव्यसंस्तरे ३५ सखीजनेनिद्रितेचसेवकानांगणेतथा ॥ एतस्मिन्नंतरेदुष्टोना
म्नायःकमठासुरः ३६ आच्छादयत्स्वदेहेनशिवाप्रांगणमद्भुतं ॥ यस्यस्पर्शेनसहसाशीर्यतेवज्रसंहतिः ३७ अतिशीतलगात्रःसपार्वणश्चंद्रमाइव ॥ उदिते
तुदिवानाथेतत्पृष्ठेविचरन्जनाः ३८ केचित्स्नात्वास्थिताजह्नुकेचिन्निद्रांप्रचक्रिरे ॥ स्खलित्वापतिताःकेचिदतिकोमलदेहतः ३९ सिषिचुर्बालिकावारिगो
मयैरंगमालिकाः ॥ चक्रुस्ततोबहिर्यातासबालागिरिजातदा ४० आस्वापयत्सुतंगौरीमहार्हास्तरणेत्रसा ॥ सखीस्तत्रचसंस्थाप्यययौसासेवितुंशिवं ४१ एवं
ज्ञात्वासौकमठःस्वस्यपृष्ठमचालयत् ॥ भूमिकंपःकथमिहकिंवारिष्टंभविष्यति ४२ इत्यब्रुवंस्थितास्तत्रगणाश्चकितमानसाः ॥ निद्रिताःप्रतिबुद्धास्तेकिंजातामि
तिचाब्रुवन् ४३ तदैवतेनबालेनसर्वज्ञेनविवर्तिता ॥ उदंतस्यपृष्ठेतुन्यधायिधर्षताश्चशं ४४ चतुर्दशभुवनजंभारंनिदधतात्रच ॥ निरुद्धश्वासवायुःसोंगानिस्वा
निव्यचालयत् ४५ अस्रवद्रक्तमतुलमस्यदेहात्तथाविधात् ॥ उद्धानंकर्तुमारेभेनाशकत्कमठस्ततः४६ततोगणाययुःसर्वेयेतत्रासन्सुखोषिताः ॥ किमरिष्टंसमुत्प
न्नंमुहुर्मूश्चलतेनुकिं ४७ सख्यश्चबालिकाःसर्वाःपार्वतींसेवितुंययुः ॥ उत्तिष्ठ मातर्बालस्तेनीतःस्याद्वामृतोपिवा ४८ त्वरयापार्वतीयाताधावमानाबहिःसुतम् ॥
ददर्शनिश्चलंगौरीसोत्थापयितुमुद्यता ४९ भूगोलभारसदृशंमत्वातस्थौविमानसा ॥ ततोममर्दसहसाबालस्तंसममारच ५०ततःसादृश्यदैत्यंदशयोजनमायत
म् ॥ प्रसारितमुखंकूर्मवमंतंरुधिरंबहु ५१ चूर्णयामाससहसाश्रमान्नानाविधान्द्रुमान् ॥ ततःसाबालमादायस्तनपानंददौमुदा ५२ नज्ञायतेऽसुराणांहिना
नामायांप्रकुर्वताम् ॥ त्रिलोचनप्रसादेनपुनर्लब्धःसुतोमया ५३ यतःकृतांताद्बलवान्निहतःकमठासुरः ॥ सख्यश्चतद्गणाःप्रापुःपप्रच्छुःक्षेममर्भके ५४ क्षेम
मित्येवतान्गौरीनिजगादमुदान्विता ॥ ततोगणाःखंडशस्तंकृत्वादूरतरंजहुः ५५ ववर्षुःपुष्पवर्षाणितस्मिन्देवगणास्तदा ॥ यइदंपरमाख्यानंशृणुयाच्छ्राव
येत्तथा ५६ सर्वारिष्टविनिर्मुक्तःसर्वान्कामानवाप्नुयात् ५७ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेकमठासुरवधोनामसप्ताशीतितमोऽध्यायः ८७ ॥ व्यासउवाच ॥
अद्भुतानिचरित्राणिश्रुतानित्वन्मुखांबुजात् ॥ ब्रह्मन्नघौघहारीणिगुणेशेनकृतानिवै १ तथापिश्रोतुमिच्छानोनापैतिसर्ववित्तम ॥ अतोबालस्यचरितंपुनर्मेब्रू
हिसादरम् २ ॥ ब्रह्मोवाच ॥ शृणुष्वावहितोब्रह्मन्गुणेशस्यकथांपुनः ॥ श्रुतिस्याचपापानांसंहर्त्रीधर्ममोक्षदाम् ३ अष्टमेमासिमध्याह्नेग्रीष्मतौगिरिजाकि
ल ॥ ऊष्मणापीडितागेहेसाययौपुष्पवाटिकाम् ४ अशोकाश्चंदनाश्चन्नपनसाम्रबिल्वितकाः ॥ मालतीचंपकाजातीर्चिचिणीपिचुमंदकाः ५ पारिजातकवृक्षाश्च

घनच्छायासमन्विताः ॥ रम्यंशीतजलंचारुसरःकमलमंडितम् ६ तत्रमंचकवर्यैसासख्यानीतेशुभास्तरे ॥ सुष्वापगिरिजाबालयुक्तानिःशंकचेतसा ७ सखी
भ्यांवीजितावालव्यजनेनाश्रमसृष्टिना ॥ सुषुप्तिमगमद्यावत्तावदैत्योमहाबलः ८ तल्पासुरइतिख्यातोवायुरूपोविशत्ततः ॥ मंचकांतर्गतःसोथतेनसाकंय
यौदिवम् ९ तस्यशब्देनसंत्रस्तेतेसख्यौपतितेभुवि ॥ आक्रंदंपरमंचक्रेपर्यंकस्थातदाशिवा १० व्योमस्थापर्यदेवत्साधावधावेतिशंकर ॥ किंमयाविकृतंदे
वकिमर्थंमामुपेक्षसे ११ अयंदैत्योतिबलवान्व्योमाक्रम्यप्रधावति ॥ परहस्तगतांकांतांशक्तःकथमुपेक्षसे १२ अस्यपुत्रस्ययोगेननानादुःखमभून्मम ॥ अ
स्माद्दैत्यान्मृतिर्मेकिंसपुत्रायाविनिर्मिता १३ अयमेवनजातश्चेत्कथंबंधनमाप्नुयात् ॥ कउवाच ॥ एवमाक्रंदनंश्रुत्वाउमाबालोमहामनाः १४ तदामुहुर्जगर्जा
सौघनवद्गर्जयन्नदिशः ॥ चकंपेधरणीतेनससमुद्रवनाकरा १५ तामदृष्ट्वातुशोचत्सुगणेषुप्रमथादिषु ॥ पादाघातेनबालोथमंचकंसमताडयत् १६ विभ्युर्भूतानि
सहसाशतधेवाभवन्नभः ॥ मंचकःखंडशस्तेनभूत्वानिपतितोभुवि १७ ततस्तल्पासुरोदृश्योजातोबालोदधारतं ॥ हस्तेनैकेनजननींदधारासौस्वलीलया १८
घनमुक्तंतोयबिंदुंचंचूवचातकःक्षणाद् ॥ स्कंधारूढांतुतांकृत्वाशिखांवामेनतस्यच १९ ततस्तत्याजभूदेशेतंबालःसहसाबलाद् ॥ पद्मासनंदैत्यदेहेकृत्वायो
गीवतस्थिवान् २० समूमौपतितोदूरान्मर्दितोबलवत्तरं ॥ प्राणांस्तत्याजदैत्योथवमन्नास्यादसृक्मुहुः २१ सतुदृष्टोजनैर्दैत्यएकविंशतियोजनः ॥ चूर्णयन्
वृक्षपाषाणानाश्रमान्शरणान्यपि २२ ततोदृष्टोबालकोसौगणैःसखिजनैरपि ॥ ऊचुस्तेगौरिबालोयंरमेतकुशलीबली २३ सातुभांत्यैवनाजानाद्गगनंधरणीं
शिशुम् ॥ मुनयस्तामथोचुस्तेसावधानमनासति २४ भवदैत्योहतस्तेनधृत्वारूपंमहत्तरं ॥ उन्मील्यनयनेपश्यपुनर्बालंशिवंशुभम् २५ ॥ कउवाच ॥ तद्वा
क्यात्प्रतिबुद्धासापश्यद्दैत्यंचबालकम् ॥ गौर्युवाच ॥ विपरीतंमयादृष्टंगूढोबालेनवाकथम् २६ हतोनेनमहादैत्यएकविंशतियोजनः ॥ मातृणामृणमुत्तीर्णोबा
लोमेजीवितप्रदः२७इत्युक्त्वाबालमादायकारयामासशांतिकम्॥ दत्वादानानिचददौस्तनपानंशिशोरपि२८दृष्ट्वातेकौतुकंतस्यप्रशशंसुर्मुदान्विताः॥एतस्मि
न्नंतरेघोरंचक्रेशब्दंमहासुरः२९ दुंदुभेःसदृशंसोपिख्यातोदुंदुभिनामतः॥यस्यपाणितलाघाताद्वराचूर्णत्वमागता३०आच्छादितोदिनमणिर्देहेनगगनस्पृशा॥
गणबालस्वरूपेणगौरीबालंजुहावसः ३१ इतएहिरमावोद्यसोपियात्तस्तदैवतं ॥ स्वांकेकृत्वातुतंबालंहालाहलफलंददौ ३२ अभ्यद्धीतिफलंबालंशीघ्रमि
त्यब्रवीच्चसः ॥ दूरदेशात्समानीतंजन्ममृत्युजरापहम् ३३ सतुजाननदुष्टभावंफलंतज्जगृहेततः ॥ अभक्षयदयाचत्सफलांतरमभीःपुनः ३४ ॥ कउवाच ॥ अ
मृतंविषतांयातिविषंतत्तांशिवेच्छया ॥ धृत्वावक्षस्थलंतस्यतत्क्षणाद्दुदतिष्ठत ३५ तज्जानुनोर्न्यस्यपादौकराभ्यांजगृहेशिखाम् ॥ पराभ्यांश्मश्रुणी
गृह्यदोलयामासलीलया ३६ ननर्तजानुभागेस्यभूमंडलभरान्वितः ॥ सपीडितउवाचाथजानुभागादवातर ३७ तवभारेणनृत्येनममदेहोतिपीडितः ॥ मुं
चमुंचगमिष्यामिस्वालयंगिरिजासुत ३८ कउवाच ॥ एवंसंप्रार्थितस्तेननमोचयतिबालकः ॥ उदतिष्ठद्बलाद्दैत्योभग्नदेहस्तुपूर्वतः ३९ बलाच्चकर्षबालो

पिमूर्द्धानमस्यतत्क्षणाद् ॥ कंठनालात्तच्छिरोपिबालहस्तगतंबभौ ४० रुधिराक्तामहीसर्वातत्क्षणंसमपद्यत ॥ शिरःकमलहस्तोसौखेलतेगिरिजासुतः ४१
शोणितेनाविलिप्तांगोगणामात्रेन्यवेदयन् ॥ सागत्वापश्यतिस्माथपुत्रंदृष्ट्वातथाविधम् ४२ तच्छिरोदूरतःक्षिप्त्वावस्त्रेणचममार्जतम् ॥ स्नापयित्वास्वयंस्नात्वाद
दौस्तन्यंतदामुदा ४३ ततःसख्योगणाश्चापुःपप्रच्छुःक्षेममर्भकम् ॥ सोवाचपरमंक्षेमबालकेशेवभाकृतः ४४ मरीचिरक्षणाच्चापिकुशलंममबालके ॥ ततस्ते
तंनिरासुर्वैदूरतोदुष्टदानवम् ४५ ततोहर्षयुताजग्मुर्गणाःसख्योनिजंगृहम् ॥ पार्वतीहर्षसंयुक्तासबालाप्राविशद्गृहम् ४६ इतिश्रीगणेशपुराणेउत्तरखंडेमंच
कासुरवधोनामअष्टाशीतितमोऽध्यायः ८८ ॥ कउवाच ॥ ततस्तुदशमेमासेत्रिमुहूर्तागतेरवौ ॥ किंचिच्चीरंगमाणोसौरमतेचशिवासुतः १ पादाभ्यांचालय
न्वक्त्रापिगूढंगूढंचभाषते ॥ लुंठतेनर्ततेचापिरोदनंकुरुतेचताम् २ दृष्ट्वाशिवांचसहसापृष्ठलग्नोव्रजत्यपि ॥ दृष्ट्वातथाविधंबालंजहृषेपार्वतीतदा ३ एतस्मिन्नंत
रेदृष्टोदैत्यआजगराभिधः ॥ वमदग्निकणान्दृष्ट्वावज्रसारतनुर्दृढः ४ ललज्जिह्वोदीर्घदेहोग्रसन्निवमहागिरिम् ॥ उपविष्टोद्रुमतलेद्वेजिह्वेलालयन्मुहुः ५ तंबालो
बालभावेनारिंगित्वाविदधारह ॥ सनिनायचतंशीघ्रमास्यांतःसहतेनच ६ अंतःप्रविष्टओष्ठौसन्यमीलयतवायुभुक् ॥ नापश्यदंगणेबालंगौरीविह्वलमानसा ७
अत्रक्रीडन्स्थितोबालःकेननीतोहतोनुवा ॥ शुशोचपरमार्तासौततोडमस्तकंनिजम् ८ तावद्गणैर्निषिद्धासामामातर्विमनाभव ॥ बालप्रभावोविज्ञातःशतशो
बलवत्तरः ९ बालस्तद्गुदरगतोवर्द्धतेचनिरुध्यच ॥ श्वासंतस्यतुदैत्यस्यपुच्छांतंसोप्यचालयत् १० प्राणवायुस्तुनेत्राभ्यांरुधिरेणविनिर्ययौ ॥ विदार्यदेहमस्या
सौबहिर्यातोंबिकासुतः ११ चिक्रीडरुधिरार्द्रांगःकिंनु पुष्पितकिंशुकः ॥ ततोगणास्तांनिरीक्ष्यलिहंतंस्वांगुलिंशिशुम् १२ उच्चैरूचुर्गिरिसुतामयंबालोविनिर्गतः ॥
अस्यास्यान्मारयित्वातंदैत्यमाजगरंखलम् १३ ॥ कउवाच ॥ तद्वधानंतरंबालमादायसत्वरंशिवा ॥ स्नाप यामाससहसालालयित्वास्तनंददौ १४ क्वगतोसिक्ष
णोबालत्वांविनाब्दत्वमागतः ॥ ततोददर्शाजगरंविस्तीर्णंशतयोजनम् १५ भयानकमुखंदुष्टंवमंतंरुधिरं बहु ॥ पतितंवृक्षजालानिपातयित्वागृहाणिच १६
गौर्युवाच॥अस्मिन्स्थलेकियंतोनुभवेयुर्दैत्यराक्षसाः॥ कियंतोनिधनंप्राप्ताअस्यबालस्यविक्रमात् १७ ततस्तांचिक्षिपुःसर्वेगणादूरेमहासुरम् ॥ ततस्त्वेकादशे
मासेद्वारदेशेशिवायय्यौ १८ सखीभिःपश्यतीबालकौतुकानिबहून्यपि ॥ कस्यचिद्वदनंबालश्चुंबतेचुंबयत्यपि १९ आच्छादतेचक्षुषीचकस्यचित्पृष्ठगःस्वयम् ॥
पिबतेमातुरन्यस्याःस्तन्यंगत्वाबलादसौ २० मुखमाच्छाद्यवस्त्रेणबिभीषयतिचापरान् ॥ मुखंकेशान्नासिकांचकर्षतेभूषणान्यपि २१ वदतेस्खलितां
वाणींपरंदृष्ट्वास्वकान्यपि ॥ एतस्मिन्नंतरेदुष्टोदानवःशलभासुरः २२ ब्रह्मादीनामगम्योसौपर्वतस्कंधमंडलः ॥ व्योमस्फोटिमहामूर्धानीलवर्णोयथाघनः
२३ जपाकुसुमनयनोमेघस्पृक्शृंगमंडलः ॥ बालांतिकमुपायातोग्रसन्निवजगत्त्रयम् २४ तंधर्तुंबालकोयातियत्रयत्रसगच्छति ॥ एवंतौसुचिरंकालंभ्रमतः
स्ममहाजवौ २५ ततःश्रांतोऽभवद्बालोरुषाधावत्तदंतिकम् ॥ दधारसहसादैत्यंशलभंबलवत्तरम् २६ सपक्षौस्फालयामासश्येनोहस्तगतोयथा ॥ बाधने

चरणाघातैस्तंबालंशलभासुरः २७ प्रसार्यनयनेक्रूरेपश्यतिस्मतदाशिशुम् ॥ मुमुचेतंतदाबालोदधारचपुनःपुनः २८ दर्शयामासजननींधरापृष्ठव्यपोथय
त् ॥ शिवोवाचदयाविष्टतंबालंक्रूरमानसम् २९ जीवघातोनकर्तव्योमुंचैनंप्राणिनांशिशो ॥ बलात्पुनःशिलापृष्ठेहठाच्चिक्षेपबालकः ३० सतदाशतधाजा
तोनिपपातचभूतले ॥ गर्जयन्गगनंवृक्षान्पातयन्गृहतोरणान् ३१ वमन्रक्तंबहुमुखाद्दशयोजनविस्तृतः ॥ चूर्णयन्नाश्रमान्वृक्षांस्ततोमातानिनायतम् ॥
३२ बालंसंस्थापयामासप्रादात्स्तन्यंचभोजनम् ॥ सख्योनिरीक्ष्यतंबालंमृतंदैत्यंतथाविधम् ३३ साधुसाध्वितिताःप्रोचुस्तांचपर्वतकन्यकां ॥ गृहंविवेश
गिरिजाताश्चसख्योमुदान्विताः ३४ चिक्षिपुर्दूरतोदैत्यंतदाज्ञावशगागणाः ॥ मुमुचुःपुष्पवर्षाणिबालंदेवगणास्तदा ३५ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेश
लभासुरवधोनामैकोननवतितमोध्यायः ॥ ८९ ॥ कउवाच ॥ ततोद्वादशमासेतुगिरिजासुतमद्भुतम् ॥ उपविष्टालिभिःसार्धमंकेकृत्वास्वलंकृतम् १ को
टिसूर्यानिभंकोटिभूषणैश्चविराजितम् ॥ ततस्तस्यामहानासीदुत्सवोनृत्यदर्शने २ बालकानांहरस्याथज्ञात्वावांछांशिशुस्तदा ॥ थेथीथेयीतिशब्देननर्त
गिरिजासुतः ३ श्रुत्वातदीयंतंशब्दंहरोनर्तितुमागतः ॥ शिवंनृत्यंतमालोक्यननर्तश्रीवरोपिच ४ ततइंद्रादयोदेवास्तत्रनर्तितुमागताः ॥ सयथानर्ततेबाल
स्तेपिनृत्यंतिताद्दशम् ५ दर्शयंतितथाभावंसयथादर्शयत्यपि ॥ मनुष्याःपशवोवृक्षायक्षराक्षसपन्नगाः ६ मुनयोमनवोभूपाभुवनानिचतुर्दश ॥ एकविंशतिस्व
र्गस्थाःसचेतनमचेतनम् ७ बालप्रभावान्ननृतेबालच्छंदेनभूतलम् ॥ मुनिपत्न्योदेवपत्न्योननृतुर्गिरिकन्यया ८ नूपुराणांसिंजितेनक्षुद्रघंटारवेणच ॥ पादाघात
स्यशब्देनदिशोविदिशएवच ९ गगनंपर्वताआसन्नादयुक्तारतदामुने ॥ चकंपेधरणीशेषोरविश्चंद्रश्चतारकाः १० ततोनृत्यस्यातिशयंज्ञात्वागौरीन्यषेधयत् ॥
नचक्रेबालकोवाक्यंयदागौरीसमीरितं ११ नूपुराख्योमहादैत्योमहाकृष्णतनुर्दृढः ॥ पातालचरणोव्योमसंस्पर्शिदृढमस्तकः १२ नूपुरांतर्गतोदुष्टःसूक्ष्मरूपः
शिशोरसौ ॥ स बालस्तंबबंधाशुमाययाबलवत्तरं १३ शृंखलाभिश्चतुर्दंतंयथामदच्युतंगजं ॥ अंकेजग्राहतंबालंपुनरेवाद्रिकन्यका १४ तद्भारेणपिपीडाथभूभारे
णसमेनसा ॥ उवाचवचसागौरीकथंगुरुतरोभवान् १५ इदानीमेवजातोसितस्मादुत्तरमेंऽकतः ॥ ममप्राणागमिष्यंतितवभारेणबालक १६ ॥ कउवाच ॥
श्रुत्वामातुर्वचोबालःपीडितासाभृशंतदा ॥ उत्ततारबलादंकादुधावांघ्रियुगंशिशुः १७ ततोनिसृत्यदैत्योसौव्योम्निबभ्रामपक्षिवत् ॥ तमसाव्यापिभूःस
र्वातेनसंछादितेरवौ १८ सोऽकस्मान्निपपातोर्व्यांशतधाचाभवत्खलः ॥ ततस्तेमुनयोदेवाःपरमानंदनिर्वृताः १९ तुष्टुवुर्बालरूपंतंपरमात्मानमव्ययम् ॥
॥ ॥ देवर्षयऊचुः ॥ ॥ नजानीमोवयंदेवरूपाणितवयन्महः २० लीलामायाश्चविविधादैत्यदानवनाशिकाः ॥ चरणाऱ्याजितोदैत्योरविमंडललोपकः
२१ भ्रमित्वाव्योमनिभृशंपतितःशतधाभवत् ॥ संहृत्यजीवसंघातान्वृक्षानाश्रमपर्वतान् २२ तवनृत्यंततोवीक्ष्यसर्वेनृत्यंप्रचक्रिरे ॥ ॥ कउवाच ॥ ॥
ततस्तेपुपुजुःसर्वेतंबालंविश्वरूपिणम् ॥ नृत्योत्सवेनिवृत्तेतुगौतमादीन्विसृज्यसा २३ पार्वतीबालमादायलालयित्वास्तनंददौ ॥ स्त्रियःसर्वाविसृज्यार्थ

विवेशनिजमंदिरम् २४ ततःपुनःकदाचित्समुनिबालैःसमन्वितः ॥ गृहाद्बहिःक्रीडनार्थंययौचिक्रीडलीलया २५ मल्लयुद्धंचतेचक्रुर्बद्धशोनेकधाबहु ॥ पा
तयामासुरागृह्यशिखायांतेपरस्परम् २६ जघ्नुःशिरःशिरोभिश्चजानुभिर्जानुनीतथा ॥ कूर्परंकूर्परेणैवचरणंचरणेनच २७ रुरुहुःपृष्ठभागंतेस्कंधभागंपरस्प
रम् २६ लत्ताप्रहारान्निर्जघ्नुरुदरमस्तकेपिच २८ केचिन्नपुपुजुर्बालंगंधपुष्पाक्षतादिभिः ॥ केचिन्नीत्वाश्रमपदंभोजयामासुरंधसा २९ नमश्चक्रुःपदयुगंकेचि
न्मालांददुःशुभाम् ॥ अविपुत्रस्वरूपेणदैत्यःसिंधुप्रणोदितः ३० यंदृष्ट्वाभयमभ्येतिदंडपाणिर्भयानकः ॥ स्वबलेनजघानारींस्तीक्ष्णधारनखोबली ३१
बिरुदंबाहुदेशेसजित्वासर्वान्बबंधह ॥ विशालाक्षोबृहच्छृंगोमहागोत्रविदारणः ३२पुच्छाघातेनजीवानांयश्चक्रेनाशनंखलः ॥ उन्मूलयामासद्रुमान्शृंगाघातेन
पर्वतान् ३३ पृष्ठलग्नोमनुष्याणांबलान्मारयतेबली ॥ सययौपार्वतीबालंहंतुकामोमहासुरः ३४ पृष्ठतोधावयित्वासयावन्मारयतेतुतम् ॥ दधारशृंगयो
र्बालोहस्ताभ्यांतावदेवहि ३५ रुरोहचसतत्पृष्ठेहयपृष्ठेयथार्भकः ॥ ततोमुनिसुताःकेचित्पुच्छंधृत्वाप्यकर्षयन् ३६केचिद्दंडैश्चलगुडैर्निजघ्नुर्दैत्यपुंगवम् ॥ सोव
मत्यतुतान्जघ्नेपुच्छांतेनससत्वरम् ३७ निपेतुस्तेतदाभूमौपुच्छाघातेनपीडिताः ॥ दृष्ट्वातस्यबलंबालोवतस्थेदधारतम् ३८ आस्फालयत्तदापृष्ठेभ्रामयित्वा
चिरंतुतम् ॥ सहस्रधाविशीर्णोगोममारसहसासुरः ३९ अंत्यशब्देनतस्याथबिभायभुवनत्रयम् ॥ वमन्रक्तंबहुमुखात्प्रसार्यविकृतंमुखम् ४० ततोबाला
मुनीनांतेकथयन्नचलोद्भवाम् ॥ अनेननिधनंनीतअविजेयोमहासुरः ४१ निहंतुंनःसमायातःक्रीडताबलशालिना ॥ कउवाच ॥ अंबानिरीक्ष्यनिहतंमहा
दैत्यंसुतंचतम् ४२ आश्चर्यंपरमंकृत्वानिनायनिजमंदिरम् ॥ दध्योदनंभ्रामयित्वाबालोपरिजलेनह ४३ तत्याजदूरतोगेहाद्स्तनपानंततोददौ ॥ तानिखं
ह्यनिदैत्यस्यतत्यजुर्दूरतोगणाः ४४ मुनयोमुनिपत्न्यश्चमुनिबालाःस्त्रियोपिच ॥ प्रशशंसुःसुतंगौर्यादेवाःपुष्पाणितत्यजुः ४५ आशिषोपिददुर्विप्रानृत्यं
तेस्माप्सरोगणाः ४६ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेअविजेयवधोनामनवतितमोध्यायः ॥ ॥ ९० ॥ ॥ कउवाच ॥ ततोद्वितीयेवर्षेसबालो
बालैरसंख्यकैः ॥ चिक्रीडवाटिकामध्येनानाद्रुमलताकुले १ फलानिभक्षयामासखर्जूरीपनसानिच ॥ ददौतेभ्योतिबलात्सपातयित्वाबहून्यपि २
कूटोनाममहादैत्यःकूटमायाकरःखलः ॥ तत्तृषाकालमाज्ञायवापिकायांविषाणिसः ३ लोडयामासदुर्बुद्धिःसर्वेषांहिजिघांसया ॥ येषांतुस्पर्शमात्रेणम्रियं
तेप्राणिनःक्षणाद् ४ यदुत्थवायुनास्पृष्टानिपतंतिखगाभुवि ॥ ततःकूटोगतस्तत्रतस्थौनाशदिदक्षया ५ ततस्तेबालकाःपातुमज्ञानात्तुजलंययुः ॥ पपुःसर्वे
स्वचुलकैरंजलीभिश्चकेचन ६ मृतान्मत्स्यान्समादायबहिर्यातामृतास्तदा ॥ रक्षकोग्राममध्येतुघोषयामासतन्मृतिम् ७ ततोमहारवंकृत्वातत्रायुःसर्वना
गराः ॥ घ्नंतःपाणितलैर्वक्षःपाषाणैरपरेशिरः ८ हाहाकारोमहानासीत्पुंवधूयोषितामपि ॥ तेषामाक्रंदनंश्रुत्वाशिवायाअपिबालकः ९ अजीवयद्दृष्टिपातैः
सर्वांस्तान्पुरबालकान् ॥ क्रूरदृष्ट्याकूटदैत्यंमृतंभूमौन्यपातयत् १० पंचयोजनविस्तीर्णांचूर्णितांतेनवाटिकाम् ॥ ददृशुर्नागराःसर्वेकतिचिच्चपलायिताः ११

सोजीवयज्जलचरान्निर्विषांवापिकांव्यधात् ॥ स्वंस्वंबालंसमादायसर्वेतेस्वालयंययुः १२ प्रशशंसुःशिवाबालंनिंनिंदुर्नास्तिकाःखलाः ॥ अस्यसंगादरिष्टानिनश्यंतीतिपरेब्रुवन् १३ ततस्तृतीयवर्षेतुप्रातःकालेद्विजासुतः ॥ वंचयित्वाबहिर्यातोमुनिबालास्तमन्वयुः १४ अहोरात्रवियोगेनपरस्परमथाश्लिषन् ॥ तऊचुर्निशिदेवत्वांस्वप्नेपश्यामसर्वदा १५ रात्रिर्युगसमादेवजायतेत्वामपश्यताम्॥ इदानींत्वांनिरीक्ष्यैवप्रसन्नास्मोखिलावयम् १६ क्रीडामोद्यमहासत्वंद्वंद्वीभूययथासुखम् ॥ ततोर्धएकतोभूत्वापरेर्धेपरतोपिच १७ अभ्यघ्नन्पंकगोलेननादयंतोऽथरोदसी ॥ आह्लादेनाथयुध्यंतोविकर्षंतःपरस्परं १८ रमंतस्तेययुर्दूरमाश्रमंकस्यचिन्मुनेः ॥ सरोवरेतत्रसमुर्योजनायतविस्तरे १९ सिंचंतोंजलिभिर्वारिद्वंद्वीभूतायथापुरा ॥ निमज्यस्कंधमारुह्यमज्जयंतोबलात्परम् २० ततोदैत्योमत्स्यरूपीतेषुक्रीडारतोभवत् ॥ आस्फालयन्करावातैस्तज्जलंतेषुपुच्छतः २१ कलुषात्तज्जलाद्गंगाज्जग्मुस्तीरंमुहुर्मुहुः ॥ तीरेदृष्ट्वाद्विजापुत्रंमत्स्यस्तन्निकटंययौ २२ व्यादायवदनंदध्रेतदंघ्रीविचकर्षच ॥ निनायधावधावेतिक्रोशयंतंमहाजले २३ निमज्ज्यसजलेतेनचिरकालंमहासुरः ॥ अरोदिषुर्मुनिसुता मग्नंवीक्ष्याद्विजासुतं २४ हाहाकारंप्रकुर्वंतःकरपृष्ठोष्ठसंयुतम् ॥ केचिद्गत्वासरोरम्यंपश्यंतोदद्युर्नतम् २५ भवानीताडनाद्भीताःकेचिद्बालाःपलायिताः ॥ केचित्तेबालकागत्वाशंसन्मग्नांशिशुंचतम् २६ सर्वान्नःक्रीडतोहित्वानीतोमत्स्येनबालकः ॥कउवाच॥ श्रुत्वातद्वचनंगौरीमूर्छितापतिताभुवि २७ मुहूर्तांचेतनांलब्ध्वारोदमानाययौबहिः ॥ मुंचंतीनेत्रजंवारिमस्तकात्पतितांचला २८ स्खलंतीनिश्वसंतीचपतंतीधरणीतले ॥ सख्यस्तामन्वयुःकाश्चिद्धित्वाकार्याणि सत्वराः २९ सरस्तीरंशीघ्रतरमागतासखिभिःसह ॥ मुनयस्तमुदंतंचश्रुत्वायाताःसरःप्रति ३० अगाधेंभसितेकेचिन्मग्नानापुरुमासुतम् ॥ तामूचुर्जननींकेचिन्मग्नानोबालकाजले ३१ तैःपुनर्नचदृष्टश्चमत्स्योदरगतःसुतः ॥ रोदनंपुनरारेभेगौरिश्रुत्वातुतद्वचः ३२ उमोवाच ॥ ममप्राणागमिष्यंतिविनातंसर्वसुंदरम् ॥ अतिक्लेशेनसंलब्धमतिपौरुषमीश्वरं ३३चराचचरगुरुंमायातीतंमायाविनंपरम् ॥ अनंतकोटिब्रह्मांडनायकंविश्वसंभवम् ३४ ललाटंनिजघानोरोवारंवारंकरेणसा ॥ रुरुदुर्मुनयोवीक्ष्यरुदतींतांतथाविधाम् ३५ ततःकारुणिकोदेवोनिशम्यकरुणंवचः ॥ स्वयमंडजरूपोभूद्युयुधातेपरस्परम् ३६ तदाघातेनजलजामृतास्तीरेनिपेतिरे ॥ दंष्ट्राभ्यांदशतःस्मोभौघ्नतःस्मपुच्छघाततः ३७ उदरंस्वोदरेणैवपृष्टंपृष्ठेनजघ्नतुः ॥ एवंचिरतरंयुद्धंकृत्वादारुणमोजसा ३८ मत्स्यरूपंगुणेशोथबलाज्जघ्नेमुखेमुखं ॥ मग्नास्योभग्नदर्पोसौभग्ननेत्रोभवच्चसः ३९ पपालजलमध्यसपृष्ठगात्सउमासुतः ॥ यत्रयत्रययौसोथतत्रतत्राप्यसौययौ ४० क्वचिल्लीनंतुतंदृष्ट्वापुच्छाघातैरताडयत् ॥ तत्पुच्छंतुमुखेधृत्वागुणेशोबहिरानयत् ४१ चुचूर्णनिजभारेणगतासुंविससर्जसः ॥ त्यजंतंरुधिरंवक्त्रान्नदंतंबलवत्तरं ४२ तेनशब्देनमहाताचकंपेभुवनत्रयं ॥ निर्ययौजलमध्यात्सलिलिंगपार्वतीतदा ४३ आनंदमग्नागौरीतंस्तनपानंमुदाददौ ॥ मामपृष्ट्वाथकुत्रत्वंगतोसिबालकैःसह ४४ यद्यदायातिविघ्नंतेतत्तद्दैवाद्विनश्यति ॥ मरीचेरक्षणाच्छंभोःकृपयाजगदीशितुः ४५ कुरुषेकिंचपलतांरक्षितव्यःकथंमया ॥ त्वद्वियो

गान्ममप्राणागमिष्यंतिप्रियार्भक ४६ ॥ ॥ कउवाच ॥ ॥ ततोमुनिगणाःप्रोचुस्त्वांविनादुःखितावयं ॥ इदानींपुनरानंदंप्राप्तास्त्वद्दर्शनाद्विभो
४७ पुपूजुर्मुनयोनानाद्रव्यैःसख्यःस्त्रियोपिच ॥ नमस्कृत्यगुणेशंतंप्रार्थयन्सर्वएवतं ४८ वयंत्वदीयादेवेशननस्त्यक्तुंत्वमर्हसि ॥ ततोमाबालमादाययया
स्वस्थानमुत्तमं ४९ अनंतरंगणाःसख्योमुनयोहर्षनिर्भराः ॥ मार्गमध्येपरःशैलनामादैत्योमहाबलः ५० सर्वशत्रुहरोनक्रदृढांगोऽशनिनाशनः ॥ गिरि
णांयस्यशब्देनदारणंजायतेक्षणात् ५१ मार्गंनिरुध्यसहसासंस्थितोरोदसीस्पृशन् ॥ द्वियोजनमस्तकोसावधोद्वादशयोजनः ५२ सरस्तडागावृक्षाश्चलतायत्र
विभांतिच ॥ क्रीडंतिसिंहशार्दुलावारणायक्षराक्षसाः ५३ सर्वेतेविह्वलाःप्रोचुःकिमिदंविघ्नमुत्थितं ॥ तदंतिकेस्थितागौरीतेपिसर्वेस्थितास्तदा ५४ तत
स्तेमुनयःप्रोचुःकदाद्रक्ष्यामयोषितः ॥ अपत्यानिगुणेशस्यकदास्यादत्रविक्रम ः५५ गमिष्यतिवृथाहोमकालोयंनःस्वधाक्रियाः ॥ गौरीजगादतान्सर्वान्माखेदं
कर्तुमर्हथ ५६ ममापिचिंतासंप्राप्ताशंकरस्यहिजायते ॥ ॥ कउवाच ॥ श्रुत्वावाक्यानितान्याशुगुणेशोबुद्धिमत्तरः ५८ प्रगृह्यचतुविराड्रूपंश्वासमा
त्रान्निराकरोत् ॥ ददृशुर्नचतद्रूपंमोहितामुनयोपिते ५८ तच्छ्वासयोगात्सगिरिर्बभ्रामगगनेतदा ॥ आश्चर्यंपरमंप्राप्ताःसर्वेतेतंप्रशंसिरे ५९ वात्यागतंयथा
पत्रंततोसौपतितोभुवि ॥ सहस्रधाभवच्छैलःपुनर्वृक्षानचूर्णयत् ६० ततस्तेमुनयःप्रोचुःसाधुसाधुगुणेश्वर ॥ दूरीकृतमरिष्टंनःस्वाश्रमस्थावयंसुखं ६१ व
सामस्त्वत्प्रसादेनस्वस्वकर्मरताभृशं ॥ ॥ कउवाच ॥ ॥ एवमुक्त्वाचनत्वाचपृष्ट्वासंपूज्यतंययुः ६२ पार्वतीचतमादायविवेशनिजमंदिरं ॥ सख्य
श्चमुनिपत्न्यश्चपृष्ट्वातांस्वगृहंययुः ६३ इदंयःशृणुयान्मर्त्यःसर्वत्रसुखमाप्नुयात् ॥ आयुरारोग्यमैश्वर्यैंसर्वत्रविजयंतथा ॥ ६४ ॥ ॥ इतिश्रीगणेशपुरा
णेउत्तरखंडेवत्सशैलासुरवधोनामएकनवतितमोध्यायः ॥ ९१ ॥ ध ॥ ॥ कउवाच ॥ ततःकदाचिद्गिरिजाप्रातःस्नात्वात्वरान्विता ॥ सुप्तेबालेचतुर्वर्षेलिं
गपूजांचकारसा १ वामहस्तेनिधायैवपार्थिवींमूर्तिमुत्तमां ॥ सउत्थायरुदन्तन्त्यंययाचेहठतत्परः २ क्षणंतिष्ठक्षणंतिष्ठेत्येवंमातान्यषेधत ॥ सरुषापातयन्मूर्तिंत
द्धस्ताद्धस्तघाततः ३ तंचसाहस्तघातेनजघानदृढरोषतः ॥ सरुषापुनरागत्यददंशांगुलिमुल्बणं ४ मुचमुंचममप्राणागमिष्यंतीतिसाब्रवीत् ॥ दष्टमंगुलिमृत्सृ
ज्यपपालदूरतोर्भकः ५ अलवद्रुधिरंतस्याअंगुलेर्बहुलंभुवि ॥ यथाक्षीरमर्कवृक्षाद्दृढाघातेनपीडितात् ६ ततोयष्टिंसमादायताडितुंसासुतंययौ ॥ धावयित्वा
दधारैनंददर्शशिवरूपिणं ७ पंचवक्त्रंदशभुजंत्रिनेत्रंशेषशोभितम् ॥ त्रिशूलंडमरुंभस्मरुंडमालांचबिभ्रतं ८ वसानंचर्मणीहस्तिव्याघ्रयोःशशिशेखरं ॥
दृष्ट्वेत्थंलज्जितायष्टिंत्यजाधोमुखीशिवा ९ पुरोवामंदिरंवापिगंतुंसानाशकत्तदा ॥ तच्चिंतांपरिज्ञायबभूवार्भकरूपवान् १० क्रीडतेमुनिपुत्रेषुमुनिबालः
स्वरूपावान् ॥ अन्वयाद्गिरिजाबालंनापश्यत्तेषुतंसुतम् ११ पप्रच्छतान्मुनिसुतान्ममबालःकुतोगतः ॥ दष्ट्वांगुलींमदीयांतुपपालचपलोर्भकः १२ तऊचुर्मु
निपुत्रास्तामितोयातोर्भकस्तव ॥ ततोजगामगिरिजापुरतःपुरतोपिच १३ विशीर्णकबरीभाराश्रमघर्मसमन्विता ॥ इतस्ततोधावमानास्रस्तवस्त्रांचलाशिवा ॥

तस्याःश्रमंसविज्ञाययययौपूर्वस्वरूपवान् १४ तदंतिकंदधारैनंहस्ताभ्यांगिरिजाद्दढम् ॥ स्वीयांचलेनतंबध्वाययौहृष्टास्वमंदिरम् १५ उवाचरोषात्सम्यक्त्वं
ममहस्तेसमागतः ॥ अपस्मारातिचपलमारयिष्येधुनाभृशम् १६ शंभवेवानिवेदिष्येसत्वांवाताडयिष्यति ॥ श्रुत्वेत्थंवचनंमातुर्लुंठंधरणीतले १७ निः
सृतंबंधनंज्ञात्वापपालत्वरयापुनः॥ पुनर्धावंतिसापृष्ठेदुःखिताभृशविह्वला १८एतस्मिन्नंतरेदुष्टोदानवःकर्दमासुरः॥ द्विजरूपधरोमालांदधानोदक्षिणेकरे १९
कमंडलुंवारिपूर्णंभस्मोद्धूलितविग्रहः ॥ अरुणार्कनिभेवस्त्रेवसानोमायिकोभृशम् २० सऊचेवचनंबालंकिमर्थंत्वंपलायसे ॥ त्वद्भीतेर्वारणंसद्यःकरिष्येहंनस
शयः २१ नेष्येत्वांयत्रतेमातानजानीयात्कथंचन ॥ नचकालभयंतत्रनचान्यद्भयमण्वपि २२॥ ॥ कउवाच ॥ ॥ तमुवाचार्भकोभीतस्तथाकुरुयथामम ॥
नपश्येज्जननीतातःशरणंत्वामुपागतः २३ एवंवदतियावत्तुयथौबालस्वभावतः ॥ गिगीलतावदेवासौतंदुष्टःकर्दमासुरः२४ रंभाफलस्यपक्वस्यखंडंकोमल
मर्भकम् ॥ तत्पादपद्मचिह्नानिभूमौदृष्ट्वाययौशिवा २५ द्विजंददर्शपुरतोपृच्छंतंचततोर्भकम् ॥ स्वामिन्त्वयाममसुतइतोगच्छन्निरीक्षितः २६ इमानिप
दपद्मानिचिह्नयुक्तानिपश्यभोः ॥ इदानींधावमानःसकुत्रगुप्तोभवद्विज २७ ततस्तामब्रवीद्विप्रोदुःखितांतद्वियोगतः ॥ ॥ द्विजउवाच ॥ ॥ किंनःप्रयोजनं
मातस्तनयेनतवानघे २८ उदासीनतयामातस्तिष्ठतामीशचेतसाम् ॥ तथापिनैवदृष्टस्तेतनयःक्वापिशैलजे २९ तनयःकिंत्वयादेविमदधीनःकृतोभवत् ॥
॥ कउवाच ॥ ॥ एवंवदतितस्मिंस्तुदुःखितांवीक्ष्यशैलजाम् ३० आविरासीन्निर्विकारस्तन्मुखात्सगुणेश्वरः ॥ साप्राहतनयंदृष्ट्वाकथंमिथ्याब्रवीषिरे ३१
तवैवनिकटेपुत्रोदृष्टोयंगोपितस्त्वया ॥ संतःप्राणात्ययेप्राप्तेनभाषंतेनृतंक्वचित् ३२ ॥ ॥ कउवाच ॥ ॥ इतितस्यावचःश्रुत्वासदैत्योदीर्घदेहवान् ॥
व्योमस्पृङ्मस्तकोबालमादायनिर्ययौततः ३३ ततःसापृष्ठतोलग्नाक्रंदंतीतनयंशिवा ॥ गुणेशोपिततोदध्रेतस्माद्दीर्घतरंवपुः ३४ दृष्ट्वादुःखंजनन्यास्तुप्रशो
चंत्यामुहुर्मुहुः ॥ तद्देहंशतधाकृत्वाचुचूर्णांघ्रिविघाततः ३५ पतमानोपितद्देहश्चूर्णयामासशाखिनः ॥ जनन्याअग्रतस्तस्थौसंहृत्यैवंतुदानवम् ३६ गुणे
शोमुनयोदेवास्तत्पत्न्योथसमागताः ॥ ऊचुस्तांपार्वतींविघ्नाःकियंतोस्यभवंतिहि ३७ तएवनाशमायांतितवपुण्यात्सुरेश्वरि ॥ सर्वैस्तैःपूजितंबालंगृही
त्वास्वकटौशिवा ३८ गृहंजगामतैस्ताभिर्हर्षनिर्भरमानसा ॥ पुरामरगणान्निर्जित्वागरुत्मानमृतंयथा ३९ उत्ततारशिवाबालंस्वांगणेकट्टिदेशतः ॥
सतुमूर्छागतोलुंठन्धरण्यांचपुनःपुनः ४० वारंवारंददौजृंभांप्रसार्यमुखपंकजम् ॥ किंजातमधुनैवास्यधावयित्वाययौशिवा ४१ मुखमध्येददर्शास्यविश्वं
विश्वस्वरूपिणः ॥ सप्तद्वीपांवसुमतींपुरग्रामवनाकरान् ४२ ब्रह्माणंभास्करंशेषंविष्णुंपर्वतसागरान् ॥ गंधर्वान्यक्षरक्षांसिमुनिपक्षिगणानपि ॥ नदीवापी
तडागानिमनूनष्टौवसूनपि ४३ शशिसूर्यानलोडूनिसचेतनमचेतनम् ॥ पातालान्यपिसप्तानिस्वर्गानप्येकविंशतीन् ४४ एवंत्रिभुवनंदृष्ट्वामुमूर्छगिरिजात
दा ॥ निमील्यनयनेभ्रांतामुहूर्त्तंहृयमास्थिता ४५ शिवंसस्मारमनसासावधानाततोभवत् ॥ यथापूर्वस्थितंबालंपश्यतिस्मपुरास्थितम् ४६ ततस्तंपरितु

ष्टावतत्प्रसादप्रसन्नधीः ॥ पार्वत्युवाच ॥ परमात्मात्वमेवासिचराचरगुरुर्भवान् ४७ चिदानंदघनोनित्योनित्यानित्यस्वरूपवान् ॥ त्वत्कुक्षौपरिदृष्टानिभुव
नानिचतुर्दश ४८ देवायक्षाश्चरक्षांसिसरितोवृक्षसंचयाः ॥ सर्वंचराचरंदृष्टंमयावक्त्रेनशक्यते ४९ भ्रांताहंपतिताभूमौसावधानाशिवस्मृतेः ॥ जाताहंबाल
रूपेणापश्यंत्वांप्राकृतंशिशुं ५० ॥ कउवाच ॥ एवंस्तुवत्यांतस्यांतुमायामाविश्वकारसः ॥ लालयित्वाकटौगृह्यस्तनपानंददौशिवा ५१ गृहंप्रविष्टागिरिजा
गृहकार्यरताभवत् ॥ मुनयोमुनिपत्न्यश्चययुःस्वंस्वंनिवेशनम् ५२ इदमाख्यानकंश्रुत्वासर्वपापैःप्रमुच्यते ५३ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेविश्वरूपदर्श
नंनामद्विनवतितमोध्यायः ९२ ॥ कउवाच ॥ ततस्तुपंचमेवर्षेप्रवृत्तेमुनिबालकाः ॥ उषःकालेगुणेशस्यसमागम्यगृहंप्रति १ प्रातःकाले कथंशेषेप्रोत्तिष्ठोत्तिष्ठ
हेसखे ॥ उत्थापयनिजंबालमित्यूचुस्तेशिवामपि २ तानुवाचशिवावाक्यंनिद्रावोनसमागता ॥ क्रीडायामेवसक्तानांचपलानांदिवानिशं ३कथंयाहीत्यनुदि
तेनिर्लज्जामूढभावतः ॥ तऊचुः ॥ मातर्नतववाक्येनकोपोनोजायतेक्वचित् ४ वयंतेबालकाःकिंनत्वंवानोजननीनकिं ॥ अस्मिंस्तवशिशौसक्तंसर्वेषांमानसंस
दा ५ एनंपश्यामपुरतोदिवानक्तंनिरंतरम् ॥ विनैनंचसमाधानंननश्चेतसिजायते ६ श्रुत्वावाक्यानितेषांतुप्रोदृष्टित्तदाशिशुः ॥ लिलिंगबहिरागत्यगुणेशस्तैः
परस्परं ७ ययुर्बहिर्मुदायुक्ताधृत्वाहस्ताम्परस्परं ॥ द्विभागीभूयचक्रीडुर्नानायुद्धविचेष्टितैः ८ मस्तकंमस्तकेनैववक्षसावक्षएवच ॥ बाहुभ्यांचैवबाहूंश्चनिज
घ्नुस्तेपरस्परं९जलेनरजसाचैवकंदुकैर्मुष्टिभिस्तथा ॥ कर्दमैर्गोमयैःकेचिदांदोलनविकर्षणैः १० कोलाहलंप्रकुर्वंतःशृंगवंशरवानपि ॥ दैत्यभूताजयंप्रापुर्देवभूताः
पराजयं ११ एवंयुद्धयत्सुतेष्वेवंसङ्गनामामहासुरः ॥ जायायावुष्ट्ररूपेणविशालेननभस्पृशा १२पुच्छवातेनमहतापतितावृक्षसंचयाः ॥ शूलदंतोलुलज्जिह्वःपा
देनामर्दयन्नादिशः १३ समहांतंरवंकृत्वातमधावद्गणेश्वरं ॥ प्रतिशब्देनसहसानादयन्दिदिशोदिशः १४ तंदृष्ट्वाविद्रुताःसर्वेमुनिपुत्राभयातुराः ॥ धावधा
वेतितंबालंचुक्रुशुःकेचिदर्भकाः १५ तेषामाक्रंदितंश्रुत्वासहसागणेश्वरः ॥ कृत्वामहत्तरंरूपंउड्डीयतंजघानह १६ मुष्टिघातेनशिरसिवज्रेणेवमहाचलं ॥
सभिन्नहृदयोदुष्टोवमन्रक्तंमुखाद्बहु १७ कृत्वाघोरंमहाशब्दंपतितोधरणीतले ॥ विचाल्यचरणान्ग्रीवामाक्रंद्यचपुनःपुनः १८ स्वीयंदेहंसमास्थाय
तत्याजजीवितंक्षणाद् ॥ दशाष्टयोजनायामःपातयन्वृक्षसंचयान् १९ उदुद्धूलरजोभौमंगगनंप्रावृतंक्षणाद् ॥ तद्देहपातात्पतिताजंतवोथपतत्रिणः २० तं
तथापतितंदृष्ट्वासर्वेएवकुमारकाः ॥ साधुसाधुशिवापुत्रमहादैत्योनिपातितः २१ दृष्ट्वामहांतंतंदैत्यंवयंभीत्यापलायिताः ॥ कथंत्वयामहादैत्यःपौरुषेण
कनीयसा २२ हतोयंविस्मितःसर्वेपुनस्तंसमुपागताः ॥ इत्युक्त्वातेपुनःक्रीडांचक्रुःसर्वेयथापुरा २३ कर्षयंतोंघ्रिकमलेधृत्वाकेचित्परस्परं ॥ ततस्तस्यस
खाप्रायान्मृतप्रतिकृतीच्छया २४ छायारूपंसमास्थायमहाबलपराक्रमः ॥ पादाघातेनतस्याशुचकंपेशेषविग्रहः २५ व्योमस्पृङ्मस्तकोदृष्टोगुणेश
पृष्ठतोययौ ॥ छायांतदीयामाविश्यपातयामासतंतदा २६ इतरेषामदृश्योसौमायावीबलवत्तरः ॥ यथायथानृत्यतेसतथादैत्योपिनृत्यति २७ तंपतंतंगुणे

शंतेनिरीक्ष्यमुनिबालकाः ॥ ऊचुस्तंधाविताःकेचित्केचिच्चदुःखिताश्चशं२८कथंवापतसेनाथक्कसामर्थ्यैगतंतव ॥ वारंवारंस्खलसिकिंप्रियेषुचसखिष्वपि२९
ततोबालोददर्शाशुदशदिक्षुसमंततः ॥ सामर्थ्यादग्रतोयातुमियेषनाशकच्चसः ३० पुनश्चप्रणिधानेनसमंतादवलोकयन् ॥ छायाप्रविष्टंदैत्यंज्ञातवान्सगु
णेश्वरः ३१ गंडशैलंसमादायप्राक्षिपच्चोदरस्यह ॥ उपरिष्टान्ननर्त्तासौमृतश्चूर्णतांगतः ३२ अंतकालेमहद्रूपंसमास्थायनिजंखलः ॥ चूर्णयामासवृक्षा
न्सपर्वतान्प्राणिसंचयान् ३३ तन्मेदसाचरक्तेनधरणीचगुणेश्वरः ॥ रक्ततांसमनुप्राप्तौवसंतेकिंशुकाविव ३४ एवंतंविनिहत्याशुगुणेशोलीलयारमत् ॥ त
तएकोवृषस्कंधःसूकरास्योगजोदरः ३५ गंडशैलारजइवश्वासाद्यस्यचलंतिच ॥ चंचलास्योमहादैत्योबालरूपधरोविशत् ३६ तेषुनानाविधाःक्रीडादर्श
यामासलाघवात् ॥ महाबलोमहामायःपोथयामासकांश्चन ३७ चरणंकस्यचिद्धृत्वाचकर्षमुनिबालकम् ॥ उभौकरौविधृत्वैवकस्यचिन्मस्तकेहनत् ३८
यस्यनृत्येधरासर्वाकंपतेस्मसपर्वता ॥ तेघर्मैर्मृत्तिकांसर्वेचर्चयंतिस्वविग्रहे ३९ सोपिचर्चयतेस्वांगंचंदनेनेवभाग्यवान् ॥ ततस्तेकंदुकंकृत्वातेनक्रीडा
मथारभन् ४० कंदुकोव्योममार्गस्थोबालत्यक्तोस्पृशत्करम् ॥ कृत्वाश्वदच्चतंबालमारोहत्ससकंदुकः ४१ आरोहकोबलाद्भूमौनिक्षिपेत्तंचकंदुकम् ॥ अप
रोधारयेदूर्ध्वमागतंसोपिवापुनः ४२ यद्धस्तेकंदुकःसोथबालमारुह्यतंत्यजेत् ॥ भूमौनिपतितंबालमादायतेनताडयेत् ४३ तेषुमध्येपलायत्सुयस्यलग्नःस
कंदुकः ॥ तेनापिव्योममार्गस्थःकार्योयस्यकरंस्पृशेत् ४४ हस्तेनायातिचेत्सोपिव्योमगंतंतुकारयेत् ॥ येनहस्तेधृतःसोमुमारुह्यपूर्ववत्क्षिपेत् ४५ क
दाचित्कंदुकःक्षिप्तोगुणेशेनचव्योमनि ॥ चंचलेनधृतोहस्तेतमारुढस्तदासुरः ४६ भारेणाक्रम्यतंदेवमुवाचदुष्टदानवः ॥ महस्वभारंमेदुष्टवल्गसेर्भकसंचये
४७ त्यक्त्वात्यक्तंकंदुकंसगृण्हातिस्वकरेपुनः ॥ मुहूर्तद्वयमेवंहिचिक्रीडेदुष्टदानवः ४८ प्राहसन्मुनिबालास्तेगुणेशंतंतथागतम् ॥ ततोगुणेशोदैत्यंतमा
रुढोदृढविक्रमः ४९ चंचलश्चंचलोजातोनेतुंदूरेमुदान्वितः ॥ व्योममार्गेणसहसाबालाभूमिगतायुः ५० विमानवद्पक्षिवच्चसजगामत्वरान्वितः ॥ ततोनि
वृत्तास्तेबालाःशोचमानाययुर्गृहान् ५१ स्थितास्तत्रैवकेचिच्चप्रतीक्षंतोगुणेश्वरम् ॥ ततोगुणेशस्तंज्ञात्वामनसादुष्टदानवम् ५२ हिमवत्सदृशंभारंचका
रसहसाविभुः ॥ भारेणपतितोदैत्यःप्रावदत्तंगुणेश्वरम् ५३ उत्तरस्वमहाभारंगमिष्यंतिममासवः ॥ दयांकुरुष्वदीनेत्वंप्रपन्नेशरणंतव ५४ एवंवदन्मुमूर्छा
सौततोबालोदधारतम् ॥ भ्रामयामासबहुशोगरुडोभुजगंयथा ५५ तत्याजदूरदेशेतंचंचलंदुष्टदानवम् ॥ ५६ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडे
चंचलवधोनामत्रिनवतितमोध्यायः ॥ ॥ ९३ ॥ ॥ कउवाच ॥ ॥ ततोमुनिसुतायाताःप्रतीक्षंतःस्थिताश्चये ॥ तेषांजयरवैर्व्योमगर्जितंचदिगंतर
म् १ चिक्रीडुस्तेपुनस्तत्रनानानृत्यैश्चगायनैः ॥ एवंरमत्सुबालेषुसार्द्धयामेदिवाकरे २ पितरौतानदृष्ट्वैवग्राममध्येक्वचिद्गृहे ॥ प्रत्येकंयष्टिमादाययुः
सर्वेशिशून्प्रति ३ रमंतोविविधाःक्रीडामध्येकृत्वागुणेश्वरम् ॥ नृत्यंतंनर्तयंतंचतंचतेनिरमर्त्सयन् ४ ॥ पितरऊचुः ॥ त्वयाविनानोबालाश्चनाचरन्स्नानभोजने ॥

आचाराध्ययनेचापिब्राह्मण्यंविनयंतथा ५ ततःपरस्परंप्राहुर्गतक्रोधानिरीक्ष्यतम् ॥ एतस्यताडनेबुद्धिर्गतैनंवीक्ष्यनःकुतः ६ कथयामोयदिशवौतावस्थंकिं
करिष्यतः ॥ अनेकेनिहतादैत्याबालेनैवमहाबलाः ७ वयंदेशांतरंयामोभीत्यातवगुणेश्वर॥ कउवाच ॥ एवंवदत्सुलोकेषुपिदधेसगुणेश्वरः ॥ आविरासीद्दूरदे
शेततोबालान्ध्यलोकयन् ८ धावयित्वापितुंस्त्यक्त्वागुणेशंतेययुःपुनः ॥ क्रीडंतस्तेययुःशीघ्रंगौतमाश्रममुत्तमम् ९ ध्यानस्थंतंमुनिंवीक्ष्यपचंतींतास्त्रियंचते ॥
गुणेशोगान्मध्यदेशंजग्राहौदनपात्रकम् १० ददौतेभ्योविभज्यान्नंप्रार्थयामाससादरम् ११ मत्संगेनचिरंकालंयूयंसर्वेबुभुक्षिताः ॥ सावकाशंप्रभुंजध्वंततः
क्रीडामहेपुनः १२ अहल्यातंचुकोपाशुममान्नंस्पृष्टवान्कथम् ॥ नक्तंवैश्वदेवोवानैवेद्यश्चपलार्भकाः १३ विसृज्यध्यानंकिंकुर्याद्गौतमोमुनिसत्तमः ॥ उ
त्थापयामासतदाध्यानस्थंमुनिसत्तमम् १४ सउत्थायददर्शाथगौतमःसकलार्भकान् ॥ जक्षतोन्नंक्षुधायुक्तान्बभाषेचगुणेश्वरम् १५ ॥ गौतमउवाच ॥ म
हतोःपुत्रतांप्राप्यकथमन्यायकृद्भवान् ॥ अत्यद्भुतानिकर्माणिश्रुत्वातेत्वांवयंपुरा १६ परात्परतरंदेवंपरब्रह्मस्वरूपिणम् ॥ मन्यामहेबालभावंकुरुषेत्वंगुणेश्व
र १७ ॥ कउवाच ॥ धृत्वाकरंसचमुनिःपार्वत्यागृहमागमत् ॥ करेधृत्वान्नसहितंतत्पात्रंनिजमंदिरात् १८ उवाचमातस्तेबालोनित्यमन्यायकृन्मम ॥
अद्यत्वांकथितुंयातःकिंकार्यंगौर्यतःपरम् १९ इतोवागमनंदूरेमन्यसेयदितद्वद ॥ कउवाच ॥ ततोरुषासमायुक्ताश्रुत्वावाक्यंमुनीरितम् २० ताडयामासय
ष्ट्यातंवमंतीनेत्रतोनलम् ॥ उवाचचमुनिंगौरीप्रणताक्रोधसंयुता २१ ममापिचमुनेत्रासोजायतेजन्मतोस्यह ॥ द्रष्टव्याराक्षसकृताःकियंतोविघ्नसंचयाः २२
स्त्रियःप्रवक्तुंकुत्रापिनायांतिमुनिपुंगवाः ॥ अयंतुसर्वतोदुष्टोमुनिपुत्रविभेदकः २३ ममात्मजइतिजनोनैनंशापंप्रयच्छति ॥ बध्नैनंहस्तपादेषुतत्समक्षांशी
वासुतम् २४ गृहमध्येतुसंस्थाप्यतद्गृहंपिदधेदृढम् ॥ मैवंमैवंवदन्यातोगौतमःस्वाश्रमंप्रति २५ ततस्तेबालकाःसर्वेशोचंतस्तंगुणेश्वरम् ॥ कथंनोदर्शनं
चास्यभविष्यतिकदानुवा २६ द्वारंदत्वादृढंमध्येस्थापितोगिरिकन्यया ॥ एवंतेषुवदत्स्वेवतन्मध्येसययौक्षणाद् २७ जनन्याःकटिदेशेपिदृश्यतेतद्गृहोपिच ॥
ऊचुस्तांगौरिपुत्रस्तेनिःसृतोगृहमध्यतः २८ पश्यतिस्मगेहमध्येबद्धमेवगुणेश्वरम् ॥ बहिस्तान्मुनिपुत्रान्सातत्स्वरूपानपश्यत २९ यंकांचित्स्तनपानायजु
हावविह्वलाशिवा ॥ निषिद्धासासुतैस्तैस्तुगृहमध्येशिवेस्थितः ३० उद्घाट्यद्वारंसाबालंमुक्त्वास्तन्यंददौमुदा ॥ गौतमःस्वाश्रमंयातोदेवतार्चनमा
रभत् ३१ गुणेशरूपान्सोपश्यन्नृप्तान्देवांस्तथाखिलान् ॥ पुरःप्रकीर्णमन्नंचततोविस्मितमानसः ३२ चिंतयामासमनसिदुर्बुद्धिस्तुकृतामया ॥
उमायैकथितंसर्वमन्नपात्रंप्रदर्शितम् ३३ तयासताडितोबद्धोऽभक्तोभक्तस्यकारणम् ॥ परात्परतरोदेवोयस्मिंस्त्वंप्रेमहाफलम् ३४ आगत्यबुभुजे
बालैःसार्द्धंतुमुनिसंभवैः ॥ मोहितोमायया चास्यऽपूर्वमज्ञासिषंनतम् ३५ ॥ कउवाच ॥ अहल्यापिपुनःपाकंचकाराद्भुतमानसा ॥ सोपिध्यानस्थितोभू
त्वानित्यकर्मसमापयत् ३६ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेचतुर्नवतितमोध्यायः ॥ ९४ ॥ ॥ कउवाच ॥ ॥ षष्ठेवर्षेप्रवृत्तेतुकाचिद्यातो

बर्हिःशिशुः ॥ उमायाबालकैःसार्द्धंचिक्रीडानेकधापुनः १ तंदिदृक्षुर्विश्वकर्मायययावंतगृहंप्रति॥ पार्वतीबहिरागत्यमानयामासतंबहु २ चित्रासनेसमावेश्यपूज
यामाससादरं ॥ प्रक्षाल्यचरणौप्रादाद्गंधंतांबूलमेवच ३ ततस्तदादरंदृष्ट्वाविश्वकर्मातुतोषह ॥ तुष्टावपरयाभक्त्याप्रणिपत्यशिवांमुदा ४ विश्वकर्मोवाच ॥
नमामिविश्वेश्वरिविश्वरूपेब्रह्मेंद्ररुद्रार्यमविष्णुरूपे ॥ त्वयाततंविश्वमनंतशक्तेब्रह्मादिदेवैरभिनंद्यरूपे ५ त्वमेवविश्वंरजसाविधत्सेसत्त्वेनमातःपरिपासितच्च ॥
त्वमेवसर्वंतमसाथहंसित्रैगुण्यमेतत्तवनित्यरूपं ६ त्वयाहतादैत्यगणाविमुक्तिंब्रह्मर्षयोज्ञानबलात्प्रपन्नाः ॥ त्वमेवविष्णोरतुलासिशक्तिःसर्वस्यहेतुःपरमासि
माया ७ सतोसतोयापिपरासिशक्तिश्चराचरंत्वंविदधासिविश्वं ॥ संमोत्यलोकान्सकलान्सुरेशान्काष्ठाकलाभिश्चददासिभोगं ७ येत्वांप्रपन्नानभयंतुतेषांमृत्यो
स्तथादैत्यकृतंकदाचित् ९ त्वमेवलक्ष्मीःसुकृतामलक्ष्मीर्दुष्टात्मनांत्वंप्रमदास्वरूपा ॥ विद्यास्वरूपासिजगत्त्रयेत्वंप्रभास्वरूपाशशिसूर्ययोस्त्वं १० यजा
श्रितास्तेजगदाश्रयास्तोविपत्तिलेशोनचतेषुमातः ॥ त्वमेवविश्वेश्वरिविश्वमेतद्धरस्यथाप्यायसिवारिरूपा ११ अनादिमध्यानिधनाप्यगम्याहरीशलोके
शसुरेश्वराणां ॥ तेनुग्रहात्त्वाप्रभजंतिभक्ताआनंदरूपानिवसंतिनाके १२ अभक्तिकामान्विनिहंसिरुष्टात्वामेवमातःशरणंप्रपन्नः ॥ धन्येममैतेनयनेथविद्या
जनुश्चमातापितृवंशएव १३ कुलंचधन्यंचरणौत्वदीयौदृष्टौयतस्तेजगदंबिकेमया ॥ ॥ कउवाच ॥ ॥ एवंस्तुताजगन्मातावरमस्मैन्यवेदयत् १४
सवव्रेपरमांभक्तिंसातथेतितमब्रवीत् ॥ इदंस्तोत्रंपठेद्यस्तुसर्वान्कामाँल्लभेच्चसः १५ सर्वत्रविजयंपुष्टिंविद्यामायुःसुखंशिवं ॥ ॥ शिवोवाच ॥ ॥ विश्व
कर्मन्महाबुद्धेज्ञानवानसिसर्वतः १६ यच्छ्रुतंशिववाक्येनदृष्टंतत्सकलंत्वयि ॥ सिंधुनापीडितादेवाःसर्वेकारागृहेस्थिताः १७ शिवश्चात्रसमायातःकैला
सेतुहृतेसति ॥ दंडकारण्यदेशेत्रकोप्यासोनाहिदृश्यते १८ त्वंतुसम्यक्समायातोबहुकालेनदर्शनम् ॥ ॥ विश्वकर्मोवाच ॥ ॥ किमाश्चर्यंजगन्मातर्बालो
मातरमाव्रजेत् १९ द्रष्टुंदेवंमहाभक्तोविद्याकामोगुरुंशिवे ॥ पुत्रस्यतेश्रुतोमातर्महिमापरमाद्भुतः २० तमहंद्रष्टमायातोयुवयोर्दर्शनोत्सुकः ॥ ॥ क
उवाच ॥ ॥ एवंतयोस्तुवदतोरागतोसौविनायकः २१ असंख्यशशिसंकाशोरजसारुणविग्रहः ॥ प्रसन्नवदनोबालसमूहपरिवारितः २२ तन्मध्ये
शोभतेस्मासौमरुन्मध्येयथाहरिः ॥ तंदृष्ट्वाप्रणिपत्यासौकृतांजलिपुटःस्थितः २३ तुष्टावपरमात्मानंज्ञात्वातंगिरिजासुतम् ॥ ॥ विश्वकर्मोवाच ॥ ॥ न
मामिपरमात्मानंसच्चिदानदविग्रहम् २४ चराचरगुरुंसर्वकारणानांचकारणम् ॥ गुणेशंचगुणातीतंसृष्टिस्थित्यंतकारिणम् २५ सर्वव्यापिनमीशानंव्यक्ता
व्यक्तस्वरूपिणम् ॥ जगम्यंसर्वदेवानांमुनिहृत्पद्मवासिनम् २३ सिद्धिबुद्धिपतिंनानाभक्तसिद्धिप्रदंविभुम् ॥ अभक्तकामदहनंसहस्रविसन्निभम्
२७ अनेकशक्तिसंयुक्तंदैत्यदानवमर्दनम् ॥ अनादिमव्ययंशांतंजरामरणवर्जितम् २८ त्रितनुंचत्रयीमूलंब्रह्मविष्णुशिवात्मकम् ॥ ॥ कउवाच ॥
एवंस्तुतिंसमाकर्ण्यमंतुष्टःसगुणेश्वरः २९ स्वासनेतमुपाविश्यपूजयामाससादरम् ॥ प्रक्षाल्यचरणौगंधमक्षतान्पुष्पमेवच ३० धूपंदीपंचनैवेद्यनि

वेद्यतमथाब्रवीत् ॥ ॥ गुणेशवाच ॥ ॥ विश्वकर्मन्नागतोसिममदर्शनकांक्षया ३१ किमानीतंममप्रदेह्युपायनमनुत्तमम् ॥ ॥ विश्वकर्मोवाच ॥
निजस्वानंदपूर्णानांपरवांछाविधायिनाम् ३२ निस्पृहाणांसर्वकृतांसर्वशक्तिमतामपि ॥ समलोष्टाश्महेम्नांचकल्पवृक्षाधरीकृताम् ॥ कर्तुमकर्तुं
शक्तानामन्यथाकर्तुमेवच ३३ स्वाधीनानांचतुष्टानांस्वसत्तावर्तिनामपि ॥ पराधीनैरशक्तैश्चार्किंचनैर्मर्त्यधर्माभिः ३४ किंदेयंपरितोषायस्वशक्त्यार्किंचि
दाहृतम् ॥ कउवाच ॥ एवमुक्त्वाविश्वकर्मास्थापयत्पुरतःस्थाणिम् ३५ पद्मंचपरशुंपाशंसहस्रादित्यसन्निभम् ॥ सर्वशत्रुहरंतीक्ष्णंदधारसगुणेश्वरः ३६ उ
वाचविश्वकर्माणंकुतएतानिविश्वकृत् ॥ आनीतानिममप्रीत्यैतद्वदस्वाधुनाऽनघ ३७ ॥ विश्वकर्मोवाच ॥ संज्ञानामेतिनाम्नामेकन्याचारुस्वरूपिणी ३८
लज्जितोयन्मुखंवीक्ष्यसहसाशशलांछनः ॥ रमाशचीचसावित्रीशारदारुंधतीरतिः ३९ त्रिलोक्यांनसमाकापिपरायस्यागुणेश्वर ॥ सामयावयेदत्तात्रिवे
दायत्रिरूपिणे ४० आगतेषुत्रिलोकेषुसांगोपांगेषुसर्वशः ॥ महोत्सवोमहानासीद्दिनाष्टकमहर्निशम् ४१ यांदृष्ट्वास्खलितादेवालज्जयाधोमुखागताः ॥ सावि
तातामथादाययौस्वस्थानमुत्तमम् ४२ तेजसातस्यतस्यामेकन्यकाकृशतामगात् ॥ साततोनिर्ममेछायांसंज्ञातुस्वप्रभावतः ४३ सर्वतस्यैनिवेद्यैवसद्यो
ममगृहंगता ॥ गतेकियतिकालेसाछायाज्ञातातुभानुना ४४ नेयंसंज्ञेतिसप्रायाद्गृहंसद्योममार्यमा ॥ ततोभीतापुनःसंज्ञामामुवाचनमांपितः ४५ नि
वेदयस्वेहस्तेतेजोहंनक्षमेस्यच ॥ ततःपित्राधिकृतासाबहिरेवययौकिल ४६ अश्विनीरूपमास्थायगुप्तरूपावनेवसत् ॥ ततस्तुविश्वकर्मातामनवेक्ष्यकाचि
द्गृहे ४७ प्रोवाचार्यमणंसोथतेजस्तेसोढुमक्षमा ॥ क्वगतानचजानेतामुपायंतेब्रवीमिच ४८ यदितेतेजसोभागोन्यूनःकिंचिद्भविष्यति ॥ तदासाप्रकटीभू
याद्विहरस्वततस्तया ४९ ॥ रविरुवाच ॥ ॥ यथातवभवेच्चेतस्तथाकर्तुत्वमर्हसि ॥ कउवाच ॥ विश्वकर्मातंतश्चैनंयंत्रेस्थाप्योल्लिलेखह ५० तेजोन्हा
संचकाराशुकिंचित्सौम्योभवच्चसः ॥ यत्रगुप्ताभवत्संज्ञातत्रयातोर्यमाविभुः ५१ अश्वोभूत्वातयारेमेसानासत्यावभूतच ॥ तामादायार्यमालोकंनिजंहर्षयुतोग
मत् ५२ ॥ विश्वकर्मोवाच ॥ ॥ तेजःशेषेणतस्याथप्रबलेनगुणेश्वर ॥ निर्मिंतान्यायुधान्याशुत्वदर्थेजगदीश्वर ५३ अतितीक्ष्णानिकालस्यसदाजयकरा
ण्यपि ॥ चत्वारितेप्रदत्तानिदत्तेचक्रगदेहरेः ५४ त्रिशूलःशंभवेदत्तःसर्वशत्रुनिबर्हणः ॥ ॥ गुणेशउवाच ॥ ॥ सम्यक्कृतंविश्वकर्मन्नायुधानिशुभानिमे ५५
दत्तानिदैत्यनाशायपरोपकृतयेसताम् ॥ ॥ कउवाच ॥ ॥ एवमुक्त्वायुधान्याशुदधारचदुधावच ५६ तदाचकंपेपृथिवीपर्वताश्चवनानिच ॥ शुशुभेसोपि
तैःशस्त्रैःकोटिसूर्यनिभैर्विभुः ५७ विश्वकर्मानमस्कृत्यययौस्वस्थानमाज्ञया ॥ उमात्मजोपिचिक्रीडमुनिबालैर्वृतःपुनः ५८ तत्रायय्यौवृकोनाममहान्दुष्टत
मोसुरः ॥ भयंकराननोमत्तोग्रसन्निवमहाबली ५९ पुच्छाघातेनचभुवंकंपयन्हलदंतवान् ॥ दृष्ट्वाभयंकरंदैत्यंमुनिपुत्राःपलायिताः६०सजायुधानिगृह्याशुतं
वृकंसमताडयत् ॥ अंकुशाघातमात्रेणपतितोभुविसोसुरः ६१ वमन्रक्तंनिजंरूपमास्थितश्चूर्णयन्द्रुमान् ॥ संहरन्नजीवसंघातान्दशयोजनविस्तृतः ६२ सततो

स्तमितेसूर्येययौबालयुतोगृहम् ॥ बालाःप्राहुरुमायैतेनैनाद्यनिहतोसुरः ६३ वृकोनामांकुशाघाताद्दशयोजनमायतः ॥ तानुवाचाद्रिजारोषाद्भजंतुनिजमंदिरम् ६४ ततस्तद्वाक्यमाकर्ण्यतेबालाःस्वालयान्ययुः ६५ इतिश्रीगणेशपुराणेउत्तरखंडेवृकासुरवधोनामपंचनवतितमोऽध्यायः ॥ ९५ ॥ कउवाच ॥ ततः कदाचिद्गिरिजाप्रसन्नंप्राहशंकरम् ॥ शिवोवाच ॥ देवेशसप्तमंवर्षंप्रवृत्तंसांप्रतंशिशोः १ क्रियतांव्रतबंधोस्यसुमुहूर्तेमहोत्सवात् ॥ शिवउवाच ॥ सम्यगुक्तंत्वयाभद्रेज्ञात्वाचेतोगतंमम २ संपादयिष्येसाध्वस्यव्रतबंधंयथाविधि ॥ कउवाच ॥ इत्युक्त्वागिरिजांदेवःस्मराकार्यचगौतम ३ विचार्यसुदिनेलग्नंसामग्रीसमपादयत् ॥ मंडपंचसुविस्तीर्णंसर्वान्ऋषिगणान्मुनीन्४आकार्यपरिपूज्यैतांस्तदाज्ञावशगोहरः ॥ यथाविधिचकारास्यव्रतबंधंमुदातदा ५ उपायनानिसर्वेतेशिवयोर्बालकस्यच ॥ अष्टाशीतिसहस्रेभ्योनमस्कृत्यहरोपिच ६ संपूज्यविधिवत्प्रादान्नानोपायनसंचयान् ॥ त्रिंशत्त्रिकोटिदेवेभ्योयक्षेभ्योपितथैवच ॥ किन्नरेभ्यश्चारणेभ्योवाद्यघोषेनदत्यपि ७गायत्सुकिन्नरेष्वाशुनर्तकीनांगणेषुच ॥ वृत्यत्सुसर्वलोकेषुपश्यत्सुसुमहोत्सवम् ८ उपायनानिदानानिददौहर्षात्सदाशिवः ॥ देवतास्थापनंकृत्वाभोजयामासचाखिलान् ९ प्रातःकालेवटुंस्नाप्यचौलकर्मसमाप्यच ॥ चतुर्भिर्ब्राह्मणैःसार्धंतंभोज्यंसंस्नाप्यवैपुनः १० वेदिकायामंतरातुधृत्वापटमनुत्तमम् ॥ मुहूर्तंसाधयामासमुनिभिर्मंत्रवादिभिः ११ एतस्मिन्नंतरेदैत्यौकृतांतकालसंज्ञकौ ॥ गजरूपधरौमत्तौमदोदस्त्राविणौदृढौ १२ तीक्ष्णदंतौदीर्घशुंडौगगनस्पर्धिपुष्करौ ॥ चीत्कारभीषितजनौसिंदूरारुणमस्तकौ १३ कंपतेपादघातेनययोराशुवसुंधरा ॥ दंताघातेनयुध्यंतौरजसाछाद्यरोदसी १४ समाद्वारगतंशक्रकरिणंसमुपागतौ ॥ दंतप्रहारैस्तद्गंडंभिंदंतौबलवत्तरम् १५ स्रवद्रक्तःपपातोर्व्यांमूर्छितोगजराट्क्षणात् ॥ ऐरावतःपपालशुमुहूर्तात्प्राप्यचेतनाम् १६ करिणौपृष्ठलग्नौतौदंताघातैर्निजघ्नतुः ॥ ततस्तौमत्तमातंगौसभामध्यंसमीयतुः १७ शुंडाभ्यांमंडपंतौतुताडयामासतुस्तदा ॥ उत्तस्थुःसर्वलोकास्तेश्रुत्वाकोलाहलंतयोः १८ यतोयतोगच्छतःस्मततोदेवाःपलायिताः ॥ मुनयश्चतयोर्भीत्यादशदिक्षुपलायिताः १९ ॥ गणाऊचुः ॥ शिवंतत्रसमाचख्युर्विघ्नमेतदुपस्थितम् ॥ सेंद्रासप्तमुनियुताविध्वस्तागजभीतितः २० ततःपलायितागौरीसखीभिर्गृहमागता ॥ बालस्ततोनिरीक्ष्यैतौदंतिनौबलवत्तरौ २१ जगर्जघनवच्छीघ्रंतयोःशुंडेदधारह ॥ उभाभ्यामपिहस्ताभ्यांचीत्कारंतौप्रचक्रतुः २२ भ्रामयित्वास्फालयत्सएकस्मिन्नपरंगजम् ॥ उभौतौशतधाजातौपतितौधरणीतले २३ धराचकंपेवृक्षाश्चनिपेतुश्चूर्णिताभुवि ॥ ततःखंडानितान्याशुदूरतश्चिक्षिपुर्गणाः २४ बटुंजग्राहजननीशीघ्रमागत्यस्वेकटौ ॥ सर्वेपलायितादेवामुनयोनेनदानवौ २५ बालेननिहतौशीघ्रमित्युवाचशिवांसखी ॥ ततस्तेमीलितादेवाइंद्राद्यामुनयोपिच २६ ऊचुर्गणेशंतेसर्वेस्वामिन्सर्वगुणाकर ॥ सर्वप्राणहरौदैत्यौकापट्याद्गजरूपिणौ २७ निहतौलीलयादेवमायिनौबलवत्तरौ ॥ इत्युक्त्वाशक्रमुनयोदेवाश्चविविशुःसभाम् २८ उपविष्टेषुसर्वेषुननृतुश्चाप्सरोगणाः ॥ ततोवाद्यान्यवाद्यंतब्रह्मारुद्रसमीपगः २९ दत्वापरस्परंप्रेषंबबंधमेखलांशिशोः ॥ यज्ञोपवीतमजिनंहोमंचसमिधामपि ३० कारयामास

विधिवत्सावित्रीवाचनंततः ॥ ततोमातादंदौभिक्षामंशुकेभूषणानिच ३१ उत्तरीयंचरत्नानिमुक्ताफलयुतानिच ॥ लड्डूकान्भक्ष्यखाद्यानित्रिशूलंशशिनंशिवः
३२ ददौनामचकारास्यभालचंद्रइतिस्फुटम् ॥ शूलपाणिरितिपरंततश्चक्रंहरिर्ददौ ३३ शोचिष्केशेतिनामास्यचक्रेसम्यङमहात्मनः ॥ ततःपुरंदरःपूज्यकंठेचिं
तामणिंददौ३४नामचिंतामणिरितिचक्रेसर्वार्थदंशुभम् ॥ ददौतदैवकमलमभ्यर्च्यकमलासनः३५विधातेतिचनामास्यस्थापयामाससंसदि ॥ ततःसर्वेसुरगणाः
समभ्यर्च्यगुणेश्वरम् ३६ नानाविधानिनामानिचक्रुःस्वस्वेच्छयासुराः ॥ अदितिःकश्यपश्चाथतंपुपूजतुरादरात् ३७ दर्शयामासदेवोपिपूर्वरूपंतयोश्शुभम् ॥
भालचंद्रंदशभुजंमुकुटेनविराजितं ३८ दिव्यांबरंदिव्यगंधंदिव्याभरणभूषितम् ॥ सिंहारूढंविराजंतमुरगोदरबंधनं ३९ दृष्ट्वेत्थमदितिर्हृष्टालिलिंगस्नेहनिर्भ
रा ॥ रोमांचितशरीरासाप्रेमगद्गदनिःस्वना ४० विस्मयंपरमंप्राप्तास्रवदश्रुजलाविला ॥ परमानंदमग्नाभूत्स्नेहस्रुतपयोधरा ४१ तथैवकश्यपोदेहभावं
तत्याजतत्क्षणाद् ॥ ऊचतुस्तौसुतस्नेहाद्वत्सावांतेवियोगतः ४२ कृशतांगमितौतेद्यदर्शनात्पुष्टतांगतौ ॥ नावांत्यजसुतेदानींदीनौत्वच्चरणेरतौ ४३ ॥ गजा
ननउवाच ॥ प्रतिश्रुतंमयामातर्दास्येदर्शनमे कदा ॥ तदिदानींमयादत्तंनशोकंकर्तुमर्हसि ४४ सर्वांतर्यामिणोमेवैवियोगोनकदाचन ॥ कउवाच ॥ एवंतुवदतोरे
वपार्वतीसमुपागता ४५ उवाचपरमप्रीताद्दृष्ट्वास्नेहंतयोःशिशौ ॥ अदितेदेहिमेपुत्रंगृहीतांचिरकालतः ४६ नायंतवसुतःसुभ्रुसम्यक्पश्यशुचिस्मिते ॥ साऽपश्य
त्पुनरेवैनंस्वस्यैवतनयंविभुम् ४७ ॥ अदितिरुवाच ॥ ॥ त्वमेवगौरिपश्याशुतनयंमेपुरःस्थितम् ॥ सापश्यत्पुनरेवैनंगुणेशंतनयंस्वकम् ४८ अदिति
स्तांममेत्याहपार्वतीतांममेतिच ॥ एवंविवदमानेतुप्राहुर्देवाःसुविस्मिताः ४९ अनादिनिधनोदेवःसृष्टिस्थित्यंतकारकः ॥ अनंतरूपोनंतश्रीरनेकशक्तिसंयु
तः ५० कस्याअयंभवेत्पुत्रउभेभ्रांतेस्यमायया ॥ ॥ तेऊचतुः ॥ ॥ यस्याजयंभवेत्पुत्रस्तस्याहस्तेप्रदीयताम् ५१ ॥ कउवाच ॥ ततोदेवानि
रीक्ष्यैनंनानारूपिणमीश्वरम् ॥ कश्चिदाहविधातायंकश्चिद्विष्णुंचतुर्भुजम् ५२ कश्चित्त्रिलोचनंप्राहवरुणंविस्मिताःसुराः ॥ ऊचुस्तेनिश्चयोस्माभिर्विधातुं
नैवशक्यते ५३ भवतीभ्यांविवेकेनग्राह्योयंपरमःपुमान् ॥ ततोगौरीगृहाणाशुतंविभुंतनयंस्वकम् ५४ स्तनपानंददौस्नेहाददितिर्नीरसाभवत् ॥ ममचेद्वा
लकोयंस्यात्कथंयायात्परंप्रति ५५ अहंभ्रांत्याऽभवंसक्तापरस्यतनयेवृथा ॥ मुनयःकश्यपश्चैनंपुपूजुस्तेगुणेश्वरम् ५६ नमस्कृत्याभ्यनुज्ञाप्ययययुःस्वंस्वंनि
वेशनम् ॥ भवानीचगृहंयातापुत्रमादायहर्षिता ५७ ततःसभागताःसर्वेप्रागमन्निलयान्स्वकान् ५८ इतिश्रीगणेशपुराणेउत्तरखंडेगौर्यदितिविवादोनामष
ण्णवतितमोध्यायः ॥ ९६ ॥ ॥ मुनिरुवाच ॥ ॥ त्वयाविनायकोदेवोमयूरेश्वरसंज्ञितः ॥ ततोगुणेशनाम्नामेमहिमायंनिरूपितः १ सकथंप्रापत
न्नामकिंचतेनकृतंमहत् ॥ कर्मतन्मेसमाचक्ष्वसांप्रतंविश्वसृग्विभो २ ॥ ॥ कउवाच ॥ ॥ यथातेनकृतंकर्ममयूरेश्वरनामच ॥ प्रापद्विनायकोदेवो
निरूपिष्येखिलंतव ३ पातालभवनेशेषःसभामध्यगतोभवत् ॥ वासुकिप्रमुखैःसर्वैःसमंतात्परिवारितः ४ ततःकद्रूःसमायाततेजोरूपासुरूपिणी ॥ मुक्ता

मणियुतंचारुबिभ्रतीकंचुकंशुभम् ५ बिंबोष्ठीचंद्रवदनादिव्यभूषांबरावृता ॥ तांदृष्ट्वाजननींशेषोवासुकिप्रमुखाश्चये ६ नेमुर्मातर्बहुदिनैरभवद्दर्शनंतव ॥
कांक्षंतेदर्शनंसर्वेत्वंतुनिष्ठुरतांगता ७ इत्यूचुस्तांकरेधृत्वास्थापयन्पैत्र्यआसने ॥ पुपूजुःपरयाभक्त्यातताःशेषोब्रवीत्तुताम् ८ ॥ शेषउवाच ॥ ॥ त्वं
मातःकश्यपस्यापिपत्नीचारुतरासती ॥ सर्वविद्यानिधानस्यसृष्टिस्थित्यंतकारिणः ९ ब्रह्मादयोदेवगणास्तत्त्वंयस्यनवैविदुः ॥ त्वंचापिसहसाशापानुग्रहे
चक्षमाह्यसि १० तवपुत्रावयंमातस्त्रैलोक्यग्राससाहसाः ॥ साकथंत्वमिहायाताकिमुद्दिश्यप्रयोजनम् ११ ॥ कद्रूरुवाच ॥ ॥ विनाप्रयोजनंपुत्रको
पिनायातिकिंचन ॥ तच्चतेकथयिष्येहंशृणुसादरमात्मज १२ विनतामेसपत्नीयाजननीपुत्रपक्षिणाम् ॥ तस्यादर्शनकांक्षामेकदाचित्संबभूवह १३ अना
दृतायाहंतुतद्गृहंसहसागता ॥ नासनंनचसत्कारंस्वागतंनचसाऽकरोत् १४ पूर्ववैरंस्मरंतीसाजटायुंपुत्रमादिशत् ॥ तेनचाकर्षितावेणीविवस्त्राहंकृता
क्षणात् ॥ मामुवाचमहादुष्टेनावलोक्यंमुखंतव १५ ममंमातुस्तुदासीत्वंपूर्वमासीःकृतंत्वया ॥ तदानकरुणालेशोधृतोमनसिकर्हिचित् १६ इ
तोगच्छनचेत्प्राणान्गृहीष्यामिमहाखले ॥ श्रुत्वातदीयवाक्यानिदुःखिताहंफणीश्वर १७ आक्रंदंपरमंप्राप्ताप्राणत्यागेतुनिश्चिता ॥ आगताऽहंत
तोयुष्मद्दर्शनार्थंसुदुःखिता १८ यदिवोमयिभक्तिःस्यात्साहाय्यंक्रियतांमम ॥ सत्पुत्रायदिमान्याहंतदातस्याविनाशनम् १९ कर्तव्यंचसपत्न्यामेत
तोत्पदिसुखंभवेत् ॥ ॥ कद्रूवाच ॥ ॥ एवमाकर्ण्यतद्वाक्यंशेषोरोषसमन्वितः २० जज्वालसहसावह्निर्वृतेनेवप्रदीपितः ॥ ममंमातुःकृतापीडा
विनतातनयैर्यदि २१ तदाहंतत्प्रतीकारंकरिष्यामिनसंशयः ॥ एवमुक्त्वासशेषोथवासुकिप्रमुखैर्युतः २२ तत्रगंतुंमनश्चक्रेयत्रसाविनताभवत् ॥
वासुकिरुवाच ॥ ॥ अहमेवगमिष्यामिकोटिनागैर्युतोनघ २३ विनतामानयिष्यामितिष्ठत्वंभुजगाधिप ॥ कद्रूवाच ॥ एवमुक्त्वाययौशीघ्रंवासुकिर्विनता
श्रमं २४ असंख्यानुरगान्दृष्ट्वाबिभायविनतातदा ॥ तदैववेष्टितासर्पैःक्रूरैर्दुष्टस्वभावकैः २५ निर्गुस्तेशेषनिकटंसाचतानब्रवीत्तदा ॥ ॥ विनतोवाच ॥ ॥
किमर्थंबंधनंकृत्वाममनेतुंसमुद्यताः २६ अपराधविहीनायाःपापिष्ठागदताशुमे ॥ ममपुत्रस्यानुभवोज्ञातोस्तिसर्वपन्नगैः २७ अतोमुंचंतुमांनोचेत्समंहारंक
रिष्यति ॥ ॥ कद्रूवाच ॥ ॥ धाष्टर्यंतेषांसमीक्ष्यैवसस्मारगरुडंतुसा २८ सोपिज्ञात्वास्मृतिंतस्याआगतःपक्षिभिःसह ॥ श्येनःसंपातिरथचजटायुःपक्षिपुं
गवः २९ येषांपक्षसमीरेणचकंपेभुवनत्रयं ॥ भुजगास्तेतुसर्वेपिवमद्विपकणाभवन् ३० युद्धमासीन्महाघोरंभुजगेंद्रपतत्रिणां ॥ ततोजटायुंसंपातिंश्येनंब
ध्वानयंस्तुते ३१ मातुःस्मृतेतुसंप्राप्तोगरुडःपक्षवाततः ॥ कंपयन्जगतींसर्वांपातयन्द्रुमपर्वतान् ३२ तद्भंधंभुजगाघ्रात्वापलायनपरायणाः ॥ पक्षवातेन
गगनेबभ्रमुर्भुजगाःपरे ३३ मुक्तातुविनताबंधात्स्वस्थानंगंतुमुद्यता ॥ तांदृष्ट्वावासुकिःक्रुद्धोदहन्व्योमवमन्विषं ३४ पक्षाघातेनगरुडोपातयद्भूतलेचतं ॥
विनतातुगतावेगात्स्वस्थास्वस्थानमुत्तमं ३५ प्रतापंवासुकेर्दृष्ट्वागरुडःसूक्ष्मरूपधृक् ॥ विनतांरक्षितुंयातोयातेतस्मिंश्चुकोपह ३६ वासुकिर्विषमत्यंतमस्

जज्ञगतींदहन् ॥ नागलोकंनिनायाशुबध्वाताक्ष्विवरेक्षिपत् ३७ पिधायद्वारंशिलयाततोमातरमभ्यगात् ॥ उदंतंसर्वमाचख्यौमात्रेशेषायचारुधीः ३८ शुशोचविनताश्रुत्वाबध्वानीतान्सुतांस्तुतान् ॥ प्रपयौकश्यपंशीघ्रंनमस्कृत्यात्रवीदिदं ३९ विपरीतमिदंजातंप्रत्यूषूर्योदयो यथा ॥ गृहेस्थितांमामनय त्सहसावासुकीरिपुः ४० पृष्ठतोनुययौश्येनोजटायुर्मोचितुंचमां ॥ संपातिःसर्वसंघांस्तेमारयामासुरोजसा ४१ पराजितेषुतेष्वाशुभुजगैर्बहुभिर्मुने ॥ ग रुडंचास्मरंतेनजित्वासर्पगणांस्तुतान् ४२ मोचिताचाणुरूपेणतेनाप्यागमनंकृतं ॥ जटायुस्तेनसंपातिःश्येनोवासुकिनाबलात् ४३ नीताःपातालविवर पिधायस्थापितादृढं ॥ गमिष्यंतिममप्राणास्ताक्ष्विनानिश्चितंसुते ४४ एतावद्दुःखमाप्ताहंत्वयिनाथेसतिप्रभो ॥ ॥ कउवाच ॥ ॥ इति श्रुत्वाप्रियावाक्यंप्राहतांकश्यपोमुनिः ४५ ॥ ॥ मुनिरुवाच ॥ ॥ माचिंतांकुरुभद्रेत्वंव्येतुतेमानसोज्वरः ॥ ऋतुंतेहंप्रदास्यामिपुत्रस्तेन्योभविष्यति ४६ अभेद्यमंडवज्रेणपार्वत्यायदिबालकः ॥ क्रीडन्भेत्स्यतिपादाभ्यांततःपुत्रोभवेत्तव ४७ सनीलकंठोबलवान्नीलकंठइवापरः ॥ श्रवणात्तस्यशब्दस्यभुजगास्तेपरामवं ४८ यास्यंतिचगुणेशोपितमारुह्यभुवोभरं ॥ हरिष्यतितदापुत्रामोक्ष्यंतेनागबंधनात् ४९ एवमुक्त्वामुनिस्तस्यैरहोनी त्वाऋतुंददौ ॥ विनतायययौहर्षात्कानननंजंतुवर्जितं ५० कालेनसुषुवेचांडमभेद्यंवज्रपर्वतैः ॥ मृद्भांडवत्कलैर्वेष्ट्यनिक्षिप्यांडंस्थिराभवत् ५१ यथा भूमिगतंद्रव्यंभुजगोबलवत्तरः ५२ इतिश्रीगणेशपुराणेउत्तरखंडेसप्तनवतितमोध्यायः ९७ ॥ ॥ ध ॥ ॥ कउवाच ॥ एवंगतेसप्तमेब्देत्वष्टमेसगु णेश्वरः ॥ उषःस्नात्वास्थितोब्रह्मजपन्वेदचतुष्टयं १ कस्तूरीतिलकोनानाभूषणैःसुविराजितः ॥ दिव्यांबरधरोदिव्यगंधमालाविभूषितः २ ततस्तेतापसस्तु ताआगातास्तंगुणेश्वरं ॥ तद्दीप्त्याभासिताःसर्वेरुणदीप्त्यायथावनाः ३ तान्दृष्ट्वाध्ययनेबुद्धिजातातस्यार्भकैःसह ॥ सर्वेषांमस्तकेहस्तंन्यधात्तत्समयेविभुः ४ त्रिचतुःपंचवर्षाणांवेदस्फूर्तिःस्ततोभवत् ॥ विनातुचेतनांशब्दोनभोवाण्याहिश्रूयते ५ चतुर्णामपिवेदानांसर्वंपारायणंव्यधुः ॥ नाभक्षयन्पशु गणाग्रासंमुखगतंतदा ६ श्रवणेतत्पराजाताःशब्दानांवेदचारिणाम् ॥ समासंवेदद्वितयेसामगानमथारभन् ७ हरिणाःसिंहशार्दूलाभुजगाःपक्षिजातयः ॥ गानस्यश्रवणेसक्ताअश्रुपातान्प्रसुस्रुवुः ८ अष्टाशीतिसहस्राणिमुनयःश्रवणेरताः ॥ आनंदह्रदसंमग्नाःशेरतेस्मयथानिशि ९ प्रमथाद्यागणाःसर्वेशिवाद्या हर्षनिर्भराः ॥ अस्रवच्चामृतंचंद्रःशिवभालस्थितस्तदा १० तत्संसर्गाद्दंडमालारुंडानिपुरुषाबभुः ॥ लज्जिताःकिंनराःसर्वेगंधर्वाश्चास्यगानतः ११ स्मरत स्त्रियःशांताआरार्तिक्यंव्यधुस्तदा ॥ तत्राजगामसहसादैत्यश्चाभिनवाकृतिः १२ यस्यशब्देनदीर्णास्तामंदराद्रिगुहास्तदा ॥ हलदंतोवापिनासस्तडा गनयनोरिहा १३ सतुश्वापदरूपेणबभ्रामतत्रतत्रह ॥ पंचनेत्रश्चतुःशृंगोवसुपादश्चतुःश्रुतिः १४ त्रिमुखश्चाद्विपुच्छोसौजहासोच्चैर्निरीक्ष्यतम् ॥ पश्यंतुकौतुकंबा लाःप्रोवाचेतिशिशून्विभुः १५ अत्यद्भुतंदृष्टमिदमित्यूचुस्तेगुणेश्वरम् ॥ ततोदैत्योननर्तोच्चैरुड्डीयन्यपतद्भुवि १६ क्षणंलीनःक्षणंतिष्ठन्दृश्यादृश्यस्वरूपधृक्

ध्रीयतांध्रीयतामेषइत्युवाचशिशून्विभुः १७ इत्युक्त्वादैत्यमगमद्वेगेनचगुणेश्वरः॥ पलायतिमहादैत्योयातिपृष्ठेसबालकैः १८ महारण्यंगताःसर्वेयत्रवायु
र्नसर्पति ॥ गर्जंतिसिंहशार्दूलागजसूकरवानराः १९ तंधर्तुंतत्रयातोसावुड्डीयदैत्यपुंगवः ॥ क्षापेयातोदूरदेशंततःखिन्नोगजाननः २० क्रोधसंरक्तनयनो
मुमोचपाशमुल्बणम् ॥ चकंपेधरणीव्योमभ्रमन्मेघममूत्तदा २१ न्यपतन्भानिखात्पृथ्वींककुभोव्यनदन्स्वनात् ॥ सपाशोदैत्यमाक्रम्यक्षणेनायाद्गणेश्वर
म् २२ श्वासरोधात्पपातोर्व्यांलुंठन्पादौभुजौमुखम् ॥ नेत्रद्वारागताःप्राणाःपश्यत्सुबालकेष्वपि २३ पतितोरूपमास्थायचतुर्विंशतियोजनम् ॥ सपाश
कंठंतंकेचिद्विचकर्षुरितस्ततः २४ गुदेकाष्ठंमुखेधूलिंप्राक्षिपन्नपरेभृकाः ॥ केचिन्मूत्रंपुरीषंचचक्रुस्तन्मस्तकेभृकाः २५ गुणेशानिकटंयाताःसर्वेबालाःक्षुधातु
राः ॥ रसालानिबभक्षुस्तेकेचित्तन्मस्तकेगताः २६ जाजघ्नुःफलघातेनभूमिस्थाउपरिस्थितान् ॥ पतितान्यपरेखादन्ददृशुर्विनतांततः २७ अंडमाच्छाद्यातिष्ठं
तीसाधावद्बालकान्प्रति ॥ पलायमानांस्तान्दृष्ट्वाविनताप्रुष्ठतोययौ २८ निघ्नतीपक्षवातेनश्वापदानिद्रुमानपि ॥ गुणेशस्तत्समालोक्यलीनोवृक्षस्यकोटरे
२९ ददर्शांडंश्वेततरंमंडलंशशिनोयथा ॥ दधारहस्तेसहसागुणेशोबलवत्तरम् ३० अस्फुटत्तत्रददृशेपतत्रीनीलकंठवान् ॥ दीर्घपक्षोविशालाक्षोवमन्ज्वालाक
णान्मुखात् ३१ व्याघूनयदुभौपक्षौकंपयन्जगतीतलम् ॥ चेलुर्वेलामतिक्रम्यसमुद्रास्तस्यशब्दतः ३२ चचालमंडलंभानोरभृकास्तेपलायिताः ॥ पृष्ठतोनु
ययौसोथपक्षघातेनताडयन् ३३ तद्दृष्ट्वाक्रंदनंतेषांयोद्धुकामोगुणेश्वरः ॥ जग्राहपक्षेतंक्रूरंततोयुद्धमवर्तत ३४ पक्षघातैश्चंचुपुटैर्जघानपक्षिपुंगवः ॥ आरक्तनय
नःसोपितंजघ्नेमुष्टिघाततः ३५ अतिदार्ढ्यंतस्यदृष्ट्वाचतुर्भिरप्यथायुधैः ॥ गुणेशस्तंजघानाशुतानिपेतुर्धरातले ३६ उड्डीयसपपालाशुबालानादायसत्वरः ॥
गुणेशस्तान्समुन्मुच्यसमारुढोंडजंततः ३७ वशेतमंडजंकृत्वाचारुरोहगुणेश्वरः ॥ ततस्तमाययुर्बालाविनतापिसमाययौ ३८ तुष्टावपरमात्मानंगुणेशं
तंधियास्वया ॥ त्वंसृष्टिकर्तारजसाब्रह्मासत्त्वेनपालकः ३९विष्णुस्त्वमसितमसासंहरन्शंकरोपिच ॥ नदेवानर्षयस्तत्त्वंविदुस्तेसगुणस्यह ४० निर्गुणस्य
तुकोवेदचराचरगुरोरपि ॥ एवंस्तुत्वावदीत्सातंप्रणताभक्तितत्परा४१ कश्यपस्यमुनेर्भार्यांविनतांविद्धिमामिह ॥ तस्यपुत्रःशिखंडीचसेवकस्तेभविष्यति४२
मुनिनापूर्वमुक्तंमेयोंडमेतद्विनत्तिच ॥ सोस्यस्वामीनसंदेहोमोचयिष्यतितेसुतान् ४३ प्रतीक्षंत्यामयादृष्टंपादपद्मंचिरंतव ॥ जटायुःश्येनसंपातीनीताकद्रू
सुतैस्त्रयः ४४ तान्मोचयजगन्नाथशीघ्रंदर्शयमेसुतान् ॥ ॥ गणेशउवाच ॥ ॥ मार्चिंतांकुरुमातस्त्वंदर्शयिष्येसुतांस्तव ४५ ॥ कउवाच ॥ ॥ ए
वमुक्त्वातुविनतांबहुहर्षसमन्वितः ॥ शिखिनंचततःप्राहवरंमत्तोवृष्णीष्वह ४६ ॥ ॥ मयूरउवाच ॥ ॥ यदिमेत्वंप्रसन्नोसियदिदेयोवरोमम ॥ तदाम
न्नामपूर्वंतेनामाख्यातंभवेद्भुवि ४७ एतन्मेदेहिसर्वेशतवभक्तिर्दृढातथा ॥ ॥ देवउवाच ॥ ॥ साधुसाधुत्वयाप्रोक्तंनिर्लोभेनांतरात्मना ४८ त्वन्नामपूर्वं
मन्नाममयूरेश्वरइत्यथ ॥ विख्यातंत्रिषुलोकेषुभक्तिर्मयिदृढांभवेत् ४९ ॥ कउवाच ॥ एवमाकर्ण्यसासर्वेविनतास्वाश्रमंययौ ॥ शिखंडिनंसमारुढोमयूरेशो

निजगृहम् ५० मयूरेशमयूरेशमयूरेशेतिचासकृत् ॥ गृणद्भिर्मुनिबालैस्तैरन्वितःशोभयन्दिशः ५१ मातरंप्रणिपत्याहवृत्तांतंसर्वमंजसा ॥ वर्णयंतोमयूरेशंमु
निपुत्रागृहान्ययुः५२ इत्थंमयूरेशनामप्रापचासौगुणेश्वरः ५३ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेशिवखंडिवरप्रदानंनामअष्टनवतितमोऽध्यायः ॥ ९८ ॥
कउवाच ॥ ॥ अद्भुतंकृतवान्वर्षेनवमेसौगुणेश्वरः ॥ शिखंडिनंसमारुह्यचतुरायुधभूषितः १ नानालंकारसंयुक्तोमृगनाभिजशोभितः ॥ दिव्यांबरधरोबालः
क्रीडितुंसमुपाययौ २ पूर्णचंद्रनिभःश्रीमान्जयशब्दैरभिष्टुतः ॥ केचिन्नमंतितंबालाःकेचिच्छत्रंध्वजंपरे ३ दधुःकेचिद्वीजयंतस्तद्दर्शनमहोत्सवाः ॥ क्रीडं
तःसरसीयाताःपंचयोजनविस्तृताम् ४ अगाधोदांनक्रझषकूर्ममंडूकसंयुताम् ॥ लतातरुपरीवारांनानापक्षिगणैर्युताम्५उह्यीयपतिताःकेचित्तस्यांकेचिच्छनै
र्ययुः ॥ चूतंतत्तीरगंदृष्ट्वावेशालफलसंयुतम् ६ आरुरोहमयूरेशोबालाःफलजिघत्सया ॥ रसालैस्तेनिजघ्नुस्तानभिन्नांगान्पलायिताः ७ बालाःस्कंधान्ददा
रयंतोनिपेतुःकेपितज्जले ॥ एवंक्रीडत्सुबालेषुदैत्योगादश्वरूपवान् ८ यस्यपादप्रहारेणचूर्णतांयांतिपर्वताः ॥ यस्यहेषितशब्देनकंपतेभुवनत्रयम् ९
पुच्छचांचल्यतोजीवान्हंतिस्कंधंजघर्षह ॥ यस्मिंश्चूतेस्यशब्देनकंपितेपतिताभ्रके १० केचित्पलायिताबालाःकेचिद्भग्नाश्वमस्तके ॥ केचिन्निपतिताश्चा
शुगुणेशेपतितेजले ११ निमग्नेद्विमुहूर्तेस्मिन्प्रारुदन्मुनिबालकाः ॥ किंवक्तव्यमुमायैचदर्शनीयंमुखंकथम् १२ शंकरोपिरुषाविष्टोभस्मसान्नःकरिष्यति ॥
अगाधेस्मिन्नजलेमग्नंप्रवेष्टुंचनशक्नुमः १३ मातापितापालयिताभ्रातात्रातासखाचनः ॥ ॥ कउवाच ॥ ॥ एवंशोचत्सुबालेषुमयूरेशोदधारतम्
१४ कर्णयोर्जलमध्येतुचकर्षबलवान्विभुः ॥ आरुरोहबलाद्दैत्यंभारेणामज्जयन्मुहुः १५ सदैत्योनिर्वमन्नेत्रान्मुखाद्बहुजलंमुहुः ॥ जलपूर्णश्रुतिश्वासोऽत्य
जन्प्राणान्महारवः १६ एकहस्तेनधृत्वातंदोलयित्वाजलाद्बहिः ॥ मयूरेशस्ततोबालाजहर्षुर्ननृतुर्भृशम् १७ भुवितेशतधाजातंददृशुर्दैत्यपुंगवम् ॥ प्रश
शंसुर्मयूरेशंमहाबलपराक्रमम् १८ तऊचुस्तंतदादेवंमृतंमत्वारुदामहे ॥ तावदेवहिदृष्टोसिहतदैत्योबहिर्गतः १९ पुनस्तेजलमाविश्यप्रासिंचन्नंजलोन्मिथः॥
एकमत्याचसर्वेतेप्रासिंचन्गणानायकम्२० वर्षाकालेयथामेघाधरणींपर्वतानपि ॥ षड्भुजैःपरिषिंचन्सन्अपर्याप्तोभवद्यदा २१ तदासंख्यभुजैर्वारिचिक्षेप
बालकेषुसः ॥ तदाश्चर्यंतुतेदृष्ट्वापरस्परमथाब्रुवन् २२ षड्भुजोयंकथमभूदनंतभुजमंडितः ॥ मंदीभूतामुनिसुताःक्वद्विहस्तावयंविभो २३ असंख्यभुजवी
र्योजाक्वेचत्वंभुवनेश्वर ॥ पुनःसर्वेसिषिंचुस्तेमयूरेशंरुषान्विताः २४ सोनंतरूपस्तान्सर्वान्निषेचेगणनायकः ॥ एकैकस्याग्रतोभूत्वाषट्भुजोनिजतेजसा २५
तावच्छिखंडिनिष्ठोसौचतुरायुधभूषितः ॥ प्रणेमुस्तेंजलिपुटंबध्वादेवंगुणेश्वरम् २६ पश्यंतस्तन्मुखंविश्वंसर्वस्वर्गान्वितंतुते ॥ गंधर्वयक्षरक्षांसिसरिदब्धि
द्रुमानपि २७ सर्वंचराचरंविश्वंसदेवासुरमानुषम् ॥ प्रार्थयामासुरथतेदृक्षत्यंतेभयातुराः २८ ॥ बालाऊचुः ॥ ॥नविद्मस्वमात्मानंपरंवानापिकिंच
न ॥ एकरूपोभवविभोकृपांकृत्वाखिलेश्वर २९ ॥ कउवाच ॥ ॥ इतितत्प्रार्थनांश्रुत्वाजातोसौपूर्ववद्विभुः ॥ एतस्मिन्नंतरेतत्रचिक्रीडुर्नागकन्यकाः ॥

३० यानिरीक्ष्याभवच्चाष्टनायिकानांत्रपाभृशम् ॥ नेत्रेनिरीक्ष्यह्रीमत्यःप्रापलन्हरिणस्त्रियः ३१ अतिसुंदरगात्रास्ताःसर्वालंकारभूषिताः ॥ तानिरीक्ष्यम
यूरेशंविह्वलामदनाग्निना ३२ ताऊचुश्चमिथःसर्वाजयंभर्ताभवेद्यदि ॥ सफलंनस्तदाजन्मजीवितंचवयोपिच ३३ धैर्यात्तमूचुस्ताःसर्वाःकुतआगमनंतव ॥
दृष्ट्वातेवदनंचेतोविह्वलंनोभिजायते ३४ विश्रांतंकुरुचेतोनःस्वांगसंगान्नृपूत्तम ॥ ॥ देवउवाच ॥ ॥ अहंशिवसुतोनाम्नामयूरेशइतिस्फुटम् ३५
विख्यातोमुनिपुत्रैस्तुमाज्ञितोबलवत्तरैः ॥ दृष्टवान्पादकमलंभवतीनांप्रसंगतः ३६ ॥ ॥ ताऊचुः ॥ ॥ अस्मद्गृहेक्षणंस्थित्वाविश्रामंक
र्तुमर्हसि ॥ ॥ देवउवाच ॥ ॥ पार्वतीमाद्वियोगेनपरितप्येद्भृशंयतः ३७ अतोनायामिवःस्थानंगच्छंतुनागकन्यकाः ॥ ॥ कउवाच ॥ ॥
एवंवदतितस्मिंस्तुधृत्वानिन्युर्गृहंतुताः ३८ तमदृष्ट्वापुनःशोकंव्यधुर्मुनिसुतास्तदा ॥ ॥ बालाऊचुः ॥ ॥ कथंकठिनतांयातोदयालुःसगुणेश्वरः ॥
३९ अमृतस्रावकिरणोनचंद्रउष्णतांव्रजेत् ॥ नपितात्यजतेबालानपराधायुतेसति ४० क्वगतोसिविनात्वांहिगमिष्यंतिहिनोऽसवः ॥ कउवाच ॥ केचिन्नि
पतिताभूमौकेचिद्बालंनिजघ्निरे४१केचिद्ययुःस्वाश्रमंतेपथितस्यपदांबुजे ॥ दृष्ट्वानेमूस्दंतस्तेददृशुस्तेभगासुरम् ४२ मूर्धजाघाततोयस्यभानिभूमौनिपेतिरे ॥
शतयोजनपादाब्जोभूमावास्यंप्रसार्यसः ४३ तेषांमार्गेप्रसुप्वापततस्तोशिशवोययुः ॥ ध्यायंतस्तंमयूरेशंशोचंतःपथिविह्वलाः ४४ उदरेतस्यतेयाताआप
गाजलधीनिव ॥ भ्रांताःपरस्परंचक्रुर्वार्त्तानानाविधास्ततः ४५ मयूरेशोगतःक्वापिवयंवुत्रव्रजामहे ॥ नजानीमोदिशंसर्वेनोदृश्यंतेगृहाणिच ४६ इंद्रिया
णामधिपतिर्मनोनीतंतुतेननः ॥ विनानोमनसाज्ञानंकथमुत्पत्स्यतेर्भकाः ४७ क्वमातरोभ्रातरोवापितरःक्वगुणेश्वरः ॥ एवंवदत्सुबालेषुमयूरेशोखिलार्थकृ
द् ४८ ॥ आविरासीत्तत्पुरतश्चतुरायुधभूषितः ॥ ॥ गुणेशउवाच ॥ ॥ माशोचंतुभवद्दुःखंज्ञात्वाहंशीघ्रमागतः ४९ भगासुरोदरगताना
त्मानंविदुरर्भकाः ॥ ॥ कउवाच ॥ ॥ निद्रयामोहयामासमुनिपुत्रान्गुणेश्वरः ५० दैत्यदेहांतरगतोवद्वधेवामनोयथा ॥ विपाट्यदेहंतस्याशुशक
लेद्वेव्यधाद्विभुः ५१ ततोऽस्तमितआदित्येनागतेष्वर्भकेषुच ॥ मातरःपितरश्चैवचिंतामापुःशुचान्विताः ५२ ऊचुःपरस्परंतेतुशिवापुत्रोमहाबलः ॥ बाला
न्नीत्वागतःकुत्रमृतोवाशिशुभिःसह ५३ जीवंश्चेदागतःसस्यात्सायंकालेबुभुक्षितः ॥ केचित्प्राणान्विनातैस्तुतत्यजुर्मातरोपिच ५४ केचिदूचुरुमायैतद्वृत्तंसर्वंनि
वेद्यताम् ॥ केचित्तेषुवनंयाताबभ्रमुर्वनपर्वतान् ५५ नापुस्तंचस्वकान्बालान्खिन्नाःप्रापुर्गृहान्पुनः ॥ नानाकोलाहलंचक्रुर्जनन्यःपितृसोदराः ५६ तेषामाक्रं
दितंश्रुत्वाकृपालुःसमयूरराट्॥ तत्तद्रूपंस्वमात्मानंतत्तद्भूषासमन्वितम् ५७ तत्तद्वासःपरीधानंतत्तच्छीलगुणान्वितम् ॥ तत्तदंगंचकाराशुविवेशासौगृहेतः ५८
कृत्वातत्तद्वयोवेषंतत्तन्मानयुतंशुभम् ॥ जनन्यस्ताःसमुत्थायबालानादायसत्वराः ५९ स्तनपानंददुःप्रीत्यापरमानंदनिर्भराः ॥ ततोददृशिरेबालाःपितृभिर्मा
तृभिस्तदा ६० ताऊचुःक्वस्थितारोषादुषःकालेगताःकुतः॥नस्नानंनचभुक्तंवानचान्यद्वापिभक्षितम् ६१ मयूरेश्वरसंगेननेदानींगंतुमर्हथ ॥ कउवाच ॥ एवंशिक्षा

प्यतान्बालानालिंग्यबुभुजुःसुखम् ६२ शिवापिपुरतोपश्यन्मयूरेशंसमागतम् ॥ आलिंग्यपरिपप्रच्छकिंभुक्तंवनगोचरे ६३ त्वद्वियोगजदुःखेनमयाकिंचिन्नभक्षितम् ॥ स्तनौपिबपयोवृद्धौभोजनंचसमाचर ६४ ततःसंवेचकारासौमातृवाक्यगुणेश्वरः ६५ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेनवनवतितमोध्यायः ९९ ॥ कउवाच ॥ अनेकरूपवानदेवोमयूरेशोखिलेश्वरः ॥ अतिसुंदरदेहःसन्नागकन्याभिराहृतः १ गृहंस्वकीयंक्रीडार्थंपूजितोबहुविस्तरात् ॥ सुगंधतैलोद्वर्तनैःस्नाप्योष्णैरपितंजलैः २ दिव्यवस्त्रैरलंकारैश्चंदनैरपिपूज्यच ॥ धूपदीपैश्चनैवेद्यैःफलतांबूलकांचनैः ३ ऊचुःकरपुटंबध्वावयंधन्यतमाविभो ॥ यद्दृष्टेपदंदेवब्रह्माद्यैरपिकांक्षितं ४ नागलोकोधन्यतमोजीवितंनःसुजीवितं ॥ आनंदह्रदमग्नंनोमानसंतापमत्यजत् ५ यद्यत्तेर्ईप्सितंदेवतत्तदत्रापिगृह्यतां ॥ अत्रस्थित्वाकतिदिनंपश्चात्त्वंगंतुमर्हसि ६ मयूरेशउवाच ॥ वांछितंवोविधास्येहंगिरिजामांप्रतीक्षते ॥ मद्वियोगेनतप्तासानभक्षयतिकिंचन ७ यूयंकस्यात्मजास्तस्यदर्शनंचेद्ववेन्मम ॥ कउवाच ॥ ततऊचुर्नागकन्यावासुकेःपुत्रिकावयम् ८ ब्रह्माद्यामुनयोदेवायांतियस्यगृहंसदा ॥ यस्यविषभवाज्वालादहेत्त्रिभुवनंविभो ९ ॥ कउवाच ॥ इत्युक्त्वातंपुरस्कृत्यपितरंप्रापुरंगनाः ॥ रत्नसिंहासनेदीप्तेतिष्ठंतंपन्नगैर्युतं १० सूर्यकोटिनिभंरत्नमालयाशोभितंतदा ॥ मूर्धस्थरत्नकिरणैर्भासयंतंदिशोखिलाः ॥ तंदृष्ट्वावासुकिंदेवोगर्वितंबलवत्तरम् ११ उड्डीयतत्फणासंस्थंमणिंजग्राहसत्वरम् ॥ येनपातालविवरेनांधकारोऽभवत्किल १२ आंदोलयामासशिरःकंपयन्सप्तपर्वतान् ॥ उदधीन्सप्तस्वर्गांश्चपातालानिरसातलं १३ हस्तेनैकेनतंगृह्यमयूरेशःस्वलीलया ॥ वासुकिंनिजकंठेतंबबंधसर्पभूषणः १४ विख्यातःस्वर्गलोकेभूज्जगर्जानंदतोविभुः ॥ तद्गर्जितंसमाकर्ण्यचुक्षुभेभुवनत्रयम् १५ ततःसर्पगणाःशेषंनीतंवासुकिमब्रुवन् ॥ सचक्रोधसमाविष्टोविस्तार्यनिखिलान्फणान् १६ विषाग्निमुत्सृजन्दग्धुंत्रैलोक्यमुपचक्रमे ॥ उवाचकःक्षमोजेतुंममबंधुंतुवासुकिं १७ आवेशेनययौरोषाद्दावानलइवज्वलन् ॥ शीघ्रंयातोमयूरेशंतिष्ठतिष्ठेतिचाब्रवीत् ॥ १८ ॥ ततोनागकुलान्याशुतंशेषमन्वयुस्तदा ॥ ततःपन्नगवृंदंतंदृष्ट्वादेवोव्यतिष्ठत १९ शिखंडिमस्तकेहस्तंन्यधाद्युद्धायपन्नगैः ॥ सययौतंनमस्कृत्यग्रसन्निवमहाद्भुतः २० दुधावपक्षौतद्घातात्भ्रामयन्भुजगोत्तमान् ॥ कांश्चित्समक्षयामासचुचूर्णवापरानपि २१ मारयामासकांश्चित्सभुजगान्बलवत्तरान् ॥ निरीक्ष्यतंमृताःकेचित्पन्नगाभयविह्वलाः २२ दृष्ट्वापराक्रमंतस्यशेषःश्वासमपासृजत् ॥ शिखंडीपतितस्तेनमूर्छितोधरणीतले २३ मयूरेशंततःशेषोययौक्रोधाद्दहन्निव ॥ त्रैलोक्यंविषवह्निस्थंसमालोक्यगुणेश्वरः २४ विराट्रूपंसमास्थायरुरोहतत्फणोपरि ॥ उड्डीयबालभावेनगर्जन्मेघइवापरः २५ ननर्तकरतालेनपादाघातेनमर्दयन् ॥ अनंतकोटिब्रह्मांडभारेणपरिपीडितः २६ एकब्रह्मांडवाहीसकथंतद्भारमावहेत् ॥ बबंधशेषंहिकटौरज्जुंबालोयथारनन् २७ ततस्तेभुजगाःसर्वेयोद्धुकामास्तमन्वयुः ॥ हुंकारेणैवतान्सर्वान्पातयामासविघ्नराट् २८ अब्भ्रान्मस्तकेकांश्चित्कांश्चिच्चकर्णयोर्विभुः ॥ पारिश्रांतस्तदाशेषस्तंनुनावगुणेश्वरम् २९ नस्वरूपंविदुर्देवाब्रह्माद्यामुनयोपिच ॥ त्वमेवसृजसेविश्वंपासिहंसि

त्वमेवहि ३० नानावतारकर्तात्वंनानादैत्यविमर्दनः ॥ त्वमेवसाक्षीसर्वस्यसर्वांतर्यामितांदधत् ३१ सर्वत्रकारणंत्वंहिकारणानांचकारणम् ॥ अज्ञानादभिमानेनयोद्धुकामानृक्षमस्वनः ३२ ॥ कउवाच ॥ संपातिंचजटायुंचश्येनमानीयसर्पराट् ॥ निवेद्यचनमस्कृत्यशेषस्तूष्णींबभूवह ३३ तोषितंप्रणिपत्याहुर्दीनं नाथप्रसादनः ॥ बंधान्मुक्तासर्पकृतान्नमस्तेपरमेश्वर ३४ ॥ कउवाच ॥ एवमुक्त्वामयूरेशंबंधुंतंशिखिनंत्रयः ॥ आलिलिंगुर्मुदायुक्तास्तदागद्गदभाषिणः ३५ पप्रच्छुःकुशलंमात्रेतेचक्षेममथाब्रुवन् ॥ ततःशिखंडिनंसोथरुरोहगणनायकः ३६ पातालाद्वरणींप्रायात्तत्स्त्रीभिःसंयुतोवशी ॥ भगासुरंददर्शार्द्धं मार्गेशिशुहरंचतम् ३७ उद्यम्यपरशुंदीप्तंशशिसूर्यनिभंविभुः ॥ तत्याजकंठेतंतस्यपशुमारममारयत् ३८ ताच्छिरःपरिबभ्रामशृंगवज्राहतंयथा ॥ ततस्त उत्थिताबालायोगमायाविमोहिताः ३९ मयूरेशःक्वचास्तीतिप्राक्रोशन्सर्वएवते ॥ आसनेक्रीडनेस्वापेजागृतौभोजनेपिच ४० तमेवध्यायमानास्तेत न्मुखाद्बहिराययुः ॥ गर्भवासादिवोत्तीर्णादद्दशुस्तंगुणेश्वरम् ४१ दृष्ट्वातेरुरुदुःस्नेहादालिलिंगुर्मुदाखिलाः ॥ ॥ तेऊचुः ॥ ॥ त्यक्त्वास्मान्दैत्यजठरेमृता न्कास्तिगतोभवान् ४२ त्वत्स्मृतेस्तस्यजठरेजीवितानिर्गतास्ततः ॥ मयूरेशउवाच ॥ सर्वव्यापीसर्वगतःसर्ववेत्ताखिलेश्वरः ४३ नत्यक्तवान्कदाचिद्वो मार्चिंतांकर्तुमर्हथ ॥ ॥ कउवाच ॥ ॥ ततोययौमयूरेशोबालकैःपरिवेष्टितः ४४ केचिद्धावंतिपुरतोनानाशब्दकराभृशम् ॥ केचिच्छत्रधराःकेचिद्दंडचा मरधारिणः ४५ धूलिध्वजंसमालोक्ययययुर्मुनिगणाबहिः ॥ शिख्यारूढंमयूरेशंबालकैःपरिवेष्टितम् ४६ ऊचुःपरस्परंसर्वेमुनयोविस्मयान्विताः ॥ गृहेस्मि न्नृशिशवश्चामीकुतोन्येस्यसमीपतः ४७ तांश्चतान्मीलिताःसर्वेपश्यंस्तेदेवरूपिणः ॥ विचारेणचतान्सर्वेपरब्रह्मस्वरूपिणः ४८ आनंदह्रदमग्नास्तेनविदुःस्वं परंपुनः ॥ नापश्यंस्तेपुनस्तांस्तान्भ्रांताइवव्यलोकयन् ४९ मायायामोहिताःसर्वेस्वान्स्वान्बालान्व्यलोकयन् ॥ कश्चित्पितरमासाद्यपठतिस्मयथापुरा ५० कश्चिन्मातरमासाद्यपिबतिस्मस्तनंमुदा ॥ आलिंगाथजननींपितरंवापिकश्चन ५१ भ्रातरंताडयित्वान्योरुरोदताडनादिव ॥ उमापितनयंदृष्ट्वालिं ग्यप्रादात्स्तनंमुदा ५२ कथंचिरतरंयातइतिक्रोधादभाषत ॥ आदायहस्तेगिरिजामयूरेशंगृहंययौ ५३ सर्वेतेमुनयोजग्मुःशिशुभिःस्वंस्वमाश्रमम् ५४ इतिश्रीग०पु०उ०भगासुरवधोनामशततमोऽध्याय ॥ १०० ॥ कऊवाच ॥ ततस्तुदशमेवर्षेसुखासीनंमहेश्वरम् ॥ गिरिजासहितंवामेसप्तकोटिगणा न्वितम् १ नृत्यंतंतंमयूरेशंपश्यंतंस्वांगणेशिशुम् ॥ आययुर्मुनयःसर्वेगौतमाद्याःप्रणम्यतम् २ ऊचुःप्रबुद्धमतयोमहादेवंमहौजसम् ॥ यावत्कालंशिवात्रत्वं मयूरेशसमन्वितः ३ स्थितोसितावद्दैत्यानामनंतानांसमागमः ॥ वयंतेनप्रपीड्यामोऽन्यत्रयाहिशिवाधुना ४ वयंवान्यत्रगच्छामोयद्यज्ञातेभवेद्धर ॥ शिवउवाच ॥ ॥ भवत्संगेनचमयानववर्षाणिसौख्यतः ५ अतिक्रांतानिविघ्नानिमयूरेशेनतानिच ॥ भवतांगमनेस्माकंस्थित्वाकिन्तुप्रयोजनम् ६ अहमेवप्रयास्यामिस्थलमन्यंनिराकुलम् ॥ कउवाच ॥ इतिशंभुवचःश्रुत्वामुनयस्तंप्रणम्यते ७ जयदेवमयूरेशेत्युक्त्वास्वस्थानमाययुः ॥ शिवोपिगण

संयुक्तोवृषारूढोंबिकायुतः ८ बर्ह्यारूढंमयूरेशंपुरस्कृत्वामुदान्वितः ॥ नानावादित्रनिर्घोषैर्नादयन्विष्टपंततः ९ अन्वयुर्मुनयःसर्वेमयूरेशंशिवान्वितम् ॥ प
त्न्योपिबालकैःसार्द्धंस्नेहगद्गदभाषिभिः १० रजसाव्योमनिततेनप्राज्ञायतकिंचन ॥ परावृत्यशिवःसर्वान्दक्षिणाभिमुखोययौ ११ ददृशुर्मार्गमध्येतंद्वादशाक्षौ
हिणीयुतं ॥ कमलासुरमायांतंधूलिधूमरितांबरं १२ गजाश्वपुरतोयांतिरथाश्वपादचारिणः ॥ नज्ञायतेरवेस्तेजःशस्त्रदीप्त्यथकिंचन १३ कोलाहलोमहाना
सीद्गजाश्वरथपत्तिजः ॥ नानाविधानांशस्त्राणांसंघट्टस्वनामिश्रितः १४ ददृशुस्तंमहादैत्यंशिवचाराःपुरोगताः ॥ शंखासुरस्यतंबंधुंनानाभूषाविराजितं
१५ नानायुधधरंप्रोचुरागत्यतुशिवंगणाः ॥ पादाघातेनतरयाशुकंपंतेकमठादयः १६ मुनयोग्रेचराःपेतुर्भयभीतास्तमब्रुवन् ॥ मयूरेशमहाभागकथंरक्ष
सिनोखिलान् १७ ॥ ॥ कउवाच ॥ ॥ इतितद्वचनंश्रुत्वाप्रावदत्समुणेश्वरः ॥ विद्यमानेशिवेचिंतानकार्यामुनिपुंगवाः १८ मयूरेशोहरंप्राहनमस्कृ
त्यततःपुनः ॥ ॥ देवउवाच ॥ ॥ महासेनायुतोदैत्योनाम्नासौकमलासुरः १९ यदितेनुग्रहोमेस्याद्युद्धायाशुव्रजाम्यहं ॥ शिवउवाच ॥ ॥ सम्यगुक्तं
त्वयापुत्रत्वद्दयानंदनंवचः २० द्वादशाक्षौहिणीसेनायुतोसौदैत्यपुंगवः ॥ एकाकीकथमायासिसप्तकोटिगणैर्युतः २१ व्रजाशुहिजयंशीघ्रंजहिशत्रुंमहाबलं ॥
॥ ॥ देवउवाच ॥ ॥तवप्रसादात्त्रैलोक्यंदहेयामितिमेमतिः २२ कियंतोनहतादैत्यानज्ञातास्तेत्वयानुकिं ॥ अस्यकागणनास्वामिन्नायास्येजयवानहं २३
कउवाच ॥एवमाकर्ण्यतद्वाक्यंशंभुरालिंग्यतंददौ ॥ त्रिशूलंपुत्रहस्तेतन्मूर्ध्निन्यस्यकरंशुभं २४ आज्ञांददौस्वपुत्रायगणयुक्तायशंकरः ॥ क्ष्वेडितैर्जयशब्दैश्चना
दयन्सदिशोदश २५ प्रययौप्रमथैर्युक्तोविघ्नहायुद्धलालसः ॥ वृषारूढःशिवायुक्तोहरोपिद्रष्टुमन्वगात् २६ दृष्ट्वापारंदैत्यसेनांमयूरेशःशरीरतः ॥ निर्ममेबहुलां
सेनांततोयुद्धमवर्तत २७ कालानुरूपास्तेवीराब्रह्मांडाशनतत्पराः ॥ मेरोरधिकमानास्तेशब्दतःशृंगपातिनः२८ परस्परंनिजघ्नुस्तेतुमुलेसंयुगेततः ॥ अंधका
रोमहानासीद्रजसाच्छादितादिशः २९ विस्मयंचक्रिरेदैत्याइदानीमयमेकलः ॥ अनेकतांकथंयातस्तस्मादेषपरःपुमान् ३० भूभारंहर्तुकामोयमवतीर्णःशि
वालये ॥ सोपिदीर्घतरंरूपंदधारसहसाविभुः ३१ दृष्ट्वादीर्घंदैत्यरूपंयोगमायासमावृतः ॥ दशायुधधरोदेवोदशहस्तोमहाबलः ३२ मयुरेशश्चदैत्यश्चयुध्य
मानौविरेजतुः ॥ नानाशस्त्रप्रहरणैर्नानायुद्धविशारदैः ३३ व्यस्ताव्यस्तमयुध्यंतगणासेनाचराश्चते ॥ मुष्टिप्रहारैर्दंतैश्चशस्त्रास्त्रैरितरेतरं ३४ केषांचिन्मस्त
काभ्राजपरेषांमुखानिच ॥ जानुजंघाविरहितानिपेतुरपरेरणे ३५ गर्जयंतोदशदिशःशस्त्रास्त्रघातनिस्वनैः ॥ स्वामिस्वनामतोजघ्नुरंधकारेरजस्कृते ३६
कबंधामारयंरतत्रपरान्स्वानपिसंमुखं ॥ दैत्यसेनाचराभग्नादैत्यमेवान्वयुस्तदा ३७ असंख्यातान्मृतान्प्राहुर्नद्यस्तुरक्तसंभवाः ॥ ॥ दैत्यउवाच ॥इंद्रादयोलो
कपालाब्रह्माद्यादेवतागणाः ३८ निर्जितायेनतेनेहकोयुद्धंकर्तुमुत्सहेत् ॥ भूगोलंन्युब्जतांनेतुंकोन्यःशक्तोभविष्यति ३९ ॥ कउवाच ॥ ॥ इत्युक्त्वांदोलया
मासशस्त्रांदोलनतोजगत् ॥ क्रोधसंरक्तनयनोमारयामासदैत्यराट् ४० मयूरेशगणान्सर्वान्नानावाहनहेतिकान् ॥ शिरःपादान्कृतीहस्तान्भित्त्वापातयदाहवे

४१ उत्कर्षंतस्यतंदृष्ट्वामयूरेशोययौपुरः ॥ स्वर्गंचगर्जयन्व्योमदशशस्त्रैर्द्विषोहनत् ४२ असंख्याताहतादैत्यामुक्तिंप्राप्युःसुदुर्लभां ४३ इतिश्रीगणेशपुराणे उत्तरखंडेदैत्यसेनावधोनामएकशततमोऽध्यायः ॥ १०१ ॥ ॥ ध ॥ ॥ ध ॥ ॥ कउवाच ॥ ॥ विनष्टेबहुघासैन्येरुरो हाश्वंसदैत्यराट् ॥ खड्गपाणिर्ययौयोद्धुंमयूरेशंरुषान्वितः ॥ १ ॥ तंदृष्ट्वातुमयूरेशोरुरोहस्वांशिखंडिनं ॥ तंदृष्ट्वाशीघ्रमायांतंपन्नगास्त्रंसदैत्यराट् ॥ २ ॥ जस्वामंत्रंचशतधाभार्गवादिष्टमादरात् ॥ ससर्जपन्नगास्त्रंतत्तेजसाजज्वलुर्दिशः ॥ ३ ॥ सर्पसैन्यैरवेष्टयंतदेवसेनाचरानराः ॥ मृताःकेचिद्रताः केचित्पतिश्चापरेऽवनौ ४ ननंददेवस्तंदैत्यमतिवीर्यपराक्रमम् ॥ साधुयुध्यसिदैत्येंद्रनेदृशःकोपिवीक्षितः ५ एवमुक्त्वारिपुंदेवोगारुडास्त्रमवासृजत् ॥ ततः पलायिताःसर्पाःप्रोत्तिष्ठंश्चचमूचराः ६ चक्रास्त्रमसृजद्देवोदैत्यसेनानिबर्हणम् ॥ तेनकेचिन्मृतादैत्याःकेचिच्छिन्नांघ्रिमस्तकाः ७ विभिन्नजानुजंघाश्चछिन्न गुल्फाःपेरपतन् ॥ गर्जंतिधावधावेतिपितर्मातःसुतेतिच ८ मुक्तियातामयूरेशंदृष्ट्वाप्राणानजहुश्चये ॥ एवंसेनानिरस्तास्यततोदैत्योरुषाद्रवत् ९ खड्गपाणी रुषागर्जन्वेगेनायाद्गजाननम् ॥ तथाविधंरिपुंदृष्ट्वापरशुंजगृहेविभुः १० ययौदैत्यंमहावेगमसृजत्परशुंचतम् ॥ सदहंस्तेजसाव्योमदिशःपक्षिगणानपि ११ अच्छिनद्दैत्यहस्तंचखड्गंचशतधाजवात् ॥ सचापंसहसागृह्यसज्जंकृत्वाशरान्बहून् १२ असंख्यातान्बलाद्विध्यन्छादयामाससैनिकान् ॥ गगनंचदिशः सर्वाजगर्जघननिस्वन. १३ शराघातेनबलवान्निवार्यशरपंजरम् ॥ अंधकारेबाणमयेनाज्ञासीत्कोपिकंचन १४ मयूरेशोथशीघ्रंतदभ्रंभूमावपातयत् ॥ ततो तरिक्षेतिष्ठन्त्सप्रोचेचगणनायकम् १५ अश्वोनिपातितस्तस्यपश्यमेकौतुकंमहत् ॥ शिखंडिनंहनिष्यामिपश्यतस्तेगुणेश्वर १६ उभयत्रनिषंगस्थान्दश रान्भूमौव्यचिक्षिपत् ॥ चापमाकृष्यकर्णांतंचिक्षेपशरसंचयान् १७ मयूरेशस्यसेनायांमारयन्सर्वसैनिकान् ॥ ववर्षशरजालानिवर्षाकालेघनायथा १८ कियंतोभिन्नसर्वांगाःकेचित्प्राणानजहुःसुराः ॥ एवंनश्यत्सुवीरेषुमयूरेशोरुषान्वितः १९ कमलासुरबाणैस्तुविद्धंत्यक्त्वाशिखंडिनम् ॥ पाशंकरेणजग्राहतो लयित्वाससादरम् २० जगर्जनादयन्व्योमतत्याजमहसायुतम् ॥ सपातयन्दैत्यगणान्ददाहरिपुसैनिकान् २१ कंठेचन्यपतत्तस्यदैत्यसेनाधिपस्यह ॥ रुरो धश्वासमस्यासौदैत्योरूपांतरंश्रितः २२ मूर्ध्नासंछादयामासतत्क्षाणाद्रविमंडलं ॥ अंधकारघोरतमेनप्राज्ञायतकिंचन २३ उवाचसंमुखोभूत्वामयूरेशंरुषा न्वितः ॥ मयाकिंयुध्यसेबालगच्छमातुःस्तनंपिब २४ रमस्वबालकैर्नोचेन्मरिष्यसिममाग्रतः ॥ ममचाक्रंदनेनैवकंपतेभुवनत्रयम् २५ पादेभूमौस्थाप्यमा नेशेषोपिचलतेह्यधः ॥ मममुष्टिप्रहारेणचूर्णीभूतामहाचलाः२६ नखाग्रेणशिरस्तेहंगमयिष्येरसातलं ॥ कउवाच ॥ एवमाकर्ण्यदुर्बुद्धेर्वाक्यंप्रोचेगजाननः॥ पिशाचवन्मद्यपवर्तिकवल्गासिममाग्रतः२७नजयंप्राप्नुतेक्वापिदेवद्विजविनिंदकः ॥ ममचेद्भविताक्रोधोज्वालयेद्भुवनत्रयम् २८ यशस्तेख्यापितुंलोकेयुद्ध्यामिह र्षनिर्भरः ॥ नोचेद्धुंकारमात्रेणनीतःस्याद्यममंदनम्२९ कउवाच ॥ एवमाकर्ण्यतद्वाक्यंदैत्यःक्रोधानलाकुलः ॥ क्ष्वेडितंप्रतिशब्देननादयन्विदिशोदिशः ३०

तदागार्भानिपतितास्तस्यशब्देनतत्क्षणात् ॥ प्रमथाद्यागणाःकेचिन्मूर्छिताधरणींगताः ३१आकर्णंधनुराकृष्यमुमोचकमलासुरः॥ शरवृष्टिंपुनारौद्रांमयूरेशे
बलेपिच ३२ इतिश्रीगणेशपुराणेउत्तरखंडेकमलासुरसंग्रामोनामद्व्युत्तरशततमोध्यायः १०२ कउवाच ॥ उत्कर्षंतस्यदैत्यस्यदृष्ट्वादेवस्त्वरान्वितः ॥ आय
योपुरतोदैत्यंजघानशरवृष्टिभिः १ न्यवारयतदैत्योपिस्वशरैरतिवेगितैः ॥ ततस्तुतोषभगवान्मयूरेशोगुणाग्रणीः २ दर्शयामासतस्मैसविश्वरूपमनंतकम्॥
दशदिक्षुमयूरेशंददर्शकमलासुरः ३ विस्मितश्छाद्यनयनेहृदितंपरिदृष्टवान् ॥ ततःपलायनपरोयावद्गच्छतिदैत्यराट् ४ शिखामाक्रम्यदेवोपिधृत्वाप्रोवाचतंपु
नः॥ तिष्ठयुध्यस्वदैत्येंद्रस्मरवाक्यानितानिच ५ पुनर्ददर्शदैत्यस्तमेकंमेवपुरःस्थितम् ॥ अधावत्सहसायोद्धुंजगर्जचमहाबली६ दशायुधधरोदेवोयोधयामास
तंतदा ॥ बिभेदास्यशरीरंसविघ्नराट्शस्त्रघाततः७ यत्रास्यन्यपतद्रक्तबिंदुस्तत्रासुरोभवत्॥तद्रूपस्तद्बलश्चैवमसंख्यातास्तदासुराः ८नानाशस्त्रैरथास्त्रैस्तेतंजघ्नुः
शरवृष्टिभिः ॥ ततःपरावृतोदेवोमयूरेशोरुषान्वलन् ९ सार्द्धकोटित्रयमितैःसिद्धिबुद्धीतदाबलैः ॥ ईयतुःपरमक्रुद्धेततोयुद्धमवर्तत १०ऊचतुर्गणराजंतेदेहिभक्ष्यं
क्षुधापहम्॥ तऊचेभक्षतंदेवोदैत्यास्तग्जनिताम्बहून् ११ इत्युक्तेतेतदातेनमयूरेशेनसत्वरम् ॥ बभक्षतुर्भूतगणैस्तान्दैत्यानखिलानपि १२ देवोजघानखड्गेनतं
दैत्यंकमलासुरम्॥ पुनश्चशतशोजातादैत्यास्तद्रक्तसंभवाः १३ बभक्षुस्तानपितोपिबन्रक्तंसमंततः ॥ ततःखिन्नोमयूरेशःशूलमुद्यम्यवेगवान् १४ तत्या
जसहसादैत्येययौसप्रदहन्दिशः ॥ चूर्णयन्पर्वतान्व्योमनादयन्भानिपातयन् १५ वेगेनपतितोदैत्यदेहंभित्त्वाद्विधाकरोत्॥ मस्तकस्तस्यपतितोभीमायादक्षि
णेतटे १६ कृष्णायाउत्तरेतीरेतस्थौतत्रगुणेश्वरः॥ सर्वेसंतुष्टमनसोजयशब्दैस्तमब्रुवन् १७ जयदेवमयूरेशकुरुदुष्टविनाशनम् ॥ततस्तत्राययौगौरीपतिर्गणपरी
वृतः १८ गौतमाद्यैश्चमुनिभिःपार्वत्याचसमायुतः ॥ वाद्यत्सुसर्ववाद्येषुपुष्पवृष्टिःपपातखात् १९आलिंग्यपार्वतीप्रादात्स्तनपानंमुदातदा ॥ मुनयस्तुष्टुवुश्चैनं
मयूरेशंसुरेश्वरम् २० कमलाकांतहृदयहृदयानंदवर्धन ॥ कमलाकांतनमितकमलासुरनाशन २१ कमलासेवितपदजयत्वंकमलाप्रद ॥ कमलासनवंद्येशकम
लाकरशीतल २२ कमलांकसुपादाब्जकमलांकितसत्कर॥ कमलाबंधुतिलकभक्तानांकमलाप्रद २३ कमलासूनुरिपुजकमलासूनुसुंदर ॥ कमलापितृरत्ना
नांमालयाजयशोभित २४ कमलासुरबाणानांकमलेननिवारक ॥ कमलाक्रांतकमलकोशजित्करपंकज २५ कमलापतिहस्तस्थपद्मकोशनिभेक्षण ॥ सर्वहृ
त्कमलानंदजयसर्वाघनाशन २६ कमलांकुशहस्ताब्जजयविघ्नहराव्यय ॥ त्वयाविनिहतःपापःशक्रादिभयदोरिपुः २७ वज्रचक्राद्यभेद्योयोमुनीनामपिभीति
दः॥ एवंस्तुत्वापुपूजुस्तेगौतमाद्यामहर्षयः २८ दशभिर्दोर्भिरालिंग्यपुपूजगिरिशोपितम् ॥ ततस्तेमुनयःप्रोचुर्मयूरेशंचशंकरम् २९ अत्रत्वंसर्वदातिष्ठसर्वदेव
गणैर्युतः ॥ पूरयन्भक्तकार्याणिवारयन्विघ्नसंचयान् ३०॥ कउवाच॥ एवंतैःप्रार्थितौ देवौसर्वदेवगणैर्युतौ ॥ पूरयंतौभक्तकामान्हरंतौविघ्नसंचयान् ३१ स्थितौ
तत्रमयूरेशशंकरौलोकशंकरौ ॥ विश्वकर्माव्यधात्तत्रमंदिरंसुंदरंततः ३२ असंख्यशिखरद्वारमसंख्याश्चर्यसंयुतम् ॥ तत्राभून्नगरंचारुसर्वलोकसमन्वितम् ३३ म

यूरेशपुरंतस्यनामचक्रुर्महर्षयः ॥ तपस्तेपुर्मुनिगणानानाभरणसंश्रिताः ३४ हरोपिचतपस्तेपेगिरिजागणसंयुतः ॥ तस्यध्यानंपूजनंचस्मरणंतेव्यधुर्द्विजाः ३५ मयूरेशःपुनर्बालैःक्रीडतिस्मयथापुरा ३६ इतिश्रीगणेशपुराणेउत्तरखंडेकमलासुरवधोनामद्व्युत्तरशततमोऽध्यायः १०३ कउवाच॥अहंप्रयातस्तंद्रष्टुंगुप्तरूपोद्विजोत्तम ॥ अदर्शंतत्रतंदेवमुमयासहितंप्रभुम् १ स्नात्वासीनंजपंतंचपरंब्रह्मसनातनम् ॥ अहंतमस्तुवंदेवंमयूरेश्वरमञ्जसम् २ पुराणपुरुषंदेवंनानाक्रीडाकरंमुदा ॥ मायाविनंदुर्विभाव्यंमयूरेशंनमाम्यहम् ३ परात्परंचिदानंदंनिर्विकारंहृदिस्थितम् ॥ गुणातीतंगुणमयंमयूरेशंन० ४ सृजंतंपालयंतंचसंहरंतंनिजेच्छया ॥ सर्वविघ्नहरंदेवंमयूरे० ५ इंद्रादिदेवतावृंदैरभिष्टुतमहर्निशम् ॥ सदसद्व्यक्तमव्यक्तम० ६ नानादैत्यनिहंतारंनानारूपाणिबिभ्रतम् ॥ नानायुधधरंभक्त्याम० ७ सर्वशक्तिमयंदेवंसर्वरूपधरंविभुम् ॥ सर्वविद्याप्रवक्तारंमयूरे०८पार्वतिनंदनंशंभोरानंदपरिवर्धनं ॥ भक्तानंदकरंनित्यंम० ९ मुनिध्येयंमुनिनुतंमुनिकामप्रपूरकं समष्टिव्यष्टिरूपंत्वांम० १० सर्वाज्ञाननिहंतारंसर्वज्ञानकरंशुचिं ॥ सत्यज्ञानमयंसत्यंम० ११ अनेककोटिब्रह्मांडनायकंजगदीश्वरम् ॥ अनंतविभवंविष्णुंम० १२ त्वद्दर्शनेनपूतोहंपरमानंदनिर्भरः ॥ आश्चर्यंपरमंप्राप्तस्तस्यदैत्यस्यमारणात् १३ येनशक्रोतकोदेवालोकपालाजिताबलात् ॥ सहस्रशतयोधीयोसंख्यदेहोरणेहतः १४ त्रिधाभूतास्त्रिस्थलेषुपतितःकमलासुरः ॥ तंसमापूजयमहंसर्वतीर्थजलैःशुभैः १५ कमंडलुगतैरेनोनाशकैरभिषेचयं ॥ दिव्यवस्त्रेदिव्यगंधंदिव्यपुष्पमयींशुभां १६ वनमालामस्यकंठेदत्वानामव्यधामहं ॥ वनमालीतिलोकेषुविख्यातंसर्वमंगलं १७ पूजाविधिंसमाप्यैनंप्रदक्षिणामथोव्यधां ॥ पादाघातेनमेतत्रन्युब्जतांगामितःक्षणात् १८ नानातीर्थजलैर्युक्तःस्थापितोमेकमंडलुः ॥ यतेहंतज्जलंभर्तुंततोमामब्रवीद्विभुः १९ ॥ मयूरेशउवाच ॥ इदंब्रह्मकृतंस्तोत्रंसर्वपापप्रणाशनं ॥ सर्वकामप्रदंनृणांसर्वोपद्रवनाशनं २० कारागृहगतानांचमोचनंदिनसप्तकात् ॥ आधिव्याधिहरंचैवभुक्तिमुक्तिप्रदंविधे २१ स्थिरोभवविरिंचेत्वंनदीयंसर्वपावनी ॥ कमंडलुभवानाम्नाख्यातालोकेभविष्यति २२ दर्शनाद्वाचिकंपापंस्पर्शनाच्चमनोमयं ॥ स्नानाच्चकायिकंसर्वंनाशयिष्यतिनिम्नगा २३ निरंतरंसेवनाच्चमोक्षमेषाप्रदास्यति ॥ कउवाच ॥ एवंदत्तेवरेतेनमस्नुस्तत्रमुनीश्वराः २४ सदाराःसपरीवाराःसप्तकोटिगणाअहं ॥ तपस्तेपुस्ततदातत्रमुनयस्तेमयासह २५ ततोहंमायया तस्यमोहितःप्राब्रुवंबहून् ॥ जगत्कर्ताजगद्वंद्यःशक्रादिसुरपूजितः २६ बालमेकादशाब्दंतत्कथंप्रणतवानहं ॥ अर्भकैःक्रीडमानंतमाचाररहितंशिशुं २८ धिङ्मेज्ञानंमहत्त्वंचपैतामहपदंचधिक् ॥ इमांसृष्टिंविधायाहंस्थास्यामिगुप्तरूपधृक् २८ अयंचेत्परमात्मास्यादपरांनिर्ममेत्पुनः ॥ एवंनिश्चित्यमनसासृष्टिमात्मानमेवच ॥ अंतर्धायास्थितोयावत्तावद्देवोगजाननः २९ नददर्शसखीन्बालांस्ततस्तेषांगृहानगात् ॥ शून्यान्दृष्ट्वागृहान्सर्वान्खिन्नोवृक्षानलोकयत् ३० नददर्शद्रुमान्जंतून्पशुपक्षिगणान्यदा ॥ तदास्वर्गंगतोदेवोनापश्यत्तत्रतान्सुरान् ३१ गंधर्वान्किन्नरान्यक्षान्पितॄन्शशिरवीनच ॥ अंधकारेगाढतमेनप्राज्ञायतकिंचन ३२ ततोसौप्रणिधानेनज्ञात्वाब्रह्मकृतंचयत् ॥ सामर्थ्यंनिजमायांचआविश्चक्रेखिलात्मकः ३३ ब्रह्मांडंनि

र्ममेदेवोमयूरेशःस्वलीलया ॥ विश्वंचराचरंतत्रमयूरेशपुरीमपि ३४ यथापूर्वंपश्यतिस्मसर्वंत्रिभुवनंविभुः ॥ स्वंचबालैःपरिवृतंब्रह्माणंचतथाविधं ३५ शंक
रंचभवानींतामनुष्ठानगतान्मुनीन् ॥ तपनंशशिनंभानिस्वर्गान्देवगणानपि ३६ पृथिवींसर्ववृक्षांश्चसमुद्रान्सरितोपिच ॥ पातालानिमयूरेशोददर्शपूर्ववद्
द्विभुः ३७ ॥ ऊचवाच ॥ ततोहंस्मृतिमापन्नोपश्यन्देवंचिदात्मकं ॥ कलाकाष्ठामुहूर्तादिदिनपक्षस्वरूपिणं ३८ दृष्ट्वेत्थंतमहंनत्वाक्षमापयमुदारधीः ॥ मास
र्तुवर्षकल्पादिचराचरस्वरूपिणं ३९ असंख्यब्रह्मांडयुतंरोमांचैरुपशोभितं ॥ देवर्षियक्षगंधर्वसरित्सागररूपिणं ४० मनुष्यकिन्नरलतावृक्षपन्नगरूपिणं ॥ दृ
ष्ट्वेत्थंतमहंनत्वाक्षमापयमुदारधीः ४१ पुनःपुनरपश्यंतमयूरेशंकिरीटिनं ॥ कुंडलाभ्यांनूपुराभ्यांमंगदाभ्यांविराजितं ४२ शेषनाभिसर्पकंठंदिव्यमालांबरावृतं ॥
दिव्यसिंहासनगतंसर्वदेवैरभिष्टुतं ४३ सिद्धिबुद्धिसमायुक्तंविभूतिभिरुपासितं ॥ चराचरमयंसर्वनमस्यंतत्स्वरूपिणं ४४ प्रत्येकंतत्रचात्मानंतद्रूपंस्वंव्यलो
कयं ॥ ततस्तंस्तुतवान्त्वाप्रार्थयंचपुनःपुनः ४५ क्षमापराधंमेदेवत्वन्मायागर्वितस्यमे ॥ प्रभावंद्रष्टुकामस्यदीनस्यशरणार्थिनः ४६ क्षणेनानंतब्रह्मांडकारिणे
तेनमोनमः ॥ एवंवदंतंमांनासापवनात्स्वोदरेनयत् ४७ तत्रापश्यत्सर्वलोकंयथाबहिःप्रदृष्टवान् ॥ देवंतथाविधंचापिकोटिब्रह्मांडरोमकम् ४८ सर्वचराच
रंविश्वंयथाभूमौयथादिवि ॥ एकस्मादंडतश्चान्यब्रह्मांडांतरमाविशम् ४९ तथैवदृष्टवान्सर्वानेवंनानांडमध्यगः ॥ अपश्यंविश्वमखिलंस्वात्मानंदेवमे
वच ५० ततःखिन्नोऽब्रुवंदेवंनांतंपश्यामितेक्वचित् ॥ कृपांकुरुममविभोमायानेतांनिवारय ५१ ततःसकरुणाविष्टःसर्वमंतर्दधेक्षणाद् ॥ पुनरेवमयूरेशमप
श्यंबालकैर्वृतम् ५२ क्रीडंतंपूर्ववन्त्वाब्रुवंमायांनतोविदम् ॥ अपराधसहस्रंमेमातृवत्क्षमस्वच ५३ मयूरेशोऽब्रवीन्मांहिमूर्ध्निहस्तंनिवेश्यह ॥ देवउवाच
नमेक्रोधोनभिन्नाधीःस्वीयःपरइतिभ्रमः ५४ कस्मादपिभयंमेननमत्तोभयमण्वपि ॥ श्रुत्वेत्थंवचनंतस्यमयूरेशपुरंशिवम् ५५ भवानीमापितत्सूनुमद्राक्षं
मुनिबालकैः ॥ गृहीत्वाज्ञांस्वकंस्थानमगमंहर्षनिर्भरः ५६ भवानीबालकेनायान्मंदिरंस्वंचबालकाः ५७ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडविश्वरूपद
र्शनंनामचतुरधिकशततमोऽध्यायः ॥ ॥ १०४ ॥ ॥ ऊचवाच ॥ ॥ ततोभाद्रचतुर्थ्यांतुतेसर्वेमुनिबालकाः ॥ मृदमाहर्तुमायाताविमलांतामथानयन्
१ स्वस्वबुद्ध्याविधायाशुमूर्तीर्नानाविधाःशुभाः ॥ सिंहारूढामयूरस्थाःकाश्चिन्मूषकसंस्थिताः २ नानायुधधरानानादिव्यालंकारसंयुताः ॥ चतु
र्भुजागणेशस्यादिव्यगंधांबराःशुभाः ३ भक्त्यापरमयापूजनोपचारैःपृथक्पृथक् ॥ मंडपेताःप्रतिष्ठाप्यपुष्पादर्शप्रभायुजि ४ पद्मपुष्पयुतामालादुस्ताः
सुमनोहराः ॥ वाद्यत्सुतूर्यघोषेषुनगरीहर्षमापसा ५ गौरीतस्यांजन्मतिथौद्वादशाब्दिकमर्भकम् ॥ स्नापयामासचददौवायनानिसुवासिनीः ६ सं
पूज्यविधिवद्भक्त्याहरिद्राकुंकुमादिभिः ॥ एतस्मिन्नंतरेदैत्योविश्वदेवइतिश्रुतः ७ भगवद्रूपमास्थायश्रीमुद्रांकितमाययौ ॥ शंखचक्रगदापद्मवनमा
लालसत्तनुः ८ तुलसीदामरुचिरोदिव्यवस्त्रानुलेपनः ॥ कमंडलुंवारिपूर्णंवेणुदंडंदधत्करे ९ गौरीतमतिथिंद्वारितिष्ठंतंप्राहभक्तितः ॥ कुतआगम्य

तेब्रह्मंस्तुष्टहंतवतेजसा १० इत्युक्तःप्राहतांविप्रःश्रुतवानस्मियत्पुरा ॥ तद्दृष्ट्वानयनाभ्यांतेपरितुष्टंमनोमम ११ क्षुधयापीडितश्चाहं भवतीगृहमागतः ॥
पार्वत्युवाच ॥ ॥ आस्यतांभुज्यतांस्वस्थंसचतत्रासनेस्थितः १२ आसीनस्यमयूरेशोविष्टरेक्षालयत्तदा ॥ चरणौततीर्थजलैःसिषेचसर्वतोऽमलैः १३
संपूज्यभोजयामासपक्वान्नैःपायसैरपि ॥ अपोशानकरस्तूष्णीमासीच्चिंतातुरोद्विजः १४ उमोवाचद्विजंश्राद्धन्यतांभुज्यतामिति ॥ यदिनान्नंमनो
योग्यंतदादास्येतिवांछितम् ॥ वदतच्छीघ्रमानेष्येशंकरस्यप्रभावतः १५ ॥ ॥ द्विजउवाच ॥ ॥ क्षीरार्णवस्थितंदेवंदृष्ट्वानित्यंभुनज्म्यहम् ॥ जलंपिबा
मितच्चाद्यविस्मृतंमोहतोमया १६ ॥ ॥ उमोवाच ॥ ॥ पूर्वमेवकथंनोक्तोनियमस्तेद्विजोत्तम ॥ पात्रादुत्थायगंतासिकथंसत्वविलुंपक १७ शंकरःक्षोभमा
पन्नोनजानेकिंकरिष्यति १८ मयूरेशोब्रवीत्तत्रयदिभावोदृढोहृदि ॥ तदात्रैवभवेत्पद्मनाभेर्दर्शनमाशुते १९ प्रायोभाग्यंमहद्दृश्यंयत्पक्वान्नंचपायसम् ॥ त्य
क्त्वाव्रजसिकुत्रत्वंमूढभावेनवाद्विज २० बहुजन्मतपोभिर्यत्कटाक्षोभुविलभ्यते ॥ तयातेपरिविष्टान्नंकथंत्यजसिसुव्रत २१ ब्रह्मादीनांनगम्यायादृष्टासा
क्षात्त्वयाशिवा ॥ सर्वलोकस्यजननीसर्वयोषिद्वराहिसा २२ सर्वेषामेवदेवानांशक्तिःसापरमाद्भुता ॥ तद्दर्शनेनदेवस्यविष्णोर्जातंहिदर्शनम् २३
चकोरस्येवाग्निभुजोमिष्टान्नंनैवरोचते ॥ तथाकिंतेनरोचेतदेवान्नममृतोपमम् ॥ मम्वामर्वरूपस्यदर्शनेस्यद्दरिर्भवेत् २४ ॥ ॥ द्विजउवाच ॥ ॥ रमा
पतेरहंदासोननमस्यामिकंचन ॥ यदित्वंसर्वरूपोसियदिसामर्थ्यमस्तिते २५ तदादर्शयविश्वेशंनारायणमनामयम् ॥ एवंबुद्ध्वादृढंतस्यानिश्चयंसमयूर
राट् २६ अंतर्धायप्रादुरासीन्नारायणस्वरूपवान् ॥ पीतांबरःशंखचक्रगदापद्मधरोविभुः २७ नानालंकारुचिरःसर्वालंकारसुंदरः ॥ कौस्तुभेनलस
द्वक्षावनमालाविभूषितः २८ शेषशायीमहालक्ष्म्यासंवाहितपदांबुजः ॥ विश्वदेवश्चतंदृष्ट्वाननामपरिपूज्यच २९ यातस्तन्मयतांभक्त्याविस्मृत्य
चशरीरताम् ॥ उवाचचचिदानंदपरिपूर्णोद्विजोत्तमः ३० अद्यधन्यंजनुर्मेद्यजीवितंचसुजीवितम् ॥ अद्येयंनगरीधन्याधन्यौतौपितरौमम ३१ मयूरेशोप
देशेनभवान्यादर्शनेनच ॥ परात्परस्यविष्णोस्तेचराचरस्वरूपिणः ३२ लब्धंदर्शननत्रैवसर्वांतर्यामिगोविभोः ॥ नारायणोपितंभक्तंबाहुभिःपरिषस्वजे
३३ उवाचचप्रसन्नात्माबाष्पगद्गदयागिरा ॥ मदर्थंत्यक्तवानभुक्तिंक्षीराब्धेरहमागतः ३४ दृष्ट्वातेनिश्चयंभक्तिंदृढामव्यभिचारिणीम् ॥ भक्तमार्गप्रसि
द्धामिमारुतोद्भूतकंटकम् ३५ भक्ततृषानिवृत्त्यर्थंजातोहंजलरूपधृक् ॥ नानारूपधरोजातोभक्तानामार्तिनाशनः ३६ यथाभक्तःप्रियोनित्यमितिते
दर्शयाम्यहम् ॥ अभूद्ब्रह्मचतुर्थ्यांहिमयूरेशमहोत्सवः ३७ मूर्तिंमहीनर्यांकृत्वाबर्ह्यास्यांसेंहगांपृथक् ॥ नानालंकारशोभाढ्यांनानारंगैःसुशोभिता
म् ३८ अनेकैःपूज्यतांसम्यग्बालकैर्मुनिसंचयैः ॥ केचिदग्रेप्रगायंतिकेचिन्नृत्यंतिभक्तिनः ३९ वाचयंतिपुराणानिप्रदक्षिणपराःपरे ॥ एतस्मिन्नं
तरेपौत्रोवसिष्ठस्यमहात्मनः ४० पराशरइतिख्यातआययौस्वेच्छयामुनिः ॥ सचतुर्वार्षिकोमूर्तिंविदधेभक्तिमत्परः ४१ शुष्कपर्णकृतांमालांकृ

त्वातस्मैन्यवेदयत् ॥ गंधबुद्ध्याकर्दमेनतांव्यलेपयदादरात् ४२ मिष्टान्नानिचलड्डूकान्दक्षिणांचफलानिच ॥ न्यवेदयत्तदापत्रैरनेकैःकर्दमैरपि ४३ संकल्पंलीलयाचक्रेजंघावाद्यंशनैःशनैः ॥ मुहूर्तेनर्तनंकृत्वारुरोदभक्षयेतिच ४४ संप्रार्थ्यमूर्तिंबहुधातताःसाचेतनांययौ ॥ यद्यत्तेनयदुद्देशात्स्थापितंपुरतोभवत् ४५ तत्तथैवचसंजातंततःसाभक्षयत्तदा ॥ लड्डूकान्मोदकान्नानापक्वान्नंपायसान्वितम् ४६ विश्वदेवश्चतद्दृष्ट्वा मिथ्याभूतंयथार्थवत् ॥ मृत्तिकान्नानिसत्यानिसर्वंपुष्पफलादिकम् ४७ सचेतनांचतांमूर्तिंषड्भुजांचपुनःपुनः ॥ व्यलोकयद्विष्णुरूपांचतुर्बाहुविराजिताम् ४८ उवाचसततंदेवंकिमिदंमृत्तिकाशनम् ॥ ॥ मूर्तिरुवाच ॥ ॥ भक्त्यायदर्पितंमह्यंसुधारससमंभवेत् ४९ अभक्तार्पितममृतंविषमेवभवेन्मम ॥ ॥ कउवाच ॥ ॥ एवंतद्वचनंश्रुत्वाविश्वदेवोऽब्रवीत्पुनः ५० कस्तेभक्तोममचतंदर्शयस्वसुरेश्वर ॥ ततस्तस्यकरंधृत्वाबहिरायान्मयूरराट् ५१ गृहेगृहेपूज्यमानंदेवंतस्मैव्यदर्शयत् ॥ शिखिनंसुसमारूढंमयूरेशमलोकयत् ५२ तत्रापिपर्यपश्यत्सविश्वदेवयुतंचतम् ॥ नायंममभवेत्स्वामीत्येवंबुद्धिंविसृज्यताम् ५३ गृहेगृहेविश्वदेवोनारायणमलोकयत् ॥ सर्वत्रसददर्शाथपूज्यमानंगुणेश्वरम् ५४ क्वापिक्वापिमयूरेशंददर्शविष्णुरूपिणम् ॥ पुनरालोकयंस्तत्तन्मयूरेशमलोकायत् ५५ भुजंस्वंपरिगृह्यैवबहिर्यातंस्वलीलया ॥ आक्षिप्यहस्तंसप्रायान्नायंस्वामीममेतिच ५६ जटत्गृहेगृहेसोथपूज्यमानंददर्शह ॥ मयूरेशंवाद्यघोषैर्नृत्यगीतैरनेकधा ५७ क्वापिदृष्ट्वाविष्णुरूपंनमस्कर्तुंययावथ ॥ पुनर्मयूरेशरूपंददर्शसशिखिस्थितं ५८ गरुडारूढमन्यत्रशेषारूढंतथाक्वचित् ॥ नमस्कर्तुंयदायातिविश्वदेवोमुदायुतः ५९ तावद्बर्हिंसमारूढंपश्यतिस्मपुनःपुनः ॥ भुंजंतंचरमंतंचस्वपंतंच ददर्शसः ६० ततःखिन्नोविश्वदेवोवसिष्ठद्वारमागमत् ॥ ततोब्रवीन्मयूरेशःपश्यमेभक्तमुत्तमं ६१ ततःपराशरंसोथददर्शपुरतःस्थितं ॥ मृन्मयैरुपचारैस्तंपूजयंतंगुणेश्वरं ६२ भक्षयंतंचलड्डूकान्मृन्मयान्देवमेवच ॥ पश्यतिस्मपुनर्व्योम्निजलेभूमौतमेवसः ६३ क्षणंनारायणंदेवंमयूरेशंक्षणादपि ॥ ततःस्वभेदबुद्धिंस्वांतत्याजभ्रांतिमेवच ६४ सर्वभावेनतंनत्वास्तुत्वाभेदधियापुनः ॥ अनुज्ञातोमुदाप्रायाद्विश्वदेवःस्वमाश्रमं ६५ इतिश्रीगणेशपुराणेउत्तरखंडेविश्वदेवभेदबुद्धिनिरासोनामपंचाधिकशततमोध्यायः १०५ ॥ ॥ कउवाच ॥ ॥ ततस्त्रयोदशेवर्षेनमस्कृत्यमहेश्वरं ॥ भस्मांगरागरुचिरंपंचास्यंदिग्भुजंशुभं १ रुंडमालाधरंसुप्तंचंद्रशेखरमच्युतं ॥ मयूरेशोथजग्राहशशिनंतच्छिरोगतं २ क्रीडन्बहिःसमायातोबालकैःपरिवारितः ॥ सुरद्विट्परिनृत्यद्भिर्वदद्भिश्चपरस्परं ३ एतस्मिन्नंतरेतत्रदैत्योमंगलसंज्ञकः ॥ करालवदनःक्रोडीविजेतापरमाद्भुतः ४ वराहरूपीबलवान्दंतच्छिन्नमहीरुहः ॥ वज्रसारसटाभिःसोभिंदन्व्योमपदैर्धरां ५ अंजनाद्रिरिवश्यामोवह्निकुंडनिभेक्षणः ॥ दृष्ट्वातंविद्रुताबालावर्षाघनानिभस्वनः ६ नदृष्टःसूकरःक्वापीदृशइत्यब्रुवंश्चते ॥ यावन्मारयतेबालांस्तावद्देवोमयूरराट् ७ दधारदंतयोर्दुष्टंतदासूकरदानवं ॥ अथापरेणहस्तेनदधाराधरपोत्रकं ८ पाटयामाससहसावंशखंडमिवार्भकः ॥ पूर्वदेहंस

मास्थायदशयोजनविस्तृतं ९ पतितश्चूर्णयन्वृक्षान्दारयन्धरणीतलं ॥ ततस्तमब्रुवन्बालाधन्योयंपार्वतीसुतः १० क्षणेननाशितोदैत्योलीलयासौम हाबलः ॥ अस्यदर्शनतस्त्रस्तावयंयातादिशोदश ११ पतमाननयेनेहचूर्णितानिगृहाणिच ॥ ॥ कउवाच ॥ ॥ ततःशिवोललाटेस्वेनापश्यच्छाशिनंय दा १२ क्रोधसंरक्तनयनोविष्टंप्रदहन्निव ॥ गणानूचेरुषाविष्टोरक्षणंक्रियतेकथं १३ केनदैत्येननीतोमेललाटस्थोऽमलःशशी ॥ ॥ कउवाच ॥ ॥ ततोली नागणाःसर्वेकंपमानाभयातुराः १४ अपरेधैर्यमालंब्यवदंतिस्माशिवंप्रति ॥ उमाकांतभवत्पुत्रोमयूरेश्वरसंज्ञकः १५ क्रिडितुंबहिरायातस्तस्यहस्तेविलो कितः ॥ चंद्रस्तेनकदानीतोनजानीमोवयंविभो १६ इतितद्वचनंश्रुत्वाप्रोचेरुष्टोमहेश्वरः ॥ कथंनुक्रियतेरक्षाभवद्भिर्भक्ष्यतत्परैः १७ चंद्रोवाचंद्रहर्तावा यद्यानीतस्तदाशुभं ॥ नोचेद्भस्मीकरिष्यामिसर्वेषांनात्रसंशयः १८ ततस्तेक्षुब्धमनसोधावमानास्त्वरान्विताः ॥ मयूरेशंसमभ्येत्यप्राभणन्रुष्टचे तसः १९ याहिदुष्टशिवंदेवंचंद्रंवायच्छतस्कर ॥ गणवाक्यंपरिश्रुत्यचुकोपगणनायकः २० नमेस्तिगणनाकापिभवतांतस्यवागणाः ॥ जगत्त्रयजनन्यामे तनयस्यप्रभाविनः २१ ॥ कउवाच ॥ तस्यश्वासेनसर्वेतेवात्यापत्रमिवोद्धृताः ॥ पेतुःशिवस्यपुरतोगणादीनास्तदाखिलाः २२ अतिरोषान्महादेवःप्र मथादीनथाब्रवीत् ॥ आनीयतांसदुष्टात्माबध्वोमातनयोलघुः २३ तेतुशीघ्रतरंयातायत्रक्रीडारतःशिशुः ॥ ददृशुस्तंशिशुगतंक्रीडंतमकुतोभयं २४ वेष्टितुंता न्समायातान्मोहयित्वाविनायकः ॥ अंतर्हितश्चतुर्दिक्षुगणास्तेतंव्यलोकयन् २५ गृहेगृहेकाननेषुनापश्यंस्तेविनायकं ॥ क्वचिद्दृक्षातुतंप्राहुरस्मदग्रेकथं भवान् २६ गंतुंशक्तोब्रह्मलोकेस्थितंनेष्यामतंशिवम् ॥ एवमंतर्हितोदृश्योवारंवारंबभूवसः २७ ततःखिन्नान्गणान्दृष्ट्वापरमात्माकृपान्वितः ॥ तस्थौ तत्पुरतःसम्यग्दृष्ट्वातंहर्षनिर्भराः २८ ववंदुर्गिरिजासूनुंनिन्युस्तेशंकरंप्रति ॥ पृथिवीभारसदृशमुपविष्टंतुतेगणाः २९ नशेकुरुत्थापयितुंततोविस्मितमान साः ॥ हतोद्यमागणाःसर्वेशिवमेत्यसमूचिरे ३० सर्वेवयंसमानेतुमेकंशक्तानशंकर ॥ आज्ञापयामासशिवोनंदिनंपुरतःस्थितम् ३१ झटित्यानयगच्छत्वंम यूरेशंतुतस्करम् ॥ ॥ नंद्युवाच ॥ ॥ शेषंसूर्यंशशांकंचहनिष्येहंतवाज्ञया ३२ कनीयसोनमेकाचिद्गणनास्तिमहेश्वर ॥ ॥ कउवाच ॥ ॥ इत्युक्त्वागाद्वायुवेगोभंजन्वृक्षांश्चपर्वतान् ३३ क्रोधसंरक्तनयनस्तीक्ष्णशृंगोग्रसन्निदिवम् ॥ उवाचतंमयूरेशंयाहिरेत्वंशिवंप्रति ३४ नोचेदद्यनयिष्यामिन समोहिगणैरहम् ॥ एवंवदतितस्मिंस्तुमयूरेशोरुषान्वितः ३५ श्वासचक्रेक्षिपत्तंतुगमनागमसंकुले ॥ तत्याजतंदृढंश्वासादतिखिन्नंशिवांतिके ३६ वमंतंरुधि रंवक्त्रात्पृथिव्यांपतितंतुतम् ॥ ब्रुवंतंपौरुषंनानामूर्छितंद्विमुहूर्ततः ३७ अपश्यन्नमयूरेशंजानुभागेस्थितंशिवः ॥ देदीप्यमानंवपुषादिव्यभूषासमन्वितं ३८ गणाऊचुःशिवंदृष्ट्वाभालचंद्रंयथापुरा ॥ ललाटेतेशशीदेववृथाज्ञप्तावयंशिव ॥ ३९ ॥ ॥ शिवउवाच ॥ ॥ मयूरेशंगणांश्चाहशशिनंवीक्ष्यमस्तके ॥ श्रांतास्तेचगणास्त्वंचनंदीचापिममाज्ञया ४० चंद्रेस्थितेललाटेमेवृथायुद्धमभूद्विवः ॥ ॥ प्रमथाऊचुः ॥ ॥ अद्यप्रभृतिदेवेशस्वामीनोस्तुमयूरराट् ॥

॥ ४१ ॥ ॥ ऋउवाच ॥ ॥ तथेतिशिवऊचेतान्गणराजोभवत्तुसः ॥ नत्वाशिवंगणेशंचगणेशजननीमपि ४२ प्रशंसयित्वादेवेशंमयूरेशंतथाविधं ॥ गर्जंतोथगणाजग्मुर्मुदास्वंस्वंनिवेशनम् ॥ ४३ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेषडधिकशततमोध्यायः ॥ १०६ ॥ ॥ ॥ ॥ ऋउवाच ॥ ततश्चतुर्दशेवर्षेगौतमाद्याःसुरर्षयः ॥ आययुर्गिरिजागेहंनानागणयुतंशिवम् १ नमस्कृत्यचतानंबानानासनगतान्पुरः ॥ पूजयित्वाविधानेनप्रोवाचत्तद्व्रतंवचः २ विघ्नभीत्यापरित्यक्तंत्रिसंध्याक्षेत्रमुत्तमं ॥ अस्यबालस्यमेविघ्नाअत्रापिबहवोभवन् ३ दिशंतुविघ्नरहितंकर्मवास्थानमुत्तमं ॥ मुनयऊचुः ॥ इंद्रयागेकृतेदेविसर्वविघ्नंहरिष्यति ४ ॥ ऋउवाच ॥ तदेवकारयामासमंडपंबहुविस्तरम् ॥ संभाराञ्कारयामासशक्रसंतोषकारकान् ५ आज्ञांगृहीत्वाशंभोःसापार्वतीहर्षनिर्भरा ॥ कारयामासविधिवदिंद्रयागंमहर्षीभिः ६ ध्यानमावाहनंचक्रुरिंद्रस्यैतेमहर्षयः ॥ पुपूजुर्गिरिजादेशात्सांगमिंद्रंगणानपि ७ कुंडेवह्निंप्रतिष्ठाप्यमंत्रैरेवद्विजर्षभाः ॥ जपानांतदशांशेनजुहुवुस्तिलपायसं ८ प्रणवाद्यैर्नमोंतैश्चस्वाहांतैर्मंत्रसंचयैः ॥ शांतिपाठान्पठंतिस्मचतुर्वेदभवान्द्विजाः ९ एतस्मिन्नंतरेबालाः क्रीडित्वाबालकैःसह ॥ यज्ञवाटमुखोयातिदैत्यौतुकलविंकलौ १० तावत्संमुखतांयातौमाहिषंरूपमास्थितौ ॥ महारवौमहाशृंगौभीषयंतौजगत्त्रयं ११ सटाभिन्नघनौपुच्छाद्दारयंतौगिरीनथ ॥ नासानिरोधपवनाच्चूर्णयंतौद्रुमानपि १२ उमासुतंहंतुकामौयातौशीघ्रंतदंतिकं ॥ प्रायुध्येतांतदाद्यौतौमत्तावेवमहागजौ १३ तयोःशब्देनगगनंगर्जतिस्मयथाघनैः ॥ जयंभंगंक्रमेणोभौप्रापतूरुधिरोक्षितौ १४ विद्रुतामुनिबालास्तेताभ्यांभीतावृकादिव ॥ दूराद्ददर्शगिरिजासुतस्तौदैत्यपुंगवौ १५ कथमेतौमहादुष्टौहनिष्यामीतिचिंतयन् ॥ पश्यत्सुतेषुबालेषुचिक्षेपगगनेचतौ १६ पुच्छेगृहीत्वातिबलौभ्रामयित्वापुनःपुनः ॥ मुहुर्तात्पतितौपृथ्व्यांताभ्विदार्यद्रुमानपि १७ शतधादेहखंडानितयोरादन्वृकादयः ॥ ततस्तेमुनिबालास्तंययुर्भक्त्याप्रतुष्टुवुः १८ यस्यतत्वंनजानंतिब्रह्माद्यामुनयोपिच ॥ सर्वांतर्यामिणस्तेतुकथंविद्यामहेवयम् १९ बाल्यात्प्रभृतिदैत्यास्तेनाशिताःकोटिशस्त्वया ॥ एतौमाहिषरूपेणहंतुंत्वांससुपागतौ २० मूषकाविवसंत्यक्तौ पुच्छेधृत्वास्वलीलया ॥ ययोःश्वासेनचलिताःपर्वताश्चद्रुमाधराः २१ ॥ ऋउवाच ॥ मयूरेशस्ततःप्रायाद्यज्ञवाटंमनोरमम् ॥ ददर्शेंद्रमखंरुष्टोध्वंसयामास तत्क्षणाद २२ दूरेक्षिप्त्वाशक्रमूर्तिंप्रोचेसर्वान्मुनीश्वरान् ॥ वृतोमुनिसुतैःसर्वैःकिंकर्मक्रियतेमलाः २३ किंतुष्टेनप्रदातव्यंवासवेनाखिलार्थेना ॥ अजाप्रार्थनयाकिंनुकामधेनुफलंलभेत् २२ सआदच्छेषसामग्रींहुत्वाशांतंहुताशनम् ॥ मुनयोविस्मितहृदोवीक्ष्यचापल्यमस्यतत् २५ उमानिविष्टहृदयानाशकत्तंगुणेश्वरम् ॥ उपालब्धुंशिक्षितुंवावक्तुंक्रोधेनकिंचन २६ उमायैसर्वमाख्यायजग्मुःस्वंस्वंनिवेशनम् ॥ श्रुत्वेंद्रेक्षुब्धहृदयेयत्स्यात्तच्चभवात्विति ॥ २७ स्वापमानेपरिज्ञातेशक्रश्चक्रोधवैभृशम् ॥ क्रोधसंरक्तनयनोदहन्निवजगत्त्रयम् २८ आकार्यदेवनिचयानुवाचवाक्यमुत्तमम् ॥ ॥ इंद्रउवाच ॥ ॥ ममयागोमुनिगणैरारब्धःपरमादरात् २९ सविध्वस्तोगुणेशेनतस्यदृश्येद्यपौरुषम् ॥ रुष्टेमयिभवेन्नष्टंत्रैलोक्यंसचराचरम् ३० ॥ ॥ देवाऊचुः ॥ ॥

तवाज्ञाचेन्मयूरेशंबध्वानीमःक्षणेनह ॥ ॥ शक्रउवाच ॥ ॥ मयूरेशपुरेवह्नेःस्थानंमास्तुक्वचित्तव ३१ सर्वेषांजाठरोपित्वंलीनोभवममाज्ञया ॥ ॥ कउवाच ॥ इतिश्रुत्वावचस्तस्यशक्रस्यरुषितात्मनः ३२ वह्निरंतर्हितस्तत्रपुरेपिजठरेपिच ॥ नापश्यन्मुनयोवन्हिममंथुर्होमहेतवे ३३ नायातीतिपरिज्ञायतेऽपकंजक्षुरादरात् ॥ नचतत्पच्यतेतेनव्यथाभवतिदुर्धरा ३४ ततस्तेमुनयोजग्मुर्मयूरेशंकृपाकरम् ॥ नमस्कृत्याब्रुवन्सर्वेशक्राहूतोगतोनलः ३५ जाठरोपिगतोवह्निरिंद्रयागेहतेत्वया ॥ इत्याकर्ण्यवचस्तेषांप्रत्येकंजठरेनलः ३६ सोभवत्क्षुधयाविष्टाःसर्वेजातास्तुतत्क्षणात् ॥ महानसेषुकुंडेषुतथैवज्वलितोभवत् ३७ ततोवायुंनिनायाशुशक्रःक्रुद्धोमहाबलः ॥ प्रेतभूतापुरीसर्वापंचप्राणेगतेभवत् ३८ पंचप्राणमयोदेवस्ततस्तान्समजीवयत् ॥ ततइंद्रोब्रवीत्सूर्यं तापयैनांपुरींबहु ३९ ततःसूर्योतपत्सर्वंद्वादशादित्यरूपवान् ॥ वापीकूपतडागेषुनद्यांजलमशोषयत् ४० जज्वालपृथिवीसर्वापुरग्रामवनाकरा ॥ ततःशीघ्रंमयूरेशोमेघोभूत्वाववर्षह ४१ शमयामासतंवह्निंमृतांश्चसमजीवयत् ॥ ततोहर्षयुतालोकाःसाधुसाध्वित्यपूजयन् ४२ ॥ कउवाच ॥ प्रतिकूलंकृतं यद्यत्तत्तत्सर्वंनिराकृतम् ॥ ज्ञात्वाशक्रोययौदेवंमयूरेशंननामच ४३ बद्धांजलिपुटोभूत्वास्तोतुंसर्वेश्वरंविभुम् ॥ शक्रउवाच ॥ नवेदानर्षयोजग्मुर्ब्रह्माद्यास्ते गतिंविभो ४४ सर्वांतर्यामिणःसर्वरूपस्यब्रह्मरूपिणः ॥ ब्रह्मादीनांविश्वसृजांकारणानांचकारणम् ४५ अपराधान्क्षमस्वाद्यत्वामहंशरणंगतः ॥ मस्तकंपादयोर्न्यस्यप्रार्थयामाससादरम् ४६ ॥ कउवाच ॥ निर्विकल्पंमनस्तस्यज्ञात्वाग्राहगुणेश्वरः ॥ उत्तिष्ठोत्तिष्ठभद्रंतेपदोतिष्ठसुखंस्वके ४७ ततःसंपूज्यतंदेवंनमस्कृत्यशचीपतिः ॥ प्रदक्षिणीकृत्ययययौहृष्टःसन्नमरावतीम् ४८ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेसप्ताधिकशततमोध्यायः ॥ १०७ ॥ ॥ ध ॥ ॥ कउवाच ॥ ॥ ततःपंचदशेवर्षेमयूरेशोर्भकैःसह ॥ गतःस्नातुंनदींपुण्यांनाम्नाब्रह्मकमंडलुम् १ स्नात्वानित्यंसमाप्याशुमानसैःषोडशैःपृथक् ॥ उपचारैःपुपूजुस्तेहृदिस्थंगणनायकम् २ केचित्पद्मासनगतंकेचिद्बर्हिगतंचतम् ॥ दिव्यगंधैर्दिव्यवस्त्रैर्दिव्यैःपुष्पैरपूजयन् ३ गार्ग्योमुनिर्मंदिरेतंध्यात्वारत्नान्वितेर्चयत् ॥ एतस्मिन्नंतरेऽकस्मात्पिदधेद्वारमस्यतत् ४ यावदुद्घायटत्येवतावत्तद्दृढतामगात् ॥ तत्रआक्रंदनंचक्रेसचतेबालकाअपि ५ ॥ बालकाऊचुः ॥ ॥ त्वमेवजननीतातःकथमभ्यंतरेस्थितः ॥ दत्वाकपाटंदेवेशनोपराधान्क्षमस्वच ६ ॥ कउवाच ॥ एतस्मिन्नंतरेदैत्योमहाबलपराक्रमः ॥ यस्यशब्देनमहताकंपतेभुवनत्रयम् ७ सटाभिन्नघनोदुष्टोव्याघ्ररूपीसमभ्यगात् ॥ व्यादायवदनंघोरंग्रसन्निवजगत्त्रयम् ८ दृष्ट्वातंदुद्रुवुर्बालाक्रंदंतस्तेदिशोदश ॥ सतुद्वारंविनिर्भिद्यमयूरेशंतमाययौ ९ शार्दूलसदृशंरूपंकृत्वायात्सोपितंक्षणात् ॥ पपालसहसाव्याघ्रःपृष्ठेलग्नोययौचसः १० भ्रमन्सतुवनंयातोनिकुंजेलीयतास्थिवान् ॥ देवोवृक्षंसमारुह्यकुंजमध्येपपातह ११ उभाभ्यांवदनंतस्यकराभ्यांजगृहेदृढम् ॥ अन्याभ्यांबहिरानीयततःपरशुनाच्छिनत् १२ नासिकांश्रवणेपादौपुच्छमग्रभवावुभौ ॥ नमुखंदर्शयेत्युक्त्वाविससर्जगुणेश्वरः १३ निजंरूपंसमास्थायतथैवविकृतोभवत् ॥ एवमेवकरिष्यामित्वद्देहमित्युवाचतम् १४ य

यौनिजालयंदैत्योदेवःस्वंधामचाययौ ॥ ततोमुनिसुताभ्रेमुःक्रंदंतःक्रमयूरराट १५ अतिश्रांताद्रुमतलेमुच्छायेप्रास्वपंस्तदा ॥ अनेनयास्यतिपथाद्रक्ष्या
मस्तत्पदांबुजम् १६ पादौदक्षिणतस्तेषांदृष्ट्वाचुक्रोधभानुजः ॥ अत्यारक्तदृशीरोषाद्ब्रह्मांड्ग्रासमाहसः १७ बध्वातान्स्वस्थलंयातोमयूरेशस्ततोगमत् ॥
नापश्यत्तत्तटेबालान्विस्मयंपरमंययौ १८ चिंतांपरामिकांप्राप्तोविनातैःसमयूरराट् ॥ नसुखंक्वापिसंप्रायात्ततोमुनिगणाययुः १९ ॥ मुनयऊचुः ॥ क्वा
स्माकंबालकादेवप्रातर्नीतास्त्वयाखिलाः॥ विनातैर्नोगमिष्यंतिप्राणास्त्वय्यागतेधुना २० ॥ कउवाच ॥ नकिंचिदूचेतानदेवोमुंचन्नश्रुमुहुर्मुहुः ॥ विचा
र्यभास्करींयातःपुरींदूतैर्निवेदितः २१ ॥ दूताऊचुः ॥ कोपियातोयोद्धुकामोलोकत्रयविनाशकृत् ॥ उग्रारावोमहाबाहुर्वार्यमाणोबलाद्यमः २२ यमउवाच ॥
ब्रह्मांडंचूर्णतांयातिदंडाघातेनयस्यमे ॥ तस्यमेपुरतोयुद्धंकथंबालोविधास्यसि २३ ॥ देवउवाच ॥ त्वमात्मानंवर्णयसेरंकवद्भासिमेयम ॥ ममवक्रभु
वासर्वेब्रह्मांडंचविनश्यति २४ एवमुक्त्वामयूरेशोयमस्कंधंरुरोहसः ॥ पातयामासमहिषात्पपातोपरितत्क्षणात् २५ पराक्रमंतस्यबुध्वाबद्धांजलिपुटो
यमः ॥ तुष्टावपरयाभक्त्यामयूरेशंसुरेश्वरम् २६ ॥ यमउवाच ॥ नतेरूपंविदुर्देवाब्रह्माद्याःसनकादयः ॥ नेतिनेतिचवेदास्त्वांवदंतिपरमेश्वरम् २७ सृ
ष्टारंपालकंसृष्टेःसंहर्तारंनिजेच्छया ॥ दैत्यानांसर्वदुष्टानांनाशकंसर्वरूपिणम् २८ अकस्मादपराधंनःकृतंक्षंतुंत्वमर्हसि ॥ ॥ कउवाच ॥ ॥ एवमुक्त्वापुपू
जासौवस्त्ररत्नैःफलैरमुम् २९ बालानानीयतद्धस्तेनिवेद्यपुरतःस्थितः॥ आलिलिंगुर्मुदासर्वेपरस्परमथाब्रुवन् ३० ॥ बालाऊचुः ॥ श्रांतास्त्वद्दर्शनार्थायब
ध्वानीतायमेनह ॥ त्वद्दर्शनाद्बंधमुक्तायास्यामोनिजमंदिरम् ३१ ॥ कउवाच ॥ ततस्तेस्वाश्रमंप्राप्तामयूरेशपुरस्कृताः ॥ मयूरेशपुरंयातानानावादि
त्रसंकुलम् ३२ नानाध्वजपताकाढ्यंपुष्पमालाविभूषितम् ॥ यमोपिपृष्ठतोयातिद्रष्टुंतत्कौतुकंमहत् ३३ संमुखंतस्यतेसर्वेमुनयोपिययुस्तदा ॥ पुपूजु
स्तुष्टुवुर्देवंलिलिंगुर्बालकानपि ३४ उवाचदेवस्तान्सर्वान्मुनीन्पूर्वंप्रकुप्यतः ॥ आनीताबालकालोकाद्यमस्यक्षणमात्रतः ३५ ॥ मुनयऊचुः ॥ सर्वत्ररक्ष
सेत्वंहिसर्वशक्तिःसदाचनः ॥ कउवाच ॥ इत्युक्त्वातमनुज्ञाप्यस्वाश्रमान्मुनयोययुः ३६ यमोपितंनमस्कृत्यस्वालयंमुदितोगमत् ॥ देवोपिस्वालयंप्राप्य
हर्षयामासमातरम् ३७॥ इतिश्रीगणेशपुराणेउत्तरखंडेविजगर्वपरिहारोनामअष्टाधिकशततमोऽध्यायः॥ १०८॥ कदाचित्पार्वतीप्राहसुखासीनंमहेश्वरम्॥
गतानितुमहादेववर्षाणिदशपंचच १ विवाहश्चित्यतामस्यमयूरेशस्यसांप्रतम् ॥ सुशीलासुमुखीबालामृगाक्षीहंसगामिनी २ पिकवाक्सुनसातन्वीव
धूःकापिविचार्यताम् ॥ मन्मथातुलदेहस्यसर्वांगसुंदरस्यह ३ कउवाच ॥ इतितद्वचनंश्रुत्वासाधुसाध्वित्यभाषत ॥ सोचिंतयच्छुभांकन्यांमनसानापकुत्र
चित् ४ ततश्चिंतांपरांप्राप तावन्नारदआगतः ॥ संपूज्यचोपवेश्यैनमासनेशंभुरब्रवीत् ५ शंभुरुवाच ॥ आह्लादंपरमंप्राप्तस्तवागमनतोमुने ॥ चिराग
तोसिचमुनेदिनंस्थातुंत्वमर्हसि ६ अतिसुंदरकायस्यतनयस्यममानघ ॥ गवेषयवधूंविप्रयतस्त्रैलोक्यगोभवान् ७ ॥ ॥ कउवाच ॥ ॥ तथैवपार्वतीप्राह

वधूंशीघ्रंविचारय ॥ ॥ नारदउवाच ॥ नस्थातुंशक्यतेस्वामिन्कर्मणाद्विमुहूर्तकम् ८ एतदर्थमहंप्राप्तोब्रह्मणाप्रेषितःशिव ॥ तवपुत्रप्रभावश्चलावण्यंव
यएवच ९ ज्ञातंधात्रासिद्धिबुद्धीतस्मैदातुमभीप्सता ॥ अनसूयाशचीचापितयोरूपेणलज्जिते १० संज्ञाभूद्दंडकारण्येशिलाहल्यापिसाह्यभूत् ॥ जालंधर
स्ययापत्नीवृंदामाधवमोहिनी ११ सापिवृक्षत्वमापन्नायद्रूपदर्शनाद्धर ॥ अन्येनानावरागौरिनागताब्रह्मणोहृदि १२ नैतादृशंक्वापिदेविसौंदर्यंशौर्यमेवच ॥
तयोर्योगेनचतवसुतःशोभामवाप्नुयात् १३ रत्नकांचनयोर्यद्वद्यथामुक्ताप्रवालयोः ॥ कउवाच ॥ एवंनारदवाक्येनसतुतोषहरःशिवा १४ शिवउवाच ॥
सम्यगुक्तंमुनेवाक्यंवांछितार्थकरंशुभम् ॥ कउवाच ॥ शिवोपितत्क्षणादेववृषारूढःसमाह्वयत् १५ इंद्रादीन्देवनिचयान्गौतमादीन्मुनीनपि ॥ अर्धांगेपा
र्वतींगृह्ययौहर्षसमन्वितः १६ शिखंडिनंसमारुह्यमयूरेशःपुरोययौ ॥ नारदस्तुतपोयोगादंतरिक्षचरोययौ १७ सप्तकोटिगणाःक्रीडांकुर्वंतोभिययुस्तदा ॥
नानायुधधराहर्षाद्गर्जयंतोदिशोदश १८ वाद्यत्सुसर्ववाद्येषुरजसाच्छादितेरवौ ॥ अष्टाशीतिसहस्राणिमुनयोपिययुर्मुदा १९ गंडकीनगरंसर्वेगंतुकामाव्य
लोकयन् ॥ गुल्मंमार्गेरक्षसांतेसप्तकोटिगणान्वितम् २० नभस्पर्शिमुखानांचसर्वदाकालधिकृताम् ॥ निशाचराःशुश्रुवुस्तेसेनायास्तुरवंदृढम् २१
सुप्तोत्थिताश्चसन्नद्धाययूरणविधित्सया ॥ राक्षसाऊचुः ॥ कस्ययूयंकुतोयाथकुतआगमनंचवः २२ विनाज्ञांनपुरेगंतुंदास्यामःस्वामिनश्चनः ॥ मयूरेशउवाच॥
स्वतंत्राअंतकादैत्यरक्षसांसाधुपालकाः २३ अतोयच्छंतुनोमार्गंनोचेन्नाशंव्रजिष्यथ ॥ कउवाच ॥ एतस्मिन्नंतरेप्राप्तोविकृतोहेमनामकः २४ असुरोथाब्रवी
देवमेकाकीप्रहितःपुरा ॥ इदानींराक्षसैःसार्द्धमादास्येजीवितंतव २५ उवाचराक्षसान्मोथनानादैत्याहतावलात् ॥ अहंचविकृतोनेनयतोहंहन्यतेजवात् २६
कउवाच ॥ इतितद्वचनंश्रुत्वाचुक्रोधसमयूरराट् ॥ मुनिपुत्रान्समाज्ञाप्ययुध्यध्वंमेह्यनुग्रहात् २७ कुशानुद्यम्यतेहर्षाद्युद्धंकर्तुंसमुद्यताः ॥ उवाचपृष्ठतोदेवोघ्नं
तुबालाःकुशैरिमान् २८ मंत्रितास्तेकुशास्तेषांमस्तकानच्छिनन्बहून् ॥ तेषांशस्त्राणिकुंठानिजातानितदनुग्रहात् २९ जायंतेतावदेतेतान्कुशैर्जघ्नुस्तुराक्षसान्॥
खंडशस्तेनिपेतुर्वैछिन्नबाहूरुजानवः ३० व्यस्मयंतचरक्षांसितृणैर्मृत्युंव्रजंतिकिं॥ एवंसर्वेहताबालैरखिलाराक्षसास्तदा ३१ जगर्जुस्तेमयूरेशंप्रापुर्नत्वाप्यपूजयन्
बालाऊचुः ॥ आज्ञयानिहताःसर्वेराक्षसास्त्वत्प्रसादतः ॥ पुनराज्ञांनःप्रयच्छकरिष्यामोगुणेश्वर ३२ आश्चर्यंपरमंजग्मुर्मुनयोयेसमागताः ॥ दृष्ट्वाबालैर्हतान्स
र्वान्राक्षसान्कुशसंचयैः ३३ पार्वतीवृषभात्तस्मादवरुह्यालिलिंगतम् ॥ शिवोपिप्राब्रवीद्देवंदृष्टस्तेद्यपराक्रमः ३४ तवशस्त्रहताःपूर्वंनिहताबालकैःकुशैः ॥ ब्रह्मा
दीनामगम्यस्तेप्रभावोगिरिजासुत ३५ नज्ञायतेमयावापिकिंकिमग्रेकरिष्यसि ३६ इतिश्रीगणेशपुराणेउत्तरखंडेराक्षसवधोनामनवाधिकशततमोध्यायः १०९
कउवाच ॥ जयशालीमयूरेशोयात्यग्रेहर्षनिर्भरः ॥ ॥ पृष्ठतोयांतिबालास्तेततोवृषगतःशिवः १ गौतमाद्यामुनिगणालग्नसिद्ध्यैययुस्ततः ॥ गर्जंतोगर्जयंतश्चदि
शश्चविदिशोपिच २ योजनावधिगंडक्याअवरुह्यशिखंडिनः ॥ अतिष्ठत्समयूरेशोमहार्हासनमुत्तमं ३ ततःसर्वानुपावेश्याशिवंगणमुनीश्वरान् ॥ वाद्यत्सुसर्ववा

द्येषुतानाहसमयूरराट् ४ सिंधुनानिहिताःकारागृहेशक्रादिदेवताः ॥ विनातन्मोचनंलग्नासिद्धिर्नैवभविष्यति ५ अतस्तन्मोचनार्थायप्रेष्यतांसिंधवेमहान् ॥ बुद्धिमान्सगृहीत्वाचेदागच्छेत्तान्सुरानथ ६ तदासाम्नैवसर्वेषांकुशलंहिभविष्यति ॥ नोचेद्युद्धेनजेष्यामोरणेसिंधुंमहाबलम् ७ मोचयिष्यामतान्देवांस्ततोलग्नंभविष्यति ॥ कउवाच ॥ एवंतद्वचनंश्रुत्वाप्राहुःसर्वेगुणेश्वरम् ८ सम्यगुक्तंमयूरेशसुधयासदृशंवचः ॥ बालभावेपितेबुद्धिर्बृहस्पतिसमाशुभा ९ पुष्पदंतंमहाबुद्धिंनीतिशास्त्रविशारदम् ॥ प्रेष्यतांसिंधुनिकटेदेवमोचनहेतवे १० वक्तारंबलिनंश्रेष्ठंस्तोत्रसंतोषितेश्वरम् ॥ कउवाच ॥ ततऊचेपुष्पदंतोमयूरेशंसुरेश्वरम् ११ महिमातेमयूरेशमनोवाचामगोचरः ॥ जानंतिनजनामायामोहितास्तवनित्यदृक् १२ भूभारहरणार्थंत्वमवतीर्णःशिवालये ॥ नमांप्रेषयतत्रत्वमन्यंप्रेषयसांप्रतम् १३ अपारसेनयायुक्तंसिंधुदैत्यंमहाबलम् ॥ उद्धतंबलिनंद्रष्टुमहंशक्ष्यामिनकाचित् १४ युद्धमेवकरिष्यामितदोर्दंडतेजसा ॥ यदिसाम्नाभवेत्कार्यंयुद्धंतत्रवृथामतम् १५ दानंभेदोवृथादंडोनीतिरेषासनातनी ॥ एवमाकर्ण्यतद्वाक्यमुवाचपार्वतीपतिः १६ सम्यगुक्तःपुष्पदंतनीतिमार्गःपुरातनः ॥ क्रोधवान्नक्षमःसाम्निकेवलंबलवान्परः १७ धरिष्यतिमहादुष्टंप्रेषितश्चेत्षडाननः ॥ प्रेषितोवीरभद्रश्चेत्क्रोधमेवकरिष्यति १८ शृंगीचेत्प्रेषितस्तत्रसंहारंसविधास्यति ॥ प्रमथःप्रेषितोमत्तोनजानेकिंकरिष्यति १९ प्रेषितश्चेद्भूतराजोभेषयिष्यतितांसभाम् ॥ स्त्रीसंभोगरतःस्याच्चुप्रेषितोरक्तलोचनः २० ततोब्रवीन्मयूरेशोनिरस्तेषुचतेषुच ॥ नंदीसमुद्रगंभीरोधैर्येपर्वतसन्निभः २१ बुध्याबृहस्पतिसमोजंभारिसदृशोबले ॥ धूर्तःपराशयज्ञाताप्रेष्यतांसामहेतवे २२॥ शिवउवाच ॥ सम्यगुक्तंमयूरेशज्ञातासिगुणदोषयोः ॥ नंदिनेदीयतांवस्त्ररत्नानिविविधानिच २३ ततोददौमयूरेशस्तानितस्यशिवाज्ञया ॥ आज्ञापयामासचतंगच्छसिंधुंमहाबलम् २४ यथादेवाविमुच्यंतेतथानीतिर्विधीयताम् ॥ सतुनत्वामयूरेशंसशिवांशिवमेवच २५ गणान्सर्वान्महावाक्यैःस्तुत्वातंचशिवांशिवाम् ॥ उवाचबुद्धिसंपन्नोदिष्ट्योचितमिदंवचः २६ ॥ नंद्युवाच ॥ समहान्जायतेलोकेयस्यवःस्यादनुग्रहः ॥ अतोहंश्रेष्ठतांनीतःसाधयिष्येप्रयोजनम् २७ वःप्रसादेनभूगोलंविधास्येन्युज्जमंजसा ॥ शेषंसूर्यंवोनिकटेआनयिष्येनसंशयः २८ ॥ कउवाच ॥ एवमुक्त्वाययौनंदीसिंधुदैत्यंबलान्वितः ॥ गतःसनगरद्वारंमनोवेगेनधैर्यवान् ॥ ध्यायन्गणेशंशंभुंचशिवांसर्वार्थसाधिकाम् २९ ऋतांकर्तुंप्रतिज्ञांतांप्रार्थयामासचेतसि ३० ॥ ॥ इतिश्रीगणेपु०उत्त०दशाधिकशततमोऽध्यायः ॥ ११० ॥ कउवाच ॥ प्रायात्सभांमहारम्यांद्वारपालनिवेदितः ॥ नंदीननंदतंदृष्ट्वादैत्यांसिंधुंसभागतम् १ महावीरैःपरिवृतंनानाशस्त्रास्त्रपाणिभिः ॥ वारांगनानृत्यरतंवीज्यमानंनृभिर्मुदा २ वाद्यत्सुसर्ववाद्येषुनादनादितदिक्षुच ॥ दृष्ट्वातंनंदिनंकेचिन्मेनिरेरविमागतम् ३ महाकायंमहावीरंवीक्ष्यकेचिच्चकंपिरे ॥ जगर्जुरपरेतत्रभीषयंतोबलादमुम् ४ नाबिभेतिमहावीर्यान्नंदीस्वबलगर्वितः ॥ करसंज्ञार्पितंनंदीभेजआसनमुत्तमम् ५ सर्वेतटस्थतांयाताश्चित्रगाइवपुत्तलाः ॥ बुध्वातदिंगितंप्राहनंदीवाचस्पतिःपरः ६ नानासभादृष्टपूर्वानेदृशास्तासुमूढकाः ॥ यूयंसर्वेतिबलिनःश्रियापरमशोभिताः ७ सुंदराःकामसदृशाबुध्याहीनाष्टकाइव ॥

सभायामागतःसाधुरसाधुर्दुर्बलोबली ८ प्रष्टव्योमाननीयश्चनीतिरेषासनातनी ॥ नसादृष्टासभामध्येजतोमेविस्मितंमनः ९ वृथासभासदःसर्वेवृथामात्याश्च
नागराः ॥ नायंधर्मोराज्ञएवसभ्यानांकृत्यमेवतत् १० ॥ कउवाच ॥ इतितद्वचनंश्रुत्वासिंधुःप्रोवाचनंदिनम् ॥ पद्मयोनेरिवतवमतिर्दृष्टागुणाकर ११ कस्य
त्वंकुतजायातःकिमर्थंवावृषेश्वर ॥ तेजसावह्निसदृशःपंचास्यइवविक्रमे १२ ॥ नंद्युवाच ॥ सुरभेःकामरूपायाअपत्यंनंदिनामकम् ॥ विद्धिमांगिरिजाना
थवाहंब्रह्मांडभेदिनम् १३ मयूरेशोधराभारहरोदुष्टनिबर्हणः ॥ अवतीर्णःशिवगृहेबाल्यात्प्रभृतिदैत्यहा १४ शेषोमूकोभवत्तस्यप्रतापवर्णनेब्जजः ॥ समु
द्रमथनाद्यद्वद्रत्नजातंबहिर्ययौ १५ तद्वन्नीतिंविमथ्याद्यकार्यसिद्धिंविचारय ॥ आज्ञांशृणुमयूरेशप्रेषितांबलवत्तराम् १६ आज्ञाभंगेतस्यभवेद्विनाशोयस्यक
स्यचित् ॥ यतःसृजतेविश्वंपातिहंतिचराचरम् १७ त्वयाविनिहिताःकारागृहेदेवगणाबलात् ॥ पदानितेषांलब्धानिभाग्यंस्यात्किमतःपरम् १८ इदानींवैरनि
र्मोकंविचार्यकर्तुमर्हसि ॥ मोचयाशुसुरान्सर्वानाज्ञयास्वामिनोमम १९ त्रिपुरेणकृतंवैरंशिवेनसहतत्क्षणात् ॥ हिरण्यकशिपुंस्तंभेवतीर्यहतवान्हरिः २०
तारकेणजितादेवाजातिष्ठत्तत्पदेस्वयम् ॥ स्कंदेननिहतोयुद्धेक्षणेनतारकोबलात् २१ अतोदत्वासुरान्मह्यंतिष्ठस्थानेसुखंचिरम् ॥ कउवाच ॥ एवंनंदिवचः
श्रुत्वाशुक्रोधसिंधुर्दैत्यराट् २२ उवाचरक्तनयनोवमन्निवहुताशनम् ॥ सिंधुरुवाच ॥ चातुर्येबहुधादृष्टंत्वदीयंवृषनंदन २३ प्रसंगेनवजानासियतोवाचस्पतेरपि॥
अज्ञानात्प्रकृतार्थस्यवचोयातिवृथार्थताम् २४ बालस्यतववाक्येनस्वामिनस्तेपिवाक्यतः ॥ मोचयेयंकथंदेवान्यावत्सोपिननिर्जितः २५ प्रमाणंकिंतुतेवा
क्यंवृणादवनचारिणः ॥ क्वतेगिरीशस्तत्पुत्रोवृथाभीतिःप्रदर्श्यते २६ लांगलेयोजयाम्यद्यदौत्येननागतोयदि ॥ यदिमेवक्रतांयायाद्भृकुटीक्रोधतोवृष २७
तदात्रिभुवनंनश्येत्कातत्रगणनातयोः ॥ रुष्टःसृगालःकिंकुर्यादप्रियंसिंहनागयोः २८॥ कउवाच ॥ एवंशब्दशरैर्विद्धोनंदीक्रोधादथाब्रवीत् ॥ नंद्युवाच ॥ विप
रीतांमतिंतेद्यलक्षयाम्यसुराधम २९ सन्निपातीवविकलंवल्गसेमरणोन्मुखः ॥ पूर्वंसामप्रयोक्तव्यमितितेनाहमीरितः ३० त्वयिनीतिर्वृथाजाताउपदेशोयथा
स्खले ॥ यदिनिंदाप्रयुक्तातेमयूरेशेशिवेपिच ३१ क्षीणमायुस्तयातेद्यनयुद्धेजयमेष्यसि ॥ इदानींहन्मित्वांमूढनाज्ञास्तिस्वामिनोमम ३२ नायकेननहंत
व्योदूतस्तेनापिनायकः ॥ इत्युक्त्वापातयन्दैत्यान्नंदीनिश्वासवायुना ३३ क्रोधेनतमपृष्ट्वैवप्रतस्थेहर्षनिर्भरः ॥ सान्निध्यंप्राप्यदेवस्यमयूरेशस्यतत्क्षणात्
३४ दूराद्ददर्शदेवोपिप्राहनंदीसमागतः ॥ प्रणिपत्याब्रवीद्देवंवृत्तांतंसर्वमादितः ३५॥ नंद्युवाच ॥ बहुधाबोधितोदैत्योनस्वीचक्रेवचोमम ॥ निर्भर्त्सितोबहुवि
धंतेनाहंचमयाचसः ३६ न्युब्जघटेयथाबिंदुस्तास्मिन्सर्वंवृथाभवेत् ॥ कउवाच॥ इतितद्वचनंश्रुत्वाप्रयातस्ययथागतम् ३७ जहर्षसमयूरेशोदैत्यमर्दनलालसः
आज्ञापयत्सयुद्धायप्रमथादीनगणांस्तथा ३८ इदानींसिंधुनगरेयुद्धंकर्तुंसमुत्सुकाः ॥ गर्जंतुवीरशब्दैश्चमोचितुंबंधनात्सुरान् ३९ हत्वासिंधुंचसबलंमोचितुं
चाखिलान्सुरान् ॥ मुनीनांत्वरमाणानांगंतुंस्वाश्रममंडलम् ४० ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेविचारवर्णनंनामैकादशाधिकशततमोध्यायः ॥ १११ ॥

॥ कउवाच ॥ ॥ शिखंडिनंसमारुह्यमयूरेशःपरेदिने ॥ आयुधानिचचत्वारिप्रगृह्यकरपंकजे १ जगर्जघनवद्घोरंययौरणचिकीर्षया ॥ शिवोपि
गर्जन्सहसावृषारूढोययौतदा २ सप्तकोटिगणाःपश्चात्सन्नद्धाययुरोजसा ॥ ततोनंदीप्राहतन्ननगंतुंसहसार्हथ ३ गणानांनायकेवीरभद्रेचमयितिष्ठति ॥
प्रमथेवाविद्यमानेशक्तेहंतुंसुरद्विषाम् ४ पश्यंतुसेवकमहस्ततोयांतुसुसंयुगम् ॥ ॥ कउवाच ॥ ॥ भारतीमेवमाकर्ण्यदेवोनंदीरितांतदा ५ उवा
चपरमप्रीतःसाधुसाधुत्वयोदितम् ॥ पराक्रमवतःसिंधोर्द्रष्टव्यस्तुपराक्रमः ६ इतियामिपुरोनंदिन्ययौयांतुसहैवनः ॥ ततस्तुभूतराजोथपुष्पदंतोपिवीर्य
वान् ७ ईयतुःपुरतस्तस्यकोटिसंख्यायुतागणाः ॥ वीर्यश्रियादीप्यमानाःसर्वेवीरामदान्विताः ८ आक्रमंतोदिगंतान्वैगर्जंतोघनवद्भृशम् ॥ भारेण
शेषशीर्षाणिनामयंतोधरामपि ९ क्रोधानलंवमंतस्तेप्रापुस्तांगंडकींपुरीम् ॥ दैत्यगुल्मेनिपेतुस्तेदशकोट्यसुरैर्युते १० ततस्तत्राभवद्युद्धंतुमुलंरोमहर्षण
म् ॥ शस्त्रास्त्रैर्बाणनिचयैर्भिंडिपालपरश्वधैः ११ केषांचिन्मस्तकाभिन्नाःपादाहस्तास्तथोरवः ॥ जानुजंघाश्चगुल्फाश्चमग्नाःकेपिगतासवः १२ निप
त्यपुनरुत्थायप्रायुध्यन्स्वपरैःसह ॥ एवंनिपतितादैत्याजसंख्यातागतासवः १३ पलाय्यनिर्गताःकेचिदाचख्युःसिंधवेखिलम् ॥ सभामध्येवीरगणै
रुपविष्टायकेचन १४ शस्त्राघातैःस्रवद्रक्ताःपुष्पिताइवकिंशुकाः ॥ तत्रागत्यमृताःकेचित्केचिद्वैर्यात्तमब्रुवन् १५ नगरद्वारगुल्मेतुदशकोटिनिशाचराः ॥
निवृत्ताःशस्त्रसंघातैर्युद्धंकृत्वापरस्परम् १६ यदाशैलभिदोयुद्धमभूत्तत्रजयोभवत् ॥ उपविष्टोसिकिंतूष्णींसिंधोस्वहितमाचर १७ आरामारिपुभिर्दग्धा
गृहाणिचप्रतोलिकाः ॥ अंधकारेधूलिकृतेप्रापलन्वह्नितेजसा १८ भुंजतोनिद्रिताःकेचिन्निर्ययुर्नगराद्बहिः ॥ बालानादायपपलुस्त्यक्त्वाभोगंचकेचन १९
विस्रस्तवसनाःकेचिद्ध्यानस्थावह्निनाहुताः ॥ तत्रापिनिधनंजग्मुर्नानाशस्त्रप्रहारतः २० धनंजयंसर्वदिक्षुवीक्ष्यपौराभयातुराः ॥ मेनिरेप्रलयंप्राप्तंदह्य
तेसकलापुरी २१ ॥ ॥ कउवाच ॥ ॥ एवंदूतमुखाच्छ्रुत्वासिंधुर्जृंभामथाकरोत् ॥ खादन्निवमृगान्सिंहःपर्वतेंद्रविनिर्गतः २२ उवाचदुर्धरासेनादृश्य
तेकिंभविष्यति ॥ दिदीपेक्रोधानलतोग्रसान्निवत्रिविष्टपम् २३ सिंहस्याग्रेकिंशशकःकरिष्यतिपराक्रमम् ॥ मेरोःकिंशलभःकुर्याच्चालनंजंबुकोपिवा २४
कालस्यममकिंकुर्याद्बालोयंतुमयूरराट् ॥ इत्युक्त्वाक्ष्वेडितेनासौनादयन्विदिशोदिशः २५ चिंतातुरःक्षणंतस्थौमुनिर्मौनमिवास्थितः ॥ ततोवीराःसिं
धुदैत्यंप्राब्रुवन्क्रोधमूर्छिताः २६ आज्ञांदेहिमयूरेशंजेष्यामःक्षणमात्रतः ॥ तवप्रतापाद्त्रैलोक्यंवशंनेष्यामसांप्रतम् २७ ॥ ॥ सिंधुरुवाच ॥ ॥ स
म्यगुक्तंमहावीराममापिरिपुदर्शने ॥ मनउत्कंठितंयस्मात्सैन्येनयुद्ध्यतामिह २८ ततःसर्वेपुरोयातागजैतोवीरसत्तमाः ॥ असंख्याताःशस्त्रधराश्चतुरंगब
लान्विताः २९ हयारूढःसिंधुदैत्यःक्रोधहर्षसमन्वितः ॥ वमन्क्रोधानलंवक्त्रान्नेत्राभ्यांरणदुर्मदः ३० ययावश्वंपुरोधायमनोवेगंमहाधनम् ३१ ॥ ॥ इ
तिश्रीगणेशपुराणेउत्तरखण्डेद्वादशाधिकशततमोध्यायः ॥ ११२ ॥ ॥ ७ ॥ ॥ कउवाच ॥ ॥ पदातयःपुरोयांतिकंपयंतोवसुंधराम् ॥

विकरालमुखावीराःसिंदूरारुणमस्तकाः १ केचिन्निबद्धकवचामुक्तकेशाःसुदारुणाः ॥ केचिन्निबद्धकटयःकेचिच्चंदनचर्चिताः २ नानाशस्त्रप्रहरणानाना युद्धविशारदाः ॥ पुरोयातिगजामत्ताधातुचित्राइवाद्रयः ३ दीर्घदंताविभांतिस्मभूषणैर्विविधैरपि ॥ घंटानादैर्जनंसर्वंबाधिरंचक्रुरंजसा ४ चूर्णयंतोगिरीन्वृक्षान्ययुःशुंडाप्रहारतः ॥ लसत्कुंभाःपताकाढ्याश्चित्रध्वजविराजिताः ५ ततोश्वाश्चखुराघातैश्चूर्णयंतोवसुंधराम् ॥ हेषितैर्नादयंतोवैगगनंचदिशोदश ६ सुवर्णरत्नमुक्ताभिर्भूषिताव्योमचारिणः ॥ अधिष्ठितामहायोधैस्तनुत्राणप्रशोभिभिः ७ नानाशस्त्रधरैर्वीरैःपरसेनाविमर्दिभिः ॥ ततस्तुरथिनोजग्मुःशस्त्रास्त्रैरिपुघातिनः ८ सहितायुद्धमार्गज्ञैर्वरैःसारथिभिर्मृधे ॥ मुक्तामणिमयामालावहंतोगंधमालिनः ९ धनुस्कंधास्तूणभृतोभल्लहस्ताःसखड्गकाः ॥ शस्त्रप्रभाभिर्नेत्राणिछादयंतोजनस्यह १० एवंसेनासमायातागर्जयंतीदिशोदश ॥ भूतराजेनसादृष्टापुष्पदंतेनवाहिनी ११ मयूरेशमुभौयातौततोभीत्यापलायितौ ॥ ॥ तावूचतुः ॥ ॥ तवाज्ञयापुरोयातावावाभ्यांनिहताचमूः १२ गुल्मस्थानगरद्वारिदग्धंचनगरंबहु ॥ प्रतापंनौसमाकर्ण्यसिंधुःस्वयमुपागतः १३ चतुरंगांचमूंगृह्यनानाशस्त्रास्त्रधारिणीम् ॥ ततोभीत्याभवंतंचसमायातौमहाबल १४ ॥ ॥ कउवाच ॥ ॥ सिंधुसैन्यसमुद्रोथवदतोरेवमेतयोः ॥ ददृशेपूर्वदिग्भागेदुस्तरःशस्त्रयोधिभिः १५ ततोहर्षयुतोज्ञात्वादैत्यवृत्तंसमासतः ॥ नीलकंठंसमारुह्यमयूरेशोययौपुरः १६ आयुधानिचचत्वारिचतुर्दोःषु प्रगृह्यसः ॥ सन्नद्धागणकोव्यस्ताधनुर्बाणासिपाणयः १७ परिवार्यस्थितादेवंनीलकंठंवृषस्थितम् ॥ मुनीश्वराःस्तुवंतिस्मददुराशीर्वचोपितम् १८ उभयोःसेनयोर्वाद्यघोषकोलाहलोमहान् ॥ परस्परंसंपदंतांवीक्ष्यसेनेसुविस्मिते १९ असंख्यातंबलंवीक्ष्यतुतोषसमयूरराट् ॥ यदुक्तं नंदिनापूर्वंतद्दृष्टंसर्वमेवहि २० ततो नंदीमयूरेशंनत्वा गर्जन्मुहुर्ययौ ॥ नभोमार्गेणसैन्येषुचिच्छेदवीरमस्तकान् २१ शृंगाघातेनमहताहयमस्याहनद्दृढम् ॥ शीघ्रमुड्डीयचययौमयूरेशंयथाक्षतः २२ आश्चर्यंचक्रिरेसर्वेगणाःसाध्वितिशंसिरे ॥ छत्रंचपातयामासनंदीशृंगप्रहारतः २३ पतितेस्वेचछत्रेचसिंधुरश्चांतरेगतः ॥ धारयामासचतदाछत्रमन्यन्महाधनम् २४ आश्चर्यंपरमंमेनेनंदिनःकर्मणासुरः ॥ चुक्रोधसमहावीरान्कृगतोवःपराक्रमः २५ एवमाकर्ण्यतद्वाक्यंकौस्तुभोमैत्रएवच ॥ अमात्यौतंनमस्कृत्यसेनयाचतुरंगया २६ मार्चिंतांकुरुसिंधोत्वंविधास्यावोरिपुक्षयम् ॥ अन्यथानमुखंनाथदर्शयावःकथंचन २७ एवमुक्त्वाप्रचलितौपरसैन्यनिबर्हणौ ॥ पदातीनांगणायाताब्रह्मांडास्फोटतत्पराः २८ न्युब्जतामिच्छवोनेतुंभूगोलंरणदुर्मदाः ॥ कौस्तुभोथमयूरेशंयातोमैत्रश्चपातितुम् २९ शरवर्षैःपरिच्छाद्यया तावस्थांतिकंयदा ॥ वीरभद्रस्तदायातोयोद्धुंसचषडाननः ३० असंख्यसेनयायुक्तोगर्जयंतौदिशोदश ॥ निजघ्नतुरुभौरोषात्सिंधुंनानाप्रहारतः ३१ कौस्तुभोप्यथमैत्रश्चजघ्नतुस्तौपरस्परम् ॥ सहस्वमारयस्वेतिव्याहरंतःपरस्परम् ३२ शस्त्रैरस्त्रैरनेकैश्चताभ्यांयुद्धमकुर्वताम् ॥ शरव्रातैर्भिंडिपालैःपरिघैर्मुसलैरपि ३३ नानासेनाचराजघ्नुःपरस्परवधेप्सवः ॥ नष्टेषुसर्वशस्त्रेषुशरेषुचपरस्परम् ३४ मल्लयुद्धंप्रचक्रुस्तेजीवग्राहममारयन् ॥ व्यसवःपतिताःकेचिद्वेमूरक्तंमुखा

द्वहु ३५ पादंपादेनजघ्नुस्तेस्कंधंस्कंधेनचापरे ॥ पृष्ठंपृष्ठेनकेचिच्चहस्तंहस्तेनचापरे ३६ मस्तकंमस्तकेनैवकूर्परंकूर्परेणच ॥ पतिताःपात्यमानाश्चमृताभग्नाश्च चूर्णिताः ३७ छिन्नकंठाभिन्नभुजाभग्नजंघोरुबाहवः ॥ एवंनष्टेषुसैन्येषुसिंधुसेनाजयंययौ ३८ जयशब्दैःस्तूयमानैर्बंदिभिर्वाद्यनिस्वनैः ॥ सिंधुदैत्येश्वरंयातौ अमात्यौमित्रकौस्तुभौ ३९ मयूरेशंसमायातौवीरभद्रषडाननौ ॥ ततोस्तमगमत्सूर्यस्ततोयुद्धमुपारमत् ४० अपरेह्नेथयुध्यंतदेवसैन्येनदानवाः ॥ पलाय मानांतांसेनांनिजघ्नुःशरसंचयैः ४१ पुनरावेशमापन्नौवीरभद्रषडाननौ ॥ गर्जंतौगर्जयंतौचगगनंचदिशोदश ४२ निघ्नंतौरिपुसेनांतांनिर्दहंतौक्रतांतवत् ॥ अंधकारेमहाघोरेनप्राज्ञायतकिंचन ४३ स्वान्परानपिजघ्नुस्तेयुध्यमानामहाबलाः ॥ भग्नायांसिंधुसेनायांचक्रतुर्जयनिस्वनम् ४४ दैत्यामात्यौपुनर्यातौमर णेकृतनिश्चयौ ॥ प्रेरयामासतुरुभौनिजाश्चौपरवाहिनीम् ४५ किरंतौशरजालानिजघ्नतुःकरवालतः ॥ ततःषडाननोदृष्ट्वातयोरतिपराक्रमम् ॥ मुष्टिघातेन तौहत्वानिजसेनामगाज्जवात् ४६ मित्रस्तुभूमिमगमद्वमन्रक्तंमुखाद्बहु ॥ तथाविधंचतंदृष्ट्वाकौस्तुभोयोद्धुमागतः ४७ षडाननमथोरोषान्निजघ्नेकरवाल तः ॥ तस्मिन्मूर्छांमवाप्तेतुवीरभद्रोप्ययुध्यत ४८ कौस्तुभःप्राहनद्रोषाच्छरघातैरनेकशः ॥ सोपितंप्राहनन्मुष्ट्याभूमौचैनमघातयत् ४९ हतेतस्मिन्ननंदा सौवीरभद्रोमहाबलः ॥ पपालदैत्यसेनासाहतेमित्रेचकौस्तुभे ५० तमुदंतंशस्त्रहताःस्रवंतोरुधिरंबहु ॥ न्यवेदयन्दैत्यराजासिंधवेदेवशत्रवे ५१ वाचाविस्पष्ट यादुःस्वाच्छस्त्रघातकृताद्दृशम् ॥ जयमाकांक्षतेनित्यंमित्रकौस्तुभयोर्भृशम् ५२ इतिश्रीगणेशपुराणेउत्तरखंडेमित्रकौस्तुभवधोनामत्रयोदशाधिकशततमो ध्यायः ॥ ११३ ॥ ॥ वीराऊचुः ॥ ॥ नानाशस्त्रप्रहरणौमृतौतौमित्रकौस्तुभौ ॥ असंख्याताहतासेनाताभ्यांनिशिदिवापिच १ ततोरिपुबलाद्दुष्टौ वीरौद्वौसमुपस्थितौ ॥ ताभ्यांबलिभ्यांनिहतानिजसेनाविमर्दिता २ ययोःकरप्रहाराभ्यांगतौतौयमसादनम् ॥ दृष्टानानाविधासेनानदृष्टौताद्दशौसुरौ ३ ॥ सिंधुरुवाच ॥ ॥ यौदृष्ट्वासीबभीतिस्मकृतांतोभूतहारकः ॥ तौकथंकरघातेनमृतौशंसयसैनिकाः ४ पराक्रमामिदानींमेपश्यंतुसर्वसैनिकाः ॥ रणभूमौन र्तयिष्येशिरःशत्रोर्नसंशयः ५ चक्रयुद्धंकरिष्यामिचक्रपाणेर्यतःसुतः ॥ इत्युक्त्वाहयमारुह्यमयूरेशंययौखलः ६ असंख्यकोटयोदैत्यानांपुरोयाताम्हाबलाः ॥ योद्धुकामाःसुरेंद्रेणशिवपुत्रेणदुर्धराः ७ ततोनंदिपुष्पदंतौयोद्धुंयातौमहाबलौ ॥ भूतराजश्चविकटोदशलक्षैश्चयोधिभिः ८ चपलोप्यर्धलक्षेणयोद्धुका मोभिनिर्ययौ ॥ षडाननोवीरभद्रोसंख्यसेनासमायुतौ ९ ईयतुर्युद्धबलिनौनानाशस्त्रधरावुभौ ॥ सप्रव्यूहान्समालोक्यप्राव्यूहन्दैत्यसैनिकाः १० गंधासु रोथमदनकांतोवीरोध्वजस्तथा ॥ महाकायश्चशार्दूलोधूर्तनामाथसप्तमः ११ सप्तव्यूहान्पुरस्कृत्ययुयुधुस्तान्समागतान् ॥ बाणदृष्ट्यासमाच्छाद्यभल्ला ग्रैस्तान्निजघ्निरे १२ भिंडिपालहताःकेचिन्निपेतुर्धरणीतले ॥ षडाननेनयुयुधेबलाद्गंधासुरोबली १३ वीरभद्रेणमदनकांतोपियुयुधेरणे ॥ नंदीचवीरो जघ्नयुयुधातेपरस्परम् १४ ध्वजासुरपुष्पदंतौशस्त्रास्त्रैर्बाणसंचयैः ॥ भूतराजोमहाकायोयुयुधातेपरस्परम् १५ धूर्तश्चविकटश्चैवद्वंद्वयुद्धमकुर्वता

मू ॥ चपलेनहतोरोषाच्छार्दूलोन्यपतद्भुवि १६ पुनःसंज्ञामवाप्यैनंसोपिखड्गेनचाहनत् ॥ मूर्च्छामवापमहतींचपलश्चपलोयुधि १७ प्रवृत्तेद्वंद्वयुद्धेतु युयुधातेबलेउभे ॥ जघ्नतुःशस्त्रसंघातैर्बाणजालैःपरस्परम् १८ सहस्वजाहिमाभैस्त्वंहतःस्वर्गंसमेष्यसि ॥ क्षीणेषुशस्त्रबाणेषुलत्ताभिर्मुष्टिभिःपुनः १९ युयुधुःसर्वसैन्यानिनाशयंतिपरस्परम् ॥ कश्चिच्चचरणौधृत्वापोथयामासवैरिणम् २० कश्चिदुड्डीयन्यपतच्चूर्णयामासवैपरम् ॥ कश्चिच्चिच्छेदचशिरःकश्चिद्बाहुं रिपोरणे २१ कश्चित्पादौजानुनीचगुल्फौचिच्छेदचापरः ॥ शरवृष्टिंपरेकेचित्परस्परमवासृजन् २२ स्रवद्रक्तःशस्त्रहतोमरणावध्ययुध्यत ॥ कबंधायुयुधुस्तत्र जघ्नुःस्वांश्चपरानपि २३ अपरेसहसापेतुर्विदीर्णवक्षसोनराः ॥ परस्परावातहतौमृतौकेचिद्रणाजिरे २४ एकाप्सरःप्राप्तिकृतेस्वर्गयुद्धमकुर्वतां ॥ असृङ्नद्यभ वत्तत्रकेशशैवलसंयुता २५ खड्गमत्स्यवतीखेटमहाकूर्मादुरत्यया ॥ प्रेतकाष्ठवहाघोराचामरतृणसंयुता २६ कंचुकग्राहशोभाढ्यामहाकटकभेकिका ॥ शूरमोदकराभीरुमहाभयविवर्धिनी २७ मेदोजलादुःखतरामांसकर्दमशालिनी ॥ ततोस्तमितआदित्येनप्राज्ञायतकिंचन २८ नहंतव्यावयंदैत्यवाहिनी चारिणःसुराः ॥ नहंतव्यावयंदेववाहिनीचारिणोसुराः २९ एवंकोलाहलैस्तत्रप्रायुध्यंतपरस्परं ॥ आशिषोऽथददुस्तत्रश्वापदाभूतराक्षसाः ३० शृगालाःपतगा श्येनास्तृप्ताःपार्वतिनंदनं ॥ दिनत्रयमभूदेवंदिवारात्रौमहारणः ३१ वाद्यशब्दैर्जयंरात्रौघोषयंतःपरस्परं ॥ एवंगंधासुरोयुध्यत्सेनान्याबहुविस्तरं ३२ मद्यपा नेनमत्तोसौत्यक्त्वाशस्त्राणिवेगवान् ॥ अहनन्मुष्टिघातेनसहसातंषडाननं ३३ न्यपतत्सतदाभूमौवज्राहतइवाचलः ॥ अधावत्सोपिलब्ध्वाशुसपक्षइवपर्वतः ३४ संज्ञांद्वादशभिर्हस्तैरविध्यत्तंमहासुरं ॥ शरजालान्यनेकानिविसृजन्षड्धनुर्वरैः ३५ निवार्यशरजालानिछादयामासतंशरैः ॥ गंधासुरोमहावेगात्षडाननमना मयं ३६ तन्निवार्यदधारैनंचरणेसषडाननः ॥ अकस्माद्भ्रामयित्वैनंपातयामासभूतले ३७ तस्यांगंशतधाजातंगतासोर्द्दढवाततः ॥ तस्मिन्हतेतस्यसेनाययौ व्यग्रादिशोदश ३८ पृष्ठलग्नोनिंदतिस्मसेनांतांसषडाननः ॥ सेनश्चक्रोधनश्चैवशतघ्नोयोद्धुमाययुः ३९ येषांशब्दोमहानासीद्घनानामिवगर्जतां ॥ ऊचुःष डाननंदुष्टसेनानोनिहताबहु ४० इदानींयाहिभवनंहतोरविसुतस्यह ॥ ततआच्छादयामासुर्युगपत्तेषडाननं ४१ ग्रामींसहायथासिंहंबहवोबलवत्त राः ॥ षड्धनुर्भोचितैर्बाणैर्न्यहनत्तान्षडाननः ४२ ततस्तेमूर्छिताःपेतुर्मुहूर्तादुत्थिताःपुनः ॥ पाशंक्षिप्त्वास्कंदगलेनिन्युस्तंपशुवत्त्रयः ४३ ज्ञात्वानीतंषण्मुखं तमाधावंस्तेत्रयोजवात् ॥ हिरण्यगर्भोबलवान्श्यामलोरक्तलोचनः ४४ त्रिभिस्तेमुष्टिघातेनहताःपेतुर्धरातले ॥ ततोमदनकांतोपिवीरभद्रंमहाबलं ४५ न्यह नच्छक्तिघातेनसमूर्छांमहतींययौ ॥ त्यक्त्वामूर्छांवीरभद्रोदंडघाताल्यपातयत् ४६ मृतंमदनकांतंतंवीरराजोमहाबलः ॥ ज्ञात्वाप्रायान्निहंतुंतांस्त्रीन्सुरान्बल वत्तरान् ४७ ततस्तान्न्यहनद्रोषाच्छृंगाभ्यांनंदिकेश्वरः ॥ अस्रवद्रुधिरंवक्त्राच्छतधाभूतलेपतत् ४८ तंहतंतुविलोक्याशुचत्वारोसुरसत्तमाः ॥ आययुर्नंदिनंहंतुंशार्दूलोथध्वजासुरः ४९ महाकायोधृतश्चैवसर्वदेवजितोरणे ॥ नानाशस्त्रैर्निजघ्नुस्तेनंदिनंबलवत्तरं ५० पतितेनंदिनितत श्चत्वारोयुद्धदुर्मदाः ॥ पुष्प

दंतोभूतराजोविकटश्चपलोपिच ५१ तेतुशैलान्समादायतोलयित्वानिचिक्षिपुः ॥ सर्वेषांमस्तकाभिन्नाश्चूर्णीभूताश्चकेचन ५२ धराघातेनतेसर्वेधरायांप
तितारणे ॥ केचिच्चसिंधुमगमन्शस्त्रघातप्रपीडिताः ५३ पराजयंस्वसैन्यानांप्राहुर्देवजयंतथा ॥ जयंप्राप्तादेवसेनाबहुवाद्यान्यवादयत् ५४ मयूरेशमयूरेश
जयत्वंजयसर्वदा ॥ इत्यब्रवीद्धर्षयुतास्वानंदेननननर्तच ५५ इतिश्रीगणेशपुराणेउत्तरखंडेचतुर्दशोत्तरशततमोध्यायः११४ ॥ कउवाच ॥ श्रुत्वासेनाजयंदैत्योय
गौचिंतांमहत्तरां ॥ अत्यंतम्लानवदनोनिमग्नोदुःखसागरे १ मनसापरितप्तेनचिंतयामासदैत्यराट् ॥ सिंधुरुवाच ॥ विपरीतामिदंकस्माज्जातंनज्ञायतेमया २ पि
पीलिकाग्रसेत्किंनुब्रह्मांडंलोकसंकुलं ॥ यस्याग्रेमशकादेवाआसन्निद्रादयोमम ३ शिवाभ्रंकेनतस्याद्यकथंसेनाविनिर्जिता ॥ कउवाच ॥ इत्युक्त्वाहयमारुह्य
धनुर्बाणासिचर्मभृत्४अहत्वातंमयूरेशंदर्शयिष्येमुखंनच ॥ इत्युक्त्वाभिययौसिंधूरणभूमौपतंगवत्५सज्जंचकारचधनुर्नादयन्गगनंदिशः ॥ व्यसृजद्बाण
जालानितीक्ष्णान्यग्निमुखानिसः ६ चकंपेपृथिवीसर्वामूर्छिताजंतवोखिलाः ॥ प्राक्षिपद्देवसेनायामसंख्याताश्चपत्रिणः ७ छिन्नाभिन्नाःसुराःपेतुस्तच्छ
स्त्राघातपीडिताः ॥ पलायंतःसुराःपेतुस्तेपिपृष्ठेशरैर्हताः ८ ततःसर्वामयूरेशवाहिनीव्यग्रतामियात् ॥ द्विधाभूताजानुपादाःकेषांचिन्मस्तकाअपि ९ शर
वृष्ट्यासिंधुहस्तमुक्तयारणमूर्धनि ॥ अभवत्तुमुलंयुद्धमनिवार्यंभयावहम् १० सिंधोश्चैवगणेशस्यसेनयोरुभयोरपि ॥ कोलाहलेमहाघोरेध्वांतेगाढेरजःछ
ते ११ पुरोगान्वज्राग्निरेसर्वेपरान्स्वानपितेतदा ॥ शस्त्राघातैर्हतासेनादेवसेनाचरैःपरा १२ ततःसिंधुर्हयात्तस्मादवरुह्यपदेग्रहीत् ॥ पातयामाससहसावीरभद्रंच
वेगतः १३ जघनन्मस्तकेसोथनंदिनंबलवत्तरम् ॥ भूतराजंचखड्गेनमारयन्सहसाकटौ १४ पुष्पदंतस्योदरंचबिभेदबलवत्तरम् ॥ शिखामाक्रम्यप्राकर्ष
द्विरण्यगर्भमोजसा १५ श्यामलस्यललाटंसबिभेदशरघाततः ॥ चपलस्यहनूरोषाज्जघानविकटंरणे १६ लंबकर्णस्यकंठंसबिभेदबाणसंचयैः ॥ धृत्वा
तुचरणौरक्तलोचनंचन्यपातयत् १७ हस्ताभ्रिस्तीर्यसहसासुमुखःप्रापलज्जवात् ॥ सोमंलत्ताप्रहारेणरणभूमावपातयत् १८ जठरंदारयामासभृंगिणोसिप्र
हारतः ॥ दावानलस्यचशिरोभेदयामाससायकैः १९ पंचाननस्यपृष्ठेसोवधीच्चचपलोयुधि ॥ एवंसर्वेमहावीरानिहतारणमूर्धनि २० द्रुतंपलायिताश्चा
न्येततःसिंधुःपुरोययौ ॥ जगर्जघनवद्घोरंनादयन्भुवनत्रयम् २१ सविव्याधमयूरेशंशरजालैरनेकधा ॥ तस्यदेहंसमालोक्यविकरालंभयानकम् २२ वि
रूपाक्षादयःसर्वेपलायनमकुर्वत ॥ मुनियुक्तोगणेशश्चयुयुधेसंयुगेतदा २३ सचकंपेकरिशिशुःसिंहस्येवास्यदर्शनात् ॥ ततोब्रवीद्रोषवशात्सिंधुस्तंतुगुणे
श्वरम् २४ ॥ सिंधुरुवाच ॥ दूरात्तेश्राविबद्धशःपुरुषार्थःशिवाभ्रंक ॥ प्रत्यक्षंदृश्यसेरेत्वंजंबूकइवदुर्बलः २५ कथंमेसहसेमूढतलाघातंशिलाभिदम् ॥
त्वयामातुःस्तनंपीत्वानर्तव्यंहिगृहांगणे २६ शक्रादयोजिताथेनतस्यतेगणनात्रका ॥ निवारयतिमांमूढकृपांत्वांहंतुमुत्सुकम् २७ कथंतेकोमलांगेषुवि
ध्येतीक्ष्णतरान्शरान् ॥ ॥ देवउवाच ॥ किमर्थंवल्गसेमूढभावेनाधमपामर २८ नावतारंगृहिष्येहंयदिजानेल्पकंवपुः ॥ तवेदानींहनिष्यामिक्षणेन

देहमल्पकम् २९ मूर्यदत्ताद्वराद्दुष्टदुष्कर्मनिरतोभवान् ॥ इदानींसगतःकालोमृत्युकालउपस्थिते ३० वल्गनाकुशलस्त्वंकिंयुद्धमद्यकारिष्यसि ॥ त्वाहं तुंमोचितुंदेवान्धृतंरूपमिदंमया ३१ अंतकालेसन्निहितेपुरुषार्थोवृथाभवेत् ॥ मयाहतेमहास्थानंममप्राप्स्यासिदुर्लभम् ३२ ॥ सिंधुरुवाच ॥ याव न्नच्छेद्मितेमूढकोमलंदेहमुत्तमम् ॥ तावद्वल्गसियोयस्यभक्तःस्यात्समृतोव्रजेत् ३३ तस्यलोकंवृथाहित्वंनप्रशंसांवदात्मनः ॥ ॥ कउवाच ॥ ए वमुक्त्वामहादैत्यःसायकंपरभेदिनम् ३४ नकदाचित्प्रकटितमतितीक्ष्णंजयावहम् ॥ स्मृत्वासूर्यंधनुर्गृह्यसज्जंकृत्वान्ययोजयत् ३५ टणत्कारेणधनुषोनादितं भुवनत्रयम् ॥ मुमोचबाणंतंदेवेमयूरेशेबलात्खलः ३६ सजज्वालदिशःसर्वागगनंविदिशोपिच ॥ तंदृष्वासमयूरेशस्तत्याजपरशुंनिजम् ३७ वज्रात्सारतरंसर्व वैरिदर्पहरंपरम् ॥ अदहत्सोपित्रींल्लोकान्प्रलयानलसन्निभः ३८ परशुःखंडयामासनभस्थेवचतंशरम् ॥ धरायांपात्यशतधादैत्यहस्तमथाच्छिनत् ३९ धनुर्भा रसहंघोरंनभस्थेवगतंकरात् ॥ ततःक्रोधेनदैत्यःसचक्रंतत्याजशत्रवे ४० शतह्रदेवतच्छब्दंचकारगर्जयन्नादिशः ॥ दृष्ट्वातत्रमयूरेशःशूलमुग्रंमुमोचह ४१ ददाहभुवनंतच्चपपातदैत्यमस्तके ॥ मुकुटंकुंडलेकर्णौखंडयित्वाययौपुनः ४२ मयूरेशकरंशीघ्रंयथानत्याजितंतथा ॥ ततःक्रोधादुवाचैनंछिन्नकर्णो महासुरः ४३ षौरुषंदर्शितंतेद्यदर्शयिष्येतवापिच ॥ इदानींशरघातेनछिनद्मिनासिकांतव ४४ इत्युक्त्वाखड्गहस्तोसौतंजगामगुणेश्वरम् ॥ मयूरेशस्त दाचक्रेनानारूपाणिसर्वतः ४५ आयुधानिचचत्वारिबिभ्रन्करचतुष्टये ॥ ततःसविस्मयाविष्टोदशादिक्ष्वलोकयत् ४६ ददर्शतत्रतंदेवंचतुरायुधभूषितम् ॥ ततःसलज्जितोगेहंनिजंगंतुंमनोदधे ४७ तथापिपुरतोपश्यन्मयूरेशंतथाविधम् ॥ आच्छाद्यनेत्रेसययौहृद्येनंसमलोकयन् ४८ उन्मील्यनेत्रेसोपश्यत्पु रएनंशिखंडिनि ॥ ततोदैत्योबुबोधैनंस्वांतेरविप्रसादतः ४९ रणस्थलात्पुरीयातआच्छद्यवदनांबुजम् ॥ हतशेषश्चवीरैश्चतादृशैःपरिवारितः ५० पर्यंकेन्यपतच्चिंतापर्याकुलितमानसः ॥ वीरास्तेस्वगृहंयाताश्चिंताव्याकुलचेतसः ५१ ॥ ॥ इतिश्रीगणेपुराणेउत्तरखंडेसिंधुवैरूप्यकरणंनामपंचदशाधि कशततमोऽध्यायः ॥ ११५ ॥ ॥ कउवाच ॥ ॥ जयंप्राप्तेमयूरेशेययुस्तत्रमुनीश्वराः ॥ शिवोपिगिरिजायुक्तोययौतंचनिरीक्षितुम् १ औत्सुक्यात्पार्वती चैनंसमालिंग्याब्रवीत्तदा ॥ पार्वत्युवाच ॥ अतिश्रांतोसिदैत्ययस्यकठिनस्यरणेसुत २ कोमलानितवांगानिकथंशस्त्राणिसेहिरे ॥ कृतांतसदृशोदैत्योमा यावीबलवत्तरः ३ सकथंकोमलांगेनत्वयायुधिविनिर्जितः ॥ प्रारुदत्करुणंदेवीधृत्वांकेनिजबालकम् ४ ततोमुनिगणाःशंभुर्वारयामासतांशिवाम् ॥ शिव उवाच ॥ नजानीषेमयूरेशंसर्वकारणकरणम् ५ अनादिनिधनंदेवंवेदांतागोचरंविभुम् ॥ त्रयस्त्रिंशत्कोटिदेवैर्नुतंदेवारिदारणम् ६ सृष्टिस्थितिज्ञानहेतुंल यहेतुमनामयम् ॥ भूभारोत्तारणार्थायनानारूपधरंपरम् ७ ब्रह्मांड्यात्तरोमांकमेकानेकस्वरूपिणम् ॥ तपोबलसमायुक्तंयोगशास्त्रसमन्वितम् ८ माया विभेदकंदेवंमायिनामपिमायिनम् ॥ बालभावेपिदैत्यानांहंतारंकिंनवेत्सितम् ९ ॥ कउवाच ॥ एवंस्तुतिंसमाकर्ण्यहृष्टासापार्वतीतदा ॥ ततोहृष्टोमयूरे

शोमुनीन्प्राहशिवांशिवाम् १० ॥ मयूरेशउवाच ॥ नभयंवज्रहस्तान्मेअन्यस्मात्तत्कथंभवेत् ॥ सर्वेषांनमनान्मातर्मुनीनामाशिषोपिच ११ शिवस्यवरदानेनासिंधुर्दैत्योजितोमया ॥स्कंदादयोजितायेनयुध्यंतेनहितेनते १२असंख्याताह तादेवादैत्यसेनाचरैर्नरैः॥ असृङ्नद्यःसंप्रवृत्तावीरहर्षकराबहु १३रणेनिपतिता न्देवान्विचिन्वानोमुनीश्वराः ॥ कउवाच ॥ एवंमयूरेशवचोनिशम्यप्राहधर्मवित् १४ वसिष्ठोमुनिवर्यस्तंयामःसर्वेचलंतुवै ॥ ततोययौरणेद्रष्टुंमुनिभिस्तैर्मयूरराट् १५ मज्जारक्तवसागंधोघ्रातुंयत्रनशक्यते ॥ अतिभीषणकायांस्तान्छिन्नभिन्ननानेकशः १६ दृष्ट्वाबिभत्सरूपांस्तान्प्रफुल्लाङ्किंशुकानिव ॥ विछिंतिपरियातानिमनांसिदानवद्विषाम् १७ पश्यतांवीररार्शीस्तान्वीरोपरिप्रतिष्ठितान् ॥ कांश्चिच्चजीवतःकांश्चिन्मूर्छितान्शस्त्रघाततः १८ कांश्चिच्चप्रविशीर्णांगान्देवान्देवान्यकर्षयन् ॥ सहसानविदुर्दैवादेवान्वादानवानपि १९ अब्रुवंस्तत्रकेचिच्चत्वदर्थंमृत्युमागताः ॥ अंतेतेदर्शनंप्राप्तमित्युक्त्वान्यसृजन्मुनून् २० ॥ कउवाच ॥ एवंश्रुत्वातुतद्वाक्यंसाश्रुकंठोमयूरराट् ॥ भ्रमन्भ्रमन्ददर्शाग्रेमूर्छितंतुषडाननम् २१ पतदश्रुर्मयूरेशःस्नेहात्तंचाब्रवीदिति ॥ उतिष्ठोत्तिष्ठभद्रंतेकिंशेषेप्राकृतोयथा २२ श्रांतोसिदैत्यहननाद्यच्छालिंगनमद्यमे ॥ प्रमार्जितस्तुहस्तेनततःसप्रोदतिष्ठत २३ अपश्यन्निकटेदेवपादपद्मंभयापहम् ॥ उवाचचमयूरेशंदर्शनात्तेगतंमम २४ सर्वदुःखंश्रमश्चैववविश्रांतश्चास्मिसांप्रतम् ॥ आलिलिंगमयूरेशंदोर्भिर्द्वादशभिस्तदा २५ उभौयातौरणं द्रष्टुंगृहीत्वाचपरस्परम् ॥ अपश्यतांपुरःसुप्तंवीरभद्रमिषुक्षतम् २६ नंदिनंचशराघातैःपीडितंबलवत्तरम् ॥ भूतराजंचपुरतोविभिन्नमस्तकंतदा २७ क्रंदंतं विकटंचैवपुष्पदंतंभृशार्दितम् ॥ ललाटेदृढविद्धंचहिरण्यगर्भमेवच २८ मृतप्रायंचचपलंमृतंश्यामलमेवच ॥ लंबकर्णानचाज्ञासीद्भ्रांत्याकंचनसंगरे २९ उदानवायुनाक्रांतःसुमुखस्तत्रचाभवत् ॥ परमंखेदमापन्नःसोमश्चरक्तलोचनः ३० शेतेस्ममूर्छयाश्रृंगीपंचास्यश्चमुमूर्षया ॥ शंखःप्रेतत्वमापन्नोभयकृत्सर्वयोधिनाम् ३१ एवंदृष्ट्वासर्ववीरान्हतप्रायान्हतानपि ॥ चिंतयापरयाविष्टोपप्रच्छतंषडाननम् ३२ ॥ ॥ मयूरेशउवाच ॥ ॥ असुराश्च स्वकीयाश्चमहावीराहतामृधे ॥ निजधामगताःसर्वेजीवतामत्रकागतिः ३३ ॥ ॥ स्कंदउवाच ॥ ॥ अनंतकोटिब्रह्मांडनायकस्त्वंगुणेश्वर ॥ चतुर्दशानांविद्यानांसर्वासांचस्वयंनिधिः ३४ कलानांतत्रकिंप्रश्नंकरोषित्वंममांतिके ॥ नाहंमंत्रंविजानामिवेत्थत्वंहिनवैसुराः ३५ विवर्द्धयसिकीर्त्तित्वंनानादैत्यविभंजनात् ॥ यथामतिब्रवीमित्वामाज्ञयाचस्मृतेर्बलात् ३६ पूर्वंतुत्रिपुरवधेशिवेनयुद्धमद्भुतम् ॥ कृतंतत्रमृतान्देवान्द्रोणाद्रेर्विल्लिजंरसम् ३७ देवक्षतेषुसंयोज्यजीवयामासतत्क्षणात् ॥ ॥ कउवाच ॥ ॥ श्रुत्वेत्थंवचनंदेवोजगादतंषडाननम् ३८ इदानींदैत्यकोट्यस्तुयुद्धार्थंबलवत्तराः ॥ आयास्यंतितदाकोत्रयुद्ध्येत्ताभिःषडानन ३९ कश्चानेतुंव्रजेदद्रिंवल्लीरसमनुत्तमम् ॥एवंब्रुवन्मयूरेशोमायामाविश्यकारह ४० उज्जीवयामासतदानिजांगवायुसंगतः ॥ ततस्तेहर्षसंपन्नाःप्रणेमुस्तंगुणेश्वरम् ४१ आलिलिंगुःपुनर्युद्धंकर्तुंतंचविजिज्ञपुः ॥ त्वद्दृष्टिविनिपातेनतेजोनोद्विगुणीकृतम् ४२ ॥ ॥ गुणेश्वरउवाच ॥

ब्रह्मादयोदेवगणाःस्तुवंतिवःपराक्रमम् ॥ तारकासुरमुख्याश्चनिहतादैत्यदानवाः ४३ ॥ ॥ कउवाच ॥ ततस्तैःसहितोदेवैर्मयूरेशःशिवंययौ । नमस्कृत्यशिवंगौरींयुद्धायगंतुमुद्यतः ४४ आलिलिंगमुदागौरीशिवस्तंचगुणेश्वरम् ॥ ततःषडाननाद्यास्तेशिवमालिंगरेमुदा ४५ वयंरणेनिपतिताःपुनःसंजीविताहर ॥ मयूरेशांगसंभूतवायुनाद्भुतकारिणा ४६ पुनर्युद्धाययास्यामोनेनसार्द्धंशिवाधुना ॥ प्रसादात्तवजेष्यामःसर्वानेवासुरान्युधि ४७ ॥ इतिश्रीग० उ०रणशोधनंनामषोडशाधिकशततमोऽध्यायः ॥ ११६ ॥ कउवाच ॥ ॥ सिंधुस्तल्पगताश्चिंतामवापमहतींतदा ॥ अग्निसंतप्तहृदयोविचारंनान्वपद्यत १ निर्हर्षोम्लानवदनोनिस्तेजानिष्कलोपिसः ॥ ततउग्रात्मजादुर्गालावण्यलहरीशुभा २ चिंताशीविषदग्धंतंश्रुत्वागान्मंचकस्थितम् ॥ असंख्यभूषणैर्यस्याःकबरीभातिमस्तके ३ कस्तूरीतिलकंयस्याललाटेभातिसुंदरम् ॥ कंठेहारंकटौकांचिंबिभ्रतींरत्नसंयुताम् ४ सर्वालंकारसंयुक्तांसर्वावयवसुंदराम् ॥ आगतांतुनिरीक्ष्यैवमंचकाभ्याशमुत्सुकाम् ५ बहिस्तत्सेवकायातास्ततःसापतिमब्रवीत् ॥ दुर्गोवाच ॥ किंचिंतांकुरुषेस्वामिन्यद्भाव्यंतद्भविष्यति ६ ईश्वरस्यवशेलोकोनस्वतंत्रःकदाचन ॥ सर्वेषांमानसंत्वंकिमुद्वेजयसिमेपिच ७ कोहेतुस्तेवदविभोततोयुक्तिंवदामिते ॥ कउवाच ॥ प्रियावाक्यंसमाकर्ण्यगंडकीनायकस्तदा ८ सावधानमनाभूत्वावृत्तांतंतामथाब्रवीत् ॥ सिंधुरुवाच ॥ किंवदामिप्रियेश्लाघ्येमनःखेदकरंपरम् ९ युद्धयतोमेरणेकर्णौमयूरेशेनसादितौ ॥ सप्तकोटिमितासेनानिहतापौरुषेणह १० स्कंदादयोमहावीराःपातिताःशरवृष्टिभिः ॥ अकस्मान्मेहतौकर्णौत्रिशूलंप्रेष्यशत्रुणा ११ आच्छाद्यमुखमायातोवाससानिजमंदिरम् ॥ येनोपायेनमेशत्रुवधःस्यात्तंवदस्वमे १२ ॥ ॥ दुर्गोवाच ॥ ॥ वीरधर्मःकृतःसम्यङ्निहताःसर्वसैनिकाः ॥ नयशःप्राप्यतेस्वामिन्गोब्राह्मणसुरद्विषाम् १३ तद्वेषाच्चैवकल्याणंकस्यापिहिनजायते ॥ सेवनाद्वंदनात्ध्यानात्स्मरणात्पूजनादपि १४ देवैरिंद्रादिभिःस्थानान्यासानिचस्थिराणिच ॥ यःसमःसर्वभूतेषुशुभाशुभफलप्रदः १५ तत्सेवयाभीष्टसिद्धिःकामधेनोरिवाभवत् ॥ अंकुरोजायतेताद्दग्याद्दग्बीजंहिउप्यते १६ अशुभात्कर्मणोदुःखंसुखंस्याच्छुभकर्मणः ॥ अतःसंतःप्रकुर्वंतिशुभंकर्मसदादरात् १७ हितंचसर्वजंतूनांकायेनमनसागिरा ॥ भवतापुरुषार्थेनपीडितास्तेसुरर्षयः १८ पुरुषार्थःसविज्ञेयोयश्चतुर्णांहिसाधकः ॥ यन्मनोनार्थलुब्धंस्यात्परदारेषुनक्वचित् १९ सएवपुरुषार्थःस्यात्यश्चानिंद्यंनानिंदति ॥ शरणागतरक्षायांदृढोधर्मपरायणः २० समःसर्वेषुभूतेषुपुरुषार्थःसगम्यते ॥ स्वामिन्मेपरमंवाक्यंशृणुतेहितकारकम् २१ अदुष्टवाक्सत्यशीलःस्वगुणानामकीर्तकः ॥ परोपकरणेसक्तःपरपैशून्यवर्जितः २२ तत्कुरुष्वमहाभागममप्रीतियदीच्छसि ॥ मोचयस्वसुरान्सर्वान्प्रबद्धान्शक्रसंयुतान् २३ प्रयास्यतिमयूरेशोखिललोकप्रपालकः ॥ वत्स्यावःसुसुखंस्वामिन्नान्यथातुसुखंभवेत् २४ ॥ ॥ कउवाच ॥ ॥ एवंवाक्यामृतंतस्यास्तदभूद्विषसन्निभम् ॥ मुमूर्षोरौषधंयद्वद्वरोगार्तस्यह २५ क्रोधसंरक्तनयनोदुर्गांतांसिंधुरब्रवीत् ॥ नदध्रेहृदितस्याःसउपदेशंहितावहम् २६ ॥ ॥ सिंधुरुवाच ॥ ॥ सम्यगुक्तंत्व

याभद्रेलोकानिंदाकरंवचः ॥ चातुर्यंतवविज्ञातंकार्याकार्यविदामया २७ नशत्रुंभजतेकोपिरिपुर्मानपरायणः ॥ नारभेत्कृत्यमन्याय्यमारब्धंचेन्नतत्त्यजेत् २८ ततोदुःखंसुखंवास्यादयशोयशएवच ॥ लाभोवाप्यथवालाभोजीवनंमृत्युरेववा २९ पूर्वंभद्रेमयासंधिःसाम्नातेननवैकृतः ॥ इदानींभवितायद्यत्तद्वरत्येवसर्वथा ३० पूर्वमेवाहियज्ञंतोर्लिखितंसाध्वसाधुवा ॥ कश्चिन्नपुरुषार्थेनकर्तुंशक्तोन्यथासति ३१ रणेमृतस्यस्वर्गोथख्यातिःस्याद्विष्टपत्रये ॥ यातस्यशरणंशत्रोरयशोनरकेपिच ३२ पूर्वजैःसहितस्याशुजायतेनात्रसंशयः ॥ जानामितंमयूरेशंदेवदेवंजगद्गुरुम् ३३ संभूतंममनाशायरावणेराववंयथा ॥ पातयिष्येशिरोस्याहमितिमेनिश्चितामतिः ३४ त्यजंतिजीवितंशूरानाभिमानंकदाचन ॥ नमेस्तिगणानासुभुक्तांतस्यापिकर्हिचित् ३५ तत्रकागणनान्येषांलज्जामेकर्णतःकृता ॥ ॥ कउवाच ॥ ॥ एवमुक्त्वाभूषणानिवस्त्राणिचदधारसः ३६ केयूरंमुकुटंरत्नयुक्तंहारंचकुंडले ॥ तूणौखड्गंचखेटंचचापंसज्जंचशास्त्रिकाम् ३७ आच्छाद्यकर्णौरौक्मीयवस्त्रेणोष्णीषगेनच ॥ आययावुपविष्टःसभद्रासनमनुत्तमम् ३८ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेदुर्गावाक्यंनामसप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥ ॥ ॐ ॥ ॥ कउवाच ॥ ॥ युद्धावेशदुरावर्षउपविष्टोमहासने ॥ सतदावीरमुख्यांस्तानुपविष्टानथाब्रवीत् १ ॥ ॥ सिंधुरुवाच ॥ ॥ गतौममप्रधानौतौत्रैलोक्याकर्षणक्षमौ ॥ नतादृशोस्तिवीरोत्रयोमेहन्याद्रिपुंबलात् २ नैतादृशौबुद्धिमंतौपराक्रमजयैषिणौ ॥ वीराऊचुस्ततःसिंधुंमाचिंतांकुरुसर्वथा ३ यावद्वयंप्राणवंतोलघुकृत्यउपस्थिते ॥ किमर्थंचिंताकुलतांतावद्वजसिदैत्यराट् ४ स्वापंकुरुमहाभागपर्यंकेपुष्पसंस्तरे ॥ कृतांतस्ताडितोयाभ्यांतयोःकस्माद्भयंभवेत् ५ एवमुक्त्वाकलःसिंधुंविकलश्चमहाबलौ ॥ शालकौतस्यदैत्यस्यनिर्यांतौयुद्धदुर्मदौ ६ नानायुद्धेषुकुशलौनानायुधधरावुभौ ॥ नानाभूषणवस्त्राढ्यौनानासेनासमन्वितौ ७ नानागर्जनतोव्योमचक्रतुर्नादसंयुतम् ॥ देवकोटिनिहंतारौअसंख्यवाहिनीयुतौ ८ ययुस्तद्पुरतोवीराःसिंदूरारुणमस्तकाः ॥ अग्निशस्त्रधरामुक्तकेशपाशाःसचंदनाः ९ लसच्छस्त्रधराःसर्वेयममत्तुमिवोद्यताः ॥ ततःकरिघटायातानानाधातुविचित्रिताः १० अधिष्ठितामहामात्रैर्नानाभूषाविराजिताः ॥ तीक्ष्णदंताःसिंदुरिताघंटानादनिनादिताः ११ ततोऽश्वसादिनोयातास्तनुत्राणविराजिताः ॥ धनुर्बाणधराःसर्वेलसच्छस्त्रविभूषिताः १२ अनेकयुद्धसंभाररथायातास्ततःपरम् ॥ अनेकवीरसंयुक्तानानासूतविराजिताः १३ एवंतौशालकौयातौरणस्थानंरुषान्वितौ ॥ ददृशातेमयूरेशमाशीविषभुजिस्थितं १४ षडाननादिभिर्वीरैरन्यैश्चपरिवारितम् ॥ दृष्ट्वातैस्तुतयोःसेनाघोरासाचतुरंगिणी १५ असंख्यातंबलंतस्यसमायातंविचित्रितं ॥ प्रेषितोदेवप्रवरैर्दूतोनीतिविशारदः १६ ज्ञात्वावृत्तांतमायातःसजगादसुरान्प्रति ॥ ॥ दूतउवाच ॥ ॥ कलश्चविकलश्चैवनानासेनासमायुतौ १७ जेतुंसुरान्समायातौनानायुद्धविशारदौ ॥ ताभ्यांयुद्धायसंप्राप्तौपुष्पदंतवृषावुभौ १८ धनुषीसज्जतांनीत्वाषष्ट्याबाणैरविध्यतां ॥ दैत्यौबाणान्निवार्यैवतावुभौबाणवृष्टिभिः १९ छादितौशरघातेनघ्नतःस्मदेवसैनिकान् ॥ कलस्यखड्गंख

ङेनविभेदसमहावृषः २० सैन्यमादायतस्याशुखड्गंछित्त्वान्यपातयत् ॥ विकलस्यपुष्पदंतोधनुश्चिच्छेदसायकैः २१ ततस्तौमल्लयुद्धेनपरस्परमयुध्यतां ॥ तेसेनेयुध्यतांतत्रनानाशस्त्रास्त्रपत्रिभिः २२ मायाभिर्विविधाभिश्चपरस्परजयेच्छया ॥ ततःपपालदैत्यानांसेनाशस्त्रार्दिताभृशम् २३ केपिदेवाःपृष्ठलग्नामारयंस्यसुरांश्चतान् ॥ पादाघातेननिहतादैत्यसेनाचरानराः २४ मृतास्तृक्प्रवहातत्रवाहिनीभीरुभीतिदा ॥ संप्रवृत्तामहाघोराभूतपक्षिप्रमोदिनी २५ ततोवेगात्समुड्डीयकलश्चविकलश्चह ॥ शस्त्रवृष्टिंमहोग्रांतौचक्रतुर्युद्धदुर्मदौ २६ तयाहतादेवसेनास्रवद्रक्तापपालह ॥ ततोवृषोहनत्सेनांशृंगाभ्यांचतयोर्भृशम् २७ लत्ताभिश्चजघानाशुफूत्कारेणन्यपातयत् ॥ पुच्छाघातेनकांश्चिच्चचूर्णयामासदैत्यपान् २८ एवंतेनहतासेनानानादैत्यसमाकुला ॥ हाहाकारोमहानासीद्दैत्यानांतत्रनश्यताम् २९ ततोतिबलिनौवीरौकलश्चविकलश्चह ॥ जगर्जतुरुभौरोषात्गर्जयंतौदिशोदश ३० निर्निदतुस्तौवृषभंकिंत्वंयुध्यसिनौपुरः ॥ तृणादनेषुशक्तस्त्वंतृणरूपोसिसांप्रतम् ३१ दध्रातएवमुक्त्वातौतस्यशृंगेमहाबलौ ॥ विकृष्यनिन्यतुरुभौस्वसेनांचतुरंगिणीम् ३२ तंमोचितुंपुष्पदंतोऽभिययौसहसाजवात् ॥ ततस्तंविकलोलत्ताप्रहारैःपातयद्भुवि ३३ ननर्दवाद्यघोषेणहर्षनिर्भरमानसः ॥ समूर्छितोमुहूर्त्तानुसंज्ञांप्रापदनातुरः ३४ ततोयोद्धुंसमायातौवीरभद्रषडाननौ ॥ कलःपर्वतघातेनशतधान्यपतद्भुवि ३५ वीरभद्रस्तुविकलंतलघातादपातयत् ॥ दृष्ट्वास्कंदेननिहतंकलंदैत्यं महाद्रिणा ३६ ततोययुःस्वशिबिरंगणास्तेजयशालिनः ॥ ततःशस्त्रहताःकेचिज्जीवंतोगंडकींययुः ३७ शशंसुर्दैत्यराजायनानासेनायुतःकलः ॥ विकलश्चहतोरोषाद्वीरभद्रादिभिर्गणैः ३८ गतास्तेशिबिरंदेवगणास्तुजयशालिनः ३९ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेकलविकलवधोनामअष्टादशोत्तरशततमोध्यायः ॥ ११८ ॥ कउवाच ॥ कलंचविकलंश्यालंदेवसेनाविघातिनम् ॥ निहतंवीरभद्रेणपर्वतेनमहासुरम् १ षडाननेनविकलंहतंतलप्रहारतः ॥ श्रुत्वाभद्रासनगतोनानावीरसमन्वितः २ प्रापसिंधुर्महाचिंतांस्मरंश्शिवसुतंतदा ॥ किंकरिष्यतिदेवोसौनाशमित्थंसुरद्विषाम् ३ इत्येवंचिंतयाविष्टोमूर्छामापमहत्तराम् ॥ तावदाजग्मतुरुभौपुत्रावस्यमहाबलौ ४ धर्माधर्मौभद्रपीठेजननंकवाक्यमाहतुः ॥ कथंबिभेषिजनकशिवायाजर्भकालघोः ५ नावाज्ञांदेहिदैत्येंद्रहनिष्यावःक्षणादमुम् ॥ संमुखेतौहतौवीरौमातुलौनौद्विवंगतौ ६ उत्तीर्णौतौस्वामिकार्यंकीर्त्तिंकृत्वामहत्तराम् ॥ हत्वानेकविधांसेनांनानावीरैः प्रपालिताम् ७ आवामपिप्रयुध्यावोयावोहत्वारिपुंबलात् ॥ अथवामोक्षमायावोनिहतौतेनचेद्रणे ८ यावदावांहिजीवावश्चिंतांतावच्चमाकुरु ॥ इंद्रादयःसुरगणाःकारागारेधुनातव ९ यदात्वंविजितापूर्वंपितरस्तत्रकेभवन् ॥ आनीवोमस्तकंतस्यारिपोस्तवनसंशयः १० अन्यथादर्शयिष्यावोमुखंलोकेषुनक्वचित् ॥ कउवाच ॥ एवंतयोःसमाकर्ण्यवचनंहर्षमाप्तवान् ११ तावूचेपरमंयुद्धंप्राप्नुतंयशउत्तमम् ॥ नाशयित्वारिपुंघोरंयातंशीघ्रंममांतिकम् ॥ १२ एवमाकर्ण्यतद्वाक्यंईयतुर्युद्धलालसौ ॥ नमस्कृत्यपितुःपादौमातुर्गृह्यतदाशिषः १३ दशकोटिमितांसेनांप्रत्येकंगृह्यसत्वरौ ॥ रथाश्वहस्तिपादातै

र्नानाशस्त्रधरैर्युताम् १४ पत्तयोपियुर्हृष्टाःसिंदूरारुणमस्तकाः ॥ गजानानागिरिनिभानानाधातुध्वजान्विताः १५ अश्वाःसादीभिरारूढानानाश
स्त्रासिपाणिभिः ॥ गर्जद्भिर्मेघसदृशंगर्जयद्भिर्दिशोदश १६ ततःसेनामध्यगतौरेजतुर्भ्रातरावुभौ ॥ नानालंकारसंयुक्तौनानायुधधरावुभौ १७ रत्नकां
चनसंयुक्तकुंडलाभ्यांविराजितौ ॥ किरीटाभ्यांसुतेजोभ्यांभ्राजमानौमहाबलौ १८ मुक्तामणिमयौहारौबिभ्रतौयुद्धदुर्मदौ ॥ प्रापतूरणभूमिंतौनाना
वादित्रनिस्वनैः १९ ददृशुर्वीरभद्राद्यास्तौचतांवाहिनीमपि ॥ निकटेतौसमालोक्यमयूरेशप्रचोदिताः २० आज्ञयाभिययुर्वीरभद्रोसौचषडाननः ॥ हिर
ण्यगर्भःसंक्रुद्धोभूतराजोविशालदृक् २१ असंख्यसेनयासार्द्धंततोयुद्धमवर्त्तत ॥ परस्परमयुध्यंततत्सेनाचराभृशम् २२ ध्नंतःशिरांसिपादांश्चबाहूरुदरकं
दराः ॥ निहताश्चनिहन्यंतेतमसाच्छादितेरवौ २३ केचिच्चक्राणिमुमुचुर्भिंडिपालांस्तथापरे ॥ बाणवृष्टिंपरेचापिनानाशस्त्राणिकेचन २४ मल्लयुद्धंचतत्रा
सीत्सैनिकानांपरस्परम् ॥ एवंसासंहृतासेनामयूरेशप्रपीडिता २५ पपालतत्रशेषायाविह्वलातुदिशोदश ॥ ततःषडाननःक्रुद्धोद्वादशायुधभूषितः ॥
२६ तैरायुधैर्जघानाशुसेनांतांदैत्यपालिताम् ॥ केषांचिद्बाहवोभिन्नाःकेपिमध्येद्विधाकृताः २७ केषांचिन्मस्तकाभिन्नाःकेषांचिच्चरणारणे ॥ एवंसा
नाशितासेनाहस्त्यश्वरथसंकुला २८ केपिस्वर्गंगताःकेचिद्रूपंप्रापुःषडाननम् ॥ निरीक्ष्ययेमयूरेशंजहुःप्राणान्प्रहारिताः २९ जग्मुस्ततत्प्रसादेननिजधाम
महाबलाः ॥ तद्दृष्टिपातात्तद्वंनष्टंसर्वंजनुःक्षनम् ३० दृष्ट्वाविशाखविशिखैःसशिखैर्निहतांस्वकाम् ॥ सेनांतस्यसुतौवीरावधर्मोधर्मएवच ३१ युयुधाते
बहुविधंशस्त्रैरस्त्रैःशरव्रजैः ॥ चक्रतुर्मल्लयुद्धंतौमहासेनेनतत्क्षणात् ३२ तयोर्बलंनिरीक्ष्यैवकार्त्तिकेयोमहाबलः ॥ शिखयोस्तौदधाराशुषड्बाहुःषट्करैर्बलात् ॥
३३ भ्रामयामासबहुधापोथयामासभूतले ॥ शतखंडानिजातानितयोस्तुपततोर्भुवि ३४ जयंप्राप्तोशिवसुतेनेदुर्वाद्यानिसर्वशः ॥ जयत्वंहिमयूरेशजगुःसर्वेपि
सैनिकाः ३५ चत्वारस्तेययुर्देवंमयूरेशंनिजंप्रभुम् ॥ आलिलिंगुर्मुदातेतुपरस्परमथाब्रुवन् ३६ प्राप्ताइवपुनर्जन्ममनुमुदुस्तेपरस्परम् ॥ शशंसुःसर्ववृत्तांतंशिवायै
चशिवायच ३७ सेनांचनिहतांसिंधोःपुत्रैश्चबलवत्तरैः ३८ इतिश्रीगणेशपुराणेऊत्तरखंडेएकोनविंशोत्तरशततमोऽध्यायः ११९ ॥ कउवाच ॥ हतशिष्टाःके
पिवीराःस्ववक्त्राःसुदुःखिताः ॥ सिंधुंसभागतंचेत्थंभीतभीताअथाब्रुवन् ॥ १ ॥ वीराऊचुः ॥ धनुर्धरनिबोधेदमतिदुःखकरंवचः ॥ धर्माधर्मौतवसुतौकृत्वा
युद्धंमहत्तरम् २ निन्यतुर्दैवसेनांतौहत्वाहत्वायमक्षयम् ॥ ततःकोपिमहावीरोमुखैःषड्भिर्विराजितः ३ सोपिताभ्यांरणेघोरेपातितोधरणीतले ॥ पुन
स्तेनधृतौवीरौशिखायांतावुभावपि ४ भ्रामयित्वाबहुतरंपातितौतौधरातले ॥ शतधाशीर्णदेहौतौगतौतौस्वर्गमुत्तमं ॥५ ॥ कउवाच ॥ ॥ एवमाकर्ण्यत ८४
द्वाक्यंन्यपतद्दैत्यपुंगवः ॥ शोकसागरमग्नोभूद्वज्राहतइवाचलः ६ यावन्मानैःसुदुर्द्धर्षैःसआशूत्थापितोबलात् ॥ मुहूर्तादप्रकृतिंयातःशुशोचबहुदुःखितः
॥ ७ ॥ ॥ सिंधुरुवाच ॥ ॥ शक्रादयोलोकपालाजिताभ्यांरणेपुरा ॥ तौहतौनुकथंवीरौषडास्येनमहाबलौ ८ विहायमृत्युलोकेमांकथंस्वर्गंगता

सुरसेनानिहंतारौकृतांतस्यांतकावुभौ ९ नानेष्येशत्रुमूर्द्धानंतदास्यंदर्शयेनच ॥ गमनावसरेप्रोक्तंत्वत्सत्यंकिंकृतंत्वया १० अथदुर्गासखीभिस्तुष्टस्तेकेशैरतदा ॥ कथितोविस्तरेणैवरुदतीभिःसुदुःखतः ११ ॥ सख्युवाच ॥ ॥ भर्त्तारोदितितेसुभ्रुधर्मोधर्मौमृताविति ॥ साथपर्य्यंकसुगतान्यपतद्भूकेषांचि १२ रंभेववातनिहताकोमलारुणपल्लवा ॥ सखीदुष्टवचोभिःसाबाणैरिवत्वदीक्षता ॥ विस्रस्तकेशाभरणासाप्यरोदीत्तदाभृशम् १३ विस्रस्तस्रग्विकसद्बिल्वचारुपयोधरा ॥ अश्रुश्यामलगंडासाशोकानलदहप्रभा ॥ १४ ॥ जघ्नेमुखंसापाणिभ्यांदंतासृक्सिक्तभूतला ॥ निरस्तदेहभावासाविकलाविगतत्रपा १५ सभांगणगतालुंठद्बठकृद्बालकोयथा ॥ सर्वेततःसभ्यवरारुरुदुर्दुःखकर्षिताः १६ प्रस्रवन्नेत्रसलिलाप्राब्रवीत्तान्त्सभासदः ॥ ॥ ॥ राज्ञीउवाच ॥ ॥ कथंसर्वेषुवीरेषुजीवत्सुतौसुतौमम १७ प्रेषितौरणभूमितौमामपृष्ट्वातुकोमलौ ॥ मयाशीश्चेन्नियुक्तास्यान्नतयोर्मरणंभवेत् १८ नहिमेवचनंधातामिथ्याकर्त्तुंसमीहते ॥ याभ्यांजितादेवगणास्तौकथंनिधनंगतौ १९ क्वद्रक्ष्याम्यहमेतौयौजिग्यतुर्मदनंरुचा ॥ बुद्धीनांयौसरस्वंतौतौमांत्यक्त्वाकथंगतौ २० तयोःशोकाग्निनादग्धामरिष्याम्यहमद्यवै ॥ इत्युक्त्वान्यपतद्भूमौनिघ्नतीत्हृदयंमुहुः २१ ततःसख्योनागराश्चबोधयामासुरंजसा नमातःकोपिशोकेनयोमृतःपुनरागतः २२ मृत्युलोकेचिरंस्थातानेक्षितोनश्रुतोपिच ॥ विहायहनुमंतंचकृपंशारद्वतंबलिम् २३ व्यासंपरशुरामंचबिभीषणमथापिच ॥ द्रौणिंनान्यश्चिरंस्थायीनभूतोनभविष्यति २४ ब्रह्मादीनामवेन्मृत्युःकातत्रगणनात्मनः ॥ रोदनंतेनकर्त्तव्यंनस्यान्मृत्युःकदास्यचेत् २५ क्षीणेऋणानुबंधेचस्त्रीपुत्रःपशुरेवच ॥ नातिष्ठतिध्रुवंतत्रकृतःशोकोवृथाभवेत् २६ यथाकाष्टंकाष्ठगतंपूरेस्याच्चवियुज्यते ॥ तद्वज्जंतुर्वियोगंचयोगंचप्राप्नुतेवशः २७ नानापक्षिगणारात्रावेकवृक्षागतायथा ॥ प्रातर्दशदिशोयांतितत्रकिंपरिदेवनम् ॥ ॥ कउवाच ॥ ॥ एवंप्रबोधिनादुर्गासिंधुश्चजनएवच २८ हृदाच्छोकंनिगृह्यासावासनेसंविवेशह ॥ उपहासंकरिष्यंतिसपत्नारुदतामिति २९ दुर्गांधृत्वाबलाल्लोकानिन्युरंतःपुरंहिताम् ॥ निश्वसंतीपपातासौपर्य्यंकेशोककर्षिता ३० सासिंधुःक्रोधसंयुक्तोजग्राहशस्त्रसंचयम् ॥ पुत्रयोर्निष्क्रांतिकर्त्तुंहयारूढोययौरणम् ३१ यातेतस्मिन्महासैन्यंचतुरंगरणोत्सुकम् ॥ उड्डीयोड्डीयधावंतोययुःपूर्वंपदातयः ३२ नानावर्णाएकरूपानानाशस्त्रास्त्रपाणयः ॥ ततोवारणसंघातानानाधातुविचित्रिताः ३३ घंटाभरणशोभाढ्यादानोदकप्रवर्षिणः ॥ चीत्कारभीषितपशमहारावभयंकराः ३४ ततोश्वाःप्रागमन्सादियुक्तावायुजवारणम् ॥ खुराघाताद्विस्फुलिंगानिपतंतोधरातले ३५ शुशुभुःसादिनस्तत्रखेटकुंतासिपाणयः ॥ चंदनागरुलिप्तांगानानामालाविभूषिताः ३६ तनुत्राणभृतःसर्वेकंकटभ्राजिमस्तकाः ॥ ग्रसंत इवचाकाशंनादयंतोदिशोदश ३७ रथास्ततोगमन्नानामहावीरैरधिष्ठिताः ॥ नानाशस्त्रास्त्रसंपूर्णाधनुस्तूणीरसंयुताः ३८ तन्मध्येशुशुभेसिंधुर्महामुकुटकुंडलः ॥ नानाशस्त्रधनुष्पाणिस्तूणीरकृतभूषणः ३९ वीरकंकणशोभाढ्यःकटिसूत्रांगदप्रभः ॥ क्रोधसंरक्तनयनोलोकत्रयबुभुक्षया ४० वाद्यत्सुसर्ववाद्येषु

बंदिषुचस्तुवत्सुच ॥ यावद्यातिमहावेगात्तावद्दूतस्तमब्रवीत् ४१ पितातेयातिदैत्येशतंप्रतीक्षस्वसुव्रत ॥ परावृत्येक्षतेयावत्तावदश्वगतंसुतम् ॥
४२ अपश्यदभ्याशगतंनमश्चक्रेसचापितम् ॥ ददौपितात्रसुतंदुर्गंकृत्वाचमूचरैः ४३ उपदेशंचकृतवान्सुखायामुत्रचेहच ॥ चक्रपाणिरुवाच ॥ गर्वेण व
र्त्तसेपुत्रश्रियामत्तोनबुध्यसे ४४ अर्थज्ञानेमहाबुद्धाःप्रष्टव्याभूतिमिच्छता ॥ अग्रेशुभेच्छयापूर्वमशुभंनसमाचरेत् ४५ अल्पेनकर्मणानाशंपुण्यमे
त्यशुभेनह ॥ अणुरग्निर्दहेत्सर्वंपुण्यंदोषस्तथासुत ४६ नलाभोदृश्यतेपुत्रबद्धेषुतेषुतेक्वचित् ॥ तस्ववपुत्रोयोमाद्यापितृवाक्यकरोनिशम् ४७ तस्यचोल्लंघने
पुण्यनाशमेतिचजायते ॥ दोषजालंमोहजालंनानानिरयदंसुत ४८ अतःशृणुहितंवाक्यंमोचयाशुसुरान्सुत ॥ मुक्तेषुतुभवेन्मित्रंमयूरेशोखिलार्थदः ४९
नचेहद्वेषतःकश्चित्सुखंप्राप्तोधरातले ॥ विनाशंप्रापितादेवैर्हिरण्याक्षादयोसुराः ५० ॥ कउवाच ॥ इतिपित्रवचःश्रुत्वाचुकोपातितरांसुतः ॥ धिक्कृत्यपित
रंप्राहममभ्रांतिरभूत्पुरा ५१ चतुरस्त्वंपितामेवैज्ञानंसम्यक्प्रकाशितम् ॥ भाषसेमूढवत्तातकृत्वाश्यामंमुखंवज ५२ येनमेनिहतासेनापरार्धगणितापितः ॥
तेनेदानींकथंसामकर्त्तव्यमयशस्करम् ५३ कुशाक्षमालाधरणंराजधर्मेहिनेष्यते ॥ तस्माद्दयानरेंद्रेणनकार्याशत्रुसंचये ५४ निर्दयत्वमरावेवस्मृतंनीत्यामये
यथा ॥ एवमुक्त्वानमस्कृत्यपितरंसिंधुदैत्यराट् ५५ परावृत्यबलात्तंसययौयोद्धुरणोत्सुकः ॥ ५६ ॥ इतिश्रीग०उ०पित्रासिंधुसंवादोनामविंशत्यधिकशत
तमोऽध्यायः १२० ॥ ॥ ७ ॥ ॥ कउवाच ॥ वीरभद्रादिभिर्वीरैःसुखासीनंगणेश्वरम् ॥ आययुर्वेगतोदेवाभीताःश्वाससमाकुलाः १ न्यवेदयंत
वृत्तांतंस्वयंसिंधुःसमागतः ॥ मेनिरेतेपुनःप्राप्तंकालंसंहर्त्तुमात्मनः २ ततोहर्षान्मयूरेशोरुरोहशिखिनंतदा ॥ आयुधानिचचत्वारिप्रगृह्यचजगर्जच ॥ ३ ॥
नमस्कृत्यशिवंवेगाद्ययौप्रद्योतयन्दिशः ॥ तदाशीःकवचोवीरसहितोवाहिनीयुतः ४ यावत्सपुरतोयातिसिंधुर्हंतुंसमुद्यतः ॥ तावद्षडाननःप्राहयामियुद्धा
यविघ्नराट् ५ तिष्ठत्सुबहुवीरेषुकथंयुद्धाययास्यसि ॥ पौरुषंपश्यसर्वेषांतस्मिन्क्षीणेरणंकुरु ६ एवमुक्त्वानमस्कृत्यययौयुद्धायषण्मुखः ॥ चतु
रंगबलंगृह्यसिंधुसेनामथावधीत् ७ सोपितान्यहनत्सेनांनानाशस्त्रैःशरव्रजैः ॥ सहस्वप्रहरस्वाद्यहन्मिसंमुखतांव्रज ८ एवंकोलाहलोप्यासीद्वीराणां
तत्रयुद्धताम् ॥ पेतुर्वीराःशस्त्रहताःशरजालगतासवः ९ छिन्नांगाभिन्नपादाश्चछिन्नबाहूरुमस्तकाः ॥ असिभिर्भिंडिपालैश्चकुंतैर्मुद्गरसंचयैः १० मा
रयन्मिश्रितावीरास्तान्परान्युद्धदुर्मदान् ॥ कोलाहलोमहानासीद्विष्वेडितैर्हेषितैरपि ११ वाद्यध्वनिप्रतिध्वानैर्बृंहितैरथनेमिभिः ॥ असंबद्धमभूद्युद्धंसेनयो
रपि १२ यथाप्रतिज्ञंवीरास्तेनिजघ्नुर्मस्तकंमुखम् ॥ नेत्रेबाहूदरंनाभिंपादौगुल्फौचजानुनी १३ कोपिहस्तेनपादेनकोपिखड्गेननाशयन् ॥ असिना
णान्ध्वंधकारेमहत्यापि १४ अस्तंयातेदिनकरेदृष्ट्वापृष्ट्वानिजान्विरे ॥ देवान्ज्ञात्वासुराजघ्नुरितरानितरेपिव १५ असृक्प्रवाहस्तत्रासीद्रथनेतुमु
॥ वहन्प्रेतानिषज्जीवान्हुंकारेणचतान्परे १६ बलान्निष्काशयामासुर्विशल्यांश्चक्रिरेयथा ॥ इतोनसेनेपंचाहविरामंयुद्धलंपटे ॥ एवंपदाताःसिंधो

स्तेकोटिशोथहताःसुरैः १७ ततोगात्तद्गजानीकमसंख्यंशस्त्रसंयुतम् ॥ धिष्ठितंसादिभिर्वीरैर्नानायुद्धविशारदैः १८ वीरभद्रादयोजघ्नुर्गजसेनांदुरत्ययाम् ॥ केषांचिन्मस्तकाभिन्नाःकेषांचिच्चकराद्विजाः १९ अग्निशस्त्रधरैःकेचित्पातितावीरसंयुताः ॥ वीरभद्रोतिवीर्येणगजेनैवाहनद्गजम् २० पेततुरष्टधाभिन्नावुभावपितदागजौ ॥ ततःषडाननोनिघ्नन्गजानीकेव्यरोचत २१ वीरैस्तुसहितान्मत्ताननंतान्करिसंचयान् ॥ शक्त्याशरैरनेकैःसोनाशयत्षड्धनुश्शुतैः २२ हिरण्यगर्भोनेकवीरयुतांस्तानप्यपातयत् ॥ भूतराजोपिशस्त्रैस्तान्गजान्नानाविधान्रणे २३ न्यपातयद्वीरयुक्तान्नाराचक्षतजीवितान् ॥ सिंहोभूत्वा पुष्पदंतोदारयामासतान्गजान् २४ नंदीतुगजरूपेणबभंजतान्गजान्बहून् ॥ अन्यैश्चशरसंघातैःसर्वतेविनिपातिताः २५ कंचित्पुच्छेगृहीत्वेभंभ्राम यित्वापरेक्षिपत् ॥ उभावपिलयंयातौदृढाघातेनचूर्णितौ २६ ततोश्वचारायुयुधुर्गजानीकेनिवारिते ॥ असंख्याताव्रिजघ्नुस्तान्सुरान्नानायुधैरणे २७ पतितामूर्छितादेवाःपुनःसंज्ञांचलेभिरे ॥ ततोविविधुरश्वस्थान्वीरानश्वानथोरुषा २८ क्रोधनदेवान्घ्नंतिस्महयारूढामहासुराः ॥ सुरांस्तान्निघ्नुरंतंतेशस्त्रास्त्रशरवृष्टिभिः २९ षड्वीराःपुनरायाताःश्रुत्वादेवाह्वतान्युधि ॥ ततस्तेपुनराजघ्नुर्दैतेयानश्वसादिनः ३० चत्वारस्तेचतुर्दिक्षुप्रायुध्यन्बलवत्तरम् ॥ रक्षतुरुभौसैन्यंस्वीयंदेवगणैर्युतम् ३१ मारयामासुरश्वांस्तानश्वस्थान्वीरसंयुतान् ॥ अयुध्यन्पादचारेणनिघ्नंतोरिगणान्बहून् ३२ कोटिकोटिमितास्तत्रपेतुस्तेतुशरार्दिताः ॥ नंदीभृंगीहतानश्वान्पतितान्वीक्ष्यसादिनः ३३ पादाघातेनतेनाशुपातयन्नंदिकेश्वरः ॥ वीरभद्रोप्यसंख्यातानश्वयोधान्व्यपातयत् ३४ हतेषुमुख्यवीरेषुचतुर्भिःसर्वतोदिशम् ॥ कल्पांतइवतत्रासीद्दैत्यानांरणकर्मणाम् ३५ ततःकेचित्सुरगणान्पेदिरेशरणंतदा ॥ हाहाकारोमहानासीद्दैत्यसैन्याश्वसादिषु ३६ एवंहत्वाखिलांसेनांषड्वीरास्तेमुदंययुः ॥ वाद्यत्सुसर्ववाद्येषुजगर्जुस्तुष्टुवुर्विभुम् ३७ जयःप्राप्तोमयूरेशप्रभावात्स्मरणाव्रतेः ॥ ततःसिंधुःसमाकर्ण्यशरणागतवाक्यतः ३८ वृत्तांतंहतसेनायाहस्त्यश्वरथसंयुतः ॥ अमात्यान्सर्ववीरांश्चप्रोवाचयुद्धलालसः ३९ ॥ सिंधुरुवाच ॥ येयेगच्छंतियोद्वारस्तान्छूणोमिहतान्परैः ॥ इदानींयामितंहंतुंगुणेशंचस्वयंबलात् ४० ॥ कउवाच ॥ इत्युक्त्वाक्ष्वेडितेनासौगगनंचदिशोदश ॥ नादयामासत्रीन्लोकान्ग्रसन्भूस्वर्गमंडलम् ४१ योजयित्वाक्षिपद्बाणमाकर्णकर्षणाज्जवात् ॥ सेनायांवीरभद्रादिपालितायांमहाबलैः ४२ निरीक्ष्यसर्ववीरान्सबाणं धनुषिसंदधे ॥ अस्त्रमंत्रेणसहसाशतजप्तेनदैत्यराट् ४३ कृपीटयोनिःसहसातस्माज्जातोददाहताम् ॥ देवसेनांचपृथिवींसवनांचसपर्वताम् ४४ ततोपश्यन्सैनिकास्तेदह्यमानान्कृशानुना ॥ पुरुषंवह्निसंभूतंजटिलंदीप्ततेजसम् ४५ विद्युज्जिह्वंकरालास्यंगिलंतंदेवसैनिकान् ॥ षडाननादयोभीतादुद्रुवुस्तेदिशोदश ४६ यंयंसभक्षतिस्माजौससप्रापस्मरन्मुदा ॥ निजधाममयूरेशमेवमत्ताखिलाचमूः ४७ यतोयतोयातिसेनाततस्तद्वक्त्रसंभवः ॥ तनूनपाद्दहत्येनांप्रलयाग्निरिवज्वलन् ४८ एवंसावह्निनादग्धामयूरेशस्यवाहिनी ॥ धूमांधकारेमहतिनप्राज्ञायतकिंचन ४९ ततःसर्वेमयूरेशपृष्ठभागंसमाश्रिताः ॥

त्राहित्राहीतिजल्पंतोदग्धास्तेजातवेदसा ५० अनिवार्यैमहास्त्रंतद्दृष्ट्वादेवोमयूरराट् ॥ निस्तेजाश्चिंतयामासभीतोलोकेलघुत्वतः ५१ शिवःप्रसादंचेत्कुर्यात्त
दैवात्रजयोभवेत् ॥ इत्युक्त्वापरशुंगृह्यमंत्रयित्वाक्षिपन्बलात् ५२ महसाजितसूर्यःसगर्जयन्नगगनंदिशः ॥ यातोदहन्वैरिसैनांजगत्कल्पानलोयथा ५३
तस्मादपिमहानेकःपुरुषःसमजायत ॥ यस्यास्येसर्वभूगोलःकिंनुमास्यतिसांबरः ५४ पुरुषःपुरुषेणासावस्त्रमस्त्रेणवैतदा ॥ अयुध्यतांततोजग्मुर्द्रष्टुंदेवर्षय
स्तदा ५५ दैत्यास्त्रंभक्षितंतेनकृतांतास्त्रेणसत्वरम् ॥ ययौसेनांचनिर्दग्धुंज्वालामालीवहव्यभुक् ५६ दैत्यराजोपितंदृष्ट्वाबाणवृष्टिमवासृजत् ॥ एकस्मा
न्मंत्रिताद्बाणादनंतानिःसृताःशराः ५७ देवसेनाचरास्तेषुनिमग्नावेगशालिनः ॥ मयूरेशःक्रोधवशान्नानास्त्राणितदासृजत् ५८ तैरस्त्रैर्दैत्यराजस्यनिरस्यास्त्रा
णिसर्वशः ॥ अभक्षयद्दैत्यसेनांसकालपुरुषःपुनः ५९ यतोयतःपलायंतेऽसुरास्तत्रचयातिसः ॥ चिंताक्रांतस्ततोदैत्यःकर्त्तव्यंनाभ्यपद्यत ६० किंकर्त्तव्यंक्वगं
तव्यंक्वनस्थेयमचिंतयत् ॥ अस्तंयातेदिनकरेस्वधामप्रत्यपद्यत ६१ गच्छन्स्खलन्पतन्भूमौनष्टकुंडलभूषणः ॥ नगरंप्राविशदसौततःशंभुरिवापरः ६२
गुप्तएवावसत्कापिस्त्रीणांचैवानुजीविनाम् ॥ जगर्जसगणोदेवोज्ञात्वातद्वृत्तमाशुसः६३ तेननादेनसहसानादितंभुवनत्रयम् ॥ संजहारकृतांतास्त्रंमंत्रविद्विजगंय
था ६४ स्वनिवेशंजगामाशुमयूरेशोगणैर्वृतः ६५ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेएकविंशोत्तरशततमोध्यायः ॥ १२१ ॥ ॥ ७ ॥ ॥

॥ ऋउवाच ॥ ॥ सिंहासनस्थेदेवेशेमयूरेशगणैर्वृते ॥ गौतमाद्यामुनिगणाःप्रशशंसुर्गुणेश्वरम् १ ॥ ॥ ऋषयऊचुः ॥ ॥ येनशक्रोजितःसंख्येनागैः
शेषोधरातले ॥ तस्यकागणनान्येषांनोपियुद्धेजितस्त्वया २ रक्षितावहवस्तस्मात्सिंधोर्दुष्टात्सुरेश्वर ॥ गणानांसर्वलोकानामन्यथाजीवनंकथम् ॥ ३ ॥
ऋउवाच ॥ ॥ इत्थंतेषुवदत्स्वेवतद्कीर्तिंगिरिजाययौ ॥ आलिंग्यप्राहपुत्रंसाश्रांतोसियुद्धलालसः ४ ततःशीघ्रंसमायातोभर्गोदेवंससस्वजे ॥ उवाचेंद्रा
दिभिर्देवैरसाध्यंकृतवानसि ५ परब्रह्मस्वरूपस्यचराचरगुरोरपि ॥ सर्वज्ञस्यधराभारोद्धरणेनिरतस्यते ६ महिमानंस्वरूपाणिब्रह्माद्यानविदुःसुराः ॥ गौ
तमाद्याश्चमुनयःशक्तिःकातत्रनोभवेत् ७ ॥ ॥ ऋउवाच ॥ ॥ इत्थंवदतिदेवेशेशिवेथपार्वतीजगौ ॥ नारदोमुनिवर्योसौमातःशृणुवचोमम ८ बहवोवास
राजाताअत्रस्थानेकदाशिवे ॥ मोक्षमेष्यतिदैत्योसौसिंधुर्दुष्टतमोनघे ९ कदाविवाहोभवितामयूरेशस्यसुव्रते ॥ वासवाद्याजितायेननाशंसकथमेष्यति १०
आज्ञांदेहिगमिष्यामःपुनरेष्यामसत्वरम् ॥ कदास्युःसिंधुदैत्यात्तेदेवाश्चमुक्तबंधनाः ११ दैत्यस्यमरणंमातरसाध्यंदृश्यतेमया ॥ ॥ ऋउवाच ॥
सुरर्षेर्वाक्यमाकर्ण्यप्रोचुस्तंतेगणास्तदा १२ षडाननादयोवीरानारदंदेवदर्शनम् ॥ उद्दीपयंतंतंदेवंमयूरेशंसुरेश्वरम् १३ आश्चर्येनारदमुनेसर्व
ज्ञस्यापितेनघ ॥ एतदर्थंसमायातोनिजधाम्नोभुवंविभुः १४ अवाप्तसकलार्थोसौमयूरेशोखिलार्थकृत् ॥ अगुणस्यगुणेशस्यगुणक्षोभविधायिनः १५ स्व
रूपंकिंनजानासिब्रह्माद्यैरनिरूपितं ॥ मयूरेशस्यवीर्यंचभूभारोत्तारणैषिणः १६ इंद्राद्यवध्यानसुरघ्नितोबलशालिनः ॥ अनेककोटिब्रह्मांडनायकस्या

खिलात्मनः १७ उत्पत्तिस्थितिसंहारकारिणोजगतामपि ॥ कउवाच ॥ ॥ इतितद्वारतींश्रुत्वापुनःप्रोवाचनारदः १८ यदाद्रक्ष्यामितंदैत्यंनिहतंमुक्ति
मागतम् ॥ तदासर्ववचःसत्यंमन्येहंनान्यथाक्वचित् १९ निशम्येत्थंवचस्तस्यचुक्रोधसमयूरराट् ॥ जगर्जक्रोधदीप्तोसौनादयन्भुवनत्रयम् २० दहन्निव
त्रिलोकींसशीर्णयन्पृथिवीमपि ॥ मेघगंभीरयावाचाबभाणतंमुनिंतदा २१ ॥ ॥ मयूरेशउवाच ॥ ॥ मान्योसिब्रह्मपुत्रत्वात्सर्वज्ञत्वान्मुनीश्वर ॥ अतस्त्वां
प्रब्रवीम्यद्यमर्यादांपरिपालयन् २२ तवप्रसादात्ब्रह्मांडंप्राशयिष्येंतकंक्षणात् ॥ भूगोलंन्युब्जतांनेष्येशोषयिष्येंबुधीनपि २३ चालयिष्येतथामेरुंमुने
निश्वासवायुना ॥ शृणुनारदसत्यांमेप्रतिज्ञामद्यसर्वग २४ हनिष्येसिंधुदैत्यंतंनात्रकार्याविचारणा ॥ कउवाच ॥ ॥ इत्युक्त्वाप्रययौयोद्धुंबर्ह्यारूढोविनाय
कः २५ आहतुस्तंतदानंदीभृंगीचोभौविनायकम् ॥ आवांयुद्धंकरिष्यावोपश्यनौरणकौशलं २६ इत्युक्त्वावायुवेगेनगतौतौगंडकींपुरीं ॥ वीरभद्रोभूत
राजोययौश्रुत्वातयोर्गतिं २७ तदाचकंपेधरणीशेषोविह्वलतांययौ ॥ ददृशुस्तेचचत्वारोदुर्गंदुर्गंसुरेश्वरैः २८ पर्यंकेसुखमासीनंसिंधुंचारान्यवेदयन् ॥
चत्वारःपर्वताकारागर्जयंतोदिशोनभः २९ वीरास्तवपुरींयाताःकिंस्थितोसिमहासुर ॥ श्रुत्वेत्थंवचनंसिंधुर्मग्नश्चिंतार्णवेक्षणात् ॥ दुर्गापिचिंतयावि
ष्टासासोपिश्यामतामियात् ३० अधोमुखतयाचोर्ध्वंदुःखंप्रापतुरंजसा ॥ दुर्गाप्रोचेमहाराजमयोक्तंनकृतंत्वया ३१ तस्येदंहिफलंप्राप्तमिदानींकिंनुचिंतया
॥ एवंवदतिसावाक्यंतावत्तेवीरसत्तमाः ३२ नानाश्चर्ययुतंनानारत्नकांचननिर्मितम् ॥ अनेकशिखरंतस्यसभामंडपमाययुः ३३ उड्डीयसहसाभृंगीत
स्थौक्रुद्धस्तुमंडपे ॥ बभंजमंडपंसद्यःसबलेनमहाबलः ३४ अंगणेतस्यखंडानिपतितानिसमंततः ॥ ततस्त्रयोपितेवीराभृंगिनंसमुपागताः ३५ युद्धावेशा
रुणमुखाःससैन्यंतंग्रसिष्णवः ॥ दृष्ट्वातत्कर्मतेषांतुसिंधुसेनाययौपुरः ३६ खड्गचर्मधनुर्बाणकुंतमुद्गरधारिणी ॥ घ्नंतुघ्नंतुमहावेगांश्चतुरोवीरपुंगवान् ३७
इत्युक्त्वाचतुरोहंतुमागतादैत्यसैनिकाः ॥ असंख्याताश्चतुर्भिस्तैर्युयुधुर्जातसंभ्रमाः ३८ हन्मित्वांजहिमत्द्यंचेत्यत्रकोलाहलोभवत् ॥ ततोभूत्तुमुलंयु
द्धंचतुर्भिर्दैत्यसेनया ३९ रजोंधकारेशस्त्राणांप्रकाशेनावलोकयन् ॥ शतकोटिहतादैत्याश्चतुर्भिःसंयुगेतदा ४० असंख्यातान्महावीरान्पोथयामा
सुरोजसा ॥ गृहीत्वापादयोस्तेतान्भ्रामयित्वापुनःपुनः ४१ नभोक्षिपन्महावीरास्तेभूमौशतधापतन् ॥ शरैरस्त्रैश्चशस्त्रैश्चपादेनकरघाततः ४२ ना
शितासर्वसेनासादैतेयीरणमंडले ॥ ततस्तेतद्वहंगत्वासिंधुंपर्यंकसंस्थितं ४३ रणस्तंभंसमानिन्युर्धृत्वाकेशेषुवेगतः ॥ ततःसिंधुर्महास्त्रैःसचक्रेयुद्धंतुतैः
सह ४४ व्यसृजत्पन्नगास्त्रंसभुजगैर्वेष्टितास्त्रयः ॥ गरुडास्त्रंचसहसाभृंगिणामोचितक्षणात् ४५ अग्न्यस्त्रेमोचितेतेनपर्जन्यास्त्रंचसोसृजत् ॥
वाय्वस्त्रेमोचितेतेनपर्वतास्त्रंचतेसृजन् ४६ ततस्तेमल्लयुद्धेनयोधयामासुरादरात् ॥ नंदीतुपातयामासमुकुटंदैत्यमस्तकात् ४७ भृंगीतुताडयामा
सपृष्ठेदैत्यंमहारुषा ॥ वीरभद्रोग्रहीद्भार्योकचेतस्याथपश्यतः ४८ भूतराजोजघानैनंलत्तयावैरभावतः ॥ दुर्गानेत्रेनिमील्यैवनापश्यत्तंतथाविधम् ४९ निंदं

तीतस्यकर्माणिपपालनिजमंदिरम् ॥ आवेशार्त्तिसंधुदैत्योपिवीरभद्रंपदेग्रहीत् ५० मुष्टिनानंदिनंहत्वाशिखामाक्रम्यभृंगिणः ॥ अपातयद्भूमितलेभूतरा
जोमुमूर्छह ५१ मुकुटंमस्तकेन्यस्यमुक्ताहारंगलेतथा ॥ तुरंगवरमारुह्यशेषानाह्वयसैनिकान् ५२ हनिष्येद्यमयूरेशमित्युक्त्वायुयुधेपुनः ॥ जगर्जसहसा
दैत्योगर्जयन्विदिशोदिशः ५३ गतेषुतेषुवीरेषुचतुर्षुगणनायकम् ॥ वदत्सुदैत्यसेनायांसर्वेषांनाशनंकृतम् ५४ आनीतःसिंधुदैत्योपिरणभूमिंगणेश्वर ॥
अल्पसेनाचरैर्युक्तंमोचयैनंभवार्णवात् ५५ वयमेवहनिष्यामोनाज्ञासीत्तवविघ्नराट् ५६ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेद्वाविंशोत्तरशततमोध्यायः १२२
॥ कउवाच ॥ आगतंसिंधुमाकर्ण्यजत्रद्वेषमयूरराट् ॥ नीलकंठंसमारुह्ययौयुद्धायसत्वरः १ चतुर्भिरायुधैःसर्वाभासयन्विदिशोदिशः ॥ कल्पांतमेघस
दृशनादेननादयन्नभः २ ददर्शपुरतःसिंधुंयुद्धायकृतनिश्चयम् ॥ सोप्येनंसमरेदृष्ट्वापश्यतिस्मपुनःपुनः ३ यथासिंहंनागराजोगरुडंचाथवायुभुक् ॥ मधु
कैटभौयथाविष्णुंत्रिपुरोवाशिवापतिम् ॥ ४ ॥ शुंभोवापिनिशुंभोवाजगदंबांमहाबलाम् ॥ ततोयुद्धंप्रकुर्वातेनानाशस्त्रैःपरस्परम् ५ जपाकुसुमसंका
शौदेहौजातौतदातयोः ॥ ददाहपृथिवींसाद्रिंशस्त्रसंघट्टजोनलः ६ चकंपेपृथिवीसर्वासाब्धिद्वीपासपर्वता ॥ बाणमादायसिंधुःसवन्ह्यस्त्रेणनिमंत्र्यच ॥
॥ ७ ॥ ससर्जदग्धुंतंदेवंमयूरेशंरणांगणे ॥ सदहन्देवसेनांतांदशदिक्षुससर्पह ॥ ८ ॥ ततःपाशंमयूरेशोमेघास्त्रेणसुयोज्यच ॥ न्यक्षिपद्दैत्यसेनायांकंपयन्
भुवनत्रयम् ९ अशमच्चततोवह्निर्जलधाराभिवृष्टिभिः ॥ प्रभूतेनाथतमसादिशोव्याप्तादशापिच १० विशीर्णाःपर्वतास्ताभिःपतितावृक्षसंचयाः ॥ जयंकिं
प्रलयःप्राप्तइत्यशोचत्सदैत्यराट् ११ पवनास्त्रेणतान्मेघांस्तदासिंधुर्न्यवारयत् ॥ सवायुःकंपयामासगगनंचदिशोदश १२ ततोदेवोमंत्रयत्सकमलंनि
जहस्तके ॥ पर्वतास्त्रेणसहसातत्याजदैत्यपुंगवे १३ उन्मूल्यतद्द्रुमान्व्योमद्योतयच्चदिशोदश ॥ अगच्छद्दैत्यसेनायांप्रासुवत्पर्वतान्बहून् १४ असंख्या
तैर्गिरिवरैश्छादितंपृथिवीतलं ॥ नस्थातुमवकाशोभून्नचगंतुमथापिच १५ पवनंकुंठितंदृष्ट्वापर्वतान्सर्वतोपिच ॥ वज्रास्त्रंप्रेरयामासततोवज्राणिनिर्ययुः ॥
१६ असंख्यातैश्चवज्रैश्चपर्वताश्चूर्णितास्तदा ॥ ततोंकुशंमयूरेशोवज्रास्त्रेणन्यमंत्रयत् १७ ससर्जतेषुवज्रेषुवज्रयुद्धमभूत्तदा ॥ तच्छब्देनचकंपेभूःपातालो
निदिशोनभः १८ न्यपतद्वज्रघातेनवह्निर्लोकान्ददाहसः ॥ परस्परंनिरस्तानिवज्राण्यंतर्दधुस्तदा १९ ततोवदन्महादैत्योमात्यान्प्रतिमहारुषा ॥ किमनेन
प्रयोगेणभस्मकुर्यांक्षणादमुम् २० शिवबालंशिवास्तन्यपानदक्षंशिवोचितं ॥ इत्युक्त्वाभिद्रवद्दैत्योहंतुंतंसगुणेश्वरम् २१ दधारतंनिरीक्ष्यैवमायांतंदैत्य
पुंगवम् ॥ विराड्रूपोमयूरेशोबिभेदसहसानभः २२ चरणाक्रांतपातालःश्रोत्रव्याप्तदिगंतरः ॥ सहस्रपादंसहसानिरीक्ष्यसहस्रनेत्रंचसहस्रशीर्षं २३ खरो
दसीव्याप्यचतिष्ठमानंसिंधुर्ममूर्छाथापतच्चभूमौ २४ आच्छादयंतंहस्तेनव्योमसर्वंसुरेश्वरम् ॥ सावधानमनाःकिंचित्सस्माररविजंवरम् २५ ॥ सिंधुरुवा
च ॥ रविणापूर्वमुक्तोहंवरदानेमहौजसा ॥ आच्छादयेद्योगगनमेकहस्तेनरेसुर २६ सतेमुक्तिपदंसद्योनेष्यतेबहुकालतः ॥ अतोनेनरणेनालंयत्वभा

व्यंतद्भविष्यति २७ पुनर्निरीक्ष्यमाणोसौह्यस्वकायंददर्शतम् ॥ षड्भुजंतुमयूरेशंपरंविस्मयमाययौ २८ ततोवरुह्यदेवेशोमयूरेशःशिखंडिनः ॥ उपस्पृश्यज
लंशुद्धंजजापपरमंमनुम् २९ परशुंमंत्रयामासमहोव्याप्तंदिगंतरम् ॥ लक्षीकृत्यरिपोर्नाभिंसुधामंत्रेणसंयुतम् ३० स्फोटयन्निवब्रह्मांडंक्रोधसंरक्तलोचनः ॥
ज्वालामालाकुलंतंसमुमोचगिरिजासुतः ३१ समोच्यमानोगगनंनादयन्दिशोदिशः ॥ भासयन्महसापृथ्वींसपर्वतवनाकराम् ३२ दृष्ट्वादैत्यःसमायांतं
परशुंकालसन्निभम् ॥ शीघ्रंचक्रेधनुर्घोरंशरंयावद्धियोज्यते ३३ तावत्सबिभिदेनाभिममृताभियुतंलघु ॥ अमृतेनिःसृतेदैत्योवाताहतइवद्रुमः ३४
पपातसहसाभूमौवज्राहतइवाचलः ॥ प्रसार्यवक्त्रंरुधिरंवमन्प्राणान्विसृज्यसः ३५ मयूरेशप्रतापेनमुक्तिप्रापसुदुर्लभाम् ॥ पश्यतांसर्वलोकानांतदद्भुत
मिवाभवत् ३६ अवतेरुर्विमानानियुद्रंद्रष्टुंस्थितानिह ॥ पपातपुष्पवृष्टिश्चशनैर्मेघाजगर्जिरे ३७ अशीशमद्रजोभौमंववौवातःसुखावहः ॥ प्रसेदुश्च
दिशःसर्वागंधर्वामधुरंजगुः ३८ ननृतुःश्चाप्सरःसंघास्तुष्टुवुर्मुनिदेवताः ॥ षडाननादयोवीरामयूरेशंमुदायुताः ३९ ॥ सर्वेऊचुः ॥ परब्रह्मरूपंचिदानंद
रूपंसदानंदरूपंसुरेशंपरेशम् ॥ गुणाब्धिगुणेशंगुणातीतमीशंमयूरेशमाद्यंनताःस्मोनतास्मः ४० जगद्द्यमेकंपरोंकारमेकंगुणानांपरंकारणंनिर्विकल्प
म् ॥ जगत्पालकंहारकंतारकंतंमयूरेशमाद्यंनताःस्मोनताःस्मः ॥ ४१ ॥ महादेवसूनुंमहादैत्यनाशंमहापूरुषंसर्वदाविघ्ननाशम् ॥ सदाभक्तपोषंप
रंज्ञानकोशंमयूरे० ॥ ४२ ॥ अनादिंगुणादिंसुरादिंशिवायामहातोषदंसर्वदासर्ववंद्यम् ॥ सुरार्यंतकंभुक्तिमुक्तिप्रदंतंमयूरे० ४३ परंमायिनंमायिनाम
प्यगम्यंमुनिध्येयमाकाशकल्पंजनेशम् ॥ असंख्यावतारंनिजाज्ञाननाशंमयूरेशमा० ४४ अनेककियाकारणंश्रुत्यगम्यंत्रयीबोधितानेककर्मादिबीजम् ॥ कि
यासिद्धिहेतुंसुरेंद्रादिसेव्यंमयूरे० ४५ महाकालरूपंनिमेषादिरूपंकलाकल्परूपंसदागम्यरूपम् ॥ जनज्ञानहेतुंनृणांसिद्धिदंतंमयू० ४६ महेशादिदेवैःसदासे
व्यपादंसदारक्षकंयोगिनांचित्स्वरूपम् ॥ सदाकामरूपंकृपांभोनिधिंतंमयू० ४७ सदाभक्तानांत्वंप्रभंसपरमानंदसुखदोयतस्त्वंलोकानांपरमकरुणामाशु
तनुषे ॥ षड्ऊर्मीणांवेगंसुखरसदानाशयाविभोततोमुक्तिःश्लाघ्यातवभजनतोनंतसुखदात् ४८ किमस्माभिःस्तोत्रंगजवदनतेशक्यमतुलंविधातुंवाग्म्यगुण
निधिरसिप्रेमजगताम् ॥ नचास्माकंशक्तिस्तवगुणगणंवर्णितुमहोत्वदीयोयंवारांनिधिरिवजगत्सर्जनविधिः ४९ ॥ कउवाच ॥ एवंस्तुत्वापुनस्तेनुप्रार्थ
यामासुरादरात् ॥ यदुक्तंतेमयूरेशतदकृतंपरमंवचः ५० सर्वेषांसुरसंघानामवध्योयंहतोसुरः ॥ ततोगात्पार्वतीतत्रजहृषेचालिलिंगतम् ५१ शिवोपि
प्रययौतत्रसमालिंग्यतमब्रवीत् ॥ सम्यक्कृतंत्वयावत्सत्रैलोक्यंहर्षाभिर्भरम् ५२ सिंधोर्वधःसर्वसुरैरसाध्योनचतेश्रमः ॥ पराक्रमवतःसर्वलोकरक्षारतस्य
च ५३ चतुर्वेदानिरूप्यस्यसर्वविद्यानिधेरपि ॥ एवमुक्त्वागतास्तेतुसर्वेस्वस्थानमादृताः ५४ मयूरेशंनमस्कृत्यततोदेवाबुवंश्चतम् ॥ इदंयःपठतेस्तोत्रं
सकामान्लभतेखिलान् ५५ सहस्रावर्त्तनात्कारागृहस्थंमोचयेज्जनम् ॥ अयुतावर्त्तनान्मर्त्योसाध्यंयत्साधयेत्क्षणात् ५६ सर्वत्रजयमाप्नोतिश्रियंपरमदुर्ल

भाम् ॥ पुत्रवान्धनवांश्चैववशतामखिलंनयेत् ५७ ॥ ऋउवाच ॥ एवमुक्त्वाह्यनुज्ञाताःसाध्वित्युक्त्वाययुःसुराः ॥ मयूरेशोगणैर्युक्तःस्वधामप्रत्यपद्यत ५८
इतिश्रीगणेशपुराणेउत्तरखण्डेत्रयोविंशत्युत्तरशततमोध्यायः १२३ ॥ ॥ ७ ॥ ॥ ऋउवाच ॥ पातितेसिंधुदैत्येतुहतशेषारणेस्थिताः ॥ आययुर्गंडकींयाव
त्तावत्तेचिंतयायुताः १ उग्रादुर्गाचक्रपाणिरतिष्टन्विह्वलाश्रुशम् ॥ तावत्तेषांदुष्टचिह्नंबभूवविविधंतदा २ उदक्शिराःप्रसुप्त्वापकश्चित्तत्राशुभावहः ॥ जानु
नोर्मस्तकंन्यस्यतस्थौतूष्णींचलन्निव ३ हनौपाणितलंन्यस्यतस्थौकाचिन्मुदंविना ॥ एतस्मिन्नंतरेदूतायमदूताइवाययुः ४ अतिम्लानमुखादीनानाभुव
नमूकतांगताः ॥ पृष्टस्तेप्राहुरपरेवृत्तांतंरणभूगतम् ५ ॥ दूताऊचुः ॥ असंख्यातान्महावीरान्हत्वासिंधुर्दिवंगतः ॥ बालानस्मान्परित्यज्यतेनहीनारुदामहे ६
निरीक्ष्यदेवान्निहतान्क्रुद्धोगाद्गिरिजासुतः ॥ अस्त्रैरस्त्राणिसंवार्यमुमोचपरशुंशितम् ७ तेनासिंधुर्मृतस्तत्रपतितोधरणीतले ॥ मुमूर्छुस्तत्रसर्वेपितदीया
नागराश्चह ९ श्रुत्वावार्तांदूतमुखाद्दुरुदुःसर्वएवते ॥ विललापाथदुर्गासाजघानशिरउद्कटम् ९ मुक्तकेशामुहुर्वक्त्रंनिघ्नतीगतभूषणा ॥ उग्राचजननीचा
स्यचक्रपाणिःपितातदा १० पौराश्चरुरुदुस्तत्रनिघ्नंतःपाणिनामुखम् ॥ अवनौशिरआस्फाल्यलुलुठुर्घोरनिस्वनाः ११ कश्चिद्धूलिंनिचिक्षेपमुखेशिरसिदुःखि
तः ॥ हस्तपृष्ठंददंशान्यास्ताभ्यांभूमिमथाहनत् १२ अशपन्गिरिजापुत्रांस्त्रियोभंक्त्वाकरांगुलीः ॥ उग्रोवाच ॥ नानायत्नैस्तपसासूर्यतुष्ट्यानत्यास्तुत्यालं
घनैःसर्वदानै ॥ प्रातःकालान्महतस्त्वंकथंचिच्छूरोमानीकेननीतोसिरत्वम् १३ त्रिलोकनायकेनाहंश्लाघ्यात्रैलोक्यमंडले ॥ शपिष्यंतिचमांलोकाहतभाग्यासि
सांप्रतम् १४ जितःकृतांतःपूर्वंतेकथंतेनसमागमः ॥ प्राप्तस्त्वयाकथंपुत्रनजितःपुनरेवसः १५ सकामोगिरिजापुत्रस्त्वयियातेदिवंसुत ॥ मामपृष्ट्वाकथंया
तःस्वर्गंलोकंसुखावहम् १६ दुःखितायांमयिसुतकथंसंतोषमेष्यसि ॥ गर्जंतिनैवजीमूतास्त्वयिगर्जतिपुत्रक १७ निःशब्दःसकथंपुत्रपातितस्त्वंरणांगणे ॥
दुर्गोवाच ॥ दैवैक्यंकृतवान्धातादंपत्योर्वैददर्शनात् १८ प्राणैक्यंनकृतंकस्मात्ब्रह्मणामूढबुद्धिना ॥ नाहंशचींचसावित्रींसौभाग्यमदगर्विता १९ गणया
मिनचान्याश्चसाकथंविधवाभवम् ॥ स्वहस्तेनचकस्तूरींचंदनंचयदाभवान् २० चर्चतिस्मतदांगानिशीतलानिममाभवन् ॥ इदानींदह्यमानानिशोकेनतानिनि
र्वप २१ नभक्षयसिपूर्वंत्वंमद्विनाविषमण्वपि ॥ सकथंमांविनास्वर्गसुखंभोक्ष्यसितादृशम् २२ अपराधंविनाभृत्येनोदासीनाभवंतिहि ॥ साधवःसमशीला
श्चतत्कथंमामुपेक्षसे २३ उपाधिरहितंप्रेमकृतंनानाविधंपुरा ॥ अनिर्वाच्यंकथंत्यक्त्वातद्गतोसिसुरांतक २४ ॥ ऋउवाच ॥ तपोवृद्धाज्ञानवृद्धाःप्राब्रुवन्निष्ठुरं
वचः ॥ नरोदनंप्रशंसंतिधर्मशास्त्रविदोजनाः २५ यदश्रुसुहृदामास्येप्रेतस्यतत्पतेद्ध्रुवम् ॥ तस्मात्तस्यहितंयत्स्यात्तत्कर्त्तव्यंदयावता २६ विचार्यमाणेतस्या
पिमोक्षोदायिकृपावता ॥ निर्गुणेनाचिदानंदघनेनब्रह्मरूपिणा २७ दयापरवशाज्जन्मबिभ्रतालोकशंकृता ॥ मयूरेशेनसंग्रामेनिघ्नतासंसुखंचतम् २८ आत्मनो
नैवमरणंनोत्पत्तिःक्वापिविद्यते ॥ अनादित्वान्निर्गुणत्वान्नित्यत्वाद्वेदनिश्चयात् २९ स्वार्थंहिरोदतेजंतुर्हितंप्रेतस्यनेहते ॥ असंख्यभारवाट्देवीनभारंसहतेधरा ३०

प्रेतस्यशेषःकमठोवराहोसौधराधरः ॥ इत्युक्त्वातेतदाशोकंविजहुर्वृद्धवाक्यतः ३१ उग्राचचक्रपाणिश्चदुर्गाचसखिभिःसह ॥ नागराश्चापिशोचंतोययुःसंग्रा ममंडलम् ३२ ददृशुःसेवकैःसिंधुंवीज्यमानंरणांगणे ॥ पतितंवक्त्रकमलंव्यादायसितलोचनम् ३३ असृक्स्रवंतंदुर्गंधंपक्षिश्वापदसंकुलम् ॥ उपविष्टास्तुप रितःशोचंतोभृशदुःखिताः ३४ अंकेकृत्वाशिरस्तस्यदुर्गाशोचत्स्वरस्वना ॥ पादसंवाहनंनाथहस्ताभ्यांपूर्वमाचरम् ३५ जनमध्येनतच्छक्यमुत्तिष्ठप्राण नायक ॥ शत्रौजीवतिनिद्रांत्वंकथंवीराधिगच्छसि ३६ तन्मुखेस्थापयित्वास्यंहाहाकारंचसाकरोत् ॥ न्यषेधन्वृद्धविज्ञास्तांततउग्राब्रवीद्वचः ३७ चक्रपा णिःपिताचास्यंक्षालयंतौशुशोचतम् ॥ उत्तिष्ठवत्सकिंशेषेशेषेरिपुगणेसति ३८ वज्रीवज्राहतइवपतितोधरणीतले ॥ इदानींबालयुद्धेत्वंकथंनिपतितोभुवि ३९ जितःकृतांतोभूक्षेपात्तद्वशंकथमागतः ॥ किंचिद्वाक्यंवदविभोत्तदयानंदकारकम् ४०यस्यशब्देनत्रैलोक्यंकंपतेस्मपुरानघ ॥ कथंस्ववचनंनाद्यवदसेमंदविक म ४१ नावाभ्यामपराद्धंतेयेनमौनंत्वमाश्रितः ॥ नभाषसेरोषवशात्सेनाशेषसमन्वितः ४२ कथंविह्वलतांयातःकामंयोजितवान्रुचा ॥ ततोविज्ञाश्चवृद्धाश्चनानादृष्टांतदर्शनैः ४३ समादध्युःप्ररुदतोमृतानुमरणंनहि ॥ रामोदाशरथिःकिंनुलोकांतरगतोनहि ४४ विक्रमेणरिपून्जित्वागतःकिंनरघूत्तमः ॥ अ न्येपिशतशोभूपास्त्वत्कृतेमरणंगताः ॥ कीर्तिंनानाविधांकृत्वास्वर्गस्थाःसुखमश्नुते ४५ ॥ ॥ कउवाच ॥ ॥ ततस्तेसंस्कृतिंचक्रुर्बिल्वचंदनदारुभिः ॥ दुर्गा सहैवसंयातापातिव्रत्यगुणान्विता ४६ ततोययौमयूरेशंचक्रपाणिःसनागरः ॥ नमस्कृत्यप्रतुष्टावबद्धांजलिपुटःशनैः ४७राजोवाच ॥ निर्गुणस्त्वंपरात्मासिच राचरगतिर्विभो ॥ त्रयीगम्योगुणाध्यक्षोविरजोविश्वनायकः ४८तवैवमायया देवामोहितास्त्वांनतेविदुः ॥ अहंधन्योनागरिकाधन्यास्त्वद्दर्शनाद्विभो ४९ कउ वाच ॥ एवंतेनस्तुतोदेवःकरुणाब्धिर्मयूरराट् ॥ उवाचपरमप्रीतःसर्वशास्त्रार्थतत्ववित् ॥ ॥ देवउवाच ॥ ॥ वरंवरयमत्तस्त्वंचक्रपाणेहतार्मक ५० राजो वाच ॥ यदितुष्टोसिदेवेशयदिदेयोवरोमम ॥ तदागृहानुपागच्छपुनीहिनगरीमिमां ५१ ॥ कउवाच ॥ एवमाकर्ण्यतद्वाक्यंबर्हिणंससमारुहत् ॥ ययौसनगरंप श्चाद्भ्यंबकोगिरिजायुतः ५२ अग्रतस्तेगणाःसर्वेमुनयोहर्षनिर्भराः ॥ वाद्यत्सुसर्ववाद्येषुययुस्तेगंडकींपुरीम् ५३ नानाध्वजपताकाभिर्युतांसंसिक्तपद्धतिम्५४ इतिश्रीगणेशपुराणेउत्तरखंडेचतुर्विंशत्युत्तरशततमोध्यायः१२४ ॥ कउवाच ॥ ॥ सभांसंवारयामासचक्रपाणिःपुरोगतः ॥ परार्ध्यास्तरणैर्वस्त्रैःपताकाध्वजचा मरैः १ नानारत्नेषुदीप्तेषुभूमिस्तंभगतेषुच ॥ अनंतोदृश्यतेयत्रसंक्रांतप्रतिमोनरः२ ददर्शनगरींदेवोनानाध्वजविराजिताम् ॥ प्रासादशिखरारूढाःपश्यंतिस्मासु रस्त्रियः ३ ततोमुक्ताःसुरास्तेतंसंमुखंचक्रपाणिना ॥ आययुर्माधवःशक्रोनलऐलविलोपिच ४ मरुद्विःशशीचान्येवाद्यघोषेणसत्वरं ॥ स्वस्ववाहात्समुत्तीर्यप्र णेमुःसर्वएवतं ५ आलिलिंगुर्मयूरेशंदेवाःपौराश्चसादरम् ॥ माधवश्चमयूरेशंदृष्ट्वाहर्षसमन्वितः ६ प्रशशंसुःसिंधुवधात्सर्वेहर्यादयःसुराः ॥ देवाऊचुः ॥ आक्रांतं विष्टपंयेनसहतःक्षणमात्रतः ७ दत्तानिस्वपदान्याशुनेदृग्दृष्टेनवाश्रुतः ॥ अत्रयेवैष्णवाःशैवाशाक्ताःसौराश्चतेप्यमुम् ८ तत्तद्रूपंनिरीक्ष्यैवपुपूजुःपरया

मुदा ॥ मयूरेशजयस्वेतिश्रुत्वावाचःसुविस्मिताः ९ बालकाश्चसुसंपन्नामुग्धाःप्रौढाश्चयोषितः ॥ पुपूजुर्मनसादेवंवृद्धाश्चतरुणास्तदा १० चक्र
पाणिगृहेदेवोमध्येसिंहासनेशुभे ११ उपविष्टोमयूरेशोविबुधाश्चसमंततः ॥ मुनयश्चगणाःसर्वेसप्तकोटिमितासुने १२ नुनुवुर्बोदनःसर्वेधन्यादेवा
नृषास्तथा॥ ननृतुश्चाप्सरःसंघाजगुस्तेनारदादयः १३ चक्रपाणिस्ततःसर्वान्संपूज्यविधिवत्तदा ॥ उवाचचसभामध्येधन्यंमेजन्मकर्मच १४ इंद्रादयोलोक
पालाःसमितौयस्यमेधुना ॥ शतजन्मार्जितैःपुण्यैर्मयूरेशोनिरीक्षितः १५ ॥ ॥ कउवाच ॥ ॥ इंद्रोदक्षामयूरेशंप्रथमंपूजितंरुषा ॥ अब्रवीत्सहसाभ्रांतो
मायया जगदीशितुः १६ ॥ शक्रउवाच ॥ ॥ चतुर्मुखोपिलक्ष्मीशोजगदुत्पत्तिकारकः ॥ मूढोसिचक्रपाणेत्वमर्भकस्यप्रपूजनात् १७ अस्मान्नधिकृत्यय
न्मोहात्पूजितोबालकस्त्वया ॥ जनकंसर्वलोकानांत्यज्यसंहारकारकम् १८ त्रैलोक्यजननीमंबांसृष्टिस्थित्यंतकारिणीं ॥ रविंत्रैलोक्यनेतारंत्रयीकर्मप्रवर्त्त
कम् १९ हित्वासंपूजितोबालोनेदंसम्यक्कृतंत्वया २० ॥ ॥ कउवाच ॥ ॥ एवंवदतिदेवेंद्रेचक्रपाणिस्तदाब्रवीत् ॥ रुद्रात्सूर्यात्कुबेराच्चशक्राच्चमरुतोन
लात् २१ दृष्टःपराक्रमोतीवसिंधुदैत्यविनाशनात् ॥ मोक्षात्सर्वसुगणांचकारागारात्गुणेश्वरः २२ योवतीर्णोभुवोभारंहर्त्तुंशिवनिवेशने ॥ परमात्मानंत
शक्तिर्नानादैत्यविभंजनः २३ ॥ ॥ कउवाच ॥ ॥ एवंवदतितस्मिंस्तुश्रुतःशब्दःसुरैर्महान् ॥ मूर्छिताःपतिताःकेचिद्ब्रह्मांडस्फोटशंकया २४ चकंपेध
रणीसर्वानप्राज्ञायतकिंचन ॥ कोटिसूर्यप्रकाशेनसहसाच्छादितंजगत् २५ ततस्तैस्त्रिदशैस्तत्रदृष्टोदेवोतिसुंदरः ॥ नानालंकारसंयुक्तोदशबाहुर्गजाननः २६
एवंदृष्ट्वास्वरूपंतेविस्मिताखिदशास्तदा ॥ पुनस्तमेवददृशुःपंचरूपिणमीश्वरं २७ पद्मासनगतंमध्येवक्रतुंडंशिवंपुनः ॥ आग्नेय्यांनैर्ऋतेसूर्यंपार्वतींमारुते
पिच २८ नारायणंतथेशानेततोभ्रममिताःसुराः ॥ ततस्तेशुश्रुवुर्व्योमवाणींभ्रमनिवारिकाम् २९ आराध्योयंसर्वजनैरेकोजातःसपंचधा ॥ अनादिनिध
नोदेवोजगद्व्यापीगजाननः ३० अयमेवसदापूज्यःसर्वविघ्नविनाशनः ॥ देवैर्मनुष्यैर्यक्षैश्चनागैरक्षोभिरेवच ३१ एतस्मिन्पूजितेपंचपूजनंचभविष्यति ॥
नबुद्धिभेदंतनुयादेतस्मिन्नरकायसा ३२ ॥ ॥ कउवाच ॥ ॥ श्रुत्वैवंतेमयूरेशंशुंडादंडविराजितम् ॥ ददृशुर्विघ्नमुख्यास्तेआद्यमोंकाररूपिणम् ३३ ततः
प्रबुद्धास्तेदेवास्त्यक्त्वाभ्रांतिंस्मयंचतम् ॥ पुपूजुर्जयशब्दैस्तंसर्वांतर्यामिणंविभुम् ३४ ततःपुपूजेहर्षेणचक्रपाणिर्गुणेश्वरम् ॥ पंचामृतैःशुद्धजलैर्दिव्यवस्त्रै
श्चभूषणैः ३५ पुष्पैर्धूपैश्चदीपैश्चनैवेद्यैर्विविधैरपि ॥ फलतांबूलनिचयैर्दक्षिणाभिरनेकशः ३६ नीराजनैर्मंत्रपुष्पैर्नतिभिःस्तुतिभिस्तदा ॥ तथैवपूज
यामासभक्त्यासर्वसुरानपि ३७ उवाचतान्नृपवरोधन्योहंचप्रपूजनात् ॥ यतोनैतादृशःक्वापिजातःसर्वसमागमः ३८ ततस्तत्राब्रवीद्व्यासोदृष्टोनारदश्चतुरा
ननम् ॥ ॥ नारदउवाच ॥ ॥ सिद्धिबुद्धिविवाहार्थमाज्ञयातेऽजसंभव ३९ शिवंशिवांचविज्ञाप्यनिश्चयःप्राङ्मयाकृतः ॥ मयूरेशायसम्यक्तेदातव्ये
बहुलक्षणे ४० ततःसर्वेसुरादेवंब्रह्माणंमन्मथातुराः ॥ प्रत्येकंतेऽयाचंतममदेहीतिसादरम् ४१ ततोब्रह्मातयोर्हस्तेमालांदत्वाब्रवीदिदम् ॥ ॥ कउवा

च ॥ त्रयस्त्रिंशत्कोटिसुरेष्वेकोयोभासतेत्रदि ॥ ४२ ॥ तमेववृणुतंदेव्यौमालाभ्यांमत्समक्षतः ॥ त्यक्त्वासर्वान्सुरांस्तेतुसिद्धिबुद्धीउमेजपि ॥
४३ मयूरेशगलेमालेनिक्षिपेतांमुदातदा ॥ विमनस्कास्ततोदेवाअस्तजन्श्वासमारुतम् ४४ ताभ्यांजानुगताभ्यांतुशुशुभेसमयूरराट् ॥ ब्रह्मायथाविधित
योर्विवाहमकरोत्तदा ४५ उवाचचसभामध्येमयालब्धंत्रदिस्थितम् ॥ न्यवेदयत्तंदेवेशंमयूरेशंविधानतः ४६ अद्ययावन्मयैतेवैपालितेबहुयत्नतः ॥
इदानींतेमयादत्तेरक्षस्वबहुयत्नतः ४७ ततइंद्रादयोदेवामयूरेशंन्यजिज्ञपुः ॥ तवप्रसादाद्देवेशमुक्ताःकारागृहात्ततः ४८ ततःसिधुर्गतोमोक्षंस्वस्थानंकृपया
तव ॥ यास्यामोदेह्यनुज्ञांनोमुनिभिर्गीतमादिभिः ४९ ॥ कउवाच ॥ ददावाज्ञांमयूरेशोयातुकामान्मुदातदा ॥ पार्वतीचस्नुषेचोभेस्वांकमारोप्यसाद
रं ५० मयूरेशंचपरमंहर्षमापशिवान्विता ॥ ददौदानान्यनेकानिवासांस्याभरणानिच ५१ यइदंशृणुयान्मर्त्योविवाहंचवधंशुभम् ॥ सिंधोर्जयंगणेशस्य
सर्वकामाल्लभेन्नरः ५२ इतिश्रीगणेशपुराणेउत्तरखंडेपंचविंशोत्तरशततमोऽध्यायः १२५ ॥ कउवाच ॥ सिद्धेविवाहेचततोमयूरेशःशिखंडिनम् ॥ आरुह्यसह
सागंतुंनगरींस्वामियेषसः १ स्वंस्वंवाहनमारूढागीर्वाणास्तत्क्षणेनच ॥ यांतिस्मपुरतस्तस्यमुनयःपृष्ठतोययुः २ अन्वयुर्नागराःसर्वेस्त्रियश्चबालकानिच ॥
आनंदयुक्तानगरात्सहसाचक्रपाणिना ३ वाद्यत्सुसर्ववाद्येषुनृतुश्चाप्सरोगणाः ॥ रणभूमिंगतोयावन्मयूरेशोखिलैर्वृतः ४ तावत्स्कंदादयोवीराःप्रार्थयां
चक्रिरेविभुं ॥ वीराऊचुः ॥ सेनाचरादैत्यगणैर्निहतायुद्धसंभ्रमात् ५ उत्तस्थुःसर्वएवैतेत्वत्कटाक्षामृतोक्षिताः ॥ तान्दृष्ट्वाजीवितांस्तेनसर्वेदेवाश्चनागराः ६
विस्मयंपरमंप्राप्ताःसाधुसाध्वब्रुवंस्तदा ॥ ततोयोजनमात्रंचदत्वामार्गमवस्थितः ७ देवोब्रवीच्चक्रपाणिंमूर्ध्निदत्वाकरंशुभम् ॥ आलिंग्यदशदोर्दंडैःशत्रुप
क्षभयंकरैः ८ ॥ देवउवाच ॥ त्वंयाहिगंडकींशीघ्रंनागैर्ममवाक्यतः ॥ कउवाच ॥ एवमाकर्ण्यतद्वाक्यंप्रभोचाश्रूणिसत्वरम् ९ नागराश्चप्रणम्योच्चैरूचुर्वा
क्यंशुचान्विताः ॥ यत्रयासिनयास्मांस्त्वमत्रत्यकुंनचार्हसि १० नागतःस्यात्पूर्वमेवतदादुःखंननोभवेत् ॥ एवमुक्त्वानमस्कृत्यययुःसर्वेतदाज्ञया ११ चक्र
पाणिरपितदानमस्कृत्यययौपुरः ॥ वर्णयंतोगुणगणांस्तदीयानद्भुतान्बहून् १२ क्षणेननगरींप्राप्यचक्रपाण्यनुमोदिताः ॥ नागराःस्वगृहंप्राप्ताश्चक्रपाणिर्नि
जालयं १३ पंचानामपिदेवानांप्रासादानप्यकारयत् ॥ पंचायतनमूर्तिंवस्थापयामासतेषुच १४ प्रत्यहंपूजयामासभक्तिभावसमन्वितः ॥ मयूरेशपुरीं
प्राप्तोमयूरेशोपितत्क्षणात् १५ आश्चर्यंपरमंप्राप्तागणाःसर्वेनिरीक्ष्यतम् ॥ यस्यांरत्नमयास्तंभाभित्तयोष्टापदान्विताः १६ एकोनादृश्यतेतत्रासंख्यातजनसं
युतः॥ प्रविश्यससभांरम्याब्रह्मादीनुपवेश्यच १७ मध्येविवेशचततोलोकयन्सर्वतःस्वयं ॥ ददर्शपूर्वभागेसमन्मथंरतिसंयुतं १८ देवींमार्जारनाम्नींतांलोके
ख्यातांसुखप्रदां ॥ दक्षिणस्यांदिशितदालोकयत्पार्वतीशिवौ १९ तत्पुरोविरजांदेवींभक्तकामप्रपूरिकां ॥ पश्चिमायांदिशिततोवाराहंधरणीयुतं २० आश्रयां
नामदेवींचसर्वविघ्नहरांशुभां ॥ उत्तरस्यांदिशितदाश्रीहरिंसमलोकयत् २१ मुक्तादेवींचविख्यातांसर्वमुक्तिप्रदांततः ॥ त्रयस्त्रिंशत्कोटिसुराःस्थितास्तद्दर्शने

च्छया २२ भाद्रशुद्धप्रतिपदिस्नात्वाभ्यर्च्यगजाननं ॥ गत्वातुपूर्वदिग्भागेमार्जारींपूजयेत्ततः २३ दत्त्वादानानिविप्रेभ्यःस्मृत्वाध्यात्वागजाननं ॥ मौ
नंव्रतंसमास्थायनशृत्वापादजध्वनिं २४ कृमिकीटपतंगादीन्नहिंसेत्प्रयतःशुचिः ॥ पुनःस्नात्वासमभ्यर्चेद्वेदवेदांगजाननं २५ पूर्ववन्नुद्वितीयेद्वितृतीयेचत
तःक्रमात् ॥ तथैवदक्षिणद्वारिविरजांद्वितयेहनि २६ तृतीयेपश्चिमद्वारितथैवाश्रयसंज्ञितां ॥ नत्वार्चयेच्चतुर्थ्यांतुतद्वदुत्तरतोनरः २७ मुक्तांदेवींसमभ्यर्च्यमयूरे
शंचतद्दिने ॥ पूजामहोत्सवंकुर्याद्रात्रौजागरणंचरेत् २८ एवंयःकुरुतेभक्त्याद्वाराणिचोपवासतः ॥ ससर्वाञ्छँभतेकामान्मयूरेशप्रसादतः २९ चतुर्थ्यां
मेवचत्वारिशक्तोद्वाराणिपूर्ववत् ॥ आद्यंतमज्जनादेवदर्शनंचकरोतियः ३० तस्यसद्यःफलंदद्यात्पारितुष्टोगजाननः ॥ तस्माच्छुद्धप्रतिपदमारभ्यब्रह्मचर्य
वान् ३१ ततश्चतुर्थ्यांमुषसिस्नानंकृत्वाविधानतः ॥ नित्यंसंपाद्यविधिवन्मयूरेशंसमर्चयेत् ३२ प्रदक्षिणानमस्कारान्कुर्यादेवैकविंशतिं ॥ पूर्वद्वारेनम
स्कृत्यमार्जारींत्वरयान्वितः ३३ एवंशिवावाश्रयांचमुक्तादेवींनमेत्पराम् ॥ प्रारभेद्दिनशेषेतुमयूरेश्वरपूजनम् ३४ षोडशैरुपचारैस्तुपूजयेत्सुसमाहितः ॥
रात्रौजागरणंकुर्याद्गीतवादित्रनिस्वनैः ३५ प्रभातेविमलेस्नात्वापुनर्देवंसमर्चयेत् ॥ ब्राह्मणैःसहकुर्वीतपारणंस्वस्यशक्तितः ३६ तेभ्योदद्याद्धिरण्यंचवासो
धान्यंगवादिकम् ॥ एवंयःकुरुतेमर्त्योदुःसाध्यमपिसाधयेत् ३७ पुत्रपौत्रयुतोभोगान्भुक्त्वाचांतेव्रजेद्दिवम् ॥ इंद्रादयोलोकपालाःपूजयिष्यंतितंनरम् ३८
सेवंतेपादकमलंतस्यायाष्टनायिकाः ॥ अंधस्तुलभतेदृष्टिंमूकोवाचंलभेद्ध्रुवम् ३९ बधिरःश्रुतिमाप्नोतिपंगुश्चरणावपि ॥ भार्यार्थीलभतेभार्यांविद्यार्थी
लभतेमतिम् ४० एतदेवफलंप्रोक्तंद्वारेषुचोपवासतः ॥ ततःकदाचिद्देवेशोमयूरेशोऽखिलान्सुरान् ४१ उवाचश्लक्ष्णयावाचाहरिब्रह्मशिवादिकान् ॥
मयूरेशउवाच ॥ ॥ यदर्थमवतीर्णोहंतत्कार्यंनःकृतंसुराः ४२ निहताबहवोदैत्याभूभारश्चक्रतोलघुः ॥ सिंधोःकारागृहात्सर्वेमोचिताअमृतांधसः ४३
स्वाहास्वधावषट्काराभविष्यंतियथापुरा ॥ भवतामाज्ञयादेवायास्येस्वंधामसांप्रतम् ४४ एवमाकर्ण्यतद्वाक्यंदेवाःसर्वेशुचान्विताः ॥ त्यजंतोभ्रूणिसं
प्रोचुःपरस्परमुखेक्षणाः ४५ अस्मांस्त्यक्त्वामयूरेशक्वगंतुंसमीहसे ॥ कथंस्नेहंपरित्यज्यनैष्ठुर्यंपरमंगतः ४६ ततस्तत्पार्वतीश्रुत्वासहसाशोककर्षिता
॥ पपातमूर्छितामूर्मौमुहूर्तादवदच्चसा ४७ ॥ ॥ पार्वत्युवाच ॥ ॥ दीननाथदयासिंधोसिंधुदैत्यविमर्दन ॥ क्वयास्यसिजगन्नाथहित्वामांजननींतव ४८
नस्थास्यंतिममप्राणास्त्वयियातेसुरेश्वर ॥ ॥ देवउवाच ॥ ॥ द्वापरेपुनरेवाहंयास्येत्वत्पुत्रतांशुभे ४९ नामिथ्यावचनंमेस्यान्नचिंतांकर्तुमर्हसि ॥ ममा
पिदुःखमतुलंवियोगात्तवजायते ५० नैकत्रसर्वदामातःसुहृदांवसतिर्भवेत् ॥ सिंदूरोनामदैत्योपिभविष्यतिसुदारुणः ५१ अवध्यःसर्वदेवानांतदाहंस्यांत
वार्भकः ॥ स्मृतमात्रस्तवाग्रेहंस्थास्यामिशिवनंदिनि ५२ ततःषडाननःप्राहनयमांयत्रयास्यसि ॥ बालकेरूपणेदीनेनौदासिन्यंहियुज्यते ५३ ॥ देवउवा
च ॥ नचिंतांकुरुबंधोत्वमत्रायास्याम्यहंपुनः ॥ भवतोनवियोगोमेसर्वांतर्यामिणःखलु ५४ तस्मैददौमयूरंतंमयूरेशःस्वबंधवे ॥ मयूरध्वजइत्येवनामचक्रे

स्यतत्क्षणात् ५५ आरुरोहमयूरंतंस्कंदोबंधोरथाज्ञया ॥ तस्मिन्नेवक्षणेदेवोंतर्दधेसमयूरराट् ५६ तस्मिन्नंतर्हितेकेशाअपश्यन्हृदितंसदा ॥ ततोब्रह्मा वालुकाभिःकृत्वामूर्तिंगजाननीं ५७ स्थापयामासविधिवत्प्रासादेसुमनोहरे ॥ पुपूजुःसर्वलोकास्तमुपचारैर्यथाविधि ५८ वसिष्ठाद्यामुनिगणाःसमुद्भ ह्मकमंडलौ ॥ संवैनित्यविधिंकृत्वाययुर्मूर्तिंसुशोभनीं ५९ उपोष्यकेचिद्विदधुर्द्वाराणिधामलब्धये ॥ स्नात्वानत्वामयूरेशंधावमानास्तथापरे ६० ऊचुः परस्परंदेवामुनयोपिमुदातदा ॥ नैतादृशंपुण्यक्षेत्रंयत्रदेवःस्थितःस्वयम् ६१ मयूरेशोविघ्नहरोभक्तानांकामपूरकः ॥ पूजयित्वैवमुक्त्वातुजग्मुस्तेस्वंस्व माश्रमम् ६२ ब्रह्मादयःसुराःस्वंस्वंपदमभ्यागमंस्तदा ॥ शंकरःसपरीवारःकैलासमगमन्मुदा ६३ स्वधास्वाहावषट्कारैरिंद्राद्यामुमुदुस्तदा ॥ कउवाच ॥ एवंतेसर्वमाख्यातंत्रेतायुगकृतंमुने ६४ मयूरेशस्यचरितंश्रवणात्सर्वकामदम् ॥ धन्यंयशस्यमायुष्यंसर्वपापहरंनृणाम् ६५ पुत्रदंधनदंविद्याप्रदंदुःखनिवार णम् ॥ आधिव्याधिहरंकुष्ठदुष्टरोगादिनाशनम् ६६ पठतांशृण्वतांपुंसांभुक्तिमुक्तिप्रदंशुभम् ॥ विजयश्रीप्रदंनृणांक्षत्रियाणांविशामपि ६७ शूद्राणामपिसर्वे षांश्रीप्रदंपुष्टिवर्धनम् ॥ यद्यत्तेपरिपृष्टंमेतत्तत्तेकथितंमुने ६८ गजाननस्यचरितंपुनःश्रोष्यसिमन्मुखात् ॥ ६९ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेषड्विंश त्युत्तरशततमोऽध्यायः १२६ ॥ व्यासउवाच ॥ चतुराननदेवेशगुणेशचरितंशुभम् ॥ कथितंविस्तराद्देवनाहंतृप्तोस्मितच्छ्रुवात् १ सुधयातुविरक्तःस्यान्न कथाश्रवणान्नरः ॥ त्रेतायुगकथासर्वागुणेशस्यश्रुतामया २ गजाननेतिनामास्यद्यापपरेतुकुतोभवत् ॥ मूषकोवाहनंचास्यकथंयातोमहाविभो ३ कृपयासं शयमसुंछिंधित्वंकमलासन ॥ कउवाच ॥ सम्यक्पृष्टंत्वयावत्सममचित्तगतंमुने ४ यतःश्रोताचवक्ताचपृच्छकःसिद्धिमाप्नुयात् ॥ तांकथांकथयिष्यामि विनायककृतांमुने ५ द्वापरेयत्कृतंतेनचरितंशृणुसांप्रतम् ॥ यथागजाननोदेवोरक्तवर्णश्चतुर्भुजः ६ गजाननश्चाखुवाहस्तत्सर्वंकथयामिते ॥ कदाचिद्ब्रह्ममु वनंयातःशंभुर्यदृच्छया ७ उत्थापयामासतदाप्रसुप्तंकमलासनम् ॥ सउत्थितोमहाजृंभांचकारक्रोधसंयुतः ८ ततएकोमहाघोरःपुरुषःसमपद्यत ॥ सचच क्रेमहाघोरंशब्दंसर्वभयंकरम् ९ चकंपेपृथिवीतेनसाब्धिद्वीपासपर्वता ॥ दिक्पालाश्चकिताःसर्वेशेषःक्षुब्धोस्रष्टजद्विषम् १० विशीर्णागिरयःसर्वेभूतान्याकुल तांययुः ॥ कल्पांतइवतत्रासीत्त्रैलोक्यवासिनांनृणाम् ११ ब्रह्मांडंमस्तकेनासौस्फोटयन्निवतस्थिवान् ॥ यद्देहतश्चारुगंधोव्यानशेभुवनत्रयम् १२ जपा कुसुमदेहस्यप्रभयारुणितादिशः ॥ अयंकिंमदनोजातोद्वितीयोब्रह्मसंभवः १३ कामस्तुलज्जितस्तस्यसद्योरूपनिरीक्षणात् ॥ पुरस्तंसन्निरीक्ष्यै नंविस्मितःकमलासनः १४ कस्यत्वंकुतउत्पन्नःकिंचिकीर्षसितद्वद ॥ पुरुषउवाच ॥ अनेकानिसुरेशत्वंब्रह्मांडानिसृजस्यपि १५ विभ्रांतइवकस्मान्मांसर्व ज्ञःसन्नहिपृच्छसि ॥ जृंभायास्तेसमुत्पन्नंकथंमांनावबुध्यसे १६ अनुगृह्णीष्वपुत्रंमांदोहिनामयथामति ॥ स्थानंचदेहिमेनाथभक्ष्यंकार्यंचमेवद १७ इत्या कर्ण्यवचस्तस्यप्रोवाचचतुराननः ॥ रक्तंवपुर्यतस्तेस्तिसिंदूराख्योभविष्यसि १८ सामर्थ्यंचमहत्तेस्यात्त्रैलोक्याकर्षणक्षमम् ॥ क्रोधादालिंगसेयंत्वंश

तथासभविष्यति १९ पंचभ्योपिचभूतेभ्योनभयंतेकदाचन ॥ देवदानवयक्षेभ्योमानुषेभ्योभयंनते २० इंद्रादिलोकपालेभ्यःकालादपिभयंनते ॥ ननागे
भ्योनरक्षोभ्योनाहोरात्रेभयंनते २१ सजीवान्नचनिर्जीवाद्भयंसिंदूरतेभवेद् ॥ वसयत्रमनस्तेस्यात्स्थातुंत्रिभुवनेष्वपि२२ततःसवरदानेनतुतोषचतुरास्यजः॥
चक्रंदकंपयन्शब्दैस्त्रैलोक्यंसचराचरम् २३ चुक्षुभुःसागराःसर्वेलोकपालाश्चदुद्रुवुः ॥ उवाचसतदादेवंनमस्कृत्यपितामहम् २४ ॥ सिंदूरउवाच ॥ तववाक्यामृ
तेनाहंप्रीतोब्रह्मांडनायक ॥ त्वमेवविश्वंसृजसिपासिहंसिगुणैस्त्रिधा २५ त्वयिसुप्तेजगत्सुप्तमंधकारश्चजायते ॥ महद्भाग्यंममविभोतपोदानव्रतैर्विना २६
पुत्रस्नेहात्प्रसन्नस्त्वंनान्यथातेप्रसन्नता ॥ कल्पकोटितपोभिस्त्वंप्रसन्नोजायसेविभो २७ ॥ कउवाच ॥ इत्युक्त्वातंप्रणम्यासौकृत्वापिचप्रदक्षिणम् ॥ जगा
ममनसाभूमिमार्गेतर्कमथाकरोद् २८नमेतपोवाध्यानंवाजपःस्वाध्यायएवच ॥ कथंतेनवरादत्ताःसत्याउतवृथानुते २९ गत्वाद्रक्ष्यामिपितरमित्युक्त्वागात्पि
तामहम् ॥ तुलयित्वातुदोर्दंडौजगर्जसभयानकः ३० तमेवालिंगितुंचेच्छत्ततऊचेपितामहः ॥ पुत्रस्नेहान्मयादत्तावराजन्यस्यदुर्लभाः ३१ दुष्टभावान्ममै
वत्वमपकर्तुमिहागतः ॥ नाज्ञासिषमहंदुष्टभावंतेखलनायक ३२ भुजगस्यपयोदत्तंविषमेवहिजायते ॥ दुष्टभावंगतोयस्मात्तस्माद्दैत्योभविष्यसि ३३ परमा
त्मावतीर्यांशुहनिष्यतिगजाननः ॥ तवांतंसुरभिज्ञात्वास्वांगेतन्मर्दयिष्यति ३४ सिंदूरारुणदेहश्चसिंदूरप्रियएवच ॥ भविष्यतिसदेवोपिसिंदूरवधएवच ३५
एवमुक्त्वापपालाशुभयेनकमलासनः ॥ मनोवायुमहावेगोनिश्वासश्वाससंकुलः ३६ दैत्योपिपृष्ठतोयातिशापमाकर्ण्यमन्युमान् ॥ स्वेदेनार्द्रतनुर्दुष्टोदक्षाद
ष्ट्वापुरोव्रजन् ३७ धरिष्यामिपदेन्यस्मिन्निितिदैत्योभ्यधावत ॥ वैकुंठमगमद्ब्रह्माकंपमानस्त्वरान्वितः ३८ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेसिंदूरोत्पत्तिवर्णनंना
मसप्तविंशत्युत्तरशततमोध्यायः ॥ १२७ ॥ ॥ कउवाच ॥ सददर्शसमासीनंनारायणमनामयम् ॥ रत्नकांचनविलसत्पद्मासनगतंविभुं १ सोपितंपुरतो
वीक्ष्यविवर्णवदनंतदा ॥ तत्पृष्ठतोमहादैत्यंगगनस्पर्धिमस्तकम् २ उदातिष्ठतवेगेनदयालुःकमलापतिः ॥ धृत्वाकरंसमालिंग्यस्वासनेकंन्यवेशयत् ३ सं
पूज्यपरिपप्रच्छकिंतेकार्यमुपस्थितम् ॥ कथंचम्लानवदनःश्वासवांश्चहतप्रभः ४ ममखेदःसमुत्पन्नोदृष्ट्वैवत्वांपितामह ॥ इतितद्वचनंश्रुत्वाजगादकमला
सनः ॥ ५ ॥ ॥ कउवाच ॥ ॥ प्रबोधितःशिवेनाहंप्रतिसुप्तोनिजालये ॥ ततोमेजृंभतोवक्त्रान्निर्गतःपुरुषोमहान् ६ पतंतिभूतलेभानियन्मस्तकवि
घाततः ॥ तस्यसौरभगंधेनसर्वेदेवाविसिस्मिरे ७ यस्यलावण्यमीक्ष्यैवलज्जितोमदनोऽभवत् ॥ यस्यक्रंदितशब्देनचकंपेभुवनत्रयम् ८ सनमस्कृत्यमांदे
वविनीतःपुरतःस्थितः ॥ ततस्तस्मैवरादत्ताःपुत्रस्नेहेनमाधव ९ यंयंत्वमालिंगयसिसमृत्युमुपैष्यति ॥ कालोपिनरणेस्थातुंतवशक्तोभविष्यति १०
स्थानंचस्वेच्छयातस्यदत्तंदेवमयाततः ॥ नमस्कृत्यगतोदूरंवितर्कात्पुनरागतः ११ मामेवालिंगितुंयातोपलमस्माद्भयादहम् ॥ हंसमारुह्यसहसावेगेन
त्वामुपागतः १२ दृष्ट्वाद्दृष्ट्वापृष्ठगतंकंपःश्वासश्चमेभवत् ॥ विनात्वांशरणंकंवायामिसर्वेश्वरेश्वर १३ ततोब्रवीन्महाविष्णुर्ब्रह्माणंशरणागतम् ॥ देव

उवाच ॥ पूर्वंदत्वावरान्देवसंकटंप्राप्यबुद्धितः १४ इदानींचिंतयाकिंस्याद्यद्भाव्यंतद्भविष्यति ॥ सपीडांत्रिषुलोकेषुविधातुमुद्यतोभवत् ॥ १५ ॥ ॥ कउवाच ॥ ॥ यावत्तौचिंतयाविष्टौस्थितौब्रह्महरीतदा ॥ तावत्सपुरतोतिष्ठद्दृष्ट्वाताभ्यांमहासुरः १६ जगर्जगर्जयामासत्रैलोक्यंबलवत्तरम् ॥ ब्रह्मांडंकंपयामासब्रह्माणंचतदास्खलः १७ सोवदद्रक्षरक्षेतिविष्णुंत्रैलोक्यरक्षकम् ॥ ततोविष्णुर्जगौदैत्यंवाचामधुरयातदा १८ ॥ ॥ हरिरुवाच ॥ ॥ नत्वयावरदानेनमत्तेनयोद्धुमुत्सहे ॥ अहंसत्वगुणोपेतःपालनेनिरतःसदा १९ अयंचब्राह्मणोब्रह्मातेनयोद्धुंनचार्हसि ॥ तवयुद्धप्रदोदेवःख्यातोसौमदनांतकः २० तेनयुद्धंस्वतेकीर्तिर्महतीस्यात्त्रिलोकगा ॥ ॥ कउवाच ॥ ॥ इत्याकर्ण्यवचस्तस्यजहृषेदैत्यपुंगवः २१ उड्डीयप्रययौसद्यःकंपयन्भुवनत्रयम् ॥ पातयन्पर्वतान्वृक्षांश्चूर्णयन्सहसाबहून् २२ दिग्गजाश्चलिताःसर्वेसंजग्मुर्विदिशोदिशः ॥ एवमुपत्यकांयातःकैलासस्यमहागिरेः २३ ददर्शाधित्यकायांसध्यानस्थंगिरिशंखलः ॥ नंदिभृंगिगणाकीर्णंपार्वत्यासेवितंविभुं २४ व्याघ्रचर्मपरीधानमर्धचंद्रविभूषणं ॥ भस्मांगरागशोभाढ्यंकरिचर्मोत्तरीयकम् २५ दृष्ट्वादेवंतदादैत्योनिर्निंदसहसाहरं ॥ अनेनकिंमयायुद्धंकर्तव्यंतापसेनह २६ एतस्यसुंदरींभार्यांनीत्वायामियदृच्छया ॥ एवंनिश्चित्यमनसागौरीमंतिकमाययौ २७ तदाचकंपेगिरिजाकल्पांतेजगतीयथा ॥ निमील्यनयनेमूर्छामापाशुभयविह्वला २८ दधारतांकेशपाशेसदैत्योदुष्टमानसः ॥ उड्डीयचलितोवेगाच्छुशोचगिरिजातदा २९ रावणेननीयमानायथासाधरणीसुता ॥ गिरिजोवाच ॥ औदासिन्यंकथंयातोमयिदेवोखिलार्थवित् ३० ध्यानंकथंगतोस्यर्धेन्हीयमाणेत्वदंगके ॥ नाकारिदास्यंन्यूनंतेयेनकाठिन्यमागतः ३१ कःसखामोचयेन्मांहिप्राणदाताभवेच्चकः ॥ पुनर्मेशंकरंकोनुदर्शयेद्बलवत्तरः ३२ ॥ कउवाच ॥ ततःशोकाकुलांवीक्ष्यतांगणाःप्राद्रुवंस्तदा ॥ अनेनयोद्धुंशक्तिर्नोत्रैलोक्यनाशिनाधुना ३३ शिवश्चध्याननिष्ठोभूद्दैवादस्यानुकूलता ॥ नीतानोजननीविश्वसृष्टिस्थित्यंतकारिणी ३४ मोहिनीसर्वदेवानांसर्वदुःखविनाशनी ॥ लावण्यलहरीनीतासर्वयोषिद्वराशुभा ३५ रत्नभूताकथंनीताकथंसापुनरेष्यति ॥ ध्यानस्थेशंकरेसर्वनाशनेनेत्रवह्नितः ३६ तस्मिन्यास्यतिलोभेनपुत्रानिवजनन्यथ ॥ एवंशोकंप्रकुर्वत्सुहाहाकारैरुदत्सुच ३७ गणेषुविससर्जाशुध्यानंक्रोधान्महेश्वरः ॥ क्रोधानलेनब्रह्मांडंदहन्निवदिशोदश ३८ पप्रच्छतान्गणान्शंभुःसंकटंकिमुपस्थितम् ॥ भस्मसात्तंकरिष्यामियेनवःकदनंकृतम् ३९ इतितद्वचनंश्रुत्वाप्रोचुस्तंतेगणास्तदा ॥ त्वयिध्यानस्थितेदेवमंदराचलसन्निभः ४० कृतांतसमरूपःसन्नागतोदैत्यपुंगवः ॥ यस्यश्वासानिलहताअचलाश्चलतांगताः ४१ संमोहंप्रापितादेवादर्शनादेवशंकर ॥ ततःसगिरिजांधृत्वाकेशपाशेमहाबलः ४२ निनायसत्वरंव्योममार्गेणजननींहिनः ॥ नीयमानाशिवाप्राहधावधावेतिसत्वरम् ४३ मूर्छितापतिताभूमौवयंसर्वेविमूर्छिताः ॥ तथाविधांसमादाययययौसदुष्टमानसः ४४ श्रुत्वातेषांवचःशंभुर्जज्वालपरमंरुषा ॥ कुर्वन्भस्मेवलोकानामास्रोहद्दृषंनिजम् ४५ त्रिशूलादीनिशस्त्राणिदधानोदशभिर्भुजैः ॥ नभोमार्गेणप्रययौगर्जयन्विदिशोदिशः ४६ यत्रासौत्रिसुरोदैत्यस्तंदेशमगम

क्षणात् ॥ अहनत्पृष्ठदेशेतंतस्थौससंमुखंतदा ४७ मुंचमायांमहादुष्टदृष्टःसन्क्वगमिष्यसि ॥ इत्युक्तःसरुषाविष्टस्त्रिलोकींभस्मतांनयन् ४८ बाहुभ्यांमार
यन्नेवप्रययौशिवसन्निधौ ॥ उवाचचमहादैत्योगर्वेणपरिमोहितः ४९ नाहंमशकवाक्येनबिभेमिभुवनाधिपः ॥ यस्यश्वासानिलेनाशुकंपतेमेरुपर्वतः ५०
तस्यमेगणनाास्तिमुखंमांमाप्रदर्शय ॥ यदिशक्तिर्मयासार्धंयुद्धंकर्तुंतदाकुरु ५१ नोचेदन्यांपरिणयततःसौख्यमवाप्स्यसि ॥ किंमयासहयोद्धव्यंमश
केनत्वयालघो ५२ एवमुक्त्वाबाहुयुद्धंकर्तुंशंकरमाययौ ॥ दुर्गादेवीतुसस्मारमयूरेशंस्वचेतसि ५३ द्विजरूपधरोदेवोमयूरेशस्ततस्तयोः ॥ अंतराले
प्रादुरासीत्कोटिसूर्यनिभःक्षणात् ५४ सर्वांगसुंदरोनानाभूषणैरुपशोभितः ॥ परशुंमध्यतःकृत्वावारयामासदैत्यपम् ५५ उवाचश्लक्ष्णयावाचासिंदूरंतं
द्विजोत्तमः ॥ त्रैलोक्यजननींगौरींस्थापयाशुममांतिके ५६ युध्यस्वशंकरेणत्वंयावज्जयपराजयौ ॥ जयोयस्यभवेत्तेनग्राह्येतिनान्यथावचः ५७ ॥ ॥ क
उवाच ॥ ॥ द्विजवाक्यंसमाकर्ण्यसिंदूरोहृष्टमानसः ॥ स्थापयामासगिरिजांयुद्धायबहुलालसः ५८ तयोस्तुपश्यतोरेवतावुभावप्ययुध्यताम् ॥ सिंदू
रश्चमहेशश्चनानायुद्धविशारदौ ५९ क्रोधसंरक्तनयनौतुल्यतेजःपराक्रमौ ॥ बाहुभ्यांवेष्टितुंयावदियेषसोऽसुरोहरम् ६० अदृश्यएवपरशुरस्यजघ्नेबलादुरः ॥
क्षीणशक्तिंततोदैत्यंत्रिशूलेनाहनद्धरः ६१ ततोऽशक्तंद्विजवरोवदतिस्महितंवचः ॥ त्रैलोक्यनायकेनत्वंनयुद्धंकर्तुमर्हसि ६२ गिरिजाशांविहायाशुव्रजस्वनि
जमंदिरम् ॥ नोचेदयंशिवोभस्मकरिष्यतितवाधुना ६३ एवमुक्तोद्विजेनासौवांछांत्यक्त्वा भुवंययौ ॥ ततःसापार्वतीप्राहद्विजंप्राप्तेजयंशिवे ६४ कोसित्वंमु
निशार्दूलयेनाहंमोचिताखलात् ॥ निजंमेदर्शयस्वीयंरूपंनेदंस्वभावजम् ६५ ममप्राणाधिकोसित्वंसखाप्राणप्रदोयतः ॥ नभवेदुपकारस्तेप्राणेत्यक्तेद्विजो
त्तम ६६ एवमाश्रुत्यतांवाचमुवाचसमुनीश्वरः ॥ नचमातर्मयाकारिकिंचिदत्रमहेश्वरः ६७ अजयत्सिंदुरंदैत्यंमोचितात्वंशिवेनह ॥ इत्युक्त्वापूर्वरूपंसआवि
श्चक्रेविनायकः ६८ दशदोर्दंडरुचिरंकर्णकुंडलमंडितम् ॥ कस्तूरीतिलकंरत्नमुक्तामालाविभूषितम् ६९ नानालंकाररुचिरंशेषकंठमणिप्रभम् ॥ दृष्ट्वैवंपरमात्मा
नंननंदगिरिजातदा ७० ननामपादयोस्तस्यसउत्थाप्यचतांजगौ ॥ विनायकउवाच ॥ त्रेतायुगेप्राब्रुवंत्वांदास्यामिदर्शनंपुनः ७१ अवतीर्यद्वापरेतेगृहेनाम्ना
गजाननः ॥ भविष्यामिहनिष्यामिसिंदूरंदैत्यमोजसा ७२ कउवाच ॥ मुनिरूपधरोदेवउक्त्वावांतरधीयत ॥ ततःशुशोचगिरिजामूर्छांसापरमांययौ ७३ ततऊ
चेविश्वनाथोमनःस्वस्थंकुरुप्रिये ॥ पश्यत्वंत्वद्दादितंदेवंविनायकमनामयं ७४ नमिथ्याभाषितंतस्ययदुक्तंतत्करिष्यति ॥ एवमुक्त्वामहादेवोवृषारूढस्तयासह
७५आययौपरमंप्रीतःकैलासंपर्वतेश्वरं७६इतिश्रीग०पु०उ०अष्टाविंशत्युत्तरशततमोध्यायः १२८ ॥ कउवाच ॥ ततोदैत्योमृत्युलोकंगतोगर्वादगर्जत ॥ कंपि
ताःपर्वताःसर्वेवृक्षानिपतिताभुवि १ पक्षिसिंहाःश्वापदानिबभ्रमुःकाननेतदा ॥ ततोजिगायनृपतीन्सर्वान्वीरांश्चदानवः २ ब्रह्मादयोजितायेनतेनायुध्यन्कथंनृ
पाः ॥ केचिद्विधाकृतास्तेनकेचिन्नभसिबभ्रमुः ३ केचिच्चसम्मुखेयुद्धंकृत्वास्वर्गंगतानृपाः ॥ केचिच्चशरणंयाताःसेवकत्वमुपागताः४ केचिद्भ्रष्टपदाजग्मुरभिमा

नेनकाननं ॥ एवंजित्वानृपानस्वान्मुनीनामाक्रमेमतिं ५ अकरोद्दुष्टबुद्धिःसबबंधसहसाचतान् ॥ तदाकेचिन्मुनिगणास्त्यक्त्वादेहंदिवंगताः ६ केचिच्चमेरुकंद
र्योन्यवसन्विगतज्वराः ॥ केचिच्चनिहतास्तेनकेचिच्चताडिताभृशं ७ प्रासादाःसकलास्तेनाविध्वस्तादेवताअपि ॥ एवंतुप्रलयेजातेलुप्यन्क्रियाश्चवैदिकाः ८ स्वा
हास्वधावषट्काराहाहाकारोप्यजायत ॥ देवागिरिगुहास्थास्तेमुनयोयक्षकिन्नराः ९ न्यमंत्रयंतकार्यार्थंतत्रप्राहबृहस्पतिः ॥ विघ्नमानेभ्योदेवेभ्यस्तेभ्यःस
र्वेभ्यएवच १० नश्यंविद्यतेतस्यतस्माद्देवंविनायकं ॥ प्रार्थयध्वंयदाविप्राःप्रादुर्भावंशिवालये ११ गजाननेतिनाम्नासकरिष्यतिचसांप्रतं ॥ हनिष्यतिब
लाद्दैत्यांसिंदूरंनात्रसंशयः १२ निराबाधंजगत्सर्वंभविष्यतितदासुराः ॥ एवमुक्तास्तुजीवेनतंतुदेवादयोखिलाः ॥ भक्त्यापरमयायुक्तास्तुष्टुवुस्तंविनायकं
१३ ॥ ॥ देवाऊचुः ॥ ॥ जगतःकारणंयोसौरविनक्षत्रसंभवः ॥ सिद्धसाध्यगणःसर्वैयतएवचसिंधवः १४ गंधर्वाःकिन्नरायक्षामनुष्योरगराक्षसाः ॥ यतश्च
राचरंविश्वंतंनमामिविनायकं १५ यतोब्रह्मादयोदेवा मुनयश्चमहर्षयः॥ यतोगुणास्त्रयोजातास्तंनमामिविनायकं १६ यतोनानावताराश्चयश्चसर्वत्रदिस्थितः॥यं
स्तोतुंनैवशक्नोतिशेषस्तंगणपंभजेत् १७ सिंदूरोनिर्मितःकेनविश्वसंहारकारकः॥तेनार्तिंप्रापितंविश्वंत्वयिस्वामिनिजाग्रति १८ अन्यंकंशरणंयामःकोनुपास्यति
नोखिलान् ॥ जह्येनंदुष्टबुद्धित्वमवतीर्यशिवालये १९ इत्युक्त्वापरितेपुस्तेनानानुष्ठानतत्पराः ॥ निराहारायताहाराःप्राणायामपरायणाः २० एकपादास्थ
ताःकेचिज्जलमध्येस्थिताःपरे ॥ धूमपानरताःकेचित्केचिच्चमौनमास्थिताः २१ ऊर्ध्वबाहुतयाकेचित्केचिच्चयोगमास्थिताः ॥ केचिच्चकर्तुंःस्वान्देहान्के
चिच्चमस्तकानपि २२ एवंतेषांनिरीक्ष्यैवतपांसिगणराट्तदा ॥ आविरासीत्कोटिसूर्यप्रलयानलसन्निभः २३ दृष्ट्वातेजोमयंरूपंजत्रुस्तेसुरास्तदा ॥ यश्चितितः
सएवाद्यमाविर्भूतोखिलेश्वरः २४ अपनेष्यतिनोदुःखंनात्रकार्याविचारणा ॥ ततऊचेसभगवान्तान्सुरांश्चिंतयायुतान् २५ हनिष्येसिंदुरंदेवामाचिंतांकर्तुमर्हथ
॥ दुःखप्रशमनंनामस्तोत्रंवःख्यातिमेष्यति २६ अतोदुःखविनाशोवाजातोस्मान्मदनुग्रहात् ॥ एककालंद्विकालंवात्रिकालंवापियःपठेत् २७ कदाचिन्नभवे
दस्यदुःखंत्रिविधमण्वपि ॥ अहंतुसांप्रतंदेवाअवतीर्यशिवालये २८ नाम्नागजाननइतिख्यातःसर्वार्थसाधकः ॥ भविष्यामिहनिष्यामिसिंदूरादीन्महासुरान्
२९ करिष्यामिशिवादास्यंकौतुकानिप्रदर्शयन् ॥ कउवाच ॥ एवमुक्त्वा ततोदेवांस्तत्रैवांतरधीयत ३० ततोऽकस्माद्धैमवतीशिवानुग्रहतोदधौ ॥ गर्भंसवव्रधे
त्यंतंदिनेदिनेयथाशशी ३१ ततस्तत्तेजसातप्तानानादोहदकांक्षिणी ॥ उवाचशंकरंगौरीसंतप्तागर्भतेजसा ३२ अतिशीतस्थलंयत्रतत्रमांनयशंकर ॥ ततोसौ
वृषभारूढःपृष्ठेतामुपवेश्यह ३३ भासयंतींमहातेजःपुंजेनविदिशोदिशः ॥ वाद्यत्सुसर्ववाद्येषुययौसक्षितिमंडलम् ३४ नानागणैःसमायुक्तोबभ्रामकाननानिसः॥
भ्रमतातेनदृष्टंहिपर्यलीकाननंमहत् ३५ तत्रविश्रांतिमकरोत्पार्वत्यानुमतेतदा ॥ नानापुष्पसमाकीर्णंनानाद्रुमफलान्वितम् ३६ सरोवापीयुतंसांद्रतरुच्छायं
मनोरमम् ॥ यत्रोस्नाणांनप्रवेशःकैलासशिखरोपमम् ३७ नंदनादधिशोभंतद्वनंचैत्ररथादपि ॥ तद्वीक्ष्यगिरिजाप्रोचइच्छयासदृशंशिव ३८ वनंप्राप्तंमहादेव

क्रीडावोत्रचिरंविभो ॥ गणानामपिसर्वेषांप्रीतिस्तत्रह्यभूत्तदा ३९ ततोगणानंडपंतेचक्रुस्तवप्रियकाम्यया ॥ नानावेदीगृहयुतंनानोपस्करसंयुतम् ४९
ततऊचेशिवोदेवींवसात्रत्वंगणैर्युता ॥ यद्यत्तेप्रार्थितंतत्तेदास्यंतिनदनुग्रहात् ४१ ततःस्वयंजगामाशुध्यानस्थोभूद्धिमालये ॥ सखीभिःपार्वतीतत्र
चिक्रीडेसायथारुचि ४२ अरक्षंस्तांकोटिगणाःसमंतादाहृतास्तदा ॥ तदाज्ञावशगाःसर्वेकंदमूलफलाशिनः ४३ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखण्डेगौरीदो
हदवर्णनंनामैकोनात्रिंशोत्तरशततमोऽध्यायः ॥ १२९ ॥ ॥ ऋउवाच ॥ ततस्तुनवमेमासिपूर्णेसासूतबालकम् ॥ चारुचंद्राननंपद्मशोभाजिन्नयनंशु
भम् १ किरीटकेयूरधरंकोटिसूर्यसमप्रभम् ॥ प्रवालाधरशोभाढ्यंचतुर्बाहुविराजितम् २ मुक्ताहारधरंचारुकंकणैरुपशोभितम्॥ परशुंकमलंमालामोदकांश्च
करैर्दधत् ३ ध्वजांकुशाब्जविलसत्पादपद्मसमन्वितम् ॥ किंकिणीजालविलसच्चारुगुल्फयुतंशुभम् ४ भालचंद्रंकोटिचंद्रनिभंवह्निसमप्रभम् ॥ एवं
दृष्ट्वास्वरूपंसाचकंपेहर्षनिर्भरा ५ किमिदंतेजउदितंनयनाच्छादकंमहत् ॥ कोसित्वंवदमेचेतोनंदयस्वरूपांकुरु ६ इत्युक्त्वातंनमश्चक्रेस्मरंतीपूर्वकंवचः
॥ ततऊचेमहोमूर्तिर्मामातर्विमनाभव ७ गुणेशोहमनेकानांब्रह्मांडानांविनायकः ॥ असंख्याताभवतारानज्ञायंतेऽमरैरपि ८ इच्छयासृष्टिसंहारपालना
निकरोम्यहम् ॥ त्रिधारूपंविधायाहंविश्वस्याशिवनंदिनि ९ त्रेतायुगेवतीर्याहंत्वद्गृहेलीलयापुरा ॥ अनेकानिचरित्राणिकृतानिसिंधुनाशनम् १० मयूरेश्वर
नामाहंषड्भुजोजुंनवर्णकः ॥ तदामयावचोदत्तंद्वापरेतेसुतःपुनः ११ भवेयंसेवकश्चाहंसिंदूरान्मोचितामया ॥ द्विजरूपेणसहसास्मरसर्वंशुचिस्मिते १२
तदापितनयस्तेहंभविष्यामीत्यथाब्रुवम् ॥ तदिदंसत्यवचनंमयासंपादिपार्वति १३ भूभारंचहरिष्यामिसिंदूरंचमहाबलम् ॥ सेवनंचकरिष्यामितवमा
तर्गजाननः १४ विख्यातोहंभविष्यामिभक्तानांकामपूरकः ॥ ॥ ऋउवाच ॥ ॥ एवंश्रुत्वावचोगौरीस्मृत्वासर्वंपुरातनम् १५ नत्वातुष्टावदेवेशंविश्वेशंवि
घ्ननाशकम् ॥ ॥ गौर्युवाच ॥ ॥ निर्विकल्पचिदानंदघनंब्रह्मस्वरूपिणम् १६ भक्तप्रियंनिराकारंसाकारंगुणभेदतः ॥ नमाम्यहमतिस्थूलमणुभ्यो
णुतरंविभुम् १७ अव्यक्तंव्यक्तिमापन्नंरजःसत्यतमोगुणम् ॥ मायाविनंमायिनंचसर्वमायाविदंप्रभुं १८ सर्वांतर्यामिणंनित्यंसर्वाधारंपरात्परम् ॥ चतुर्णा
मपिदेवानांमानसस्याप्यगोचरम् १९ महद्भाग्यंममविभोसत्वंमेपुत्रतांगतः ॥ प्रतीक्षंत्याममविभोप्रत्यक्षंदर्शनंगतः ॥ इदानींत्वद्वियोगोमेनस्याद्देवतथाकुरु
२०एवंवदंत्यांतस्यांतुदेवोरूपांतरंदधौ ॥ चतुर्भुजंभालचंद्रंशुंडादंडविराजितम्२१अनेकभूषणयुतंचिंतामणियुतंहृदि ॥ दिव्यांबरंदिव्यगंधंसिद्धिबुद्धियुतंतदा
२२ रुरोदबालवच्चाज्ञोदृष्ट्वेगिरिजातुतम् ॥ शुशोचबहुधातन्वीनिधिंकेनहृतोमम २३ नबालस्त्रिषुलोकेषुदृष्टःशुंडाविराजितः ॥ ब्रह्मादयोहसिष्यंति
लोकाश्चेक्ष्येदृशंशिशुं २४ एवंबहुविधंशोकंश्रुत्वागाच्छंकरोगृहम् ॥ तगजस्तंशिशुंगृह्यप्राहतांशृणुमेप्रिये २५ अनादिनिधनोदेवःशुंडादंडविराजितः ॥
यत्रकुंठाश्चतुर्वेदाःशास्त्राणिमुनयोऽमराः २६ प्रपंचेगुंफितायेननानाकार्यवताप्रिये ॥ सर्वांतर्याम्यनेकानांब्रह्मांडानांचकारकः २७ चत्वार्यस्यचरूपा

णिचतुर्षुचयुगेषुच ॥ कृतेदशभुजोनाम्नाविनायकइतिश्रुतः २८ त्रेतायुगेशुक्लवर्णःषड्भुजोसौमयूरराट् ॥ सिंधुंहत्वापालयत्सोवतीर्यस्वालयेप्रिये २९
सएवायंरक्तवर्णश्चतुर्बाहुविराजितः ॥ अवतीर्णोगृहेनौहिसिंदूरंनिहनिष्यति ३० आरुह्यमूषकंदेवोभूभारंचहरिष्यति ॥ नाम्नागजाननइतित्रैलोक्येख्या
तिमेष्यंति ३१ अयंकलियुगेदेविधूम्रकेतुरितिप्रथां ॥ चतुर्बाहुश्चारुनेत्रोयास्यतेरुचिरांभुवि ३२ निशम्यशिववाक्यंसउवाचबालकःस्फुटम् ॥ ॥ बाल
उवाच ॥ ॥ सम्यक्बुद्धंस्वरूपंमेसम्यगुक्तंत्वयाशिव ३३ अवतीर्णस्तवगृहेसेवांकर्त्तुंचासिदुरम् ॥ निहंतुंचनिहंतारंदेवानांसर्वभूभुजां ३४ मर्दनंभूधराणां
चत्रैलोक्यजयशालिनम् ॥ हत्वातंविश्वसंतोषंकरिष्यामिचशंकर ३५ भक्तानांकामपूरश्चवेदकर्मप्रवर्त्तकः ॥ भविष्यामिवरेण्यस्यवरदोज्ञानदायकः ३६ मायि
भक्तिर्भवेत्तस्यममध्यानपरायणः ॥ देवद्विजातिथीनांचपूजकःपंचयज्ञकृत् ३७ पुराणश्रवणेसक्तःस्वाचारःसत्यवाञ्शुचिः ॥ पुष्पिकानामयस्यापिपत्नीधर्म
परायणा ३८ पतिव्रतापतिप्राणापतिवाक्यपरायणा ॥ ताभ्यांद्वादशवर्षाणितपस्तप्तंसुदारुणम् ३९ तयोर्मयावरोदत्तएष्येवांपुत्रतांध्रुवम् ॥ पुष्पिकायांप्र
सूतायामद्यैवराक्षसैःशिशुः ४० नीतश्चत्यक्ष्यतेप्राणांस्तस्मान्मांनयतत्रह ॥ एवमाकर्ण्यतद्वाक्यंशिवोहर्षसमन्वितः ४१ नानावाङ्मयपुष्पैस्तंपूजयामासभ
क्तितः ४२ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेगजाननाविर्भावोनामत्रिंशाधिकशततमोऽध्यायः ॥ १३० ॥ ॥ ॥ ध ॥ कउवाच ॥ ॥
ततश्चितांचकारासौतत्रनेतुंतुबालकम् ॥ तंज्ञात्वाप्राहतंनंदीस्वामिन्युष्मत्प्रसादतः १ शोषयिष्येसमुद्रांस्तुचूर्णयिष्येगिरीनपि ॥ आज्ञापयततोमह्यंभवा
न्कार्यंहृदिस्थितम् २ ॥ ॥ कउवाच ॥ ॥ भणितंतस्यतच्छ्रुत्वातुष्टःप्राहहरःसतम् ॥ ॥ हरउवाच ॥ ॥ साधुसाधुत्वया
प्रोक्तमाशयंमेविवृण्वता ३ पौरुषंतेमयाज्ञातंशतशोनंदिकेश्वर ॥ इदानीमथयत्कार्यंवदामितत्कुरुष्वभोः ४ माहिष्मत्यांमहापुर्यांजास्तेराजामहाबलः ॥
वरेण्यइतिविख्यातोनानाधर्मपरायणः ५ यस्यपत्नीमहाभागापुष्पिकानामनामतः ॥ तस्यांसद्यःप्रसूतायांसुप्तायांकापिराक्षसी ६ निन्येबालंतत्पुरतोने
योबालस्त्वयालघु ॥ नीत्वास्थाप्यस्तत्पुरतोयावन्निद्रातिसाशुभा ७ ॥ ॥ कउवाच ॥ ॥ एवमाज्ञांसमाकर्ण्यशंकरेणसमीरिताम् ॥ शीघ्रंबालं
समादायनभोमार्गेणसत्वरः ८ प्राक्षिपत्पुरतोबालंसानसुप्तावुबोधतम् ॥ शीघ्रमुड्डीयसप्रायान्नंदिकेशोमहेश्वरम् ९ उवाचनिजवृत्तांतंमार्गेस्वयमनुष्ठितम् ॥
अकस्माद्भगनादेवराक्षसीघोरदर्शना १० भक्षयंतीबालमांसंमांमाश्रित्यस्थिताविभो ॥ तवप्रसादात्पुच्छेनवेष्टितराक्षसीमया ११ भ्रामयित्वाविनि
क्षिप्तामहापर्वतमस्तके ॥ शतधाखंडितासाद्रुत्वन्नामोच्चारणाद्प्रभो १२ ततोपश्यंमहाव्रातंगंधर्वाणांदुरात्मनाम् ॥ कथंमयातैर्योद्धव्यंरक्षितव्यःकथंशि
शुः १३ इतिचिंताकुलतयास्मृतस्त्वंहृदिशंकर ॥ ततःपुच्छेनशृंगाभ्यांक्रोधोच्छ्वासैश्चलत्तया १४ हुंकारेणचतान्सर्वान्निवार्यबलवत्तरान् ॥ मृताःकेचिद्द्रुताके
चित्केचिद्भग्नशिरोंघ्रयः १५ पतिताःशतधाभूमौपुष्पवृष्टिस्ततोपतत् ॥ ततोहमगमद्देवकृत्वाकार्यंत्वयेरितम् १६ तवेच्छाविषयंकोनुहन्याद्त्रैलोक्यमंडले ॥

अतस्त्वन्नामतोदेवजयंप्राप्तःसबालकः १७ ततःशिवोहर्षयुतोलिंगनंदिकेश्वरम् ॥ उवाचचप्रसन्नात्माज्ञातंतेपौरुषंदृढम् १८ नास्तित्रिभुवनेकोपित्व
त्समोनंदिकेश्वर ॥ ॥ कउवाच ॥ ॥ ततःप्रणम्यविश्वेशंपार्वतीमगमद्वसः १९ प्रणम्यतांयोज्यहस्तांप्रोचेमधुरयागिरा ॥ मातःशिवाज्ञयाबालोनीतो
माहिष्मतींपुरीम् २० वरेण्यपत्न्याःपुरतःपुष्पकायांन्यधायिसः ॥ यतस्तेनपुरादत्तोवरस्तस्यबभूवह २१ अहंपुत्रत्वमेष्यामिब्रह्मज्ञानप्रकाशकः ॥ निश
म्यवचनंतस्यसर्वज्ञापार्वतीतदा २२ जहर्षजननीतस्यशिशोर्वीर्यमनंतकम् ॥ उवाचपरयाभक्त्याज्ञातंतेपौरुषंसुत २३ हतात्वयामहाघोराराक्षसीघोरानि
स्वना ॥ गंधर्वाश्चहतादुष्टारक्षितश्चैवबालकः २४ अज्ञातस्थापितस्तत्रमहाकार्यमिदंकृतम् ॥ इत्युक्त्वाविससर्जामुंविश्रांतिंचाकरोत्तदा २५ ॥ इतिश्रीगणे
शपुराणेउत्तरखंडेगंधर्वपराजयोनाम०अध्यायः ॥ १३१ ॥ ॥ कउवाच ॥ ततःकदाचिद्दैत्येंद्रःसिंदूरोमदगर्वितः ॥ सभासनगतःप्राहदृष्ट्वामेपौरुषंकृतम् १
इंद्रादयोनमेयुद्धंददुर्ब्रह्मादयोहरिः ॥ राज्ञांतुगणनानैवमृत्युलोकनिवासिनाम् २ कुलीनायायथानार्यायौवनंहिपतिंविना ॥ तथामेपौरुषंव्यर्थंयोद्धृभिर्हि
विनाभवत् ३ ततोंतरिक्षेवाणींसशुश्रावपरमाद्भुताम् ॥ ॥ वाण्युवाच ॥ ॥ किमर्थंवल्गसेमूढजातोस्तितवयुद्धदः ४ पार्वत्याउदराद्भोवरेण्यगृहगोधुना
वर्द्धतेनंतलीलोसौयर्थेंदुःशुक्लपक्षगः ५ ॥ कउवाच ॥ श्रुत्वेत्थंसहसावाणींमुमूर्छेसिंदुरस्तदा ॥ विहर्षश्चितयामासकिमिदंकेनभाषितम् ६ यदिदृश्योभवेन्मह्यं
खादेयंतंसमस्तकम् ॥ कालस्यमेकथंमृत्युःपश्चात्सूर्योदयोयथा ७ एवमुक्त्वोदतिष्ठत्सगर्जयन्विदिशोदिशः ॥ उड्डीयसहसाप्रायात्कैलासंगिरिजालयम् ८
चूर्णयन्पर्वतान्वृक्षान्पातयन्स्वांगमारुतात् ॥ चेलतुःकूर्मशेषौचचकंपेचवसुंधरा ९ नददर्शशिवंतत्रपुनःसर्वंसहांयया ॥ बभ्रामवसुधासर्वांशिवंवेगाद्
गवेषयन् १० पर्यल्यास्यंमहारण्यमाजगामरुषान्वितः ॥ ददर्शदूरतोगौरीसहितंशंकरंतदा ११ मंडपंचगणांश्चैवसरांसिचोत्पलानिच ॥ ततोजगामसहसारि
ष्टंगौर्यैप्रकल्पितम् १२ अदक्षातत्रबालंसचुक्रोपाग्निरिवज्वलन् ॥ ततःसतर्कयामासनवाणीनभसोमृषा १३ अस्याःसुतोमांहिहन्यान्नजातश्चेद्भविष्यति ॥
तस्मादेनांनिहन्म्यद्यमूलच्छेदस्ततोभवेत् १४ ॥ कउवाच ॥ एवंनिश्चित्यमनसाततःशस्त्रमुपाददे ॥ यावदुमांहंतिदुष्टस्तावद्दृष्टःशिशुःपुरः १५ चतुर्भुजोति
रुचिरोमुकुटांगदभूषितः ॥ परशुंकमलंमालांदधंतंचतदद्भुतम् १६ कटौशेषंगलेहारंनूपुरौचांघ्रियुग्मयोः ॥ निवृत्तस्तद्धयात्सद्यस्तांचसुप्तामन्यत १७ दधार
बालकंहस्तेकांक्षत्क्षेत्रुंमहोदधौ ॥ एवंनिश्चितसंकल्पस्ततोसौचकितःपुरा १८ततःसबालोववृधेहिमाचलइवापरः ॥ सिंदूरोपिचकंपेसौमहाभारातुरःक्षणात् १९
श्वासाकुलःपुरोगंतुंनशशाकस्वशक्तितः ॥ ततस्तत्याजतंबालंदैत्योविह्वलतांगतः २० बालेतुपतितेभूमौमहारावविरावणि ॥ चेलुश्चपर्वतानादैश्चकंपेचवसुं
धरा २१ बभ्रमुर्विहगाव्योम्निनानारावविरावणाः ॥ अर्णवाःक्षोभिताःसप्तब्रह्मांडमापिपुस्फुटे २२ सबालःपतितोरेवाजलांतेमुनिसन्निधा ॥ तत्रतीर्थमभूच्छ्रेष्ठंगणे

१ कांक्षन्क्षेत्रुंमनोदधे इत्यशुद्धः पाठः ।

शकुंडमित्युत २३ अस्याआजन्मतःपापंनाशमेतिस्मृतेःक्षणात्॥ दर्शनाद्दशजन्मीयंस्नानाच्चशतजन्मजम् २४ सेवनंमोक्षदंयस्याजनुष्ठानवतांनृणाम् ॥ तद्देहरुधिरात्तत्रप्रस्तरारक्ततांगताः २५ तएवनार्मदाःख्यातागणेशाःपापनाशनाः ॥ दर्शनात्पूजनात्सर्वकामदाभक्तिकारिणाम् २६ नर्मदामहिमासर्वोवर्णितुंनैवशक्यते ॥ ततःसजह्रषेदैत्यारिपुर्मेनाशतांगतः २७ तावत्कुंडात्समुद्भूतोभीषणःपुरुषोमहान् ॥ जटाभारेणसंछन्नोवल्लीछन्नोधरोयथा २८ दंष्ट्राकरालवदनोजिह्वाव्यालीसमावृतः ॥ दीर्घपाण्यंघ्रियुगलःश्वासव्याकुललोचनः २९ दृष्ट्वातथाविधंतंतुक्रोधव्याकुललोचनः ॥ उवाचदैत्यःसिंदूरोनचास्यगणनामम ३० एवमुक्त्वाखड्गहस्तोययौहंतुंतुतंरुषा ॥ खड्गेनहंतितंयावत्तावत्सदद्दर्शंबरे ३१ उवाचदैत्यंरेदैत्यवृथामांत्यक्तवान्नक्षितौ ॥ तवांतकस्तुरेमूढवर्धितःक्वचिदेवहि ३२ हनिष्यत्येवनूनंत्वांसाधुरक्षणतत्परः ॥ अंतर्दधेततोभीमएवमुक्त्वासपूरुषः ३३ ततोदैत्योमहारोषादुवाचनिजसेवकान् ॥ ध्रियतांध्रियतामेषयेनोक्तंपरुषंवचः ३४ यदातंक्वापिनापश्यत्तदास्वस्थानमागमत् ॥ द्रक्ष्यामितंयदाशत्रुंजयिष्यइत्यमन्यत ३५ एतावच्चरितंतस्यपार्वत्याज्ञायिनैवतत् ॥ तस्यैवमायामोहेनप्राप्तयामोहमुत्तमम् ३६ ततःप्रोवाचगिरिशंपार्वतीविनयान्विता ॥ अत्रपीडादैत्यकृताप्रारब्धाजगदीश्वर ३७ कैलासंगंतुमिच्छामितवेच्छाचेन्नयस्वमाम् ॥ एवमाकर्ण्यतद्वाक्यंजह्रषेशंकरोपिच ३८ आरुह्यनंदिनंसद्यःपार्वत्यासहशंकरः ॥ सप्तकोटिगणाकीर्णःकैलासंप्रापतत्क्षणात् ३९ प्रविश्यस्वालयंगौरीपरमंहर्षमाययौ ४० ॥ ॥ इतिश्रीग०उ०कैलासाभिगमनंनामद्वात्रिंशोत्तरशततमोऽध्यायः ॥ १३२ ॥ ७ ॥ ॥ व्यासउवाच ॥ पुष्पिकानिकटेत्यक्तोवरेण्यस्यगृहेसकिम् ॥ चकारतन्ममाचक्ष्वकार्यंविस्तरतोब्रजज १ ॥ ॥ कउवाच ॥ ॥ सम्यक्पृष्टंत्वयावत्सहृदयानंदकारकम् ॥ कथयिष्येविधानेनतत्सर्वंपापनाशनम् २ तस्यांनिशायांव्युष्टायांददर्शपुष्पिकासुतम् ॥ चतुर्बाहुंरक्तवर्णंगजवक्त्रमलंकृतम् ३ कस्तूरीतिलकंमुक्तामालयासुविराजितम् ॥ पीतवस्त्रपरीधानंचारुचंदनचर्चितम् ४ देदीप्यमानंवपुषानानालंकारसंयुतम् ॥ ततःसापुष्पिकादृष्ट्वाबालकंतुतथाविधं ॥ विस्मितादुःखिताचापिभयभीताभवत्तदा ॥ घ्रतीवक्षोबहिर्यातापाणिभ्यांशोककर्शिताऽतदाक्रंदितमाकर्ण्यमीलिताःपरिचारिकाः ॥ ताभिरत्यद्भुतंदृष्ट्वाबालकंतंतथाविधम् ७ नृपोपिज्ञातवृत्तांतःसगणोभिययौगृहे ॥ ततस्तेपिभयोद्विग्नादृष्ट्वाबालंतथाविधम् ८ अधीराःपपलुस्तस्यकेचिन्मूर्छामुपाययुः ॥ केचिन्नृपतिंप्राहुर्नजातोनभविष्यति ९ नदृष्टोनश्रुतःक्वापिबालएतादृशोनृणाम् ॥ नैवायंस्थापनीयस्तेवंशच्छेदकरोगृहे १० एवमाकर्ण्यसर्वेषांवाक्यंमेनेसभूपतिः ॥ दूतानुवाचबालोयंत्यज्यतांगहनेवने ११ ततोदूतागताभ्येत्यगृहीत्वाबालकंतुतत् ॥ गहनंकाननंदृष्ट्वावायुस्पर्शविवर्जितम् १२ तीरेतुसरसस्तत्रक्षिप्त्वातेपर्णसंचयैः ॥ आच्छाद्यप्रययुःशीघ्रंवरेण्यंनृपतिंपुनः १३ सभामध्येनृपंदृष्ट्वानमस्कृत्वाब्रुवंस्तदा ॥ आज्ञयातवराजेंद्रासिंहव्याघ्रनिषेविते १४ त्यक्त्वाबालंसमायाताभक्षितस्स्याद्वनेचरैः ॥ ॥ कउवाच ॥ ॥ यावच्चभक्षितुंयाताजंबुकास्तावदेवतम् १५ पराशरो

मुनिवरोददर्शकरुणानिधिः ॥ चतुर्भुजंगजास्यंतंकोटिसूर्यनिभांशिशुम् १६ नानालंकारसंयुक्तंदिव्यांबरविभूषितम् ॥ सर्पवेष्टितसन्नाभिंचिंतामणि
विभूषितम् १७ मुमोहमाययातस्यसर्वज्ञाननिधिर्मुनिः ॥ शुशोचकिमिदंविघ्नममनाशायनिर्मितम् १८ इंद्रेणमेतपोनाशंकांक्षतास्वार्थसाधनम् ॥
अकारिनमयाकिंचिद्दुष्कृतंपापभीरुणा १९ दीननाथचंद्रचूडरक्षमांमहतोभयात् ॥ एवंशोचंतमालोक्यगजास्यःकरुणायुतः २० निराकरोन्मोहजा
लंततोलक्षयत्पुरः ॥ तमेवपरमात्मानंपरब्रह्मस्वरूपिणम् २१ भक्तानांरक्षणंकर्त्तुंईदृशंवेषमास्थितम् ॥ धन्यंमेद्यजनुर्मातापितरौचतपोमहत् ॥ निरस्तौ
जन्ममृत्यूमेप्राप्तंवांछितमुत्तमम् ॥ केनायंहतभाग्येनबालस्त्यक्तोवनांतरे २३ ॥ कउवाच ॥ एवमुक्त्वामुनिःसोथनिन्येबालंस्वमाश्रमम् ॥ वत्सलास्यततःप
त्नीदृष्ट्वाबालंतथाविधं २४ आर्तांतंस्वामिनाज्ञात्वाननंदस्नेहनिर्भरा ॥ त्स्दयेविनिवेश्यैनंप्राहप्राणपतिंतदा २५ बहुकालकृतंस्वामिंस्तपस्तेफलितंगुरु ॥ यस्य
स्वरूपंनब्रह्मानहरोनश्रियःपतिः २६ मुनयोनविदुःसाक्षाद्दर्शनंजातमद्यनौ॥यःकर्त्तारक्षितार्हंतासर्वस्यजगतःप्रभुः २७ अवतीर्णोभुवोभारंहर्त्तुंनानावतारकृत्
॥ महद्भाग्यंहिनोस्वामिन्ननायासेनविश्वभृत् २८ अक्षगोचरतांयांतोमनोवाचामगोचरः॥ ॥ कउवाच ॥ ॥ तस्यबालस्यस्पर्शेनस्तनौपीनपयोधरौ २९
जातौपपौततोबालःसाचानंदमवापह ॥ ततःशुश्रावराजासौवरेण्योबालकंतुतं ३० पराशरेणमुनिनापालितंदिव्यचक्षुषा॥ वाद्यघोषेणमहताशर्करांचगृहेगृहे
३१ दापयामासहर्षेणब्राह्मणान्सुत्दोपिच ॥ तोषयामास वस्त्राद्यैःकांचनैरत्नसंचयैः३२ गावःकामदुघाजाताःशुष्कवाप्योजलान्विताः ॥ आश्रमेतुमुनेस्तस्य
शुष्कवृक्षाःफलान्विताः ३३ यइदंशृणुयान्मर्त्यःपुत्रवान्धनवान्भवेत् ३४ ॥ इतिश्रीग०उ०पराशरदर्शननामत्रयस्त्रिंशोत्तरशततमोध्यायः १३३ ॥ कउवाच ॥
बालःसववृधेतत्रदिवसेदिवसेशशी ॥ आनंदंजनयन्मातुःपितुश्चचरितैःस्वकैः १ व्यासउवाच ॥ वदब्रह्मन्गुणेशस्यचरितंद्वापरोद्भवं ॥ श्रुत्वापूर्वचरित्राणिनवृ
प्तिर्मेभवत्प्रभो २ गजाननेतिनामास्यवाहनंमूषकःकथम् ॥ एतत्सर्वंसविस्तारंवदमेचतुरानन ॥ ३ कउवाच ॥ अत्रैवोदाहरंतीममितिहासंपुरातनम् ॥ प्रल्हा
दस्यचसंवादंभार्गवस्यकवेरपि ४ एवमेवपुराष्टःप्रल्हादेनमहामुनिः ॥ तस्मैप्रोवाचभगवान्कविस्तच्छृणुसांप्रतम् ५ शृणुप्रल्हादयेनास्यवाहनंमूषको
भवत् ॥ तदहंसंप्रवक्ष्यामिश्रवणात्सर्वकामदं ६ पुराशक्रसभामध्येक्रौंचोगंधर्वसत्तमः ॥ वामदेवमुनिंसोथत्वरावान्प्रपदाहनत् २७ सशशापचगंधर्वंमूषक
स्त्वंभविष्यसि ॥ कल्पयिष्यतिवाहत्वेत्वामाक्रम्यगणेश्वरः ८ सएवकरुणायुक्तोमोक्षंनेष्यतिविश्वकृत् ॥ पराशराश्रमेसोथपपातमूषकाकृतिः ९ गिरिशृंगनि
भोघोरोमहारोमामहानखः॥ महावीर्योमहादंष्ट्रोमहास्वनविराजितः१०तस्याश्रमेमहाघोरमुपद्रवमथाकरोत् ॥ भक्षयामासधान्यानिभंक्त्वामृत्पात्रसंचयान्
११पुस्तकानिचवस्त्राणिवल्कलानिमहांत्यपि॥ससारभूतंयत्सर्वंभक्षयामासमूषकः १२पुच्छाघातेनवृक्षान्सपातयामासभूतले ॥ चुंचुंकारेणशब्देनगर्जयामास
वीष्टपम् १३ज्ञात्वातथाविधंतंतुचिंतामापमुनीश्वरः ॥ दुर्जनस्यबलात्कारैःस्थानंत्याज्यंनसंशयः १४अधुनाक्वानुगंतव्यंकास्मिंस्थानेसुखंभवेत्॥प्राणत्यागेमह

द्वेषंवदंतिशास्त्रचिंतकाः १५ कथंसुखाश्रमेदुःखंप्राप्नंकर्मप्रसंगतः ॥कस्यवास्मरणंकार्यंकोवादुःखात्प्रमोक्ष्यति १६ कएनंनाशयेदत्रकःसमर्थोभवेद्वधे ॥ कमद्य
शरणंयायांकोनस्त्राताभविष्यति १७एवंपित्रवचःश्रुत्वाबालकोनंतविक्रमः॥उवाचमधुरंवाक्यंचिंतांमाकुरुसर्वथा १८मयितिष्ठतिदुष्टानांसंहारिणिमहाप्रभौ ॥
पुत्रतांतेप्रयातोस्मिविधास्येतेप्रियंतुयत् १९ यस्यमेक्रंदितेनेयंपृथिवीशीर्णतामियात् ॥ पर्वताश्चूर्णतामापुःपादाघातेनमेमुने २०पश्यमेकौतुकंतातनयाम्येनं
तुवाहताम् ॥ एवमुक्त्वासृजत्पाशंकोटिसूर्यनिभंशिशुः २१ मेघेष्ववतडित्पुंजःशुशुभेसोंतरिक्षगः ॥ तत्यजुर्भयतोदेवास्वानिधिष्ण्यानितत्क्षणात् २२ सय
थौवह्निवदनोदशदिग्भ्रमणेरतः ॥ पातालेमूषकंकंठेबध्वाबहिरकाशयत् २३ मूर्छामवापमहतीमाखुःपाशबलार्दितः॥ शुशोचपरमक्रुद्धोनिरुद्धश्वासमारुतः
२४ कथंकालस्यमरणमागतंदैवनिर्मितम् ॥ भवितव्यंभवत्येवपुरुषार्थोनिरर्थकः २५ येनदंष्ट्राग्रमात्रेणदारिताःपर्वताबहु ॥ नमयागणितादेवानासुराराक्ष
सानराः २६ तस्यमेकेनपाशेनकंठोक्रामिगतायुषः ॥ कउवाच ॥ मूषकेप्रब्रुवत्येवंयावत्तावद्गजाननः २७ चकर्षमनसातंससोगान्मूषकसंयुतः ॥ यथागारु
डशास्त्रज्ञःसर्पंकर्षतितत्क्षणात् २८ सतंदृष्ट्वापाशकंठोमूषकोलब्धधीःक्षणात् ॥ नमस्कृत्यविभुंदेवंगजाननमनामयम् २९ तुष्टावपरयाभक्त्याचिदानंदघ
नंप्रभुम् ॥ त्वमेवजगतांनाथःकर्त्ताहर्त्ताप्रपालकः ३० गुणत्रयविहीनश्चगुणत्रयसहायकृत् ॥ मायातीतोपिमायावीमायिनामपिमोहकृत् ३१ ब्रह्मादीना
मगम्यस्त्वंमुनिहृत्पद्मसंस्थितः ॥ कारणंकरणंकर्त्ताकारणानांचकारणम् ३२ सोद्यदृष्टःस्वचक्षुर्भ्यांमतोधन्यंजनुर्मम ॥ धन्यौमेपितरौनेत्रेतपोविद्याव्रतं
जपः ॥ ३३ ॥ ॥ कउवाच ॥ ॥ एवमाकर्ण्यतद्वाक्यंप्रीतोसौद्विरदाननः ॥ प्राहमूषिकंदृढांज्ञात्वाभक्तंमूषकंविभुः ३४ तवैवपुरुषार्थेनदेवाद्वि
जद्रुहोनघ ॥ निर्गुणोहंगुणीजातोदुष्टनाशनहेतवे ३५ साधूनांरक्षणार्थायययतस्त्वंशरणंगतः ॥ अतस्तेदत्तमभयंवरंवृणुयामिच्छसि ३६ ॥ ॥ मूष
कउवाच ॥ ॥ नाहंवृणेगजास्यत्वांत्वमेववृणुवांछितम् ॥ ॥ कउवाच ॥ ॥ इत्युक्तोमूषकेनासौगर्वितेनगजाननः ३७ वाहतांममयाहित्वंयदि
सत्यंवचस्तव ॥ तथेत्युक्तेसपिंगाक्षोरुरोहाक्रम्यतत्क्षणात् ३८ भारेणचूर्णयंस्तंतुपुनर्देवंसयाचत ॥ अहंतेवाहनंजातोलघुभूतोभवप्रभो ३९ याचतस्त
स्यवचसालघुभारोभवद्विभुः ॥ एतद्दृष्ट्वामहाश्चर्यंप्रणम्यमुनिरब्रवीत् ४० नबालेपौरुषंकापिमयादृष्टंजगत्त्रये ॥ यच्छब्दात्पर्वताशीर्णालोकपालाश्च्युतस्थ
लाः ४१ सत्वयाक्षणमात्रेणनीतोवाहनतांबलात् ॥ ततआगत्यमातास्यवत्सलागृह्यतंशिशुम् ४२ प्रस्नुतौपाययामासस्तनौमातामुदायुता ॥ उवाचनचजा
नेतेस्वरूपंचपराक्रमम् ४३ जन्मजन्मांतरीयेणपुण्येननौगृहंगतः ॥ ततःसमूषकंबध्वाचिक्रीडेप्राकृतोयथा ४४ एवंतेकथिताचास्ययथामूषकवाहता ४५
इतिश्रीगणेशपुराणेउत्तरखण्डेचतुस्त्रिंशाधिकशततमोध्यायः ॥ १३४ ॥ ॥ ७ ॥ ॥ व्यासउवाच ॥ किमनेनकृतंपूर्वंपुण्यंपापंचपद्मज ॥ येनायंमौ
षकंजन्ममापदेवस्यवाहताम् १ ॥ कउवाच ॥ सम्यक्पृष्टंत्वयावत्सममापिमनसःप्रियम् ॥ ब्रवीमिसकलंतच्चतदिहैकमनाःशृणु२ सुमेरुशिखरेरम्यःसौभ

रेराश्रमोमहान् ॥ अभूद्वृक्षसमाकीर्णोनानापक्षिगणान्वितः ३ वसिष्ठाद्यामुनिगणादेवाइंद्रपुरोगमाः ॥ आयांतिसौभरेस्तस्यदर्शनार्थंदिनेदिने ४ महत्तपोवृ
द्धिदीप्तेरत्यग्निरवितेजसः ॥ ख्यातस्यसर्वलोकेषुध्याननिष्ठस्यचेश्वरे ५ तस्यपत्नीमहाभागामनोमयीतिविश्रुता ॥ पतिव्रतासुसर्वासुविख्याताभर्तृवल्लभा
६ रम्भतातुरतेस्तस्याजितारम्यतयाखिला ॥ शचीप्रभृतयःसर्वानप्रापुःसमतालवम् ७ कदाचित्सौभरिर्होमशालायांप्रातरुत्थितः ॥ कृत्वाहोमंवनंयातःस
मिदर्थंगृहेस्थिता ८ मनोमयीसुशीलासागृहकार्यरताभवत् ॥ तदादुष्टस्तुगंधर्वःक्रौंचनामासमागतः ९ विश्रांतिरभवत्तस्यदक्षाश्रममनुत्तमम् ॥ नाना
शालासमाकीर्णंबहुच्छायंसुशीतलम् १० एतादृशोरम्यतरआश्रमोयस्यसप्रभुः ॥ धन्यंजपस्तपस्तस्यक्षणेनायंसुखप्रदः ११ चिरस्थानान्मुक्तिदःस्यादि
त्युक्त्वातद्गृहंययौ ॥ ददर्शमुखचंद्रंसमनोमय्यामनोरमम् १२ यस्यादर्शनमात्रेणहरोपिस्मरसाद्भवेत् ॥ तस्याःकटाक्षपातेनमदनानिलविह्वलः १३ स
बभूवतदासक्तोदधारसहसाकरे ॥ तत्करस्पर्शमात्रेणचकंपेसामुमूर्छच १४ मनोमयीनशशापभर्तृस्मरणतत्परा॥ म्लानाचशुष्ककंठाचसस्वेदाक्षिस्रवज्जला १५
बभूवपरमोद्विग्नामुमोहचशुशोचच ॥ कमद्यशरणंयामिकोस्माद्दुष्टात्प्रमोक्ष्यते १६ नकृतंदुष्कृतंकिंचिदिहजन्मनिसंस्मरे ॥ जन्मांतरीयपापेनसुखदुःखमु
पस्थितम् १७ दुष्टभावंतुतंज्ञात्वासांत्वयंत्यब्रवीदिदम् ॥ अहंदुहितृतुल्यातेजनकेनसमोसिमे १८ ज्ञानवानसिपापेत्वंमावर्तस्वगतत्रप ॥ पापिनोयांति
नरकंवर्षकोटिगणान्बहून् १९ तस्मान्मुंचमहाभागकृपणांपुत्रिकोपमाम् ॥ नोचेद्दहंकरिष्यामिप्राणत्यागंनसंशयः २० स्त्रीहत्यादोषसंभूतंपापंतेस्यान्महत्तर
म्॥ममभर्तामहाभागोवनादायास्यतेधुना २१तस्यक्रोधानलस्त्वांहिभस्मत्वंनेष्यतेक्षणात्॥विनाज्ञांतस्यनोकिंचित्कार्यंकार्यंमयालघु २२नोचेत्त्वांभस्मसात्कु
र्यांसृष्टिंचब्रह्मणोपिच ॥ एवंवदंत्यांतस्यांतुसौभरिःसमुपागतः २३ तंदृष्ट्वास्वांगणगतंमध्याह्नरविसन्निभम् ॥ मुमोचतेजसातत्रधर्षितोसौकरंतदा २४ अधो
पश्यञ्चकंपेचमम्लायचबिभायच ॥ मुनिःप्रोवाचसहसाप्रलयाग्निरिवज्वलन् २५ उत्सर्जतदाशापंगंधर्वंप्रतिदुःसहम् ॥ मुनिरुवाच ॥ असमक्षंयतोमेत्वं
पत्नीधर्षितवानसि २६ असमक्षचरोमूढमूषकस्त्वंभविष्यसि ॥ चौरवत्पृथिवींदार्यस्वोदरंपूरयिष्यसि २७ ॥ क्रौंचउवाच ॥ नमयाबुद्धिपूर्वंतेधर्षितेयंमनोम
यी ॥ प्रसंगादभवत्संगोदक्षेमांचारुरूपिणीं २८ करमात्रंधृताचेयंतावत्त्वमपिदृष्टवान् ॥ तेजसातेप्रभीतेनमयामुक्तानघामुने २९ अतोपराधंमेक्षंतुमर्हसि
त्वंकृपानिधे ॥ कुरुष्वानुग्रहंमह्यंशरणागतवत्सल ३० अहंत्वांशरणंयामिकृपांकुरुममोपरि॥ त्रैलोक्येनेदृशीदृष्टापातिव्रत्यगुणान्विता ३१ ॥ मुनिरुवाच ॥
ध्रुवंतेसागरेमेरुरुदियात्पश्चिमेरविः ॥ नमेवचोन्यथाभूयाद्वह्निःशीतत्वमाप्नुयात् ३२ अथापिप्रब्रवीम्यद्यदुष्टतच्छ्रूणुसादरम् ॥ पराशरगृहेदेवोद्वापरेवतरि
ष्यति ३३ गजाननइतिख्यातस्तस्यवाहत्वमेष्यसि ॥ तदाब्रह्मादयोदेवामानयिष्यंतिसादरम्३४ तस्यहस्तगतःस्वर्गंपुनरेष्यसिसत्वरम् ॥ एवमाकर्ण्यतद्वा
क्यंदुःखहर्षसमन्वितः ३५ ॥ कऊवाच ॥ पपातपृथिवीपृष्ठेमहामूषकरूपधृक् ॥ पराशरस्याश्रमेतुद्वापरेसमुपस्थिते ३६ महाबलोमहावीर्योमहापर्वतम्

न्निभः ॥ मुनेराशीर्बलेनासौगजाननसमीपगः ३७ अभवद्वाहरूपेणमूषकोसौमहाबलः ॥ एतत्तेकथितंसर्वंयन्मेपृष्टंत्वयानघ ३८ गजाननस्यवाहत्वंमूषकस्य यथाभवत् ॥ मुनिरुवाच ॥ सिंदूरस्यवधंब्रह्मन्कथंसकृतवान्विभुः ३९ गणेशस्तन्ममाचक्ष्वविस्तराच्चतुरानन ॥ श्रुत्वावाचोनमेतृप्तिर्जायतेमृतपानवत् ४० भक्त्याशृणोमिदेवेशसर्वज्ञस्त्वंवदस्वमे ४१ ॥ इतिश्रीगणेशपु०उत्त०क्रौंचशापवर्णनंनामपंचात्रिंशोत्तरशततमोऽध्यायः ॥ १३५ ॥ कउवाच ॥ एकस्मिन्नादे सेदेवोजगादमुनिसत्तमम् ॥ पराशरंमहाभाग्यंपरदुःखप्रपीडितः १ ॥ गजानन उवाच ॥ सिंदूरेण तुदुष्टेनपीडितंसकलंजगत् ॥ स्वाहास्वधावषट्कारैर्वर्जितंवेद घोषतः २ स्थानभ्रष्टादेवगणाभ्रष्टाऋषिगणास्तथा ॥ गजाननस्वरूपेणकरिष्येदुष्टनाशनम् ३ साधूनांपालनंचैवभूभारहरणंतथा ॥ स्थापनंसर्वदेवानामानंदंज गतोपिच ४ निर्धेहिमस्तकेतातपार्णिमेभयदंशुभम् ॥ अनुग्रहप्रसादात्तेहनिष्येदुष्टदानवान् ५ ॥ मुनिरुवाच ॥ आश्चर्यंपरमंबालबालभावात्प्रभाषसे ॥ बा लकःकौतुकाविष्टोयाचतेचंद्रमंडलम् ६ असाध्यंत्रिदशैःसर्वैःकर्मकर्तुंतथेच्छसि ॥ यस्यश्वासेनगिरयःपतंतिशतशोभुवि ७ पादाघातेनयस्याशुकंपतेभुवन त्रयं ॥ कथंत्वंयुध्यसेतेनबिसतंतुशरीरवान् ८ चरित्वानववर्षाणिपूर्णानितवसाव्रतम् ॥ ममानुग्रहमात्रेणत्वंचेच्छक्तोभविष्यसि ९ तदायांनिहितोहस्तोमस्त केभयदायकः ॥ कउवाच ॥ ततोहर्षयुतोदेवोनमस्कृत्यमुनिंतदा १० जननीमपिदुर्गांचश्रीहरिंहरमेवच ॥ ययौयोद्धुंमूषकंतमारुह्यसगजाननः ११ अंकुशंपरशुं पाशंकमलंचचतुर्भुजैः ॥ दधानोगर्जनेनाशुकंपयन्भुवनत्रयम् १२ प्रज्वलंस्तेजसास्वेनप्रलयानलसन्निभः ॥ क्षणेनप्रापसिंदूरनगरंसगजाननः १३ घृष्टणेश्वरसान्नि ध्यात्सिद्धंसिंदरवाडकम् ॥ तत्रस्थःप्रशशासासौसिंदूरोभुवनत्रयम् १४ तदुत्तरेस्थितोदेवोजगर्जगर्जयन्दिशः ॥ चुक्षुभुःसागराःसप्तविशीर्णागिरयोपिच १५ श्रुत्वा निनादंतस्याशुसर्वदैत्याश्चकंपिरे ॥ मुमूर्च्छुर्भीरवःसर्वेकेचिन्मृत्युमुपाययुः १६ सिंदूरोपिमुमूर्च्छाशुक्षणेनप्रकृतिंययौ ॥ उवाचसेवकान्सर्वान्कोयंगर्जतिदृश्यताम् १७ मूर्छाप्राप्तामयाकस्माद्यच्छब्देनपुरःकथम् ॥ स्थास्यामितत्पुरःस्थातुंकस्यशक्तिर्भविष्यति १८ ततस्तेसेवकाजग्मुस्तदाबालसमीपतः ॥ तद्रूपंतेनिरीक्ष्यै वंसिंहस्यकरिणोयथा १९ बिभ्युश्चैवचकंपुश्चकेचिद्धैर्यात्तमब्रुवन् ॥ कस्यत्वंकुतजायातःकिमर्थंतवनामकिं २० सिंदूरोविश्वसंहाररसिकःक्रोधसंयुतः ॥ श्रुत्वा तेक्रंदिबंसर्वेकंपितंचससिंदुरः २१ बालोपिबलवान्भासिचतुःपंचाब्दिकोपिच ॥ दृश्यसेसर्वसंहारकरणायक्षमःक्षणात् २२ एवमाकर्ण्यतद्वाक्यंप्रोवाच सचताञ्विभुः ॥ अहंशिवसुतःख्यातःपराशरगृहेवसन् २३ दुष्टसंहाररसिकोभक्तपालनतत्परः ॥ नानावतारकुशलोब्रह्मादीनामगोचरः २४ गजाननेति मेनामयुद्धंकर्तुंसमागतः ॥ स्वामिनंवोथगच्छंतुतस्मैसर्वंब्रुवंतुच २५ तस्मिन्हतेमानसंमेतोषमेष्यतिदुर्जये ॥ कउवाच ॥ ततस्तेनिर्ययुःशीघ्रंसिंदूरंप्राब्रुव न्वचः २६ ॥ दूताऊचुः ॥ वयंशीघ्रतरंयाताःपुरुषंभवदाज्ञया ॥ कृतांतसदृशंतंतुदृष्ट्वासर्वेचकंपिताः २७ ततोभवत्प्रतापेनतदग्रेप्राब्रुवामच ॥ तत स्तेनसमाख्यातंनिजंसर्वंसमासतः २८ गजाननेतिनामास्यशिवपुत्रत्वमेवच ॥ दुष्टदैत्यविनाशायसाधूनांपालनायच २९ सांप्रतंतुत्वयातार्द्धंयुद्धाय

समुपागतः ॥ सचतुर्वार्षिकोबालोवल्गतेबहुविस्तरम् ३० इदानींस्वस्वभावेनजहिशत्रुंनिजंबलम् ॥ तवतुश्वासमात्रेणदूरंगच्छेदयंशिशुः ३१ यस्यतेदर्श
नात्स्वामिंश्चकंपुःशिवकादयः ॥ तस्यतेगणनाकास्तिबालकस्याल्पमेधसः ३२ ॥ कउवाच ॥ एवंदूतवचःश्रुत्वासिंदूरश्चिंतयातुरः ॥ बभूवम्लानतुंडश्च
क्रोधारुणविलोचनः ३३ उद्यमन्नयनाद्वह्निंप्रलयानलसन्निभम् ॥ उवाचदूतान्क्रोधेनहर्षेणचसमन्वितः ३४ ॥ सउवाच ॥ आश्चर्यंपरमंदूताभवद्वचसिमेभ
वद् ॥ सिंहेनसहयोद्धुंवैमशकःकथमेष्यति ३५ चतुर्वर्षेणबालेनयोद्धव्यंकिंमयासह ॥ यूयंततःकथंभीतानजानेतत्रकारणम् ३६ मयिक्रुद्धेजगन्नश्येत्तत्रका
गणनाऽस्यह ॥ जगर्जगर्जयन्व्योमदिशोपिविदिशोपिच ३७ धृत्वाशस्त्राणिचास्त्राणिनिर्ययौयुद्धलालसः ॥ ततऊचुरमात्यास्तंनमस्कृत्यासुराधिपं ३८
सत्सुबलेष्वमात्येषुकथंयासिस्वयंरणं ॥ वयंतंहिहनिष्यामःप्रतापात्तवदैत्यप ३९ समयार्थंमहत्सैन्यंपाल्यतेसोयमागतः ॥ प्राणांस्त्यक्ष्यामहेसर्वेतवहेतो
र्महाप्रभो ४० अनुजानीहियास्यामोहंतुंबालंरिपुंतव ॥ सिंदूरउवाच ॥ यामिसर्वैप्रपश्यंतुपौरुषंममसैनिकाः४१ इत्युक्त्वाप्रययौशीघ्रंबालंहंतुंसमुत्सुकः॥
सप्रापक्षणमात्रेणयत्रबालःस्थितोभवत् ४२ ॥ इतिश्रीग०उ०बा०सिंदूरनिर्गमोनामषट्त्रिंशोत्तरशततमोध्यायः ॥ १३६ ॥ कउवाच ॥ तंदृष्ट्वाबालकंप्राह
सिंदूरोमदगर्वितः ॥ लज्जामेजायतेमंदयुध्यतोबालकेनह १ याहिशीघ्रंगृहंबालपिबमातुःस्तनंमुदा ॥ वृथामच्छरपातेनसद्योमृत्युमुपैष्यसि २ पलायंतेहिमां
दृष्ट्वाकेशाद्याश्चिदिवौकसः ॥ मृतेत्वयितवस्नेहात्पितरौतेमरिष्यतः ३ अतोगच्छनमेस्वास्थ्यंदर्शयस्वकिशोरक॥यस्यमेतलघातेनब्रह्माडंशतधाभवेत् ॥ देवउवा
च ॥ सत्यमुक्तंत्वयादुष्टनचेतसिविचारितं ॥ नज्ञातंममसामर्थ्यंरूपंवाविविधंत्वया ५ यस्यमेक्रोधदृष्ट्यैवभ्रष्टाःस्युःसुरनायकाः ॥ स्वेच्छयाहंसृजेभावैस्त्रिभिरेव
हरामिच ६ विश्वंचराचरंनानारूपवांस्तुयुगेयुगे ॥ भूमिभारंमहाघोरंहरामिदुष्टनाशनात् ७ नलघुर्लघुतामेतिपराक्रमयुतोपिचेत् ॥ अणुमात्रोदहेद्वह्निः
सकलंनगरंमहत् ८ जिजीविषुश्चेद्गच्छत्वंनत्वामांनिजमंदिरं ॥ मानिनोनैवनिघ्नंतिनतंचशरणागतं ९ नोचेन्मच्छस्त्रपातेनस्वर्गलोकंगमिष्यसि ॥ हतेत्व
यिसुखंयास्येत्वयायत्पीडितंजगत् १० ब्रह्मणोवरदानेनमागर्वंकुरुदैत्यपट् ॥ विपरीतंभवेत्सर्वंविपरीतंयथापुरा ११ स्तंभेवतीर्यन्यहनद्धिरण्यकशिपुं
विभुः ॥ सुग्रीवेणहतोबंधूरामंमाश्रित्यकालतः १२ विपरीतामतिर्जातातवापिकालयोगतः ॥ अतिस्थूलोलघुतरोभाससेममसांप्रतं १३ धृत्वाधैर्यंचल
ज्जांचयुद्धंकुरुमयासह ॥ ॥ कउवाच ॥ ॥ एवमुक्त्वादधाराशुविराड्रूपंगजाननः १४ ब्रह्मांडादूर्ध्वमगमन्मस्तकश्चरणौतथा ॥ पातालानिच
सप्तानिभित्त्वायातौश्रुतीदिशः १५ पश्यतिस्मयदादैत्योबालंतंविश्वरूपिणं ॥ सहस्रशिरसंदेवंमहस्राक्षंदिवोभुवं १६ सहस्रपादंव्याप्याशुस्थितंव्या
प्यदिशोदश ॥ दिव्यांबरंदिव्यगंधंदिव्यालंकारभूषितम् १७ असंख्यसूर्यसदृशमसंख्यरूपिणंविभुम् ॥ एवंदृष्ट्वाविराड्रूपंचकंपेदैत्यमानसम् १८ धृत्वाधै
र्यंपुनर्दैत्योययौदेवस्यसन्निधौ ॥ जगर्जगर्जयन्व्योमदिशश्चविदिशोपिच १९ उद्यम्यखड्गंमहसादेवंहंतुमियेषसः ॥ ययौतत्पुरतःक्रोधात्पतंगोज्वलनं

यथा २० ॥ ॥ देवउवाच ॥ ॥ नायंमूढोविजानीतेस्वरूपंममदुर्लभम् ॥ अहमेवविमोक्ष्यामीत्युक्त्वाकंठेदधारतम् २१ ममर्दसिंदुरंतंसकराभ्यां
बलवत्तरं ॥ ततस्तदसृजांगानिविलिलिंपारुणेनसः २२ ततःसिंदूरवदनःसिंदूरप्रियएवच ॥ अभवज्जगतीख्यातोभक्तकामप्रपूरकः २३ सिंदूरेनिहतेदे
वामुदापुष्पाण्यवाकिरन् ॥ अवाद्यञ्जयवाद्यानिननृतुश्चाप्सरोगणाः २४ आययुस्तत्रमुनयोवसिष्ठप्रमुखाःसुराः ॥ ब्रह्माद्याःसकलाःशक्रपुरोगाव
स्तुपाणयः २५ जयशब्दैर्नमःशब्दैःपूरयंतोदिशोदश ॥ ततःसर्वेभूमिपालाययुस्तत्रमुदान्विताः २६ षोडशैरुपचारैस्तमानर्चुःपरमेश्वरं ॥ गजाननं
चतुर्बाहुंसर्वाभरणभूषितं २७ दिव्यांबरंदिव्यगंधमाखुवाहनमीश्वरं ॥ प्रार्थयामासुरिंद्राद्यास्तोतुंत्वांनहिशक्नुमः २८ यत्रकुंठाश्चतुर्वेदाब्रह्माद्याश्चमु
नीश्वराः ॥ त्वंकर्ताकारणंकार्यैरक्षकःपोषकोपिच२९संहर्तामोहनश्चास्यविश्वस्यज्ञानदःक्वचित् ॥ सरितःसागरावृक्षाःपर्वताःपशवोखिलाः ३० वायुराकाश
पृथिवीवह्निर्वारित्वमेवच ॥ ब्रह्माविष्णुःशिवःशक्रोमरुतोमुनयोपिच ३१ गंधर्वाश्चारणाःसिद्धायक्षराक्षसपन्नगाः ॥ अप्सरःकिन्नरादेवत्वमेवमचरा
चरं ३२ वयंधन्यायतोदृष्टःप्रत्यक्षंमोक्षसाधनः॥ सिंदूरेतुहतेदेवसुखंप्राप्तासुरोत्तमाः ३३ राजानोमुनयोलोकाःस्वस्वकार्यैमुदारताः ॥ भविष्यंतिस्वधास्वाहा
वषट्काराश्रिताःक्रियाः ३४ नानावतारैःकुरुषेपालनंत्वंविशेषतः ॥ दुष्टानांनाशनंसद्योभक्तानांकामपूरकः ३५ ॥ ॥ कउवाच ॥ एवमुक्त्वासुरास्तंतुष्यदधुःस
र्वएवते ॥ प्रासादंरम्यशिखरंस्थापयित्वागजाननं ३६ यस्यदर्शनमात्रेणमुच्यतेपातकाज्जनः ॥ कुलानितारयेत्सप्तस्मरणादस्यमानवः ३७ पूजयित्वाप्रणम्यै
नंपरिवृत्तियुःसुराः ॥ ततस्तंमुनयःसर्वेपुपूजुःपरमादराव् ३८ सिंदूरहेतिनामास्यचक्रुःसिंदूरनाशनाव् ॥ अतिसंतुष्टमनसोनत्वाजग्मुःस्वमाश्रमं ३९
ततःसर्वेमुनिवरानत्वादेवंमुभक्तितः ॥ पुपूजुःपरमात्मानंनानाद्रव्यैरनेकशः ४० राजसदनमितितेक्षेत्रंख्यातिमुपैष्यति ॥ वरेण्यस्तंविलोक्यैवनिजपुत्रम
बुध्यत ४१ यतोराज्ञांपदान्याशुहत्वादैत्यंसुदारुणं ॥ दत्तानिभवतानाथसिंदूरंलोककंटकम् ४२ दैत्यविमर्दनइतिनामख्यातिमुपैष्यति ॥ पुपूजतनयंस्नेहा
त्तदादृष्टपराक्रमम् ४३ मुमोचस्नेहजंचाश्रुनशशाकप्रभाषितुम् ॥ अतिगद्गदकंठत्वाद्रुरोदभृशदुःखितः ४४ ॥ वरेण्यउवाच ॥ मूढभावेनसंत्यक्तोविघ्नभी
तेनपापिना ॥ यंत्वांपूजयितुंयाताब्रह्मशक्रपुरोगमाः ४५ अनंतकोटिब्रह्मांडनायकंत्वांनविद्महे ॥ कामधेनुंनिधिंकल्पवृक्षंमूढोयथात्यजेत् ४६ मायया
मोहितस्तेहमत्यजंत्वांतथागृहात् ॥ कउवाच ॥ इतितच्छ्रुचमाकर्ण्यकृपयापरमेश्वरः ४७ आलिलिंगवरेण्यंतंचतुर्बाहुभिरादराव् ॥ उवाचपरयाभक्त्या
वरेण्यनृपतिंविभुः ४८ ॥ देवउवाच ॥ पुराकल्पेमहारण्येतपस्तप्तंसुदारुणम् ॥ उमाभ्यांपक्वपर्णानिभक्षयित्वावटस्यह ४९ दिव्यवर्षसहस्रेणप्रसन्नोहंत
दाभवम् ॥ भवद्भ्यांहिव्रतःपुत्रोनमोक्षोमूढभावतः ५० सोहंपुत्रत्वमापन्नोभूभारहरणायच ॥ सिंदूरस्यवधंकर्तुंसाधूनांपालनंतथा ५१ अन्यथानशरीरंमे
निराकारस्यसाक्षिणः ॥ वचनंतुकृतंसत्यंत्रैलोक्यस्यापितोषणम् ५२ यास्येधुनानिजंधामनत्वंशोकेमनःकृथाः ॥ वरेण्यउवाच ॥ संसारेबहुदुःखानिदृष्टानि

दुःसहानिच ५३ इदानींमोक्षमार्गंमेकृपयादिशदुःखहन् ॥ साक्षात्कारेकथंबंधस्तवस्याद्धिरदानन ५४ येनोपदेशेनमुक्तिंयास्यामितद्वदस्वमे ॥ योगंतंयेनसंत्यक्ष्येकामंक्रोधंमृतेर्भयम् ५५ ॥ कउवाच ॥ एवमाकर्ण्यतद्वाक्यंकृपयासगजाननः ॥ उपवेश्यस्वासनेतंहस्तांशिरसिचादधत् ५६ गणेशगीतांतस्मैसउपदेष्टुंप्रचक्रमे ॥ निरस्यसर्वसंदेहान्विश्वरूपंप्रदर्श्यच ५७ गीतासारंसबुध्वैवगणेशस्योपदेशतः ॥ स्थाप्यराज्यममात्येषुतपसेवनमाययौ ५८ अतिवैराग्यसंयुक्तोदध्यौतंचगजाननम् ॥ आवर्त्तयत्सदागीतामनन्यविषयःकृती ५९ यथाजलंजलेक्षिप्तंजलमेवाहिजायते ॥ तथातद्ध्यानतःसोपितन्मयत्वमुपाययौ ६० मुनिरुवाच ॥ चतुराननदेवेशकृपयापरयावद ॥ गीतांतांतुगणेशस्यसर्वाज्ञानविनाशनीम् ६१॥ ॥ इतिश्रीगणेशपुराणेउत्त०वरेण्योपदेशोनाम०अध्यायः १३७ ॥ कउवाच ॥ एवमेवपुरापृष्टःशौनकेनमहात्मना ॥ ससूतःकथयामासगीतांव्यासमुखाच्छ्रुताम् १ ॥ सूतउवाच ॥ अष्टादशपुराणोक्तममृतंप्राशितंत्वया ॥ ततोतिरसवत्पातुमिच्छाम्यमृतमुत्तमम् २ येनामृतमयोभूत्वापुमान्ब्रह्मामृतंयतः ॥ योगामृतंमहाभागतन्मेकरुणयावद ३ ॥ व्यासउवाच ॥ अथगीतांप्रवक्ष्यामियोगमार्गप्रकाशिनीम् ॥ नियुक्तापृच्छतेसूतराज्ञेगजमुखेनया ४ ॥ वरेण्यउवाच ॥ विघ्नेश्वरमहाबाहोसर्वविद्याविशारद ॥ सर्वशास्त्रार्थतत्त्वज्ञयोगंमेवक्तुमर्हसि५ ॥ गजाननउवाच ॥ सम्यग्व्यवसितारानन्मतिस्तेनुग्रहान्मम ॥ शृणुगीताप्रवक्ष्यामियोगामृतमयींनृप६नयोगंयोगमित्याहुर्योगोयोगोनचश्रियः ॥ नयोगोविषयैर्योगोनचमात्रादिभिस्तथा ७ योगोयःपितृमात्रादेर्नसयोगोनराधिप ॥ योयोगोबंधुपुत्रादेर्यश्चाष्टभूतिभिःसह ८ नसयोगःस्त्रियायोगोजगदद्भुतरूपया ॥ राज्ययोगश्चनोयोगोनयोगोगजवाजिभिः ९ योगोनेंद्रपदस्थापियोगोयोगार्थिनःप्रियः ॥ योगोयःसत्यलोकस्यनसयोगोमतोमम १० शैवस्ययोगोनोयोगोवैष्णवस्यपदस्ययः ॥ नयोगोभूपसूर्यत्वंचंद्रत्वंनकुबेरता ११ नानिलत्वंनानलत्वंनामरत्वंनकालता ॥ नवारुण्यंननैर्ऋत्ययोगोनसार्वभौमता १२ योगंनानाविधंभूपयुंजंतिज्ञानिनस्तुतं ॥ भवंतिवितृषालोकेजिताहारविरेतसः१३पावयंत्यखिलान्लोकान्वशीकृतजगत्त्रयाः॥ करुणापूर्णत्वदृदयाबोधयंत्यपिकांश्चन ॥ जीवन्मुक्तान्हदेमग्नःपरमानंदरूपिणि १४ निमील्याक्षीणिपश्यंतःपरंब्रह्मत्वदिस्थितम् ॥ ध्यायंतःपरमंब्रह्मचित्तेयोगवशीकृतम् १५ भूतानिस्वात्मनातुल्यंसर्वाणिगणयंतिते ॥ येनकेनचिदाच्छिन्नायेनकेनचिदाहताः १६ येनकेनचिदाकृष्टायेनकेनचिदाश्रिताः ॥ करुणापूर्णत्वदृदयाभ्रमंतिधरणीतले १७ अनुग्रहायभूतानांजितक्रोधाजितेंद्रियाः॥ देहमात्रभृतोभूपसमलोष्टाश्मकांचनाः १८ एतादृशामहाभाग्यास्युश्चक्षुर्गोचराःप्रिय ॥ तमिदानीमहंवक्ष्येशृणुयोगमनुत्तमम्१९श्रुत्वायंमुच्यतेजंतुःपापेभ्योभवसागरात् ॥ शिवेविष्णौचशक्तौचसूर्येमयिनराधिप २० याऽभेदबुद्धिर्योगःससम्यग्योगोमतोमम २१ अहमेवजगद्यस्मात्सृजामिपालयामिच ॥ कृत्वानानाविधंवेषंसंहरामिस्वलीलया २२ अहमेवमहाविष्णुरहमेवमदाशिवः ॥ अहमेवमहाशक्तिरहमेवार्यमाप्रिय ॥ २३ ॥ अहमेकोनृणांनाथोजातःपंचविधःपुरा ॥ अज्ञानान्मांनजानंतिजगत्कारणकारणम् ॥ २४ ॥

मत्तोग्निरापोधरणीमत्तआकाशमारुतौ ॥ ब्रह्माविष्णुश्चरुद्रश्चलोकपालादिशोदश २५ वसवोमनवोगावोमुनयःपशवोपिच ॥ सरितःसागरायक्षावृक्षाःप
क्षिगणाअपि २६ तथैकविंशतिस्वर्गानागाःसप्तवनानिच ॥ मनुष्याःपर्वताःसाध्याःसिद्धारक्षोगणास्तथा ॥ २७ ॥ अहंसाक्षीजगच्चक्षुरलिप्तःसर्वकर्म
भिः ॥ अविकारोप्रमेयोहमव्यक्तोविश्वगोव्ययः २८ अहमेवपरंब्रह्माव्ययानंदात्मकंनृप ॥ मोहयत्यखिलान्मायाश्रेष्ठान्ममनरानमून् ॥ २९ ॥ सर्व
दाषड्विकारेषुतानियंयोजयेद्वशम् ॥ हित्वाजापटलंजंतुरनेकैर्जन्मभिःशनैः ३० विरज्यविंदतिब्रह्मविषयेषुसुबोधतः ॥ अच्छेद्यंशस्त्रसंघातैरदाह्यमनलेन
च ३१ अक्लेद्यंभूपभुवनैरशोष्यंमारुतेनच ॥ अवध्यंवध्यमानेपिशरीरेस्मिन्नराधिप ३२ यामिमांपुष्पितांवाचंप्रशंसंतिश्रुतीरितां ॥ त्रयीवादरतामूढास्त
तोन्यन्मन्वतेपिन ३३ कुर्वंतिसततंकर्मजन्ममृत्युफलप्रदम् ॥ स्वर्गैश्वर्यरताध्वस्तचेतनाभोगबुद्धयः ३४ संपादयंतितेभूपस्वात्मनानिजबंधनम् ॥
संसारचक्रंयुंजंतिजडाःकर्मपरानराः ३५ यस्ययद्विहितंकर्मतत्कर्त्तव्यंमदर्पणम् ॥ ततोस्यकर्मबीजानामुच्छिन्नाःस्युर्महांकुराः ३६ चित्तशुद्धिश्चमहती
विज्ञानसाधिकाभवेत् ॥ विज्ञातेनहिविज्ञातंपरंब्रह्ममुनीश्वरैः ३७ तस्मात्कर्माणिकुर्वीतबुद्धियुक्तोनराधिप ॥ नत्वकर्माभवेत्कोपिस्वधर्मत्यागवांस्त
था ३८ जहातियदिकर्माणितत्तःसिद्धिंनविंदति ॥ आदौज्ञानेनाधिकारःकर्मण्येवसयुज्यते ॥ ६९ कर्मणाशुद्धत्हृदयोभेदबुद्धिमुपैष्यति ॥ सचयो
गःसमाख्यातोमृतत्वायहिकल्पते ४० योगमन्यंप्रवक्ष्यामिशृणुभूपतमुत्तमम् ॥ पशौपुत्रेतथामित्रेशत्रौबंधौसुहृज्जने ४१ बहिर्दृष्ट्वाचसमयात्दृस्थ
यालोकयेत्पुमान् ॥ सुखेदुःखेतथामर्षेहर्षेभीतौसमोभवेत् ॥ ४२ ॥ रोगास्तौचैवभोगास्तौजयेवाविजयेपिच ॥ श्रियोयोगेचयोगेचलाभालाभेमृताव
पि ॥ ४३ ॥ समोमांवस्तुजातेषुपश्यन्नंतर्बहिस्थितम् ॥ सूर्येसोमेजलेवह्नौशिवेशक्तौतथानिले ॥ ४४ ॥ द्विजेत्हृदिमहानद्यांतीर्थक्षेत्रेघनाशि
नि ॥ विष्णौचसर्वदेवेषुतथायक्षोरगेषुच ॥ ४५ ॥ गंधर्वेषुमनुष्येषुतथातिर्यग्भवेषुच ॥ सततंमांहियःपश्येत्सोयंयोगविदुच्यते ॥ ४६ ॥ संपरात्दृत्यस्वा
र्थेभ्यइंद्रियाणिविवेकतः ॥ सर्वत्रसमताबुद्धिःसयोगोभूपमेमतः ४७ आत्मानात्मविवेकेनयाबुद्धिर्दैवयोगतः ॥ स्वधर्मासक्तचित्तस्यतद्योगोयोगउच्यते ॥
४८ धर्माधर्मौजहातीहृतयात्यक्तउभावपि ॥ अतोयोगाययुंजीतयोगोवैधेषुकौशलम् ४९ धर्माधर्मफलेत्यक्त्वामनीषीविजितेंद्रियः ॥ जन्मबंधविनिर्मुक्तः
स्थानंसंयात्यनामयम् ५० यदाह्यज्ञानकालुष्यंजंतोर्बुद्धिःक्रमिष्यति ॥ तदासौयातिवैराग्यंवेदवाक्यादिषुक्रमात् ५१ त्रयीविप्रतिपन्नस्यस्थाणुत्वंयास्यते
यदा ॥ परात्मन्यचलाबुद्धिस्तदासौयोगमाप्नुयात् ५२ मानसानखिलान्कामान्यदाधीमांस्त्यजेत्प्रिय ॥ स्वात्मनिस्वेनसंतुष्टःस्थिरबुद्धिस्तदोच्यते ५३
वितृष्णाःसर्वसौख्येषुनोद्विग्नोदुःखसंगमे ॥ गतसाध्वसरुद्रागःस्थिरबुद्धिस्तदोच्यते ५४ यथायंकमठोंगानिसंकोचयतिसर्वतः ॥ विषयेभ्यस्तथाखानिसंक
र्षेद्योगतत्परः ५५ व्यावर्त्ततेस्यविषयास्त्यक्ताहारस्यदेहिनः ॥ विनारागंचरागोपिदृष्ट्वाब्रह्मविनश्यति ५६ विपश्चिद्यततेभूपस्थितिमास्थाययोगिनः ॥ मं

थयित्वेंद्रियाण्यस्यहरंतिबलतोमनः ५७ युक्तस्तानिवशेकृत्वासर्वदामत्परोभवेत् ॥ संयतानींद्रियाणिहयस्यासौकृतधीर्मतः ५८ चिंतयानस्यविषयान्संगस्तेषूपजायते ॥ कामःसंजायतेतस्मात्ततःक्रोधोभिवर्द्धते ५९ क्रोधाद्ज्ञानसंभूतिर्विभ्रमस्तुततःस्मृतेः ॥ भ्रंशाद्स्मृतेर्मतेर्ध्वंसस्तद्ध्वंसात्सोपिनश्यति ६० विनाद्वेषंचरागंचगोचरान्यस्तुखैश्चरेत् ॥ स्वाधीनहृदयोवश्यैःसंतोषंससमृच्छति ६१ त्रिविधस्यापिदुःखस्यसंतोषक्षेपणंभवेत् ॥ प्रज्ञयासंस्थितश्चायंप्रसन्नहृदयोभवेत् ६२ विनाप्रसादंनमतिर्विनामत्यानभावना ॥ विनातांनशमोभूपविनातेनकुतःसुखम् ६३ इंद्रियाश्वान्विचरतोविषयाननुवर्तते ॥ यन्मनस्तन्मतिंहन्यादप्सुनावंमरुद्यथा ६४ यारात्रिःसर्वभूतानांतस्यांनिद्रातिनैवसः ॥ नस्वपंतीहतेयत्रसारात्रिस्तस्यभूमिप ६५ सरितांपतिमायांतिवनानिसर्वतोयथा जायांतितंतथाकामाःसनाशांतिंक्वचिल्लभेत् ६६ अतस्तानीहसंरुद्ध्यसर्वतःखानिमानवः ॥ स्वस्वार्थेभ्यःप्रधावंतिबुद्धिरस्यस्थिरातदा ६७ ममताहंकृतीत्यक्त्वासर्वान्कामांश्चयस्त्यजेत् ॥ नित्यंज्ञानरतोभूयाद्ज्ञानान्मुक्तिंप्रयास्यति ६८ एनांब्रह्मधियंभूपयोविजानातिदैवतः ॥ तुरीयावस्थांप्राप्यापिशीलान्मुक्तिं प्रयास्यसि ६९ ॐतत्सदितिश्रीगणेशगीतासूपनिषदार्थगर्भासुयोगामृतार्थशास्त्रेश्रीमन्महागणेशपुराणेउत्तरखंण्डेगणेशवरेण्यसंवादेसांख्यसारार्थयोगोनामप्रथमोध्यायः १ ॥ १३८ ॥ वरेण्यउवाच ॥ ज्ञाननिष्ठाकर्मनिष्ठाद्वयंप्रोक्तंत्वयाविभो ॥ अवधार्यवदैकंमेनिश्रेयसकरंनुकिम् १ गजाननउवाच ॥ अस्मिंश्चराचरेस्थित्यौपुरोकेद्वेमयाप्रिय ॥ सांख्यानांबुद्धियोगेनवैधयोगेनकर्मिणां २ अनारंभेणवैधानांनिष्क्रियःपुरुषोभवेत् ॥ नसिद्धियातिसंत्यागात्केवलात्कर्मणोनृप ३ कदाचिदक्रियःकोपिक्षणंनैवावातिष्ठते ॥ अस्वतंत्रःप्रकृतिजैर्गुणैःकर्मचकार्यते ४ कर्मकारींद्रियग्रामंनियम्यास्तेस्मरन्पुमान् ॥ तद्गोचरान्मंदचित्तोधिगाचारःसभण्यते ५ तद्ग्रामंसंनियम्यादौमनसाकर्मचारभेत् ॥ इंद्रियैःकर्मयोगंयोविदृष्णःसपरोनृप ६ अकर्मणःश्रेष्ठतमंकर्मानीहाकृतंतुयत् ॥ वर्ष्मणःस्थितिरप्यस्याकर्मणोनैवसेत्स्यति ७ असमर्प्यनिबध्यंतेकर्मतेनजनामयि ॥ कुर्वीतसततंकर्मानाशोसंगोमदर्पणम् ८ मदर्थंयानिकर्माणितानिबध्नंतिनक्वचित् ॥ सवासनमिदंकर्मबध्नातिदेहिनंबलात् ९ वर्णान्सृष्ट्वावदंचाहंमयज्ञांस्तान्पुराप्रिय ॥ यज्ञेनऋध्यतामेषकामदःकल्पवृक्षवत् १० सुरांश्चानेनप्रीणध्वंसुरास्तेप्रीणयंतुवः ॥ लभध्वंपरमंस्थानमन्योन्यप्रीणनात्स्थिरम् ११ इष्टदेवाःप्रदास्यंतिभोगानिष्टान्सुतर्पिताः ॥ तैर्दत्तांस्तान्नरस्तेभ्योदत्वाभुंक्तेसतस्करः १२ हुतावशिष्टभोक्तारोमुक्ताःस्युःसर्वपातकैः ॥ अदंत्येनोमहापापाआत्महेतोःपचंतिये १३ ऊर्जोभवंतिभूतानिदेवादन्नस्यसंभवः ॥ यज्ञाच्चदेवसंभूतिस्तदुत्पत्तिश्चवैधतः १४ ब्रह्मणोवैधमुत्पन्नंमत्तोब्रह्मसमुद्भवः ॥ अतोयज्ञेचविश्वस्मिन्नस्थितंमांविद्धिभूमिप १५ संसृतीनांमहाचक्रंक्रामितव्यंविचक्षणैः ॥ समुदापीणतेभूपेंद्रियक्रीडोद्यमोजनः १६ अंतरात्मनियःप्रीतआत्मारामोखिलप्रियः ॥ आत्मतृप्तोनरोयःस्यात्तस्यार्थोनैवविद्यते १७ कार्याकार्यकृतीनांसनैवाप्नोतिशुभाशुभे ॥ किंचिदस्यनसाध्यंस्यात्सर्वजंतुषुसर्वदा १८ अतोसक्ततयाभूपकर्तव्यंकर्मजंतुभिः ॥ सक्तोगतिमवाप्नोतिमामवाप्नोतितादृशः १९ परमांसि

द्विमापन्नाःपुराराजर्षयोद्विजाः ॥ संग्रहायहिलोकानांतादृशंकर्मचारभेत् २० श्रेयान्यत्कुरुतेकर्मतत्करोत्यखिलोजनः ॥ मनुतेयत्प्रमाणंसतदेवानुमरत्य
सौ २१ विष्टपेमेनसाध्योस्तिकाश्चिदर्थोनराधिप ॥ अनालब्धश्चलब्धव्यःकुर्वेकर्मतथाप्यहम् २२ नकुर्वेहंयदाकर्मस्वतंत्रोलसभावितः ॥ करिष्यंतिमम
ध्यानंसर्ववर्णामहामते २३ भविष्यंतिततोलोकाउच्छिन्नाःसंप्रदायिनः ॥ हंतास्यामस्थलोकस्यविधातासंकरस्यच २४ कामिनोहिसदाकामैरज्ञाना
त्कर्मकारिणः ॥ लोकानांसंग्रहायैतद्विद्वान्कुर्यादसक्तधीः २५ विभिन्नत्वमतिंजह्यादज्ञानांकर्मचारिणाम् ॥ योगयुक्तःसर्वकर्माण्यर्पयेन्मायिकर्मकृत् २६
अविद्यागुणसाच्चिव्यात्कुर्वन्कर्माण्यतंद्रितः ॥ अहंकाराद्विन्नबुद्धिरहंकर्तेतियोब्रवीत् २७ यस्तुवेत्यात्मनस्तत्वंविभागाद्गुणकर्मणोः ॥ करणंविषयेवृत्तामि
तिमत्वानसज्जते २८ कुर्वंतिसफलंकर्मगुणैस्त्रिभिर्विमोहिताः ॥ अविश्वस्तस्वात्मद्रुहोविश्वविन्नैवलंघयेत् २९ नित्यंनैमित्तिकंतस्मान्मायिकर्मार्पयेद्बुधः ॥
त्यक्त्वाहंममताबुद्धिंपरांगतिमवाप्नुयात् ३० अनीर्ष्यंतोभक्तिमंतोयेमयोक्तामिदंशुभम् ॥ अनुतिष्ठंतियेसर्वेमुक्तास्तेखिलकर्मभिः ३१ येचैवनानुतिष्ठंति
अशुभाहतचेतसः ॥ ईर्ष्यमाणान्महामूढान्नष्टांस्तान्विद्धिमेरिपून् ३२ तुल्यंप्रकृत्याकुरुतेकर्मयज्ज्ञानवानपि ॥ अनुयातिचतामेवाग्रहस्तत्रमुधामतः ३३
कामश्चैवतथाक्रोधःस्वानामर्थेषुजायते ॥ नैतयोर्वश्यतांयायादस्यविध्वंसकौयतः ३४ शस्तोऽगुणोनिजोधर्मःसांगादन्यस्यधर्मतः ॥ निजेतस्मिन्मृतिः
श्रेयोपरत्रभयदःपरः ३५ ॥ वरेण्यउवाच ॥ पुमान्यत्कुरुतेपापंसहिकेननियुज्यते ॥ अकांक्षन्नपिहेरंबप्रेरितःप्रबलादिव ३६ ॥ श्रीगजाननउवाच ॥
कामक्रोधौमहापापौगुणद्वयसमुद्भवौ ॥ नयंतौवश्यतांलोकान्विद्ध्येतौद्वेषिणौवरौ ३७ आवृणोतियथामायाजगद्वाष्पोजलंयथा ॥ वर्षाभेघोयथाभानुंतद्व
त्कामोखिलांचरुद् ३८ प्रतिपत्तिमतोज्ञानंछादितंसततंद्विषा ॥ इच्छात्मकेनतरसादुष्पोष्येणचशुष्मिणा ३९ आश्रित्यबुद्धिमनसीइंद्रियाणिसतिष्ठति ॥ तै
रेवाच्छादितप्रज्ञोज्ञाननंमोहयत्यसौ ४० तस्मान्नियम्यतान्यादौसमनांसिनरोजयेत् ॥ ज्ञानविज्ञानयोःशांतिकरंपापंमनोभवम् ४१ यतस्तानिपराण्या
हुस्तेभ्यश्चपरंमनः ॥ ततोपिहिपराबुद्धिरात्माबुद्धेःपरोमतः ४२ बुध्वैवमात्मनात्मा नंसंस्तभ्यात्मानमात्मना ॥ हत्वाशत्रुंकामरूपंपरंपदमवाप्नुयात् ४३
॥ ॥ ॐतत्सदितिश्रीमद्गणेशगीता०कर्मयोगोनामद्वितीयोध्यायः ॥ २ ॥ १३९ ॥ ॥ ७ ॥ ॥ श्रीगणेशउवाच ॥ ॥ पुरासर्गादिसमये
त्रैगुण्यंत्रितनूरहम् ॥ निर्मायचैनमवदंविष्णवेयोगमुत्तमम् १ अर्यम्णेसोब्रवीत्सोपिमनवेनिजसूनवे ॥ ततःपरंपरायातंविदुरेनंमहर्षयः २ कालेनबहुनाचा
यंनष्टःस्याच्चरमेयुगे ॥ अश्रद्धेयोह्यविश्वास्योविगीतव्यश्चभूमिप ३ एवंपुराभवंयोगंश्रुतवानसिमन्मुखाद् ॥ गुह्याद्गुह्यतरंवेदरहस्यंपरमंशुभम् ४ ॥ वरेण्य
उवाच ॥ सांप्रतंह्यावतीर्णोसिगर्भतस्त्वंगजानन ॥ प्रोक्तवान्कथमेतंत्वंविष्णवेयोगमुत्तमम् ५ ॥ गजाननउवाच ॥ अनेकानिचतेजन्मान्यतीतानिममापिच ॥
संस्मरेतानिसर्वाणिनस्मृतिस्तववर्ततेऽमत्तएवमहाबाहोजातोविष्ण्वादयःसुराः ॥ मय्येवचलयंयांतिप्रलयेषुयुगेयुगे ७ अहमेवपरोब्रह्ममहारुद्रोहमेवच ॥

अहमेवजगत्सर्वंस्थावरंजंगमंचयत् ८ अजोव्ययोहंभूतात्मानादिरीश्वरएवच ॥ आस्थायत्रिगुणांमायांभवामिबहुयोनिषु ९ अधर्मोपचयोधर्मापचयोहि यदाभवेत् ॥ साधून्संरक्षितुंदुष्टांस्ताडितुसंभवाम्यहं १० उच्छिद्याधर्मानिचयंधर्मंसंस्थापयामिच ॥ हन्मिदुष्टांश्चदैत्यांश्चनानालीलाकरोमुदा ११ वर्णाश्रमान्मुनीन्साधून्पालयेबहुरूपधृक् ॥ एवंयोवेत्तिसंभूमिर्मादिव्यायुगेयुगे १२ तत्तत्कर्मचवीर्यंचममरूपंसमासतः ॥ त्यक्त्वाहंममताबुद्धिंनपुनर्भूःसजायते १३ निरीहानिर्भयारोषामत्परामद्यपाश्रयाः ॥ विज्ञानतपसाशुद्धाअनेकेमामुपागताः १४ येनयेनहिभावेनसंसेवंतेनरोत्तमाः ॥ तथातथाफलंतेभ्यःप्रयच्छाम्यव्ययःस्फुटम् १५ जनाःस्युरितरेराजन्ममामार्गानुयायिनः ॥ तथैवव्यवहारंतेस्वेषुचान्येषुकुर्वते १६ कुर्वंतिदेवतापीतिंकांक्षंतःकर्मणांफलम् ॥ प्राप्नुवंतीहतेलोकेशीघ्रंसिद्धिंहिकर्मजाम् १७ चत्वारोहिमयावर्णारजःसत्वतमोगतः ॥ कर्माशतश्चसंसृष्टामृत्युलोकेमयानघ १८ कर्तारमपिमांतेषामकर्तारंविदुर्बुधाः ॥ अनादिमीश्वरंनित्यमलिप्तंकर्मजैर्गुणैः १९ निरीहंयोभिजानातिकर्मबध्नातिनैवतम् ॥ चक्रुःकर्माणिबुध्वैवंपूर्वेपूर्वेमुमुक्षवः २० वासनासहितादाद्यात्संसारकारणाद्दृढात् ॥ अज्ञानबंधनाज्जंतुर्बुध्वायंमुच्यतेखिलात् २१ तदकर्मचकर्मापिकथयाम्यधुनातव ॥ यत्रमौनंगतामोहात्ऋषयोबुद्धिशालिनः २२ तत्त्वंमुमुक्षुणाज्ञेयंकर्माकर्मविकर्मणाम् ॥ त्रिविधानीहकर्माणिसुनिम्नैषांगतिःप्रिय २३ क्रियायामक्रियाज्ञानमक्रियायांक्रियामतिः ॥ यस्यस्यात्साहिमर्त्येस्मिन्लोकेमुक्तोखिलार्थकृत् २४ कर्माकुरुवियोगेनयःकर्माण्यारभेन्नरः ॥ तत्त्वदर्शननिर्दग्धक्रियमाहुर्बुधाबुधम् २५ फलतृष्णांविहायस्यात्सदातृप्तोविसाधनः ॥ उद्युक्तोपिक्रियांकर्तुंकिंचिन्नैवकरोतिसः २६ निरीहोनिगृहीतात्मापरित्यक्तपरिग्रहः ॥ केवलंवैगृहंकर्माचरन्नायातिपातकं २७ अद्वंद्वोमत्सरोभूत्वासिद्ध्यसिद्ध्योःसमश्चयः ॥ यथाप्राप्त्येहसंतुष्टःकुर्वन्कर्मनबध्यते २८ अखिलैर्विषयैर्मुक्तोज्ञानविज्ञानवानपि ॥ यज्ञार्थंतस्यसकलंकृतंकर्मविलीयते २९ अहमाग्निर्हविर्होताहुतंयत्त्वयिचार्पितम् ॥ ब्रह्मात्मव्यंचतेनाथब्रह्मण्येवयतोरतः ३० योगिनःकेचिदपरेदिष्टंयज्ञंवदंतिच ॥ ब्रह्माग्निरेवयज्ञोवैइतिकेचनमेनिरे ३१ संयमाग्नौपरेमूपइंद्रियाण्युपजुह्वति ॥ खाग्निष्वन्येतद्विषयान्[1]शब्दादीनुपजुह्वति ३२ प्राणानामींद्रियाणांचपरेकर्माणिकृत्स्नशः ॥ निजात्मरतिरूपेग्नौज्ञानदीपे[2]प्रजुह्वति ३३ द्रव्येणतपसावापिस्वाध्यायेनापिकेचन ॥ तीव्रव्रतेनयतिनोज्ञानेनापियजंतिमाम् ३४ प्राणेपानंतथाप्राणमपानेप्रक्षिपंतिये ॥ रुध्वागतीश्चोभयोस्तेप्राणायामपरायणाः ३५ जित्वाप्राणान्प्राणगतीरुपजुह्वतितेषुच ॥ एवंनानायज्ञरतायज्ञध्वंसितपातकाः ३६ नित्यंब्रह्मप्रयांत्येतेयज्ञशिष्टामृताशिनः ॥ अयज्ञकारिणोलोकोनायमन्यःकुतोभवेत् ३७ कायिकादित्रिधाभूतान्यज्ञान्वेदेप्रतिष्ठितान् ॥ ज्ञात्वातानाखिलान्मूपमोक्ष्यसेखिलबंधनात् ३८ सर्वेषामूपयज्ञानांज्ञानयज्ञःपरोमतः ॥ अखिलंलीयतेकर्मज्ञानेमोक्षस्यसाधने ३९ तज्ज्ञेयंपुरुषव्याघ्रप्रश्नेननतितःसताम् ॥ शुश्रूषयाविदिष्यंतिसंतस्तत्त्वविशारदाः ॥

१ इंद्रियाण्यावयपरेरूपादीनुपजुह्वति इति पाठः ॥ २ ॥ ज्ञानेनेति पाठः ॥

४० नानासंगान्नजनःकुर्वन्नेकंसाधुसमागमं ॥ करोतितेनसंसारेबंधनंसमुपैतिसः ४१ सत्संगाद्गुणसंभूतिरापदांलयएवच ॥ स्वहितंप्राप्यतेसर्वैरिहलोकेपर
त्रच ४२ इतरत्मुलभंराजन्सत्संगोतीवदुर्लभः ॥ यज्ज्ञात्वानपुनर्बंधमेतिज्ञेयंततस्ततः ४३ ततःसर्वाणिभूतानिस्वात्मन्येवाभिपश्यति ॥ अतिपापरतोजं
तुस्ततस्तस्मात्प्रमुच्यते ४४ विविधान्यपिकर्माणिज्ञानाग्निर्दहतिक्षणात् ॥ प्रसिद्धोग्नियथासर्वंभस्मतांनयतिक्षणात् ॥ नज्ञानसमतामेतिपवित्रमितरन्नृप
४५ आत्मन्येवावगच्छंतियोगात्कालेनयोगिनः ॥ भक्तिमान्निंद्रियजयीतत्परोज्ञानमाप्नुयात् ४६ लब्ध्वातत्परमंमोक्षंस्वल्पकालेनयात्यसौ ॥ भक्तिही
नोऽश्रद्दधानःसर्वत्रसंशयीतुयः ४७ तस्यशंनापिविज्ञानमिहलोकोथवापरः ॥ आत्मज्ञानरतंज्ञाननाशिताखिलसंशयं ४८ योगास्ताखिलकर्माणंबध्नंतिभू
पतानिन ॥ ज्ञानखड्गप्रहारेणसंभूतामज्ञतांबलात् ४९ छित्त्वांतःसंशयंतस्माद्योगयुक्तोभवेन्नरः ५० ॥ ॥ ॐतत्सदितिश्रीमद्गणेशगीता०ज्ञानप्रतिपा
दनोनामतृतीयोध्यायः ३ ॥ ॥ १४० ॥ ॥ ७ ॥ ॥ वरेण्यउवाच ॥ ॥ संन्यास्तिश्चैवयोगश्चकर्मणांवर्ण्यतेत्वया ॥ उभयोर्निश्चितं
त्वेकंश्रेयोयद्वदमेप्रभो १ ॥ ॥ गजाननउवाच ॥ ॥ क्रियायोगोवियोगश्चाप्युभौमोक्षस्यसाधने ॥ तयोर्मध्येक्रियायोगस्त्यागात्तस्यविशिष्यते २
द्वंद्वदुःखसहोद्वेष्टायोनकांक्षतिकिंचन ॥ मुच्यतेबंधनात्सद्योनित्यंसंन्यासवान्सुखं ३ वदंतिभिन्नफलकौकर्मणस्त्यागसंग्रहौ ॥ मूढाल्पज्ञानतश्चैकंसं
युंजीतविचक्षणः ४ यदेवप्राप्यतेत्यागात्तदेवयोगतःफलं ॥ संग्रहंकर्मणोयोगंयोविंदतिसविंदति ५ केवलंकर्मणान्यासंसंन्यासंनविदुर्बुधाः ॥ कु
र्वन्निच्छयाकर्मयोगीब्रह्मैवजायते ६ निर्मलोयतचित्तात्माजितखोयोगतत्परः ॥ आत्मानंसर्वभूतस्थंपश्यन्कुर्वन्नलिप्यते ७ तत्त्वविद्योगयुक्तात्मा
करोमीतिनमन्यते ॥ एकादशानींद्रियाणिकुर्वंतिकर्मसंख्यया ८ तत्सर्वमर्पयेद्ब्रह्मण्यपिकर्मकरोतियः ॥ नलिप्यतेपुण्यपापैर्भानोर्भानुर्यथार्थगः
९ कायिकंवाचिकंबौद्धमींद्रियंमानसंतथा ॥ त्यक्त्वाशांकर्मकुर्वंतियोगज्ञाश्चित्तशुद्धये १० योगहीनोनरःकर्मफलेहयाकरोत्यलं ॥ बद्ध्यतेकर्मबीजैः
सततोदुःखंसमश्नुते ११ मनसासकलंकर्मत्यक्त्वायोगीसुखंवसेत् ॥ नकुर्वन्कारयन्वापिनंदन्स्वप्नेसुपत्तने १२ नक्रियानचकर्तृत्वंकस्यचित्सृज्यतेमया
॥ नक्रियाबीजसंपर्कःशक्त्यातक्रियतेखिलं १३ कस्यचित्पुण्यपापानिनस्पृशामिविभुर्नृप ॥ ज्ञानमूढाविमुह्यंतिमोहेनावृतबुद्धयः १४ विवेकेनात्मनो
ज्ञानंयेषांनाशितमात्मना ॥ तेषांविकाशमायातिज्ञानमादित्यवत्परं १५ मन्निष्ठामद्धियोत्यंतंमच्चित्तामयितत्पराः ॥ अपुनर्भवमायांतिविज्ञानान्नाशितैनसः
१६ ज्ञानविज्ञानसंयुक्तेद्विजेगविगजादिषु ॥ समेक्षणामहात्मानःपंडिताःश्वपचेशुनि ॥ वश्यःस्वर्गोजगत्तेषांजीवन्मुक्ताःसमेक्षणाः १७ यतोदोषंब्रह्मसमंत
स्मात्तैर्विषयीकृतं ॥ प्रियाप्रियेप्राप्यहर्षद्वेषौयेप्राप्नुवंतिन १८ ब्रह्माश्रिताअसंमूढाब्रह्मज्ञाःसमबुद्धयः ॥ वरेण्यउवाच ॥ किंसुखंत्रिषुलोकेषुदेवगंधर्वयोनिषु
१९ भगवन्कृपयातन्मेवदविद्याविशारद ॥ गणेशउवाच ॥ आनंदमश्नुतेसक्तःस्वात्मारामोनिजात्मनि २० अविनाशिसुखंतद्धिनसुखंविषयादिषु ॥ वि

षयोत्थानिसौख्यानिदुःखानांतानिहेतवः २१ उत्पत्तिनाशयुक्तानितत्रासक्तोनतत्त्ववित् ॥ कारणेसतिकामस्यक्रोधस्यसहतेचयः २२ तौजेतुंवर्ष्मविरहात्समु
खंचिरमश्नुते ॥ अंतर्निष्ठोंतःप्रकाशोंतःसुखोंतोरतिर्लभेत् २३ असंदिग्धोक्षयंब्रह्मसर्वभूतहितार्थकृत् ॥ जेतारःषड्रिपूणांयेशमिनोदमिनस्तथा २४
तेषांसमंततोब्रह्मस्वात्मज्ञानांविभात्यहो ॥ आसनेषुसमासीनस्त्यक्त्वेमान्विषयान्बहिः २५ संस्तभ्यभ्रूकुटीमास्तेप्राणायामपरायणः ॥ प्राणायामंतुसं
रोधंप्राणापानसमुद्भवम् २६ वदंतिमुनयस्तंचत्रिधाभूतंविपश्चितः ॥ प्रमाणंभेदतोविद्धिलघुमध्यममुत्तमम् २७ दशाभिर्द्वयधिकैर्वर्णैःप्राणायामोलघुःस्मृतः ॥
चतुर्विंशत्यक्षरोयोमध्यमःसउदाहृतः २८ षट्त्रिंशल्लघुवर्णोयउत्तमःसोभिधीयते ॥ सिंहंशार्दूलकंवापिमत्तेभंमृदुतांयथा २९ नयंतिप्राणिनस्तद्वत्प्रा
णापानौसुसाधयेत् ॥ पीडयंतिमृगांस्तेनलोकान्वश्यंगतान्नृप ३० दहत्येनस्तथावायुःसंस्तब्धोनचतत्तनुम् ॥ यथायथानरःकश्चित्सोपानावलिमाक्रमे
द् ३१ तथातथावशीकुर्यात्प्राणापानौहियोगवित् ॥ पूरकंकुंभकंचैवरेचकंचततोभ्यसेत् ३२ अतीतानागतज्ञानीततःस्याज्जगतीतले ॥ प्राणायामैर्द्वा
दशभिरुत्तमैर्धारणामता ३३ योगस्तुधारणेद्वेस्याद्योगीज्ञस्तेसदाभ्यसेत् ॥ एवंयःकुरुतेराजंस्त्रिकालज्ञःसजायते ३४ अनायासेनतस्यस्याद्वश्यंलोकत्रयंनृप ॥
ब्रह्मरूपंजगत्सर्वंपश्यतिस्वांतरात्मनि ३५ एवंयोगश्चसंन्यासःसमानफलदायिनौ ॥ जंतूनांहितकर्त्तारंकर्मणांफलदायिनम् ३६ मांज्ञात्वामुक्तिमाप्नोतिनैलो
क्यस्येश्वरंविभुम् ३७ ॥ ॥ ॐतत्सदितिश्रीमद्गणेशगीता०द्वैधसंन्यासयोगोनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ १४१ ॥ ॥ ध ॥ ॥ गजान
नउवाच ॥ ॥ श्रौतस्मार्त्तानिकर्माणिफलंनेच्छन्समाचरेत् ॥ शस्तःसयोगीराजेंद्रअक्रियाद्योगमाश्रितात् १ योगप्राप्त्यैमहाबाहोहेतुःकर्मैवमेमतम् ॥
सिद्धयोगस्यसंसिद्ध्यैहेतूशमदमौमतौ २ इंद्रियार्थांश्चसंकल्प्यकुर्वन्स्वस्यरिपुर्भवेत् ॥ एताननिच्छन्यःकुर्वन्सिद्धियोगीससिद्ध्यति ३ सुहृत्त्वेचरिपुत्वेच
उद्धारेचैवबंधने ॥ आत्मनैवात्मनोह्यात्मानात्माभवतिकश्चन ४ मानेपमानेदुःखेचसुखेसुहृदिमाधुषु ॥ मित्रेऽमित्रेप्युदासीनेद्वेष्येलोष्टेचकांचने ५ समोजिता
त्माविज्ञानीज्ञानींद्रियजयावहः ॥ अभ्यसेत्सततंयोगंयदायुक्तमोहिमः ६ तप्तःश्रांतोव्याकुलोवाक्षुधितोव्यग्रचित्तकः ॥ कालेतिशीतेत्युष्णेवानिलाढ्यं
बुसमाकुले ७ साध्वनावतिजीर्णेगोस्थानेसाग्नौजलांतिके ॥ कूपकूलेश्मशानेचनद्यांभिन्नौचमर्मरे ८ चैत्येसवल्मिकेदेशेपिशाचादिसमावृते ॥ नाभ्यसेद्यो
गविद्योगंयोगध्यानपरायणः ९ स्मृतिलोपश्चमूकत्वंबाधिर्यंमंदताज्वरः ॥ जडताजायतेसद्योदोषाज्ञानाद्धियोगिनः १० एतेदोषाःपरित्याज्यायोगाभ्यस
नशालिना ॥ अनादरेहिचैतेषांस्मृतिलोपादयोध्रुवम् ११ नातिभुंजन्नसदायोगीनाभुंजन्नातिनिद्रितः ॥ नातिजाग्रत्सिद्धिमेतिभूपयोगंमदाभ्यसन् १२
संकल्पजांस्त्यजेत्कामान्नियताहारजागरः ॥ नियम्यखगणंबुद्ध्याविरमेतशनैःशनैः १३ ततस्ततःकृषेदेतद्यत्रयत्रानुगच्छति ॥ धृत्यात्मवशगंकुर्याच्चित्तंचंचलमा
दृतः १४ एवंकुर्वन्सदायोगीपरांनिर्वृतिमृच्छति ॥ विश्वस्मिन्निजमात्मानंविश्वंचस्वात्मनीक्षते १५ योगेनयोमामुपैतितमुपैम्यहमादरात् ॥ मोचया

मिनमुंचामितमहंमांनसंत्यजेत् १६ सुखेदुःखेतरद्वेषेक्षुधितोषेममस्त्वृषि ॥ आत्मसाम्येनभूतानिसर्वगंमांचवेत्तियः १७ जीवन्मुक्तःसयोगीद्रःकेवलंमायि
संगतः ॥ ब्रह्मादीनाचदेवानांसवंद्यःस्याज्जगत्त्रये १८ ॥ ॥ वरेण्यउवाच ॥ द्विविधोपिहियोगो यमसंभाव्योहिमेमतः ॥ यतोंतःकरणंदुष्टंचंचलंदुर्ग्रहंविभो
१९ ॥ श्रीगजाननउवाच॥योनिग्रहंदुर्ग्रहस्यमनसःसंप्रकल्पयेत् ॥ घटीयंत्रसमादस्मान्मुक्तिःसंसृतिचक्रकात् २०विषयैश्चकचैरेतःसंसृष्टंचक्रकंदृढम्॥ जनश्छे
त्तुंनशक्नोतिकर्मकीलैःसुसंवृतम् २१अतिदुःखंचवैराग्यंभोगाद्वैतृष्ण्यमेवच॥ गुरुप्रसादःसत्संगउपायास्तज्जयेअमी २२अभ्यासाद्भावशीकुर्यान्मनोयोगस्यसिद्ध
ये ॥ वरेण्यदुर्लभोयोगोविनास्यमनसोजयात् २३ ॥ ॥ वरेण्यउवाच ॥ ॥ योगभ्रष्टस्यकोलोकःकागतिःकिंफलंभवेत् ॥ विभोसर्वज्ञमेछिं
धिसंशयंबुद्धिचक्रभृत् २४ ॥ ॥ श्रीगजाननउवाच ॥ ॥ दिव्यदेहधरोयोगाद्भ्रष्टःस्वर्भोगमुत्तमम् ॥ भुक्त्वायोगिकुलेजन्मलभेच्छुद्धिमतांकुले २५
पुनर्योगीभवत्येषसंस्कारात्पूर्वकर्मजात् ॥ नहिपुण्यकृतांकश्चिन्नरकंप्रतिपद्यते २६ ज्ञाननिष्ठात्तपोनिष्ठात्कर्मनिष्ठान्नराधिप ॥ श्रेष्ठोयोगीश्रेष्ठतमोभ
क्तिमान्मयितेषुयः २७ ॥ ॥ ॐतत्सदिति०योगाद्वात्तिप्रशंसनायोगोनामपंचमोऽध्यायः ॥ ५ ॥ ॥ १४२ ॥ ॥ ७ ॥ ॥ गजाननउवाच ॥
ईदृशींविद्धिमेतत्त्वंमद्भक्तेनांतरात्मना ॥ यज्ज्ञात्वामामसंदिग्धंवेत्सिमोक्ष्यसिसर्वगम् १ तत्तेहंशृणुवक्ष्यामिलोकानांहितकाम्यया ॥ अस्तिज्ञेयंयतो
नान्यन्मुक्तेश्चसाधनंनृप २ ज्ञेयामद्प्रकृतिःपूर्वंततःस्याज्ज्ञानगोचरः ॥ ततोविज्ञानसंपत्तिर्मयिज्ञातेनृणांभवेत् ३ क्वनलौस्वमहंकारःकंचित्तंयीसमी
रणौ ॥ रवींदूयागकृच्चैकादशधाप्रकृतिर्मम ४ अन्यांमत्प्रकृतिंवृद्धांमुनयःसंगिरंतिच ॥ तयात्रिविष्टपंव्याप्तंजीवत्वं गतयानया ५ आभ्यामुत्पाद्यते
सर्वंचराचरमयंजगत् ॥ संगाद्विश्वस्यसंभूतिःपरित्राणंलयोप्यहम् ६ तत्त्वमेतन्निबोद्धुंमेयततेकश्चिदेवहि ॥ वर्णाश्रमवतांपुंसांपुराचीर्णेनकर्मणा
७ साक्षात्करोतिमांकश्चिद्यत्नवत्स्वपितेषुच ॥ मत्तोन्यन्नेक्षतेकिंचिन्मायिसंवंचवीक्षते ८ क्षितौसुगंधरूपेणतेजोरूपेणचाग्निषु ॥ प्रभारूपेणपूष्ण्य
ब्जेरसरूपेणचाप्सुच ९ धीरूपोबलिनांचाहंधीस्तपोबलमेवच ॥ त्रिविधेषुविकारेषुमदुत्पन्नेष्वहंस्थितः १० नमांविंदंतिपापीयामायामोहितचेतसः ॥
त्रिविकारामोहयतिप्रकृतिर्मेजगत्त्रयम् ११ योमेतत्त्वंविजानातिमोहंत्यजतिसोखिलम् ॥ अनेकैर्जन्मभिश्चैवंज्ञात्वामांमुच्यतेततः १२ अन्येनानाविधा
न्देवान्भजंतेतान्व्रजंतिते ॥ यथायथामतिंकृत्वाभजतेमांजनोखिलः १३ तथातथास्यतंभावंपूरयाम्यहमेवतम् ॥ अहंसर्वंविजानामिमांनकश्चिद्विबुध्य
ते१४अव्यक्तंव्यक्तिमापन्नंनविदुःकाममोहिताः ॥ नाहंप्रकाशतांयामिअज्ञानांपापकर्मणाम् १५यःस्मृत्वात्यजतिप्राणमंतेमांश्रद्धयान्वितः ॥ सयात्यपुनरावृ
त्तिप्रसादान्ममभूभुज १६ यंयंदेवंस्मरन्भक्त्यात्यजतिस्वंकलेवरम् ॥ तत्तत्सालोक्यमायातितत्तद्भक्त्यानराधिप १७ अतश्चाहानशंभूपस्मर्त्तव्योनेकरूपवा
न् ॥ सर्वेषामप्यहंगम्यःस्रोतसामर्णवोयथा १८ ब्रह्मविष्णुशिवेंद्राद्यांल्लोकान्प्राप्यपुनःपतेत् ॥ योमामुपैत्यसंदिग्धःपतनंतस्यनक्वचित् १९ अनन्यशर

णोयोमांभक्त्याभजतिभूमिप ॥ योगक्षेमौवहतस्याहंमर्वदाप्रतिपादये २० द्विविधागतिरुद्दिष्टाशुक्लाकृष्णाचनृणांनृप ॥ एकयापरमंब्रह्मपरयायातिसंसृतिम २१ ॥ ॥ ॐतत्सदितिश्रीमद्गणेशगीताऽबुद्धियोगोनामषष्ठोध्यायः ॥ ६ ॥ १४३ ॥ ॥ ७ ॥ ॥ वरेण्यउवाच ॥ ॥ काशुक्लागतिरुद्दिष्टाकाचकृष्णागजानन ॥ किंब्रह्मसंसृतिःकामेवक्तुमर्हस्यनुग्रहात् १ ॥ ॥ गजाननउवाच ॥ ॥ अग्निर्ज्योतिरहःशुक्लकर्महिमयनंगतिः ॥ चांद्रज्योतिस्तथाधूमोरात्रिश्चदक्षिणायनम् २ कृष्णैतेब्रह्मसंसृत्योरवाप्तेःकारणंगती ॥ दृश्यादृश्यमिदंसर्वंब्रह्मैवेत्यवधारय ३ क्षरंपंचात्मकंविद्धितदंतरक्षरंस्मृतम् ॥ उमाभ्यांयदतिक्रांतंशुद्धंविद्धिसनातनम् ४ अनेकजन्मसंभूतिःसंसृतिःपरिकीर्तिता ॥ संसृतिंप्राप्नुवंत्येतेयेतुमांगणयंतिन ५ येमांसम्यगुपासंतेपरंब्रह्मप्रयांतिते ॥ ध्यानाद्यैरुपचारैर्मांतथापंचामृतादिभिः ६ स्नानवस्त्राद्यलंकारसुगंधधूपदीपकैः ॥ नैवेद्यैःफलतांबूलैर्दक्षिणाभिश्चयोर्चयेत् ७ भक्त्यैकचेतसाचैवतस्येष्टंपूरयाम्यहम् ॥ एवंप्रतिदिनंभक्त्यामद्भक्तोमांममर्पयेत् ८ अथवामानसींपूजांकुर्वीतस्थिरचेतसा ॥ अथवाफलपत्राद्यैःपुष्पमूलजलादिभिः ९ पूजयेन्मांप्रयत्नेनततादिष्टफलंलभेत् ॥ त्रिविधास्वपिपूजासुश्रेयसीमानसीमता १० साप्युत्तमामतापूजाऽनिच्छयायाकृतामम ॥ ब्रह्मचारीगृहस्थोवावानप्रस्थोयतिश्चयः ११एकांपूजांप्रकुर्वाणोप्यन्योवामिद्धिमृच्छति ॥ मदन्यदेवंयोभक्त्याद्विषन्मामन्यदेवताम् १२ सोपिमामेवयजतेपरंत्वविधितोनृप ॥ योह्यन्यदेवतांमांचद्विषन्नन्यांसमर्चयेत् १३ यातिकल्पसहस्रंसनिरयान्दुःखमाक्रमदा ॥ भूतशुद्धिंविधायादौप्राणानांस्थापनंतथा १४ आकृष्यचेतसोवृत्तिंततोन्यासमुपक्रमेत् ॥ कृत्वांतर्मातृकान्यासंबहिश्चाथषडंगकम् १५ न्यासंचमूलमंत्रस्यततोध्यात्वाजपेन्मनुम् ॥ स्थिरचित्तोजपेन्मंत्रंयथागुरुमुखागतम् १६ जपंनिवेद्यदेवायस्तुत्वास्तोत्रैरनेकधा ॥ एवंमांयउपासीतसलभेन्मोक्षमव्ययम् १७ यउपासनयाहीनोधिङ्नरोव्यर्थजन्मभाक् ॥ यज्ञोहमौषधंमंत्रोग्निराज्यंचहाविर्हुतं १८ ध्यानंध्येयःस्तुतिःस्तोत्रंनतिर्भक्तिरुपासना ॥ त्रयीज्ञेयंपवित्रंचपिताचप्रपितामहः १९ ॐकारःपावनःसाक्षीप्रभुर्मित्रंगतिर्लयः ॥ उत्पत्तिःपोषकोबीजंशरणंवासएवच २० असन्मृत्युःसदमृतमात्माब्रह्माहमेवच ॥ दानंहोमस्तपोभक्तिर्जपःस्वाध्यायएवच २१ यद्यत्करोतितत्सर्वंसमेमार्पणमेवत् ॥ योषितोथदुराचाराःपापाश्चैवर्णिकास्तथा ॥ मदाश्रयाविमुच्यंतेकिंमद्भक्त्याद्विजादयः २२ नविनश्यतिमद्भक्तोज्ञात्वेमामद्विभूतयः ॥ प्रभवंमेविभूतीश्चनदेवाऋषयोविदुः २३ नानाविभूतिभिरहंव्याप्यविश्वंप्रतिष्ठितः ॥ यद्यच्छ्रेष्ठतमंलोकेसाविभूतिर्निबोधमे २४ ॐतत्सदितिश्री॰उपासनायोगोनामसप्तमोऽध्यायः ७ ॥ १४४ ॥ वरेण्यउवाच ॥ भगवन्नारदोमह्यंतवनानाविभूतयः ॥ उक्तवांस्ताअहंवेदनसर्वाःसोपिवेत्तिताः १ त्वमेवतत्त्वतःसर्वंवेत्सिताद्विरदानन ॥ निजंरूपमिदानींमेव्यापकंचाऽदर्शय २ ॥ ॥ श्रीगजाननउवाच ॥ ॥ एकस्मिन्मयिपश्यत्वंविश्वमेतच्चराचरम् ॥ नानाश्चर्याणिदिव्यानियुराद्दृष्टानिकेनचित् ३ ज्ञानचक्षुरहंतेद्यत्तज्जामिस्त्वप्रभावतः ॥ चर्मचक्षुःकथंपश्येन्मांविमुंद्यजमव्य

यम् ४ ॥ ऋउवाच ॥ ततोराजावरेण्यःसदिव्यचक्षुरवैक्षत ॥ ईशितुःपरमंरूपंगजास्यस्यमहाद्भुतम् ५ असंख्यवक्त्रंललितमसंख्यांघ्रिकरंमहत् ॥ अनुलिप्तंसुगंधेनदिव्यभूषांबरस्रजम् ॥ असंख्यनयनंकोटिसूर्यराशिधृतायुधम् ६ तद्वपुर्मणित्रयोलोकादृष्टास्तेनपृथग्विधाः ॥ दृष्ट्वैश्वरंपररूपंप्रणम्यसनृपो ब्रवीत् ७ ॥ ॥ वरेण्यउवाच ॥ ॥ वीक्षेहंतवदेहेस्मिन्देवान्ऋषिगणान्पितॄन् ॥ पातालानांसमुद्राणांद्वीपानांचैवभूभृताम् ८ महर्षीणांसप्तकंचनानार्थैःसंकुलंविभो ॥ भुवोंतरिक्षंस्वर्गांश्चमनुष्योरगराक्षसान् ९ ब्रह्मविष्णुमहेशेंद्रान्देवान्जंतूननेकधा ॥ अनाद्यनंतंलोकादिमनंतभुजशीर्षकं १० प्रदीप्तानलसंकाशमप्रमेयंपुरातनम् ॥ किरीटकुंडलधरंद्यौर्नेरिक्ष्यंमुदावहम् ११ एतादृशंचवीक्षेत्वांविशालवक्षसंप्रभुम् ॥ सुरविद्याधरैर्यक्षैःकिन्नरैर्मुनिमानुषैः १२ नृत्यद्भिरप्सरोभिश्चगंधर्वैर्गानतत्परैः ॥ वसुरुद्रादित्यगणैःसिद्धैःसाध्यैर्मुदायुतैः १३ सेव्यमानंमहाभक्त्यावीक्ष्यमाणंसुविस्मितैः ॥ वेत्तारमक्षरंवेद्यंधर्मगोप्तारमीश्वरम् १४ पातालानिदिशःस्वर्गान्भुवंव्याप्याखिलंस्थितम् ॥ भीतालोकास्तथाचाहमेवंत्वांवीक्ष्यरूपिणम् १५ नानादंष्ट्राकरालंचनानाविद्याविशारदम् ॥ प्रलयानलदीप्तास्यंजटिलंचनभःस्पृशम् ॥ दृक्षागणेशतेरूपमहंभ्रांतइवाभवम् १६ देवामनुष्यानागाद्याःखलास्त्वदुदरेशयाः ॥ नानायोनिभुजश्चांतेत्वय्येवप्रविशंतिच १७ अब्धेरुत्पद्यमानास्तेयथाजीमूतबिंदवः ॥ त्वमिंद्रोग्निर्यमश्चैवनिर्ऋतिर्वरुणोमरुत् १८ गुह्यकेशस्तथेशानःसोमःसूर्योखिलंजगत् ॥ नमामित्वामतःस्वामिन्प्रसादंकुरुमेधुना १९ दर्शयस्वनिजंरूपंसौम्यंयत्पूर्वमीक्षितम् ॥ कोवेदलीलास्तेभूमन्क्रियमाणानिजेच्छया २० अनुग्रहान्मया दृष्टमैश्वरंरूपमीदृशम् ॥ ज्ञानचक्षुर्यतोदत्तंप्रसन्नेनत्वयामम २१ ॥ ॥ श्रीगजाननउवाच ॥ ॥ नेदंरूपंमहाबाहोममपश्यंतियोगिनः ॥ सनकाद्याना रदाद्याःपश्यंतिमदनुग्रहात् २२ चतुर्वेदार्थतत्वज्ञाश्चतुःशास्त्रविशारदाः ॥ यज्ञदानतपोनिष्ठानमेरूपंविदंतिते २३ शक्योहंवीक्षितुंज्ञातुंप्रवेष्टुंभक्तिभावतः ॥ त्यजभीतिंचमोहंचपश्यमांसौम्यरूपिणम् २४ मद्भक्तोमत्परःसर्वसंगहीनोमदर्थकृत् ॥ निष्क्रोधःसर्वभूतेषुसमोमामेतिभूभुज ॥ २५ ॥ ॥ ॐ तत्सदितिश्रीगणेशगीता०विश्वरूपदर्शनंनामअष्टमोध्यायः ॥ ८ ॥ ॥ १४५ ॥ ॥ ७ ॥ ॥ वरेण्यउवाच ॥ अनन्यभावस्त्वांसम्यक्मूर्तिमंतमुपासते ॥ योक्षरंपरमंव्यक्तंतयोःकस्तेमतोधिकः १ असित्वंसर्ववित्साक्षीभूतभावनईश्वरः ॥ अतस्त्वांपरिपृच्छामिवदमेकृपयाविभो २ ॥ ॥ श्रीगजाननउवाच ॥ ॥ योमांमूर्तिधरंभक्त्यामद्भक्तःपरिसेवते ॥ समेमान्योऽनन्यभक्तिर्नियुज्यत्वदयंमयि ३ खगणंस्ववशंकृत्वाखिलभूतहितार्थकृत् ॥ ध्येयमक्षरमव्यक्तंसर्वगंकूटगंस्थिरम् ४ सोपिमामेत्यनिर्देश्यंमत्परोयउपासते ॥ संसारसागरादस्माद्बुद्धरामितमप्यहम् ५ अव्यक्तोपासनादुःखमधिकंतेन लभ्यते ॥ व्यक्तस्योपासनासाध्यंतदेवाव्यक्तभक्तितः ६ भक्तिश्चैवादरश्चात्रकारणंपरमंमतम् ॥ सर्वेषांविदुषांश्रेष्ठोह्यकिंचिज्ज्ञोपिभक्तिमान् ७ भजनभक्त्याविहीनोयःसचांडालोभिधीयते ॥ चांडालोपिभजनभक्त्याब्राह्मणेभ्योधिकोमम ८ शुकाद्याःसनकाद्याश्चपुरामुक्ताहिभक्तितः ॥ यत्तयैवमामनु

प्राप्तानारदाद्याश्चिरायुषः ९ अतोभक्त्यामयिमनोनिधेहिबुद्धिमेवच ॥ ऋक्षयायजस्वमांराजंस्ततोमामेवयास्यसि १० असमर्थोर्पितुंस्वांतंध्रुवंमायिनराधि
प ॥ अभ्यासेनचयोगेनततोगंतुंयतस्वमां ११ तत्रापित्वमशक्तश्चेत्कुरुकर्ममदर्पणम् ॥ ममानुग्रहतश्चैवंपरांनिर्वृतिमेष्यसि १२ अथैतदप्यनुष्ठातुनशक्तो
सितदाकुरु ॥ प्रयत्नतःफलत्यागंत्रिविधानांहिकर्मणां १३ श्रेयसीबुद्धिरावृत्तेस्ततोध्यानंवरंमतम् ॥ ततोखिलपरित्यागस्ततःशांतिर्गरीयसी १४ निरहंम
मताबुद्धिरद्वेषःकरुणासमः ॥ लाभालाभेसुखेदुःखेमानामानेसमोप्रियः १५ यंवीक्ष्यनभयंयातिजनस्तस्मान्नचस्वयं ॥ उद्वेगभीःकोपमुद्वीरहितोयःसमोप्रि
यः १६ रिपौमित्रेथगर्हायांस्तुतौशोकेसमःसमुत् ॥ मौनीनिश्चलधीभक्तिरसंगःसचमेप्रियः १७ संशीलयतियश्चैनमुपदेशंमयाकृतम् ॥ सर्वद्यःसर्वलोके
षुमुक्तात्मामेप्रियःसदा ॥ १८ ॥ अनिष्टाप्तौचनद्वेष्टीष्टप्राप्तौनचतुष्यति ॥ क्षेत्रतज्ज्ञौचयोवेत्तिसमेप्रियतमोभवेत् १९ ॥ वरेण्यउवाच ॥ किंक्षेत्रंकश्चतद्वे
त्तिकिंतज्ज्ञानंगजानन ॥ एतदाचक्ष्वमह्यंत्वंपृच्छतेकरुणांबुधे २० ॥ ॥ गणेशउवाच ॥ ॥ पंचभूतानितन्मात्राःपंचकर्मेंद्रियाणिच ॥ अहंकारोमनो
बुद्धिःपंचज्ञानेंद्रियाणिच ॥ इच्छाव्यक्तंधृतिर्द्वेषौसुखदुःखेतथैवच २१ चेतनासहितश्चायंसमूहःक्षेत्रमुच्यते ॥ तज्ज्ञंत्वंविद्धिमांभूपसर्वांतर्यामिणंविभुम् ॥
२२अयंसमूहोहंचापियज्ज्ञानविषयोनृप ॥ आर्जवंगुरुशुश्रूषाविरक्तिश्चेंद्रियार्थतः २३ शौचंक्षांतिरदंभश्चजन्मादिदोषवीक्षणम् ॥ समदृष्टिर्दृढाभक्तिरेकांति
त्वंज्ञमोदमः २४ एतैर्यच्चयुतंज्ञानंतज्ज्ञानंविद्धिबाहुज ॥ तज्ज्ञानविषयंराजन्ब्रवीमित्वंशृणुष्वमे २५ यज्ज्ञात्वैतिचनिर्वाणंमुक्त्वासंसृतिसागरं ॥ यदनादींद्रि
यैर्हीनंगुणभुग्गुणवर्जितं २६ अव्यक्तंसदसद्विन्नमिंद्रियार्थविभासकं ॥ विश्वभृत्चाखिलव्यापिएकंनानेवभासते २७ बाह्याभ्यंतरतःपूर्णमसंगंतमसःपरम् ॥
दुर्ज्ञेयंचातिसूक्ष्मत्वाद्दीप्तानामपिभासकं २८ ज्ञेयमेतादृशंविद्धिज्ञानगम्यंपुरातनं ॥ एतदेवपरंब्रह्मज्ञेयमात्मापरोव्ययः २९ गुणान्प्रकृतिजान्भुंक्तेपुरुषःप्र
कृतेःपरः ॥ गुणैस्त्रिभिरियंदेहेबध्नातिपुरुषंदृढं ३० यदाप्रकाशःक्षांतिश्चवृद्धेसत्वंतदाधिकं ॥ लोभोशमःस्पृहारंभःकर्मणांरजसोगुणः ३१ मोहोऽप्रवृत्तिश्चाज्ञा
नंप्रमादस्तमसोगुणः ॥ सत्वाधिकःसुखंज्ञानंकर्मसंगोरजोधिकः ३२ तमोधिकश्चलभतेनिद्रालस्यंसुखेतरत् ॥ एषुत्रिषुप्रवृद्धेषुमुक्तिंसंसृतिदुर्गतीः ३३ प्रयां
तिमानवास्तज्जंस्तस्मात्सत्त्वयुतोभव ॥ ततश्चसर्वभावेनभजत्वंमांनरेश्वर ३४ भक्त्याचाव्यभिचारिण्यासर्वत्रैवचसंस्थितं ॥ अग्नौसूर्येतथासोमेयच्चतारासुसं
स्थितं ३५ विद्धिषिन्नाह्मणेतेजोविद्धितन्मामकंनृप ॥ अहमेवाखिलंविश्वंसृजामिविसृजामिच ३६ ओषधीस्तेजसासर्वाविश्वंचाप्याययाम्यहं ॥ सर्वेंद्रिया
ण्यधिष्ठायजाठरंचधनंजयं ३७ भुनज्मिचाखिलान्भोगान्पुण्यपापविवर्जितः ॥ अहंविष्णुश्चरुद्रश्चब्रह्मागौरीगणेश्वरः २८ इंद्राद्यालोकपालाश्चममैवांश
समुद्भवाः ॥ येनयेनहिरूपेणजनोमांपर्युपासते ३९ तथातथादर्शयामितस्मैरूपंसुभक्तितः ॥ इतिक्षेत्रंतथाज्ञाताज्ञानंज्ञेयंमयेरितं ४० अखिलंभूपतेसम्यगुप

१ उद्वेगभीकोपमदै रहितोयइतिपाठः । २ बुद्धैःसत्वमि०पा० ।

पन्नायपृच्छते ४१ ॐतत्सदितिश्रीगणेशगीता०क्षेत्रज्ञात्रज्ञेयविवेकयोगोनामनवमोध्यायः ॥ ९ ॥ ॥ १४६ ॥ ॥ ७ ॥ ॥ श्रीगजाननउवाच ॥ दैव्या सुरीराक्षसीचप्रकृतिस्त्रिविधानृणां ॥ तासांफलानिचिह्नानिसंक्षेपात्तेधुनाब्रुवे १ आद्यासंसाधयेन्मुक्तिंद्वेपरेबंधनंनृप ॥ चिह्नंब्रवीमिचाद्यायास्तन्मेनिगदतः शृणु २ अपैशून्यंदयाक्रोधश्चापल्यंधृतिरार्जवम् ॥ तेजोभयमहिंसाचक्षमाशौचममानिता ३ इत्यादिचिह्नमाद्यायाआसुर्याःशृणुसांप्रतम् ॥ अतिवादो भिमानश्चदर्पोज्ञानंसकोपता ४ आसुर्याएवमाद्यानिचिह्नानिप्रकृतेर्नृप ॥ निष्ठुरत्वंमदोमोहोहंकारोगर्वएवच ५ द्वेषोहिंसादयाक्रोधऔद्धत्यंदुर्विनीतता ॥ आभिचारिककर्तृत्वंक्रूरकर्मरतिस्तथा ६ अविश्वासःसतांवाक्येऽशुचित्वंकर्महीनता ॥ निंदकत्वंचवेदानांभक्तानामसुरद्विषाम् ७ मुनिश्रोत्रियविप्राणांतथा स्मृतिपुराणयोः ॥ पाखंडवाक्येविश्वासःसंगतिर्मलिनात्मनां ८ सदंभकर्मकर्तृत्वंस्पृहाचपरवस्तुषु ॥ अनेककामनावत्वंसर्वदानृतभाषणम् ९परोत्कर्षास हिष्णुत्वंपरकृत्यपराहतिः ॥ इत्याद्याबहवश्चान्येराक्षस्याःप्रकृतेर्गुणाः १० पृथिव्यास्वर्गलोकेचपरिवृत्यवसंतिते ॥ मद्भक्तिरहितालोकाराक्षसींप्रकृतिंश्रिताः ११ तामसींयेश्रितानराजन्यांतितेरौरवंध्रुवम् ॥ अनिर्वाच्यंचतेदुःखंभुंजतेतत्रसंस्थिताः १२ दैवान्निःसृत्यनरकाज्जायंतेभुविकुंजकाः ॥ जात्यंधाःपंगवोदीना हीनजातिषुतेनृप १३ पुनःपापसमाचारामय्यभक्ताःपतंतिते ॥ उत्पतंतिहिमद्भक्तायांकांचिद्योनिमाश्रिताः १४ लभंतेस्वर्गतिंयज्ञैरन्यैर्धर्मैश्चभूमिप ॥ सु लभास्ताःसकामानांमयिभक्तिःसुदुर्लभा १५ विमूढामोहजालेनबद्धाःस्वेनचकर्मणा ॥ अहंहंताअहंकर्ताअहंभोक्तेतिवादिनः १६ अहमेवेश्वरःशास्ताअहं वेत्ताअहंसुखी ॥ एतादृशीमतिर्नृणामधःपातयतीहतान् १७ तस्मादेतत्समुत्सृज्यदैवींप्रकृतिमाश्रय ॥ भक्तिंकुरुमदीयांत्वमनिशंदृढचेतसा १८ सापिभ क्तिस्त्रिधाराजन्सात्विकीराजसीतरा ॥ यद्देवान्भजतेभक्त्यासात्विकीसामताशुभा १९ राजसीसातुविज्ञेयाभक्तिर्जन्ममृतिप्रदा ॥ यद्यक्षांश्चैवरक्षांसियजंते सर्वभावतः २० वेदेनाविहितंक्रूरंसाहंकारंसदंभकम् ॥ भजंतेप्रेतभूतादीन्कर्मकुर्वंतिकामुकम् २१ शोषयंतोनिजंदेहमंतस्थंमांदृढाग्रहाः ॥ तामस्येतादृशीभ क्तिर्नृणांसानिरयप्रदा २२ कामोलोभस्तथाक्रोधोदंभश्चत्वारइत्यमी ॥ महाद्वाराणिवीचीनांतस्मादेतांस्तुवर्जयेत् २३ ॐतत्सदितिश्रीमद्गणेशगीता० योगोपदेशोनामदशमोध्यायः ॥ १० ॥ ॥ १४७ ॥ श्रीगजाननउवाच ॥ तपोपित्रिविधंराजन्कायिकादिप्रभेदतः ॥ ऋजुतार्जवशौचाश्चब्रह्मचर्यमहिंसन म् १ गुरुविज्ञद्विजातीनांपूजनंचासुरद्विषाम् ॥ स्वधर्मपालनंनित्यंकायिकंतपईदृशम् २ मर्मस्पृक्प्रियंवाक्यमनुद्वेगंहितंऋतम् ॥ अधीतिर्वेदशास्त्राणांवा चिकंतपईदृशम् ३ अंतःप्रसादःशांतत्वंमौनमिंद्रियनिग्रहः ॥ निर्मलाशयताानित्यंमानसंतपईदृशम् ४ अकामतःश्रद्धयाचयत्तपःसात्विकंचतत् ॥ रुद्धैस त्कारपूजार्थंसदंभंराजसंतपः ५ तदास्थिरंजन्ममृतीप्रयच्छतिनसंशयः ॥ परात्मपीडकंयच्चतपस्तामसमुच्यते ६ विधिवाक्यप्रमाणार्थंसत्पात्रेदेशकालतः ॥ श्रद्धयादीयमानंयद्दानंतत्सात्विकंमतम् ७ उपकारंफलंवापिकांक्षद्भिर्दीयतेनरैः ॥ क्लेशतोदीयमानंवाभक्त्याराजसमुच्यते ८ अकालदेशतोपात्रेवज्ञयादीय

तेतुयत् ॥ असत्कारान्वयद्दंभंतद्दानंतामसंस्मृतम् ९ ज्ञानंचत्रिविधंराजन्शृणुष्वास्थिरचेतसा ॥ त्रिधाकर्मचकर्तारंत्रवीमितेप्रसंगतः १०नानाविधेषुभूतेषुमामे
कंवीक्षतेतुयः॥नाशवत्सुचनित्यंमांतज्ज्ञानंसात्विकंनृप ११तेषुवेत्तिपृथग्भूतंविविधंभावमाश्रितः॥ मामव्ययंचतज्ज्ञानंराजसंपरिकीर्तितम् १२हेतुहीनमसत्यं
चदेहात्मविषयंचयत् ॥ असदल्पार्थविषयंतामसंज्ञानमुच्यते १३ भेदतस्त्रिविधंकर्मविद्धिराजन्मयेरितम् ॥ कामनाद्वेषदंभैर्यद्रहितंनित्यकर्मयत् १४ कृतंवि
नाफलेच्छांयत्कर्मसात्विकमुच्यते ॥ यद्बहुक्लेशतःकर्मकृतंयच्चफलेच्छया १५ क्रियमाणंनृभिर्दंभात्कर्मराजसमुच्यते ॥ अनपेक्ष्यस्वशक्तिंयदर्थक्षयकरंचय
त् १६ ॥ अज्ञानाक्रियमाणंयत्कर्मतामसमीरितम् ॥ कर्तारंत्रिविधंविद्धिकथ्यमानंमयानृप १७ धैर्योत्साहीसमोऽसिद्धौसिद्धौचाविक्रियस्तुयः ॥ अहंका
रविमुक्तोयःसकर्तासात्विकोनृप १८ कुर्वन्हर्षंचशोकंचहिंसाफलस्पृहांचयः ॥ अशुचिर्लुब्धकोयश्चराजसोसौनिगद्यते १९ प्रमादाज्ञानसहितःपरोच्छेदपरः
शठः ॥ अलसस्तर्कवान्यस्तुकर्तासौतामसोमतः २० सुखंचत्रिविधंराजन्दुःखंचक्रमतःशृणु ॥ सात्विकंराजसंचैवतामसंचमयोच्यते २१ विषवद्भास
तेपूर्वंदुःखस्यांतकरंचयत् ॥ इच्छ्यमानंतथावृत्त्यायदेतेमृतवद्भवेत् २२ प्रसादात्स्वस्यबुद्धेर्यत्सात्विकंसुखमीरितम् ॥ विषयाणांतुयोभोगोभासतेमृतवत्पुरा
२३ हालाहलमिवांतेयद्राजसंसुखमीरितम् ॥ तंद्विप्रमादसंभूतमालस्यप्रभवंचयत् २४ सर्वदामोहकंस्वस्यसुखंतामसमीदृशम् ॥ नतदस्तियदेतैर्यन्मुक्तं
स्यात्त्रिविधैर्गुणैः २५ राजन्ब्रह्मापित्रिविधमौंतत्सदितिभेदतः ॥ त्रिलोकेषुत्रिधाभूतमखिलंभूपवर्तते २६ ब्रह्मक्षत्रियविट्शूद्राःस्वभावाद्विप्रकर्मिणः ॥ ता
नितेषांतुकर्माणिसंक्षेपात्तेधुनावदे २७ अंतर्बाह्येंद्रियाणांचवश्यत्वमार्जवंक्षमा ॥ नानातपांसिशौचंचद्विविधंज्ञानमात्मनः २८ वेदशास्त्रपुराणानांस्मृ
तीनांज्ञानमेवच ॥ अनुष्ठानंतदर्थानांकर्मब्राह्ममुदाहृतम् २९ दाढ्यंशौर्यंचदाक्ष्यंचयुद्धेपृष्ठाप्रदर्शनम् ॥ शरण्यपालनंदानंधृतिस्तेजःस्वभावजम् ३०
प्रभुतामनवौन्नत्यंसुनीतिर्लोकपालनं ॥ पंचकर्माधिकारित्वंक्षत्रकर्मसमीरितं ३१ नानावस्तुक्रयोभूमेःकर्षणंरक्षणंगवां ॥ त्रिधाकार्माधिकारित्वंवैश्यकर्मसमी
रितं ३२ दानंद्विजानांशुश्रूषासर्वदाशिवसेवनं ॥ एतादृशंनरव्याघ्रकर्मशौद्रमुदीरितं ३३ स्वस्वकर्मरताएतेमत्प्रपूर्त्याखिलकारिणः ॥ मत्प्रसादात्स्थिरंस्थानं
यांतितेपरमंनृप ३४ इतितेकथितोराजन्प्रसादाद्योगउत्तमः ॥ सांगोपांगःसविस्तारोनादिसिद्धोमयाप्रिय ३५ युंक्ष्वयोगंमयाख्यातंनाख्यातंकस्यचिन्नृप ॥
गोपयैनंततःसिद्धिंपरांयास्यस्यनुत्तमाम् ३६ ॥ ॥ कउवाच ॥ ॥ इतितस्यवचःश्रुत्वाप्रसन्नस्यमहात्मनः ॥ गणेशस्यवरेण्यःसचकारचयथोदितं ३७
त्यक्त्वाराज्यंकुटुंबंचकांतारंप्रययौरयात् ॥ उपदिष्टंयथायोगमास्थायमुक्तिमाप्तवान् ॥ इमंयोगोत्तमंयोगंशृणोतिश्रद्धयातुयः ३८ सोपिकैवल्यमाप्नोतियथा
योगीतथैवसः ॥ यइमंश्रावयेद्योगंकृत्वाऽस्यार्थंसुबुद्धिमान् ३९ यथायोगीतथासोपिपरंनिर्वाणमृच्छति ॥ योगीतांसम्यगभ्यस्यज्ञात्वाचार्यंगुरोर्मुखात्
४० कृत्वापूजांगणेशस्यप्रत्यहंपठतेतुयः ॥ एककालंद्विकालंवात्रिकालंवापियःपठेत् ४१ब्रह्मीभूतस्यतस्यापिदर्शनान्मुच्यतेतरः ॥ नयज्ञैर्नव्रतैर्दानैर्नाग्निहोत्रैर्म

हाधनैः ४२ नवेदैःसम्यगभ्यस्तैःसम्यक्ज्ञातैःसहांगकैः ॥ पुराणश्रवणैर्नैवनशास्त्रैःसाधुचिंतितैः ४३ प्राप्यतेब्रह्मपरममनयाप्राप्यतेनरैः ॥ ब्रह्महत्यो
द्यपःस्तेयीगुरुतल्पगमोपियः ४४ चतुर्णांयस्तुसंसर्गीमहापातककारिणां ॥ स्त्रीहिंसागोवधादीनांकर्तारोयेचपापिनः ४५ तेसर्वेप्रतिमुच्यंतेगीतामे
तांपठंतिचेत् ॥ यःपठेत्प्रयतोनित्यंसगणेशोनसंशयः ४६ चतुर्थ्यांयःपठेद्भक्त्यासोपिमोक्षायकल्पते ॥ तत्तत्क्षेत्रंसमासाद्यस्नात्वाभ्यर्च्यगजाननं ४७
सकृद्गीतांपठेद्भक्त्याब्रह्मभूयायकल्पते ॥ भाद्रेमासेसितेपक्षेचतुर्थ्यांभक्तिमान्नरः ४८ कृत्वामहीमयींमूर्तिंगणेशस्यचतुर्भुजां ॥ सवाहनांमायुधांचसम
भ्यर्च्ययथाविधि ४९ यःपठेत्सप्तकृत्वस्तुगीतामेतांप्रयत्नतः ॥ ददातितस्यसंतुष्टोगणेशोभोगमुत्तमं ५० पुत्रान्पौत्रान्धनंधान्यंपशुरत्नादिसंपदः ॥
विद्यार्थिनोभवेद्विद्यासुखार्थीसुखमाप्नुयात् ५१ कामानन्यांल्लभेत्कामीमुक्तिमंतेप्रयांतिते ५२ ॥ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेद्वादशसाहस्र्यांसंहि
तायांॐतत्सदितिश्रीमद्गणेशगीतासूपनिषदर्थासुश्रीमद्योगामृतार्थशास्त्रेश्रीगणेशवरेण्यसंवादेत्रिविधवस्तुनिरूपणंनामैकादशोध्यायः ११ ॥ ॥ १४८
कउवाच ॥ ॥ एवंपूजांसंप्रगृह्यतत्रैवन्यवसद्विभुः ॥ भक्तानांपूरयन्कामान्सदनेराजपूजिते १ ॥ ॥ मुनिरुवाच ॥ ॥ विनायकस्यमाहात्म्येक
थाभिन्नानिरूपिताः ॥ अवतार्यवरेण्यस्यगृहेविघ्नासुरोहतः २ गजासुरमुखप्राप्तिर्वर्णिताचतुरानन ॥ अत्रैवपार्वतीगर्भादाविर्भावोनिरूपितः ३ गजान
नतयादेवसंशयोतोममाभवत् ॥ त्वदन्यःसंशयच्छेत्तानास्त्येवभुवनत्रये ॥ ४ ॥ ॥ कउवाच ॥ ॥ नकार्यःसंशयोव्यासनानाशक्तियुतेविभौ ॥ निजे
च्छावशतोनेकरूपकःकल्पभेदतः ५ शंभुवक्त्राच्चक्रोधाच्चप्रादुर्भूतोगजाननः ॥ गौर्याश्चतेजसोजातउदराच्चक्वचिन्मुने ६ क्वचिद्गौरीमलाच्चापिद्विमुखोद्वि
करःक्वचित् ॥ क्वचित्पंचमुखःक्वापिषण्मुखोदशबाहुकः ७ क्वचिद्बादशहस्तश्चसहस्रभुजमंडितः ॥ आगमेषुसमस्तेषुनानाध्यानानिसंतिहि ८ नचा
त्रसंशयःकार्योविस्मयोवामुनेप्रभौ ॥ शिवाद्ब्रह्माचविष्णुश्चलैंगेजातौनिरूपितौ ९ स्कांदेविधातुर्नेत्राच्चशिवोत्पत्तिर्निरूपिता ॥ विष्णुःशिवंध्याय
तिचशिवोपिविष्णुमेवच १० पंचाक्षरंसमंत्रंचतारकंवदतिप्रभुः ॥ शतकोटिमितंरामचरितंचत्रिधाकृतं ११ मर्त्यलोकेतारकंसस्थापयामासशंकरः ॥
क्वचिच्छिवात्सृष्टिरुक्ताब्रह्मणश्चक्वचिद्धरेः १२ भगवत्याःक्वचित्प्रोक्ताक्वचित्सूर्याद्गजाननात् ॥ क्वचिच्चब्राह्मणःप्रोक्तासर्वेतच्छास्त्रसंमतं १३ संशयंकुरुते
यस्तुसयातिनरकंध्रुवं ॥ ॥ कउवाच ॥ ॥ एवंत्रेतायुगकथाप्रोक्तासर्वामुनेतव १४ इदानीमभिधास्यामिकथांकलियुगाश्रितां ॥ कलिप्रांतेमुनेलो
काभ्रष्टाचारास्तथानृताः १५ ब्राह्मणावेदरहिताःस्नानसंध्याविवर्जिताः ॥ यजनंयाजनंदानंनकरिष्यंतिकर्हिचित् १६ प्रतिग्रहंचदुष्टानांकरिष्यंतिसुदुर्लभ
म् ॥ परापवादंतन्निंदांपरस्त्रीधर्षणंतथा १७ करिष्यंतिजनाःसर्वेविधिलोपंचसर्वशः ॥ विश्वासघातंसर्वत्रकुर्वंतिचजनाध्रुवं १८ विधिलोपेचश
पथंकरिष्यंतिधरातले ॥ नकरिष्यंतिमेघाश्चवृष्टिंकापिमुनीश्वर ॥ १९ ॥ महानदीतीरदेशेकरिष्यंतिक्वचिज्जनाः ॥ योबलीसोप्यबलिनोहरिष्यतिधनं

बलात् २० हरिष्यतस्ततोद्यौचत्रयस्ताभ्यांबलात्पुनः ॥ शूद्रावेदंपठिष्यंतिब्राह्मणाःशूद्रकर्मिणः २१ क्षत्रियावैश्यकर्माणोवैश्याश्चशूद्रकर्मिणः ॥ प्र
तिग्रहंकरिष्यंतिचांडालस्यद्विजातयः २२ दरिद्राश्चभविष्यंतिहाहाभूताविचेतसः ॥ वदिष्यंतिचनमयागृहीतंधनमण्वपि ॥ २३ ॥ गृहीत्वापिचकृत्या
ययाचितारोधनंपरात् ॥ उत्कोचंचगृहीत्वैववृथासाक्ष्यंब्रुवंतिच २४ मतांनिंदांकरिष्यंतिमैत्रींचासद्भिरेवच ॥ वृथामांसस्यभक्ष्यंचकरिष्यंतिद्विजातयः ॥
॥ २५ ॥ उच्छेदःसज्जनानांस्यादितरेषांचवैभवम् ॥ हित्वादेवान्भविष्यंतिजनाःसर्वेतथाद्विकान् २६ ॥ भूतप्रेतपिशाचानांभजनेसक्तमानसाः ॥
वेषान्नानाविधान्कृत्वाभक्षयिष्यंतिवाडवाः २७ केचिच्चक्षत्रियाभिक्षांचरिष्यंत्यकुलोचितां ॥ व्रतानिनियमांश्चापिनाचरिष्यंतिकर्हिचित् २८ वर्णसंकरका
रीणिकर्तारःकर्माणिभूजनः ॥ पतिव्रताभ्रष्टव्रताभविष्यंतिकलौयुगे २९ म्लेछप्रायाःसर्वलोकाःपरद्रव्यापहारिणः ॥ निर्दयाःकुपथासक्ताःसर्वदासत्यवर्जिताः
३० धरित्रीसस्यहीनाचरसहीनामहीरुहाः ॥ पंचमेवाथषष्ठेवावर्षेकन्याप्रसूयते ३१ षोडशाब्दपरंचायुर्भविष्यतितदायुगे ॥ तीर्थानिगुप्तरूपाणिदेवतायतना
निच ३२ एवंपापेप्रवृद्धेतुधर्मोविश्वार्थमात्रकः ॥ भविष्यंतितदादेवाउपवासपरायणाः ३३स्वधास्वाहावषट्कारैर्वर्जिताभयविह्वलाः ॥ यास्यंतिशरणंदेवंगजा
ननमनामयं ३४ स्तुतिंनानाविधांतस्यकरिष्यंतिनतिंबहु ॥ प्रार्थयिष्यंतिदेवेशंसर्वविघ्नविनाशनं ३५ एवंसर्वेविचार्यासौआविर्भावंकरिष्यति ॥ गजाननःशू
र्पकर्णोधूम्रवर्णोपिनामतः ३६ नीलमश्वंसमारुह्यखड्गहस्तोरुषाज्वलन् ॥ कल्पयिष्यतिसेनांसनानारूपांनिजेच्छया ३७शस्त्राणिचमहास्त्राणिकल्पयिष्यत्यय
तः ॥ वधिष्यतिमहाम्लेछान्सेनयास्वेनतेजसा ३८ म्लेच्छभूतांस्तथालोकान्वधिष्यतितदाखिलान् ॥ लीनान्कंदरदेशेषुब्राह्मणान्वन्यभक्षिणः ३९समाना
ज्यप्रपूज्यैतान्भूमिंदास्यतिदेवराट् ॥ सत्कर्मकारिणःसर्वान्विधास्यतिचसज्जनान् ४० तदाधर्ममयंविश्वंभविष्यतिकृतेयुगे ॥ एवंकृत्वाधूम्रवर्णस्ततोंतर्द्धान
मेष्यति ४१ एवंचतुर्युगेव्यासविघ्नेशस्यमहात्मनः ॥ कथितानिचनामानिरूपाणिचतवानघ ४२ कर्माण्यद्भुतरूपाणितस्यचोक्तानिसर्वशः ॥ येषांश्रवणमा
त्रेणमुच्यंतेसर्वजंतवः ४३ अन्यान्यस्यापिरूपाणिनवक्तुंशक्तिरस्तिमे ॥ यत्रवेदाश्चचत्वारोविकुंठास्तत्रकाकथा ४४ ममवामद्दीधस्यापिमहिम्नस्तस्यवर्णने
अनुष्ठानायगच्छत्वंव्यवसायंकरोम्यहम् ४५ ॥ भृगुरुवाच ॥ एवंश्रुत्वासोमकांतव्यासोब्रह्ममुखात्कथाम् ॥ अतिप्रीतमनाःप्राहसर्वपापप्रणाशिनीम् ४६
मुनिरुवाच ॥ नतृप्तिमधिगच्छामिश्रुत्वाख्यानंमहाद्भुतम् ॥ धन्योस्म्यनुग्रहीतोस्मियत्त्वयासर्वसंशयाः ४७ दूरीकृताःकथासंगाद्गणेशचरिताश्रयात् ॥
अमृतस्येवमेतृप्तिःश्रुत्वाश्रुत्वानजायते ४८ अस्यश्रवणमात्रेणजन्मजन्मांतरार्जितम् ॥ दुरितंनंनाशमायातिसर्वेकामाभवंतिच ४९ पूर्वपुण्यबलादस्यश्रव
णंजायतेनृणाम् ॥ नश्राव्यंदुर्जनायेदंपुराणंसर्वसिद्धिदम् ५० एवमुक्त्वानमस्कृत्यपरिक्रम्यस्वयंभुवम् ॥ गृहीत्वाज्ञांयथौव्यासस्तपसेवनमुत्तमम् ५१ यत्र
कंदफलान्यासन्नुत्तमानिजलानिच ॥ नवायुःप्रबलोयत्रनातपोनाग्निरेवच ५२ तेत्रापविष्टैकनिष्ठोजपन्नेकाक्षरंमनुम् ॥ व्यतीयुर्द्वादशाब्दानिमुनेस्तस्यतप

स्यतः ॥ ततःप्रादुरभूत्तस्यपुरतस्तुगजाननः ५३ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेमुनिविसर्जनंनामैकोनपंचाशदुत्तरशततमोऽध्यायः ॥ १४९ ॥ ॥ सो मकांतउवाच ॥ ॥ कथंप्रादुरभूद्देवःपुरस्तस्यमहात्मनः ॥ भृगोतत्सर्वमाख्याहिश्रुत्वापापक्षयोयतः १ ॥ ॥ भृगुरुवाच ॥ ॥ यथातत्पुरतःप्रादु रासीद्देवोगजाननः ॥ तत्सर्वंकथयिष्येहंसादरंशृणुभूमिप २ रक्तमाल्यांबरधरोरक्तांगधानुलेपनः ॥ गजाननोज्वलनयनःसिंदूरारुणमस्तकः ३ अनेकसूर्यसंका शोदिव्यकुंडलमंडितः ॥ अंगदेमुकुटंबिभ्रत्कंकणेशेषमेवच ४ मुनिरित्थंनिरीक्ष्यैवनंनिर्माल्यनयनेपुनः ॥ चकंपेभयसंत्रस्तःस्मृत्वामंत्रंमुमूर्छच ५ ततोब्रवीन्नागमुखोमाभैस्त्वंमुनिसत्तम ॥ यंध्यायसिदिवारात्रौसोहंत्वांसमुपागतः ६ ब्रह्मादीनामगम्योयोवरंदातुंमुनेतव ॥ ॥ भृगुरुवाच ॥ ॥ श्रुत्वेत्थंमधुरांवाणींजहर्षमुनिपुंगवः ७ मूर्द्धानंन्यस्यतत्पादेधन्योहंपितरौतपः ॥ धन्योहंधरणीवृक्षाःपुनःपुनरवीवदत् ८ यतोदृष्टःसर्वरूपोगुणातीतो खिलाश्रयः ॥ चिदानंदघनोनंतोखिलकारणकारणम् ९ एवंस्तुत्वाप्रार्थयन्सवरदंतंगजाननम् ॥ ॥ मुनिरुवाच ॥ ॥ निरस्यभ्रांतिसर्वांमेयच्छभ क्तिंदृढांत्वयि १० अष्टादशपुराणानांयथास्यांकरणेक्षमः ॥ तवापिस्तवनेशक्तिःस्याद्यथातत्कुरुष्वभोः ११ हृदयेवसदेवेशप्रसन्नश्चेन्ममानघ ॥ ॥ गजा ननउवाच ॥ ॥ त्वयायत्प्रार्थितंवत्ससर्वमद्यभविष्यति १२ सर्वमान्योव्यासनामासर्वपावनपावनः ॥ अपरोक्षज्ञानवांश्चभविष्यसिगुरोर्गुरुः १३ ना रायणपरःख्यात्यागुणैःकीर्त्याश्रियापिच ॥ अष्टादशपुराणानांकर्तात्वंहिभविष्यसि १४ तथैवोपपुराणानांतावतांचमुनीश्वर ॥ त्वयापूर्वंदंभवशान्नकृतं ममपूजनम् १५ स्मरणंवाततःस्तंभोजातोवाण्यामहाद्भुतः ॥ धातुर्मुखाच्छ्रुतोयस्मान्महिमातेनमेनघ १६ विलीनंसर्वमधुनाप्रविशामितवोदरम् ॥ भृगुरुवाच ॥ ॥ एवमुक्त्वाप्राविशत्सतन्मुनेरुदरंविभुः १७ प्रकाशमतुलंलेभेसूर्यकोटिसमंमुनिः ॥ दीपयामासकक्षंस्ततोमूर्तिंविधायसः १८ गजाननस्यमहतींप्रासादेस्थापयच्चसः ॥ पूजयामासविविधैरुपचारैःपृथक्पृथक् १९ सिद्धिक्षेत्रमिदंसर्वलोकानांपावनंदृशोः ॥ अनुष्ठानवतांमंत्रनाना सिद्धिप्रदंशुभम् २० एवमुक्त्वाप्यनुज्ञाप्यव्यासोनारायणस्तदा ॥ पुराणंतद्गणेशस्ययच्छ्रुतंब्रह्मणोमुखात् २१ प्राहवैशंपायनायततस्तद्बुविपप्रथे ॥ तदेतदखिलंतेद्यमयापिकथितंनृप २२ नानेनसदृशंकिंचित्पात्रनंत्रिषुविद्यते ॥ लोकेषुपरमानंददायकंनृपसत्तम २३ सोमकांतनचाख्येममिदंदुष्टज नेत्वया ॥ विनीतेषुचभक्तेषुत्वयाख्येयंप्रयत्नतः २४ मयानिरंतरमिदंजप्यतेस्मर्यतेपिच ॥ तवापिकरुणायोगात्कथितंराजसत्तम २५ गजाननध्यान परोनित्यंजपपरोभव २६ ॥ इतिश्रीगणेशपुराणेउत्तरखंडेव्यासानुग्रहसिद्धिक्षेत्रवर्णनंनामपंचाशदुत्तरशततमोऽध्यायः ॥ १५० ॥ ॥ सूतउवाच ॥ एवंश्रुत्वाकथांनित्यंसोमकांतोमुनीश्वरात् ॥ शुष्काम्रमूलेतत्पुण्यंन्यक्षिपज्जलतोनृपः १ गतेसंवत्सरेचूतःपल्लवैःकुसुमैःफलैः ॥ शुशुभेतीवरुचिरःपु राणश्रुतिपुण्यतः २ सोमकांतोदिव्यकांतिस्त्यक्त्वाकुष्ठभवांरुजम् ॥ जक्षतश्चाभवत्पूतिगंधंत्यक्त्वासुगंधवान् ३ निःखेदःसुरभेर्गंधादशदिक्षुप्रसारिणः ॥

बलात् २० हरिष्यतस्ततोद्यौचत्रयस्ताभ्यांबलात्पुनः ॥ शूद्रावेदंपठिष्यंतिब्राह्मणाःशूद्रकर्मिणः २१ क्षत्रियावैश्यकर्माणोवैश्याश्चशूद्रकर्मिणः ॥ प्र
तिग्रहंकरिष्यंतिचांडालस्यद्विजातयः २२ दरिद्राश्चभविष्यंतिहाहाभूताविचेतसः ॥ वदिष्यंतिचनमयागृहीतंधनमण्वपि ॥ २३ ॥ गृहीत्वापिचकृत्या
ययाचितारोधनंपरात् ॥ उत्कोचंचगृहीत्वैववृथासाक्ष्यंब्रुवंतिच २४ मतांनिंदांकरिष्यंतिमैत्रींचासद्भिरेवच ॥ वृथामांसस्यभक्ष्यंचकरिष्यंतिद्विजातयः ॥
॥ २५ ॥ उच्छेदःसज्जनानांस्यादितरेषांचवैभवम् ॥ हित्वादेवान्भविष्यंतिजनाःसर्वेतथाद्विकान् २६ ॥ भूतप्रेतपिशाचानांभजनेसक्तमानसाः ॥
वेषान्नानाविधान्कृत्वाभक्षयिष्यंतिवाडवाः २७ केचिच्चक्षत्रियाभिक्षांचरिष्यंत्यकुलोचितां ॥ व्रतानिनियमांश्चापिनाचरिष्यंतिकर्हिचित् २८ वर्णसंकरका
रीणिकर्तारःकर्माणिभूजनः ॥ पतिव्रताभ्रष्टव्रताभविष्यंतिकलौयुगे २९ म्लेच्छप्रायाःसर्वलोकाःपरद्रव्यापहारिणः ॥ निर्दयाःकुपथासक्ताःसर्वदासत्यवर्जिताः
३० धरित्रीसस्यहीनाचरसहीनामहीरुहाः ॥ पंचमेवाथषष्ठेवावर्षेकन्याप्रसूयते ३१ षोडशाब्दपरंचायुर्भविष्यतितदायुगे ॥ तीर्थानिगुप्तरूपाणिदेवतायतना
निच ३२ एवंपापेप्रवृद्धेतुधर्मोविश्वार्थमात्रकः ॥ भविष्यंतितदादेवाउपवासपरायणाः ३३स्वधास्वाहावषट्कारैर्वर्जिताभयविह्वलाः ॥ यास्यंतिशरणंदेवंगजा
ननमनामयं ३४ स्तुतिंनानाविधांतस्यकरिष्यंतिनतिंबहु ॥ प्रार्थयिष्यंतिदेवेशंसर्वविघ्नविनाशनं ३५ एवंसर्वेविचार्यासौआविर्भावंकरिष्यति ॥ गजाननःशू
र्पकर्णोधूम्रवर्णोपिनामतः ३६ नीलमश्वंसमारुह्यखड्गहस्तोरुषाज्वलन् ॥ कल्पयिष्यतिसेनांसनानारूपांनिजेच्छया ३७शस्त्राणिचमहास्त्राणिकल्पयिष्यत्यय
तः ॥ वधिष्यतिमहाम्लेछान्सेनयास्वेनतेजसा ३८ म्लेच्छभूतांस्तथालोकान्वधिष्यतितदाखिलान् ॥ लीनान्कंदरदेशेषुब्राह्मणान्वन्यभक्षिणः ३९समाना
ज्यप्रपूज्यैतान्भूमिंदास्यतिदेवराट् ॥ सत्कर्मकारिणःसर्वान्विधास्यतिचसज्जनान् ४० तदाधर्ममयंविश्वंभविष्यतिकृतेयुगे ॥ एवंकृत्वाधूम्रवर्णस्ततोंतर्द्धान
मेष्यति ४१ एवंचतुर्युगेव्यासविघ्नेशस्यमहात्मनः ॥ कथितानिचनामानिरूपाणिचतवानघ ४२ कर्माण्यद्भुतरूपाणितस्यचोक्तानिसर्वशः ॥ येषांश्रवणमा
त्रेणमुच्यंतेसर्वजंतवः ४३ अन्यान्यस्यापिरूपाणिनवक्तुंशक्तिरस्तिमे ॥ यत्रवेदाश्चचत्वारोविकुंठास्तत्रकाकथा ४४ ममवामद्दीधस्यापिमहिम्नस्तस्यवर्णने
अनुष्ठानायगच्छत्वंव्यवसायंकरोम्यहम् ४५ ॥ भृगुरुवाच ॥ एवंश्रुत्वासोमकांतव्यासोब्रह्ममुखात्कथाम् ॥ अतिप्रीतमनाःप्राहसर्वपापप्रणाशिनीम् ४६
मुनिरुवाच ॥ नतृप्तिमधिगच्छामिश्रुत्वाख्यानंमहाद्भुतम् ॥ धन्योस्म्यनुग्रहीतोस्मियत्त्वयासर्वसंशयाः ४७ दूरीकृताःकथासंगाद्गणेशचरिताश्रयात् ॥
अमृतस्येवमेतृप्तिःश्रुत्वाश्रुत्वानजायते ४८ अस्यश्रवणमात्रेणजन्मजन्मांतरार्जितम् ॥ दुरितंनंनाशमायातिसर्वेकामाभवंतिच ४९ पूर्वपुण्यबलादस्यश्रव
णंजायतेनृणाम् ॥ नश्राव्यंदुर्जनायेदंपुराणंसर्वसिद्धिदम् ५० एवमुक्त्वानमस्कृत्यपरिक्रम्यस्वयंभुवम् ॥ गृहीत्वाज्ञांययौव्यासस्तपसेवनमुत्तमम् ५१ यत्र
कंदफलान्यासन्नुत्तमानिजलानिच ॥ नवायुःप्रबलोयत्रनातपोनाग्निरेवच ५२ तेत्रापविष्टैकनिष्ठोजपन्नेकाक्षरंमनुम् ॥ व्यतीयुर्द्वादशाब्दानिमुनेस्तस्यतप